Tarka Tandava

Tarktandavam

Parichchheda1

श्रीव्यासतीर्थविरचितम्

।। तर्कताण्डवम् ।।

श्रीराघवेन्द्रतीर्थकृतन्यायदीपाख्याव्याख्यासमलङ्कृतम्

मुखोपन्यासः

व्यासत्रयनाम्ना प्रथितेषु चन्द्रिकान्यायामृततर्कताण्डवाख्येषु ग्रन्थेषु कृतविमर्षानां महोदयानां विचारचातुरी स्वसिद्धान्तवैखरी सुतत्वसाधुरी च सुगमतया भवतीति नाविदितमुद्घोषयामो वयम् । त्रिष्वप्येषु तर्कताण्डवाख्योयं वादग्रन्थादिराजः निगमोपकारतया शिष्टप्ररिगृहीतासु तर्कशास्त्रपरम्परास्वागन्तुकानां, ‘ वेदाः केनचित् कृताः । न प्रमाणम् । अपि तु सहकारिमहिन्मैव प्रमाणम् । ईश्वरः परिमितगुणः । दुःखध्वंसो मोक्षः‘इत्यादिमविषयान् निगममहिमापकर्षकान् प्रतिपादयतां प्रबन्धानां दूषणीयतां, निगमविरोधाकूतानामादरणीयतां च युक्त्यैव समर्पयति । यदस्य नाम्नि; तर्के ताण्डवं, तर्कस्य तण्डवं, तर्के ताण्डवमिति च त्रिधा विग्रहीतव्यमास्ते । तेन हि सप्तम्या अधःकारस्य, षष्ट्या भावाविष्करणचेष्टाविशेषरूपताण्डवान्वयिनः सम्बन्धस्य, अनुमार्तकतर्कशब्देन युक्तेश्च सुलभो लाभः ।

कथमस्मिन्कल्पनीवनावनपथे निःशङ्कसञ्चरणमादरश्चेति शङ्का परमवशिष्यते । तत्रैतद्व्यानस्य दिशं प्रत्यङ्गुलि प्रसारयामः । व्याख्यानस्यास्य, तात्पर्यचन्द्रिकायाः प्रकशस्येव, सुधायाः परिमलस्येव च नर्तनोपकारकवस्तुनाम्ना न नामाभिहितम् । अपि तु मुलनाम्नोपि स्वनाम्नैव व्याचिख्यासया, शुष्कन्यायं दीपयति दहतीति, सन्न्यायं प्रकाशयतीति, न्यायेन युक्त्या प्रकाशत इति च सुलभत्रिविवारणं

न्यायदीपनामैव । नैतवदेव सन्ति च वाक्यानि। सम्पुटेस्मिन् द्वितीयपुटे चतुर्दशतमपङ्केः ‘ अत्र न्यायचिन्तापरे ग्रन्थे’ इत्यारम्य ‘ ब्रह्मतन्त्रोक्तप्रमेयनिर्णयोपयुक्तप्रमाणन्यायचिन्तापरत्वात्तद्विषयादिनैवास्य विषयादिमत्ता’ इति; तृतीयसम्पुटे नवमाङ्कौ ‘ ताण्डवकरणस्य प्रसञ्जकं पूर्वरङ्गं निबध्नाति’इति च । द्वितीयसम्पुटे उपयुक्तचिन्तापदाभ्यां
ब्रह्मतन्त्रा(वेदान्ताना)नुकूलाननुकूलन्यायोर्युक्तायुक्तत्वाविमर्शनस्य
तृतीयपुटपङ्क्त्या नर्तनार्थविवक्षायाः, सर्वत्र युक्त्यनुधावनस्य चावगमः सुलभः।।
इदङ्महिम्नोस्य ग्रन्थस्य प्रथमं सम्पुटमिदानीं प्रकाशयामः । तत्र प्रथमतः ग्रन्थं
ग्रन्थकर्तारं चाधिकृत्य कञ्चन मुखोवन्यासमारचयेम ।। आस्तामनन्तरं विपुला ग्रन्थविचारणा । कर्तुरपि विचारणे सङ्कुचितैवास्मदीया प्रवृत्तिः। यतः प्रचीनः सोमनाथकविवरेण्यः व्यासविजयाख्यकाव्ये सुविशालमुपाश्लोकयत् । उपलभमाहे
च मुद्रितं काव्यमिदमिदानीम् ।।
सुविचारविचारणाविवेकशौण्डस्यास्य तर्कताण्डवस्य; अपरेषां- १. न्यायामृतम्,
२. तात्पर्यचन्द्रिका, ३. तत्वविवेकटीकामन्दारमञ्जरी, ४. उपाधिकण्डनटीकामन्दारमञ्जरी, ५. मायावादखण्डनटीकामन्दारमञ्जरी, ६. मिथ्यात्वानुमानखण्डनटीकामन्दारमञ्जरी, ७. भेदोज्जीवनम्, इत्येषामपि ग्रन्थामनां ग्रथयितारः पदवाक्यप्रमाणज्ञाः सम्प्रदायार्थकोविदाः व्यासराजमुनयः ।
एभ्यः पारव्राज्यप्रदातारः -
‘कंसध्वंसिपदाम्भोज संसक्तो हंसपुङ्गवः ।
ब्रह्मण्यगुरुराजाख्यो वर्ततां मम मानसे’ ।।

इति तात्पर्यचन्द्रिकादावादृता ब्रह्मण्यतीर्थमुनिवरेण्याः । विद्यागुरवस्तु सर्वशास्त्रविशारदाः ज्ञानभक्तिवैराग्यादिगुणगुम्भिताः श्रीपादराजाः इति विश्रुता लक्ष्मीनारायणमुनयः । इममप्यभिप्रयन्तिग्रन्थकारा एव
न्यायामुते -
'ज्ञानवैराग्यभक्त्यादि कल्याणगुणशालिनः ।
लक्ष्मीनारायणमुनीन् वन्दे विद्यागूरून् मम' ।। इति ।।
एतेषामन्तेवासिन अनेके अवर्तन्त । तेषु चतुरधिकशतानां ग्रन्थानां निर्मातरो विजयीन्द्रसंयमीन्द्राः,
गुर्वर्थदीपिकायुक्तिमाल्लिकाद्यनेकग्रन्थकतारो वादिराजस्वामिनश्च सुप्रसिद्धाः ।।
क्रिस्तशकषोडशशतमाने भारतभूमिमिमे मूर्तितोप्यलमकुर्वन्निति शासनसंपादितो निर्णयः ।'विजयनगराधीशकृष्णदेवराजेन गौरपुराभिदो ग्रामः व्यासराजस्वामिभ्यः
नवचत्वारिंशतदधिकचतुःशतोत्तरैकसहस्रतमे शकाब्दे दत्तः'इति हि शासने प
ठन्ति । ग्रन्थैरेभिरखिलानुपकुर्वतामेषां विशेषतः सर्वे मध्वमतावलम्बिन अधमर्णा एव ।।
अयमपि तु कथासंग्रहः पण्डितरत्नबिरुदाङ्कितविद्वद्वरगौडगोरि वेङ्कटपमणार्यरचितचन्द्रिकाप्रकाशप्रसराख्यग्रन्थस्य भूमिकात उद्धृतः ।।
व्यसतीर्था एते गनशास्त्रे कर्णाटककविकर्मणि च सुकृतपरिचया इति एभिःकृतगानगाथापरिशीलनेन निश्चिनुमः। अत एषां शिष्यपरंपरे द्वे । गीर्वाणभाषया द्वैतसिद्धान्तप्रचारकाणामेका । कर्णाटकभाषया द्वैतसिद्धान्तप्रचारकाणामपरा । प्रथमपरम्परां विजयीन्द्रादयाः पण्डितप्रकाण्डा प्रथमपरिगणनाः । द्वितीयायां प्रसिद्धतमपुरन्दरदासादयः । यैः कृतगीतिकामेव सर्वे गानाभ्यासिनः प्रथममवलम्बन्ते ।

पुरंदरदासादयोपि नानाधीतगीर्वाणप्रबन्धाः । अभ्यस्तवेदान्तशास्त्रा एव । परंलोकोपकाराय कर्णाटकभाषया प्रबन्धानबन्धयन् ।।

ततः प्रकृतग्रन्थमिममधिकृत्य विचारयिष्यामः । तर्कताण्डवस्येत्थं नामकरेण तदनुगुणत्वे च पूर्वमेव किंचिदलिखाम । इदानीमत्र प्रकरणविभाग, प्रतिपादनीयं,

प्रतिपादनापारिपाटां च निरूपणायानेष्यामः ।।

विभागः - आदौ प्रत्यक्षपरिच्छेदः शब्दपरिच्छेदः अनुमानपरिच्छेदः इति त्रिधा परिच्छेदनाम्ना विभागः कृतः । ४८७ पुटे ७ पङ्क्त्यौ, ४९० - १२ पङ्क्त्यौ ५०५ - ५ पङ्क्त्यौ च व्याख्याने प्रथमद्वितीयतृतीयशब्दैः परिच्छेदशब्दोत्तराण्येव नामानि व्यक्तीभवन्ति हार्दं किंचिदस्ति एव सुव्यक्तमिदम् ।।

परिशीलितेस्मिन् ग्रन्थे प्राथो विष्णुतत्वनिर्णयस्य प्रमाणनिरूपणवाक्यानां नानाविवरणान्युपलभ्यन्ते । तत्र 'सदागमैक'इति श्लोकेन हरिं स्तुत्वा तत्रोक्तविशेषणानां तत्कोटिप्रविष्टानां च समर्थनायोत्तरोद्योगः, परिच्छेदनाम्नैव विभागः, तेपि त्रय एव हि वर्तन्ते । अत्रापि प्रथमतः 'स्वतप्रमाणैः'रिति श्लोकः, तत्र श्रीरमणविशेषणकोटिप्रविष्टानां समर्थनार्थाम्भस्च वर्तते । परिच्छेदत्रयकृतिरपि तद्वभागकरणमनुरुणद्धीति वयमुत्प्रेक्षामहे । एतत्सम्पुटान्तिमग्रन्थपर्यालोचनया 'स्वतः'इत्यादिश्लोकपूर्वोर्धोक्तस्थापनायैतावान्प्रबन्ध इति सुव्यक्तं भविष्यति । 'तदेवं वर्णस्य गुणत्वे उक्तरीत्या ग्रहणासम्भवात् नित्यविभुद्रव्यात्मकवर्णसमुदायात्मकस्य

वेदस्यापौरूषेयत्वं युक्तमिति'इति मूले । 'युक्तमिति । तथाचाम्नायैरादिवर्जितैरित्युक्तं साध्विति भावः 'इति व्याख्यायां चास्ति ।।

परिच्छेदेष्वप्येष्वान्तराळिकान् षड्विभागान् तत्तद्विषयविवेचनानुगुणैर्वादशब्दोत्तरैर्नामभिरुपलभामहे । त इमे -

१. प्रामाण्यवादः

२.वेदापौरुषेयत्ववादः
३. ईश्वरवादः
४.वर्णवादः
५. समवायवादः
६. निर्विकल्पवादः । इति ।
षट्स्वप्येषु द्वात्रिंद्विभागाः सन्ति । तेषां'स्वमते ज्ञाप्तौ स्वतस्त्वनिरुक्तिः'इतिरीत्या विषयानुगुणान्येव नामानि तत्तदन्ते लिखितान्यवलोक्यन्ते । विषयानुक्रमणिकायां तानि स्पष्टानि । यथा महाविभागानां नामसु समानः परिच्छेगशब्दः. यथा च तदल्पानां मध्यविभागानां नामसु वादशब्दः, एवमेवान्तिमविभागानां नामस्वपि समानोऽप्रतिकूलार्थदः कश्चन शब्दो भवेदेव । तेन प्रथमाद्वितीयादिसंख्याशब्दान्योजयित्वाह्वयामेत्यपरमप्यनुकूलम् ।
भगवान् बादरायणः महाभारतेपर्वान्तैः पौलोमास्तिकादिशब्दैरल्पविभागान्, तादृशैः आदिसभादिशब्दैरनल्पविभागांश्चोररीचकार, इमे व्यालमुनयोप्यल्पोभयगणघटितानां नामस्वन्तमप्रतिकूलार्थं वादशब्दमेवानुमन्यत इत्यस्मान् प्रतिभाति नायमध्वास्मदुपज्ञः । न्यायदीवकर्त्रैव कृतपदाङ्कः । तत्र चतुर्थपुटे अष्टमाङ्कौ 'अत्र स्वतः प्रमाण्यज्ञप्तिवादपर्यन्तं'इति; १०८ तमपुटे ११ पङ्क्तौ 'अतीतवदोक्तदिशा निःशङ्कप्रवृत्त्यर्थं, अत्र वादे उक्तदिशा'इति; ३७८ तमपुटे ६ पङ्क्तौ 'व्यक्तं चैतद्वा (१) दान्ते ग्रन्थे एव 'इति च पश्यामः ।
स्वतन्त्रवादग्रन्थे न्यायामृतेप्येषैव रीतिरिति, ४५९ तमपुटे ८ मपङ्क्तौ 'न्यायामृते असतो निषेदप्रतियोगित्वसमर्थनवादे'इति व्याख्यानस्यास्य वाक्यविमर्शका अभ्युपगच्छेयुः । मूलेपि केषिचित्पुस्तकेषु १८४ तमपुटे ९ मपङ्क्तौ 'इत्युत्पत्ति स्वतस्त्ववादे'इत्यस्ति ।।
आस्तामयं विचारः । इत्थमस्ति महावादेषु विन्यस्तानामणुवादानामियत्तानिर्णयः।।

प्रथमे प्रामाण्यवादे ..... अष्टादश १८
द्वितीये ..... उत्तरास्त्रयः ... ३
तृतीये ..... अनन्तर एक एव १
चतुर्थे ..... ततः षट् ६
पञ्चमे ..... उपरि द्वौ २
षष्टे ..... अवशिष्टौ ..... २ इति ।
प्रतिपादनीयः.
आदावेव नामानिर्वचनाव्याजेन प्रतिपादनीयो विषयः सामान्यतः प्रदर्शितप्राय एव। केवलनैयायिकाभिधानानामनृसृतवेदानां च ज्ञानज्ञानसाधनविषये यत्रयत्र विसंवादस्तत्समीकरण एव ग्रन्थकर्तुर्मुख्योभिप्रायः । तेषांस्तेषां संपुटानां प्रकाशनवेलायां विशेषतस्तांस्तान्विषयान् प्रतर्शयिष्यामः ।।
प्रकृतसंपुटे अयं विषयविशेषः .
प्रत्यक्षखण्डप्रत्यक्षपरिच्छेदशब्दाभ्यामपि संकेतितेस्मिन्संपुटे प्रत्यक्षज्ञानानां, तत्साधनानां, तत्प्रामाण्यानां, ज्ञेयानां च निरूपणं न्यायतः संप्राप्तम् । ज्ञानाज्ञेयसाधनानि प्रमाणलक्षणपद्धत्यादिभिरेव सुखावबोधनीति प्रामाण्यमेवोर्वरितम् । तत्रापि प्रामाण्यस्वरूपविषये न तादृशो विवादः । अपि तु
कथमस्योत्पत्तिः ज्ञप्तिश्चेत्यत्रैव । अतः स एव विषयः सामान्यरूपेण विचारपथपान्थ इति सुष्ठु पश्यामः नहि सामान्याकारेण चर्चितं प्रत्यक्षप्रामाण्यत्वादिरूपविशेषाकारेण न सिध्यति ।।
प्रत्यक्षपरिच्छेदे प्रत्यक्षप्रमाण्यविचार एवानुरूपः । न तु शाब्दप्रमाण्यादेः । सत्यम् । तत्तत्परिच्छेदे तत्तत्प्रमाण्यमेव यदि न्यरूपयिष्यन् तदा, प्रमाण्यसामान्यस्य न स्वतस्त्वम् कथं प्रमाण्यविशेषस्येति शङ्कावशिष्टाभविष्यत् । अतः

प्रथम्यात्सामान्यविचारेणैवविशेषशङ्काया अपि शान्तेरत्रैव प्रमाण्यसामान्यनिरूपणं नानुपपन्न मित्युत्पश्यामः -

तत्रापि ---

(क) पामाण्यं स्वत इति वेदान्तिनः

,, परत इति नैयायिकाः

(ख) वेदाः अपौरुषेया नित्याश्चेति वेदान्तिनः

ईश्वरोच्चरिता अनित्या इति नैयायिकाः

(ग) ईश्वरस्य सार्वज्ञ्यादिकं वेदेनैव सिद्ध्यतीति वेदान्तिनः

धर्माग्राहकानुमानैरिति नैयायिकाः

(घ) वर्णाः नित्यविभुद्रव्याणीति वेदान्तिनः

अनित्या गुणा इति नैयायिकाः

(ङ) वर्णः संयोगेन ज्ञेय इति वेदान्तिनः

समवायेनेति नैयायिकाः

(च) निर्विकल्पज्ञानं नास्तीति वेदान्तिनः

अस्तीति नैयायिकाः

इति षोडा विप्रतिपत्तयः सन्ति । तत्र निर्णयायैव वादानामङ्गीकारः ।। प्रमाण्यविषयोयं परिच्छेद इत्युक्त्वा वेदेश्वरादीनां विचारणे कः प्रसङ्गः इति परं शङ्कोन्मीलति । तामेवं प्रतिब्रूमः ।।

प्रक्रान्ते प्रमाण्यस्वतस्त्वे याया बाधकाशङ्काः समापतन्ति तासामसमीकरणे सिद्धान्तस्य न सुस्थापना भविष्यतीति वादपञ्चकानां समाश्रयणमिति । ततश्चैवं पूर्वपूर्ववादानामुत्तरोत्तरवादानुषङ्गिता ।।

ज्ञानज्ञानसाधनानां प्रामाण्यस्वतस्त्वे निरूपणीये वेदेपि तदनुवर्तमानं वेदनित्यत्वापौरुषेयत्वाभ्यां सुव्यवस्थापितम् । वेदस्य पौरुषेयत्वादिदमसंगतमिति शङ्कापनोदाय द्वितीयस्य वेदापौरुषेयत्ववादस्य रचना । पौरुषेयत्वे यानुपपत्तिस्तामेवं परिहरामीति प्रतिवादिनः प्रत्यवस्थाने तृतीयस्य वादस्यारम्भः।

वर्णानामनित्यत्वत्तत्समुदायरूपवेदानामप्यनित्यत्वमिति प्रश्ने; शब्दोनित्यविभुद्रव्यं, ध्वनिराकाशगुणः, इति प्रतिपादयतश्चतुर्थस्य । यदि शब्दो नाकाशगुणः तर्हि श्रोत्रेणाकाशेन न समवायसंबन्ध इति कस्तं श्रोत्रेण जानीयादिति कोलाहलप्रशमनाय समवायनिषेधयितुः पञ्चमस्य । समवायाभावे निर्विकल्पक सविकल्पकभेदेन प्रत्यक्षप्रमाद्वैविध्यमुन्मूलितं भवतीत्युद्घोषस्य स्वेष्टतां प्रथमतः षष्ठस्य चेति ।।

प्रतिपादनपरिपाटी.

विषयाचलनरीतिमेकदेशे प्रमाण्यवादे दिक्प्रदर्शनेन प्रदर्शयिष्यामः ।।

'स्वतःप्रमाणैः'इतिश्लोके प्रमाण्यस्य स्वतस्त्वं प्रकान्तम् । प्रमाणशब्दः यदि भावसाधनस्तदा प्रमाण्यं ज्ञनधर्मः । अथ करणसाधनस्तर्हि ज्ञानसाधनधर्मः । द्विविधेप्यस्मिन् प्रामाण्ये ज्ञप्तौ स्वतस्त्वं, उत्पत्तौ स्वतस्त्वं चेति द्वयीरितिरस्ति ।

अन्ततो ज्ञनगतस्य ज्ञप्तौ स्वतस्त्वं उत्पत्तौ स्वतस्त्वं करणगतस्य ज्ञप्तौ स्वतस्त्वं, उत्पत्तौ स्वतस्त्वं चेति चीतुर्विध्यमागतम् । क्रमश एषां निरूमणमारच्यते ।।

तच्च ---

किं तत्स्वतस्त्वं नाम ?

प्रकारान्तरे कानुपपत्तिः ?

किं प्रमाणम् ?

अनुपपत्तीनां कथं परिहारः ?

परतस्त्वं कुतो न ?

इति शङ्कोत्तराभ्यां सुरुचिरं भविष्यतीति तथैवानुधावति विचारणाप्रवाहः ।।

सर्वत्रापि स्वतस्त्वं नाम सहजत्वं, औत्सर्गिकत्वं वा, न त्वितरापेक्षणेनाहितत्वमितिसारम् । अत एव द्वादशतमे पुटे 'सहजत्वात्

प्रमाण्यग्रहणस्यौत्सर्गिकत्वरूपस्वतस्त्वासिद्धि'रिति, २०३ तमपुटे, 'प्रमाजनकशक्तिः सहजा नतु भ्रमजननशक्तिवदाधेये 'ति चास्ति ।।

१. ज्ञानप्रमाण्यस्य ज्ञप्तौ स्वतस्त्वम् ---

एतच्च त्रिधा निरवक् । 'याथार्थ्यरूपस्य तत्तज्ज्ञानप्रमाण्यस्य ग्राह्यप्रमाण्यविरोध्युपस्थापकसामग्र्यसमवहितग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषायकसाक्षिज्ञानविषयत्वनैयत्यम्'इत्येकम् । 'तत्तज्ज्ञानप्रमाण्यस्य ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकसाक्षिज्ञानविषयत्वयोग्यत्वम् 'इत्यपरम् ।

नैयायिका यदाकारं ज्ञानमनुव्यवसायं मन्यन्ते तदेवात्र साक्षिशब्दितम् । स साक्षी यदि ज्ञानं गृह्णीयात् तर्हि तत्प्रामाण्यमपि गृह्णात्येव । यथा स्वयं गन्तुर्गजस्य कण्टकापसरणं प्रयोजकमेव न तु करणं तथा
प्रामाण्यविरोध्युपस्थापकनिवारणमपि । इति प्रथमनिरुक्त्या पर्यवसितोर्थः । द्वितीयया तु अग्नेर्दाहकशक्तिवत् साक्षिणी प्रामाण्यग्रहणशक्तिरस्ति । अग्नेः प्रतिबन्धकाददाहकत्ववत् अस्यापि प्रामाण्याविषयता । तथापि करतलादौ दाह्यतवत् प्रामाण्येपि साक्षिग्राह्यता । इति साक्षिविषयतायोग्यत्वं स्वतस्त्वमिति फलितम् । तृतीया निरुक्तिस्तु न स्वमतासाधरणेत्यास्ताम् ।।

२. प्रकारान्तरे अनुपपत्तिः ---

'तदप्रामाण्यग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं स्वतस्त्वम् । तदभावश्च परतस्त्वम् । इति मणौ पूर्वपक्षे मीमांसकानां स्वतस्त्वं निरुक्तम् । तस्यात्रान्ततो दूषणमिदभिहितमस्ति । 'तत्'इति शब्देन प्रकरणप्राप्तघटज्ञानं यत्र जायते तत्र तत्प्रामाण्यं
न भासते, ज्ञानं परं प्रतीयत इति बाध इति ।।
तज्ज्ञानविषयकज्ञानाजन्यजन्यज्ञानविषयत्वमिति परिष्कारोपि केनाप्यजन्येश्वरज्ञानेन स्वेष्टस्यानुव्यवसायस्यापि जन्यत्वानुपपन्नार्थकः।।

अतः तज्ज्ञानविषयक जन्यज्ञानेत्याद्युक्तौ, उभयज्ञ जन्यपदत्यागेन अजन्यत्वस्य स्वानुकूलतया निर्वचने वा बाधादिदोष एवोक्तः । सर्वं ज्ञानं गुण इति वाक्ये प्रयुक्ते तादृशमेव शब्दज्ञानं जायते । तदनुव्यवसायेन तत्प्रामाण्यमवगाह्यत इति स्थितिः । अयमनुव्यवसायः अत्र यद्विशेषणमुक्तं तादृशो न भवतीति सारम् ।।

३. स्वतस्त्वे प्रमाणम् ---

'ज्ञानप्रमाण्यं स्वतो ग्राह्यं परतोऽगृह्यमाणत्वे सति गृह्यमाणत्वात् यद्यदन्येनागृह्यमाणत्वे सति ग्राह्यं तत्तेन ग्राह्यं यथा चक्षुरन्येनागृह्यमाणं रूपं चक्षुर्ग्राह्यम्' इत्यादि प्रथमस्वतस्त्वनिरुक्त्यनुरोधेन; 'विमतोऽनुव्यवसायः स्वग्राह्यज्ञानप्रामाण्यविषयकिरणयोग्यः अनुव्यवसायत्वात् गृहीतप्रमाण्यसमानविषयकज्ञानान्तरानुव्यवसायवत् 'इत्यादि द्वितीयानुरोधेन चोक्तम् ।।

केवसतर्कसरण्या प्रतिपादिकानां विषयाणां ललितवचनानुवादो न सुकरः सूपयुक्तेश्चेति तांस्तथैव परित्यजामः ।।

४. प्रामाण्यस्वतस्त्वे अनुपपत्तिपरिहारः ----

इदं रजतं जानीमेत्येकोऽनुव्यवसायः । एतदनन्तरं रजतं ज्ञाने प्रकारो वा न वेति न संदेहः । अतः रजतत्वप्रकारकत्वं न बहिरर्थः । अनुव्यवसायस्य विषयश्चैतत् । रजतत्वविशिष्टं न वा संदेह उदेति । अतो रजतत्ववैशिष्ट्यं बहिरर्थः । नानुव्यवसायविषयः । रजतत्ववैशिष्ट्यादिकं प्रमाण्ये प्रविष्टमास्ते । अतः कथं प्रमाण्यस्वतस्त्वसाधकानुमानैः प्रमाण्यमनुव्यवसायविषय इति साधनम्? एवं बाधादिति शङ्कायाम्; व्यवसाये रजतत्ववैशिष्ट्यग्राह्यहित्वं केन प्रमाणेन सिद्ध्यतिअनुव्यवसायेनेति ब्रूयात् । यद्यनुव्यवसायः तदविषयः तस्य सिद्धिरेव ? न स्यादिति दिशा परिहारः ।।

५. ज्ञाने जाते प्रथमतः प्रमाणं न वेति संशयो भवति । स नोदियात् । ज्ञानग्रहणवेलायामेव प्रमाण्यस्थापरित्यागात् । इत्यन्यानुपपत्तिः ।

प्रतिबन्धकाभाव एव प्रामाण्यग्रहणनियम उक्तः । न तु प्रतिबन्धकसत्वे । प्रमाण्यसंशयस्थले विरोधी वर्तत इति न प्रमाण्यं विषयो भवति, अतः संशयः इत्यादिदिशा परहारः ।।

६. प्रामाण्यस्वतस्त्वे ये हेतव उक्तास्ते सन्तु, साध्यामाभूवन् इत्यप्रयोजकशङ्काया इत्थं परिहारः ।। महति कार्ये यागादौ निष्कम्पं प्रवर्तितुं वेदादौ प्रामाण्यमवश्यवेद्यम् । तथाचैकस्मिन् प्रामाण्यमितरेण, तत्रान्येन, तत्रापरेणेत्यनवस्था स्यादिति परतस्त्वं प्रमाण्यस्य परित्यज्य स्वतस्त्वमेवाभ्युपेयमिति ।।

परतस्त्वं कुतो न ?

७. प्रमाण्यपरतस्त्वे अप्रामाण्यशङ्कापरिहारणाय प्रमाण्यनिश्चयावश्यकतया उक्तरीत्यानवस्था एको दोषः ।।

८. प्रामाण्यमनुमेयं चेत् कथं प्रथमतः प्रामाण्यज्ञानं, साध्याप्रसिद्धेरित्यपरो दोषः ।।

९.

'स्वाश्रयविषयकनिश्चयावधिकतृतीयक्षणवृत्तिसमानाधिकरण्यसंशयविषयी
-

भतं ज्ञानप्रमाण्यं, ग्राह्यज्ञानप्रकारप्रकारतया तद्वद्विशेष्यतकतया च स्वाश्रयग्राहकतयावज्ज्ञानाग्राह्यं,

स्वाश्रयविषयावधिकतृतीयक्षणवृत्तिसमानाधिकरणसंशयकोटित्वात्,

अप्रामाण्यवत्'

इत्यस्य अप्रामाण्यं स्वतो न गृह्यते । ज्ञनानन्तरं तृतीयक्षणे अप्रामाण्यसंशयोदयात् । तथा प्रमानन्तरं तृतीयक्षणे क्कच्त्प्रामाण्यसंशयोदयात्प्रामाण्यमपि न स्वतः इति सारम् । इत्यपरः प्रत्युद्गमः । तस्येत्थं परावर्तनम् । अत्र

साध्ये स्वाश्रयग्राहकयावज्ज्ञानपदं स्वेष्टामनुमितिमपि सङ्गृह्णातीति तदग्राह्यत्वसाधनमपसिद्धान्तदोषकबलितम् ।

बाधो व्याघातश्चेति । रीत्यानवैनयैवानुमानान्तराण्यपि दुष्टनीति ज्ञानप्रमाण्यस्य ज्ञप्तौ परतस्त्वशङ्का न सुस्थिरा ।।

उत्पत्तौ ज्ञानप्रमाण्यस्वतस्त्वम्.

अस्मिन् स्वतस्त्वनिर्वचने न तादृशः प्रयासः । पूर्वपक्षानुमानेनैव साध्यविपरीतस्य तस्य सुखावबोधो भविष्यतीत्यत्र तदनिरुच्य १५४ तमपुटे अष्टमपङ्क्तौ 'ज्ञानजनकमात्राधीनजन्मत्वं स्वतस्त्व'मित्युक्तम् ।। पूर्वस्मिन् स्वतस्त्वनिरूपणे अनुकूलान्युक्त्वा प्रतिकूलानां परिहरणमित्यनुलोम आदृतः । इदीनीं प्रतिकूलानि परिहृत्यानुकूलानां निरूपणमिति प्रतिलोम आद्रियते ।।

तथाचादौ परतस्त्वनिरासः.

१०. अनित्यप्रमा ज्ञानहेत्वतिरिक्तहेतुजन्या कार्यत्वे सति तद्विशेषत्वात् अप्रामाण्यवत् । इत्यादीन्यनुमानानि परतस्त्वसाधकानि वर्तन्ते । यथा अप्रमा कार्यं ज्ञानविशेषोपीति सा ज्ञानसामान्यकारणातिरिक्तदोषजन्या तद्वदनित्यप्रमापि गुणादिजन्येति तदर्थः । इति शङ्का ।।

प्रमा ज्ञानं हि । तस्यां हेतुर्ज्ञानहेतुरिति निर्विवादम् । एवमपि तदतिरिक्तहेतुजन्यत्वं यदि साध्यते तर्हि भवदनुमानेषु विरोधो बाधश्च । प्रमायाः कार्यतां निर्वहन् कश्चनगुणोपि नास्ति । एवमेवेतराण्यनुमनान्यपीतीदं दक्प्रदर्शनमात्रम् । इति परिहारः ।।

११. यद्यपि प्रमामात्रे गुणः सामान्यो मा भूत् । अनित्यप्रमामात्रे अविद्यमानासंसर्ग्रहादिकं गुणः । इति चारु दर्शयते ।। तथापि केवलासंसर्गाग्रहस्य भ्रमेपि सुलभतया अविद्यमानविशेषणेन विषयसत्वमेवाभिप्रेति ब्रूयात् । विषयसत्वं तु ज्ञनसाधारणकारणम् । अतः न तत्स्वतस्त्वविरोधि ।।

१२. मास्त्वेकोऽनुगतो गुण अनित्यप्रमासु । अननुगतैरनेकैरेव प्रमोत्पद्यताम् ।'अनित्यप्रमात्वं स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्ति

स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताप्रतियोगिककारणत्वाश्रयमात्रानुत्पाद्यकार्यमात्रवृत्तिधर्मत्वात् अप्रमात्ववदित्यनुमानं तत्र बलमस्ति । अप्रमात्वं अनित्यज्ञानसामान्यकारणापेक्षया अधिकं कारणमपेक्षते यत्कार्यं तन्मात्रस्थितिकम् । अतस्तत् ; स्वाश्रयजन्यभ्रमवृत्तयः येये धर्माः जन्यप्रत्यक्षभ्रमत्वादयः तत्तदवच्छिन्नकार्यताश्रयाः जन्यप्रत्यक्षभ्रमादयः । तन्मात्रे वर्तते । एवं च -- अनित्यभ्रम इति नैकजातीयं कार्यम् । अपितु प्रत्यक्षानुमित्यादिभेदेन नाना । तदनुरोधेन कारणान्यप्यनेकान्येवेति फलितम् । तथैवानित्यप्रमा अपि नाना कार्याणि । तत्त्कारणान्यपि नानैव । तत्तदनुरूपा गुणास्तत्रतत्र कारणानीति पर्यवसितम् ।।

इयं यज्ञपत्युक्तपञ्चमात्रपदानुमानतः शङ्का । अस्या इत्थं परिहरः ।।

सन्तु नामानित्यप्रमाकारणानि नाना । न तानि गुणाः । अपितु अस्मदनुमतास्तत्तत्प्रमाप्रागभावा एव। तथाप्युक्तानुमाने साध्यहेतुसंगतेः । अतः सिद्धसाधनं दोषः । इति ।।

१३. अनित्यप्रत्यक्षप्रमात्वं कार्यतावच्छेगकम् बाधकं विना कार्यमात्रवृत्तित्वात् घटत्ववत् । घटत्वं कार्यमात्रे वर्तते । अतस्तत् कार्यतावच्छेदकम् । एवमानित्यप्रत्यक्षप्रमात्वमपि स्यात् । अनित्यानुमितिप्रमात्वे शाब्दप्रमात्वे चायमेव क्रमः । इत्यपरा शङ्का ।।

प्रत्यक्षप्रमामात्रे इन्द्रियसंनिकर्षोऽर्थश्च न हेतू । यदा शुक्तिं दृष्ट्वा रजतमिति भ्रम्यति तदा सन्निकर्षस्य शुक्तिरूपार्थस्य च तत्र सत्वेन शुक्तिरियामिति प्रमोदयापत्तेः। दोषः शुक्तिं न भासयतीति यदि, तर्हि दोषाभाव एव प्रमायामुपयोगी भवतु । अपरं कारणं मास्तु । इत्युत्तरम् ।।

१४. अनित्यप्रमात्वं, अनित्यज्ञानत्वप्रयोजकं यावत् तदधिकप्रयोजकापेक्षं अधिकप्रयोजकसत्वे उत्पत्तेः अधिकप्रयोकासत्वे अनुत्पत्तेः अप्रमात्ववत् । इत्यनुमानेन स्थूलावयवतो वस्तुनः प्रत्यक्षप्रमायां भूयोऽवयवेन्द्रिसन्निकर्षः कारणम् । संशयविपर्ययोत्तरस्मिन् तस्मिन्

विशेषप्रमा कारणम् । नियमेन प्रमारूपायामनुमितौ लिङ्गपरामर्शः कारणम् । तादृशायां शाब्दप्रतीतौ वाक्यार्थज्ञानं कासणम् 'इति फलति इति पूर्वपक्षे ।।

कामिलारोगिणः शङ्के शङ्कत्वशुक्लत्वज्ञानं भूयोऽवयवेन्द्रियसन्निकर्षश्च वर्तते । तथापि शङ्कं पीतं भ्राम्यति । न तु शुक्लं प्रमिनोति । अतः कारणमस्ति कार्यं नैवेत्यन्वयव्यभचारो दोषः । पुरोवर्तिनि स्थाणुर्वा पुरुषोवेति संशयः । ततः

करादिकं चरणादिकं मत्वा पुरुष एवेति निश्चयो भवति । सा प्रमैव । संशयोत्तरस्मिन्नस्मिन्प्रमाज्ञाने भवदभिमतस्य विशेषप्रमारूपस्य कारणस्य क्व प्रसक्तिः ? नास्ति । अतः कारणं नास्ति कार्यमुत्पन्नमिति व्यतिरेकव्यभचारोपि ।

इति समाधानम् ।।

१५. दोषाभाव एव कारणमास्ताम् । तथापि प्रामाण्यस्वतस्त्वहानोरिति न सुस्थायि । दण्डत्वदण्डगतदार्ढ्य प्रमुखानां कार्योपयोगित्वेपि कारणत्वाभाववदिहापि निर्वाहात् ।।

इयता प्रमाण्यस्योत्पत्तौस्वतस्त्वे अनुपपत्तयोपि परिहृता एव ।।

प्रामाण्यस्योत्पत्तौ स्वतस्त्वे किं प्रमाणम्

१६. अनित्ययथार्थज्ञानत्वं अनित्यज्ञानत्वानवच्छिन्न कार्यतानवच्छेदकम् अनित्यज्ञानावृत्तित्वराहित्वात् ज्ञानत्ववत् । इत्याद्यनुमानं मानम् । ज्ञनत्वं अनित्यज्ञानावृत्ति न । अतस्तदवृत्तित्वरहितम् । तस्मादनित्यज्ञानत्वविशिष्टे सर्वत्र वर्तते या

कार्यता तस्यामनवच्छेदकम् । ज्ञानत्वेन रूपेण ज्ञानमुत्पन्नमिति न भाष्यत इत्यर्थः । एवमेव अनित्ययथार्थज्ञानत्वमपि अनित्यज्ञाने न वर्तत इति नहि । ततः अनित्यज्ञानसामान्ये वर्तते या कार्यता तस्यामनवच्छेदकम् । अनित्ययथार्थज्ञानत्वादिना रूपेण ज्ञानं जायत इति नाह्वाययते । इतीदमस्योपपादनम् । एवं च ज्ञानजनने यावदपेक्षितं तदधिकं कारणं

प्रमा नापेक्षत इति फलितम् । तथा च १५४ तम पुटे अष्टमङ्क्तौ 'ज्ञानजनकमात्राधीनजन्मत्वं 'इत्युक्तस्वतस्त्वसिद्धिः ।।

१७. अप्रमात्वं (भ्रमत्वं) मपि स्वत एव स्यात् । दोषस्तु प्रमायां गुण एव भवतु । इति प्रतिबन्दीत्थं परिहरणीया । दोषसत्वे भ्रमः, दोषाभावे न भ्रमः; इत्यन्वयव्यतिरेकयोर्न कथं कथमपि परित्याज्यतेति दोषोऽप्रमाकारणमित्यवर्जनीयमेव ।

करणप्रामाण्यस्वतस्त्वम्.

ज्ञानप्रामाण्यस्वतस्त्वे वादप्रतिवादाभ्यामेव करणप्रामाण्यस्वतस्त्वेपि प्रतिभटपरावर्तनं सुशकमिति तदर्थमत्र पृथङ्नायासः ।।

१८. यथार्थज्ञानसाधनत्वमेव करणप्रामाण्यम् । तस्य ज्ञानजनकत्वग्राहकमात्रग्राह्यत्वम् ज्ञप्तौ स्वतस्त्वम् ।। करणेषु ज्ञानजननशक्तिर्यथा सहजा यथा यथार्थज्ञानजननशक्तेरपि सहजत्वम्, तदभिन्नत्वं वा उत्पत्तौ ।।

एतत्सर्वं 'प्रामाण्यं स्वत एव अन्यथानवस्थानात् ' 'परतोऽप्रमाण्यम्'इति तत्वनिर्णयस्य विवरणरूपमेव ।।

आदित एतावत्प्रबन्धेन --

'स्वतः प्रमाणैराम्नाये रादरेणादिवर्जितैः ।
आख्यादनन्तकल्याण गुण श्रीरमणं भजे'।

इति देवतागुरुनमनोत्तरमत्रोक्तप्रस्तावनाश्लोकेन आदिवर्जितस्वतः प्रमाणवेदोदितानन्तकल्याणगुणः श्रीरमण इति यदुपदर्शितं तन्नानुपपन्नम् । अपैरुषेयत्वेपि वेदस्य सहजप्रामाण्यानपायात् । इति पर्यवसितम् ।।

अतः प्रमाण्यवादान्ते तस्मात्प्रामाण्यस्य स्वतस्त्वादपौरुषेयोपि वेदः प्रमाणमेव'इत्युपसंहारमदर्शयत् ।।

व्याख्याविचारः.

अस्य ग्रन्थस्य द्वे व्याख्ये हस्तगते ---

१. युक्तिरत्नाकराख्या एका

२. न्यायदीपाख्या इयमपरा
युक्तिरत्नाकरकारा विजयीन्द्राः । मूलकारणामन्तेवासिनो न्यायदीपकारिणां विद्यागुरवः आश्रमतः परमगुरवश्च । अयं व्याख्या शब्दतेपि विशाला । न्यादीपे चतुर्थपुटे 'अत्र स्वतःपामाण्यज्ञप्तिवादपर्यन्तं विस्तरस्तु गुरुपादकृतयुक्तिरत्नाकरे द्रष्टव्यः'इत्यस्ति । इयं सम्पुर्णा उत इयत्येवेति सन्दिहामहे । पूर्णोयं विस्तरस्तु
एतावत्येवेत्यनेनापि न्यायदीपोक्तिसंगीतर्भवति हि । नोपलभामहे च सम्पूर्णाम् । अतोऽपूर्णेत्यत्रैव पक्षपातो न्याय्यः ।।
अत्र ----
'गुरुपादकृताप्यस्ति व्याख्या सात्यन्तविस्तरा ।
व्याख्येयं मन्दबोधाय क्रियतेऽशेषगोचरा' ।।
इति । न्यायदीपादिस्थितद्वितीयश्लोकोपि प्रमाणम् ।।
अस्या न्यायदीपाख्यायाः कर्तारो राघवेन्द्रस्वामिनः । अत्र न कोपि प्रतिवादः ।।
एतेषां जीवनचारित्रविषये राघवेन्द्रविजयाख्यं काव्यं, गुरुगुणस्तवाख्यं स्तोत्रं च मुद्गितमेवेदानीमस्ति । गुरुगुणस्तवकर्तारो रघवेन्द्रस्वामिनां पूर्वाश्रमे पौत्राः यत्याश्रमे प्रशिष्याः वादीन्द्राः ।।
मूलकारणां छात्रा विजयीन्द्राः, तेषां राघवेन्द्राः'इत्यनेनैषां कालोपि विवृतप्राय एव । एषां वृन्दावनं रायचूरुपुरसमीपवर्तिनि मन्त्रालयाख्यग्रामे भक्तेष्टविकरणविचक्षणो विराजते । इमे इतरसन्यासिन इव मरणानन्तरं न वृन्दावनं प्रवेशिताः । अपि तु
सर्वदग्विषयतापीरतित्यक्षिषवो वृन्दवनं कल्पयित्वान्तरुपाविशन् । प्यधापयंश्च । इति सांप्रदीयिकानां तथ्यवादः ।।
मध्वसिद्धान्तस्यैभिः कृतमुपकारमेवं स्मरन्ति --
'व्यासेन व्युप्तबीजः श्रुतिभुवि भगवत्पादलब्धाङ्कुरश्रीः
प्रत्नैरीषत्प्रभुन्नोऽजनि जयमुनिना सम्यगुद्भिन्नशाखः ।

मौनीशव्यासाराजादुदितकिसलयः पुष्पितोयं जयीन्द्रा
दद्य श्रीराघवेन्द्राद्विकसति फलितो मध्वसिद्धान्तशाखी । इति ।।
इतोप्यधिके एतदीयचरिते निर्दिष्टं काव्यं स्तोत्रं चास्तां मार्गदर्शीतिशम् ।।
विषयानुक्रमणिका.
वादसंख्या विषयः
मङ्गलाचकणम्
विषयप्रसञ्जकः श्लोकः
१. स्वमते ज्ञप्तौ स्वतस्त्वनरुक्तिः-
प्रथमा
द्वितीया
तृतीया
निरुक्तित्रयस्यसुधारूढता दर्शनम्
२. परोक्तस्वतस्त्वनिरूक्तिभङ्गः-
प्रथमः
द्वितीयः
तृतीयः
चतुर्थः
३. स्वतस्त्वे प्रमाणम्-
प्रथमम्
द्वितीयम्
तृतीयम्
चतुर्थम्
पञ्चमम्
अस्य मूललभ्यतोपपादनम्
४. स्वतस्त्वानुमानेषु बाधोद्धारः...
अनुव्यवसायस्य वैशिष्ट्यविषयकत्वसाधनम्

अनुव्यवसायस्य तद्वद्विशेष्यकत्वविषयकत्साधनम्
अनुव्यवसायस्य अर्थसत्वविषयत्वसाधनम्
उक्तार्थे मूलकृत्संमतिः
५. स्वतस्त्वे संशयोपपादनम्
वादसंख्या विषयः
उक्तार्थे मूलानुमतिः
६. प्रमाण्यनिश्चयस्य प्रवर्तमत्वम्
स्वतस्त्वहेतूनां सामान्यतोऽप्रयोजनत्वपरिपरिहारः
अर्थनिश्चयस्य प्रवर्तत्वखण्डनम्
प्रामाण्यनिश्चयस्याप्रामाण्यशङ्कानिवर्तकत्वेनो-
पयोगखण्डनम्
अत्र मूलानुमतिः
७. परतस्त्वेऽनवस्थोक्तिः
धर्म्यज्ञानादिनाप्रामाण्यशङ्काभावसिद्धिखणडनम्
विशेषदर्शनेनाप्रमाण्यशङ्काभावसिद्धिखण्डनम्
अत्र मूलसंमतिः
स्वमते अनवस्थापरिहारः
अत्र मूलसंमतिः
८. परतस्त्वे प्रथमप्रामाण्यानुमित्यसंभवः
परतस्त्वे अप्रसिद्धविशेषणत्वम्
परतस्त्वे हेतोः प्रमित्यसिद्धिः
परतस्त्वे सप्तहेतुनिराकरणम्
स्वमते अप्रमाण्यपरतस्त्वे अनवस्थापरिहरः
मूलानुमतिः
९. ज्ञप्तौ परतस्त्वानुमान भङ्गः
मणिपूर्वपक्षः

समाधानम्
अनुमान्तरनिरसनम्
आदितः कथितानां नगमनम्
मूलारूढताप्रतर्शनम्
१०. उत्पत्तौ परतस्त्वे चिरन्तनानुमानभङ्गः-
प्रथमः
द्वितीयः
वादसंख्या विषयः
तृतीयः
चतुर्थः
पञ्चमः
मूलाभिप्रेतत्वम्
११. अनित्यप्रमामात्रानुगतगुणभङ्गः
मूलानुमतिः
१२. यज्ञप्रत्युक्तवक्रानुमानभङ्गः
पूर्वपक्षः
समाधानम्
१३. प्रत्यक्षादिप्रमासु प्रत्येकानुगतगुणभङ्गः पूर्वपक्षः
समाधानम्
प्रचीनमतनिरासः
मण्युक्तपक्षान्तरनिरासः
उपसंहारः
मूलानुमतिः
१४. स्थूलवयविप्रत्यक्षप्रमादौ भूयोवयवेन्द्रिय
सन्निकर्षहेतुत्वभङ्गः
पूर्वपक्षः

अन्वयव्यभिचारेण समाधानम्
व्यतिरेकव्यभचारेण समाधानम्
उपसंहरः
मूलसंमतिः
१५. प्रमायां दोषाभावस्य हेतुत्वभङ्गः
प्रयोजकत्वे इष्टापत्तिः
कारणत्वनिरासः
मूलसंमतिः
१६. उत्पत्तौ स्वतस्त्वेन अनुमानानि
अनित्यप्रमामात्रानुगतो गुण इतिपक्षे
वादसंख्या विषयः
प्रत्यक्षादिप्रमासु प्रत्येकानुगता गुण इतिपक्षे
यज्ञपतिमते
भ्रमे पित्तादिरिव प्रमायामनुगता गुणाहेतव इति मते
मूलानुमतिः
१७. अप्रामाण्य परतस्त्वम्
मूलाभ्युपगमः
१८. कारणप्रामाण्यस्य स्वतस्त्वम्
ज्ञप्तौ
अपामाण्यपरतस्त्वम्
मूलानुमतिः
आदितः नगमनम्
वेदापौरुषेत्ववादः
१९. वेदापौरुषेयत्वे अनुमानानि
पौरुषेयत्वे प्रमाणम्
(१) अपौरुषेयत्वानुमानम्

(२).....
(३).....
वेदाभावे धर्माद्यसिद्धिकथनम्
अत्र मूलानुमतिः
अपौरुषेयत्वे लाघवम्
अत्र मूलावलम्बः
पौरुषेयत्वे गौरवम्
अत्र मूलानुकूल्यम्
(४) ईश्वरज्ञानं न प्रमोतिमतेऽनुमा
प्रमेतिमते (त्रीणि)
अनुकूलतया मूलोक्तिः
(५) अनुमानान्तरम्
(६) अनुमानान्तरम्
वादसंख्या विषयः
अनुकूलतया मूलोक्तिः
(७) अनुमानान्तरम् (त्रीणि)
अपौरुषेयत्वपर्यवसानम्
अत्र मूलावलम्बः
२०. अपौरुषेयत्वे अनुकूलतर्कः--
(१) कर्तुप्रसिद्ध्यभावस्मृतिः
(२) कल्पनागौरवम्
(३)धर्माद्यसिद्धिः
(४) प्रामाण्यासिद्धिः
अत्रमूलानुग्रहः
(५) श्रुतिस्मृतिविरोधः
मूलसंगमनम्

२१. वेदापौरुषेयत्वानुमानादिभङ्गः
(१) अनुमाननिरसनम्
वैदिकोत्तमपूरुषेण पौरुषेयत्वस्य खण्डनम्
वैदिकयुष्मच्छब्देन
वैदिकयत्तच्छब्दाभ्याम्
मूलानुकूल्यम्
समाख्यया पौरुषेयत्वस्य खण्डनम्
अनुमान्तरनिरसनम्
मूलावलम्बः
(२) श्रुत्यादिकं न प्रमाणम्
मूलानुकूत्वम्
अनित्यत्वनिरसनम्
ईश्वरवादः
२२. ईश्वरस्यानुमानिकत्वभङ्गः-
कार्यत्वहेतुकपूर्वपक्षानुमानम्
क्षितेः पक्षत्वम्
वादसंख्या विषयः
पूर्वपक्षदूषणम् (१)
मूलसंवादः
दूषणम् (२)
मूलसंवादः
दूषणम् (३)
मूलसंपादः
साध्यादिपूर्वपक्षोक्तांशानां क्रमशो दूषणम्
शरीराजन्यत्वे व्याप्यत्वासिद्धिरिति मण्युक्तस्य
निष्कृष्यानुवादः

अस्य समाधानम्
व्यर्थविशेषणस्य दूषणतारूपम्
कार्यायोजनस्येश्वरासाधकत्वम् (२)
धृतेरीश्वरासाधकत्वम् (३)
पदस्येश्वरासाकत्वम् (४)
प्रत्ययादीश्वरसिद्धनिरसनम् (५)
संख्याविशेषस्येश्वरासाधनम् (६)
उपसंहारः
वर्णवादः
२३. वर्णानित्यत्वस्य प्रत्यक्षत्वप्रभङ्गः
पूर्वपक्षः
अभ्युपेत्य समाधानम्
स्वमतम्
अधिककरणयोग्यता अभावप्रत्यक्षतस्त्रता
अत्रानुव्याख्यानसंगतिः
२४. वर्णानित्यत्वेनुमानभङ्गः (१)
‘ (२)
‘(३)
२५. वर्णानित्यत्वे प्रत्यभिज्ञाविरोधः वादसंख्व्या विषयः
प्रत्यभिज्ञाभ्रान्तित्वापादकबाधखण्डनम्
ध्वनेरेवानित्यत्वव्यञ्जकत्वे
उत्पत्त्यादिधियो बाधकत्वखण्डनम् वर्णानां नित्यत्वे अनुमानानि (नव)
वर्णानां प्रतिनियतव्यञ्जकव्यङ्गत्वम्
नेत्याशङ्का
समाधानम्
वर्णोत्पत्तौ कल्पनागौरवम्

मूलकारसंमतिः
वर्णानां नित्यत्वेपि क्रमोपदानम्
वर्णानामनित्यत्वेपि वेदनित्यत्वाहानिः
समवायवादः
समवाये प्रमाणभङ्गः
आशङ्का
आन्तरालिकाशङ्का
तत्समाधानम्
मूलशङ्कासमाधानम्
अस्य सूत्रारूढता
समवायसाधमानुमाने तर्कपरिहतिः
अस्य सूत्राल्लाभः
समवायानुमाने व्यभियारः
हेतोरप्रयोजकता
उक्तस्य सूत्राल्लाभः
मणिकृत्सिद्धान्तितानुमाननिरासः
अस्यसूत्राल्लाभः
अभावप्रतीत्यापानपरिहारः १
परिहारः २
आपादनान्तरपरिहारःरप समवायसाधकमण्युक्तानुमानान्तरनिरासः
अयुतसिद्धिविशिष्टबुद्धीनां साजात्याय समवाय
इतिशङ्कानिरासः
समवाये बाधकम्
समवायस्य संबन्दत्वनिरासः
समवायस्यैकत्वनिराकरणम्
अस्य सूत्रारूढता

संमवायस्यानित्यत्वोक्तिः
समवायाभावे मानम्
निर्विकल्पवादः
प्रमाणाशङ्का
आन्तराशङ्का
अस्योत्तरम्
प्रथमाशङ्कासमाधानम्
नाना पूर्वपक्षसमाधानानि
विशेषणज्ञानस्य कारणत्वमङ्गीकृत्यापि
निर्विकल्पकासिद्धिकथनम्
केचिन्मतम्
निर्वकल्पके बाधकम्
इष्टापत्तिः
प्रमाणविरोधः
अस्य पद्धत्यारूढता
परिच्छेदार्थोपसंहारः
तर्कताण्डवप्रथमसम्पुटे ग्रन्थकृन्नामानि
मणिकारः.
भदवत्पादाः (मध्वाचार्याः)
‘
‘
‘
‘
‘
‘
‘

‘

‘

टीकाकाराः (जयतीर्थाः)

‘

‘

‘

यज्ञपतिः

व्यासः

‘(सूत्रकृत्)

प्रभाकरः

‘

न्यायसूत्रभाष्यकारः

उदयनः

पक्षिलः

भट्टः

कालीदासः

तर्कताण्डवप्रथमसम्पुटोद्धृतानि ग्रन्थनामानि.

सुधा--

मणिः--

टीका--

वादावली--

ब्रह्मतर्कः--

प्रमाणलक्षणम्--

भाष्यटीका --

विष्णुतत्वनर्णयटीका--

पद्धतिः--

श्रुतिः--
स्मृतिः--
भारतम्--
वेदः--
भाष्यम् (न्यायस्य)--
सूत्रम् (व्याकरणस्य)--
भाष्यम् (पक्षिलस्य)--
अनुव्याख्यानम्--
प्रमाणलक्षणटीका--

तर्कताण्डवप्रथमसम्पुटे धृता ग्रन्थानुपूर्व्यः
विषयः
साक्ष्येव ज्ञानं तत्प्रमाण्यं च इत्यादिः
ज्ञानगतयाथार्थ्यस्य
तदप्रामाण्याग्राहक
प्रमाण्यं च स्वत एव अन्यथानवस्थानात्
‘
ऋषिभिर्बहुदागीतम् इत्यादिः
तदेतदृचाभ्युक्तम्
अन्यथा
‘
आकाङ्क्षाया एव बुद्धिदोषात्मकत्वात्
अप्रामाण्यसंशयेनार्थनिश्चयम् इत्यादि
अन्यथा
‘
न परीक्षानवस्था इत्यादि

अनुमेयमेवाप्रामाण्यम्
नपुनर्ज्ञानग्राहकमात्रग्राहकत्वं
अप्रामाण्यस्यानुमेत्वावसायात्
न चाप्रामाण्यं इत्यादि
यत्क्वचिद्व्यभिचारि स्यात्
सुदृढो निर्णयो
अन्यथा
ज्ञानजनकमात्राधीनजन्मत्वं स्वतस्त्वम्
अन्यथा
‘
‘

अदृष्टमिन्द्रियन्त्वक्षम् इत्यादि
निर्दोषार्थेन्द्रिय
दोषाभवस्य कारणत्वे च
इन्द्रियादीनामौत्सर्गिकी
दोषाभावेपि न प्रामाण्यकारणम् इत्यादि
तर्हि दोषाभावः करणमित्यायातम्
तस्माद्गुणेभ्यो
अन्यथा
‘

परतोऽप्रामाण्यम्
‘

कारणप्रामाण्यज्ञप्तिस्तु इत्यादि
कारणानां तु ज्ञप्तौ स्वतसत्वं नास्त्येव
अथवा ज्ञानजनकत्वं इत्यादि
छन्दांसि जज्ञिरे

प्रतिमन्वन्तरम्
तदभावे सर्वसमयाभिमत
अपैरपषेयवीक्याङ्गीकारे
अविप्रलम्भस्त्वज्ञानम्
क्रमस्य कृतकत्वेपि
नियतैकप्रकारमपौरुषेयत्वम्
गौरवदोषेण
‘
‘
‘
‘
‘
‘
‘

यतस्ता हरिणा दृष्टा इत्यादि
वाचा विरूपनित्यया इत्यादि
श्रुतिर्वाव नित्या अनित्या वाव स्मृतयो इत्यादि
अनादिनिधना नित्या इत्यादि
नित्यदेवाः समस्ताश्च
सर्गेसर्गेऽमुनैवैते
तदुत्पत्तिवचश्चैव
विज्ञेयं परमं ब्रह्म
यावद्ब्रह्मविष्ठितम् तावती वाक्
‘

शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तम
‘

‘

किं नो राज्येन गोविन्द
शिष्यस्तेहं शाधि मां त्वां प्रमन्नम्
त्वां प्रपन्नम्
वाच्यस्त्वया मद्वनात्स राजा
स राजा
‘

मामुपास्य
गृभ्णामि ते सौभदत्वाय हस्तम्
वयं स्याम पतयो रयीणाम्
भूयिष्टां ते नम उक्तिं विधेम
योस्मान्द्वेष्टि
छन्दांसि जज्ञिरे
तदुत्पत्तिवचश्चैव भवेद्व्यक्तिमपेक्ष्य तु
अवान्तराभिमानानां इत्यादि
तत्क्रमेणैव
ऋग्वेद एवाग्नेरजायत
यो ब्रह्मणं विदधाति
विपर्ययेणाप्यनुमातुं शक्यत्वात्
विपर्ययेण
नित्यवीप्सयोः
पक्षधर्मतासिद्ध्यर्थत्वात्
प्रागुच्चारणादनुपलब्धा इत्यादि
अनुपलब्धिस्त्वर्जनीयसन्निधिरेव
शास्त्रगम्यपरेशानात् इत्यादि
योग्यानुपलब्धेश्चलिङ्गत्वम्

क्वचितद्घटाद्यभावोपि,,
अभावोनुमानप्रत्यक्षं च,,
प्रायेणानुमानेन्तर्भावज्ञापनाय,,
नच सादृश्यात्प्रत्यभिज्ञा,,
प्रत्यभिज्ञानन्तरं,,
प्रदीपे व्यज्यते जातिर्न तु नीरजनीलिमा
अत आकाशगुणे शब्दे इत्यादि
वस्तितत्वविचारकं प्रति,,
समवायाभ्युपगमाच्च साम्यादनवस्थितेः
अनवस्थितेः
‘
‘

भूदरस्याग्निसंयोगः इत्यादि
समवायः
उपाधिजन्यं तद्गम्य
एतज्जन्मनि प्राथमिकम्,,
द्रव्यादिविकल्पानां ,,

तर्कताण्डवम्
प्रथमपरिच्छेदः

।।
श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवोदव्यासात्मकलक्ष्मीहयग्रीवायनमः
।।
।। ॐ ।।
अन्तकल्याणगुणैकराशिमशेषदोषोज्झितमप्रमेयम् ।

मुमुक्षुभिः सेव्यमनन्तसौख्यप्रदं रमेशं प्रणमामि नित्यम् ।। १ ।।

न्यायदीपाख्याव्याख्या.
विश्वोप्तत्तिस्थितिध्वंसकारणं रमणं श्रियः ।
प्रणम्य पूर्णबोधादीन् व्याकुर्वे तर्कताण्डवम् ।। १ ।।
गुरुपादकृताप्यस्ति व्याख्या सात्यन्तरविस्तरा ।
व्याख्येयं मन्दबोधाय क्रियतेऽशेषगोचरा ।। २ ।।
अथादो १ विशिष्टेष्टदेवतानतिरूपं मङ्गलमाचरति - अनन्तेति । सत्वादिषु गुणत्वप्रसिद्धेर्दुःखादीनां गुणत्वेन परैः
परिगणनाच्च तद्व्युदासायानन्दज्ञानबलद्युतिप्रभुतिशुभधर्मलाभाय कल्यणगुणेत्युक्तिः । तार्किकरीत्या गुणगुणिनोर्भेदभ्रमनिरासाय गुणैकराशिमित्युक्तः । 'अष्टावेवेश्वरे गुणा'इति धीनिरासायानन्तेति ।'दोषैकदृक्पुरोभागी'इत्यमरे 'ह्लादैकमयीं '
इत्यादिकाव्यप्रकाशादौ प्रयोगदर्शनात्संख्यार्थकस्यैवैकशब्दस्य 'पूर्वकालैक'इति
पूर्वनिपातो न केवलार्थस्येति तत्वनर्णयटीकाद्युक्त्या गुणैकराशिमित्यस्य साधुत्वं
ध्येयम् । उक्तरूपगुणानां मुख्यराशिमिति वा भेदशून्यराशिमिति वार्थः । गुणवद्दोषो नाशङ्क्य इत्याह - ।।अशेषेति ।। चिन्तासन्तापादिदोषहीनमित्यर्थः । ननु गुणविशिष्टस्य मायाशबलत्वात्कथं १ दोषोज्झितत्वमित्यतो नेदं मायाशबलमिति भावेनोक्तं अप्रमेयं - देशतोऽपरिच्छिन्नमिति । शबलं तु परिच्छिन्नमित्यभ्युपेतत्वादिति भावः । तत्र हेतुर्नित्यमिति - अनिवर्त्यं । शबलंतु मिथ्यात्वान्निवर्त्यमित्यर्थः । एवं देशएएकालगुणानन्त्यरूपब्रह्मशब्दार्थस्यात्रोक्त्या रमेश एव ब्रह्मशब्दार्थ इति सूचितम् । अत एव मुमुक्षुभिः सेव्यं; न तु मन्दोपास्यमित्यर्थः ।

किंफलं? अनन्तसौख्यप्रदं- अविनाशिसुखप्रदमित्यर्थः । स्वार्थे ष्यञ् ।अत्र न्यायचिन्तापरे ग्रन्थे ब्रह्मतन्त्राध्यायचतुष्टयोक्तगुणवैशिष्ट्योक्तिः -
'प्रमाणन्यायसच्छिक्षा क्रियते तर्कशास्त्रतः ।
मानन्यायैस्तु तत्सिद्धैर्मीमांसा मेयशोधनम्' ।।
इत्युक्त्या
ब्रह्मत्तरोक्तप्रमेयनिर्णयोपयुक्तप्रमाणन्यायचिन्तापरत्वात्तद्विषयादिनैवास्य विषयादिमत्तेति सूयनार्था । एवं च न्यायपञ्चाध्यायानुरोधेन कुसुमाञ्जलौ पञ्चपरिच्छेदकृतिवद्ब्रह्मत्तरानुरोधेन परिच्छेदचतुष्टये कार्येपि प्रमाणत्रित्वद्योतनाय परिच्छेदत्रयकृतिरिति ।। १ ।।
देवतानतिसमनन्तरं भाष्यकर्तृनर्थयते -- श्रीशेति ।
१ कथमशेष.- अ.

स्वमते ज्ञप्तौ स्वतस्त्वनिरुक्तिः प्रामाण्यवादः पु-३
---- ---- --
श्रीमदानन्दतीर्थार्यस्वामिनः कमलापतेः ।
प्रीतये क्रियते व्यासयदिता तर्कताण्डवम् ।। ४ ।।
स्वतःप्रमाणैराम्नायैरादरेणादिवर्जितैः ।
आख्यातानन्तकल्याणगुणं श्रीरमणं भजे ।। ५ ।।
अत्राद्येन विशेषणेन सौरभ्यस्य द्वितीयेन शैत्यस्य अंशं इति मान्द्यस्य वायुगुणस्योक्तिर्ज्ञेया ।। २ ।।
टीकाकर्तृन्नमति -- आनन्देति ।। ३ ।।
फलोक्तिपूर्वं चिकीर्षितं प्रतिजानीते -- श्रीमदिति ।। ४ ।।
आनुमानिकत्वादीश्वरात्मनो नाष्टगुणाधकगुणवत्वमित्यत आद्यपद्योक्तरमेशविशेषणानि मानोक्त्या स्थिरीकुर्वतस्ताण्डवकरणस्य प्रसञ्जकं पूर्वरङ्गं निबध्नाति -- स्वत इति । आम्नायैः-- सजातीयानुपूर्वाविशिष्टवेदैः ।। आख्यातेति -- नित्यसापेक्षत्वात्समासः ।

‘वेदास्ते नित्यविन्नत्वाच्छ्रुतयश्चाखिलैः श्रुतेः ।
आम्नायोऽनन्यथापाठात् ‘ ।
इति तत्वनिर्णयोक्तेः । गुणमिति निर्दोषतादेरुपलक्षणम् । गुणपदेन वा निर्दोषत्वमुमुक्षुसेव्यत्वानन्तसौख्यप्रदत्वरूपधर्मग्रहः । आम्नायत्वे हेतुरादिवर्जितैरिति -- स्वतन्त्रपुरुषाप्रणीतैरित्यर्थः । नन्वपौरुषेये वेदेऽदृष्टार्थके चाप्तोक्तत्वफलसंवादादिहेतो
पामाण्यनिश्चायकस्याभावात् निश्चितप्रमाण्यकस्यैव प्रमाणस्यार्थसत्वनिर्णयत्वस्याग्रे प्रामाण्यनिश्चयप्रवर्तकत्ववादे व्यक्तत्वात् कथं वेदे प्रामाण्यविश्चयः । आप्तोक्तत्वगुणाभावात्प्रामाण्यं वा कथमित्यतो ‘न विलक्षणत्वादस्य ‘इत्यधिकरणसिद्धमाह -- स्वतः प्रमाणैरिति ।। करणे ल्युटे
२ ज्ञानजननशक्तिग्राहकमात्रग्राह्यप्रमाजननशक्तिमद्भिरित्यर्थः ।
---
१ गुणश्रीरमणम्--क. २. स्वतः ज्ञनजननशक्तिग्राहकमात्रात्.-- मु.

स्वम- ज्ञ -स्व- नि) पु-४.
----- --
याथार्थ्यरूपस्य तत्तज्ज्ञानप्रमाण्यस्य

तथा ज्ञानजननशक्तित एव प्रमाजनकैरित्यर्थः । ज्ञप्तावुत्पत्तौ चान्यानपेक्षणाज्ज्ञानजननशक्तिग्राहकेणैव
प्रमाजननशक्तिग्रहरूपप्रामाणयग्रहस्य च दैषस्य वेदापौरुषेत्ववादे वक्ष्यमाणदिशाऽपौरुषेयेऽभावनिश्चयादिति भावः । ननु प्रमाणेनापि तात्पर्यविषयोऽर्थो न सिध्यतीत्यत उक्तं-- आदरेणाख्यातेति । आङो मुख्यत्वमर्थः । तात्पर्यपूर्वं मुख्यवृत्योक्तेत्यर्थः । लक्षणयोदितत्वे व्यक्तम् ।

अत्र स्वतःप्रामाण्यज्ञप्तिवादपर्यन्तं विस्तरस्तु गुरुपादकृतयुक्तिरत्नाकरे द्रष्टव्यः।
वेदरूपकरणप्रमाणस्य स्वतसत्व निश्चितप्रामाण्यज्ञानेन ज्ञातव्यम् । तथा २ तज्जन्यज्ञानप्रामाण्योत्पत्तिस्वतस्त्वसिद्ध्यधीनोत्पत्तिस्वतस्त्वमिति क्रमाज्ज्ञप्तौ च तदेवादौ समर्थयितुं 'ज्ञानग्राहकमात्रग्राह्यत्वं स्वतस्त्व' मिति टीकाकृदुक्तं वाक्यं विवृण्वानो ३ ज्ञप्तौ स्वतस्त्वं तावन्निर्वक्ति -- याथार्थ्यरूपस्येति । अर्थं -- ज्ञेयम्
अनतिक्रम्य वर्तमानं यथार्थं । 'यथाऽसादृश्य'इत्यव्ययीभावः । य ४ थार्थभावो याथार्थ्यं; यथावस्तितज्ञेयविषयीकारित्वरूपं ज्ञेयाव्यभिचारित्वं तद्रूपस्येत्यर्थः । एतच्च परोक्षापरोक्षजन्याजन्यसर्वप्रमितिमात्रनिष्ठमित्युपेत्य ज्ञानप्रामाण्यचस्येत्युक्तम् ।
अनुभूतित्वानधिगतार्थगन्त्रुप्रमाणत्वसाधनाश्रययोरन्यतरत्वप्रमाव्याप्तत्वादेर व्याप्त्यसंभवादिदुष्टत्वादिति भावः । अस्यानुप्रमाणसाधारण्येपि सात्राज्ज्ञेयविषयीकारित्वसाभायापि ज्ञानप्रामाण्यस्येत्युक्तम् । एतच्च भिन्नं भिन्नमेवेति सर्वप्रमितिनिष्ठप्रामाण्यस्वतस्त्वद्योतनाय तत्तदिति ज्ञानविशेषणम् ।।

१.'कत्व'इति न.- कुं. २. तथाच.- कुं. ३.ज्ञप्तिरेव.-कुं. ४. यथार्थं.- मु.

स्वम-ज्ञ-स्व-नि.) पामाण्यवादः पू- ५
---- ---- --
तस्यतस्य ज्ञानस्य यत्तत्तदर्थाव्यभिचारित्वरूपं प्रमाण्यं तस्येत्यर्थः । प्रमापदप्रवृत्तिनिमित्तप्रमाण्यस्येति यावत् । 'याथार्थ्यमेव मानत्वं'इति द्वतीयाद्यपादीयानुभाष्योक्तेः । निर्धारितं चैतद्याथार्थ्यं तत्रैव सुधायाम् । प्रपञ्चितं गुरपपादैरत्रैव प्रमाण्यस्वतस्त्वानुमानवादे । 'घटत्ववति

घटत्वप्रकारकत्वादिरूपं पराभिमतमेवास्माकं याथार्थ्यं इति वक्ष्यमाणदिशा स्वपरसाधारणमेवेदमिति ज्ञेयम् ।
उपाधखण्डनटीकाव्यख्यानमन्दारमञ्जर्यां 'अथ केयं प्रमा' इत्यादिना प्रमात्वमाक्षिप्य
'यथार्थज्ञानमित्येव प्रमाया लक्षणस्थितिः।
स्मृतेरपि च लक्ष्यत्वादतिव्याप्तिकथा मुधा '
इति प्रतिज्ञापूर्वकं 'सादृश्यस्य यथाशब्दार्थत्वात् । सादृश्यं च ज्ञानार्थयोस्सत्तया । न च भ्रमेऽतिव्याप्तिः । तत्र ज्ञानस्य सत्त्वादर्थस्य चासत्वात् १ ज्ञानार्थयोः सत्तया सादृश्याभावात् । एवं च यथा सादृश्यविशिष्ट एवार्थो यस्येति बहुव्रीह्याश्रवणे यथार्थशब्दस्य यथार्था प्रतीतिरित्याद्यभधेयवल्लिङ्गं लोकसिद्धं सिद्धम् । 'यथाशब्दोऽनतिक्रमे वर्तते' इत्यादिग्रन्थेन बहुव्रीह्युपादाने ३ नोक्तर्थस्य ग्रहणे तु न स्वपरसाधारण्यं प्रमाण्यस्य लभ्यते । परमते भ्रमविषयस्य सत्वेन लक्षणस्यातिव्याप्तेः । यद्वा तन्मतेऽपि प्राचां रीतौ वैशिष्ट्यस्य भ्रमेऽसत्त्वान्नवीनमते च पुरतोऽसत्त्वत्तदपि तन्मतसाधारमेवेत्याहुः। अत्र यद्यप्याम्नायजन्यज्ञानप्रामाण्यस्वतस्त्वामात्रं प्रकृतम्।

१. तत्र.-मु. २.-मु. ३.न समाहितम् । उ.-भु.

स्वम- ज्ञ- स्व-नि प्रमाण्यवादः पु- ६.

ग्राह्यप्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकसाक्षिज्ञानविषयत्वनैयत्यं स्वतस्त्वम् ।

तथापि तत्स्वरूपग्राहिप्रत्यक्षज्ञानस्य तदनुग्राहकन्यायजानुमितिरूपज्ञानस्य तत्प्रामाण्यज्ञानस्य च

प्रामाण्यनिश्चययोपायस्याप्यावश्यकत्वाज्ज्ञानप्रामाण्यमात्रस्यापि धर्मित्वेनोपादानम् । यद्वा प्राचीनतार्किकमत इव क्वचित्प्रमाण्यं स्वतः क्वचित्परत इति न भ्रमितव्यम् । किं तु सर्वत्रापि । नवीनमते सर्वत्र परतस्त्वोपगमने तद्व्युदासायेति ध्येयम् ।

ग्राह्येति ---- ग्राह्यप्रमाण्यस्य तस्य या उपस्थापकसामग्री दोषशङ्कादिरूपा तदसमहितं ग्राह्यपामाण्याश्रयतत्तज्ज्ञानाविषयकं यत्साक्षिज्ञानं तेन गृह्यत एवेत्येवंरूपतद्विषयद्वनैयत्यमित्यर्थः । विप्रतिपत्तेरनाश्यकत्वस्य न्यायामृते व्युत्पादनान्नैयत्यमस्ति न वेत्यनुक्तैकैव कोटिरुक्ता । अत्र प्रमाण्यविरहरूपत्वतद्व्याप्यत्वादिरूपविरोधत्वस्य प्रमाण्याभावादिषु चतुर्ष्वेकस्याभावेपि यज्ज्ञाने सति प्रामाण्यनिश्चयः प्रतिबध्यते तज्ज्ञानविषत्वरूपं ग्राह्यप्रमाण्यविरोधित्वं प्रमाण्याभावादौ ध्येयम् । वक्ष्यति च प्रमाण्यनिश्चयस्य प्रवर्तकत्ववादे 'अभावानां प्रामाण्यनिश्चयविरोध्यभावत्वेन'इत्यादि । प्रमाण्यनिश्चयप्रतिबन्धकत्वं १ तदनुकूलकिञ्चिद्धर्मविघटकत्वं वा तदनुत्पादव्याप्यत्वं वा । प्रमाण्यनिश्चयस्य साक्षिरूपतया नित्यज्ञानत्वेपि प्रमाण्यविषयकत्वादिकमुत्पत्तिमदेवेति तद्विशिष्टप्रमाण्यनिश्चयानुत्पादो न दुर्लभः । उपस्थापकेत्यत्र विरोध्युपस्थितितज्जनकसामग्रीभ्यामसमबहितेत्यर्थो ध्योयः ।

१. च. मु.

---- ---- ---

तार्किकाभिमतानुव्यवसाय एवात्मकं साक्षी ।

तथाच प्रामाण्यविरोध्युपस्थितिवेलायां तत्सामग्र्यभावेन तदसमवहितेनापि साक्षिणा १ गृह्य एवेति नेति शङ्कानवकाशः । असमवहितत्वं च तदसामानाधिकरण्ये सति तदसमानकालिकत्वम् । 'प्रत्यक्षं सप्तविधं साक्षिषडिन्द्रियभेदेन' इति प्रमाणलक्षणे, 'स्वरूपेन्द्रियं साक्षित्युच्यते' इति पद्धत्यादौ च
साक्षिणोऽनुप्रमाणत्वोक्तेरिहपराभ्युपेतानुव्यवसायरूपत्वस्फोरणाय साक्षिज्ञानेत्युक्तम् ।
'साक्षिप्रत्यक्ष २ तो ह्येव मानानां मानतेयते '
इत्यादो ज्ञानेपि प्रयोगात् । तथा युक्तिपादे 'न विलक्षणत्वात्' इति नये --
'सुखदुःखादिविषयं शुद्धं संसारगेष्वपि '
इत्यस्य व्याख्यावसरे सुधायां 'स्वरूपभूतं चैतन्येन्द्रियं साक्षीत्युच्यते तदभिव्यक्तं ज्ञानं च 'इत्युक्तत्वाच्च ।।
नन्वात्मस्वरूपज्ञानत्वादिरूपसाक्षित्वस्य परमतेऽप्रसिद्धिरित्यत आह -- तार्किकेति ।। स्वतस्त्वानुमानवादे वक्ष्यमाणदिशा व्यवसायप्रकारकतया व्यवसा ३ यप्रकारवद्विशेष्यकतया च तद्विषयक प्रत्यक्षत्वं वा ज्ञानांशे लौकिकप्रत्यक्षत्वं वाऽनुव्यवसायत्वम् । साक्षित्वमप्येवं रूपमेवात्र स्वतस्त्वनिरुक्तौ प्रविष्टमित्यर्थः । यन्मते वैशिष्ट्यमनुव्यवसायविषय एव नेति तन्मतेनान्त्यः । तत्र तु न स्वातन्त्रेणेति विवक्षणीयम् ।

--१.न. - कुं. २. - माण.-मु ३. तत्.-मु.

-------- स्वम- ज्ञ-स्व-नि.) प्रमाण्यवादः पू-८.

---- --- ----

अत्र च नियमोक्त्या न्यायमतेपि क्वचिदनुव्यवसायेनप्रामाण्यग्रहणस्य १ वक्ष्यमाणत्वात्सिद्धसाधनमिति शङ्क्या साक्षीत्युक्त्या घटज्ञानमस्तीत्यादिशब्दजन्यमप्रतिबद्धं घटज्ञानविषयकं २ ज्ञानं प्रति-

ज्ञानांशं इति विशेषणात्स्मृत्युपनूीतेऽतीते घटज्ञाने तद्विषयकमहं घटज्ञानवानिति यज्ज्ञानमात्मांशे लौकिकप्रत्यक्षं तेन प्रमाण्याग्रहणा ३ द्बाधवारणमिति ध्येयम् । वस्तुतस्त्वत्रान्त्यपक्षप्रवेश एव साधुः । तथाच
प्रमाण्यविरोधीत्यादिविशेषणवैयर्थ्यशङ्कावकाशलेशोपि नेति ज्ञेयम् । विशेषणकृत्यानि स्वयमेव व्यनक्ति -- अत्रेति ।। नरुक्तिवाक्य इत्यर्थः । नियमोक्त्य-- गृह्यत एवेति नैयत्योक्त्येत्यर्थः ।। वक्ष्यमाणत्वादिति --- बाधोद्धारग्रन्थादौ धटादिज्ञानानुव्यवसायजन्यसंस्कारोत्पन्नस्मृत्युपनीते घटादिज्ञाने घटादिज्ञानजन्यसंस्कारोत्पन्नस्मृत्युपनीतं घटघटत्वतद्वैशिष्ट्यरूपप्रामाण्यं पञ्चमानुव्यवसायेन गृह्यत इति वक्ष्यमाणत्वादित्यर्थः । शङ्का निरस्तेत्यन्वयः । एतच्च तत्प्रकारप्रकारकतयेत्युक्तानुव्यवसायत्वरूपसाक्षित्वविवक्षया बोध्यम् । अन्त्यकल्पे तु गृहीतप्रमाण्यकज्ञानसजातीयज्ञानान्तरानुव्यवसायमीश्वरज्ञानं वादाय सिद्धसाधनता ध्येया । शब्दजन्यमित्युपलक्षणम् । सामान्यप्रत्यासत्तिजन्यं ज्ञानांशेऽलौकिकं ज्ञानवानहमिति ज्ञानं च प्रतीत्यपि ध्येयम् । साक्षित्वस्य द्विरूपस्यात्राभिमतत्वा ४ त्तत्प्रकारकेत्यादिरूपेण शब्दजन्यज्ञानस्य ज्ञानांशेऽलौकिकेत्यन्त्यपक्षरूपेण च सामान्यप्रत्यासत्तिजन्यस्यनिरासात् ।। अप्रतिबद्धमिति -- विरोध्युपस्थितितत्सामग्र्यसमवहितमित्यर्थः । यस्तु घटज्ञानमिति ज्ञानेनापि प्रमाण्यं गृह्यत इति पक्षधरोद्धाटित पक्षः ; स त्वपदर्थत्वादवाक्यत्वादिति रुचिदत्तादिनैव दूषितत्वादुपेक्ष्यः ।

१. ग्रहणस्य -मु.च. २. विषयज्ञानं.-मु.च. ३.प्रप्तबध.-अ. ४ त्तेन द्वरूपेणापि. शब्दजन्यज्ञानस्य सामान्यप्रत्यासत्तिजन्यादिज्ञानस्य च निरासात्.- आ. अ.

स्व-ज्ञ-स्व-नि.) प्रमाण्यवादः पु- ९

----- ----- --

-ज्ञानप्रमाण्यस्याविषयत्वाद्बाध इति शङ्का ग्राह्यप्रमाण्याश्रयतत्तज्ज्ञानविषयकेत्युक्त्या घटज्ञानं गृह्णता साक्षिणा पटज्ञानप्रमाण्यस्याग्रहणाद्बाध इति शङ्का अवशिष्टेन मन्मतेपि दोषशङ्कादीरूपे ग्राह्यपामाण्यविरोधिग्राहकसामग्रीसमवधानात्मके प्रतिबन्धे सति साक्षिणा प्रमाण्यय १ स्याग्रहणाद्बाध इति शङ्का च निरस्ता । अत्र यद्यपि विषयत्वं साक्षिज्ञानं प्रत्येवेति नियमो न युक्तः । मन्मतेऽपि प्रामाण्यस्यानमित्यापरिग्राह्यत्वात् । तथापि साक्षिज्ञानं प्रति विषयत्वमेवेति नियमो युक्त एव ।

अत्रविवक्षित तत्प्रकार प्रकारकतादिरूपज्ञानज्ञानत्वाभावाच्च ।। तत्तज्ज्ञानेति --

ग्राह्यप्रामाण्याश्रयविषयकेत्युक्तावपि

घटज्ञानपटग्रहणेनोक्तदोषतादवस्थात्तत्तज्ज्ञानविषयकेत्यप्यनुवादः । अत एव धर्मिनिर्देशेऽपि तत्तदित्युक्तिः २ ।

ग्राह्यप्रमाण्याश्रयेत्यनुक्तावप्रामाण्याश्रयस्यापि ज्ञानस्य तत्तज्ज्ञानपदेन ग्रहणप्रसङ्गात्तद्विषयकेण साक्षिणा प्रामाण्याग्रहणाद्बाध एव । साक्षिण एकत्वेपि पटज्ञानप्रामाण्यग्रहणस्य पटज्ञानग्रहणप्रयुक्तत्वेन घटज्ञानग्रहणप्रयुक्तत्वाभावाद्बाधशङ्का युक्तैवेति भावः ।। दोषशङ्केति ---

दुष्टकरणजन्यत्वशङ्का तन्निश्चयतज्जन ३ कादिरूपेत्यर्थः । नैयत्यस्य साक्षिणैव गृह्यते साक्षिणा गृह्यत एवेति च द्वेधा संभवाद्विवक्षितमाह -- अत्रेति ।।

निरुक्ताविवत्यर्थः-- अनुमित्येति ।। चैत्रज्ञानं प्रमा अर्थसंवादादित्यादिरूपेणमैत्रादेरनुमित्युदयीदित्यर्थः ।

१. ण्याग्रहणात्- मु. २. क्तम्.-मु. ३. सामग्र्या.-मु.

स्व-ज्ञ-स्व-नि.) प्रमाण्यवादः पु- १०.

----- ----- ---

मणिकृतापि हि तदप्रामाण्याग्राहकेति विंशिषता प्रामाण्यग्रहणे १ ऽप्रामाण्योपस्थापकसामग्र्यसमवधानस्यप्रयोजकतोक्तैव ।। १ ।।
यद्वा तत्तज्ज्ञानप्रामाण्यस्य ग्राहप्रामाण्यस्य ग्राहप्रामाण्याश्रयत्तत्तज्ज्ञानविषयकसाक्षिज्ञानविषयत्वयोग्यत्वं स्वतस्त्वं ।

ननु ज्ञानग्राहकसाक्षिणो विरोधिसामग्रयभावमपेक्ष्य प्रामाण्यग्राहकत्वे नरपेक्षज्ञानग्राह्यत्वरूपस्वतस्त्वायोग इत्यत आह -- मणिकुतापीति ।। परतस्त्वादिनापीत्यर्थः । विरोध्युपस्थापकसामग्र्यसमवधानस्य प्रामाण्यग्राहणकारणत्वे हि दोषः । गमनशक्तस्य गजस्य गोक्षुरकापसा २ रणस्येव प्रयोजकत्वे तु न दोष इति भोवेनोक्तं -- प्रयोजकतेति ।। १ ।। पूर्वं फलोपधानापेक्षया प्रयोजकविशषणोक्त्या निरुक्तिः कृता अधुना तु तादृशविशेषणत्यागेन प्रका ३ रान्तमाह-- यद्वेति ।। सार्वत्रिकसार्वकालीनप्रामाण्यस्वतस्त्वलाभाय वाऽऽह -- यद्वेति । नन्वेवं स्वतस्त्वस्याप्रतिबद्धसाक्षिवेद्यत्वरू ४ त्वे 'ज्ञानग्राहकः साक्षी प्रमाणतयैव गृह्णातीत्युत्सर्ग एव -- विसंवादलक्षणात्परतोऽपवादादप्रामाण्यं च गृह्णाति'इति तत्वनिर्णयटीकाद्युक्तौत्सर्गिकत्वविरोध इत्युक्त्या यथोक्त ५ विशेषणेनापि साक्षिज्ञानेन प्रतिबन्धदशायां प्रामाण्याग्रहाद्बाध इति शङ्का; साक्षीत्युक्त्या घटज्ञानमस्तीत्यादिशब्दजन्यं घटज्ञानविषयकज्ञानं प्रति तथा ज्ञानांशालौकिकं सामान्यप्रत्यासत्तिजन्यं ज्ञानं च प्रति प्रामाण्यस्य -

१.ग्रहे-मु.च. २.सारक.- आ. ३. पक्षा.-आ.मु. ४.पक्षे.-मु. ५.प्रतिबन्धकस्थले यथोक्तविशेषणेनापि साक्षिणाप्रामाण्या ग्रहात् -मु.

स्व-ज्ञ-स्व-नि.) प्रमाण्यवादः पु- ११.
योग्यत्वं च साक्षिनिष्ठां सहजां ग्रहणशक्तिं प्रति स्वविषयज्ञानद्वाराऽवच्छेदकत्वम् ।

कदाप्यविषयतया योग्यत्वं २ नेति बाध इति शङ्का ; ग्राह्यप्रमाण्याश्रयतत्तज्ज्ञानविषयकेत्युक्त्या घटज्ञानं गृह्णता साक्षिणा पटज्ञानप्रमाण्यस्य कदाप्यग्रहेण योग्यत्वं ३ नेति बाध इति शङ्का च निरस्तेति पूर्ववद्युक्तमिति भावः । अत्रापि ज्ञानपदं पूर्ववत्स्वरूपेन्द्रियभ्रमनिरासाय । साक्षित्वमपि व्यवसायप्रकारप्रकारकतयातत्प्रकारवद्विशेष्यकतया तद्विषयकप्रत्यक्षत्वरूपं वा ज्ञानांशे लौकिकप्रत्यक्षत्वरूपं वाऽनुव्यवसायत्वमेवेति भावः । अत्रापि पूर्वत्रेव ग्राह्यप्रामाण्याश्रययेत्यंशकृत्यं बोध्यम् । नन्वत्र स्वाश्रयज्ञानग्राहकग्राह्यत्वयोग्यत्वं स्वतस्त्वमित्युक्तं स्यात् ; तच्चाप्रामाण्यस्याप्यस्ति । न च तत्र ज्ञानं साक्षिवेद्यमप्रामाण्यं त्वनुमेयमिति न दोष इति युक्तम् । प्रथममप्रामाण्यानुमित्यसंभववादे विसंवादाहितशक्तिकेन साक्षिणैवाप्रामाण्यग्रहणस्य वक्ष्यमाणत्वादित्यतो वा ; साक्षिविषयत्वयोग्यत्वं यदि साक्षिजन्यव्यवहारयोगि ४ त्वादिरूपं तदैतत्फलोपधानपर्यवसन्नमिति न प्रतिबन्धकालीनप्रमाण्यस्वतस्त्वलाभ इत्यतो वाऽऽह -- योग्यत्वं चेति सहजां --
स्वाभाविकीं विषयीकरणशक्तिं प्रति स्वस्य साक्षिणस्तच्छक्तेर्वा यो विषयो ग्राह्यप्रामाण्याश्रयरूपं ज्ञानं तद्वाराऽवच्छेदकत्वं-- विषयतया व्यवर्तकत्वम् । ज्ञानग्रहणशक्तिरितिवत्प्रामाण्यग्रहणशक्तिरिति व्यवहारापादकत्वमेव प्रामाण्यस्य साक्षिविषयत्वयोग्यत्वमित्यर्थः । साक्षिशक्तिर्ज्ञानद्वारैव

तन्निष्ठप्रामाण्यं गृह्णाति । न साक्षात् । यथा प्रत्यक्षं व्यक्तिद्वारैव जातिं न साक्षादिति स्वविषयज्ञानद्वारेत्युक्तम् ।।

१.प्रामाण्यस्य. -ख. २.च. -कुं. ३. च- कुं. ४ .ग्या.-कुं.

स्वम-ज्ञ-स्व-नि.) प्रामाण्यवादः पु- १२.

------ ------ -----

एवं च प्रतिबन्ध १ दशायामपि करतलादौ दाहयोग्यतावत् प्रामाण्ये ग्रहणयोग्यतास्त्येव । तथा च प्रामाण्यग्रहणशक्तेः सहजत्वात् प्रामाण्यग्रहणस्यौत्सर्गिकत्वरूपतस्त्वसिद्धिः । उक्तं च टीकाकारैः 'साक्ष्येव ज्ञानं तत्प्रामाण्यं च विषयीकर्तुं क्षमः ।

ज्ञानग्राहकैककशक्तिविषयत्वं प्रामाण्यस्य साक्षिविषयत्वयोग्यत्वम् । नैतदप्रामाण्येऽस्ति । भिन्नविषयत्वादित्यग्रे व्यक्तम् । गुरुपादस्तु--- स्वपदेन प्रमाण्यम् । बहुव्रीहिसमासः । स्वविषयकं यज्ज्ञानं साक्ष्येव । साक्षिनिष्ठशक्तिं प्रति प्रामाण्यस्य न साक्षाद्विषयत्वमित्यतः स्वविषयकज्ञानद्वारेत्युक्तमित्याहुः । परमते शक्तेरप्रसिद्धावपीदं स्वमतासाधारणमिति वा परेणापि शक्तिमङ्गीकारयिष्यामीति वा ज्ञानग्रह २ णसामग्रीमात्रं प्रति स्वविषयज्ञानद्वारावच्छेदकत्वमिति वा ज्ञानग्राहकतावच्छेदकधर्मावच्छन्नग्राहकताकत्वं वा तदर्थं इति भावः । नन्वेतावतापि कथं प्रतिबन्धदशापन्न ३ ज्ञानप्रामाण्यस्य स्वतस्त्वलाभः येन सर्वप्रमाणानां स्वतस्त्वं स्यादित्यत आह-- एवं चेति ।। योग्यतारूपे स्वतस्त्वे सतीत्यर्थः । योग्यत्वस्योक्तरूपत्वे सतीति वार्थः --- दाहेति ।। दाहविषयत्वयोग्यतावदित्यर्थः । द्वितीयनिरुक्त्याऽन्यदप्यनुकू ४ लितमित्याह --तथाचेति । उक्तरूपयोग्यत्वगर्भनिरुक्तौ सत्यामित्यर्थः -- औत्सर्गिकत्वेति ।। ' ज्ञानग्रहकः साक्षी प्रमाणतयैव गृह्णातीत्युपसर्ग एव

'इति तत्वनिर्णयटीकाद्युक्तौत्सर्गिकत्वेत्यर्थः-- उक्तं चेति ।। प्रामाण्यस्य सहजशक्तिविषयत्वं प्रतिबन्धस्थले योग्यतास्तीत्येतच्चौक्तं तत्वनिर्णयटीकायामित्यर्थः ।

१. बन्धक.--मु.च.छ. २. ग्राहक.--मु. ३.पुस्तकेनास्ति.--मु. ४. लं.--मु.

स्वम-ज्ञ-स्व-नि.) प्रामाण्यवादः पु-१३.

किं तु प्रतिबद्धो ज्ञानमात्रं गृहीत्वा १ तत्प्रामाण्यग्रहणस्य नेष्टे 'इति ।। २ ।।

यद्वा - उभयसिद्धप्रामाण्याविषयकज्ञानभिन्नज्ञानविषयत्वनैयत्यं स्वतस्त्वम् ।

कारणान्तरोपनिपातेन मानसापराधेन प्रतिबद्ध--इत्येवंरूपेण तत्र पाठेऽप्ययमेकदेशानुवाद इत्यदोषः ।। २ ।। प्रौड्या स्वतस्त्ववादिमात्रसाधारणं पक्षान्तरमाह -- यद्वेति ।। तत्तज्ज्ञानप्रामाण्यस्येत्यनुषङ्गः । साध्ये ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकेति ग्राह्यम् । स्वातस्त्ववादिनो २ ह्यनेके ।

ग्रन्थकर्तैकः । भट्टो ज्ञानातीन्द्रियत्ववादी । गुरुर्ज्ञानमात्रस्वप्रकाशत्ववादी । मिश्रस्तु न्यायमत इवास्वप्रकाशानुव्यवसायवादी । तत्रोभयत्यस्य सिद्धान्तितार्किकोभयेति भट्टतार्किकोभयेति गुरुतार्किकरूपोभयेति मिश्रतार्किकोभयेति मायिता ४ र्किकोभयेत्येवंरूपेणेत्यर्थः । एकदाऽनेकैः सह विवादायोगात् । उभयसिद्धम यत्प्रामाण्याविषयकं ज्ञानं प्रामाण्याविषयकत्वेनोभयसंमतं यज्ज्ञानं अयं घट इत्यादिरूपं ज्ञानं

तद्भिन्नं ग्राह्येत्यादीरूपं च यज्ज्ञानं सिद्धान्ते प्रागुक्तरूपसाक्षिज्ञानं भट्टमते ज्ञानानुमितिरूपं गुरुमते स्वप्रकाशघटादिज्ञानं मिश्रमते तदनुव्यवसायः । तेन गृह्यत एवेत्येवंरूपं तद्विषयत्वनैयत्यं तत्तन्मते स्ततस्त्वमित्यर्थः । न च गुरुमते सर्वज्ञानयाथार्थ्यस्वप्रकाशत्वयोरुपगमेन प्रामाण्याविषयकं ज्ञानं नास्त्येवेति शङ्क्यम् । इदं ज्ञानप्रमाणमित्याद्यप्रामाण्यारोपस्थले ज्ञानस्य प्रामाण्याविषयकत्वस्य गुरूतार्किकसंमतेः ।

१.प्रामाण्य.-मु. छ. 'तत्'इति नास्ति. -घ. २. हि चत्वारः. - कुं.
३. नास्ति - कुं. ४. नास्ति. -कुं.

'प्रामाण्यवादः पु- १४.
-- ----- -- -------- ----------

तत्र प्रामाण्याविषयकज्ञानाभिन्नेत्युक्त्या घटऽयमित्यादिघटादिविषयकप्रत्यक्षज्ञानं प्रति ज्ञानं गुण इत्यादिशब्देन घटज्ञानमित्यादिशब्देन च जन्यं ज्ञानविषयक ज्ञानं प्रति प्रतिबद्धानुव्यवसायं प्रति च स्वतस्त्वपक्षेपि --

आरोपस्तु गुरुमते इच्छास्थस्य व्यधिकरणप्रकारकत्वरूपाप्रामाण्यस्यासंसर्गाग्रहो न्यायमते विशिष्टज्ञानमित्यन्यदेतत् । अत्र ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकेत्युक्त्या तदंश एवोक्तरूपज्ञानभिन्नत्वस्याभिमतत्वाज्ज्ञानविषयकं ज्ञानं प्रमेति ज्ञानस्याद्यनुज्ञाने प्रामाण्याविषयकभिन्नसत्वान्न दोषः । प्रामाण्यवादं ग्राह्यतत्तत्प्रामाण्यपरं वा । तथाच यथान्यासेनैवोक्तस्थले न दोषः । अत्र नञ्द्वयाप्रवेशेनोभयसिद्धप्रामाण्यविषयकज्ञानविषयत्वनैयत्यमित्युक्ते तादृशानुमित्यादिना सिद्धसाधनम् । अतोऽविषयकभिन्नेत्युक्तिः ।

अत्राद्यज्ञानपदं यथोक्तरूपघटादिभिन्नेन घटज्ञानादिना प्रामाण्याग्रहाद्बाध इति शङ्कानिरासाय । अन्त्यं तु तादृशज्ञानभिन्नघटादीविषयत्वाभावेन बाध इति शङ्कानिरासायेति व्यक्तमिति शिष्टपदकृत्यान्याह -- तत्रेति ।। प्रामाण्यविषयकज्ञानभिन्नेत्यनुक्त्वोभयसिद्धज्ञानविषयत्वनैयत्यमित्येतावत्युक्ते सति प्रष्टव्यं उभयसिद्धज्ञानपदेन किं प्रत्यक्षज्ञानमभिमतं उत शाब्दं अथानुव्यवसायरूपम् ? द्वितीयेऽपि किं ज्ञानविषयकं विषयालिङ्गितज्ञानविषयकं वेति विकल्पान्वा ; विषयग्राहिज्ञानमिति वा ज्ञानग्राहिज्ञानमिति वा उभयग्राहि ज्ञानमिति वा उभयग्राह्यनुव्यवसायरूपप्रत्यक्षं वेति विकल्पान्वा हृदि निधाय क्रमेण निराह -- घटोयमित्यादिना ।। प्रत्यक्षज्ञानं प्रतीत्यादेः प्रामाण्यस्याविषयत्वादित्यन्वयः । गुरुमते घटोयमिति ज्ञानेनापि प्रामाण्यग्रहादिदं ज्ञानमप्रमाणमित्यादिज्ञानं प्रतीति ग्राह्यम् ।

१. जन्य. - मु. च.

स्वम- ज्ञ-नि.) प्रामाण्यवादः पु- १५.

उक्तस्य त्रिविधस्यापि ज्ञानस्य प्रामाण्याविषयकत्वेन तद्भिन्नत्वाभावात् । उभयसिद्धेत्युक्त्या न्यायमते ऽ २ प्रतिबद्धस्याप्यनुव्यवसायस्य प्रामाण्याविषय ३ कत्वेन तद्भिन्नत्वाभावात्सिद्धान्त्यभिप्रेतस्याप्रतिबद्धानुव्यवसायं प्रति विषयत्वास्यासिद्ध्याऽर्थान्तरमिति शङ्का परास्ता ।

शङ्कानिरासं व्यनक्ति - उक्तस्य त्रिविधस्यापीति ।। यत्तु घटज्ञानमिति शब्दजन्यज्ञानेन घटत्ववति घटत्वप्रकारकत्वरूपं प्रामाण्यं गृह्यत इति ; तत्त्वपदर्थत्वादवाक्यार्थत्वादयुक्तम् । प्रतिबद्धानुव्यवसायं प्रतीत्यत्र गुरुमते

इदं ज्ञानमप्रामाणमित्यादिप्रतिबद्धज्ञानं प्रतीति भट्टमते प्रतिबद्धज्ञानानुमितिं प्रतीत्यपि ध्येयम् ।। उभयसिद्धेत्युक्तेति -- प्रामाण्यविषयकेत्यादावुक्ते सत्यन्यतरसिद्धं प्रामाण्यविषयकं यदप्रतिबद्धानुव्यवसायरूपं ज्ञानं तद्विषयत्वमादाय प्रामाण्यस्य स्वतस्त्वं सिद्धान्त न सिद्ध्येत् । तस्य प्रामाण्याविषयकभिन्नत्वाभावात् । उभयसिद्धत्युक्तौ अप्रतिबद्धानुव्यवसायस्य प्रामाण्याविषयकत्वेनोभयसिद्धत्वाभावादुभयसिद्धतादृशज्ञानभिन्नत्वमस्त्येवेति नार्थान्तरत्वदोष इत्यर्थः । अनुव्यवसायस्येत्युपलक्षणम् । अप्रतिबद्धज्ञानानुमितेरप्रतिबद्धस्वप्रकाशज्ञानस्येत्यपि ध्येयम् । एवमग्रेपि । अप्रतिबद्धत्वं च प्रामाण्यविरोध्युपस्थितितत्सामग्र्यसमवहितत्वम् । शङ्कानिरासप्रकारं व्यनक्ति -- अप्रतिबद्धेति ।। उभयसिद्धादित्यादेः प्रामाण्याविषयकत्वेनोभयसिद्धाद्भिन्नत्वसंभवादित्यर्थः ।।

१. यत्वेन. -मु. च. छ. २. मतेप्य.- क. ३. यत्वेन.- छ.

स्वम-ज्ञ-स्व-नि.) प्रामाण्यवादः पु- १६.

--- --- ---

-- १ अप्रतिबद्धानुव्यवसायस्य न्यायमते प्रामाण्यविषयत्वेपि मन्मते तदभेनोभयसिद्धात्प्रामाण्यविषयकाद्भिन्नत्वसंभवात् । नैयत्यमित्युक्त्या न्यायमते प्रामाण्यस्यैवंविधां प्रामाण्यानुमितिं
प्रति क्वचिदनुव्यवसायं प्रित च विषयत्वात्सिद्धसाधनमिति शङ्का व्युदस्ता । अत्राद्यं पक्षद्वयं स्वमतासाधारणम् । तृतीयं तु मीमांसकादिमतसाधारणमिति ज्ञेयम् । एतदेव पक्षत्रमभिप्रेत्योक्तं सुधायां 'ज्ञानगतयाथार्थ्यस्य ज्ञानग्राहकमात्रग्राह्यत्वं स्वतस्त्वं 'इति । अत्राद्ये २ पक्षे सुधा ३ स्थेन ज्ञानग्रहकशब्देन ग्राह्यप्रामाण्याश्रयत ----

एवंविधामिति ।। उभयसिद्धप्रामाण्याविषयकज्ञानभिन्नज्ञानरूपां इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिहेतुत्वादित्यनुमितिं प्रति
वक्ष्यमाणदिशा स्मृत्युपनीते व्यवसाये स्मृत्युपनीतप्रामाण्यावगाह्यनुव्यवसायं
गृहीतप्रामाण्यकज्ञानसजातीयज्ञानगोचरानुव्यवसायं च प्रति ।। अत्रेति -- उक्तस्वतस्त्वनिरुक्तित्रयमध्य इत्यर्थः ।। स्वमतेति -- तार्किकमतसाधारण्येपि मीमांसकत्रितयसाधारणं नेत्यर्थः । मीमांसकादीत्यादिपदेन मिरारिमिश्रः सिद्धान्ती मायावादिप्रभृतिर्वा ग्राह्यः । उक्तपक्षत्रयं सुधावाक्यरूढं करोति -- एतदिति ।। उक्तेमिति ।।
'प्रत्यक्षवच्च प्रामाण्यं स्वतः एवागमस्य हि '
इति जिज्ञासानयानुव्याख्यानव्याख्यावसर उक्तमित्यर्थः । तद्व्यनक्ति अत्रेत्यादिना ।।

१. आपास्ता. - च.छ. निरस्ता.-ग. २. अत्राद्य.- मु.च. ३.सूधायाम्.-क

'प्रामाण्यवादः पु- १७.
--- ----- ----
-- त्तज्ञानविषयकसाक्षिज्ञानं ग्राह्यशब्देन तद्विषयत्वं मात्रपदेन १ कास्न्र्यपरेण तन्नियमः अवधारणपरेण प्रतिबद्धव्यवच्छेदश्च विवक्षितः । द्वितीय २ पक्षे ग्राह्यशब्देनोक्तसाक्षिज्ञानविषयत्वयोग्यता अवधारणपरेण मात्रपदेन ३ ज्ञानत्वग्रहणशक्तिवत्प्रमात्वग्रहणशक्तेरपि सहजत्वं विवक्षितम् । तृतीय ४ पक्षे ज्ञानग्राहकशब्देन साक्षितदितरसाधारणं ज्ञानम् मात्रशब्देनावधारण ५ परेणोभयसिद्धप्रामाण्याविषयकज्ञान ६ व्यवच्छेदः, कास्न्र्यार्थेनाप्रतिबद्धसर्वानुव्यवसायसंग्रहश्च विवक्षित इति ज्ञेयम् ।। ३ ।।

मात्रपदस्य द्व्यर्थत्वमुपेत्याह -- कार्स्न्येत्यादि ।। यावन्तिज्ञानग्राहकाणि तावद्भिर्ग्राह्यत्वोक्तौ ज्ञानग्राहकेण गृह्यत एवेति नियमलाभादिति भावः ।। प्रतिबद्धेति ।। ज्ञानग्राहकेणैव गृह्यत इत्युक्ते न तु विरोधिसामग्रीसमवहितेनेत्यर्थलाभादिति भावः । अर्हार्थण्यत्प्रत्ययान्तत्वमुपेत्याह -- ग्राह्यशब्देनेति ।। प्रमात्वेत्यादि ।। ज्ञानग्राहकमात्रेणेत्यस्य ज्ञानग्राहकेणैव न त्वधिकेनेत्युक्तौ प्रमात्वग्रहणशक्तेरपि सहजत्वलाभादिति भावः । यद्यापे शक्तेरेकत्वमेव लभ्यते । तथापि प्रतिबन्ध ७ स्थले साक्षिणः प्रामाण्यग्रहणशक्तेः प्रतिबन्धेऽपि न ज्ञानत्वग्रहणशक्तेरिति शक्तिद्वित्वमुपेत्य सहजत्वं विवक्षितमित्युक्तम् -- तदितरेति ।। साक्षीतरस्वप्रकाशा ८ नुमित्यनुव्यवसायरूपपमित्यर्थः । नैयत्यलाभ ९ प्रकारमाह -- कर्त्स्न्यर्थेनेति ।।
अप्रतिबद्धेति ।। विरोधिसामग्र्यसमवहितज्ञानगोयरासर्वज्ञानग्रहश्च विवक्षित इत्यर्थः ।। ३ ।।

१.शब्देन- छ.क. २.ये.-कुं. ३. शब्देन.-कुं.छ. क. ४.ये- कुं ५.णार्थेनो-कुं.
छ.क. ६. ज्ञानपदं न.-छ. क. ७.-कुं. ८.अनुमितिपदं न. -कुं. इ. ९भाया- कुं इ.

परोक्तस्वतस्त्वनिरुक्तिभङ्गः प्रामाण्यवादः पु- १८.

स्वमते ज्ञप्तौ स्वतस्त्व निरुक्तिः ।। १ ।।

यत्तु मणावुक्तम् । 'तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्री । ग्राह्यत्वं स्वतस्त्वं तदभावश्च १ परतस्त्वम् 'इति तन्न ।

स्वमते २ ज्ञप्तौ स्वतस्त्वनिरुक्तिः ।। १ ।।

मीमांसकत्रितयसाधारणीं परोक्तस्वतस्त्वनिरुक्तिमनूद्य निराह -- यत्त्विति ।। मणिग्रन्थे 'ज्ञानप्रामाण्याश्रयेऽयं घट इत्यादिज्ञाने अप्रामाण्याग्राहिका यावती ज्ञानग्राहिका सामग्री गुरुमते घटमहं जानामीत्येवमाकारस्वप्रका ३ शव्यवसायजनिका चक्षुर्घटसंयोगादिरूपा मिश्रमते तदनुव्यवसायजनकमनःसंयोगादिरूपा भट्टमते घटो ज्ञानविषयः ज्ञाततााधारत्वादित्याद्यनुमितिजनकव्याप्तिज्ञानादिरूपा । तावत्या ग्राह्यत्वं स्वतस्त्वमित्यर्थः । अत्र निरुक्तौ तत्रेत्युक्त्या यत्र
शुक्तिरजतादिज्ञाने विसंवादादीलिङ्गेनाप्रामाण्यानुमित्यनन्तरमिदमप्रमात्वेन जानामीत्यनुव्यवसायः
तत्राप्रामाण्यवत्यप्रामाण्यप्रकारकत्वरूपाप्रामाण्यघटितानुमितिनिष्ठप्रामाण्यस्य प्रथमज्ञाननिष्ठाप्रामाण्यग्राहिणैवानुव्यवसायेन ग्रहणाद्बाध इति शङ्का अप्रामाण्याग्राहकेत्युक्त्या इदं ज्ञानमप्रमेत्यादावप्रामाण्यग्राहकसामग्र्या तज्ज्ञाननिष्ठस्यप्रामाण्यस्याग्रहणा ४ द्बाध इति शङ्का यावदित्युक्त्या न्यायमते ज्ञानग्राहकानुमितिसामग्र्या क्वचिदनुव्यवसायेन च प्रामाण्यग्रहात्सिद्धसाधनमिति शङ्का निरस्ता । विधिकोटौ बाधवारकाणां तदभावकोटौ सिद्धसाधनतावारकत्वं तद्वारकस्य च बाधवारकत्वं ज्ञेयम् ।
१. 'च'इति नास्ति -छ. २ 'ज्ञप्तौ' इति नास्ति -आ. इ. ३. शानु- कुं.
४ . ग्रहात् - कुं . इ.

'प्रामाण्यवादः पु- १९.

--- ------ -----

गुरुमते सर्वज्ञाननां प्रमात्वेपि तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यस्येच्छायां प्रसिद्धस्येदं ज्ञानमप्रमेत्यादौ

स्मरणसंभवेनागृहीतासंसर्गरूपाप्रामाण्यग्रहसंभवात्तन्मतेप्यप्रामाण्याग्राहकपद वैयर्थ्यं नेति ।। अत्र यदुक्तं प्रामाण्यग्राहणाद्बाधवारणाय तत्र ग्राह्यप्रामाण्याश्रयज्ञाने इत्यर्थकं तत्पदमिति तन्न । इमौ वह्नी इति वह्निद्वयगोयरैकज्ञानविषयकानुव्यवसायादिरूपज्ञानेन
दोषशादन्यतरांशाप्रामाम्यग्राहिणा १ प्यन्यतरांशे प्रामाण्यग्रहणेन बाधात् । यत्तु तदिस्यस्य तत्र तदंशे ग्राह्यप्रामाण्याश्रयज्ञानांशे अप्रामाण्यग्राहकेत्यर्थत्वान्न दोष इति तन्न । तथापि तदंशे भावरूपाप्रामाण्यग्राहिणापि नेदं ज्ञानं २ प्रमाणमिति तदंशे प्रामाण्याभावावगाहिना प्रामाण्याग्रहणेन बाधादिति मूलोक्तदोषग्रासात् । यदपि तत्पदं ग्राह्यपरं ३ सत्प्रामाण्यपदेनान्वीयमानं ग्राह्यप्रामाण्यविरोधीत्यर्थसाभार्थमतो न दोष इति तदपि न । तथात्वे ऽतत्प्रामाण्येति निर्देशापातेन यथोक्तनिर्देशे तत्पदस्य प्रामाण्यपदेनासामर्थ्यात् । गुरुमते इदं ज्ञानमप्रमेत्यादावप्रमेति स्मृतेरप्रामाण्यग्राहकत्वेपि इदं
ज्ञानमितिग्रहणात्मकस्याप्रामाण्यस्मृतिप्रतिबन्धेन प्रामाण्या ४ ग्रहणेन बाधापत्त्योक्तस्वतस्त्वनिरुक्ते र्गुरुमतसाधारण्यायोगाच्च । न चोप्तत्तिप्रामाण्यग्रन्थे मणिकृतैव 'प्राभाकरास्त्वि 'त्यादिना गुरुमते संशयानुपपत्त्युपपादनप्रस्तावे इदं ज्ञानं प्रमा न वेत्त्यादावपि प्रामाण्यचग्रहोस्तीत्युपेत्य संशयस्यान्यवीषयत्वोपपादनात्तादृशस्थलेपि प्रामाण्यग्रहसद्भावान्न बाध इति शङ्क्यम् । तथात्वे तन्मते तदप्रामाण्याग्राहकपदवैयर्थ्यापत्तेः ।

१.'प्य' इति नास्ति - कुं . २. ज्ञानपदं न -अ. ३ सदप्रमाण्य - मु . अ. ४ ग्रहेण - अ.

---------- -------

तदभाववति तत्प्रकारकत्वरूपाप्रामाण्याग्राहकस्यापि तद्वति तत्प्रकारकत्वरूपप्रामाण्यात्यन्ताभावविषयकस्य ज्ञानज्ञानस्य प्रामाण्याग्राहकत्वेन बाधात् । अप्रामाण्यपदेन प्रामाण्यविरोधिविवक्षायामपि --

तादृशस्थले प्रामाण्यग्रहमुपेत्याग्राहकपदेन ग्राहकसामग्र्यसमवधान विवक्षायां च मिश्रादिमतेऽप्रामाण्यग्रहस्थले तत्सामग्र्यभावेन तदसमवाहितेनापि ज्ञानग्राहकेण तत्र प्रामाण्याग्रहाद्बाध १ एवेत्यादिदूषणं स्फुटत्वादुपेक्ष्योक्तनिरुक्तौ
यावज्ज्ञानविषयकज्ञानविषयत्वमित्येव सामंजस्ये ग्राहकसामग्रीत्युक्तिवैयर्थ्या २ द्गौरवाच्चेत्युपेत्य ग्राहकसामग्रीपदत्यागेन ज्ञानपदेन ३ वानुवदन्यथाश्रुताप्रामाण्यपदार्थे तावद्दोषमाह -- तदभाववतीति ।। अप्रामाण्यग्राहकस्यापीति ।। उक्तविधभावरूपाप्रामाण्यात्यन्ताभावव्याप्याप्यविषयकस्येत्यपि ज्ञेयम् ४ । तेन नञोऽभानार्थविवक्षापि प्रयुक्ता ध्येया ।
ननु नञो विरोधार्थत्वे प्रामाण्याभावतद्व्ययाप्याप्रामाण्यतद्व्याप्यानां चकुर्णामप्यप्रामाण्यपदेन प्रामाण्यविरोधिवाचिना ग्रहणसंभवान्नोक्तदोषः । विरोधित्वस्य प्रामाण्यनिश्चयप्रतिबन्धकज्ञानविषयत्वरूपत्वादित्याशयेन पक्षधराद्युक्तविवक्षामनूद्यनिराह -- अप्रामाण्येति ।। अपिपदेनैतत्सूचयति । यद्यपि ग्राह्यप्रामाण्यविरोधिलाभो नैतावता भवति । तत्पदमिलितेनाप्यसामर्थ्यादलाभ एव । विरोधिमात्रत्वप्रयोजकम् । तथाप्यभ्युपगमोयमिति -- इत्यादिवाक्येति ।।

१.बाध इत्यादि-कुं. २.गौरवपदं नास्ति-अ. ३.नैवा-कुं. ४. ध्येयम्- कुं.

------ ----------

--ज्ञानं गुण इत्यादिवाक्यजन्यस्य ज्ञानं प्रमेयमिति सामान्यप्रत्यासत्तिजन्यस्य च ज्ञानज्ञानस्य प्रामाण्याविषयक १ त्वाद्बाधतादवस्थ्यात् २ । ज्ञानग्राहकपदेन स्वविषयघटितत्वेन ज्ञानग्राहकत्वविवक्षायामपि घटज्ञानमित्यादिशब्दजन्यस्य ३ ज्ञानज्ञानस्य प्रामाण्याविषयकत्वेन बाध एव ।

ज्ञानं समवेतं ज्ञानसमूर्तमित्यादीवाक्यजन्मस्य गुणत्वादीप्रकारकज्ञानविशेष्यकस्येत्यर्थः । ज्ञानज्ञानस्येत्यन्वयः । साक्षाज्ज्ञानत्वव्यापकधर्माप्रकारकेत्यपि ग्राहकविशेषणमस्त्वित्यत उक्तम् -- ज्ञानं प्रमेयमितीति ।। ज्ञाने प्रमेयत्वं ज्ञातं सत् प्रत्यास ४ त्तीभूय स्वविशेषणतासंबन्धेन स्वाश्रयभूतानि सर्वज्ञानरूपवस्तून्युपस्थापयतीति प्रमेयत्वप्रकारकज्ञानविशेष्यकज्ञान ५ ज्ञानस्य प्रमेयत्वाश्रयज्ञाने प्रमाण्यविषयकत्वादित्यर्थः । उक्तदोषपरिहाराय ६ शङ्कते -- ज्ञानग्राहकपदेनेति ।। प्रामाण्याविषयकत्वेनेति ।। अपदार्थत्वादवाक्यार्थत्वाच्च घटत्ववद्विशेष्यकत्वादेस्तेन सर्वथा भानाभावादिति भावः । यत्तु शब्दानुपस्थितमपि प्रामाण्यमन्वयितावच्छेदकतया घटज्ञानमिति ज्ञाने भातीति पक्षधरोत्प्रेक्षितं मतं ७ तत्तेनैव दूषितमित्युपेत्योक्तम्-- बाध एवेति ।। विवृतं ८ चैतद्गुरुपादैः । ननु शब्दान्यत्वे सति स्वविषयघटितत्वेन ज्ञानग्राहकत्वविवक्षास्तिति चेन्न । तथाप्ययं घटज्ञानवान् तद्व्यवहरवत्वात् इत्याद्यनुमानजन्यज्ञानज्ञानस्यापि प्रामाण्याविषयकत्वेन बाधात् । ज्ञानं प्रमेति शब्दजन्यज्ञानस्य प्रामाण्याविषयकत्वापाताच्चेति भावः ।।

१.त्वेन-क. २.स्थ्यम्-कुं. छ. क. ३.जन्यज्ञान-कुं. ४.त्तिरूपं-अ. ५.'ज्ञान'इति नास्ति -कुं. ६. या-कुं. ७.त्तु-कुं . ८. च गुरु-कुं .

---------- ---------- ----

ननु ज्ञानग्राहकपदेन ग्राह्यप्रामाण्याश्रयज्ञानप्रकारप्रकारकतया तत्प्रकारवद्विशेष्य१ तया च तद्विषयत्वं विवक्षितम् । अत्र च विशेषणद्वयेन तवघटविशेष्यकं ज्ञानमिति, तव घटत्वप्रकारकं ज्ञानमिति च शब्दाभ्यां जन्ययोः घट २
ज्ञानविषयकज्ञानयोः प्रामाण्याविषयत्वाद्बाध इति शङ्कद्वयं क्रमेण निरस्तमिति चेदुच्यते । त्वदुक्तं यद्ग्राह्यप्रामाण्याश्रयज्ञानप्रकारप्रकारतया तत्प्रकारवद्विशेष्यतया च तद्विषयत्वं तत्प्रामाण्यविषकत्वमेव । स्वप्रकारकवद्विशेष्यत्वस्यैव प्रामाण्यरूपत्वात् ।

नन्वस्तु तर्हि स्वाश्रयप्रकारकतया स्वाश्रयविशेष्यविशेष्यकतया स्वाश्रयग्राह्यत्वमिति यज्ञपतिनोक्तं मतम् । तत्र यद्यापि यथाश्रुते घटत्वप्रकारकं किंचिद्विशेष्यकं इति ३ ज्ञानेनापि प्रामाण्याग्राहत्स्वाश्रयप्रकारप्रकारकतया स्वाश्रयप्ररारवद्विशेष्यतयेति वाच्यम् । तत्रापि प्रकारवदित्यत्र प्रकारस्योपलक्षणत्वे प्रगुक्तदोषापत्या तत्प्रकारविशिष्ट ४ विशेष्यकतयेच्युच्यते । अतो न
कोपि दोष इति भावेन शङ्कते -- नन्विति । तत्प्रकावदिति । तत्प्रकारविशिष्टविशेष्यकतयेत्यर्थः-- तद्विषयत्वम् । व्यावसायविषत्वम् । ५ अस्मिन्पक्ष इत्यादि वक्ष्यमाणदोषदार्ड्याय दलद्वयकृत्यं व्यनक्ति -- अत्रचेति । विवक्षायामित्यर्थः । किमेतद्वादिमते तद्वत्वरूपं वेशिष्ट्यमनुव्यसायविषय एव नेति मतिरुत स्वातन्त्र्येण ? आद्ये दोषमाह-- त्वदित्यादिना । स्वप्रकारवदिति । स्वप्रकारविशिष्टेत्यर्थः ।

१. क.-छ.कुं २. 'घट' इति नास्ति -कुं.छ.क. ३. घटत्वप्रकारककिंचिद्विशेष्यकं-कुं. ४. 'विशेष्य' इति नास्ति- कुं. 'धर्मि' इत्यधिकं-अं. ५. अ. पुस्तके नास्ति.

परो-स्व-नि-भं) प्रामाण्यवादः पु- २३.

--- --- ---

तथा च यावती प्रामाण्यविषयिका सामग्री तद्ग्राह्यत्वं स्वतस्त्वमित्युक्तं स्यात् । तथा चैतादृशस्वस्त्वस्य परतस्त्वपक्षेपि सत्वात्सिद्धसाधनम् । एतदभावरूपपरतस्त्वसाधनेऽपसिद्धान्तश्च । न हि परस्त्वपक्षे अनुव्यवसायाविषयोपि प्रामाण्यं प्रामाण्यं प्रामाण्यानुमितेरप्यविषयः ।

सिद्धसाधनापसिद्धान्तौ व्यनक्ति -- नहीति ।। प्रामाण्यमिति ।। तद्वत्त्वादिरूपमित्यर्थः । वैशिष्ट्यमनुव्यवसायविषय एव नेति पक्षे तादृशानुव्यवसायविषयत्वमादाय सिद्धसाधनादिदोषाभावेपि इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिजनकत्वात् इत्यनुमितिसामग्रीरूपा यावती त्वदुक्तलक्षणा ज्ञानग्राहिका सामग्री तावत्त्यापि प्रामाण्यग्रहात्सिद्धसाधनपापसिद्धान्तावित्यर्थः। अनुमितिविषयत्वोक्तौ तत्सामाग्रीविषयत्वं सिद्धमेवेत्युपेत्य अनुमितेः इत्येवोक्तम् । न त्वनुमितिसामग्र्या अपीति । यद्वातेन सामग्रीत्युक्तावपि ग्राहकज्ञानेत्येव युक्तम् । न तु सामग्रीत्युपेत्यैवमुक्तम् । द्वितीये स्वातन्त्र्येण तद्वद्विशेष्यकत्वग्राहकत्वमिति मतम्, उत ग्राहकत्वमा १ त्रमिति ? स्वातन्त्र्येण तद्वद्विशेष्यकत्वादिविषयिकेत्यर्थः -- अनुव्यवसायाविषयोपि ।। स्वातन्त्र्येण तद्वद्विशिष्टधर्मविशेष्यकत्वादिविषयकानुमितेरपीत्यर्थः । द्विदीयेपि ग्राह्यमित्यत्र ग्राह्यत्वमात्रमभिमतम् उत स्वातन्त्र्येण ? आद्ये तादृशानुव्यवसायविषयत्वमादायापि सिद्धसाधनतापसिद्धान्तौ स्पष्टौ ।

परो-स्व-नि-भं) प्रामाण्यवदः पु- २४.

अस्मिन्पक्षेऽप्रामाण्यग्राहकत्वविशेषणवैयर्थ्यं च ।।

द्वितीयेतूक्तरूपानुव्यवसायं प्रति प्रामाण्यस्य न्यायमते स्वातन्त्र्येणाविषयतया यावतीति ज्ञानग्राहकसामग्रीविशेषणेनैव सिद्धसाधनापत्तेर्दोषान्तरमाह-- अस्मिन्पक्ष इति ।। ग्राह्यत्वमित्यत्रैव स्वातन्त्र्येण
ग्रह्यत्वमिति पक्ष इत्यर्थः । तथा अस्मिन्पक्ष इत्यस्यं स्वातन्त्र्येण तद्वद्विशेष्यकत्वादिग्राहिकेति पक्ष इत्यप्यर्थमुपेत्य प्राचीनपक्षेप्ययं दोषोबोध्यः । तद्वद्विशेष्यकत्वग्रहे तदभाववद्विशेष्यकत्वरूपाप्रामाण्यग्रहासंभवेनोक्तविवक्षया तद्वारणादिति भावः ।।
ननु तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यग्राहिकापि तद्वद्विशेष्यकत्वग्राहिकैव । तत्प्रकारकत्ववित्तवेद्यत्वात्तद्वद्विशेष्यकत्वस्य । तद्वद्विशेष्यकत्वाभाने तत्प्रकारकत्वाग्रहणायोगादिचेत् तर्हि अप्रामाण्याग्राहकत्वरूपविशेषणदानेऽपि तव घटत्वप्रकारं ज्ञानमिति शब्दजन्यज्ञनेनाप्रामाण्याग्राहकेण क्वदुक्तदिशा प्रकारवित्तिवेद्यतया तद्वद्विशेष्यकत्वग्राहिणापि प्रमाण्याग्रहणाद्बाधापत्तेः । यदि चात्र तद्वत्तेन विशेष्यस्याभानान्न बाधः। तर्हि अप्रामाण्यग्राहकसामग्र्यामपि तत्तुल्यम् । अत एव पूर्वं दलद्वयकृत्यं व्यक्तीकृतम् ।।
यदत्रोक्तं नरहरिणा 'अप्रामाण्याग्रा १ हकेत्यत्र नञ्व्यत्यासेनाप्रामाण्याभावग्रा २ हकेत्यर्थे प्रामाण्यग्राहकेति पर्यवसानात्

प्रामाण्यग्राहतयावज्ज्ञानग्राहकग्राह्यत्वं विधिकोट्यर्थ 'इति तदपि 'यावती प्रामाण्यविषयिका सामग्री तद्ब्रह्मत्वं स्तवतस्त्वमित्युक्तं स्यात् 'इति ग्रन्थकृदुक्त्येव सिद्धसाधनादितोषेण निरस्तं भवति । न च ग्राह्यपदेन स्वातन्त्र्येण ग्राह्यमित्यभिमतत्वाद्यावदित्युक्तैव सिद्धसाधनत्वदोषाभावः, तथात्वे नानुव्यवसायविषयत्वस्य न्यायमतेऽभावदिति वाच्यम् । नञो प्रामाण्याभावार्थकत्वे पूर्वपदेन समासायोगात् , नञ्द्वयवैयर्थ्यात्, तत्पदवैयर्थ्याच्चेतिध्ययेम्।तदेतदाह -- अप्रामाण्याग्राहकत्वविशेषणवैयर्थ्यमिति ।।

परो-स्व-नि-भं) प्रामाण्यवादः पु - २५.

---------- ------- --------

ननु यथा १ ज्ञानग्राहकसामग्र्या ज्ञानग्रहार्थं यावदपेक्षितम् तावदेव विषयग्रहार्थमप्यपेक्ष्यते सैव सविषय २ ज्ञानग्रहकसामग्री विवक्षिता । अनुव्यवसायसामग्री चैवं विधा । ३ तया व्यवसायग्रहेऽपेक्षितस्य व्यवसाय ४ संप्रयोगस्यैवं तद्विषयघटग्रहेऽप्यपेक्षितत्वात् । घटज्ञानमिति शब्दस्तु ज्ञानग्रहे ज्ञानपदगतानां शक्तिमपेक्षते । घटग्रहे तु घटपदगतां शक्तिमिति चे ५ न्न ।

पक्षधरोक्तशङ्क्य निराह -- नन्विति ।। तावदेवेति ।। ज्ञानग्राहकत्वप्रयुक्तमेव यस्यां विषयग्राहकत्वं सैवेत्यर्थः । अस्मिन्मते च भ्रम इति पदजन्यज्ञानेन प्रामाण्याग्रहाद्बाधवारणायाप्रामाण्याग्राहकत्वविशंषणमर्थवत् । विषयोपरक्तज्ञानग्राहकेण प्रमेति पदजन्यज्ञानेनोक्तरूपेण प्रमाण्यग्रहणात्सिद्धसाधनवारणाय -- यावदिति विशेषणम् । बाधः सिद्धसाधनता च नेति क्रमेण व्यनक्ति-- अनुव्यवसायसमग्रीति ।। षष्ठीतत्पुरुषः।

आत्ममनःसंयोगादिरित्यर्थः । स्वप्रकाशव्यवसायादिसामग्र्यपि ग्राह्य--व्यवसायसंयोगस्य ।। व्यवसायस्य मनसा सह संयुक्तसमवायरूपसंबन्धस्यैवेत्यर्थः । बाह्यर्थरूपविषयग्रहे व्यवसायरूपप्रत्यासत्तेरपेक्षाया इवानुव्यवसायजननेपि विषयता व्यवसायापेक्षायास्तुल्यत्त्वादिति भावः । तत्पदेनेत्युपलक्षणम् तत्पदादिनेत्यर्थः ।

१.यया सामग्र्या-कुं.छ.क. २.क- कुं. छ.क. ३.तथाहि-छ. ४.संबन्धस्यैव- छ. ५. त् -क.

परो-स्व-नि-भं) प्रामाण्यवादः पु -२६.

-------- -------- ----

तथाप्येकयैव शक्त्या प्रकरणप्राप्तघटज्ञानपरामर्शकेन तत्पदेन जनितज्ञानस्य प्रामाण्याविषयकत्वेन बाधतदवस्थ्यात् ।

नापि तज्ज्ञानविषयकज्ञानाजन्यज्ञानविषयत्वं स्वतस्त्वम् । अस्मिंश्च पक्षे संभवमात्रं साध्यं न तु नियमः ।

यदत्र मणिसारादावुक्तम् 'असर्वनामत्वेनग्राहकविशेषणान्न दोष'इति तन्न । तथापि लक्षणया घटज्ञानोपस्थापकेन लाक्षणिकज्ञानपदेन प्रामाण्याग्रहाग्बाधात् ।

अलक्षणिकत्वेनापि विशेषणे १ तु घटज्ञाने ज्ञानपदं शक्तामिति भ्रमे सति तादृशेन ज्ञानपदेनापि प्रामाण्याग्रहाद्बाध एव । भ्रमाघटितत्वेनापि विशेषणे तु अप्रामाण्याग्राहकपदवैयर्थ्यम् । प्रमायामप्रामाण्यानुमानस्य व्याप्तिपक्षधर्मतान्यतरभ्रममूलत्वादेव तत्र बाधवाहणात् ।

यत्तु इदं ज्ञानमप्रमाणमिति मनसाऽप्रामाण्यारोपस्थलेऽन्यत्र गृहीताप्रामाण्यस्मृतिसंभवेन तया भ्रमाघटितयापि सामग्र्या प्रामाण्याग्रहाद्बाधवारणायाप्रामाण्याग्राहकेति विशेषणं २ सार्थकमिति तन्न

। तत्र ज्ञानग्राहकत्वप्रयुक्तविषयग्राहत्वरूपसवनषयज्ञानग्राहकत्वस्याभावादेव बाधवापणात् । विस्तरस्तु गुरुटीकायाम् ।
साधारणं निरुक्त्यन्तरमप्यनूद्य निराह -- नापीति ।। तज्ज्ञानं ग्राह्यप्रामाण्याश्रयज्ञानम् । तद्विषयकं ज्ञानं गुरुमते तदेव । भट्टमते ज्ञाततालिङ्गक ३ तदवुमितिः । मिश्रमते त ४ दनुव्यवसायः । तदजन्यं यज्ज्ञानं तदेव । तद्विषत्वमित्यर्थः ।

१.'तु ' इति न -कुं. २. सार्थकपदं न -आ. ३. कानु-कुं. ४.त्त- आ.

परो-स्व-नि-भं) प्रामाण्यवादः पु - २७.
---------- ---------- ----
स्वतस्त्वपक्षेऽपि प्रामाण्यस्य तज्ज्ञानविषय १ ज्ञानजन्यानुमित्यापिग्राह्यत्वेन तदजन्यज्ञानस्यैव विषय इति नियमस्य तज्ज्ञानविषयकज्ञानाजन्येन घटज्ञानेनाप्यग्राह्यत्वेन गृह्यत एवेति नियमस्य २ ----

अत्र ज्ञानजन्येत्युक्त्याऽनुमितिविषयत्वेन सिद्धसाधनतेति शङ्का, ज्ञानविषयकेत्युक्त्या गुरुमतेऽनुमित्यादीप्रामाण्यांशे भट्टमते मिश्रमते च सर्वत्र प्रामाण्यानुमित्यनुव्यावसाययोर्व्याप्तिज्ञानव्यवसायाभ्यां जन्यत्वेन बाध इति शङ्का, तदित्युक्त्या पुनरपि गुरुमते लिङ्गज्ञानस्य स्वप्रकाशत्वेन ज्ञानविषयकज्ञानत्वात्तज्जन्यानुमितिप्रामाण्यांशे बाध इति ३ भट्टमते ज्ञाततालिङ्गकानुमितेर्ज्ञानविषयव्याप्तिज्ञानजन्यत्वाद्बाध इति ३ मिश्रमतेप्यनुव्यवसायस्य व्यवसायविषयकस्य तज्जन्यतया तन्निष्ठप्रामाण्यांशे बाध इति शङ्का निरस्ता ४ । भट्टमते सामान्यप्रत्यासत्तेरभावेन व्याप्तिज्ञानस्य ग्राह्यप्रामाण्याश्रयज्ञानाविषयत्वम्

। मतान्तरे तु व्यक्तम् । अत्राद्यज्ञानपदं तत्पदस्य तद्ग्रन्थे पूर्वनिर्दिष्टप्रामाण्यपरामर्शितया सिद्धसाधनत्ववारणाय । द्वितीयं तु व्यापारनुबन्धितया तज्ज्ञानविषयकैरात्मादिभिः प्रामाण्यज्ञानजननद्वार
५ सिद्धिवारणाय प्रतिपत्त्यनुबन्धितया तद्विषयकत्वलाभार्थम् । तृतीयमपि व्यापारानुबन्धितयात्मादिभिरेव सिद्धसाधनतावारणाय प्रतिपत्त्यनुबन्धितया विषयत्लाभायेत्याहुः।
ग्रन्थकर्तुः कुतो नियमो नाभिमत इत्यत आह -- स्वतस्त्वेति ।। तज्ज्ञानविषयकज्ञानजन्येति ।। पक्षज्ञानजन्यत्वादनुमितेरिति भावः । ग्राह्यत्वेन -- विषयोकार्यत्वेनेत्यर्थः । अग्राह्यत्वेन -- अविषयीकार्यत्वेन ।

१.क-कुं क. २.वा-छ. ३.इयं पङ्क्तिर्नदृश्यते -मु. ४.व्युदस्ता-कुं आ. ५.प्र-कुं.आ.

परो-स्व-नि-भं) प्रामाण्यवादः पु- २८.

---------- ------- --------

चासंभव १ इति वाच्यम् । स्वतस्त्वपक्षे व्यवसायप्रामाण्यग्रहकस्यानुव्यवसायस्य
व्यवसायविषयकेश्वरज्ञानजन्यतया तदजन्यज्ञानं २ त्वाभावेन बाधात् । परतस्त्वपक्षे तदजन्येश्वरज्ञानविषयत्वेन सिद्धसाधनाच्च । नापि तज्ज्ञानविषयकजन्यज्ञानाजन्यजन्यज्ञानविषयत्वं वा तज्ज्ञानविषयकसमानाधिकरणज्ञानाजन्यसमानाधिकरणज्ञानविषयत्वं वा स्वतस्त्वम् ।

गृह्यत एव -- विषयीक्रियत एवेत्यर्थः । किमिदं स्वतस्त्ववादिमात्रसाधारणम् उत निरीश्वरमीमांसकमात्रसाधारणम्

निर्वचनम् ? आद्य आह -- स्वतस्त्वपक्ष इति ।। सिद्धान्ते साक्षिशब्दितानुव्यवसायज्ञानस्य नित्यत्वेपि प्रामाण्यविषयकत्वरूपविशिष्टवेषेण जन्यत्वादिति भावः । अन्त्य आह -- परतस्त्वपक्ष इति ।। एवं रूपे स्वतस्त्वे त्वां प्रत्युच्यमाने ग्राह्यप्रामाण्याश्रयविषयं ३ यदीश्वरज्ञानं तदजन्यं तदेव । तद्विषयत्वेन त्वया सिद्धसाधनताया वक्तुं शक्यत्वादिति भावः। अयं च ४ दोषः प्राचीनपक्षेपि समः । यत्त्वीश्वरनिरासाभिप्रायेणौवं साध्यस्य मीमांसकेनोच्यमानत्वान्न सिद्धसाधनता दोष इति । तन्न । अर्थान्तरानिवारणादिति रुचिदत्तेनैवदीषितत्वात् । यज्ञपतिनोक्तविवक्षामनूद्य निराह -- नापीति ।। सर्वस्यापी जन्यज्ञानस्य तज्ज्ञानविषयकेश्वरज्ञानजन्यत्वेनाप्रसिद्धिवारणायाद्यं जन्यपदम् । द्वितीयन्त्वीश्वरज्ञानमादाय सिद्धसाधनतानरासार्थम् । एवमग्रे समानाधिकरणपदद्वयकृत्यं ध्येयम् । युगपदेव विवक्षाद्वयेपि दोषमाह -- परतस्त्वेति ।

१.वात्- कं. २. 'ज्ञान' इति न - कुं-छ-क. ३.कं-कुं. ४.दोषपदं नास्ति- आ.

परो-स्व-नि-भं.) प्रामाण्यवादः पु - २९.

परतस्त्वपक्षेऽपि प्रामाण्यस्यैवं विधं सामान्यप्रत्त्यासत्तिजन्यं प्रमेयमिति यज्ज्ञानं दद्विषयत्वेन सिद्धसाधनात् ।
विषयपदेनप्रकारत्वविवक्षायामपि स्वतस्त्वपक्षेपि प्रामाण्यस्य सर्वं ज्ञानं गुण इति शब्दजन्यव्यवसायविषयकानुव्यावसायस्य सर्वज्ञानान्तर्भूतस्वविषयकव्यवसायजन्यत्वेन तदजन्यत्वाभावेनांशे बाधात् ।

एवंविधं ।। तज्ज्ञानविषयकजन्यज्ञानाजन्य १ जन्यरूपम् । तज्ज्ञानविषयकसमानाधिकरणज्ञानाजन्यसमानाधिकरणरूपम्
चेत्यर्थ्यः -- प्रमेयम् ।। प्रमेयत्वप्रकारकं प्रमेयविशेष्यकं यज्ज्ञानं तद्ग्राह्यप्रामाण्याश्रयविषयकं घटादिज्ञानरूपजन्यसमानाधिकणज्ञानाजन्यं जन्यं २ समानाधिकरणं प्रमेयत्वप्रकारेण प्रामाण्यविषयकं चेति तद्विषयत्वेन सिद्धसाधनमित्यर्थ्यः । एतच्चोपलक्षणम् । निरीश्वरमते व्यर्थविशेषणत्वं च बोध्यम् । एतेन समानाधिकरणेति विशेणणीयमिति शिरोमणिपक्षोपिप्रयुक्तः । ननु प्रमेयमितिज्ञाने विशेष्यतया प्रामाण्य ३ स्य विषयत्वेपि न प्रकारतया । तथात्वेन विषयत्वं च निरुक्तो विवक्षीतम् । इत्यत आह-- विषयेति । प्रामाण्यस्येत्यस्यानुव्यवसायेनेत्यत्रान्वयः । प्रामाण्यगोचरस्येत्यर्थः ।
गुणत्वप्रकारकसर्वज्ञानविशेष्यकशाब्दज्ञाननिष्ठप्रामाण्यग्राहकोनुऽव्यवसायो व्यवसायजन्यः । स च व्यवसायः सर्वज्ञानविषयको ज्ञानत्वेन स्वात्मानमपि विषयीकरोतीति तत्प्रामाण्यस्य तज्ज्ञानविषयकज्ञानजन्यज्ञानप्रकारत्वमेवास्ति । तदजन्यज्ञानप्रकारत्वं नेति सर्वं ज्ञानं गुण इति ज्ञाननिष्ठ प्रामाण्यांशे बाध इत्यर्थः ; सर्वज्ञानान्तर्भूतं च तत्वस्वं चेति विग्रहः ।

१. एकं जन्यपदं न - आ. २. न्यासा - आ. ३. ण्यवि - आ.

एतदभावरूपपरतस्त्वसाधनेंऽशे सिद्धसाधनाच्च । न चैवंविधव्यावसायप्रामाण्यस्यापक्षत्वान्न बाध इति वाच्यम् । सामान्ये १ विप्रतिपत्तौ विशेषे २ साध्यसाधनेऽर्थान्तरात् ।

एतेन तज्ज्ञानविषयकज्ञानाजन्यज्ञानविषयत्वमेव स्वतस्त्वम् । न तु जन्यपदद्वयं वा समानाधिकरणपदद्वयं वा प्रक्षेप्यम् । न चैवं पूर्वोक्तेश्वरज्ञानमादाय बाधसिद्धसाधनते स्यातामिति वाच्यम् ।
तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपजन्यस्याभावरूपमजन्यत्वं हि द्वेधा ।

स्वपदेन व्यवसायः । केनचिदुक्त ३ समाधिमाशङ्क्य निराह -- नचैवं विधेति ।। अर्थान्तरादिति ।
सामान्यधर्मावच्छिन्नस्वतस्त्वपरतस्त्वसंशयनिवर्तनानुपयोगादर्थान्तरादि ४ ति भावः ।
पक्षधरोक्तमप्यनूद्य निराह -- एतेनेति ।। तद्व्यतिरेकेति ।। अत्रोभयत्र व्यतिरेकशब्दः प्रगभावपरः । अन्यथा आद्यस्य संसर्गाभावमात्रपरत्वे तज्ज्ञानविषयकव्याप्तिज्ञानात्यन्ताभावरूपव्यतिरेकाप्रयुक्तप्रागभावप्रतियोगिन्ीं इदं ज्ञानं प्रमेत्यनुमितिमादायैव ५ सिद्धसाधनतापत्तेः । अन्त्यस्यापि तत्परत्वे पूर्वोक्तानुमितिमादायैव सिद्धसाधनतापत्तेः । ध्वंसरूपतद्व्यतिरेकस्य तज्ज्ञानविषयकज्ञानव्यतिरेकेण केनाप्यजन्यत्वादिति ध्येयम् । यद्यपि नैतद्रूपं जन्यत्वम् । आकाशादिजन्य शब्दादावभावात् । तथापि । व्यतिरेकिपदार्थेषु भवतीदं जन्यत्वमिति भावः -- द्वेधेति ।। उत्तरदलेन नञोऽन्वयेन पूर्वभागेन नञोऽन्वयेन वा द्वेधेत्यर्थ्यः --

१. न्यवि - कुं. २. षसाध्य - कुं. ३. त्यर्थः - आ. ५. य सि - कुं. य.आ.

तद्वतिरेकप्रयुक्तव्यतिरेकाप्रतियोगित्वेन वा तद्व्यतिरेकाप्रयुक्तव्यतिरेकप्रतियोगित्वेन वेति । तत्राद्यस्याजन्यत्वस्येश्वरज्ञाने सत्वेपि मया विवक्षितस्य द्वितीयस्याभावात् । न हीश्वरज्ञानं प्रागभावरूपव्यतिरेकप्रतियोगीति निरस्तम् । तथापि पूर्वोक्तस्य प्रमेयमिति ज्ञानविषयत्वेन सिद्धासाधस्य सर्वं ज्ञानं गुण इत्यादिनोक्तस्य बाधस्य--

प्रयुक्तेति ।। तदन्वयाद्यनुविधाय्युत्तरकालसंबन्धित्वं प्रयुक्तम् । तद्भिन्नत्वमप्रयु क्तत्वामित्यर्थः-- सत्वेपीति ।। तस्य व्यतिरेकमात्राप्रतियोगित्वादिति भावः-- मयेति ।। स्वतस्त्वनिर्वचनकर्त्रेत्यर्थः । अभावादित्येतद्व्यनक्ति -- नहीति ।। तथा च न प्रागुक्तदोषाविति भावः । एतेनेत्युक्तं व्यनक्ति-- तथापीति ।। एवं विवक्षायामपीत्यर्थः । विषयपदेन प्रकारत्वविवक्षामुपेत्याह -- सर्वं ज्ञानमिति ।। बाधस्ये १ ति । एतदभावरूपपरतस्त्वसाधने सिद्धसाधनाच्च । तस्या २
पक्षत्वे चार्थान्तरता । इदं ज्ञानं प्रमेति सामान्यप्रत्यासत्तिजन्यज्ञाने प्रामाण्यस्य प्रकारत्वेन सिद्धसाधनापरिहाराच्च । न च सामान्यस्या ३ ज्ञानस्य प्रत्यासत्तित्वेऽतिप्रसङ्गेन ज्ञातस्यैव प्रत्यासत्तित्वात्प्रमात्वज्ञानस्य चानुमित्यादिरूपस्य प्रमात्वाश्रयरूपपक्षादिज्ञानजन्यतया तज्ज्ञानविषयकज्ञानजन्यत्वमेवेत्युक्तस्थले
तज्ज्ञानविषयकज्ञानाजन्यज्ञानप्रकारत्वं नेति न दोष इति वाच्यम् । इच्छायां गृहीतं तद्वति तत्प्रकारकत्वं स्मृतं सज्ज्ञानत्वेन गृह्यमाणे रूप्यभ्रमे यत्रारोप्यते यत्र वा रूप्यत्ववति रूप्यत्वप्रकारकत्वेन गृह्यमाणायामिच्छायां --

१. स्य चे - कुं. आ. २. पि - आ. ३. अज्ञातपदं न - आ.

परो-स्व-नि-भ) प्रामाण्यवादः पु - ३२.

--- --- ---

- ज्ञानत्वमारोप्यते तत्रोभयत्र प्रमात्वाश्रयज्ञानविषयकज्ञानं विनापि रूप्यत्ववति रूप्यत्वप्रकारकज्ञानत्वरूपं प्रमा १ त्वं गृहीतुं शक्यमिति ज्ञातया २ तद्रूपसामान्यप्रत्यासत्या जनितं ज्ञानमादाय सिद्धसाधन ३ त्वस्य दुर्वारत्वात् । किं च त्वन्मते गङ्गास्नानादिसत्कर्मजन्यं योगिज्ञानं तज्ज्ञानविषयकज्ञानजन्यमेवेति तादृशज्ञान ४ प्रकारत्वमादाय सिद्धसाधन ५ मेव । न हि तदपि निदिध्यासनजन्यम् । मानाभावात् । येन योगिज्ञानं तज्ज्ञानविषयकज्ञान जन्यं स्यात् । तत्तत्कार्मणां त ६ त्त्वज्ञानविशेष एव जनकत्वमित्यनुमानखण्डे त्वयैवोक्तेः । प्रमात्वस्य प्रकारत्वार्थं पूर्वोपस्थितेरावश्यकत्वेऽपि उक्तदिशा प्रमात्वाश्रयज्ञानं विनापि प्रमात्वज्ञानसंभवात् । यत्तु अनागताविषयकेति द्वितीयतृतीयज्ञानयोर्विशेषणमतो न कोऽपि दोष इति तन्न । ७ वर्तमानघटप्रामात्वप्रत्यासत्त्या दोषतादवस्थ्यात् । अनागतवृष्ट्यादिज्ञानप्रामाण्यांशे बाधात् । तदन्यस्य पक्षत्वे चार्थान्तरत्वात् । यद्यपि तज्ज्ञानविषयकज्ञानव्यतिरे ८ का प्रयुक्तव्यतिरे ९ कप्रतिगितदकेज्ञानमात्रविषयकज्ञानग्राह्य १० मिति तदर्थ इति । तदपि न । एवं हि पूर्वदलेन प्रामाण्यानुमिति ११ मादाय तदेकज्ञानमात्रविशेषण सामान्यप्रत्यासत्तिजन्यज्ञानयोगिज्ञाने १२ श्वरज्ञानान्यादाय १३ सिद्धसाधनत्वाभावेऽपि ज्ञानं गुण इत्यादि १४ ज्ञानज्ञानप्रामाण्यानुव्यवसायस्य ग्राह्यप्रामाण्याश्रयज्ञानविषयकतया तदेक १५ विषयकत्वाभावेन तदंशे बाधात् ।

१.ण-कुं. २.तया-आ. ३.'त्व' इति न -आ. ४. विषयत्वं- आ. ५.त्व-आ.

६.त्तज्ज्ञा -कुं. ७. वर्तमानपदं न -आ. ८.क-कुं ९.का-कुं. १०. त्व-आ. ११. मीश्वरज्ञानंवा- आ. १२. चादाय- आ. १३. च-कुं. १४. ज्ञानप्रा-कुं. १५. ज्ञान-आ.

स्वतस्त्वे अनुमानानि प्रामाण्यवादः पु - ३३

--- --- ---

चापरिहारादिति दिक् ।।

परोक्तस्वतस्त्वनिरुक्तिभङ्गः ।। २ ।।

स्वतस्त्वे प्रमाणं तु ,

तदन्यस्य पक्षत्वे चार्थान्तरता । किंच प्रमावानयं समर्थप्रवृत्तिमत्त्वात् इत्याद्यनुमितिग्राह्यत्वेननार्थान्तरता । मीमांसकमते सामान्यप्रत्यासत्त्यभावेन ग्रह्यप्रमाव्यक्तेरनुमितिजनकज्ञानोगोचरत्वात् । तदन्यप्रामाण्यस्य पक्षत्वं तु सामान्यविप्रतिपत्त्यननुगुणमित्याद्यभिप्रेत्याह -- इति दिगिति ।। यद्वा एवं विप्रतिपत्त्यन्तराण्यपि तत्तद्बुध्युत्प्रेक्षितानि निरस्यानीति भावेनाह -- इतिदिगिति ।। तन्निरासश्च गुरुटीकायां व्यक्तः ।।

परोक्तस्वतस्त्व १ निरुक्तिभङ्गः ।। २ ।।

तत्र किं प्रमाणमित्यत आह -- स्वतस्त्वे प्रमाणं त्विति । अनुमानमिति वक्ष्यमाणेनान्वयः । यद्यपि --

‘पृष्टेनागम एवादौ वक्तव्यः साध्यसिद्धये ‘

इति कथालक्षणोक्तेः ग्रन्थस्य च वादकथा रूपेण प्रवृत्तेः--

‘ऋग्यजुःसामाथर्वाख्या मूलरामायणं तथा

भारतं पञ्चरात्रं च वेदा इत्येव शब्दिताः ।

पुराणानि च २ यानीह वैष्णवानि विदो विदुः
स्वतः प्रामाण्यमेतेषां नात्र किंचिद्विचार्यते ' ।।

१. परतस्त्व - छ-क. २. तु - अ .

स्वत-अनु) प्रामाण्यवादः पु - ३४.
--- --- ---
ज्ञानप्रामाण्यं स्वतो ग्राह्यं , परतोऽगृह्यमाणत्वे सति गृह्यमाणत्वात् यद्यदन्येनागृह्यमाणत्वे सति ग्राह्यं तत्तेन ग्राह्यम् । यथा चक्षुरन्ये १ नागृह्यमाणं रूपं चक्षुर्ग्राह्यम् ।। १ ।।

इत्यादिरागम एव वाच्यः । तथापि हैतुकस्य तार्किकस्यागमेऽत्यादराभावात्तं प्रत्यागमानुकूला न्याया एवात्रोच्यन्त इत्यदोषः ।
'ज्ञानगतं २ याथार्थ्यं तद्गाहकेणैव ग्राह्यं, ग्राहकान्तरानुपपत्तौ सत्यां गृह्यमाणत्वात् यद्यतोऽन्येनानुपपद्यमानग्रहणं गृह्यते तत्तेनैव ३ गृह्यते, यथा चक्षुषोन्येनानुपपद्यमानसाक्षात्कारं साक्षात्क्रियमाणं रूपादि चक्षुषा साक्षात्क्रियते '
इति तत्वनिर्णयटीकोक्तमनुमानं तात्पर्यतोऽनुवदति--ज्ञानप्रामाण्यमिति ।। याथार्थ्यरूपमित्यर्थ्यः । तत्स्वरूपमुक्तंप्रागस्माभिः । चक्षुरादिरूपानुप्रमाणव्यावृत्तस्य साक्षाज्ज्ञेयविषयीकारित्वस्य लाभाय ज्ञानेति विशेषणं तत्तज्ज्ञानपदम् । घटत्ववति घटत्वप्रकारक ४ ज्ञानत्वादिरूपं प्रामाण्यमित्यर्थ्यः । यदा तु प्रामाण्यपदेन केवलप्रामाण्यग्रहः तदा ज्ञानपदं स्पष्टार्थम् । अत एव सुधायां 'प्रामाण्य 'मित्येव -- पक्षोक्तिः -- स्वत इति ।। ग्राह्यप्रामाण्यविरोध्युपस्थापकसामग्र्यसमविहितत्तज्ज्ञानविषयकसाक्षिविषय

एवेत्यर्थः । विशेषणकृत्यं प्राग्वत् । साक्षी च लौकिकप्रत्य ५ क्षादिरूपानुव्यवसाय एव-- परत इति ।। प्रामाण्यं परतो ग्राह्यं सांशयिकत्वात् इत्यादौ यत्पराभिमतं साध्यं उक्तविशेषणकसाक्षिज्ञानादन्येनैव ग्राह्यत्वादिरूपं तदभावे सति ग्राह्यत्वादीत्यर्थ्यः ।

१. घ्राणादि - कुं. छ. क. २. त - कुं. ३. ' एव ' पदं नास्ति - अ. ४. ज्ञानेति न - आ. ५. क्षानु - कुं. आ.

स्त- अनु .) प्रामाण्यवादः पु - ३५.

--- --- ---

सुखमनुभवामीति प्रत्ययः (प १). दोषशङ्काद्यकलिङ्कितज्ञानस्यानुव्यवसायो वा (प २).

तेनानुमित्यादिग्राह्यत्वेपि नासिद्धिः 'परस्यस्वतस्त्वात्स्वस्य च परतत्वादि'त्यादि मण्युक्तखण्डनस्याप्यनवकाशः । केचित्तु परतोग्राह्यत्वं नाम उक्तविशेषणकोक्तरूप १ प्रत्यक्षाग्राह्यत्वं साक्षिज्ञानादन्योत्पाद्यप्राथमिकप्रतीतिकत्वं २ परतोग्राह्यम् । तच्छून्यत्वे सतीत्यर्थः । तेन स्ततस्त्ववादे प्रामाण्यस्यानुमित्यादिग्राह्यत्वेपि न विशेषणासिद्धिरित्याहुः । अत्र सत्यन्तमात्रस्याप्रयोजकत्वाद्ग्राह्यत्वादित्युक्तिः । घटादिगतगन्धादो सत्यपि ग्राह्यत्वे स्वाश्रयग्राहककोक्तरूपप्रत्यक्षाग्राह्यत्वं नेति व्यभिचारनिरासाय सत्यन्तम्।

प्रामाण्यस्य स्वतो ग्राह्यत्वे क्वचित्संशयाद्युपपादनक्लेशनिरासाय विशिष्याप्याह -- सुखमिति ।। ३ स्ववृत्तिवर्तमानसुखसाक्षात्कारगोचरः

साक्षिरूपः प्रत्ययः इत्यर्थः । ज्ञानांशे लौकिकप्रत्यक्षादिरूपानुव्यवसायः प्रामाण्यविषयको न वेति विप्रतिपत्त्यनानुगुण्यादर्थान्तरत्वमिति न शङ्क्यम् । बाह्याभ्यन्तरसाधारणपक्षान्ताराण्याह -- दोषेति ।। दुष्टकरणजन्यत्वङ्का
तन्निश्चयाप्रामाण्यादिशङ्कातन्निश्चयाद्यनास्कन्दिघटादिज्ञानस्येत्यर्थः । न चैवं अन्त्यपक्षाभेद इति शङ्क्यम् । तत्रानुव्यवसायविशेषणत्वेन इह व्यवसायविशेषणत्वेन तत्र प्रामाण्यविरोध्युपस्थापकसामग्रीत्वेन अत्र तु तत्कार्यदोषशङ्कादित्वेन च प्रवेशेनात्यन्तभेदात् - उपस्थापकसामग्रीति ।। उपस्थितितत्सामग्रीत्यर्थ्यः ।

१. 'प्रत्यक्षाग्राह्यत्वं' इति नास्ति -कुं. आ.-अ. २. इदं नास्ति - कुं. ३. इयं पङ्क्तिः - अ पुस्तके नास्ति.

स्वत- अनु.) प्रामाण्यवादः पु - ३६.
१ निष्कम्पप्रवृत्तिहेतुभूतज्ञानस्यानुव्यवसायो वा (प ३) प्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितोऽ २ नुव्यवसायो वा (प. ८) स्वाग्राह्यज्ञान प्रामाण्य--

अत्र सर्वत्रापि ज्ञानस्येत्यनेन दोषाजन्यप्रमारूपज्ञानस्याभिमतत्वादिदं रूप्यमित्यादिभ्रमगोचरानुव्यवसायस्यापेक्षतया तस्य तत्र प्रामाण्यग्राहकत्वेपि न बाध इति बोध्यम् । तत्रप्रामाण्यग्रहणस्य मानसत्वेन सिद्धान्तेपि भ्रमगोचरानुव्यवसायेन प्रामाण्याग्रहात् । यद्वा वक्ष्यमाणदिशात्रानुव्यवसायत्वस्य भ्रमानुव्यावसायेऽभावेन तस्यापत्रेत्वान्न बाधः । अत एव ज्ञानांशे लौकिकप्रत्यक्षादिरूपस्येहानुव्यवसायस्याभिमततया
स्मृत्युपनीतप्रामाण्यविषयकानुव्यवसायमादाय न न्यायमते सिद्धसाधनं

शङ्क्यम् ।। स्वग्राह्येति ।। स्वेन अनुव्यवसायेन ग्राह्यं यज्ज्ञानं आद्ये सिद्धान्ते सुखविषयकम् स्वप्रकाशरूपं साक्षिज्ञानमेव । परमते मानसं सुखव्यवसायरूपम् । तदन्यपक्षत्रये ३ च घटादिगौचरं मनोवृत्तिरूपं व्यवसायाख्यं साक्षिज्ञानादन्यत् । तन्नष्ठं यत्प्रामाण्यं सुखत्ववति सुखत्वप्रकारकत्वादिरूपं घटत्ववति घटत्वप्रकारकत्वादिरूपं वा तद्विषयक इत्यर्थः । घटज्ञानानुव्यवसायस्य पटज्ञानप्रामाण्याविषयकत्वाद्बाधविरासाय स्वग्रह्यज्ञानेत्युक्तम् । यद्वा प्रामाण्यविषयक इत्येवोक्तौ स्वनिष्ठप्रामाण्यविषयकत्वमादाय सिद्धान्ते अर्थान्तरत्वनिरासाय -- स्वग्राह्यज्ञानेति ।। एवं च नार्थान्तरता ।

१. निष्कलङ्क -क. २. ता - कुं . ३. कुं . पुस्तके नास्ति .

--- --- ---

- विषयकः (सा. १) तत्प्रकारको वा (सा. २) --

न चैवं साक्ष्यंशे स्वग्राह्यव्यवसायप्रामाण्यविषयकत्वाभावाद्व्यभिचारः शङ्क्यः ।

स्वग्राह्यं यावत्स्वयमन्यच्च तावति प्रामाण्यग्रहकत्वलाभेन साक्ष्यंशे हेतूनामव्यभिचारात् । यद्वा सुखत्ववद्विशेष्यकज्ञानत्वादिरूप्रामाण्यलाभाय स्वग्राह्यज्ञानप्रामाण्येत्युक्तिः । प्रामाण्यविषयत्वं च साध्यं यन्मते वैशिष्ट्यमनुव्यवसाय वैद्यमेव न तन्म १ तेन बोध्यम् । तद्वेद्यमपि स्वातन्त्रेण न तद्वेद्यमिति मते तु सत्वेन प्रामाण्यविषयकत्वमभिमतम् । तेन तत्पक्षे सिद्धसाधनतेति शङ्कानवकाशः । अत एव वक्ष्यति 'सत्तया तदुल्लेखस्य

साध्यत्वात् 'इति । न च वादिनः सत्वेनेति विशेषमं व्यर्थम् व्यावर्त्याप्रसिद्धेरिति शङ्क्यम् । शुक्तिरूप्यज्ञाने प्रामाण्यविषयकस्यापि मानसदर्शनस्य स्वविषयसत्वानिर्णयकस्यापि सिद्धान्ते सत्वात् । परप्रसि २ द्धत्वमात्रेण व्यावर्त्यत्वोपपत्तेश्च । परार्थानुमाने परं प्रति सिद्धसाधनोद्धारस्यापि वादिप्रयोजनत्वाच्च । जन्यकृत्यज ३ न्यानीत्यत्र मीमांसकं प्रति जन्यत्वस्येवेहापि वादिनं प्रति प्रमेयत्वादिवदुपरञ्जरकत्वेन विशेषणत्वोपपत्तेश्च।
उक्तं च उत्पत्तिप्रामाण्यवादे मणावपि 'उभयसिद्धव्यावर्तकत्वं तन्त्रम् । न तु व्यावर्त्यस्योभयसिद्धिः । गौरवात् 'इति
भावः ।
प्रामाण्यमनुव्यवसायविषयोपि प्रागनुपस्थित्वान्न प्रकारतयेति वदन्तं प्रत्याह -- तत्प्रकारको वेति ।। स्वग्राह्यज्ञानप्रामाण्यप्रकारकोवेत्यर्थः । विशेषणज्ञानहेतुताया निर्विकल्पभङ्गे निरसिष्यमाणत्वादिति भावः -- तद्विरुद्धेति । ग्राह्यप्रामाण्यविरुद्धं यत्प्रामाण्याभावतद्व्याप्याप्रामाण्यादि तदविषयकत्वे सतीत्यर्थः ।

१. ते. बोध्यम् - अ. २ . द्धिमात्रेण - कुं ३. न्येत्यत्र- कुं.

स्वत-अनु.) पामाण्यवादः पु - ३८.
--- --- ---
तद्विरुद्धाविषयकत्वे सति तद्व्याप्यत्वाविषयकत्वे १ सति तत्संशयविरोधिप्रत्ययत्वात् (हे. १) तद्व्याप्यत्वाविषयकत्वे सति तदभावनश्चयविरोधिनिश्चयत्वात् (हे. २) तद्विषयकव्यवहारहेतुप्रत्ययत्वात् (हे. ३
) तज्ज्ञानप्रकारप्रकारकतया तत्प्रकारवद्विशेष्यकतया च तद्विषयकत्वाच्च (हे. ४) प्रामाण्यानुमितिवत् इत्याद्यनुमानम् ।।

विरुद्धत्वं च तज्ज्ञानप्रतिबन्धकज्ञानविषयत्वम् -- तद्व्याप्येति ।। सुखानुभवादिनिष्ठसुखत्ववद्विशेष्यकत्वादिरूपप्रामाण्यव्याप्यत्वेत्यर्थः -- तत्संशयविरोधीति ।। प्रामाण्यसंशयविरोधित्वं नाम तदनुत्पत्तिव्याप्यत्वादिरूपं ज्ञेयम् । विशेषणकृत्यान्यग्रे व्यक्तानि-- तद्विषयकेति ।। प्रामाण्यविषयकेत्यर्थः-- तज्ज्ञानेति ।। ग्राह्यप्रामाण्याश्रयज्ञानेत्यर्थः । साध्यवैशिष्ट्यनिरासोऽग्रेस्पुटः-- तद्विषयकत्वात् ।। व्यवसायविषयकत्वादित्यर्थः-- प्रामाण्यानुमितिवदिति ।। इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिहेतुत्वात् इतिप्रामाण्यानुमितावुक्तस्य हेतुचतुष्टयस्य साध्यद्वयस्य च सत्वादिति भावः । २ आदिपदेन 'प्रामाण्यं ज्ञानग्राहकमात्रग्राह्यं अप्रामाण्येतरज्ञानसमवेतधर्मत्वात् ज्ञानत्ववत् 'इत्यादि सुधोक्तानुमानग्रहः २ ।

आद्यविशेषणस्य यथाश्रुतव्याप्याकृत्यसंभवेपि द्वितीयविशेषण तदसंभवात् यद्यद्विरुद्धाविषयकत्वे सति यद्व्याप्यविषयकत्वे सति यत्संशयविरोधिज्ञानं तत्तद्विषयकमित्यादिसामान्यव्याप्तिमुपेत्य कृत्यमाह ।

१. कुं - क. २. अयं ग्रन्थः- मु पुस्तके कुण्डलितः.

-------- ---------- --------

अत्राद्ये हेतौ तद्विरुद्धाविषयकेत्युक्तत्वात्प्रामाण्य विरुद्धापामाण्यनिश्चये, तद्व्याप्यत्वाविषयकेत्युक्तत्वाद्विह्निमत्वाविषयके, तत्संशयविरोधिनि तद्व्याप्यतया धूमनिश्चये , तत्संशयविरोधीत्युक्तत्वाद्घाटादिज्ञाने, प्रत्ययेत्युक्तत्वाद्धर्म्यज्ञाने कोट्यस्मरणे च न व्यभिचारः । न चोल्बणविषयान्तरज्ञाने व्यभिचारः । विषयान्तरे मनःसंचारादिरुपतज्ज्ञानसामग्र्या एव तद्विरोधित्वात् ।

वह्नमत्वाविषयक इति ।। अयं वह्निमान् धूमवत्वादित्यत्र वह्निव्याप्यधूमवानयमितिनिश्चये सति अयं वह्निमान्नवेति संशयानुदयेनोक्तरूपहेतुभावेपि वह्निम १ त्वाविषयकत्वाभावेन तत्र साध्याभावाद्व्यभिचार इति शङ्का तद्व्याप्यस्याविषयकत्वविशेषणान्निरस्तेत्यर्थः।
विशिष्यव्याप्तौ तु घटत्ववद्विशेष्यकत्वरूपप्रामाण्याविषयकेपि तत्संशयविरोधिनि
तद्व्याप्यतयाकंबुग्री २ वादिमद्विशेष्यकत्वनिश्चये व्यभिचारो नेति ज्ञेयम् -- धर्म्यज्ञाने ।। व्यवसायरूपधर्मिणो ज्ञानाभाव इत्यर्थः । धर्मिज्ञानस्य संशयहेतुतया तदभावस्य कार्यानुत्पादव्यप्यत्वे न तत्र हेतुसत्वादिति भावः । धर्मिज्ञआनं न संशयहेतुरिति मतेनाह -- कोटीति ।। कोटिस्मरणाभाव इत्यर्थः । एतच्चोपलक्षणम् । कुंकुमगन्धादिसंशयविरोधिनि तदभिव्यञ्जकगोघृतसंयोगादौ च न व्यभिचारः इत्यपि ध्येयम् । विशिष्टस्यापि हेतोर्व्यभिचारमाशङ्क्य निराह -- न चेति ।। सामग्र्याएवेति ।। तथा च तत्र प्रत्ययत्वाभावेन हेतोरेवाभावादिति भावः ।

१. द्वि - अ. २. वत्वा - कुं - अ.

स्वत-अनु) प्रामाण्यवादः पु - ४०.

--- --- ---

ननु तथापि व्यञ्जकस्य करचरणादेः स्वरूपेणैव ज्ञानं व्यङ्ग्यपुरुषत्वादिजातिसंशयविरोधि । न तु व्याप्यतया । करादिज्ञानस्यालोकवत्स्वरूपेणैव व्यङ्ग्यधीहेतुत्वात् । तच्च न व्यङ्ग्यविषयकमिति तत्र व्यभिचार इति चेन्मैवम् । व्यङ्ग्यसंशयो हि

द्वैधा । व्यञ्जकभूतं यज्ज्ञान १ कारणं तदभावेन सामग्र्यभावाद्वा यथान्धकारस्थितघटसंशयः
।

न च सामग्र्या विरोधित्वे तज्जन्यज्ञानस्यापि सामग्रीविरोधित्वप्रयुक्तं संशयविरोधित्वं स्यादेव । विरोधिनिश्चय ३ प्रतिबन्धकत्वस्य विरोधिनिश्चयसामग्रीप्रतिबन्धकत्वप्रयुक्तत्वदर्शनात् । 'यद्वीसामग्री यत्र प्रतिबन्धिका तद्वीरपितत्रप्रतिबन्धिका 'इति पक्षधरोक्तेरिति वाच्यम् । विरोधिनिश्चयस्य ग्राह्याभावावगाहित्वेनैव प्रतिबन्धत्वेनान्यप्रयुक्तत्वाभावात् । भिन्ने विषये अनुमितिसामग्र्याः प्रत्यक्षप्रतिबन्धकत्वेपि अनुमितेस्तददर्शनादिति भावः । स्थलान्तरेपि व्यभिचारमाशङ्कते - नन्विति ।। स्वरूपेणैव ।। करचरणादिनैवेत्यर्थः-- व्याप्यतया ।। पुरूषत्वादिप्याप्यतयेत्यर्थः । हेतुसत्वमुक्ता साध्यं नेत्याह--तच्चेति ।। एतदपि व्यभिचारचोदनं सामान्यव्याप्तिमुपेत्यैवेति ४ ध्येयम् । विवेकेन समाधिं वक्तमाह--व्यङ्ग्येति ।। निश्चयसामग्र्यभावप्रयुक्तो वा सत्यां तस्यां तत्प्रतिबन्धकदोषप्रयुक्तो वेति भावेन ५ तद्वैविध्यं व्यनक्ति-- व्यञ्जकेति ।। ज्ञानेति ।। निश्चयेत्यर्थः । सामग्रीति ।। निश्चयसामग्र्यभावादित्यर्थः-- यथेति ।।

१. करणं-क. २.स्थघट-कुं छ क. ३.'सामग्रीप्रतिबध्यस्य विरोधिनिश्चयप्रतिबध्यत्व 'इत्याधिकं-कुं. ४.बोध्यम्-कुं अ. ५.'तत् 'इति न- कुं.

दूरादिदोषाद्वा । यथा स्थाणौ पुरुष १ संशयः । तत्राद्ये व्यङ्ग्यनिश्चयसामग्र्येव संशयविरोधिनी । तस्यां च प्रत्ययत्वं नेति न व्यभिचारः । द्वितीये तद्व्याप्यत्वेन करादि २ ज्ञानमेव दोषजन्यसंशयविरोधीति ३ तद्व्याप्यत्वाविषयकत्वं नेति न व्यभिचारः । न च तद्व्याप्यत्वाविषयकत्वमसिद्धम् । सुखसाक्षात्कारत्वादेः प्रामाण्यव्याप्यत्वाग्रहणे ४ ऽसंशयदर्शनात् ।

तत्रालोकरूपव्यञ्जकाभावादिति भावः-- दूरादीति ।। सत्यां निश्चयसामग्र्यामिति भावः--- तद्व्याप्यत्व ५ ज्ञानमेवेति ।। अन्वयव्यतिरेकाभ्यां तथावगमादिति भावः । अत एवोक्तं ज्ञप्तिप्रामाण्यवादान्ते रुचिदत्तेन 'अनुव्यवसायत्वास्य प्रामाण्यनियतस्यापि तन्नियतत्वेनाग्रहत्कथं संशयनिवृत्तिः । न हि ६ व्याप्तिज्ञानमात्रात्संशयनिवृत्तिः । अन्यथा तैलं पृथिवी नवेति संशयो न स्यात् 'इति । ननु घटत्वादिप्रकारकानुभवत्वस्य वल्मीकादौ घटत्वाद्विशेष्यकत्वादिरूपप्रामाण्यव्यभिचारेपि अत्र विवक्षितसुखानुभवत्वादिरूपव्यवसायधर्मस्य सुखत्ववद्विशेष्यत्वादिरूपप्रामाण्यव्यभिचारेण तद्व्याप्यत्वविषयकत्वं तदनुव्यवसायस्यास्त्येवेति भावेन परिहरति--सुखेति ।। दर्शनादिति ।। व्याप्त्यनुसन्धानहीनबालमुग्धादाविति भावः । व्याप्यत्वाविषयकत्वांशे असिद्धिं निरस्य तद्विरुद्धाविषयकत्वांशे विवादाभावात्संशयविरोधित्वांशे तां निराह-- न च धर्मीति ।।

१.त्व-छ. २.करादि पदंन-कुं.छ क. ३.'तत् ' इति न-कुं छ. ४. हे-मु. ५. त्वेन-कुं अ. ६. व्याप्य-कुं.

--- --- ---

न च धर्मिज्ञानाद्यभावादेवासंशयात्संशयविरोधित्वसिद्धमिति वाच्यम् । सुखादिज्ञानरूपधर्मिज्ञाने ज्ञानत्वरूपसाधारणधर्मदर्शने दैवात्कोटिस्मरणे विषयान्तरासंचारे च सत्यप्यसंशयदर्शनात् ।
नचाद्यो हेतुरप्रयोजकः; ज्ञानस्य तत्संशयविरोधित्वं हि तन्निश्चयत्वेन वा तदभावनिश्चयत्वेन वा तदभावव्याप्यनिश्चयत्वेन वा तद्व्याप्यनिश्चयत्वेन वेति चतुर्धा ।

कोट्यस्मरणविषयान्तरसंचारादिरादिपदार्थ-- धर्मिज्ञान इति ।। धर्मिणो ज्ञाने सतीत्यनेनान्वयः । धर्म्याख्यज्ञान इति व्याख्याने तु न सतिपदेनान्वयः । अपि तु साधारणधर्मदर्शनपदेन । न चास्मिन्पक्षे धर्मिभूतज्ञानानुक्तिः । धर्मिज्ञानस्यसाधारणधर्मदर्शनत्वेनैव हेतुत्वात्तेनैव तदुक्तेरिति १ -- असंशयेति ।। तस्य प्रामाण्यनिश्चनिबन्धनत्वाभावे कदाचित्कस्यचित्तत्र धर्मिज्ञानाद्युदयसंभवेन रूप्यज्ञानं प्रमा न वेतिवत्सुखज्ञानं प्रमा न वेत्ति संशयः स्यात् । कदापि तददर्शनात्प्रामाण्यनिश्चयनिमित्त एव तदभाव इति तद्विरोधित्वं तस्य नासिद्धमिति भावः ।
एवं व्यभिचारासिद्धी निरस्य विपक्षे बाधकाभावदोषं च निराह --नचाद्य इति ।। विपक्षे हेतूच्छित्तिं संभावितपक्षानुक्तेतरव्यवच्छेदपूर्वकमाह-- ज्ञानस्येति ।। स्वतो विरोधाभावात् २ स्वविषयकृतस्यैव विरोधस्य वाच्यत्वादिति हि शब्दः।

१. एके - अ. २. स्वपदं नास्ति - मु. अ आ.

तत्र द्वितीयतृतीययोस्तद्विरुद्धाविषयकत्वविशेषणेन चतुर्थस्य तद्व्याप्याविषयकत्वविशेषणेन निरस्ततया हेतोराद्यं प्रामाण्यनिश्चयत्वरू १ पं साध्यं विनानुपपत्तेः ।
एतेन तद्वितीयहेतावप्यप्रयोजकतोद्धृता । पक्षीकृतज्ञाने प्रामाण्यविषयकत्वं प्रामाण्युव्याप्यविषयकत्वं प्रामाण्याभावविषयकत्वं प्रामाण्याभावव्याप्यविषययकत्वमुभयोदासीनविषयकत्वं चेति संभावितेप्रकारपञ्चके द्वितीयस्य तद्व्याप्यत्वाविषयकत्वविशेषणेन तृतीयादीनां च त्रयाणां तदभावनिश्चयविरोधिनिश्चयत्वेन निरासाद्धेतोराद्यं प्रामाण्यविषयकत्वरू २ पसाध्यं विनानुपपत्तेः । तत्राद्यं निश्चयपदं तदभावसंशयविरोधिनि तदभावनिश्चये द्वितीयं तु तदभावनिश्चयविरोधिनि तदभावसंशये व्यभिचारवारकम् ।

एतेनेत्युक्तं व्यनक्ति -- पक्षीकृतज्ञानइत्यादिना ।। उभयेति ।। प्रामाण्यतद्व्याप्यप्रामाण्याभावतद्व्याप्यरूपोभयोदासीनेत्यर्थः । सङ्गतया प्रसक्तमप्रयोजकत्वं पूर्वं निरस्य विशेषणकृत्यमाह-- तत्राद्यमिति ।। तत्र द्वितीयहेतावित्यर्थः । तदभावज्ञानविरोधिज्ञानत्वादित्युक्ते व्यभिचारादुभयत्र निश्चयपदेन तद्वारणमित्यर्थः--
तद्विषयव्यवहारहेतु प्रत्ययत्वादिति तृतीयहेतौ ।। कुङ्कुमगन्धव्यङ्ग्यव्यवहारहेतौ घृतादिसंयोगरूपव्यञ्जकेव्यङ्ग्याविषयके व्यभिचारवारकं प्रत्ययपदं प्रामाण्याविषयकं घटादिज्ञाने व्यभिचारवारकं तद्विषयकव्यवहारहेत्वितिपदं इति स्पष्टमिति विशेषणकृत्यमनुक्त्वा सिध्यप्रयोजकत्वे क्रमेण निराह -- सुखेति ।।

१. पसाध्यं - छ. २. पं - छ.

--------- ------------- ---------

सुखसाक्षात्कारस्य तत्प्रामाण्याभिलापस्य च मध्ये प्रामाण्यानुमित्यङ्गीकारे १ चानुभवविरुद्धं व्याप्तिस्मरणादि बहु कल्प्यं स्यात् । सुखसाक्षात्कारस्य तत्साक्षात्का २ राभिलापस्य च मध्येपि तत्कल्प्यं स्यात् प्रामाण्यानुमिति प्रामाण्याभिलापर्योर्मध्येऽपि ज्ञानान्तरं कल्प्यं स्यादिति न तृतीयहेतुरसिद्धः । नाप्यप्रयोजकः व्यवहर्तव्यज्ञानस्य व्यवहारहेतुत्वात् ।

सुखमनुभवामीति प्रत्ययस्य न सुखानुभवप्रामाण्यव्यवहारहेतुत्वमस्ति किंतु सुखसाक्षात्कारानन्तरं अयं सुखानुभावः प्रमा सुखसाक्षात्कारत्वात् पुर्वसुखसाक्षात्कारवदित्यादिलिङ्गजन्यप्रामाण्यानुमितेरेवेत्यभ्यासदशापन्नस्थले झडिति प्रामाण्यानुमितिसामग्रीसमवधानं स्वकारणाधीनमिति ज्ञप्तिप्रामाण्यान्ते मणिकृदुक्तदिशा प्रमाण्यानुमित्यङ्गीकार इत्यर्थः-- व्याप्तिस्मरणादीति ।। परामर्शानुमिती आदिपदार्थः । अतिप्रसङ्गं चाह -- सुखेति ।। तत्काल्यप्यमिति ।। जातिव्यक्तयोरेकवित्तिवेद्यत्वनियममनुपेत्य ३ साक्षात्कारस्वरूपज्ञानान्तरं सुखज्ञानमिदं साक्षात्कारः स्ववृत्तिवर्तमानविषयकत्वादिति सुखसाक्षात्कारत्त्वानुमितिमुपेत्य तद्धेतुव्याप्तिस्मरणादिकं कल्प्यं स्यादित्यर्थः । ज्ञानान्तरं शाब्दादिरूपमित्यर्थः । अत्रापि हेतूच्छित्तिरेव विपक्षे बाधिकेत्याह -- व्यवहर्तव्येति ।।

१. वा -ग. २. रत्वा - मु. ३. सुख - मु. अ. आ.

---------- ---------- --------

न च घटविशेष्यकत्वे सति घटत्वप्रकारकत्वलस्यैव प्रामाण्यरूपत्वाच्चतुर्थहेतौ साध्यवैशिष्ट्यम् । त्वयाप्यङ्गीकृतस्य प्रामाण्योल्लेखमात्रस्य हेतुत्वात् । त्वदनङ्गीकृतस्य सत्तया तदुल्लेखस्य च साध्यत्वात् । मन्मते केवलानुप्रमाणसाधारणस्य १ याथार्थ्यरूपप्रामाण्यविषयकत्वस्य साध्यत्वात् केवलप्रमाणासाधारणस्योल्लेखस्य हेतुत्वाच्च ।।

तज्ज्ञानप्रकारेत्यादिचतुर्थहेतौ दलद्वयकृत्यं परोक्तनिरुक्तिभङ्गे व्यनक्तमिति व्यभिचारशङ्कानवशात्सन्दिग्धासिद्धिस्वरूपासिद्धी क्रमेण निराह -- नचेत्यादिना ।। सुखं मे भूयादितीच्छायामुक्तरूपप्रकारकत्वे सत्यपि न प्रामाण्यमिति तदेव तदित्यसिद्धिमिति कश्चित् । तन्न । सुखत्ववद्विशेष्यकत्वादिरूपप्रामाण्यस्चेच्छायामपि सत्वात् । सुखत्ववद्विशेष्यकत्वादिकं तदित्यशक्यशङ्कम् । मन्मत इत्यादिवक्ष्यमाणविरोधात्-- उल्लेखमात्रस्य ।। विषयत्वमात्रस्येत्यर्थः । मात्रपदेन सत्वव्यावृत्तिः । एतेन यन्मते तद्वत्वमनुव्यवसायस्य सर्वथैवाविषयो न तन्मते नायंहेतुर्वक्ष्यमाणदिशा प्रसाध्याङ्गकोवेति सूचितम् । ननु सिद्धान्ते २ सत्वासत्वौदासीन्येन तद्विषयकत्वाभावात्साध्यावैशिष्ट्यं स्यादित्यत आह -- मन्मत इति ।। वादजल्पकथयोः प्रयोगदशायामित्यर्थः । वह्निमात्रसाधने पर्वतीयवह्निना पर्यवसानमिव ज्ञानमात्रनिष्टप्रामाण्येन पक्षधर्मताबलात्पर्यवसानमिति भावः ।।

१. णया - च. मु. २. सत्वा इति. न - मु.

१ केचि २ त्तु तथाङ्गीकर्तव्यत्वं साध्यमिति न साध्यावैशिष्ट्यमित्याहुः ।।
नाप्यसिद्धिः सुखमेव सुखत्वेनानुभवामि स्तम्भमेव स्तम्भत्वेन ३ जानामीत्यनुभवात् । एतेनोक्तवक्ष्यमाणानुमानेषु बाधो निरस्तः । सुखमेव सुखत्वेनानुभवामीत्यादिज्ञाने प्रामाण्यशब्दानुल्लेखेपि तदर्थस्य सुखत्ववति सुखत्वप्रकारकत्व ४ रूपस्य प्रामाण्यस्योल्लेखात् । यद्वा विमतः प्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितोऽनुव्यवसायः --

एतेनेति ।। तद्वद्विशेष्यत्वोल्लेखा ५ देरनुभवसिद्धत्वेनेत्यर्थः । तदेव व्यनक्ति -- सुखमेवेति ।। अनुल्लेखेपीति ।। इदं ज्ञानं प्रमाणमित्यनाकरेपीत्यर्थः--उल्लेखात् ।। विषयीकरणादित्यर्थः।
पूर्वोक्तहेतुविशेषणेषु प्रतिवादिविप्रतिपत्तेः प्रसाध्याङ्गकत्वं मन्वानः प्रागुक्तपक्षतावच्छेदकेष्वेकं पक्षतावच्छेदकं कृत्वाऽन्य हेतुकृत्याह-- यद्वेति ।। यद्वा पूर्वं प्रामाण्यं क्वापि नानुव्यवसायवेद्यमिति मतमुपेत्य प्रामाण्यानुमितिदृष्टन्तेन प्रयोगा उक्ताः इदानीं तु क्वचित्तद्वेद्यमिति मतमुपेत्य तदृष्टान्तेनाह -- यद्वेति ।। विमत इति ।। प्रामाण्यविषयकत्वाविषयकत्वाभ्यां विप्रतिपत्तिविषयइत्यर्थः विमतेरपि नियतविषयत्वायावच्छेदकमावश्यकमेव तत्किमित्यत आह -- प्रामाण्येति ।। उपस्थापकेति ।। उपस्थितितत्सामग्रीत्यर्थः।
नन्वेवमुक्तरूपानुव्यवसायत्वस्यैव पक्षतावच्छेदकत्वसंभवे किं विमत्येतिचेन्न 'यद्यपि विमतिरपि नियतविषयत्वायाच्छेदकसापेक्षा ।

१. इयं पङ्क्तिः नास्ति - छ.क.ग. २. त्त-च. मु. ३. अनुभवामि - च. मु.
४. त्वादि - छ- क. मु. ५. कत्वादे - कुं.

--- --- ---

स्वविषयव्यवसायप्रामाण्यविषयकः
निष्कम्पप्रवृत्तिहेतुव्यवसायविषयकानुव्यवसायत्वात् ;

तथापि सावयवत्वसाधितेन कार्यत्वेन पृथिव्याः सकर्तुकत्वसाधनमिव स्वनियामकनयतया लभ्ब्या विमत्या पक्षतावच्छेदो न विरुद्धः 'इति न्यायामृतोक्तदिशोपपत्तेरिति तात्पर्यम् । अत्र प्रामाण्येति विशेषणोक्त्या प्रतिबद्धानुव्यवसाये बाधशङ्का अनुव्यवसाय इत्युक्त्या घटज्ञानमितिशाब्दज्ञाने बाधशङ्का निरस्तेति ध्येयम् । अतीताद्यविषयकप्रत्यक्षत्वादिरूपत्वादनुव्यवसायत्वस्य प्रथमज्ञानगोचरानुव्यावसायोत्र पक्षत्वेन पर्यवसितो ज्ञेयः । उत्तरज्ञानगोचरस्य दृष्टान्तत्वेनोपादानात् । स्वविषयेति साध्यांशः पूर्ववद्व्याख्येयः । प्रामाण्यप्रकारको वेत्यपि ध्येयम् । प्रगुपस्थितेरप्रयाजेकतया निर्विकल्पकभङ्गे व्यक्तत्वात् । निष्कम्पप्रवृत्तिहेत्विति व्यवसायविशेष १ णेन संशयादिगोचरानुव्यवसायो अनुव्यवसायेत्युक्त्या तादृशज्ञानगौचरशाब्दज्ञाने च न व्यभिचारः । अनुव्यवसायत्वं चातीतानागताविषयकप्रत्यक्षत्वं न तु तत्प्रकारप्रकारकतया तत्प्रकारवद्विशेष्यकतया तज्ज्ञानत्वरूपमिति युक्तम् । निष्कम्पेत्यादिविशेषणवैयर्थ्यात् । पूर्वोक्तहेतुसाङ्कर्याच्च । नापि ज्ञानांशे लौकिकप्रत्यक्षत्वम् उत्तर २ हेतुसाङ्कर्यात् । अत एव सामान्येत्यादिना वक्ष्यमाणज्ञानद्वयेपि न व्यभिचारः तस्यातीतादिविषयकत्वात् अत्र निष्कम्पप्रवृत्तीत्यस्य संवादिप्रवृत्तीत्यर्थः । तेन शुक्तिरूप्यज्ञानगोचरानुव्यवसायो साक्षिरूपे तत्र प्रामाण्यग्रहस्य मानत्वेन तन्निष्ठप्रामाण्याविषयके न व्यभिचारः -- उक्तरूपेति ।।

१.णंतेन - मु. २. हेतुपदं नास्ति - मु . अ.

स्वत-अनु) प्रामाण्यवादः पु - ४८.

--- --- ---

उक्तरूपव्यवसायांशे लौकिकप्रत्यक्षत्वाद्वा, गृहीतप्रामाण्येन ज्ञानेन समानविषयकस्योत्तरस्य ज्ञानान्तरस्यानुव्यवसायवत् ।।
अत्र द्वितीयहेतौ लौकिकपदम् सामान्यप्रत्यासत्त्या १ दिजन्ये व्यवसायविषयके ज्ञाने व्यभिचारवारणाय । २ ज्ञानांश इति
विशेषणं तु स्मुत्युपनीतेऽतीत ३ घटज्ञाने तद्विषयकमहं घटज्ञानवाना ४ समिति यज्ज्ञानमात्मांशे लौकिकप्रत्यक्षं तत्रव्यभिचारवारणार्थम् । न च तव घटज्ञानमस्तीति शाब्दजन्यं यद्घटज्ञानविषयकं ज्ञानं तदनुव्यवसाये व्यभिचारः शङ्क्यः ।

निष्कम्पप्रवृत्तिहेतुव्यवसायांश इत्यर्थः । लौकिकत्वं चालौकिकप्रत्यासत्यजन्यत्वम् । संशयादिगोचरानुव्यावसाये व्यभिचारनिरासायोक्तरूपव्यवसायांश इत्युक्तिः । गृहीतप्रामाण्येनेति बहुव्रीहिः । ५ घटादिज्ञाने प्रवृत्तिसामर्थ्यादिना प्रामाण्यानुमित्यन्तरं तत्रैवायं घट इत्याद्युक्पन्नसमानाधिकरणज्ञाने प्रामाण्यं तदनुव्यवसायवेद्यमिति
प्राचीनन्यायमतेऽभ्युपगमादिति भावः । उपपादयिष्यते चाग्रे ग्रन्थ एव । सामान्यप्रत्यासत्त्यादीति ।। ज्ञानत्वसामान्येत्यर्थः । आदिपदेन योगजप्रत्यासत्तज्ञानप्रत्यासत्योर्ग्रहः -- ज्ञानांश इति ।। उक्तरूपव्यवसायांश इत्युक्तैकदैशानुवादः । विशिष्टस्य हेतोर्व्यभिचारमाशङ्क्य ६ विवेकेन समाधिमाह-- नचेत्यादिना ।।

१. त्तिजन्ये - छ. २.व्यवसायांशे - छ. क. ३. ते- च छ क ग.

४. नि-कुं. ५.यत्र - मु. अ. ६. व्यतिरेकेण - आ.

स्वत-अनु) प्रामाण्यवादः पु - ४९.

--- --- ---

घटज्ञानांशेघटत्ववति घटत्वप्रकारकत्वरूपस्य तदीयस्य प्रामाण्यस्याग्रहणेन साध्या१ भावेपि लौकिकप्रत्यक्षत्वाभावेन हेत्वभावात् । घटज्ञानविषयकज्ञानांशे तु हेतोः सत्वेऽपि घटज्ञानत्ववति घटज्ञानत्वप्रकारकत्वरूप्रामाण्य २ ग्रहणेन साध्यसद्भावात् ।।

न च दृष्टान्तः साध्यविकलः । उत्तरस्य ज्ञानान्तरस्य पूर्वेण प्रामाण्यग्रहणेनाव्यवहितत्वे तस्यैव व्यवहितत्वे तु प्रामाण्यस्मरणस्यैव --

'स्वर्गसाधनं याग इति ज्ञानस्य प्रामाण्ये निश्चिते तत्समानविषयकज्ञानान्तरे अप्रामाण्यशङ्का भवतीति ज्ञानान्तरमगृहीतप्रमाण्यमपि 'इत्यादिमणिकृदुक्तेरुत्तरज्ञानानुव्यवसाये प्रामाण्यविषयकत्वं विप्रतिपन्नमिति वदन्तं प्रति साध्यसत्वं दृष्टान्ते व्यनक्ति-- न च दृष्टान्त इत्यादिना ।। उत्तरस्येति ।।

अनुमित्यादिना गृहिनप्रामाण्यकात् पूर्वज्ञानादुत्तरस्येत्यर्थः -- तस्यावेति ।। विशेषणज्ञानतयेत्यन्वयः । प्रामाण्यानुमितिरेव प्रामाण्यघटकघटत्वादिविशेषणज्ञानत्वेन प्रामाण्यानुमित्यनन्तरमेव घटघटत्वनिर्विकल्पकं विनैव घटत्वादिविशिष्टव्यवसायोत्पत्तौ तदुत्तरकाले विनश्यत्प्रामाण्यज्ञानसत्वादिति भावः ।

न च वक्ष्यमाणदिशा पूर्वोत्तरज्ञानयोः प्रामाण्यस्यैकत्वेप्युत्तरज्ञानगतत्वेन पूर्वमभानान्न तत्रोपनय इति शङ्क्यम् ।

१. ध्यस्या - छ. २. स्य - कुं.

---------- ---------- ---------

विशेषणज्ञानतया त्वदभप्रेताया विशेषणोपस्थितिविशेष्येन्द्रियसन्निकर्षतदसंसर्गा-ग्रहरूपविशिष्टज्ञानसामग्र्याः सत्वेन ज्ञानान्तारानुव्यवसायस्य प्रामाण्यविशिष्टव्यावसायविषयकत्वात् ।।

ननु तज्ज्ञानविषयकेत्यादिस्वतस्त्वनिरुक्तौ तच्छेब्देन व्यक्तिविशेषो न विवक्ष्यते । किन्तु ग्राह्यप्रामाण्याश्रयीभूतज्ञानमात्रम् ।

यदवच्छेन यत्र यद्ग्रृहीतं तत्र तद्ग्रहत्वस्यैवौपनसामग्रीत्वात् । चन्दनखण्ड इत्यादिप्रत्यक्षे तथा दर्शनात् । तथाच तद्विषयकत्वावच्छेदेन पूर्वज्ञाने प्रामाण्यग्रहात्तद्विषयकत्वेन ज्ञाते द्वितीयज्ञाने तदुपनयो भवत्येवेति भावः -- सन्निकर्षेति ।।

संयुक्तसमवायरूपेत्यर्थः -- तदिति ।। विशेषणविशेष्ययोः प्रामाण्यतदाश्रयज्ञानयोरसंसर्गेत्यर्थः ।

यत्तु मणावुक्तं 'तज्ज्ञानविषयकजन्यज्ञानाजन्यजन्यज्ञानविषयत्वं १ स्वतस्तवम् । तदन्य २ ग्राह्यत्वं हि परतस्त्वम् । मनसा चौवं प्रामाण्यग्रहस्य तज्ज्ञानविषयकजन्यज्ञानजन्यत्वान्न परतस्त्वहानि -'रिति तद्धृदि कृत्वा प्रकारान्तरेण साध्यवैकल्यमाशङ्कते -- नन्विति ।। ग्राह्यप्रामाण्याश्रयज्ञानविषयकज्ञानाजन्यत्वे सति स्वग्राह्यज्ञानुप्रामाण्यविषयकत्त्वं साध्यार्थं मन्वानस्येयं साध्यवैकलयशङ्केति ध्येयम् । तज्ज्ञानविषयकज्ञानसापेक्षत्वोपपादनायाह -- तच्छब्देनेति ।। मात्रमिति ।। ग्राह्यप्रामाण्याश्रययत्किंचिज्ज्ञानामित्यर्थः । पूर्वज्ञानस्य ग्राह्यप्रामाण्याश्रयत्वलाभाय सापेक्षत्त्वोपपादनाय चाह -- समानेति । प्रामाण्यस्य भिन्नत्वे तज्ज्ञानसापेक्षत्वायोगात् । ततश्च किमित्यत आह -- एवंचेति ।।

समानविशेष्यकत्वे सति समानप्रकारकयोश्च ज्ञानयो र्विशेष्यप्रकारघटितं प्रामाण्यमेक १ मेव । एवं चोक्तानुव्यवसायस्य ग्राह्यप्रामाण्याश्रय द्वितीयज्ञानविषयकज्ञानानपेक्षत्वेपि प्रथमज्ञानविषयकज्ञानसापेक्षत्वा न्न स्ततस्त्वमिति साध्यवैकल्यमितिचेन्न । व्यवसायप्रामाण्यम ४ नुव्यवसायस्य ३ विषयो न वेति विप्रतिपत्ताव ४ नुव्यवसायविषयत्वमात्रसाधनत् । तस्य च दृष्टान्ते सत्वात् । तज्ज्ञानविषयकेत्यादिनोक्तस्वतस्त्वस्यापि पक्षधर्मताबलात्सिद्धेश्च ।।

तत्पदेनोक्तरूपज्ञानमात्रेऽभिमते सति प्रामाण्यस्यैकत्त्वे च सतीत्यर्थः -- सापेक्षत्वादिति ।। प्रामाण्यरूप विशेषणोपनायकत्त्वेनेति भावः-- साध्यवैकल्यमिति ।। ज्ञानप्रामाण्यं तज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यं न वेति विप्रतिपत्तौ तदृशज्ञानग्राहत्त्वस्यैव स्वतस्त्ववादिना साध्यत्वात् । तस्य च द्वितीयज्ञानप्रामाण्येऽभावेन तदनुव्यवसाये तज्ज्ञानविषयकज्ञानाजन्यत्त्वे सति स्वग्राह्यज्ञानप्रामाण्यविषयकत्वरूपसाध्यस्याभावादिति भावः । परोक्तस्वतस्त्वेपि न दोष इत्याह -- तज्ज्ञानेति ।। दृष्टान्ते साध्यानुगमार्थं ५ स्वग्राह्यज्ञानप्रामाण्यविषयक इत्येव साध्यकरणेपि त्त्वदभिमतविशिष्टसाध्यसिद्धिः हेतोः पक्षधर्मतो स्यादेव । निष्कम्पप्रवृत्तिहेतुव्यवसायविषयकानुव्यावसायत्वादिरूपहेतुना प्रथमज्ञानगोचरानुव्यवसायरूपपक्षनिष्ठेन --

१. प्रकार- क. २. प्य - क. ३. यवि - छ - क. ४.प्य - क ५.स्वपदं न -आ.

स्वत - अनु) प्रामाण्यवादः पु - ५२.

--- --- ---

यद्वा अनुमित्यनुव्यावसायो दृष्टान्तः । न च नवीनन्यायमते तत्रापि स्वतः प्रामाण्याभावात्साध्यवैकल्यम् । तथात्वे तत्प्रामाण्ये कदाचित्संशयविपर्ययव्यतिरेकप्रमान्यतरापातात् ।।

- प्रामाण्यविषयकत्वं सिद्ध्यत् १ अनुव्यवसायस्य तज्ज्ञानविषयकज्ञानानपेक्षत्त्वादुक्तरुपमेव सिद्ध्यतीति भावः ।।
अनुमित्यादिप्रामाण्यं स्वत इति प्राचीनमतानुरोधेनाह-- यद्वेति ।। एतेन भिन्नभिन्नदृष्टान्यकथनेन मन्मते सर्वत्र स्वतस्त्वमिव त्वन्मते न सर्वत्र प्रामाण्यस्य परतस्त्वम् । क्वचित्स्वतस्त्वस्या २ भ्युपगमात् । तथाच किमर्धजरतीयेन सर्वत्रापि स्वतस्त्वमेवोपेयमिति सूचितम् ।।
ननु मणौ 'यत्त्वनुमानस्य निरस्तसमस्त ३ भ्रमाशङ्कस्य स्वत एव प्रामाण्यग्रह इत्युक्तमाचार्यैः तद्धूमति वह्निज्ञानत्वमनुमितेः प्रामाण्यनियतमनुव्यवसायेचो ४ पनीतम् ततो विशेषदर्शनान्न तत्राप्रामाण्यशङ्केति । प्रामाण्यनिश्चचयादिवाप्रामाण्यशङ्काविरहादर्थं निश्चित्य निष्कम्पव्यवहार इत्यभिप्रायम् ५ 'इति
प्राचीनमतस्यान्यथातात्पर्यस्योक्तत्वात्कथं तन्मतेऽयंदृष्टान्त इति भावेनाशङ्क्य तेनाप्यङ्गीकरयति -- यचेत्यादिना ।।
संशयेति ।। अनुमितिः प्रमा न वेति संशयः अप्रमैवेति विपर्ययः प्रमा न भवतीति प्रामाण्यव्यतिरेकविषयप्रमा ना स्यात् । तद्विरोधिनः प्रामाण्यनिश्चयस्यानुदयादित्यर्थः । न चेष्टापत्तिः । निरस्तसमस्तविभ्रमेत्युक्तिविरोधात् ।

१. ति। प्रचीनमतस्यान्यथातात्पर्यस्यासिद्धत्वात् - अ. २. प्य - आ मु. ३. वि - अ. ४. नो - कुं. ५. य 'इत्युक्तत्वा - अ.

स्वत - अनु) प्रामाण्यवादः पु - ५३.

ननु वह्निज्ञानप्रमाण्यनियतस्य धूमवद्विशेष्यकत्वे सति वह्निप्रकारकत्वस्यानुमित्यनुव्यावसायेन ग्रहणा १ त्तत्रासंशय इति चेन्न । अनुमतेर्वह्निमत्वमात्रविषयकत्वेन बहिरर्थस्य धूमत्वस्योपनायकाभावेनानुव्यवसायाविषयत्वात् ।।

२ व्यतिरेकप्रमापत्तेरनिष्चत्वाच्चेति भावः । अत एव न धर्म्यज्ञानादिनोपपत्तिः । कदापि विभ्रमाभावोपगमात् । अत्र संशयविपर्ययोरेकराशीकरणादन्यतरेति साधु ।

मण्युक्तमेव संशयादिनिवृत्युपायमाश्कते -- नन्विति ।। नियतस्येति ।। यत्र धूमवद्विशेष्यकत्वे सति वह्निप्रकारकत्वं तत्र वह्निमद्विशेष्यकत्वे सति वह्निप्रकारकत्वमिति व्याप्तेरिति भावः । किं धूमवद्विशेष्यकत्वमनुमित्युपनीतमेव तदनुव्यवसायेन गृह्यत इत्युच्यते अथ परामर्शोपनीतमिति हृदि विकल्प्याद्यं निराह -- अनुमितेरिति ।। उपनायकेति ।। अनुव्यवसाये भावकाभावेनेत्यर्थः । उपलक्षणं चैतत् । प्रामाण्यनयतस्यापि तत्वेनाभाने संशया ३ निरासात् । धूमवद्विशेष्यकत्वादे र्वह्निमद्विशेष्यकत्वव्याप्यत्वस्य बहिरर्थस्यानुमितौ सर्वथाभानाभावेन तदनुव्यवसाये तस्योपनायकाभावेनानुव्यवसायाविषयकत्वादित्यापि ध्येयम् । यत्तु प्रामाण्यव्याप्यस्य स्वरूपेणैव ज्ञानं संशयादिविरोधीत्येतदिहैवानन्यगत्या कल्प्यत इति तन्न । स्वतस्त्वेनाप्युपपत्याऽनन्यगतेरभावात् ।

१. न्न तत्र संशय - छ. २. व्यभिचार - आ. ३. देर - मु - अ- आ.

स्वत-अनु) प्रामाण्यवादः पु - ५४.

-------- ---------- ---------

न च लिङ्गपरामर्शस्तदुपनायकः । यत्रानुमितिद्वयेच्छा तत्र परामर्शानन्तरं प्रथमानुमितिरूपसाध्यसिद्धेः सत्वेप्यनुमितित्साधीनपक्षतायाः सत्वेनानुमतित्यनन्ततरं तदनुव्यवसायकाले उपनायकपरामर्शनाशात् । ज्ञानान्तरोपनीतस्य ज्ञानान्तरानुव्यवसायेन ग्रहणेऽपिप्रसङ्गाच्च । वह्नमनुमिनोमीत्यनुव्यवसायेन धूमत्वस्यानुल्लेखनात् १।

द्वितीयं निराह -- न चेति ।। अनुमितिद्वयेच्छेति ।। ननु पूर्वं ममानुमितिद्वयं स्यादितीच्छा पश्चाल्लिङ्गपरामर्शः पश्चादनुमितिः । अनन्तरं द्वितीयानुमित्युत्पत्तिवेलायां धूमवत्त्वोपनायकस्य परामर्शस्यानाशेपि द्वितीयोत्पत्तिसमये पूर्वोत्पन्नेच्छाया अभावादनुमित्साया अभावेन द्वितीयानुमित्युत्पाद एवायुक्त इति चन्न । अनुमित्सापदेनानुमित्साविषयसिध्यननुगुणानन्तरितत्वस्य विवक्षितत्त्वात् । तथैव पक्षतालक्षणेऽभिधावादिति भावः । पक्षताया इत्युपलक्षणम् । विनश्यदवस्थपरामर्शभावादित्यपि ध्ययम् ।
अनुमित्यनन्तरमिति ।। द्वितीयानुमि २ त्युत्पत्यनन्तरमित्यर्थः । अनुमित्यन्तरमिति पाठे जायत इति शेषः । ननु तदापरामर्शनाशेपि तज्जन्यसंस्कारसहितानुव्यवसायस्यास्तु तद्ग्रहणमित्यत आह -- ज्ञानान्तरेति ।।
घटज्ञानानुव्यवासाये पटज्ञानोपनीतस्य भानापत्तेरित्यर्थः । ननु तदुपनीतस्य तज्जन्यज्ञानान्तरूनुव्यवसायेन ग्रहणमित्युक्तौ न दोषइत्यत आह --

वह्निमिति ।। एतेन परामर्शनिष्ठप्रामाण्यानुमित्युपनीतं धूमवद्विशेष्यकत्वमिति प्रत्युक्तम् ।

१. लेखात् - च, लेखाच्च - कुं. २. उत्पत्तिपदं न - मु.

स्वत-अनु) प्रामाण्यवादः पु - ५५.

---------- ---------- --------

एतेनैव धूमवत्वे परामर्शोपनीतेऽनन्तरं वह्निमत्वविषयत्वेन जायमानानुमितिः सुरभिचन्दनमिति ज्ञानवद्विशिष्टवैशिष्ट्य १ ज्ञानसामग्रीमहिम्ना लिङ्गोपहितलैङ्गिकविषयेति सैवोपनायकेति निरस्तम् । अनुमितेर्वह्निमत्वमात्रविषयत्वानुभवबलेन प्रत्यक्षज्ञान एव सामग्रीमहिम्नः संकेचात् । असंकोचे वा धूमवति धूमप्रकारकत्वरूपस्य २ प्रामाण्यस्यानुमित्यनुव्यावसायेन ग्रहणे ३ धूमवत्त्वांशे ४ ऽनुमितिः स्वतः प्रामाण्यादृष्टान्तसिद्धिः । किंचैवं वह्निमत्वांशस्य साक्षादनुमित्युपनीतत्वाद्वह्निमद्नशेष्यकत्वे सति वह्निप्रकारकत्वरूपं प्रामाण्यमेवानुमित्यनुव्यवसायस्य ५ विषयोस्त्विति न साध्यवैकल्यम् ।

सैवेति ।। अनुमितिरेवेत्यर्थः । एतेनैवेत्युक्तं व्यानक्ति-- अनुमितेरित्यादिना ।। स्वत इति ।। ज्ञानानुव्यवसायवेद्यप्रामाण्यकत्वरूपस्वतःप्रामाण्यादित्यर्थः--दृष्टान्तेति ।। धूमत्वांशे अनुमित्यनुव्यवासायवदिति दृष्टान्तेत्यर्थः । नन्वेवं तत्रेव क्वापि विप्रतिपन्नप्रामाण्यमनुव्यवसायवेद्यं न स्यात् । संशयाद्यभावस्य ज्ञानानुव्यवसाये प्रामाणय्यव्याप्यविषयकत्वादेवोपपत्तेः । तत एव निष्कम्पप्रवृत्त्युपपत्तेश्चेत्यत आह -- किंचैवमिति । धूमवत्वांशे स्वतः प्रामण्ये सतीत्यर्थः-- साक्षादिति। धूमवत्वांश इव ज्ञानान्तरनैरपेक्ष्येणेत्यर्थः ।

१. बोध- छ. २.'स्य' इति न च.छ.क.मु. ३. णात् - छ. कुं.
४. एव -कुं. ५. 'स्य ' इति न -मु,

स्वत-अनु) प्रामाण्यवादः पु - ५६.

-------- ---------- ----------

यद्वा अहं सुखीति ज्ञानप्रामाण्यं तदनुव्यवसायविषयः तस्मिन्सत्यप्रकाशमानत्वरहितत्वात् व्यवसायवत् । न चासिद्धिः । तथात्वे १ तत्प्रामाण्ये कदाचित्संशयाद्यापातात् ।

प्रामाण्यमेवेत्येवकारेण प्रामाण्यांश एव संशयाद्यभावस्योपगमेन तत्रैव तन्निश्चयस्वीकारो युक्तो न तु व्याप्यांशे तन्निश्चयस्वीकारः प्रामाण्यव्याप्यत्वेनापि तन्निश्चयावश्यंभा २ वश्चेत्याचष्टे ।
एवं प्राचीनमतेऽविप्रतिपन्नं नवीनमते प्रसाध्याङ्गकं दृष्टान्तमुक्त्वा प्रयोग उक्तः । अधुना नवीनमतेप्यविप्रतिपन्नदृष्टान्तकं प्रयोगमाह-- यद्वेति ।। यद्वा पूर्वमनुव्यवसायपक्षकान्प्रयोगानुक्त्वेदानीं तद्विषयपक्षकप्रयोगावाह -- यद्वेति ।। वस्तुतस्त्विति च ।।
यद्वा तद्वत्त्वादेर्बाह्यार्थास्य नानुव्यवसायविषयतेत्यतस्तर्हि सुखत्ववत्त्वादेरबाह्यत्वात्तत्रास्तु स्वतो वेद्यतेति भावेनाह -- यद्वेति ।। विषय इति ।। सत्तयेत्यपि ध्येयम् । तस्मिन्नित्यनेन तदनुव्यवसायपरामर्शः । साध्याविशेषनिरासाय नञ्द्वयम् -- तथात्व इति ।। ज्ञानानुव्यवासे सति तत्प्रामाण्याप्रकाश इत्यर्थः । ३ धर्म्यज्ञानाभावात्कोटिस्मृतेरपि कदाचित्संभवादिति भावः । ननु 'आन्तरप्रामाण्यमपि न स्वतः । तस्य स्वतस्त्वे वा न सर्वस्य तथात्वम् । विशेष्यनिष्ठात्यन्ताभावप्रतियोगिप्रकारानवच्छिन्नत्वादिकं प्रामाण्यम् स्वतो गृहीतुमशक्यमिति परत एव गृह्यत 'इति मणिकृदुक्तेः

कथमनुव्यवसायवेद्यतासाधनमित्यत स्तत्स्वरूपं निर्धारयन्नेन विशिष्याप्याह -- वस्तुतस्त्विति ।।

१. कदाचित्प्रामाण्ये सं - च- छ. २.वाच्चे -मु. ३. धर्मिज्ञानभावात् - मु. धर्मिज्ञानस्य भावात् - अ.

स्वत- अनु) प्रामाण्यवादः पु - ५७.

---------- ---------- ---------

वस्तुतस्तु तद्वति तत्प्रकारकत्व १ रूपं याथार्थमेव प्रामाण्यम् तज्ज्ञानस्यैव प्रवर्तकत्वात् । तत्रानुव्यवसायस्य व्यवसायगतं यत्किंचिद्विशेषयकत्वं रजतत्वप्रकारकत्वं २ ज्ञानत्वं च विषय इत्यत्र न विवादः । किन्तु विशेष्यस्य यद्रजतत्ववैशिष्ट्यं तद्विषयकत्व एवेति तदेव साध्यते । निष्कम्पप्रवृत्तिहेतुव्यवसायविषयभूतं धर्मिधर्मिवैशिष्ट्यं सत्तयानुव्यवासय ३ विषयः निष्कम्पप्रवृत्तिहुतुव्यवसायविषयत्वात् विशेष्यवत् । नचाप्रयोजकता । वैशिष्ट्यप्रतीतिसामग्र्या वक्ष्यमाणत्वात् ;

तद्वतीति ।। विशेष्यत्वं सप्तम्यर्थः । तद्वद्विशेष्यकत्वे सति तत्प्रकारकज्ञानत्वरूपेत्यर्थः । तद्वद्विशेष्यकत्वमात्रस्य भ्रमेऽपि सत्वात् । निष्कम्पेति । सशङ्कप्रवृत्तिहेतुव्यवसायविषये बाधनिरासाय हेत्वन्तं व्यावसायविशेषणम् । हेतौ च व्यभिचारनिरासाय । वैशिष्ट्यं च परमते समवायादिभिः सिद्धान्ते स्वरूपसम्बन्धादिभिः । यन्मते वैशिष्ट्यमनुव्यवसायविषयोपि न स्वातन्त्र्येण तद्विषय इत्यभ्युपगमस्तन्मते सिद्धसाधनिरासाय सत्तयेति विशेषम् । वादिनं प्रति तत्सार्थक्यमाद्यसाध्य विवृतावस्माभिरुक्तं ध्येयम् -- वैशिष्ट्येति ।। सत्तयेत्यपि योज्यम् -- वक्ष्यमाणत्वादिति ।। उत्तर ४ भङ्गबाधोद्धारे नन्वेव मित्यादिग्रन्थेनेत्यर्थः । तथाच तादृशव्यवसायविषयत्वस्यैवोक्तसाध्ये

सामग्रीत्वेन सामग्रीमुपेत्य कार्यानभ्युपगमे व्याघाताप्रसङ्गान्नाप्रयोजकत्वमि ५ त्यर्थः ।

१. ज्ञानत्व - छ. क. २. ज्ञानत्वं, इतिनास्ति - कुं. ३. स्य -मु. ४. ४. रत्रबाधो - मु - अ - आ. ५. ति भावः - आ.

स्वत- अनु) प्रामाण्यवादः पु - ५८.

-------- ---------- ---------

यद्वा विमतोऽनुव्यवसायः स्वग्राह्यज्ञानप्रामाण्यविषयीकरणयोग्यः । अनुव्यवसायत्वात् । गृहीतप्रामाण्यज्ञानविषयकज्ञानान्तरानुव्यवसायव्वसायवत् । अनुमित्यनुव्यवसायवद्वा । व्यवसायविषयभूतं धर्मधर्मिवैशिष्ट्यं वा स्वविषयव्यवसायविषयकानुव्यवसायं प्रति सत्तया विषयत्वयोग्यं --

द्वितीयनिरुक्त्यनुरोधेन प्रयोगत्रयमाह -- यद्वेति ।। इति सामान्यतः स्वतस्त्वं साध्यमित्यन्वयः । तत्राद्यमनुव्यवसायपक्षकम् । उत्तरं तु द्वयं तद्विषयपक्षकम् । तत्राप्याद्यं व्यवसायविषयपक्षकम् । अन्त्यं १ तन्निष्ठप्रामाण्यपक्षकमिति व्यक्तम् । विमत इति ।। प्रामाण्यविषयीकरणयोग्यत्वतदयोग्यत्वाभ्यां विमतिविषयः । विमतेरपि नियतविषयत्वायावच्छेगकस्यापेक्षितत्वात्तदाह -- अनुव्यवसाय इति ।। वक्ष्यमाणदिशा तत्प्रकारप्रकारकत्वादिरूपानुव्यवसायत्वेन नियता लध्वी विमतिरेव पक्षतावच्छेदकेत्यर्थः । अत एव प्रमानुव्यवसाये न बाधादिः । वक्ष्यमाणरूपानुव्यवसायत्वस्य तत्राभावात् । बाधनिरासाय स्वग्राह्यज्ञानेति साध्यविशेषणम् । योग्यत्वं च स्वविषयज्ञानद्वारा प्रामाण्यावच्छिन्नसहजशक्तिकत्वं ध्येयम् । वक्ष्यमाणरूपानुव्यवसायत्वादिति हेत्वर्थो ध्येयः ।

तेनाप्रमागोचरानुव्यवसाये न व्यभिचारः । गृहीतेति ।। अयं च दृष्टान्तो 'न च दृष्टान्तः साध्यविकलः '
इत्यादिना प्रागेव साधित इति भावः । प्राचीनमतरीत्याह -- अनुमितीति ।। अयमपि दृष्टान्तो नवीनमतेपि प्राक्साधितः -- व्यवसायेति ।। प्रमारूपो व्यवसायोऽत्राभामतः -- विशेष्यवदिति ।।

१. तु - मु. अ. आ.

--- --- ---
व्यवसायविषत्वात् विशेष्यवत् ; तत्तज्ज्ञानप्रामाण्यं वा स्वाश्रयज्ञानविषयकानुव्यवसायविषयत्वयोग्यं
तद्विषयत्वयोग्योपाध्यघचितज्ञानधर्मत्वात् तत्तज्ज्ञानत्ववदिति सामान्यतः स्वतस्त्वं साध्यम् ।
न चान्त्यहेतोरसिद्धिः । प्रामाण्योपाधोर्विषयसत्वस्य व्यवसायवियत्वेनानुव्यवसायविषयत्वयोग्यत्वात् । योग्यायोग्योपाधिघटिते प्रमाप्रमान्यतरत्वदौ व्यभिचारनिरासाय नञ्द्वयम् ।
तद्विशेष्यवदित्यर्थः । 'प्रामाण्यं ज्ञानग्राहकमात्रग्राह्यं अप्रामाण्येतरज्ञानवृत्तिधर्मत्वात् ज्ञानत्ववत् 'इति -
'प्रत्यक्षवच्च प्रामाण्यं स्वत एव '
इत्येतद्व्याख्यानसुधायामुक्तमनुमानं परिष्कृत्याह -- तत्तज्ज्ञानेति । योग्यमिति ।। 'योग्यत्वं च साक्षिनिष्टां सहजां ग्रहणशक्तिं प्रति स्वविषयज्ञानद्वाराऽवच्छेदकत्व 'मिति पूर्वोक्तं ध्येयम् । तद्विषयत्वायोग्योपाध्यघटितेत्युक्त्या सुधास्थाप्रामाण्येतरपदार्थो विवृतः । तेन विशेष्यावृत्यप्रकारक १ त्वरूपप्रामाण्ये व्यभिचारो निरस्तः । सामान्यतः ।। प्रतिबद्धाप्रतिबद्धसाधारण्येनेति वा

प्रामाण्यमात्रसाधारण्येनेति वा नत्वहं सुखीति ज्ञानप्रामाण्यमितिवद्विशिष्येत्यर्थः । वैशिष्ट्यसत्वाविषयकत्व एव विवादादाह -- विषयसत्वस्येति ।। अन्यतरत्वादाविति ।। तद्विषयत्वयोग्योपाधिघटित ज्ञानधर्मत्वादित्युक्तावुक्तस्थले हुतुसत्वेपि साध्याभावाद्व्यभिचारः प्रप्नोतीति तन्निरासाय तद्विषयत्वयोग्योपाध्यघटितेत्युक्तरित्यर्थः ।

१. त्वादि - मु - अ.

स्वत- अनु) प्रामाण्यवादः पु - ६०.

अनुव्यवसायत्वं च व्यवसायप्रकारप्रकारकतया तत्प्रकारवद्विशेष्यकतया च तद्विषयप्रत्यक्षत्वं वा ज्ञानांशे लौकिकप्रत्यक्षत्वं वेति न कश्चिद्दोषः ।

विशेष्यनिष्ठात्यन्ताभावप्रतियोगिप्रकारानवच्छिन्नत्वतद्वतितत्प्रकारकत्वा २ दिरादिपदार्थः । ज्ञानधर्मत्वादित्येवोक्तावप्रमात्वादौ व्यभिचार इति भावः । नन्वत्र सर्वानुमानेष्वभिमतमनुव्यवसायत्वं यदिज्ञानगौचरज्ञानत्वं तदा ज्ञानमिति शब्दजज्ञाने बाधादिर्दोषः । सविषयकज्ञानगोचरज्ञानत्वे तु घटज्ञानमिति शाब्दज्ञाने दोषः । ज्ञानगौचरप्रत्यक्षत्वेत्वप्रमागोचरानुव्यवसाये सामान्यप्रत्यासत्तिजन्यज्ञानगोचरप्रत्यक्षे च बाधादिरेव । ज्ञानदौचरनित्यज्ञानत्वे ३ ईश्वरज्ञानमादाय सिद्धसाधनतेत्यत आह -- अनुव्यवसायत्वं चेति ।। एतेन 'तार्किकाभिमतानुव्यवसाय एवास्माकं साक्षीति 'प्रगुक्तं विवृतं ध्येयम् । अत्र दलकृत्यं प्रगेव व्यक्तम् ।

ननु यदि व्यवसायप्रकारप्रकारकतयेत्यादिरूपमनुव्यवसायत्वं तर्हीदमेव प्रामाण्यविषयकत्वमिति सिद्धसाधनता ४ दोष इति चेन्न । सत्तया प्रमाण्योल्लेखस्यास्मिन्पक्षे साध्यस्याभिमतत्वात् । यदा तु प्रामाण्यविषयकत्वमात्रमेव साध्य ५ मिति मतं तत्पक्षे प्रकारान्तरेणाह -- ज्ञानांश इति ।।

१. इयं पङ्ि्तः छ- पुस्तके नास्ति. २. न्यतरत्वा-मु. ३. त्वी-मु. ४. दिर्दो- मु -अ. ५.मभि-मु-अ.

स्वत-अनु) प्रामाण्यवादः पु - ६१.

-------- ------------ ----------

अप्रामाण्यं तु विसंवादाद्यनुसंधाने सत्येव गृह्यत इति न स्वतस्त्वद्ग्रहः । प्रामाण्यधीस्तु संवादाद्यनुसंधानं विनापि दृष्टेति विशेषः ।
ननु गृहीताप्रामाण्यज्ञानसमानविषयकज्ञानान्तराप्रामाण्ये संशयादर्शनेन तत्रानुव्यवसायवेद्यत्वे सिद्धेऽन्यत्रापि
तथेत्यप्रामाण्यधीरपि स्वतः स्यादिति चेन्न ।।
अप्रामाण्योपाधेर्व्यवसायविषयाभावस्य
तदनुपनीतत्वेनानुव्यवसायायौग्यत्वात् ।

लौकिकत्वं तु सामान्यप्रत्यासत्याद्यजन्यत्वम् । ज्ञानांशे इति विशेषणं तु स्मृत्युपनीत अतीत २ घटज्ञाने तद्विषयकमहं घटज्ञानवानिति यज्ज्ञानमात्मांशे लौकिकप्रत्यक्षं तत्र बाधादिनिरासायेति भावः । नन्वेवं ज्ञानधर्मत्वबाह्यार्यत्वयोरविशेषाद्विसंवादापेक्षत्वस्योभयत्र
साम्यादप्यप्रामाण्यमपि स्वतो गृह्यतेति ततः कः प्रामाण्यस्य विशेष इत्यत आह -- अप्रामाण्यं त्विति ।।

विवरिष्यते चैतत्प्रामाण्यानुमित्यसंभववादे -- दृष्टेति ।। अभ्यासदशापन्नस्थल इति भावः ।
ननु अनुव्यवसायः स्वग्राह्यज्ञानाप्रामाण्यविषयीकरणायोग्यः । अनुव्यवसायत्वात्
गृहीताप्रामाण्यकज्ञानसमानवियकज्ञानान्तकरानुव्यवसायवदित्याभाससाम्यम्
ाङ्क्य निराह--नन्वित्यादिना ।। व्यवसायेति ।। व्यवसाये इदं रूप्यमित्यादिभ्रमे अविषयो योऽभावो रजतत्वाभावस्तस्येत्यर्थः । तदभाववति तत्प्रकारकत्वपरूपत्वादप्रामाण्यस्य तद्घटकेपाधिरूपस्याभावस्येदं रूप्यमिति ज्ञानेऽनुल्लेखेन नेदं रूप्यमिति ज्ञान एवोल्लेखेन कथं तस्यानुव्यवसाययोग्यत्वम् ।
१.यसत्त्वाभा - छ. २. ते - मु. आ. -आ .

स्वत-अनु) प्रामाण्यवादः पु - ६२.
-------- ---------- ----------
तदुक्तं भगवत्पादैः 'प्रामाण्यं च स्वत एव अन्यथानवस्थानात् 'इति । ज्ञायत इति शेषः । उक्तानुमानसाध्यान विनोक्तहेतूनां पक्षेऽवस्थित्ययोगादित्यर्थः ।
स्वतस्त्वेऽनुमानानि ।। ३ ।।

ननूक्तरूपं याथार्थ्यं न साक्षिणो -

तथा च तत्र बाध एव दोष इति भावः-- तदुक्तमिति ।। स्वतस्त्वे एतान्यनुमानान्यनवद्यानीत्येतद्विष्णुतत्वनिर्णय उक्तमित्यर्थः । तत्पठित्वा प्रकृतानुगुणमर्थमाह -- प्रामाण्यं चेति ।।
स्वतस्त्वेऽनुमानानि ।। ३ ।।

ननु अप्रामाण्यघटकोपाधेरभावस्य व्यवसायाविषयतया तदनुव्यवसायवेद्यत्वमप्रामाण्यस्य बाधितमिति यथोच्यते तथैव प्रामाण्यघटकोपाधेर्धर्मिवैशिष्ट्यस्य व्यवसायविषयत्वेपि न तदनुव्यवसायविषयता । तस्य बहिर्थात्वात् अन्यथा धर्मधर्म्यंश इव वैशिष्ट्ये अस्ति न वेति कदापि संदेहो न स्यादीति भावेन 'अस्तु तावदिदं प्रामाण्यं तथाप्यनुव्यवसायायानन्तरं व्यवसायस्य प्रामाण्ये अर्थस्य तद्वत्वे च संशयस्यानुभवसिद्धत्वान्नार्थतद्वत्त्वं तस्य विषयः 'इति मणिकृदुक्तं हृदि कृत्वा शङ्कते -- नन्विति ।। तद्वति तत्प्रकारकज्ञानत्वरूपमित्यर्थः ।
वक्ष्यमाणोपादानसौकर्यायैतदुक्तिः । स्वरूपज्ञानं साक्षीति सिद्धान्ता २ वष्ठम्भेनाह-- साक्षिण इति ।। मानसज्ञानानुभवो अनुव्यवसाय इति मतावष्टम्भेनाह--अनुव्यवसायस्य वेति ।।

अनुव्यवसायस्य १ वा विषयः । रजतत्वप्रकारकत्वे सन्देहादर्शनेन तस्य तद्विषयकत्वेपि रजतत्ववद्विशेष्यकत्वे संदेहदर्शनेन रजतत्ववत्वरूपेबहिरर्थे तस्यासामर्थ्यात् । तथाच स्वतस्त्वानुमानानि बाधितविषयाणीति चेन्न । सुखत्ववत्वादेर्बहिरर्थत्वाभावेन साक्षिवेद्यसुखवेद्यसुखादिज्ञाने स्वतः प्रामाण्याप्रतिहतेः ।
किंच किं रजतत्वादिवैशिष्ट्यमनुव्यावसायाविषय एव किं वा व्यवासायविषयतया तद्विषयोपि स्वातन्त्र्येण तदविषयः । नाद्यः । अनुव्यवसायस्य
ससंबन्धितावच्छेदकरजतत्वादिवैशिष्ट्यविशयकत्वनियमात् ।

तद्वद्विशेष्यकत्वसन्देहस्य तद्वत्वसन्देहपर्यवसानाद्रजतत्ववत्वरूपेत्युक्तम्--तस्येति ।। अनुव्यवसायस्येत्यर्थः ।
सर्वप्रामाण्यस्य स्वतस्त्वानापत्तेराह--किंचेति ।। 'नार्थतद्वत्वं तस्य विषयः 'इति मण्युक्तेरुभयथा संभवात् स्वातन्त्र्येणेति कैश्चिद्व्याख्यानाच्च द्वेधा विकल्पः --संबन्धितेति ।। व्यवसायसंबन्धिनि रजते या संबन्धिता तदवच्छेदकेत्यर्थः --नियमादिति ।। संयोगप्रत्यक्षादौ तथा दर्शनादिति भावः । न च संयोगनिर्विकल्पे व्यभिचारः । तदभावस्य वक्ष्यमाणत्वात् । तस्यापि संयोग्यंशे सविकल्पकत्वाच्च ।

१. ससबन्धिकव्यवसायस्य - ग. २. मता - अ.मु.

स्व-अ-वा-द्वारः) प्रामाण्यवादः पु - ६४.
---------- ---------- --------
धर्मधर्म्यंशयोरिव तद्वैशिष्ट्यांशेपि व्यवसायप्रत्यासत्तेः सत्वेन तदप्रतीतौ हेत्वभावाच्च । सजतं जानामीत्यनुव्यवसायेपि रजतरजतत्वयोः --

साक्षात्कारपदेनासाधारणधर्मप्रकारेण
ससंबन्धिकसाक्षात्कारस्याभिप्रेतत्वाच्च । अत एव गुणत्वप्रमेयत्वादिसामान्यप्रत्यासत्तिजन्ये ससंबन्धीकसंयोगादिसाक्षात्कारे न व्यभिचारः । न चैवमपि संयोगत्वसामान्यप्रत्यसत्तिजन्ये संयोगसाक्षात्कारे व्यभिचारः । एवं हि लौकिकेत्यपि साक्षात्कारो विशेषणीयः --धर्मेति । बाह्यार्थत्वेपि रजतस्थं रजतत्वं तदाधारभूतं विशेष्यं च यथानुव्यवसायस्य विषयः तथा रजते रजतत्ववैशिष्ट्यमपि विषयोस्तु, न हि व्यवसायः स्वविषयमध्ये धर्मधर्मिणोरेवोपनायको न वैशिष्ट्यस्येत्यत्र नियमकस्य सत्वेनेति वार्थः ।

ननु धर्मधर्म्यंशयोः संशयो न कदाचित् तद्वत्वांशे तु सोस्तीति संशय एव तदपातीतौ हेतु १ कल्पक इति चेन्न । तस्यान्यथोपपत्तेर्वक्ष्यमाणत्वादिति भावः।
ननु वैशिष्ट्यस्यापि भाने भासमानवैशिष्ट्यप्रतियोगि २ त्वरूपस्य रजतत्वादिगतस्य प्रकारत्वस्यापि भानप्रसङ्गेनेदं ३ रजतत्वेन जानामीत्येवानुव्यवायो भवेन्नत्विदं रजतं जानामीत्यत आह -- रजतमिति ।।
अपीत्यु ४ पगमवादः । रजतत्वेवेत्येवाकारो नत्वेवं तथापत्यिर्थः । यद्वा वैशिष्ट्यस्यानुव्यवसायाविषयत्वे दोषान्तरमाह--रजतमिति ।। न कोवलं समूहालम्बन इत्यपेरर्थः ।

१. तुः - मु. २. त्वादि - मु. ३. च -मु. ४. त्यभ्यु - अ. आ, मु.

स्वरूपेणैव भाने तस्य पुरोवर्ति १ रजतत्वे जानामीति समूहालम्बनरूपानुव्यवसायाद्विषयभेदाभावापाताच्च । व्यवसायगतस्य रजतत्ववैशिष्ट्यविषयकत्वस्यासिद्ध्यापाताच्च । नह्यनुव्यवसायादन्येन तत्सिद्धिः। न च वैशिष्ट्यमगृह्णन्नननुव्यवसायस्तद्विषयकत्वग्र २ हणे शक्तः ।
ननु वैशिष्ट्यविषयकव्यवहारादिलिङ्गकानुमित्या व्यवसायप्रामाण्यानुमित्या वा तत्सिद्धिः । न त्वनुव्यवसायेन । इदं रजत्वेन जानामीतिहि तदाकारो नत्विदं रजतमिति । तृतीयार्थश्च न वैशिष्ट्यम् । व्यवसायेपि तदर्थोल्लेखापत्तेः । किं तु व्यवसायगतं रजतत्वप्रकारकत्वम् । तस्माद्वैशिष्ट्यं नानुव्यवसायविषय इति चेन्मैवं ।

वैशिष्ट्यविषयकत्वस्यानुमेयत्वेऽनुमि ३ तितः प्राक्तत्र कदाचित्संशयाद्यापातात् ।

४ इदं रजतमिति व्यावसायमानाक्रारतयोत्पाद्यनेपीति वार्थः--स्वरूपेणैव ।। असंबद्धवेत्यर्थः। असिद्धीति--रजतरजतत्वयोः स्वरूपेणैव भान इत्यनुकर्षः । तद्विषयकत्वेति ।। वैशिष्ट्यविषयकत्वेत्यर्थः ।
व्यवहारादीति ।। प्रवृत्तिरादिपदार्थः । व्यवसायो वैशिष्ट्यविषयकः तद्विषयव्यवहारप्रवृत्तिहेतुत्वात् संमतवदित्यनुमित्या इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिहेतुत्वादित्यादिप्रामाण्यानुमित्या वेत्यर्थः ।

१. रजतत्वे -च. मु. २. हे- च. छ. क.ग.मु. ३.तेः - च.
४. इयं पङ्क्तिः - अ. पुस्तके नास्ति.

भासमानवैशिष्ट्यप्रतियोगित्वादन्यस्य प्रकारत्वस्याभावेनेदं रजतत्वेन जानामीत्याकारेणैवानुव्यवसाये १ धर्मधर्म्यंशविषयकत्वस्येव वैशिष्ट्यविषयकत्वस्यापि भानेऽनुभवसिद्धे तत्यागनान्यतस्तत्सिद्धिकल्पने धर्मधर्म्यंशविषयकत्वस्याप्यन्यतः सिद्धिकल्पनापाताच्च । न च व्यवसायस्य वैशिष्ट्यविषयकत्वमगृह्णन् धर्म्यंशादिविषयकत्वमात्रं गृह्णन्नन्योऽनुव्यवसायोऽनुभूयते ।
न च व्यावर्तकत्वं वा तज्ज्ञानजनकज्ञानविषयत्वं वा --

तद्वद्विशेष्यकत्वस्य प्रामाण्यरूपत्वादिति भावः -- तत्सिद्धिः ।। व्यवसायवैशिष्ट्यविषयकत्वसिद्धिरित्यर्थः । 'इदं रजतं जानामीति नानुव्यवसायाकारः । बहिर्विशेष्यके मनसोऽसामर्थ्यात् । किं त्विदं

रजतत्वेन जानामीती 'त्यादिमण्युक्तमाह -- इदं रजतत्वेनेति ।। वैशिष्ट्यविषयकत्वस्येति ।। व्यवसायगतस्येत्यनुषङ्गः -- धर्म्यंशेति ।। इदंत्वविशिष्टेदमंशविषयकत्वस्येवेत्यर्थः । विशेष्यांशेति वार्थः--अन्यत इति ।। अनु २ व्यवसायादन्यतो व्यवहारादिलिङ्गतो व्यवसाय ३ प्रामाण्यानुमितितो वेत्यर्थः । संशयाभावतद्भावौ त्वन्यथोपन्नाविति भावः । ननु तदंशेऽनुव्यवसायान्तरतः सिद्धिरनुभवसिद्धेत्यतो निराह -- न चेति ।।

अन्यस्य प्रकारत्वस्याभावेनेत्येतस्यासिद्धिमाशङ्क्य निराह --न च व्यावर्तकत्वमित्यादिना ।। विशेष्यनिष्ठवृत्तिबुद्धिजनकत्वं व्यावर्तकत्वं--तज्ज्ञानेति ।। वैशिष्ट्यज्ञानेत्यर्थः । विशेषणज्ञानस्य विशिष्टज्ञानजनकत्वादिति--भावः-- वैशिष्ट्यवदिति ।।

विशेष्यानिष्ठो रजतत्वादिनिष्ठो ज्ञानेन सह स्वरूपसंबन्धविशेषो वा प्रकारत्वमिति वाच्यम् । बहिरर्थानां तेषां वैशिष्ट्यवद्व्यवसायविषयत्वाभावेनानुव्यवसाये भानायोगात् । क्लृप्तस्य भासमानवैशिष्ट्यप्रतियोगित्वस्य त्यागेन
स्वरूपसम्बन्ध १ विशेषकल्पनायोगाच्च । इदं रजतत्व २ विशिष्टतया जानामीत्यनुव्यवसायाच्च ।

वैशिष्ट्यस्य यथा व्यवसायविषयत्वं तथाऽभावेनेत्यर्थः । वैशिष्ट्यस्य बाह्यार्थत्वेपि व्यवसायविषयत्वात्तत्प्रतियोगित्वरूपप्रकारत्वस्यानुव्यवसाये भानं युक्तमिति भावः । ज्ञानेन सह स्वरूपसम्बन्धविशेषो न बहिरर्थ इत्यत आह-- क्लृप्तस्येति ।। अतीतादिस्थले व्यावृत्तिबुद्धिजनकत्वरूपव्यावर्तकत्वायोगात् । विशेषणज्ञानहेतुत्वपक्षे च

द्वितीयस्यायोगेन तत्र भासमानेत्यादिरूपस्यैव प्रकारत्वस्य क्लृप्तत्वादिति भावः । 'वैशिष्ट्यविषयकत्वस्यापि भानेऽनुभवसिद्धे'इति प्रागुक्तसिद्धमित्यत आह -- इदं रजतत्वे ३ ति ।।
ननु इदं विशेष्यकरजतत्ववैशिष्ट्यप्रकारकज्ञानवानहमित्यनुव्यवसायादिति ह्यास्यार्थः । न च वैशिष्ट्यं व्यवसाये प्रकारः । प्रागनुपस्थितत्वेन संसर्गमर्यादयैव भानादिति चेन्न । विशेषणज्ञानहेतुताया निर्विकल्पकभङ्गे निरसिष्यमाणत्वेन
प्रागनुपस्थितस्यापि वैशिष्ट्यस्य व्यवसाये रजतत्वस्येव प्रकारतया भाने बाधकाभावादिति भावः ।

१. विशेषपदं नास्ति -छ. २. त्वेन - मु. ३. त्वेनेति - मु.

स्व-अ-बा-द्धारः) प्रामाण्यवादः पु - ६८.
व्यवसायस्य त्वदुक्तरजतत्वप्रकारकत्वेनैवेदं रजतमित्याकारस्येदं रजतमित्यभिलपनं रजतार्थि १ प्रवृत्तिं च प्रति हेतुत्वस्य च सम्भवे तस्य वैशिष्ट्यविषयकत्वाभावापाताच्च ।
अनुव्यवसाय एव तृतीयार्थोल्लेखस्तु तत्र वैशिष्ट्यभानेऽप्यधिकस्य रजतत्वे व्यवसायं प्रति प्रकारत्वस्यापि भानात् । अव एवानुव्यवसायस्येदं रजतमित्याकारत्वाभावोपि । वैशिष्ट्यस्य स्वातन्त्र्येणाभानात् ।

एवंरूपानुव्यवसाये विप्रतिपत्तिरिति चे २ त्तर्हीदं रजतत्वेन जानामीत्याकारोपि वैशिष्ट्याभाने ३ प्युपद्यता ४ मित्यतिप्रसङ्ग इत्याह -- व्यवसायस्येति ।। इत्याकारस्य हेतुत्वस्य च संभव इत्यन्वयः ।
वैशिष्ट्यस्य तृतीयार्थत्वे व्यवसायेपि तृतीयार्थोल्लिखापत्तेरिति प्रागुक्तदोषं निराह -- अनुव्यवसाय एवेति ।। प्रकारत्वस्येति ।।

भासमानवैशिष्ट्यप्रतियोगित्वरूपस्येत्यर्थः । व्यवसाये त्वात्माश्रयापत्ते र्नोक्तरूपप्रकारत्वस्य भानामिति भावः । वैशिष्ट्यस्यापि भाने व्यवसायसमानाकारता स्यादित्यत आह -- अत एवेति ।। अत एवेत्युक्तं व्यनक्ति -- वैशिष्ट्यस्येति ।। स्वातन्त्र्येणेति ।। व्यवसाय इव ज्ञानाविशेषणतयेत्यर्थः ।
'बहिर्विशेष्यके मनसोसामर्थ्या 'दिति मणौ विशेष्यपदप्रयोगसूचितं ' न च तन्मात्रं प्रामाण्यम् । भ्रमसाधारणत्वात् ।

१. नः - छ. २. न्न । तर्ही -कुं. ३. वे-कुं. ४. तेचेत्तर्ह्यति - कुं.

स्व-अ-बा-द्धारः) प्रामाण्यवादः पु - ६९.
---------- ---------- ----------
नन्वनुव्यवसाये वैशिष्ट्यस्य व्यवसायगतस्य रजतत्ववद्विशिषयकत्वस्य च भानेपि प्रामाण्यान्तर्गतं व्यवसायनिष्ठं रजतत्ववद्विशेष्यकत्वं न भासते । न च रजतत्ववद्विषयकत्वे सति रजतत्वप्रकारकत्वमेव प्रामाण्यम् मन्मते भ्रमसाधारण्यादिति चेन्न । रजतत्वे तृतीयार्थोल्लेखबलेन प्रकारकत्वस्येव रजतेऽपि द्वितीयार्थोल्लेखबलेन विशेष्यकत्वस्या १ नुव्यवसायेन गृहीततया समानसंवित्संवेद्यतया च व्यवसायेत २ द्विशेष्यकत्वस्यापि ग्रहणात् ।
अस्ति हि दोषशङ्काद्यवतारदशायामिदं ---

किं नाम रजतत्ववद्विशेष्यकं रजतत्वप्रकारकमिदं ज्ञानं '
इत्यादिपक्षधरोक्तं हृदि कुत्वाशङ्कते - नन्विति ।। न भासत इति ।। मनसो बहिरसामर्थ्यादिति भावः । त ३ द्विषयकत्वमेवास्तु प्रामाण्यम् । किं रजतत्ववद्विशेष्यकत्वेनेत्यत आह -- नचेति ।। मन्मते ।। तार्किकमत इत्यर्थः । तन्मते शुक्तौ रजतत्वाद्यारोरे सति तदाश्रयस्य एव

शक्ता । न तु विशेष्यत्व इति वादिनं प्रत्याह--समानेति ।। प्रकारत्वविशेष्यत्वयोरिति वा प्रकारत्वतद्विशेष्यकत्वयोरिति वार्थः । नन्वेवं भ्रमेपि प्रामाण्यापत्तिरिति चेत्कस्य दोषः । मन्मत इवासत एवारोपः स्वीक्रीयताम् । तदनधिकरणाविशेष्यत्वादिकमधिकं वा निवेश्यतामिति भावः । रजते द्वितीयार्थोल्लेखोऽसिद्ध इत्यत उपपादयति -- अस्तीति ।।

--- --- ---

रजत्वेन जानामीत्यनुव्यवसायेऽपि तदनवतारदशायां रजतंरजतत्वेन जानामीत्यनुव्यवसायः । तस्मान्नाद्यः । द्वितीये १ सिद्धं प्रामाण्यस्य स्वतस्त्वम् । वाशिष्ट्यरूपस्य तद्वत्वस्याप्यनुव्यवसायेन ग्रहणात् । नन्वेवमप्यनुव्यवसायस्य श्रुतसाश्रिवाक्यवदन्यविषयतया वैशिष्ट्यग्राहकत्वेपि तत्संशयविरोधित्वरूपं २ सत्तानिश्चयरूपत्वं नास्तीति न तद्घटितप्रामाण्ये निश्चयरूपता । न ह्यन्यविषयतयाप्यर्थग्रहणार्थसत्वसिद्धिः ।

न च बाह्यार्थेषु व्यवसायस्यासामर्थ्यम् । उपनामके सति सामर्थ्यसम्भवात् । न चोपनीतं विशेषणत्वेन भातीति नियमः । परमाणुमहं जानामीत्यादौ व्यभिचारादिति भावः --सिद्धमिति ।। स्वातन्त्र्येण ज्ञानग्राह्यत्वस्य स्वतस्त्वनिरुक्तावप्रवेशात् । सत्वेन तथात्वस्य ३ सत्वाच्चेति भावः । नन्वर्थसत्वघटितस्यैव प्रामाण्यरूपत्वात्तस्यानुव्यवसायवेद्यता न प्राप्तेति भावेन शङ्कते --नन्विति ।। श्रुतेति ।। साक्षिणा श्रुतं तेनोच्चरितं वाक्यं साक्षिवाक्यं तस्येवेत्यर्थः । गृहे घटोस्तीति श्रुणोमीत्यादिसाक्षिवाक्यस्येति यावत् । अन्यविषयतया तद्ग्राहकत्वात् श्रुतसाक्षिवाक्यवदित्युक्तं भवति । हेतोरप्रयोजकत्वं निराह --नहिति ।।

१. ऽपि - च मु. २. पस -च . ३. सम्भवा - मु.

गेहे घटमिच्छामि गेहे घटसंशयः गेहे घटज्ञानमित्यादिवाक्यजन्यज्ञानेनापि घटसत्वसिध्यापातादिति चेन्न । यत्र ज्ञानस्या १ न्यद्वारेणार्थविषयतया तत्र द्वारिणा द्वारं सत्वेनार्थविषयकमिति ग्रहणे द्वारिणोपि सत्वेनार्थविषयतेति दृष्टानुसारेण कल्पनेऽनतिप्रसङ्गात् । न हि द्वारमिच्छादिकं सत्वेनार्थविषयतया द्वारिणा ज्ञानेन गृहीतम् । दोषशङ्कादिनाऽनास्कन्दितो व्यवसायस्त्वनुव्यवसायेन तथा गृहीतः । गेहे घटज्ञानं साक्षिणा श्रुत २ वाक्यं च यदिसत्वेनार्थविषयतया द्वारिणा ३ ज्ञानेन गृहीतं तदा तेनापि घटसत्वं सिध्यत्येव ।

अन्यविषयतया वैशिष्ट्यग्रहणे ४ पि तत्सत्वाधारणरूपत्वमनुव्यवसायस्याविरुद्धमिति ५ वक्तुं सामान्यन्यायं च ६ वदन्नतिप्रसङ्गं निराह -- यत्रेति ।। पक्षे तद्दर्शयति -- दोषेति ।। दुष्टकरणजन्यत्वशङ्का भ्रमत्वादिशङ्कादिनेत्यर्थः--तथेति ।। सत्वेनार्थविषयकतयेत्यर्थः । तर्हि पूर्वोक्तस्थलेप्येवं स्यादित्यत आह -- गेह इति ।। इच्छासंशयग्रहणोऽसत्वेनार्थविषयकतया द्वारग्रहणबाधाद्गेहे घटज्ञानमित्येवेक्तम् । एतेनानुव्यवसायः सत्तयार्थविषयकः सत्वेनार्थविषयतया व्यवसायविषकत्वात् तादृशं यद्गेहे घटज्ञानमिति ज्ञानं श्रुतं साक्षिवाक्यं च तद्वत् । गेहे घटसंशय इत्यादिज्ञाने ७ तु हेतोरेवाभावान्न व्यभिचार इत्युक्तं भवति । पूर्वपक्ष्युक्तो हेतुरप्रयोजक इत्याह -- यदि चेति ।।

१. प्य- च छ क मु. २. द्व- च मु. ३. द्व- मु आ. ४. नुव्यवसायस्यासामर्थ्यं - मु .

यदि च सव्यवधानत्वमात्रेण सत्वानिश्चायकत्वं तर्हि गेहे मम घटप्रमेत्याप्त १ वाक्यजन्यज्ञानेनापि घटसत्वं न सिध्येत् ।
ननु तत्रार्थतथात्वघटितं प्रामात्वं गृह्णज्ज्ञानं घटसत्वं स्वातन्त्र्येणापि गृह्णातीति चेन्न । मम २ मतेऽनुव्यवसायस्यापि प्रामाण्यग्रानहकत्वेनात्रापि स्वातन्त्र्येस्य सुवचत्वात् ।

वैशम्यामाशङ्क्य प्रकृतेपि सममित्याह--नन्वित्यादिना ।। स्वातन्त्र्येणापीति ।। व्यावसायवदिति भावः-- सुवत्वादिति ।। व्यवसायनष्ठस्य तद्वित्वघटितप्रामाण्यस्य ज्ञानत्ववत्सक्षादेवानुव्यवसायविषयता । न तु व्यवसायद्वारा । परन्तु तद्वत्वस्य तदययोग्यतया चाक्षुषज्ञाने सौरभस्येवोपनीतस्य भानम् । इयांस्तु विशेषः । यदक्षोपनायकस्यापि सामग्रीसद्भावाज्ज्ञानविषयता । तत्र तु सामग्र्यभावत्तदविषयतेति भावः ।
एतेन यत्कैश्चिदुक्तं घटज्ञानवानहं अयं घट इत्यत्र वैलक्षण्यस्य सर्वसंमतया तन्नियामकस्योपनायकभानसामग्रीसमवधान तदसमवधानादेपवश्यकल्पनात् । यत्रोपनायकमपि भासते तत्रोपने ३ यांशे ४ स्वातन्त्र्यम् । अत एव सुरभिचन्दनमित्यत्र
स्वातन्त्र्यम् । स्वातन्त्र्यं च ज्ञाननिष्ठं संशयादिविरोधितावच्छेदकमेव किंचित्फलकल्प्यम् । स्वरूपसम्बन्धविशेषविशयत्वादिति । तन्निरस्तम् । स्वातन्त्र्येणोपनायकत्वेऽज्ञानयमानत्वस्य प्रयोजकत्वे गौरवात् ।

१. दि- कु. २. मन्म-मु. ३.नयां - मु. ४.अस्वा-मु.

स्व-अ-बा-द्धारः) प्रामाण्यवादः पु - ७३.

अर्थसत्वनिश्चयत्वमात्रेण तद्घटितप्रामाण्यनिश्चयत्वोपपत्तौ स्वातन्त्र्यस्यनपेक्षितत्वाच्च । स्वातन्त्रादप्यनाशङ्कितदोषान्यद्वारा ग्राहकस्य ।
'ऋषिभिर्बहुधागीतं छन्दोभिर्विविधैः पृथक् । तदेतदृचाभ्युक्तम् '।
इत्यादिवत्संवादेनाधिक्याच्च । एवंसत्यनुव्यवसायस्य धर्म्यंशेपि प्रामाण्यनिश्चरूपत्वाभावापातेन तत्रापि कदाचित्संदेहापाताच्च ।

गेहे घटप्रमेत्यादिशब्दस्थले प्रमात्वेन ज्ञानमानस्यापि स्वातन्त्र्येणोपनायकत्त्वाङ्गीकारेण व्यभिचाराच्च । गृहीतप्रामाण्यकज्ञीनसमानविषयकज्ञानानुव्यवसायस्थले १ प्रमात्वेन ज्ञायमास्यापि ज्ञानस्य स्वातन्त्र्येणोपनायकत्वाच्च ।
ननु विषयसत्तानियतसत्ताकज्ञानवृत्तिधर्माविशेषणत्वे सति ज्ञानविशेषणतया भानमेवास्वातन्त्र्यम् । तदभाव एव स्वातन्त्र्यमिति घटप्रमावानहमित्यादौ तथा भानेपि घटज्ञानवानहमित्यादौ न स्वातन्त्र्येण भानम् । तत्र शद्धज्ञानविशेषणतयैव भानात् । अनुव्यवसायमात्रस्य प्रामाण्यविषयक २ त्त्वविवादादित्यत आह । अर्थसत्वेति ।। ननु स्वातन्त्र्येणा ३ भाने कथमनुव्यवसायस्य प्रामाण्यसंशयादिविरोधिता । कथं वा निष्कम्पप्रवृत्तिहेतुतेत्यत आह ।। स्वातन्त्रादपीति ।। अनाशङ्कितदोषेति बहुव्रीहिः । तद्रूपान्यद्वारेणेत्यर्थः । त्रयोतशे गीतायां क्षेत्रक्षेत्रज्ञस्वरूपं ऋषिभिर्बहुधा गीतमित्यनाशङ्कितदोषऋषिगानछन्दोरूपद्वारेणार्थग्राहकस्य कृष्णवाक्यस्याधक्यं तथा निर्दोषऋषग्द्वारेणार्थग्रहकस्य

छन्दोग्याद्युपनिषद्वाक्यस्य यथाधिक्यं तथेत्यर्थःठ । स्वातन्त्र्यस्यानपेक्षितत्वादित्यत्र
विपक्षे बाधकं चाह -- एवंसतीति।। अर्थसत्वनिश्चयमात्रेणैव संशयादिविरोधितारूपप्रामाण्यनिश्चयत्वोपपत्तावपि स्वातन्त्र्याभावेन तदभाव इत्यर्थः ।

१. प्रमात्वेनेति नास्ति - मु. २. त्वे -मु. ३. णभाने - मु .

स्व-अ-बा-द्धारः) प्रामाण्यवादः पु - ७४.

---------- ---------- ----------

ननु धर्मिणस्सदेकरूपत्वात्तत्रासं १ शय इति चेत् । कोर्थः किं साधारणधर्मज्ञानं नास्तीति किं वा विशेषदर्शनमस्तीति ? नाद्यः । प्रतीतिविषयत्वस्य सदसत्साधारण्यात् । अन्त्ये धर्मित्वस्य सदेकनिष्ठत्वेन विशेषत्वेपि तस्य सत्वानिश्चये कथं संशयविरोधिता ।

यद्वा स्वातन्त्र्याभावेऽर्थसत्व निश्चयरूपतैव न युक्तेत्यत आह -- एवंसतीति ।। सव्यवधानत्वमात्रेण २ सत्वानिश्चायकत्व इत्यर्थः । धर्म्यंशे रजतादिरूपेदमंश इत्यर्थः ।
धर्मंशेपि संशयानुत्पादो नार्थसत्वघटितप्रामाण्यविश्चयरूपत्वेन 'इदंत्वरजतत्ववैशिष्ट्यम् पुरोवर्तिनो नानुव्यवसायवेद्य 'मिति मण्युक्तेः । 'स्वातन्त्र्येण इति शेष 'इति पक्षधरोक्तेः । किंत्वन्यथैवेति शङ्कते -- नन्विति ।। सदेकेति ।। पुरतः सन्नेव धर्मी नत्वसन्निति धर्मिणः सत्वाव्यभिचारान्न तत्र संदेहो न तु तदंशे प्रामाण्यनिश्चयत्वसत्वेनेत्यर्थः-- सदसदिति ।। पुरतो सदित्यर्थः । मन्मते त्वसन्मात्रेत्यर्थः-- विशेषत्वेपीति ।। तथाच तद्धर्शनमात्रं न विशेषदर्शनं किं तु तद्वैशिष्ट्यसत्वदर्शनमेवेति

तस्य च तत्राभावे कथं तत्र न संशयः स्यादिति भावः -- तस्येति ।। धर्मित्ववैशिष्ट्यस्येत्यर्थः ।
तथा च धर्मित्वरूपेदंत्ववैशिष्ट्यांशेऽनुव्यवसायस्य तत्सत्तानिश्चयत्वरूपप्रामाण्यनिश्चयत्वाभावे धर्म्यंशेति संशयः स्यादेवेति भावः।

१. संदेह - च क ग. २. णार्थ - अ. मु.

स्व-अ-बा-द्धारः) प्रामाण्यवादः पु - ७५.
---------- ---------- ---------
न हि संदिग्धसत्ताकः करादिः पुरुषत्वसंशयविरोधी ।
अपिचैवं त्वदीये अयं वह्न्यनुभवः प्रमानाप्रमा वा दाह १ समर्थविशेष्यकत्वे सति

सत्वानिश्चयेपि संशयनिवृत्तिरस्त्विवत्यत आह -- न हीति ।। संदिग्धसत्ताकः ।। अनिश्चितसत्ताक इत्यर्थः । यद्वा तत्सत्वानिर्णये तत्सत्वेपि संदेहः स्यात् । ततश्च धर्मिसंदेह इति भावेनायं ग्रन्थो योज्यः ।
एवमिदंत्त्ववैशिष्ट्यवैशिष्ट्यांशे तत्सत्तानिश्चयत्वरूपं प्रामाण्यनिश्चयत्वमनुव्यवसायस्य धर्म्यंशे स्वतः प्रामाण्यमुपपाद्य 'ननु व्यवसायस्येदंत्वरजतत्वविशिष्टेदंविषयकत्वेऽनुव्यवसाय एव मान 'मित्यादिना 'न स्वतः प्रामाण्यग्रहः'इत्यन्तेन मण्युक्तखण्डनं निस्येदानीं 'ननु वह्निज्ञानस्य दाहसमर्थविषयत्वं न दाहसमर्थोयमिति व्यवसायग्राह्य 'मित्यादिना शङ्कितस्य 'उच्यत'-- इत्यादिना यत्समाधानमुक्तं तत्समानन्यायेनान्यत्राप्यनुव्यवसायस्य स्वतः प्रामाण्यं व्यनक्ति। अपि

चैवमिति ।। सव्यवधानत्वमात्रेणार्थसत्वनिश्चरूपत्वाभाव इत्यर्थः ।। त्वदीय इति ।। प्रामाण्यानुमान इत्यन्वयः । मणिकृदुक्त इत्यर्थः । प्रचीनरूत्याह--प्रमेति ।। 'प्रथममप्रामाण्याभाव एव प्रामाण्यं व्यतिरेकिणा साध्यम् 'इति मणिकुदुक्तेराह--नाप्रमा वेति ।।

१. सामर्थ्यवद्वि - च. मु.

स्व-अ-बा-द्धारः) प्रामाण्यवादः पु - ७६.

वह्नित्वप्रकारक १ निश्चयत्वात् व्यतिरेकेणाप्रमावदिति प्रामाण्यानुमाने दाहसामर्थ्यवद्विशेष्यकत्वे सतीति विशेषणस्य केन सिद्धिः । तद्धि न तावद्दाहसमर्थोयमिति व्यवसायेन सिद्धम् । व्यवसायविषयतया २ विशेष्यस्य विशेष्य ३ त्वस्य तदविषयत्वात् । नाप्यनुव्यवसायेन । बहिर्थे दाहसामर्थ्ये मनसोऽसामर्थ्यात् ।
ननु स्मुत्युपनीते व्यवसाये स्मुत्युपनीतं यद्दाहसामर्थ्यं तद्वद्विशेष्यकत्वं मनसा परिच्छिद्यते ।

व्यवसायेति ।। विशेष्यस्य ४ व्यवसायविषयत्वाद्धेतोः विशेष्य ५ त्वस्य व्यवसायविषयत्वादित्यर्थः । क्वचिद्व्यवसायविषयताविशेषस्य विशेष्यत्वस्येति पाठः । तदा तु न क्लेशः । धर्मधर्मिवैशिष्ट्यानां व्यवासायविषयत्वेन धर्मे वैशिष्ट्ये चाविद्यमानो धर्मिमात्रनिष्ठो विषयत्व विशेष इत्यर्थः । 'व्यवसायतद्विषयतयोस्तदिषयत्वात् 'इति मणिवाक्यनिष्कृष्टार्थस्यायमनुवादः--बहिर्थ इति ।। दाहसामर्थ्यवैशिष्ट्यग्रहण एव वा वैशिष्ट्यग्रहणशक्तावपि स्वातन्त्र्येण तद्ग्रहणे वाऽसामर्थ्यादिति भावः ।

स्मृतीति ।। अयं वन्हिरिति व्यवसायविषयकानुव्यवसायजन्यस्मृत्युपनीतं यद्दाहसामर्थ्यवत्वं तद्वद्विशेष्यकत्वं वन्हिरित्यनुभावो दाहसामर्थ्यवद्विशेष्यको मम वृत्त इति मानसा परिच्छिद्यत इत्यर्थः ।

१. निश्चयपदं नास्ति - क ग. २. ताविशेषस्य - कुं छ क. ३. क - मु. ४. व्यवसायविषयतया - मु. ५. क - मु.

स्व-अ-बा-द्धारः) प्रामाण्यवादः पु - ७७.

---------- ---------- ----------

नचैवं स्मृत्युपनीते व्यवसाये स्मृत्युपनीतं यद्रजतत्वं तद्वद्विशेष्यकत्वमपि मनसा परिच्छिद्यताम् , तथा च प्रामाण्यस्य स्वतस्त्वं स्यादिति वाच्यम् । मन १ सैवं प्रामाण्यग्रहेपि प्रथमानुव्यवसायेनागृहीततया यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वस्य तज्ज्ञानविषयकज्ञानानपेक्षिज्ञान २ ग्राह्यत्वस्य चाभावेन परतस्त्वाहानेरिति चेत् हन्तैवं पाश्चात्यस्मृत्युपनीते दाहसामर्थ्ये मानसज्ञानमिव प्राथमिकव्यवसायोपनीते रजतत्ववैशिष्ट्येऽनुव्यवसाय एव सत्तानिश्चयरूपोस्तु ।

तुल्यन्यायत्त्वात्प्रामाण्यांशेप्याशङ्क्येष्टापत्या निराह -- न चैवमिति ।। दाहसामर्थ्यवद्विशेष्यकत्वग्रह इत्यर्थः । इदं रजतमिति व्यवसायविषयकानुव्यवासायस्य च तादृशज्ञानसापेक्षत्वादिति भावः । हंतेति हर्षे । पाश्चात्या वा स्मृतिः तदुपनीत
इत्यर्थः--पाश्चात्येति प्राथमिकेति ४ हेतुगर्भम् --दाहसामर्थ्ये ।। दाहसामर्थ्यवत्व इत्यर्थः--मानसज्ञानमिवेति ।। अनुव्यवसाय इवेत्यर्थः । पारतन्त्र्येण तद्विषयतोपगमादिष्टापत्तिनिरासायाह --सत्तानिश्चयेति ।।----
---

---

१. साचैवं - छ-क. २. विषयत्व - छ-जन्यत्वस्य- क. ३.।। प्रथमेति ।। रजतमहं जानामीत्याद्यनुव्यवसायेनेत्यर्थः--मु. ४. च-मु.

अविशेषात् । त्वत्पक्षे व्यवसायस्य यथार्थत्वेन स्मृतितोऽविशेषाच्च । अनुमितौ प्रामाण्यनियतस्य धूमवति वह्निमत्वज्ञानस्यानुव्यवसायेन गृहीतत्वान्न तत्रापामाण्यशङ्केति वदता त्वया
लिङ्गोपहितलैङ्गिकविषयतयानुमितिरूपव्यवसायोपनीते
धूमवत्वेऽनुव्यवसायस्य सत्तानिश्चयरूपत्वाङ्गीकाराच्च ।

नन्विन्द्रियस्यायं स्वभावो यदुवनीतमुपनीतान्तरवृत्तित्वेनैव गृह्णातिति चेन्न । सुरभिचन्दनमिति चाक्षुषज्ञानानुपपत्तेः । मनसस्तथा स्वभाव इत्यस्यापि मानाभावेनायुक्तत्वात् । संशयानुपपत्तेरेव मनसस्तादृशस्वभावकल्पकेति चेन्न । तस्या १ अन्यथोपपादयिष्यमाणत्वात् । निमीलितनेत्रस्यापि 'अहं गौरः'इत्यादिप्रत्ययानापत्तेश्चेति भावेनाह -- अविशेषादिति ।। वैपरीत्यमेवोचितमित्याह -- त्वत्पक्ष इति ।। व्यवसायस्येति ।। अनाशङ्कितदोषत्वात् ग्रह्यप्रामाण्याश्रयव्यवसायस्येति भावः ।
ननूपनीतं तद्वत्वं उपनीतवृत्तित्वेन गृह्यत इति कल्प्यत इत्यतोऽयमपि नियमो नेत्याह--अनुमितावविति ।। अनुमितौ कदापि प्रामाण्यसंदेहाभावेन तत्र प्रामाण्यं स्वत इति प्राचीनमतं दृषयता सर्वत्र परतस्त्ववादिना मणिकृदानुमितौ प्रामाण्यशङ्काभावो न प्रामाण्यनिश्चयनिबन्धनोऽपितु तत्प्रामाण्यव्याप्यस्य धूमवद्विशेष्यकत्वे सति वह्निप्रकारकज्ञानत्वस्य यज्ज्ञानं तन्निमित्तक एवेति वदता त्वयेत्यर्थः । तदभियुक्तव्याख्यानानुरोधेनाह ।। लिङ्गोपहितेत्यादि ।।

परामर्शोपनीतव्याप्युक्तव्यापकविषयकविषयकधूमवत्पर्वतोऽग्निमानित्येवंरूपेत्यर्थः ।

१. प्य - मु.

स्व-अ-बा-द्धारः) प्रामाण्यवादः पु - ७९.

न च दाहसामर्थ्ये संस्कार एव प्रत्यासत्तिः । स च निर्विषयक इति न तद्विषयतया भनम् । इह तु प्रत्यासत्ती १ भूतो व्यवसायः सविषयक इति वैषम्यमिति वाच्यम् । संस्करे सत्यप्यस्मृतिदशामुक्तमानसज्ञानाभावात् । ननु मानसज्ञानस्य दहसमर्थ एव मम वह्नत्वप्रकारकं ज्ञानं वृत्तिमित्याकारत्वेन तत्र दाहसामर्थ्यं वह्ननिष्ठमेव भाति ।

ननु पञ्चमानुव्यवसाये प्रत्यासत्तीभूतान्याविषयतयार्थस्य भानेन तस्यार्थसत्तानिश्चयरूपत्वेपि प्रथमानुव्यवसाये तदृशान्यविषयतया तद्वत्वरूपार्थस्य भानान्न तत्सत्तानिश्चयरूपत्वमतोऽविशेषादित्युक्तहेतुरसिद्ध इत्याशङ्क्य निराह -- न चेति ।। दाहसामर्थ्ये ।। दाहसामर्थ्यवत्त्व इत्यर्थः-- संस्कार एवेति ।। दाहसमर्थोयमिति प्राचीनव्यवसायजन्यसंस्कार एव न तु तज्जन्यस्मृतिरित्यर्थः ।

यद्यपि स्मृतेः प्रत्यासत्तित्वेपि तस्याः सुरभिचन्दनमित्यादौ सौरभादिज्ञानस्येव ताटस्थ्येनैव तथात्वन्नैतच्चोद्यावकाशः । तथापि सविषयकत्वात्संभावितत्वाभिप्रायेणेतच्चोद्यमपि शङ्को २ त्थानदाढ्यार्थं कृतमिति ध्येयम् ।

भानमिति ।। पञ्चमानुव्यवसाये दाहसामर्थ्यवत्वस्य संस्कारविषयतया न भानमित्यर्थः-- इहत्विति ।। प्रथमानुव्यवसाय इत्यर्थः ।

अस्मृतिदशायामिति ।। अत एव त्वयप 'प्रग्भवीयसंस्कारात्स्मृतं प्रामाण्यं वन्हिज्ञानादौ साध्यमान 'मित्याद्युक्तम् ।

१. त्तिरूपो - छ. २. अग्निमग्रन्थो - मु, मन्दाशङ्को - आ.

स्व- अ- बा- द्धारः) प्रामाण्यवादः पु - ८०.

न तु स्मृतिविषयतया । स्मृतिस्तु प्रत्यासत्तिमात्रम् । अनुव्यवसायस्य तु पुरोवृत्तिविशेष्यकं रजतत्ववैशिष्ट्यावगाहिज्ञानं वृत्तमित्याकारत्वेन ज्ञानविषयत्वेनैव वैशिष्ट्यं विषयः । न तु पुरोवृत्तिनिष्ठत्वेनेति वैषम्यमिति चेन्न । तत्रापि दाहसमर्थ एवेति विषयसप्तम्यातीतव्यवसायविषयत्वेनैव दाहसामर्थ्यस्य भानात् ।
अत्रापि सुख २ ज्ञानस्य दोषशङ्कादिरहितस्तम्भादिज्ञानस्य च प्राथमिक एवानुव्यवसाये मम सुख एव सुखत्वेन ज्ञानं वृत्तं स्तम्भ एव स्तम्भत्वेन ज्ञानं वृत्तमित्याकारदर्शनाच्च ।
ननु तथापि ३ तत्र यस्य व्यवसायस्य विषयतया दाहसामर्थ्यं भाति स न प्रत्यासत्तिः । यातु स्मृतिः प्रत्यासत्ति र्न तद्विषयतया तद्भाति इह तु ---

एतच्चोपलक्षणं यदसाधारणं कारणमासाद्य मनोबहिर्गौचरां प्रमां जनयति तन्मानान्तरमिति व्याप्तेः संस्कारस्य मानान्तरत्वापत्तेश्चेत्यपि ध्येयम् ।
स्मृतेः प्रत्यासत्तित्वेप्यविशेषादिति हेतुरसिद्ध इति भावेन शङ्कते -- नन्विति ।। तत्रापीति ।। पञ्चमानुव्यवसायेपीत्यर्थः--दाहसामर्थ्यस्य ।। दाहसामर्थ्यवत्वस्येत्यर्थः । तत्रापीत्यस्यैव विवरणं प्राथमिक एवानुव्यवसाय इति ।। प्रकारान्तरेण वैषम्यमाशङ्क्य निराकरोति ४ ।। ननु तथापीत्यादिना ।। तत्रेति ।। पञ्चमानुव्यवसाय इत्यर्थः । इहत्विति ।।

१. मम- च, मु. २. खादि--च,छ, मु. ३. यत्र- छ. ४. निराह- आ, मु.

वैशिष्ट्यं प्रत्यासत्तीभूतव्यवसायविषयतया भातीति चेन्न । अन्यविषयतया ग्रहणे श्रुतसाक्षिवाक्यसाम्येऽविशिष्टेऽस्य वैधर्म्यमात्रत्त्वात् । तस्मात्प्रामाण्यग्रहणे साक्षी समर्थ इति एतदप्युक्तं 'अन्यथे 'त्यादिना । साक्षी धर्म्यंश इव वैशिष्ट्यांशेपि सत्तानिश्चयरूपो न चेदस्य व्यवसायस्येदं वैशिष्ट्य विषय इत्यादिलोकसिद्धव्यवस्थित्ययोगादित्यर्थः ।।

स्वतस्त्वानुमानेषु बाधोद्धारः ।। ४ ।।

इहत्विति ।। प्राथमिकानुव्यवसाय इत्यर्थः । अविशिष्ट इति विभागः ।

स्वतस्त्वानुमानेषु बाधोद्धारः ।। ४ ।।

ननु तथापि स्वतस्त्वेऽनभ्यासदशायां संशयो न स्यात् । ज्ञानग्रहे प्रामाण्यात् ।

उक्तानुमानेषु प्रतिकूलतर्कपराहतिं मण्याद्युक्तामाशङ्कते -- नन्विति ।। तथापीति ।। प्रबलबाधरूपदोषाभावेपीत्यर्थः -- प्रामाण्यग्रहादिति ।। अन्यथा स्वतस्त्वभङ्ङापत्तेरिति भावः--अग्रहे चेति ।। ज्ञानस्येत्यनुषङ्गः । यथा हि त्वन्मते जातिव्यक्त्योरेकवित्तिवाद्यत्वनियमेपि दोषवशादिदं रूप्यमितिभ्रम १ स्थले शुक्तित्वहयग्रहः तथा मन्मतेपि ज्ञानप्रामाण्ययोरेकवित्तिवेद्यत्वनियमेपि संशयस्थले ज्ञानग्रहे सत्यपि तेन तत्पामाण्याग्रहेपि न स्वतस्त्वभङ्गः ।

१. भ्रमपदं न -कुं.

अग्रहेच धर्मिज्ञानाभावादिति चेन्न १ । असति प्रतिबन्धेसाक्षिवेद्यत्वनियमो वा साक्षिवेद्यत्वयोग्यता वा स्वतस्त्वमित्यु २ क्तम् । अप्रामाण्यसंशयस्थले च प्रामाण्यग्रहणशक्तिप्रतिबन्धकाऽप्रामाण्य ३ ग्रहणसामग्रीसमवहितैव । अन्यथाऽप्रामाण्यासंशयोगात् । एवं च ज्ञानं गृह्णता साक्षिणा शक्तिप्रतिबन्धात्प्रामाण्याग्रहणेप्यस्मदुक्तस्वतस्त्वाहान्या स्वतस्त्वपक्षेपि धर्मिज्ञानस्य प्रामाण्यनिश्चयस्य च संभवेन संशयो युक्त एव ।

अस्माभरुक्तस्वतस्त्वस्य तत्रापि सत्वादिति भावेन 'धर्म्युपलब्धावपि व्याघातादिदर्शनेन साक्षिणि प्रतिबद्धे प्रामाण्यविषये मनसि संशयोपपत्तेः'इति तत्वनिर्णयटीकां विवृण्वानः समाधत्ते--असति प्रतिबन्ध इति ।। प्रामाण्यविरोध्युपस्थापकसामग्र्यसमवधाने सतीत्यर्थः । अत्र सर्वत्र साक्षी पागुक्तरूप ४ एव ज्ञेयः--ग्रहणेति ।। निश्चयेत्यर्थः--अन्यथेति ।। उक्तरूपसामग्र्यभाव इत्यर्थः । अस्तु सामग्री ततः किमित्यत आह--एवं चेति ।।
प्रामाण्यविरोध्युपस्थापकसामग्रीसमवधानेसतीत्यर्थः -- धर्मिज्ञानस्येति ।। व्यवसायरूपस्य संशये धर्मिणो यज्ज्ञानं तस्येत्यर्थः -- संशयो युक्त एवेति ।। मानसोऽयं बोध्यः । न तु साक्षिरूपः तस्य सुदृढनिर्णयरूपत्वात् ।

१. त् - कुं २. तिह्यु - छ-क. ३. ग्राहक -छ. ४. रूपपदं नास्ति - आ.

--- --- ---

न हि ज्ञानत्वप्रमात्वगग्रहण १ शक्त्योरेकप्रतिबन्धकप्रतिबध्यत्वमपि स्वतस्त्वान्तर्गतम् ।।

तद्ग्रहणशक्त्योर्भिन्नत्वेपि ज्ञानत्वग्रहणशक्तिवत्प्रामाण्यग्रहणशक्तिः सहजा । न त्व प्रामाण्यग्रहणशक्त २ रिवाहितेत्येतावतैव प्रामाण्यस्य स्वतस्त्वात् । दृश्यते च वह्नौ दहप्रकाशनशक्त्योः सजत्वेपि प्रतिबन्धकभेदः ।।

अस्तु वा ३ तयोरेकैव ग्रहणशक्तिस्तथापि तस्या --

अस्मादुक्त स्वतस्त्वाहान्येत्युक्तं व्यनक्ति -- न हीति ।। असति प्रतिबन्धके ज्ञानगोचरसाक्षिवेद्यत्वनैयत्यमित्यस्य प्रतिबन्धे सति साक्षिणा ज्ञानं प्रामाण्यं चोभयं न गृह्यत इति यद्यर्थस्तदा परं स्वतस्त्वहानिः । नह्येवं विवक्ष्यत इति भावः ।

ननु ज्ञानत्वप्रमात्वग्रहणशक्त्योरैक्योपगमेऽन्यत ४ राग्रहणे द्वयोरप्य ५ ग्रहणमवर्जनीयम् । भेदे तु स्वतस्त्वहानिरेव । ज्ञानग्रहणशक्त्यतिरिक्तशक्तिग्राह्यत्वात् । अन्यथाऽप्रामाण्यस्यापि स्वतस्त्वापत्तिरित्यतो 'मानस्यादोषशङ्कया प्रामाण्यग्रहणशक्तिः प्रतिबद्धा'इति प्रकृतिनयसुधावाक्येन भेदपक्षस्य 'करणानां ६ ५ानजननशक्त्यैव तद्याथार्थ्यजनकत्वं स्वतस्त्व 'मित्यादिजिज्ञासानयसुधावा ७ क्येनाभेदस्य चप्रतीतेर्भेदाभेदरूपपक्षद्वयेपि समाधिमाह -- तद्ग्रहणेति ।। न त्वप्रामाण्यग्रहणशक्तिरिति ।। सहजेत्यनुकर्षः । किं तु दोषाहितेत्यर्थः ।।

१. योरेक - ख. २. रित्ये- कुं छ क-ग. ३.यद्वा -कुं ४. र -कुं. ५. र - कुं.

६. च -मु. ७. वाक्यादिना - आ अ.

स्व- सं- दनं) प्रामाण्यवादः पु - ७४.

एनं मा दहेत्यादौ दाहशक्तेरिव विषयभेदेन प्रतिबन्धाप्रतिबन्धौ युक्तौ ।
नचैवं प्रतिबन्धकाभावरूपस्याधिकस्य हेतोरनुप्रवेशात्सिद्धसाधनम् ।
न्यायमतेऽप्रतिबद्धेनाप्यनुव्यवसायेन प्रामाण्या १ ग्रहणात् ।
नाप्यपसिद्धान्तः । 'अप्रामाण्यग्रहणकारणाभावस्यापि प्रामाण्यग्रहणोपयोगाङ्गीकारेपि न कदाचिदास्माकं हानिः 'इति टीकोक्तेः । 'प्रतिबन्धकाभावो न हेतुः 'इत्युत्पत्तिस्वतस्त्व २ वादे वक्ष्यमाणत्वाच्च ।

मादहेपीति ।. 'अमानोना प्रतिषेध'इति निषेधार्थकमाशब्दोऽयम् । न माङ् ।
तेन 'माङि लु'ङित्युक्तलुङभावः साधु -- टीकोक्तेरिति ।। तत्वनिर्णयटीकोक्तेरर्थतोऽनुवादोयम् ।
ननु तत्र 'न प्रकृते काचिदस्माकं हानिः 'इति हि पाठः । तथा च प्रकृते वेदोपौरुषेयत्वे काचिद्धानिर्नेत्यभ्युपगमवादेनाप्युपपन्नासा टीकोक्तिः । एवं च ज्ञानग्रहहेत्वतिरिक्तहेतुसापेक्षग्राह्यत्वे कथं न प्रामाण्यस्य स्वतस्त्वहानिरित्यतस्तत्वनिर्णयटीकास्थं 'न हि दाहाभाव एव वेत्रबीजं वेत्राङ्कुरं जनयतीत्येतावता दाहाभावो वेत्राङ्कुरस्य कारणं भवति । किं तु ततो विपरीतकार्यानुत्पादे सति वेत्रबीजं स्वमाहिम्नैवाङ्कुरं करोति । अन्यथोत्सर्गापवादौ क्वापि न स्यातां 'इति पूर्ववाक्यं हृदि कुत्वाह -- प्रतिबन्धकेति ।

स्व- सं-दनं) प्रामाण्यवादः पु - ८५.

यत्र पूर्वं दोषशङ्कादेरभावेपि कारणान्तरोपनिपातात्पश्चात्तत्संशयस्तत्र पूर्वं प्रामाण्यं निश्चीयत एव । तदा प्रतिबन्धकाभावात् ।

एवं प्रतिबन्धकेन प्रामाण्यनिश्चमुपेत्य संशयमुपपाद्य क्वचित् प्रामाण्यनिश्चयमुपेत्यापि संशयमुपपादयति-- यत्रेति ।। यद्वा अस्त्वेवं प्रामाण्यविरोध्युपस्थापकसामग्रीसमवधानस्थले प्रामाण्यनिश्चयेपि विविक्षितस्वतस्त्वाहान्या संशचोपपत्तिः । तत्सामग्रीसमवधानात्प्राक्काले तु कथम् । तत्र प्रामाण्यानिश्चये स्वतस्त्वाहानेः । यज्ज्ञानं यत्र प्रतबन्धकं तत्सामग्र्यपि तत्र प्रतिबन्धकेत्यस्याभावात् । प्रामाण्यनिश्चये १ वोदीरितसन्देहो न स्यादित्यत आह --यत्रेति ।। निश्चीयत एवेति ।। मनसेति भावः । न तु साक्षिणा दृढनिर्णयत्वात् ।
सुदृढो निर्णयो यत्र ज्ञेयं तत्साक्षिदर्शनं इति ।
मानसे दर्शने दोषा नैव स्युः साक्षिदर्शने ।।
यत्क्वचिद्व्यभिचारिस्याद्दर्शनं मानसं हि तत् ।
इति च ज्ञानपादीयानुव्याख्यानोक्तेरिति ज्ञेयम् ।
एतेन यदुक्तं मणौ 'निश्चितेपि प्रामाण्ये दोषान्तरात्तत्र संशयः इति चेन्न ।। प्रवृत्तिप्रसङ्गात्' इति तन्निरस्तम् । प्रामण्यनिश्चयकालेऽप्रतिबन्धादिष्टापत्तेः । पश्चात्तु तस्य नाशात्प्रतिबन्धाच्चाप्रवृत्युपपत्तेः ।
एतेन प्रामाण्यनिश्चये जाग्रति कथं सन्देह इति निरस्तम् । उत्तरकाले तस्य नाशात् । प्रामाण्यनिश्चये प्रामाण्यसन्देहात्संशयोपपत्तेश्च ।
यत्तु 'न च प्रामाण्यसंशयाद्विषयसंशयवत्प्रामाण्यज्ञाने प्रामाण्यसंशयात् प्रामाण्य संशय इति वाच्यम् । प्रामाण्यज्ञानेपि
स्वतः प्रामाण्यग्रहे संशयानुपपत्तेः 'इति मणिवचनं तदप्यतेनैव निरस्तं बोध्यम् । दोषोपनिपातस्थले मानसप्रामाण्यनिश्चये दोषवशेन प्रामाण्यानिश्चये तत्संशयोपपत्तेरिति ।।

१. चोदीचीन - मु. आ. अ.

स्व-सं-दनं) प्रामाण्यवादः पु - ८६.

---------- ----------- -------

केचित्तु धर्मिज्ञानस्य संशयाहेतुत्वात्संशयरूप एवानुव्यवसाय उत्पद्यते । धर्मिज्ञानस्याहेतुत्वेपि संशये धर्मिनियमो धर्मिज्ञानजनकनियमादेव युक्तः ।

एवं वास्तवं मूलग्रन्थाद्युक्तं संशयोपपादानं प्रदर्श्याधुना यदुक्तं मणौ 'धर्मिज्ञानं च संशयहेतुः । अन्यथा धर्मिनियमः
कोट्युक्तटत्वं च न स्यात्'इति ग्रन्थेन धर्मिज्ञानाभावेन संशयाभावोपपादनदूषणं तदपि नेति भावेन प्रौढ्या समाधिद्वयमन्यापदेशेनाह -- केचित्वित्यादिना अहेतुत्वादिति ।।
विशेष्येन्द्रियसन्निकर्षकोटिस्मृतिरूपविशषणज्ञानतदुभयासंसर्गाग्रहादिविशिष टज्ञान सामान्यसामग्रीत एव तदुत्पत्तौ तदतिरिक्ता संशये धर्मिज्ञानारूपा विशेषसामग्री न कल्प्या । तथाच संशयस्थले धर्मिणो व्यवसायस्यैवाज्ञानेन प्रामाण्यनिश्चोपपत्या स्वतस्त्वाहीनिः प्रामाण्यादिसंशयश्च युक्त इति भावः ।
ननु तुरगादौवेगेन गच्छतः पुंसोऽनेकवृक्षेन्द्रियसन्निकर्षेपि क्वचिदेव पनसत्वादिसंदेहो न सर्वत्रेत्येवंविधो धर्मिनियम एव संशये धर्मिज्ञानहेतुतां व्यवस्थापयतीत्यत आह -- धर्मिज्ञानस्याहेतुत्वेपीति ।। धर्मिज्ञानजरकेति ।। त्वयापि हि सर्वत्र सन्निकर्षेऽविशिष्टेपि क्वचिदेव धर्मिज्ञानं नान्यत्रेत्यत्र विषयमाहात्म्यादिकं नियामकं वाच्यम् । तदेव संशये नियामकमस्तु । तद्धेतोरेवास्तु हेतुत्वं मध्ये किं तेनेति न्यायात् । तेषामननुगतत्वेपि धर्मिज्ञानहेतुत्वेनानुगमसंभवादिति भावः ।

---------- ---------- ----------

कोट्युक्तटत्वे तु कोटेर्धर्म्यसंस्पृष्टत्वेनाज्ञातोर्ध्वत्वादिसाधारणधर्मेण भूयस्साहचर्यदर्शनमेव हेतुः । न तु संशयधर्मिनिष्ठत्वेन ज्ञातसाधारणधर्मेण भूयस्साहचर्यदर्शनम् । गौरवात् । ऊर्ध्वतादिसाधारणधर्मज्ञानं त्वनियतादृष्टादिहेतुजन्यस्मतिरूपमित्याहुः ।

यत्तु
'धर्मिज्ञानसामग्रीत्वेन हेतुत्वे लाघवाद्धर्मिज्ञानत्वेनैव हेतुत्वमस्तु 'इति शरोमणिवचनम् । तन्न ।
क्लृप्तसामग्र्यैवोपपत्तावपूर्वधर्मिज्ञानहेतुताकल्पनस्य गुरुत्वात् ।
ननु धर्मिज्ञानस्याहेतुत्वे संशये कोट्युक्तटत्वं न स्यात् । तस्याव्याप्यवृत्तितया जातित्वायोगेन संशयधर्मिणि संशयकोटिसहचरितानेकधर्मोपलम्भरूपस्य वा संशयधर्मिवृत्तितया गृह्यमाणधर्मेण सह कोटिर्भूयस्सहचारोपलम्भरूपस्य वा कोट्यक्तत्वस्य वाच्यतया तादृशस्य धर्मिज्ञानाहेतुत्वेऽनुपपत्तेरित्यत आह -- कोट्युक्तटत्वे त्विति ।। दर्शमेव हेतुरित्यन्वयः -- धर्म्यसंशयस्पृष्टत्वेन ।। धर्म्यसंबद्धत्वेनेत्यर्थः । ननु साधारणधर्मदर्शनस्य संशयहेतुत्वाद्धर्मज्ञानार्थं धर्मिज्ञानमावश्यकमित्यत आह -- ऊर्ध्वतादिसाधारणेति ।।
केचिदित्युक्तास्वारस्यबीजं तु व्यवसायरूपसंशयधर्मिणः सुखादिवत् ज्ञातैकसत्वेन कोटिस्मृतेः पूर्वं तस्य साक्षिणा ग्रहणे प्रतिबन्धाभावाद्धर्मिज्ञानमावश्यकमित्यस्मदुक्तदिशैव संशयोपपादनं साधु । न तु धर्मिज्ञानानभ्युपगमेनेति ज्ञेयम् । अत एव 'ज्ञानमवश्यवेद्य 'मिति वक्ष्यति । अन्यत्तु गुरुटीकायाम् ।

--- --- ---

इतरे तु अन्यत्र विपर्यये धर्मिज्ञानस्य हेतुत्वेपि वर्तमानव्यवसायधर्मिकेऽव्यवसायरूपेऽप्रमायां प्रमात्वविपर्यये तस्याहेतुत्ववदन्यत्र संशये धर्मज्ञानस्य हुत्वेपि प्रामाण्यसंशये तस्याहेतुत्वं युक्तम् । न च प्रगारोप्यस्य प्रामाण्यस्यानुपस्थिते र्न तदरोप इति वाच्यम् । स्वतस्त्वपक्षे प्रमायां प्रामाण्यप्रतिमितेरिव भ्रमे प्रामाण्यापोपस्यापि तदनपेक्षत्वादित्याहुः ।।

अन्यत्रेति ।। शुक्तिरूप्यादिविषयक इत्यर्थः । शुक्त्यादावेव रजतत्वाद्यारोपो नान्यत्रेत्येतन्नियामकतया रूप्यादिनिष्ठचाकचक्यादिमत्तया शुक्त्यादिज्ञानस्य तदारोपहेतुत्वमावश्यकमिति भावः -- वर्तमानेत्यादि ।। यथा हि घटादिप्रमायां तदनुव्यवसायेन व्यवसायोपनीततद्वत्त्वादिघटिकप्रामाण्यग्रहः, तथा शुक्तिरूप्याद्यप्रमायामपि तदनुव्यवसयेन तदुपनीततद्वत्त्वादिघटितप्रामाण्यं धर्मिज्ञानं विनैव तदुत्तरक्षण एव परिच्छिद्यत इत्युपेतं तद्वदित्यर्थः । प्रामाण्यानुपस्थितेः कथं तदारोप इत्याशङ्क्य निराह -- न चेत्यादिना ।। अत एव पूर्वपक्षे मणिकृताप्युक्तम् 'अप्रमापि प्रमेत्येव गृह्यते ' इत्यादीति भावः ।
अत्रारुचिबीजं तु ज्ञानग्रहस्य साक्षित्वात्प्रामाण्यसन्देहस्य मानसत्वात् ज्ञानग्रहेण च प्रामाण्यचग्रहेण
स्वतस्त्वभङ्गापत्तिनिरासाय प्रगुक्तरीतेरेवानुसर्तव्यत्वादिति ज्ञेयम् ।
धर्मिज्ञानहेतुत्वं तेन प्रामाण्यनिश्चयं चोपेत्य संशयोपपादनं प्रकारान्तरेण दर्शयति -- अन्योत्विति ।।

--- --- ---

अन्ये तु संशयस्थलेप्युक्तरीत्या सामग्रीसत्वेनादावेवानुव्यवसायेन प्रामाण्यनिश्चयेप्यनुव्यवसायनाशान्तरं स्मृत्युपनीते व्यवसाये तत्संशयोयुक्त एव । नह्यनुव्यवसायकाल एव संशयो न तु तदव्यवहितोत्तरकाल इति योगादिसंपत्ति विना ज्ञातुं शक्यम् । परमतेपि न प्रामाण्यसंशयकाले व्यवसायोस्ति । धर्मिज्ञानानन्तरभाविकोटिस्मरणकाल एव व्यवसायनाशादित्याहुः ।

उक्तेति ।। बाधोद्धारग्रन्थोक्तरीत्येत्यर्थः । तदा व्यवसायस्यापि धर्मिणो नाशान्न संशय इत्यत आह -- स्मुतीति ।। अनुव्यवसायाहित संस्कारजन्यस्मृत्युपनीत इत्यर्थः।ननूपनीतस्य कथं संशये विशेष्यतया भावमित्यत आह -- परमतेपीति।।
अत्रापि कल्पे संशया १ दिस्थले ज्ञानग्रहस्य साक्षित्वात्प्रामाण्यग्रहस्य च मानसत्वान्मानसप्रामाण्यनिश्चयस्य नाशेपि ज्ञान २ ग्रहसाक्षणा ३ औत्तरीकानुस्मृतिसिद्धसौषुप्तिकात्मस्वरूपानुभवरूपस्य सदा सत्वेन तेन प्रामाण्याग्रहेण ज्ञानग्रहेण प्रामाण्यग्रहणमुपेत्य तन्नाशेन संशयोपपादनस्याशक्यतया तदुपपादनस्य प्रागुक्तदिशैव कार्यत्वात्किमनेन प्रकारेण । न च ज्ञानज्ञानं मानसम् । तथात्वे कदाचित्तज्ज्ञानत्वे संशयाद्यापातात् । उक्तं हि ज्ञानपादे ।
'इच्छा ज्ञानं सुखं दुःखं भयाभयकृपादयः ।
साक्षिसिद्धा न कश्चिद्धि तत्र संशवान्क्वचित् '।।
इत्यरुचिबीजं ध्येयम् ।
सिद्धान्तानानुगुणस्याप्येतत्पक्षत्रयस्य तार्किकं प्रति दूषणतया --------

१. यस्थले - आ. २. ग्राहक - आ. ३. औत्पत्तिका - आ.

एतदप्युक्तं 'अन्यथे 'त्यादिना । प्रतिबन्धदशायां कार्याजननमात्रेण शक्तेः सहजत्वाभावे वह्न्भावे दाहादिशक्तेः सहजत्वमिति व्यवस्थित्यनुपपत्तेरित्यर्थः ।।
स्वतस्त्वे संशयोपपादनम् ।। ५ ।।

-- वक्तुं शक्तमिति भावेनात्रोपन्यास इति भावः -- एतदपीति ।। उक्तरीत्या संशयस्थले स्वतस्त्वेपपादनमपीत्यर्थः ।
स्वतस्त्वे संशयोपपादनम् ।। ५ ।।

न चाप्रयोजकाः स्वतस्त्वहेतवः । परतस्त्वे प्रामाण्यज्ञानस्यापि प्रामाण्यं संवादादिलिङ्गजन्यानुमितिरूपेणान्येन १ ज्ञानेन ग्राह्यम्, एवं तत्प्रामाण्यमप्यन्येनेति फलमुख्येकानवस्था ।

न चाप्रयोजका इति ।। हेतवः सन्तु स्वतोग्राह्यत्वरूपसाध्यं मास्त्विवत्यत्र विपक्षे बाधकस्य साध्यसाधनेऽनुकूलतर्कस्याभावादिति न चेत्यर्थः । पूर्वं २ क्वचिद्धेतावप्रयोजकत्वोद्धारस्य प्रातिस्विकरूपेण कृतत्वेपि सामान्यतोयमुद्धार इत्यदोषः । अत एव हेतव इत्युक्तिः । 'तत्प्रामाण्यस्याप्यन्येन
ग्रहणाङ्गीकरेऽनवस्थानात् 'इति टीकां विवृण्वानो मण्याद्युक्तिदिशैवान्वस्थाद्वयमाह-- परतस्त्व इति ।। ज्ञान ३ ग्राहकसाक्षिव्यतिरिक्तेन येन केनापि ग्राह्यत्व इत्यर्थः-- फलमुखीति ।। फलं प्रामाण्यज्ञानं मुखमुपस्थितिहेतुर्यस्याः सा फलमुखीत्यर्थः ।

१. ज्ञानेनेति न - ख. २. क्वचित्क्कचित् - मु. ३. ग्रहण - आ.

---------- ---------- ----------

एवं प्रामाण्यस्यानुमेयत्वे लिङ्गव्याप्त्यादिज्ञानप्रामाण्यानिश्चयेऽसिद्ध्यादिप्रसङ्गेन तन्निश्चयार्थं लिङ्गा १ द्यन्तरं, तज्ज्ञानप्रामाण्यनिश्चयश्च स्वीकार्यः, एवं तत्र तत्रापीति कारणमुख्यन्यपीत्यनवस्थाद्वयापपत्तेः ।।

न च यत्र दोषशङ्कादिरूपाकाङ्क्षा तत्रैव संवादापेक्षेति नानवस्थेति वाच्यम् ।

तथात्वे प्रतिबन्धनिरासार्थमेव संवादापेक्षा न तु प्रामाण्यग्रहार्थमिति मन्मतप्रवेशापत्तेः ।

कारणान्तरानव २ स्थोपलक्षणतयैकत्रानस्थानिर्धारणाय वा पराभ्युपगमानुरोधेन वानुमेयत्व इत्यापादकनिर्थारणोक्तिः । पूर्वं तु सामान्यमुपेत्य परतस्त्व इत्याद्येवोक्तम् । न तु विशिष्यते ध्येयम् -- कारणमुखीति ।। पूर्ववद्याख्येयम् । ज्ञानानां प्रामाण्यमनुमितिग्राह्यं अनुमितिप्रामाण्यं तु स्वत इति प्रचीनमते फलमुखानवस्थाभावात्कारणामुख्या अप्युक्तिरित्येके ।

अन्येतु तन्मते क्वापि स्वप्रकाशत्वाभावात्तत्राप्यनवस्थाऽस्त्येव । अत एव परतस्त्व इति सामान्योक्तिः । न त्वनुमेयत्व इति विशिष्येत्याहुः।

यत्र तु प्रामाण्यज्ञानेऽप्रामाण्यशङ्कया प्रामाण्यसंशयस्तत्र प्रामाण्यज्ञानप्रामाण्यनिश्चयादेव प्रामाण्यनिश्चय इत्यादिमण्युक्तमाशङ्कते-- न च यत्रेति ।। दोषेति ।। दुष्टकरणजन्यत्वादिशङ्कारूपेत्यर्थः । 'न चाकाङ्क्षायामेव प्रमाणान्तरापेक्षत्वादनवस्थाभाव 'इति तत्वनिर्णयानुकरणादाकाङ्क्षेत्युक्तिः -- उक्तंहीति ।।

१. ङ्गन्त - छ. २. स्थाद्यु - आ.

---------- ---------- ----------

उक्तं हि भगवत्पादैः 'आकाङ्क्षाया एव बुद्धिदोषात्मकत्वा 'दिति ।।
न चावश्यवेद्यत्वाभावान्नानवस्था । ज्ञानमवश्यवेद्यमिति वक्ष्यमाणत्वात् । कृष्यादौ सन्देहात्प्रवृत्तावपि बहुवित्तव्यवसायसाध्ये पारत्रिकफलगे १ यागादौ निष्कम्पप्रवृत्यर्थं प्रामाण्यस्याप्यवश्यवेद्यत्वात् ।।
ननु तत्राप्यर्थनिश्चय एव हेतुः । समानविषयत्वात् । आवश्यकत्वाच्च । न तु प्रामाण्यनिश्चय इति चेन्न ।

तत्वनिर्णये । आकाङ्क्षेति बुद्धिदोषइत्यप्रामाण्यशङ्केति चानर्थान्तरम् ।।
तत्वनिर्णयटीकोक्तरीत्या प्रकारान्तरेणानवस्थाभावमाशङ्क्य निराह -- न चेति।। ज्ञानस्येति शेषः -- अवश्यवेद्यमिति ।। एतेन चरमप्रामाण्यज्ञानस्य ज्ञानाभावेन कोचिस्मरणाभावेन विषयान्तरसञ्चारेण वा प्रामाण्यसंशयानिवश्यंभावान्नानवस्थेति
मण्याद्युक्तं निरस्तं ध्येयम् । नन्वस्तु ज्ञानस्यावश्यवेद्यतया ज्ञातत्वेन तत्प्रामाण्यानिश्चये तत्संशयोऽवर्जनीयः । तथापि कृष्यादाविव प्रवृत्तिरस्त्वित्यत आह -- कृष्यादाविति ।।
'यत्राप्रामाण्यसङ्का नास्ति करकलादिज्ञाने तत्र व्यवसाय एवार्थनिश्चयः तत एव निष्कम्पप्रवृत्तिः 'इत्यादिमण्याद्युक्तमाशङ्कते -- ननु तत्रापीति ।। पारलौकिकयागादावपीत्यर्थः -- आवश्यकत्वाच्चेति ।। प्रामाण्यनिश्चयप्रवर्तकत्वादिनाप्यर्थनिश्चयस्याभ्युपेयत्वादिति भावः ।।

१. के - ख.

पीतः शङ्खः इत्यादा १ वाकारान्तरार्थो १ ल्लेखाभावेन शङ्खः पीतत्वेनैव भातीत्यनुभवेन चैकाकारनियते संशयान्यज्ञानरूपे
निश्चये सत्यपि पीतार्थिनोऽप्रवृत्तिदर्शनात् ।
न चाप्रामाण्यज्ञान २ रूपसहकारिविरहादप्रवृत्तिरिति वाच्यम् । एवं तर्ह्यप्रामाण्यस्याप्यनुमेयत्वेन तदननुमितिदशायां पीतार्थिनः पृवृत्तिः स्यात् ।
किञ्चाप्रामाण्यज्ञानात्प्रवृत्तौ प्रामाण्यज्ञानान्निवृत्तिः स्यात् ।

किमिर्थनिश्चय एव प्रवर्तकः उत प्रामाण्यविरोधिज्ञानविरहसहकारिसहितः, अथ प्रामाण्यविरोधिज्ञानविरहो न सहकारी किं तु प्रवर्तकतावच्छेदकः, यद्वा १ ऽर्तनिश्चय एव प्रवर्तकः ३ अप्रामाण्यादिज्ञानं प्रतिबन्धकं प्रतिबन्धकान्तरसम्पादकं वा, इति विकल्पान् हृदि कृत्वाद्योव्यभिचारित्याह -- पीत इति ।। ४ शुक्लोवेत्याकारान्तरेत्यर्थः-- व्द्व्याकारार्थेति । ५ अकारान्तरेति क्वचित्पाठः ।।
द्वीतीयं शङ्कते -- न चाप्रामाण्यविरोधिनो निश्चयसंशयसाधारणज्ञानाभावरूपसहकारीत्यर्थः । इष्टापत्तिमाशङ्क्याह -- किञ्चेति ।। नन्वाप्रामाण्यज्ञानस्य प्रतिबन्धकत्वं सर्वसिद्धमित्यस्तु तद्विरहत्तत्र प्रवृत्तिः । प्रामाण्यज्ञानप्रवर्तकत्वमद्यापि न सिद्धमिति कथं तदभावान्नवृत्तिरापाद्यत इत्यस्तत्साधयति -- किंञ्चेति।।

१. दौ व्द्याकारार्थो - कुं - अनेकाकारार्थो- ख. २. रूपपदं न - ख. ३. एतावन्नास्ति - कुं. ४. वाकरोति । शुक्लेवेति वाशब्दरूपवाकारान्तरेत्यर्थः-- कुं. आ. ५. व्द्याकारार्थेति क्वचित्पाठः -- आ.

किञ्च तदभववति तत्प्रकारकत्वरूपाप्रामाण्यशङ्काद्यभावोऽनेकाभावघटितत्वाद्गुरुः । प्रामाण्यनिश्चयस्तु न तथेति लधुः । एवमप्रामाण्यशङ्काद्यभाववत्तद्वतित्प्रकारकज्ञानत्वरूपप्रामाण्यात्यन्ताभावश ाङ्काद्यभावः एवं तद्व्याप्यदोषजन्यत्वादिशङ्काद्यभावोपि हेतुरित्यभावा अनेके । प्रामाण्यनिश्चयत्वेकः । अभावानां प्रामाण्यविश्चयविरोध्यभावत्वेनैकत्वे त्वावश्यकत्वाल्लाघवाच्च प्रामाण्यनिश्चय एव सहकारी ।

न चाप्रामाण्याज्ञानमप्यावश्यकम् । प्रामाण्यनिश्चयस्याप्यप्रमात्वेन १ ज्ञानस्याप्रवर्तकत्वादिति वाच्यम् । मन्मते तस्यापि निश्चितप्रामाण्यकस्यैव प्रवर्तकत्वात् ।

न चाप्रामाण्यशङ्काभावः क्लृप्तः प्रामाण्यनिश्चयस्तु कल्प्य इति वाच्यम् । गृहीतप्रामाण्यज्ञानसमानविषयकज्ञानान्तरे निष्कम्पप्रवृत्त जनक २ ज्ञानत्वमात्रेण सामग्रीसत्वेन तत्क्लृप्तेरुक्तत्वात् ।

शङ्कादीत्यादिपदेन निश्चयग्रहः --- विरोध्यभावत्वेनेति ।। विरोधिनिश्चय ३ विषयाभावत्वेनेत्यर्थः ।।

तौल्यमाशङ्क्य निराह -- निचाप्रामाण्याज्ञानमपीति ।। मन्मत इति ।। अनवस्था तु निरसिष्यत इति भावः -- क्लृप्त इति ।। सर्वत्र सत्वादिति भावः-- ज्ञानान्तर इति ।। क्लृप्तेरुक्तत्वादित्यन्वयः ।

१. ज्ञाने तस्या - मु. २. ज्ञानमात्रे च - मु. ३. याभावत्वेनेत्यर्थः - आ.

---------- ---------- ----------

फलमुखगौरवस्य चादोषत्वात् । अन्याथानुमितौ व्याप्तिज्ञानं न हेतुः । किं तु सहचारदर्शनवतो व्यभियाराज्ञानम् । एवं पक्षे लिङ्गज्ञानं न हेतुः । किं तु पक्षज्ञानवतः पक्षे लिङ्गसंसर्ग्राग्रहः । एवं प्रवृत्तौ विशिष्टज्ञानं न हेतुः । किं तु भेदाग्रहः । एवमर्थेन्द्रियादिसबन्धेऽर्थाभावाज्ञानं प्रवर्तकम् न त्वर्थनिश्चयः । इत्याद्यतिप्रसङ्गः ।

१. एतेन उक्तरूपोर्थनिश्चय एव प्रवृत्तिहेतुः । अप्रमात्वेनाज्ञातत्वादीकं दण्डगतदाढ्यवत्कारणतावच्छेदकम् । तदभावात्पीतः शङ्ख २ इति ज्ञानान्न प्रवृत्तिरिति निरस्तम् । लाघवेन प्रसात्वेन ज्ञानतत्वस्यैव तदवच्छेदकत्वौचित्यात्।

बाधोद्धारग्रन्थ इत्यर्थः-- सामग्रीसत्वेनेति ।। प्रामाण्यनिश्चयसामग्रीसत्वेनेत्यर्थः। कल्प्यत्वमुपेत्याह -- फलमुखेति ।। कारणताकल्पनावसरेऽवच्छेदकगौरवेरिव प्रामाण्यनिश्चयकल्पनस्यानुपस्थितत्वात्पश्चात्तदुपस्थितावुपजीव्यविरोधेन गृहीतकारणत्वाबाधकत्वादिति भावः । विपक्षे बाधकं चाह -- अन्यथेति ।। एवं क्लृप्तत्वे गौरवस्यादौषत्वे च प्रामाण्यनिश्चयस्याप्रवर्तकत्वमुपेत्याप्रामाण्याज्ञानसहितार्थनिश्चयस्यैव प्रवर्तकत्व इत्यर्थः ।।

तृतीयकल्पं निराह -- एतेनेति ।। उक्तेति ।। अप्रामाण्यज्ञानशून्यार्थनिश्चय एवेत्यर्थः । एतेन ३ त्युक्तं व्यनक्ति -- लाघवेनेत्यादिना ।।

१.एतेवैवे - अ. २. शङ्खपदं नास्ति - कुं. ३. नैवे - अ.

---------- ---------- ---------

अन्यथा अनुमित्यादौ सहचारादिज्ञानमेव हेतुः व्यभिचारितत्वादिनाऽज्ञातत्वं कारणतावच्छेदकमिति स्यात् ।
एतेवैवार्थनिश्चय एव प्रवर्तकः । पीतः शङ्ख इत्यादौ त्वप्रामाण्यज्ञानं प्रवृत्त प्रतिबन्धकमिति निरस्तम् । निर्विशेषेणैव प्रतिबन्धकस्य मण्यादेस्त्वन्मते स्वाभावरूपकारणविघटनरूपतया प्रतिबन्धकत्वेपि मन्मते शक्तिविघटकत्वेन प्रतिबन्धकत्वेपि यथा जातिविशेषरहितस्य व्यभिचारादिज्ञानस्य
मदद्वयेप्यनुमित्यादिजनकीभूतव्याप्त्यादिज्ञानविघटकत्वेनैव तत्प्रवबन्धकता तथैवाप्रामाण्यज्ञानस्यापि प्रवृत्तिहेतुभूतज्ञानविघटकत्वेनैव प्रतिबन्धकतेति वक्तव्ये अर्थनिश्चयस्य पीतः शङ्ख इत्यादौ सत्वेन तद्विघटनासंभवात्तेन वि १ घटनीयस्य प्रामाण्य २ ज्ञानस्य हेतुत्वसिद्धेः ।

चतुर्थकल्पं निराह -- एतेनैवेति ।। अप्रामाण्यज्ञानं प्रामाण्यविरोधिज्ञानमित्यर्थः । एतेने ३ तुक्तं दुर्गमत्वाद्युद्व्यनक्त -- निर्विषयस्येत्यादिना ।। ५ जातिविशेषहीनस्य साक्षादविरोधिनो ज्ञानस्य प्रतिबन्धकत्वं तज्जनकज्ञानविघटकत्वेनैवेति व्याप्तेर्यथेत्यादिना विवक्षित ६ त्वान्मण्यादौ निर्विषये व्यभिचा ७ रो नेति भावेन निर्विषयस्येत्याद्युक्तिः ।।

१. त्तद्धि -मु. २. ण्यादि - छ ख. ३. एतेनैवेत्युक्तं -मु. ४. निर्विशेषस्येत्यादिना- मु. ५. वक्ष्यमाणव्याप्तौ - आ अ. ७. रनिरासाय - आ अ.

---------- ---------- -------

ज्ञानं हि ज्ञानान्तरस्य विषयद्वारैव विरोधीति स्वविषयविरुद्धविषयकमेव ज्ञानं विघटयति । अन्यथा व्यभिचारादिज्ञानमपि स्वाभावरूपहेतुविघटनतया अनुमित्यादिप्रतिबन्धकं वा सहचीरादिज्ञानगतशक्तिविघटकत्वेन प्रतबन्धकं वा स्यात् । न तु व्याप्त्यादिज्ञानविघटकत्वम् । बाधादिस्तु ग्राह्याभावविषयकत्वेन साक्षाद्विरोधित्वात्स्वत एवानुमितिप्रतिबन्धकः । ज्ञाननिष्ठप्रामाण्यविषयकज्ञानं तु घठविषकप्रवृत्तेर्न साक्षाद्विरोधि । किञ्चोक्तप्रकारेणाप्रामाण्यज्ञानवत्प्रामाण्यात्यन्ताभावादिज्ञानानामपि प्रतिबन्धकत्वादभावकूटस्य कारणता कल्प्येत्यतिगौरवम् ।

ननु ज्ञानमपि मण्यादिवद्बाधप्रतिपक्षवच्च कारणीभूतस्वाभावविघटनरूपतयैवास्तु प्रतिबन्धकं किं कारणीभूतज्ञानविघटकतयेत्य आह -- ज्ञानं हीति ।। स्वमतावष्टम्भेनाह -- शक्तविघटकत्वेनेति ।। बाध १ वैषम्यमाह -- बाधादिस्त्विति ।। अस्तु ज्ञानं हीत्यादिनोक्तमप्रामाण्यज्ञानं तु बाधादिवत्स्यादीत्यत आह -- ज्ञाननिष्ठेति ।। अप्रामाण्येति ।। प्रामाण्यविरोधीत्यर्थः । किं तु प्रामाण्यनिश्चयस्यैवेति २ तद्घटकतयैव प्रतिबन्धकमिति प्रामाण्यज्ञानस्य हेतुत्वसिद्धिः । तद्वत्वाभावस्य प्रवृत्तिविषयाभवत्वेपि न तन्मात्रप्रामाण्यमिति भावः ।।

जनकज्ञानविघटकत्वमनुपेत्य बाधवत्प्रवृत्तो स्वकारणीभूताभावविघटनरूपत्वेनैव प्रतिबन्धकत्वे दोषान्तरमाह ।। किञ्चेति ।।

१. धादि - आ. २. शेषः तथा च - अ.

ततो वरमेकः प्रामाण्यनिश्चयो हेतुप्रामाण्यादिज्ञानं तु तद्विघटकमिति । मण्यादौ तु त्वन्मते तद्विघटनीयस्यैकस्याभावादभावकूटस्य हेतुतास्तु ।एतेनैव
उपाधिज्ञानस्याधेयव्यभीचारज्ञानरूपानुमितिप्रतिबन्धकान्तरसम्पादनेनानुमिति ाप्रतिबन्धकत्वमिवापामाण्यसन्देहस्यापि
मानसार्थसंदेहरूपप्रवृत्तिप्रतिबन्धकान्तरसम्पानेन
प्रवृत्तिप्रतिबन्धकत्वम् । उक्तं हि -- 'अप्रामाण्यसंशयेनार्थनिश्चयं परिभूयार्थसंशय' इतीति निरस्तम् ।

उक्तेति -- 'एवमप्रामाण्यशङ्काद्याभाववदि 'त्यादिनोक्तप्रकारेणेत्यर्थः । अतिगौरवमिति -- अप्रामाण्यज्ञानाभावः कारणमित्येतदेव प्रामाण्यज्ञानाद्गुरु । तत्राप्यभावकूटः कारणमित्युक्तावतिगौरवमित्यर्थः । शक्तेरनङ्गीकारादन्यचस्य प्रतिबध्यस्यभावप्रामाण्यज्ञानाभावादिषु चानुगतैकहेतुतावच्छेदकस्यासंभावादभावकूटस्यैव हेतुतायास्त्वया वाच्यत्वादिति भावः ।।
नन्वेवं मण्याद्यभावस्थले मणिमन्त्राद्यभावकूटस्य कारणता क्लृप्तप्तेघनीयं प्रामाण्यज्ञानमिति किमर्थमतिगौरवाश्रयणमिति भावः ।।
पक्षे पक्षं प्रत्याचष्टे -- एतेवैवेति ।।
उपाधेर्व्यभिचारोन्नायकत्वपक्षमुपेत्येत्योक्तम् -- आधेयव्यभिचारज्ञानेति ।।
सन्देहनिश्चयसाधारणज्ञानमात्रस्य प्रतिबन्धकत्वाज्ज्ञानपदप्रयोगः-- उक्तं हीति ।। मणावित्यर्थः ।

---------- ---------- -------
मानसार्थसन्देहस्यापि पीतः शङ्ख इत्यादावुक्तरीत्यार्थनिश्चय १ सद्भावेन तद्विघटकत्वायोगेन सदर्थत्वरूपप्रामाण्यनिश्चयविघटनेनैव

प्रतिबन्धकत्वस्यैवोचितत्वात् । तस्मागसंसर्गग्रहव्यभिचारज्ञानादेः प्रवृत्यनुमित्यादिप्रतिबन्धकत्वान्यथानुपपत्त्यैव तद्विघटनीयस्य २ संसर्गाहव्याप्तिज्ञानादेः प्रवृत्यनुमित्यादिहेतुत्ववदप्रामाण्यज्ञानस्य प्रवृत्तिप्रतिबन्धककत्वा ३ न्यथानुपपत्यैव तद्विघटनीयस्य प्रामाण्यज्ञानस्य तद्धेतुत्वसिद्धिः ।।
यद्यपि परप्रक्रियया न निश्चितप्रामाण्य ४ ज्ञानं प्रवर्तकम् । प्रामाण्यलिङ्गज्ञानादिनार्थज्ञानस्य नाशात् ।

एतेनैवेत्यक्तं व्यनक्ति -- मानसार्थसन्देहस्यापीति ।। तद्विघटकत्वायोगेनेत्यादिनान्वयः । ज्ञानं हीत्यादिनोक्तरीत्या प्रमाण्यनिश्चयविघटनेवैव प्रतिबन्धकत्वस्योचितत्वादित्यर्थः । अर्थसन्देहस्य प्रामाण्यनिश्चयविरोधित्वघटनाय सदर्थत्वरूपेत्युक्तम्-- तस्मादिति ।। अन्यस्य विघटनीयस्याभावज्ज्ञानस्य ज्ञानान्तरविघटकत्वाच्चेत्यर्थः । अनुमित्यादित्यादिपदेन लिङ्गपरामर्शादिग्रहः । अप्रामाण्यज्ञानस्येत्युपलक्षणम् । अर्थसन्देहस्य चेत्यपि ध्येयम् -- तद्धेतुत्वेति ।। प्रवृत्तिहेतुत्वेत्यर्थः ।।
आशुविनाशिनो ज्ञानस्य प्रवृत्तिकालेऽभावात्कथं प्रमात्वेन ज्ञातस्य प्रवर्तकत्वम् । उक्तं च मणौ 'ज्ञानं गृहीतप्रामाण्यं न प्रवर्तकम् । प्रामाण्यानुमितेः पूर्वमेव तस्य नाशात् । किं तु तज्ज्ञानसमानविषयकमप्रामाण्यशङ्कशून्यज्ञानान्तरमेवे।त्यादी'त्येतच्चोद्यम नूद्य समाधिमाह -- यद्यपीति ।।

१. स्य - ख. २. स्यैव - छ. ३. नुपपत्यैव - ग. ४. क - कुं. ।मणपुस्तकेषु त्यादीतिनास्ति.

---------- ---------- ----------

किं तु तत्समानविषयकमप्रामाण्यशङ्कारहितमित्तरं ज्ञानान्तरमेव । तथापि मन्मते साक्षिरूपस्य सुखादिज्ञानस्य स्वप्रकाशत्वेन स्वस्यैव स्वप्रामाण्यनिश्चयरूपत्वात् । घटादिज्ञानस्य तु परग्रह्यत्वेपि तद्गाहकेण नित्येन साक्षिणा प्रमाणत्वेवैव ग्रहणात्तस्य च स्वप्रकाशत्वेनानवस्थाभावान्निश्चितप्रामाण्यमेव ज्ञानं प्रवर्तकम् । किञ्चाद्ये ज्ञाने प्रामाण्यनिश्चयेन कथं द्वितीये तच्छङ्काभावः ।।

स्वप्रकाशत्वेनेति ।।
'यदि साक्षी स्वयं भातो न मानं केन गम्यते ।
अक्षजैदेश्च मानत्वमनवस्थान्यथा भवेत् '।।
इति वैशिषिकनयानुव्याख्याने तथा --
'नयमेन सुखद्येषु प्रामाण्यं साक्षगोचरम् ।
स्वप्रामाण्यं सदा साक्षी पश्यत्येव सुनिश्चयात् '।।
इति ज्ञानपादीयानुव्याख्याने चोक्तेरिति भावः -- घटादिज्ञानस्य त्विति ।। मनोवृत्तिरूपज्ञानस्येत्यर्थः ।।
'इच्छा ज्ञानं सुखं दुःखं भया १ भयकृपादयः ।
साक्षिसिद्धा '
इत्युक्तेरिति भावः-- नित्येनेति ।। औत्तरिकानुस्मृतिसिद्धात्मस्वरूपभूतसौषुप्तिकानुभवरूपस्य तस्य नित्यत्वादिति भावः -- अनवस्थेति ।। पूर्वोक्तद्विविधानवस्थाभावादित्यर्थः । तथा च २ मणावुक्तो दोषः परेषामेव । नास्माकम् । 'अन्यथा भट्टमते प्रामाण्यस्यानुमितिग्रह्यत्वे अनवस्था स्यात् । गुरुमते प्रामाण्यस्य स्वग्राह्यत्वं न स्वग्राह्यम्। स्वरूपप्रामाण्यबहिर्भूतत्वात । किन्तु परग्रह्यत्वेऽनवस्थाना 'दित्यपि मणिकृदुक्तो दोषो नास्मत्पक्षे । स्वग्राह्यत्वस्यापि साक्षिवेद्यत्वादिति भावः ।।

१. तथा - कुं. २. मणिकृदुक्तदोषाः - अ.

प्रा-न-प्र-कत्वं) प्रामाण्यवादः पु - १०१.

---------- ---------- ----------

ननु यदीदं रजतं न स्या १ त्तदा रजतत्वप्रकारकप्रमाविषयो नस्यादिति तर्कप्रभावाद्वितीये शङ्काभावः । तर्केणार्थ २
सत्वशङ्कानिवर्तनेन तद्घटिताप्रामाण्यशङ्कानिवर्तनादिति चेन्न । क्लृप्तसामग्रीकस्य लधोश्चानुव्यवसायरूपप्रामाण्यनिश्चयस्य त्यागेनान्यस्य विपरीतस्योक्तरूपतर्कानुसन्धाननियमस्य कल्पनेऽनुभवविरोधात् ।।

ननु समानविषयकज्ञानान्तर इवाप्रामाण्यशङ्कानिवृत्तावेव प्रामाण्यज्ञप्तेरुपक्षयान्न
प्रवृत्तिहेतुता कल्प्या । 'अप्रामाण्यशङ्काप्रतिबन्धद्वारा निष्कम्पप्रवृत्तावुपयुज्यते प्रामाण्यज्ञानं 'इति मण्युक्तेरित्यतो द्वितीयज्ञानेपि प्रामाण्यनिश्चय एव प्रवर्तक इति भावेनाह -- किञ्चेति द्वितीय इति ।। गृहीतप्रामाण्यज्ञानसमानविषयके ज्ञानान्तर इत्यर्थः -- क्लृप्तेति ।। ' न च दृष्टान्तः साध्यविकलः उत्तरस्य ज्ञानस्य 'इत्यादिना स्वतस्त्वानुमानावसरोक्तरीत्या क्लृप्तसामग्रीकस्येत्यर्थः । अन्यत्र क्लृप्तत्वाच्च द्वितीयज्ञानादावपि प्रामाण्यनिश्चय एव प्रवर्तक इति भावेनाह ।।

१. तर्हि - मु. २. र्था - मु.

प्रा-नि-प्र-कत्वं) प्रामाण्यवादः पु - १०२.

---------- ---------- ----------

किञ्चाप्रामाण्यशङ्कानन्तरं प्रवृत्तौ प्रामाण्यनिश्चयो हेतुरिति तावदविवादम् । तत्र १ निश्शङ्कप्रवृत्तित्वमेव कार्यतावच्छेदकं लाघवात् । न तु शङ्कानन्तरनिश्शङ्काप्रवृत्तित्वं गौरवात् ।तत्र प्रामाण्यनिश्चयोऽप्रामाण्यशङ्कानिरासोपक्षीण इति गौरवादिना निरस्तम् । अन्यथा व्याप्त्यादिनिश्चयोपि व्यभिचारादिशङ्कानिरासोपक्षीणः स्यात् ।

किञ्च प्रामाण्यनिश्चयस्याप्रामाण्यशङ्कानिवर्तकत्वेनोपक्षये त्वत्पक्षे प्रामाण्यस्यानुमेयनावश्यकेन प्रामाण्यव्याप्यतया लिङ्गज्ञानेनैवाप्रामाण्यशङ्कानिवृत्तिसम्भवात्प्रामाण्यज्ञानस्य प्रवृत्तावनुपयोगात्तद्ग्रहणचिन्ता व्यर्था ।

किञ्चाप्रामाण्येति ।। अविवादमिति ।। 'परतः २ पक्षे प्रामाण्यग्रहो न क्वचित्प्रवर्तकः ' इति मण्युक्तेरस्ति विवादः । तथापि' यत्रचानभ्यासदशायामप्रामाण्यशङ्कार्थनिश्चयं परिभूययार्थसंशयस्तत्र प्रामाण्यनिश्चयाधीनज्ञानानर्थं निश्चित्य निष्कम्पं प्रवर्तते 'इत्युक्त्या तत्र स्थले प्रामाण्यनिश्चयस्य नियतपूर्ववृत्तित्वाल्लघुत्वाद्धेतुत्वमवश्यं वाच्यमिति भावेनैवमुक्तिः । अन्यत्रोपक्षयात्कथं हेतुतेत्यत आह -तत्र प्रामाण्येति ।। गौरवादिनेति ।। गौरवातिगौरवा ३ दिना पूर्वमेव निरस्तमित्यर्थः । अतिप्रसङ्गं किञ्चद्व्यनक्ति -- अन्यथेति ।।

यदपि मणौ 'नन्वेवं बहुवित्तव्ययायाससाध्ये 'इत्यादिना प्रामाण्यज्ञानस्यानुपयोगमाशङ्क्याप्रामाण्यशङ्कानिवर्तकत्वेनोपयोगकथनं तदप्ययुक्तमित्याह -- किञ्च प्रामाण्येति ।

१. त - मु. २. स्त्व - मु. ३. तिप्रसङ्ग - कुं. आ अ मु.

---------- ---------- ----------

यद्यपि व्यवसायः शङ्कानिवर्तकवरीक्षाकाले नास्ति । तथापि स्मृत्युपनीतस्य व्यवसायस्य प्रामाण्यनिश्चय एव प्रवर्तकः ।
यद्वा त्वन्मते गृहीतप्रामाण्येन ज्ञानेन समानशीलत्वादप्रामाण्यशङ्कारहितं ज्ञानान्तरमिवि मन्मते निरस्तप्रतिबन्धेन साक्षणा गृहीतप्रामाण्यं ज्ञानान्तरमेव प्रवर्तकम् । एतदप्युक्तम् 'अन्यथे 'त्यादिना । प्रामाण्यनिश्चयस्याप्रवर्तकत्वे
व्याप्त्यादिनिश्चयोऽनुमित्यादिहेतुरितिव्यवस्थायोगादित्यर्थः ।।
प्रामाण्यनिश्चयस्य प्रवर्तकत्वम् ।। ६ ।।
अप्रामाण्यशङ्कानिवृत्तिस्थले व्यवसायस्य नाशेन प्रवृत्तिकालेऽभावात्कथं प्रमात्वेन ज्ञानं प्रवृत्तिहेतुरित्याशङ्क्य द्वेधा समाधिमाह -- यद्यपीत्यादिना ।। स्मृतीति ।। पररीत्येदम् । यद्वा सिद्धान्ते साक्षिरूपनित्यज्ञानविषयस्यापि
स्मृत्युपनीतत्वप्रकारो जिज्ञासानयभाष्यटीकाभावदीपेऽस्माभरुक्तो ध्येयः -- एतपीति ।। प्रामाण्यनिश्चयस्याप्रवर्तकत्वेऽतिप्रसङ्ग इत्येतदपीत्यर्थः ।।
प्रामाण्यनिश्चयस्य प्रवर्तकत्वम् ।। ६ ।।

एवं १ प्रामाण्यनिश्चयस्य प्रवर्तकत्वसाधनेन तन्निश्चयस्य परते २ ज्ञायमानत्वेऽनवस्थाद्वयमुक्त्वा अप्रामाण्यशङ्काशून्यस्यार्थनिश्चस्य प्रवर्तकत्वेपि तदर्थमेव प्रामाण्यनिश्चयस्यावश्यकत्वादनवस्थाद्वयं दुर्वारमेव परतस्त्वपक्ष इत्याह ।। किञ्चेति ।।

१. एवं इति न - अ. २. जा - मु. आ.

किञ्चाप्रामाण्यशङ्काभावस्य प्रवर्तकत्वेपि तदर्थमेव प्रामाण्यनिश्यो वाच्यः । ननु धर्म्यज्ञानादिनापि शङ्काभावो युक्तः । न हि ज्ञानं ज्ञातं सदेव प्रवर्तकम् । सत्यप्यर्थज्ञाने तदज्ञानेनाप्रवृत्यदर्शनादिति चेन्न । न तावद्धर्म्यज्ञानं युक्तम् ।

१. यद्वा प्रामाण्यनिश्चयस्य प्रवर्तकत्वपक्षे तस्यावश्यवेद्यत्वेप्यप्रामाण्यशङ्काशून्यार्थनिश्चयस्य प्रवर्तकत्वपक्षे तदननश्यकत्वान्नानवस्थेत्यत आह १ । किञ्चेति ।। प्रवर्तकत्वेपीति --- प्रवर्तकार्थनिश्चयसहकारित्वेपीत्यर्थः । यद्यपि सिद्धान्ते परीक्षायाऽप्रामाण्यशङ्कानिवृत्तावेव साक्षिणा प्रामाण्यनिश्चयेन प्रामाण्यनिश्चस्याप्रामाण्यशङ्काभावार्थत्वं नास्ति । 'सा च बुद्धिदोषमात्रं निरस्यति । तस्मिन्निरस्ते साक्षी स्वमहिम्नैव प्रामाण्यं गोचरयति'इति तत्वनिर्णयटीकाद्युक्तेः । तथापि 'यत्र तु प्रामाण्यज्ञानेऽप्रामाण्यशङ्कया प्रामाण्यसंशयः तत्र प्रामाण्यज्ञाने प्रामाण्यनिश्चयादेव प्रामाण्यनिश्चयः 'इतिमण्युक्तेस्तं प्रत्येतदापादनमित्यदोषः ।
ननु तच्छङ्काभावः प्रामाण्यनिश्चयरूपप्रतिबन्धादिव स्वहेत्वभावादपि संभवतीति भावेन 'प्रामाण्यनिश्चयानवश्यंभावात्'इति मण्याद्युक्तशङ्कते ।। नन्विति ।। तथात्वे प्रवृत्तिर्न स्यादित्यत आह ।। नहीति -- 'ज्ञानं ह्यबुभुत्सितग्राह्यतया तीव्रसंवेदनं
'इत्यादिप्रथमपादीयसुधावाक्यं विवृण्वन्नाह ।। न तावदिति -- कोट्यस्मरणं चायुक्तमिति कल्पापेक्षया तावच्छब्दः । ।अज्ञानं हि तदर्थयोग्यत्वाभावेन वा सन्निकर्षादिसामग्र्यभावेन वा सहकारिविहप्रयुक्तसामग्र्यभावे -----

१. अयंग्रन्थः कुं. पुस्तके कुण्डलितः. २. समस्तंपदम् - अ. कुं.

---------- ---------- ---------

योग्यस्य धर्मिणो ज्ञानस्य मनस्संयुक्तात्मसमवायरूपसम्प्रयोगवत्वेनैवोत्पत्या ज्ञानत्वेन १ ज्ञानज्ञानसामग्र्याः सत्वात् ।

न च ज्ञानज्ञाने बुभुत्सा हेतुः सा च सार्त्रिकीति वाच्यम् । ज्ञानस्य सुखादिवद्योग्यात्मविशेषगुणत्वेनाबुभुत्सितग्राह्यत्वात् । बुभुत्साया ज्ञानरूपधर्मिज्ञानसाध्यत्वेनानवस्थानाच्च ।

न वा प्रतिबन्धेन २ वेति चतुर्धा २ । आद्यद्वयं न प्रकृत इत्याह ।योग्यस्येत्यादिना -- मनस्संयुक्तेत्याद्युक्तिः पररीत्या । सिद्धान्ते त्वात्मसंयुक्तमस्समवायेत्यर्थः । समवायस्तादात्म्यं ज्ञेयम् । सु ४ स्वाद्यनुभवरूपसाक्ष्याशेयेन वायं ग्रन्थः सिद्धान्ते योज्यः । सत्यपि धर्मिज्ञाने साधारणधर्मादर्शनादसन्देह इति शङ्कापनोदायोक्तं ज्ञानत्वेन ज्ञानज्ञाननेति ।।

न च ज्ञानत्वनिर्विकल्पकविलम्बात्तदभावः । निर्विकल्पस्यप्यनुत्पत्तौ बीजाभावान्निरसिष्यमाणत्वाद्वेति भावः । एतेन 'सुखादिवत्सत्यां सामग्र्यां वेद्यत्वापरिहारात् 'इति तत्वनिर्णयटीका विवृता ।।

सहकार्यन्तरविरहान्न ज्ञानज्ञानमिति तृतीयमाशङ्क्य निराह ।। न चेति ।। अनवस्थानाच्चेति ।। बुभुत्साहीच्छाविशेषः ।

तस्याः स्वविषयज्ञानसाध्यत्वाद्बुभुत्साहेतुज्ञानस्य धर्मिज्ञानविषयकस्य तद्विषयबुभुत्सासाध्यत्वात् सा च तद्विषयज्ञानसाध्येति पूर्वपज्ञानव्यक्तिबुभुत्साव्यक्तिपरम्परयानवस्थानाच्चेत्यर्थः ।

१. एकं ज्ञानपदंन - मु. २. पुस्तके नास्ति - मु. ।अज्ञानं हि द्वेधा । योग्यत्वाभावेन वा सन्निकर्षादिसामग्र्यभावेन वा । न द्वयं प्रकृत इत्याह - अ.
४. सुखानु - आ.

प-अन- क्तिः) प्रामाण्यवादः पु - १०६.
---------- ---------- ----------
वर्तमानस्वीयज्ञाने बुभुत्साया अदर्शरनाच्च ।।
न च धर्म्यज्ञानरूपफलबलात्सुखादुसामग्री तज्ज्ञानसामग्री वा १ ज्ञानप्रतिबन्धिका कल्प्यत इति वाच्यम् । धर्म्यज्ञानस्याद्यप्यसिद्ध्यान्योन्याश्रययात् । ज्ञानस्याज्ञानं तत्र कदाचित्संशयाद्यापाताच्च । कोट्यस्मरणं चायुक्तम् । ज्ञानत्वरूपसाधारणधर्मदर्शनस्य यागादौ निष्कम्पप्रवृत्त्यर्थं प्रामाण्यादिरूपविशेषबुभुत्सायाश्य सत्वेन तत्स्मरणसामग्र्याः सत्वात् ।

भविष्यदादिज्ञानज्ञाने कथंचिद्बुभुत्सासम्भवेपि न वर्तमाने । तथाच तत्र व्यभिचारान्नक्वापि सा ज्ञानज्ञानहेतुरित्याह - वर्तमानेति ।। स्वीयेति ।। यद्यपि स्वस्येदमित्यर्थेऽणिकृते स्वशब्दस्य द्वारादिषु पाठेन 'द्वारादीनांचे 'तिसूत्रेण वकारात्पूर्वमैजागमेनौकारे सति सौवेति भाव्यं । तथापि स्वस्मै हितमित्यर्थे 'प्राक् क्रीताच्छ'इति छप्रत्यये स्वीयेति साध्विति ज्ञेयम् ।
चुतुर्थं निराही । न च धर्म्यज्ञानेति -- व्यवसायरूपधर्मिणोऽज्ञानेत्यर्थः । ज्ञानस्याज्ञान इति ।। अननुव्यवसाय इत्यर्थः । एतेन 'न च जिज्ञानसायामेवानुभवोऽनुभूयते'इत्यादिभाष्यटीका विवृता ध्येया । कोट्यस्मरेणनेत्येतन्निराह । कोट्यस्मरणं चेति -- 'ज्ञाने हि ज्ञाते तत्प्रामाण्यानुपलब्धौ कथं संशयो न स्यात् 'इति तत्वनिर्णयटीकां विवृण्वा २ न आह -- ज्ञानत्वेति ।।

१. ज्ञानज्ञान - कुं-छ-ख-ग-क. २. न्नाह - मु.

प-अन-क्तिः) प्रामाण्यवादः पु - १०७.

---------- ---------- ----------

न च विषयान्तरसञ्चरादसंदेह इति युक्तम् । यागादौ निष्कम्पप्रवृत्तिहेत्वसंदेहप्रयोजकविशेषावधारणाय विषयान्तरसञ्चारस्यैव निरोद्धव्यत्वात् । न हि प्रेक्षावन्तो बहुवित्तव्ययाससाध्ये साधनत्वानिश्चयेपि १ विषयान्तरसञ्चारसम्पादितासन्देहमात्रेण चैत्यवन्दनादौ प्रवर्तन्ते ।

किञ्चोक्तरीत्या सम्पन्नसामग्रीकेण क्लृप्तेन प्रामाण्यनिश्चयेनैवासन्देहसम्भवे कथं विषयान्तरसञ्चारादिकल्पनम् ।

अपि च विषयान्तरसञ्चारेपि सुखादिज्ञानप्रामाण्ये नियमेनासन्देहो दृश्यत इति नासावसन्देहहेतुः । अन्यथा सुखादिकमपि कुखत्वादिना नावश्यवेद्यम् । तत्रासन्देहस्तु धर्म्यज्ञानादिनेति स्यात् । तत्र सामग्रीसत्वादवश्यवेद्यतेति चेत्समंप्रामाण्येपि ।।

मण्युक्तमन्यदपि निराह । न चेति -- परकीयप्रवृत्तिहेतुभूतः शङ्काभावः प्रामाण्यनिश्चयहेतुक एव । न तु विषयान्तरसञ्चारहेतुक इति तु दुर्ज्ञानमित्यत आह -- किञ्चोक्तरीत्येति ।। बाधोद्धारग्रन्थोक्तरीत्या सम्पन्नसामग्रीकेण प्रामाण्यनिश्चयप्रवर्तकत्वावादोक्तरीत्या क्लृप्तेनेत्यर्थः । व्यभिचाराच्चासन्देहहेतुरेवायं न भवतीत्याह । अपि चेति ।। अन्यथेति -- क्लृप्तासन्देहहेतुत्यागेनाक्लृप्तहेतुकल्पन इत्यर्थः । सममिति -- अत्रापि सामग्र्याः बाधोद्धारग्रन्थ उपपादितत्वादिति भावः ।

१. संदेहसंभवे - क.

---------- ---------- ----------

एतेन शङ्काविश्रान्तिभूमौ सुखादिज्ञाने प्रामाण्यव्याप्यस्य सुखज्ञानत्वादेर्विशेषस्य दर्शनादेवासंशय इति निरस्तम् । प्रामाण्यव्याप्यतया सुखज्ञानत्वदुःखज्ञानत्वादिज्ञानादपि पामाण्यज्ञानस्य लघुत्वात् । सुखज्ञानत्वादेः प्रामाण्यव्याप्यत्वाग्रहेप्यसंशयदर्शनाच्च । जन्मान्तरीयव्याप्तिग्रहकल्पनस्य १ चातिप्रसङ्गित्वात् । तस्मात्प्रामाण्यस्यावश्यवेद्यत्वादनवस्थाद्वयं दुष्परिहरम् ।

यदपि 'विशेषदर्शानान्न तत्राप्रामाण्यशङ्का 'इति मणिवचनं तद्विवरणपूर्वं तदपि नेत्याह । एतेनेति ।। व्याप्यतयेति -- स्वरूपज्ञानमात्रस्याप्रयोजकत्वादिति भावः । प्रामाणिकं गौरवं न दोषावहमित्याह । सुखाज्ञानत्वादेरिति -- यद्वा व्यभिचारान्नायसंशयहेतुरित्याह ।। सुखेति -- व्यभिचारासिद्धिमाशङ्क्य निराह ।। जन्मेति अतिप्रसङ्गित्वादिति -- ज्ञानहेतुकत्वव्यभिचारस्थले सर्वत्रैवं परिहारसम्भवादिति भावः । यद्वा २ नारिकेल द्वीपवासिनो वह्न्यनुमानापत्तेरिति भावः २ । एवमियता ग्रन्थेन 'अवश्यवेद्यत्वाभावान्ननवस्थेत्यभिप्राय इति चेन्न । निश्शङ्कं प्रवृत्तावावश्शेवेद्यत्वात् 'इति तत्वनिर्णयटीकावाक्योक्तं निश्शयङ्कप्रवृत्यर्थं तद्धेत्वप्रामाण्यशङ्काभावार्थं चावश्यवेद्यमित्यतीतवादत्रये चोपपाद्योपसंहरति ।

तस्मादिति -- अतीतवादोक्तदीशा निश्शङ्कप्रवृत्यर्थं अत्र वादे उक्तदिशा धर्म्यज्ञानादिना शङ्कभावायोगेनाप्रामाण्यशङ्काभावार्थं च प्रामाण्यनिश्चचस्यापेक्षितत्वादित्यर्थः ।

१. स्याति - ख. २. इयं पङ्ितः नास्ति - अ.

प-अन-क्तिः) प्रामाण्यवादः पु - १०९.

एतदप्युक्तं ' अन्यथा'इत्यादिना । परतस्त्वे उक्तानवस्थाद्वयापत्तेरिर्यर्थः ।
ननु त्वन्म १ ते यद्यपि प्रामाण्यग्रहणार्थं संवादविसंवादभावारूपपरीक्षा नारेक्षिता । तथापि दोषशङ्कादिरूपप्रतिबन्धनिरासार्थं साऽपेक्षितैव । तथा चतत्रापिदोषशङ्कायां तन्निरासाय परीक्षान्तरमित्यनवस्था तुल्यैवेति चेन्न । साक्षिवेद्यसुखादुःखादिज्ञाने दोषशङ्काया अभावेन परीक्षानवस्थाभावात् । उक्तं हि भगवत्पादैः ।
' न परीक्षानवस्था स्यात्साक्षिसिद्धे त्वसंशयात् ' इति ।।
परतस्त्वे अनवस्थोक्तिः ।। ७ ।।

एतदपीति -- परतस्त्वे प्रामाण्यज्ञानस्यापीत्यादिनोक्तमित्यर्थः ।
'अवश्यं तत्स्वतः प्रामाण्यग्रहणवादिनाप्यङ्गीकर्तव्यं 'इत्यादि टीकार्यं निष्कृष्य वक्तुं स्वमतेऽनवस्थादोषं शङ्कापूर्वमुद्धरति -- नन्वित्यादिना ।। उक्तं हीति ।।
ज्ञानपादीयानुव्याख्यान इत्यर्थः ।।
परतस्त्वे अनवस्थोक्तिः ।। ७ ।।

एवं परस्त्वे अनवस्थाद्वयोक्त्या स्वतस्त्वहेतूनामप्रयोजकत्वं निरस्य विपक्षेऽनुमित्यसंभवबाधकान्तरादपि नाप्रयोजकाः स्वतस्त्वहेतव इति भावेनाह---
किञ्चेति ।।

१.तेऽपि - ख.

किञ्च प्रामाण्यमनुमेयं चेत्कथं प्राथमिकं तज्ज्ञानम् । अप्रसिद्धविशेषणत्वेनानानुमानाप्रवृत्तेः । प्रवृत्तिगतसंवादरूपवौचित्र्येण तद्धेतुज्ञाने वैचित्र्यानुमानेपि वह्न्यर्थिप्रवृत्तिहेतोर्वह्नित्ववति वह्नित्वप्रकारकत्वादिरूपप्रामाण्यस्य विशिष्यासिद्धेः ।।
न च प्रामाण्यमात्रनिषेधे व्याघातदण्डभयेन विशेष्यवृत्तिप्रकारकत्वरूपं प्रामाण्यं सामान्यत १ एव प्रसिद्धं वह्निज्ञाने साध्यज्ञानं पक्षधर्मताबलाद्वह्नित्ववति वह्नित्वप्रकारकत्वादौ पर्यवस्यति ।

ननुक्तमत्र मणौ 'प्रथमं च प्रामाण्यज्ञानं व्यतिरेकिणा 'इति तत्राह -- अप्रसिद्धेति २ ।। साध्याप्रसिद्धौ तन्निरूपितव्याप्त्यज्ञानादिति भावः । ननु संवादप्रवृत्तिहेतुविलक्षणहेतुसाध्या तद्विलक्षणकार्यत्वादित्यनुमानेन सिद्ध्याद्वैसक्षण्यं प्रामाण्यरूपमेव सेत्स्यतीत्यत आह -- प्रवृत्तीति ।। दाहसमर्थविशेष्यप्रवृत्तिप्रकारत्वादिरादिपदार्थः ।।
प्रकारान्तरेणप्रसिद्धिमाशङ्क्य निराह ।। न चेति -- विशेष्यवृत्तिप्रकारकज्ञानं नास्ति, प्रमानास्तीत्यादिनिषेधस्य क्वचित्प्रमाप्रसिद्धि विनानुपपत्तेस्तदर्थं तत्प्रसिद्ध्य ४ भ्युपगमे व्याघातरूपदण्डप्रसङ्गात्तद्भयेन क्वचित्प्रसिद्धेरवश्यवाच्चत्वात् -- सामान्यतः सिद्धमित्युक्तम् ।। साध्यमानमिति -- वह्निज्ञानं विशेष्यवृत्तिप्रकारकं समर्थप्रवृत्तिहेतुत्वादिति व्यतिरेकिणा साध्यमनमित्यर्थः ।।

१. तः सिद्धं - कुं - ग- ख. २. अप्रसिद्ध इति - मु. ३. ष्यकत्वादि - कुं वह्न्यवृत्तिप्रकारावच्छिन्नत्वादिरादिपदार्थः - अ. ४. द्व्यन - कुं.

एवं च नाप्रसिद्धविशेषणत्वं नाप्यसाधारण्यमिति वाच्यम् । प्रथमे चस्वार्थानुमाने
व्याघातानुपस्थितेः । स्वयं निषेधस्य च तद्धीपूर्वकत्वात् ।
न च तत्र १ प्राग्भवीयसंस्कारजन्या स्मृतिरूपा तत्प्रसिद्धिः । प्रथमप्रामाण्यज्ञानस्य प्रामाण्यस्वतस्त्वेनैवोपपत्तौ तत्कल्पकाभावात् ।
अथ प्रथमं अयं वह्नित्वेनानुभवो वह्नित्वप्रकारकत्वे सति ---

नाप्यसाधारण्यमिति -- व्यक्तविशेषे साध्यस्यानिश्चयेन सपक्षानिर्णयादिति भावः। ननु स्वार्थानुमाने परकीयव्याघाचानवतारेपि स्वकीयप्रामाण्यनिषेधानुपपत्त्यैव तत्सिद्धिः स्यादित्यत आह ।। स्वयमिति - तथा च सा धीरेव कथं स्यादिति मृग्यत इति भावः ।
'प्राग्भवीयसंस्काराद्विशेष्यावृत्यप्रकारकत्वं तद्वति तत्प्रकारकज्ञानत्वं वा तत्प्रामाण्यं तन्मात्रं स्मृतं वह्निज्ञानादौ साध्यमानं' इत्यादिना मणिगृदुक्तं तत्सम्प्रदायविदां मतमनूद्य निराह ।। न च तत्रेति -- प्रथमप्रामाण्यानुमितिस्थल इत्यर्थः । उपपत्ताविति -- तदुपपत्तिप्रकारश्च बाधोद्धारग्रन्थे संशयोपपादनग्रन्थादौचोक्त इति भावः ।
'वयं तु ब्रूमः प्रथमप्रामाण्याभाव एव प्रामाण्यं व्यतिरेकिणासाध्यं' इत्यादिनोक्तं मणिकृदभिमतं पक्षमाशङ्कते -- अथेति ।। भ्रमव्यावृत्यर्थमयामित्युक्तिः । द्रव्यत्वादिना वह्न्यनुभवेऽबाधाय २ वह्नित्वेनेत्युक्तिः ।

१. ख क. पुस्तके 'तत्र' इति नास्ति. २. बाधवारणाय - अ.

-- वह्नित्वाभाववद्विशेष्यको न समर्थप्रवृत्तिजनकत्वात् व्यतरेकेणाप्रमावदित्यनुमानेनाप्रामाण्याभाव एवानुमेयः । तत एव निष्कम्पप्रवृत्तेः । न च तत्रापि साध्याप्रसिद्धाप्रसिद्धिर्दोषः । अभावसाध्यके १ व्यतिरेकिणि साध्यप्रसिद्धिं विनैव साध्याभावरूपस्य २ भावस्य हेत्वभाव्याप्यत्वग्रहात् ।

'वह्नित्वाभाववति वह्नित्वप्रकारकोन 'इति मण्युक्तसाध्यस्य यज्ञपतिटीकानुरोधेनार्थोक्तिर्वह्नित्वप्रकारकत्वेसतीत्यादिसत्यन्तं न ३ नञर्थभूताभावविशेषणम् । ४ एवं च अत्र वह्नित्वमिति ज्ञाने वह्नित्वाभाववद्वह्नित्वविशेष्यकत्वसत्वेपि
विशेषणाभावप्रयुक्तविशिष्टाभावरूपसाध्यसत्वान्न व्यभिचारः । अत एव ४ मणौ
'दाहसमर्थविषयकप्रयत्नजनकत्वे सति
वह्नित्वप्रकारकत्वादिसमर्थप्रवृत्तिजनकत्वाभावयोः'इत्यग्रे
तदीयग्रन्थानुरोधात्समर्थेत्यादिहेतूक्तिः । ५ अन्यथा साध्ये विशेष्यवैयर्थ्यात् ५ । वह्निविषयकेति समर्थप्रवृत्तिर्विशेषणीया । तेन न घटादिज्ञाने व्यभिचारः । एवमप्यत्र वह्नित्वमिति ज्ञाने व्यभिचार इति चेत् । एवं तर्हि वह्नित्वप्रकारकत्वेसतीति विशेषणम् । ननु प्रामाण्यनिश्चयाभावे कथं प्रवृत्तिरित्यत आह -- तत एवेति ।। अप्रामाणण्याभावज्ञायत इत्यर्थः । प्रामाण्यविश्यस्यापि तन्मते तत्रैवोपयोगादिति भावः -- अभावसाध्यक इति । व्याप्तिज्ञानार्था हि साध्यसिद्धिः । व्याप्तिश्च साध्याभावहेत्वभावयोरेव ।

१. केवल - ग. २. पभा- कुं. ३. 'न'इति नास्ति -मु.आ. ४. अयं ग्रन्थः

-मु. आ. पुस्तके नास्ति. ५. मु. आ. पुस्तके नास्ति.

पस्त्वे-प्रप्रा-ण्यत्य-भवः) प्रामाण्यवादः पु - ११३.

यद्वा वह्नित्वाभाववद्विशेष्यको नेत्येव साध्यम् । पक्षधर्मताबलादप्रामाण्याभावसिद्धिः । न च घटादिरूपात्सपक्षाद्व्यावृत्याऽसाधारणम् । तस्यानित्यदोषत्वादिति चेन्मैवम् । प्रथमस्य प्रामाण्यग्रहणस्योपाये पृष्ठेऽप्रामाण्याभावग्रहणोपायकथनस्य व्यधिकरणत्वात् ।।

तथाच तयोरेव ज्ञानमावश्यकम् । तत्र च साध्याभावोऽप्रामाण्यमेव । तच्चभावरपंसाध्यभूतस्वाभावरूपप्रतियोगिज्ञानं नापेक्षते इति तदप्रसिद्धावपि यत्राप्रामाण्यं तत्र समर्थप्रवृत्तिजनकत्वाभाव इति हेत्वाभावेन व्याप्यत्वग्रहसम्भवा१ दिति भावः ।
वह्नित्वप्रकारकत्वे सतीति विशेषणवैयर्थ्यं मन्वानः पक्षधराद्युक्तसाध्यनिष्कर्षमाह -- यद्वेति ।। कथं तर्हि तदभाववति तत्प्रकारकत्वरीपाप्रामाण्यस्याभावः सिद्ध्येत्यत आह -- पक्षेति ।। उक्तहेतोर्वह्नित्वप्रकारकत्वरूपाप्रामाण्यनिषेधो विशेषणाभावो बाधाद्विशेष्याभावमादायैव विशिष्टनिषेधे पर्यवसतीति तन्मात्राभावसाधने विशिष्टाभावः सिद्ध्यतीर्थः । ३. अत्रापि पूर्ववद्धेतुविशेषणं ध्येयम् । तेन न प्रगुक्तव्यभिचारः-- घटादिरूपात्सपक्षादिति ।। तस्य निर्विषयकत्वेन तत्र साध्यसत्वनिश्चयादिति भावः -- अनित्येति ।। अनुकूलतर्काभाववेलायामेव दोषत्वादिह च हेतूच्छित्तिरूपविपक्षबाधकस्यानुकूलतर्कस्य सत्वेनादोषत्वादित्यर्थः-- व्यधिकरणत्वादिति ।। अर्थान्तरत्वरूपनिग्रहस्थानापत्तेरिति भावः । इदं

प्रमेयमित्यादौ प्रमेयत्वाभावाप्रसिद्ध्य तद्घटिताप्रामाण्याभवानुमानासंभवाच्चेत्यपि ध्येयम् ।

१. दित्यर्थः - आ. कुं. २. वह्नित्वा -आ. मु. ३. अत्र च वह्नित्वप्रकारकनिश्चयत्वादित्यपि हेतुविशेषणं ध्येयम् -अ.

न चोक्तव्यतिरेक्येव पक्षधर्मताबलाद्वह्नित्ववद्विशेष्यकत्वरूपं प्रामाण्यं गृह्णातीति वाच्यम् । व्याप्त्या व्यापकतावच्छेदकावच्छिन्नत्वेनोपस्थापितस्यापूर्वस्य व्यनक्तिविशेषस्यैव पक्षधर्मतया पक्षसम्बन्धसिध्या तथानुप २ स्थापितस्योक्तरूपप्रामाण्यस्य पक्षसम्बन्धबोधने तस्या असामर्थ्यात् ।
एतेन अप्रामाण्याभावानुमित्यनन्तरं अयं वह्नित्वेनानुभवो वह्नित्वलवद्विशेष्यकः अवन्ह्यविशेष्यकत्वे सति ---

ननु विरुद्धप्रकारद्वये तदभाववद्विशेष्यकत्वाभावे तद्वद्विशेष्यकत्वमादायैव पर्यवसानम् । अन्यथा हेतोः पक्षसंबन्धो न घटत इत्याशयेन 'तदभाववति तत्प्रकारकत्वव्यतिरेकत्वव्यतिरेकः सिद्ध्यंस्तद्वति तत्प्रकारकत्वमादाय सिद्ध्यति । तृतीयप्रकाराभावात् 'इति मण्युक्तमाशङ्क्य निषेधति - नचेति ।। व्याप्त्येति ।। यद्धर्मावच्छिन्ननिरूपितव्याप्तिर्यद्धर्मावच्छिन्नस्य गृहीता तद्धर्मावच्छिन्नस्य पक्षधर्मतया तद्धर्मावच्छिन्नस्यैव सिद्धिः स्यात् । न तु प्रामाण्यस्येत्यर्थः ।
न चायं नियमोऽन्वयिनि हेतौ न व्यतिरेकिणीति शङ्क्यम् । व्यतिरेकसहचारेणान्वयव्याप्तिर्गृहीत इति मताभिप्रामायेण शङ्क्यम् । व्यतिरेकसहचारेणान्वयव्याप्तिर्गृहीत इति मताभीप्रामायेण वा व्यतिरेकिण्यपि

हेत्वभावव्यप्याभावविषयत्वनैयत्वनैयत्याभिप्रायेणवैवमुक्तिः-- तस्या इति ।। 'इदं
वह्नित्वप्रकारकं ज्ञानं वह्नित्ववद्विषयकं 'इत्यादिना मण्युक्तं पक्षान्तरं निराह -- एतेनेति ।। विषयपदं विशेष्यपरमिति तदीय व्याख्यानोक्तर्विशेष्यक इत्युक्तम् ।।----------
---

१. स्थित - ग. २. स्थि- कुं-च.ग. ३. यद्वेदं - अ.

पस्त्वे-प्रप्रा-ण्यात्य-भवः) प्रामाण्यवादः पु - ११५.

---------- ---------- ----------

-- सिविशेष्यकत्वादिति व्यतिरेक्यन्तरेण तत्सिद्धरिति निरस्तम् । वैशिष्ट्यमनुव्यवसायवेद्यमिति परतः १ पक्षे साध्याप्रसिद्धेः ।।
किञ्चाप्रामाण्यमपि यद्यनुमेयं तर्हि कथं तत्प्रसिद्धिः । येनाप्रामाण्याभावसाधकहेतौ
साध्याभावरूपाप्रामाण्यव्यापकाभावप्रतियोगित्वज्ञानम् । यदि तु बाधानन्तरं स्मृत्युपनीते भ्रमे वह्नित्वाभाववति वह्नित्वेन ज्ञानं मम वृत्तमित्यप्रामाण्यं मनसा परिच्छिद्यते तर्हि प्रवृत्तिसामार्थ्यानन्तरं ----

साध्याप्रसिद्धेरिति । न च प्राग्भवीयसंस्कारानुसरणाददोष इति शङ्क्यम् । निरस्तत्वात् । आदावेवैवमनुमानसम्भवे प्रथममप्रामाण्याभावानुमानस्य व्यर्थत्वाच्चेत्यपि ३ ध्येयम् । अप्रामाण्यचाभावानुमानेपि व्यतिरे ४ कव्याप्याप्रसिद्ध्या व्याप्त्यसिद्धिरित भावेनाह -- किञ्चेति ।। द्वितीयानुव्यवसाये ५ नाप्रामाण्यं प्रसिद्धमित्याशङ्क्ये -- यदित्विति ।। नायं वह्निरितिबाधान्तरमित्यर्थः-- स्मृतीति ।। वह्निभ्रमानुव्यवसायजन्यस्मृतीत्यर्थः -- अप्रामाण्यमिति ।। बाधरूपानुभवजन्यस्मृत्युपनीतमित्यर्थः । प्रामाण्यस्यापि

पञ्चमानुव्यवसायवेद्यत्वमस्त्वित्याह --तर्हीति ।। तथा च पञ्चमानुव्यसायमादाय साध्यप्रसिद्ध्या प्रामाण्यानुमानस्यैव प्राथमिकत्वसंभवे किं प्रामाण्याभावानुमानेनेति भावः । अभ्युपेत्य चेदमुक्तम् । वस्तुतस्तु प्रामाण्वानुमानमेवायुक्तम् ।

१. परपक्षे -मु. २. बोध्यम् -मु.अ. ३. के-मु. ४.नुमाने - कुं.

स्मृत्युपनीते व्यवसाये स्मृत्युपनीतं वह्नित्ववैशिष्ट्यविषयकत्वमेव मनसा परिच्छिद्यताम् ।आदावेव वा व्यवसायगतं तदुपनीतवह्नित्ववैशिष्ट्यविषयकत्वमनुव्यवसायैनैव परिच्छिद्यताम् किमनया कृसृष्ट्या ।।
एतेन वह्नित्ववद्विशेष्यकत्वमिच्छादौ मनसा प्रविद्धमिति निरस्तम् । तथात्वे उक्तरीत्या प्रामाण्यस्यैव मनसा परिच्छेदसम्भवात् ।।
किञ्च प्रमासमर्थप्रवृत्योः कार्यकारणभावो नियमगर्भः । नियमश्चानन्त्यव्यभिचाराभ्यां न व्यक्त्योरेव ।

पञ्चमानुव्यवसायवेद्यत्वोपगमे च प्रथमानुव्यवसायवेद्यत्वस्य सुतरामुपेयत्वस्योपपादिततत्वादिति भावेनाह -- आदावेव वेति ।। कुसृष्ट्येति ।। पूर्वमप्रामाण्याभावानुमानं पश्चात्प्रामाण्यानिमानं अप्रामाण्यप्रसिद्ध्यर्थं पञ्चमानु व्यवसायानुसरणामित्यादिरीपाकुसृष्ट्येत्यर्थः ।
ननु वह्नित्ववति वह्नित्वेनेच्छावानहामित्यनुव्यवचसायेनेच्छोपनीतं त २ द्वत्वमिच्छायां गृह्यते । एवं द्वेषादाविति तत्र प्रसिद्धं वह्निज्ञाने साध्यताम् । एवं च नाप्रसिद्धिरित्य आह -- एतेनेति ।। उक्तरीत्येति ।। बाधोद्धारग्रन्थोक्तरीत्या व्यवसायोपनीतस्येत्यर्थः ।

एवमनुमयत्वपक्षे प्रामाण्यस्याप्रामाण्यस्य चाप्रसिद्ध्युक्त्या तन्निरूपितव्यप्त्यासिद्धिमुक्ता हेतोः प्रमित्यसिद्धिमाह -- किञ्चेति ।। नियमेति ।। या प्रमा सा समर्थप्रवृत्तिपूर्वभाविनीत्येवंरूपनियमेत्यर्थः-- व्यभिचा ३ राभ्यामिति ।। एतत्प्रमाव्यक्त्यभावेपि व्यक्त्यन्तरेण प्रवृत्तिदर्शनादित्यर्थः ।

पस्त्वे-प्रप्रा- ण्यत्य-भवः) प्रामाण्यवादः पु - ११७.

किन्तु प्रमात्वावच्छेदेनेति प्रमात्वे ज्ञाते प्रवृत्तिकारणत्वज्ञानं तेनैव च प्रमात्वज्ञानमित्यन्योन्याश्रयः ।।
न च गुणजन्यत्वाद्यवच्छेदेन नियमः ।

'नियमश्च न व्यक्त्योरेव व्यभिचारादतिप्रसङ्गाच्च '। इत्युत्पत्तिप्रामाण्ये त्वयैवोक्तिरिति भावः -- अन्योन्याश्रय इति ।। यदि क्वचिन्मनसा प्रामाण्यग्रहोपगमेव तत्र प्रवृत्तिकारणत्वग्रहान्नन्योन्याश्रायस्तर्हि प्रथमेव प्रामाण्यं मनसा गृह्यताम् ।
कमनुमानेनेति भावः । एतच्च प्रामाण्य १ ज्ञानं प्रवृत्तिकिरणमित्युपेत्योक्तम् । अप्रामाण्याभावज्ञानमेव प्रवृत्तिकारणमिति पक्षे प्रमात्वपदमप्रमात्वाभावपरं ज्ञेयम् ।
यद्वा 'तदभाववति तत्प्रकारकत्वव्यतिरेकः सिध्यंस्तद्धति तत्प्रकारकतामादाय सिध्यति । तृतीयप्रकाराभावेन तेन विना साध्यस्योपसंहर्तुमशक्यत्वात्' इति ग्रन्थेनाप्रामाण्याभावानुमानमेव प्रामाण्यानुमानमित्युक्तत्वात्प्रमात्वपदप्रयोगः ।
एतेन दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वप्रकारकनिश्चयत्वादित्यपि हेतुः परास्तः । प्रथमं जनकत्वस्य दुर्ज्ञानत्वात् । दाहसमर्थविशेष्यकवह्नित्वप्रकारकनिश्चयत्वादित्यादिरपि

दाहसमर्थविशेष्यकत्वस्यादौ दुर्ज्ञानत्व २ स्य प्रागेवोक्तत्वान्निरस्तप्रायः । दाहसमर्थेत्येवमादिरूपहेतूनां प्रमात्वसामान्या ३ ननुमापकत्वाच्च ।
प्रमात्वसमनियतधर्मावच्छेदेनास्तु तद्ग्रह इत्याशङ्क्य निराह-- न चेति ।। आदिपदेन दोषाभावजन्यत्वादुष्टत्वादुष्टकरणजन्यत्वादिग्रहः-- प्रमात्वस्येति ।।
अनित्यज्ञाननिष्ठस्येत्यर्थः ।

१. प्रमात्व - मु- अ. २. नस्य - कुं. ३. न्यानु - मु.

पस्त्वे- प्रप्रा-ण्यात्य-भवः) प्रामाण्यवादः पु - ११८.
---------- ---------- ---------
जन्यतावच्छेदकस्या १ प्रमात्वस्या १ ज्ञाने गुणजन्यत्वस्यैव दुर्ज्ञानत्वात् ।।
किञ्च न प्रवृत्तिसामर्थ्येन प्रामाण्यानुमानम् । चन्द्रतारादिज्ञाने तदभावात् । प्रवृत्तेः प्रामाण्यज्ञानधीनत्वेनान्योन्याश्रयाच्च । मणिप्रभायां मणिभ्रमे व्यभिचाराच्च । मणिप्रभायां मणिभ्रमे व्यभिचाराच्च । नापि संवादेन । ज्ञानान्तरसंवैदस्य व्यभिचारात् । प्रमासंवादस्याद्यप्यसिद्धेः । विसंवादाभावस्य चानुपसञ्जातबा २ धभ्रमेपि सत्वात् । विसंवादयोग्यत्वाभावस्य च प्रमात्वाज्ञाने दुर्ज्ञानत्वात् । गुणजन्यत्वस्य दोषाभावजन्यत्वस्य ३ दोषाजन्यत्वस्य ३ च प्रमारूपकार्यकल्प्यत्वेन जन्यतापच्छेदकप्रमात्वाज्ञाने गुणजन्यत्वादेर्दुज्ञानत्वेन चान्योन्याश्रयात् ।।

युक्तिपादीयसुधोक्तदिशा वादावल्युक्तदिशा च प्रामाण्यानुमापकसप्तहेतूनप्रकारोति -- किञ्चेति ।। सामर्थ्येन ।। विषयलाभरूपेणेत्यर्थः । तदन्यस्यास्तु पक्षतेति वादिनं प्रत्याह -- प्रवृत्तेरिति ।। प्रामाण्यज्ञानाधीनत्वेनेति ।। साधित्वत्परमतेप्यप्रामाण्य ४

ज्ञानाभावार्थमप्यपेक्षितत्वादिति भावः । मन्मते प्रवृत्तिमात्रं न प्रामाण्यज्ञानाधीनमिति वदन्तं प्रत्याह -- मणीति ।। व्यभिचारादिति ।। भ्रमान्तरसंवादिभ्रम इति भावः ।
ननु भवन्मतेप्यप्रामाण्यस्य परतस्त्वात्साध्याप्रसिद्धिस्तदनुमाने स्यात् ।

१. छ.-क-ख-पुस्तके समस्तं पदं वर्तते. २. धे-कुं-छ-ग-ख-क.
३.एतन्नास्ति-मु. ४. अभावज्ञानार्थं- मु.

मन्मते तु उत्सर्गतः प्रामाण्यं गृह्णन्नपि साक्षी बाधानन्तरमुक्तरीत्या विसंवादलक्षणादपवादादप्रामण्यमपि गृह्णाति । १ उक्तं हि सुधायाम् । साक्षी अपवादकसद्भावेऽप्रामाण्यमपि गृह्णाति इति ।।
या तु विष्णुतत्वनिर्णयटीकायां 'अनुमेयमेवाप्रामाण्यं 'इत्युक्तिः सा साक्षिणो २ ऽप्रामाण्यग्रहणे विसंवादापेक्षा नियतेत्यभिप्रेत्य । अत एव तत्रैव 'न पुनर्ज्ञानग्राहकमात्रग्राह्यत्वं 'इत्युक्तम् । वादाल्यां च '
अप्रामाण्यस्यानुमेत्वावसायात् ' इत्युक्त्वा ---

तत्र जन्मान्तरीय संस्कारानुसरणस्य वा प्रथमं प्रामाण्याभावानुमानद्वारानुसरणस्य वा पञ्चमानुव्यवसायप्रसिद्धत्वानुसरणादेर्वा कार्यत्वे ममापि साम्यदित्यत आह -- मन्मते त्विति ।। उत्सर्गतः ।। स्वस्वाभावसामर्थ्यत इत्यर्थः । स्वत एवास्तु किं विसंवादेनेत्यत आह -- उक्तरीत्येति ।। 'अप्रामाण्यं तु विसंवादाद्यनुसन्धाने सत्येव गृह्यते 'इत्यादिना 'स्वतोऽप्रामाण्यग्रहे असामर्थ्यात् इत्यादेः स्वतस्त्वानुमानवादे उक्तत्वात्तत्रोक्तरीत्येत्यर्थः -- उक्तं हीति ।।
आद्यपादे ----
प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य हि ।

अनवस्थान्यथा हि स्यादप्रामाण्यं तथान्यतः ।।
इत्येतद्व्याख्यावसर इत्यर्थः । सुधावाक्यस्यार्थतो नुवादः--- साक्षीत्यादि ।। उक्तिरिति ।। 'दुष्टबुद्धीनामेवाप्राणाण्यशङ्का'इत्येतद्व्याख्यावसर इत्यर्थः । नन्वेवमिदमप्रमाणं न वेति सन्देहादिरपि ----------

१. उक्तमपि-छ. २. णा-क-ख.

ज्ञप्तौ परतस्त्वानुमानभङ्गः प्रामाण्यवादः पु - १२०.
---------- ---------- ----------
'न चाप्रामाण्यं क्वचिदपि निरपेक्षेण साक्षिणा निश्चितचरं 'इत्युक्तम् । अप्रामाण्यशङ्कादिकं तु मानसमेव । उक्तं हि भगवत्पादैः ।
'यत्क्वचिद्व्यभिचारिस्याद्दर्शनं मानसं हि तत्'इति ।
'सुदृढो निर्णयो यत्र ज्ञेयं तत्साक्षिदर्शनम् ' ।।
इति च । तस्मात्प्रामाण्यस्य परतस्त्वे प्राथमिकं तज्ज्ञानमेव न सम्भवतीति । एतदप्युक्तं 'अन्यथा'इत्यादिना । परतस्त्वे प्राथमिक १ प्रामाण्यानुमितेरेवासम्भवेनेयं प्रमा इयं त्वप्रमेति व्यवस्थित्यसम्भवादित्यर्थः ।।
परतस्त्वे प्रथमप्रामाण्यानुमित्यसम्भवः ।। ८।।

यच्चोक्तं स्वाश्रयविषयकनिश्चावधिकतृतीय ---

साक्षी किं नेत्याह -- अप्रामाण्येति ।। उक्तं हीति ।। ज्ञानपदे ।।
परतस्त्वे प्रथमप्रामाण्यानुमित्यसंभवः ।। ८ ।।

एवं स्वतस्त्वानुमानानां बाधं विपक्षेऽनवस्थाद्वयस्यानुमित्यसम्भवस्य चोक्त्याऽप्रयोजकत्वं चोद्धृत्य परोक्तानुमानविरोधनिरासाय तानि

दूषयितुमनुवदति -- यच्चेति ।। परोक्तस्वतस्त्वानिरूक्तिभङ्गेन संशयस्यान्यथोपपादनेन च परोक्तहेतूनामप्रयोजकत्वाद्युक्तावपि प्रबलदोषोक्त्यर्थं पुनरारम्भः ।

१. प्रथम - कुं - छ.

ज्ञप्तौ परतस्त्वानुमानभङ्गः प्रामाण्यवादः पु - १२१.

-- क्षणं १ वृत्तिसमानाधकरणसंशयविषयी २ भूतं ज्ञानप्रामाण्यं ग्राह्यज्ञानप्रकारप्रकारकतया तद्विशेष्यविशेष्यकतया च स्वाश्रयग्राहकयाव ३ ज्ज्ञानाग्राह्यम् ।

'विवादंपदं न यावत्स्वाश्रयग्राह्यं स्वाश्रयनिश्चये सत्यपि तदुत्तरतृतीयक्षणे अप्रामाण्यसंशयं विना ४ सन्दिह्यमानत्वादप्रामाण्यवत् 'इति मण्युक्तावपि 'विप्रतिपत्तौ यथा साध्यमुक्तं तदभाव इह साध्यं ज्ञेयं ' इति पक्षधरादितदीयटीकोक्तरीत्या परिष्कारपूर्वकं तदीयप्रयोगानुवादं करोति -- स्वाश्रयेति ।। किमवच्छेदेन विवादविषयइत्यज्ञानात्तदभिमतं विवादनियामकं पक्षतावच्छेदकं टीकाद्यनुक्तमपि स्वयं व्यक्तीकृतवानिति ज्ञेयम् । स्वस्य
प्रामाण्यस्याश्रयो व्यवसायः । तद्विषयनिश्चयसमानाधिकरणो यः संशयः तद्विषयी ५ भूतं ज्ञानप्रामाण्यमित्यर्थः । संशयाविषये प्रामाण्ये तथा निश्चते व्यधिकरणसंशयविषये तथा चतुर्थक्षणवर्तिसंशयविषये ६ यत्किञ्चिदवधिकतृतीयक्षणवर्तिसंशयविषये चीसिद्धित्यतो विशेषणानि । ज्ञानप्रामाण्यांशस्याधिकस्यात्रप्रवेशान्न ७ पक्षतावच्छेदकैक्यनिमित्तं सिद्धसाधनं शङ्क्यम् अप्रामाण्येव सिद्धसाधनतानिरासाय ज्ञानप्रामाण्यमित्युक्तिः । तादृशानुमित्यादेग्राह्यत्वेन बाधनिरासाय साध्ये

यावदित्युक्तिः । ज्ञानं घटज्ञानमित्यादिशब्दजन्यज्ञानाग्रह्यत्वस्य स्वतस्त्वेपि सत्वाद्ग्राह्यज्ञानप्रकार ८ इत्युक्तिः । दलद्वयकृत्यमप प्रागेव व्यक्तम् ।।

१. वर्ति-क-ग-च. २. कुं-छ-ग-क. ३. ज्ञानग्राहकाग्रा - क-छ. ४. वा-कुं-अ-आ. ५.य-कुं-अ. ६.तथा-अ. ७.हेतुप-अ-आ. ८.रेत्याद्यु-कुं-अ-आ.

ज्ञप्तौ-परस्त्व-न-भङ्गः) प्रामाण्यवादः पु - १२२.

--- --- ---

तज्ज्ञानविषयकसमानाधिकरणज्ञानाजन्यसमानाधिकरणज्ञानाप्रकारो वा । स्वाश्रयविषयकनिश्चयावधकतृकतृतीयक्षणवृत्तिसमानाधिकरणसंशयकोदित्वात् ।
स्वाश्रयविषयकनिश्चयसमानकालीयसामग्रीजन्यसंशयविषयधर्मिकप्रामाण्य संशय-
जन्यसंशयाविषयत्वाच्च ।

अत्र मण्युक्तमेकं साध्यं विप्रतिपत्तावुक्तसाध्यान्तरस्याप्युपलक्षणं मत्वा दूषणसौकर्याय स्वयमाह -- तज्ज्ञानेति ।। १ तदर्थो विशेषण कृत्यं च परोक्तस्वतस्त्वनिरुक्तिभङ्गे व्यक्तम् ।
मतद्वयेपीश्वरज्ञानसत्वात्क्रमेणाप्रसिद्धिबाधवारणाय समानाधिकरणपदद्वयम् -- निश्चावधिकेति ।। निश्चोत्पत्तिक्षणवधिकत्येर्थः । तेन स्वाश्रयविषयकनिश्चयस्थितिक्षणावधिकतृतीयक्षणवृत्यर्थसंशयकोटावर्थेव्यभिचारो न शङ्क्यः ।।
'स्वाश्रयनिश्चये सत्यपि तदुत्तरतृतीयक्षणे सन्दिह्यमानत्वात् 'इति मण्युक्तहेतोस्सतिसप्तमीबलेन

सामानाधिकरण्यलाभायरूपं तट्टीकोक्तमेकमर्थमुपेत्यैको हेतुरुक्तः । समानकीलीनता २ रूपमर्थान्तरं चोपेत्य हेत्वन्तराह-- स्वाश्रयविषयकेत्यादि ।। ३ संशयविषयकत्वादित्यस्य पूर्ववत्संशयकोटित्वादित्यर्थः । तेनात्र पूर्वत्र च न व्यवसाये व्यभिचारः ३ ।।
स्वाश्रयनिश्चयेऽप्रामाण्यसंशयं विना ४ सन्दिह्यमानत्वात् इति मण्युक्त्यभमतं हेतुं व्यनक्ति -- स्वाश्रयविषयककिंचिदित्यादि ।। स्वाश्रयविषयकनिश्चयशब्देन यावन्निश्चयो मणिकृतो नाभिमतः ।

१. एतद-कुं-अ-आ. २. लाभ-कुं-अ-आ. ३. अयं ग्रन्थः-अ. पुस्तके नास्ति.
४. वा-कुं-अ-आ. ५.संशयविषयत्वादित्यस्य पूर्ववत्संशयकोटित्वादित्यर्थः-अ.

ज्ञप्तौ-परस्त्वा-न-भङ्गः) प्रामाण्यवादः पु - १२३.
---------- ---------- ----------
अप्रामाण्यवत् ।।
यद्वा उक्तहेतुतत्रयमध्ये एकं पक्षतावच्छेदकं कृत्वाऽन्यौ हेतूकर्तव्यौ ।।
यद्वा एतज्ज्ञानप्रामाण्यमेतज्ज्ञानप्रामाण्यसंशयपूर्वकालीनैतन्निश्चयाविषयः । एतज्ज्ञानविषयकनिश्चयावधिकेत्याद्युक्तहेतुक्तहेतुत्रयात् । ।अप्रामाण्यवत् ।।

प्रामाण्यानुमितेरपि प्रमाण्याश्रयविषयकनिश्चयत्वेन तद्धर्मिकप्रामाण्यसंशयजन्यसंशयविषयत्वेनासिद्ध्यापत्तेः । किन्तु यत्किंचिदनुव्यवसायरूपनिश्चय एवाभिमत इति भावेन किञ्चिन्निश्यधर्मिकेत्युक्तम् -- अप्रामाण्यवदिति ।।

पक्षीभूतप्रामाण्यसंशयकोटीभूताप्रामाण्यवदित्यर्थः । मतद्वयेपि तस्य परतस्त्वे साध्यहेती संमताविति भावः ।।
हेतुपक्षतावच्छेदकैक्यनिबन्धनसिद्धसाधनता १ शङ्कापि यथा न भवति तथा पक्षातावच्छेदकीकृत्य द्वितीयतृतीयौ वाद्यतृतीयौ वा हेतूकर्तव्याविवत्यर्थः ।।
२ 'अनभ्यासदशापन्नैतज्ज्ञानप्रामाण्यं 'इत्यादिना मण्युक्तं पक्षान्तरं चाह -- यद्वैतज्ज्ञानप्रामाण्यमिति ।। वस्तुतो यदनुव्यवसायानन्तरं तृतीयक्षणे संशयविषयीभूतं प्रामाण्यं तद्व्यक्तेरेवैतत्पदेन ग्रहणम् । अतो नासिद्धिर्हेतूनामिति भावः । बाधवारणाय कालीनेत्यन्तम् -- पूर्वेति ।। अव्यवहितपूर्वकालीनेत्यर्थः । एतज्ज्ञाननिश्चयानन्तरं सन्दिह्यमानत्वादित्युक्तहेतुमुपलक्षणं मत्वाह-- हेतुत्रयादिति ।।

।एतावत् नास्ति - छ. १. नशं- कुं. २. यद्वा अन -अ.

ज्ञप्तौ-परस्त्व-न-भङ्गः) प्रामाण्यवादः पु - १२४.

विमतं व्यवसायप्रामाण्यं १ न तदनुव्यवसायवेद्यम् । तदवधिकतृतीयेत्याद्युक्तहेतुत्रयात् ।अप्रामाण्यवदिति विशिष्य प्रयोक्तव्यम् । तस्मादनुमानविरुद्धानि स्वतस्त्वानुमानानि ।।
अत्र साध्यविशेषणप्रयोजनं स्वतस्त्वनिरुक्तावुक्तप्रायम् । आद्य २ हेतौ रजतत्वादिरूपेऽर्थेपि किंचिदवधकतृतीयक्षण ३ वुत्तिसंशयविषयत्वस्य. तथा स्वाश्रयनिश्चयावधिकचतुर्थलक्षणवृत्तिसंशयविषयत्वस्य, तथा चैत्रीयस्वाश्रयनिश्चयावधिकतृतीयक्षणवृत्तिमैत्रीयसंशयविषयत्वस्य च सत्वात्तत्र व्वभिचारः ।

एवं स्वतस्त्ववादिमात्रसाधारणं वा गुरुभिन्नस्वतस्त्ववादिमात्रसाधारणं वा द्वेधा प्रयोगं मण्यभमतं प्रदर्श्य अनभ्यासदशापन्नज्ञानप्रामाण्यं न स्वाश्रयग्राह्यमिति गुरुमतासाधारण्येन प्रयोगोक्तमुपलक्षण ४ मभिप्रेत्य सिद्धान्तितविरोधिप्रयोगान्तरमाह-- विमतमिति ।। यद्वेत्यनुषङ्गः । उक्तसंशयविषयीभूप्रामाण्यस्यैव व्यवसायप्रामाण्यपदेन ग्रहणमिति द्योतनाय विमतमित्युक्तिः-- तस्मादिति ।। उक्तरीत्या प्रयोगसम्भवादित्यर्थः । न तु संशयानवतारस्तलीयपक्षकानुमानानि । मण्याद्युक्तानां संशयस्थरीयपक्षकाणां भिन्नविषयतया विरोधाभावात । यद्वा संशयस्थले तथात्वसिद्धावन्यत्रापि तथात्वमेव कल्प्यम् । न वैरूप्यमित्याशयेन सर्वानुमानानीत्यर्थः ।

दूषणसुज्ञानतायै पदकृत्यं विवेचयति -- अत्र साध्येत्यादिना ।। स्वतस्त्वनिरुक्ताविति ।। परोक्तस्वतस्त्वनिरुक्तिभङ्गप्रस्ताव इत्यर्थः ।

१. नैत - क. २. द्ये-कुं-ग. ३. जन्य-ग. ४. मुपे- कुं-अ.

ज्ञप्तौ-परस्त्वा-न-भङ्गः) प्रामाण्यवादः पु - १२५.

---

१ तद्वारणाय क्रमेण स्वाश्रयनिश्चयावधिकत्वेन तृतीयक्षण २ वृत्तित्वेन समानाधिकरणत्वेन च संशयो विशेषितः ।।
प्रथमं व्यवसायः, अनन्तरं ज्ञानत्वनिर्विकल्पकं विना ज्ञानांशं निर्विकल्पस्य घटांशे सविकल्पकस्य नरसिंहाकारस्य धर्मिज्ञानरूरस्यानुव्यवसायस्योत्पत्तिः, अनन्तरे द्वितीये ३ तदनुव्यवसायस्य स्थितिक्षणे कोटिस्मिरणं, अनन्तरं तृतीयक्षणे प्रामाण्यसंदेहः, चतुर्थक्षणेऽर्थसंदेह इति स्थितिः ।।

आद्ये पूर्वदलद्वयेन तव घटत्वप्रकारकं ज्ञानं तव घटत्ववद्विशेष्यकं ज्ञानमितिशब्दज्ञानयोः सिद्धसाधननिरीसः । यावदित्युक्त्या न्यायमते पञ्चमानुव्यसायादौ बाधनिरासः फसम् । द्वितीये आद्योन ज्ञानपदेन तत्पदस्य प्रामाण्यपरामर्शितापत्या बाधनिरासः, द्वितीयेन तु व्यापारानुबन्धितया तादृशात्मादिनाऽप्रसिद्धिनिरासः, फलम् । तृतीयेनापि व्यापारानुबन्धितयात्मादिग्राह्यतया बादनिरासः फलम् । समानाधिकरणपदद्वयेन ४ तादृशेश्वरज्ञानग्राह्यत्वाभावाद्बाधनिरासः फलमुक्तप्रायमित्यर्थः ।

उक्तार्थपरिज्ञानाय पक्षधराद्युक्ततदीयप्रक्रियामाह - प्रथममिति ।। निर्विकल्पकस्येति ।। ज्ञानत्ववैशिष्ट्यविषयकत्वस्येत्यर्थः । सविकल्पकस्येति ।।
घटत्वप्रकारकत्वपुरोवृत्तिविशेष्यकत्वविषयकस्येत्यर्थः । संशयहेतुत्वोपपादनायैवमुक्तिः । घटांशोपि निर्विकल्पकस्य तदयोगात् -- कोटीति ।। कोटिद्वयस्मरणं समूहालम्भनरूपमित्यर्थः । साधारणधर्मदर्शनरूपधर्मिज्ञानस्योभयकोटिसाधारण्यादिति भावः -- अर्थेति ।।

१.रात्त-कुं. २. वर्तित्वेन - कुं. ३. येऽनु-क-ख-ग-च-छ. ४.नातादृ-मु-अ,
येता - आ.

ज्ञप्तौ-परस्त्वा-न-भङ्गः) प्रामाण्यवादः पु - १२६.

द्वितीयहेतावपि तृतीये प्रमाण्यसंदेहक्षणेऽनुव्यवसायनाशात्प्रामाण्यसंशयघटिता याऽर्थसंदेहसामग्री

तस्या १ अनुव्यवसायसमकालीनत्वं नास्तीति नार्थे व्यभिचारः । न तु स्वाश्रयविषयकनिश्चसमानकालीयसंशयविषयत्वं हेतुः । प्रामाण्यसंशयोत्पत्तिक्षणेऽ २ नुव्यावसायस्य नाशेनासिद्धेः ।
तृतीयहेतावपि घटविषयकनिश्चयधर्मिकप्रामाण्यसंशयजन्यसंशयाविषयत्वं पटेप्यस्तीत्यर्थे व्यभिचारः । तद्वारणाय ३ ग्राह्यमाण्याश्रयविषयकत्वेन निश्चयो विशेषितः ।

इदं रजतं न वेत्येवं रूपेणार्थसन्देह इत्यर्थः । अर्थघटिकपूर्वभाविप्रामाण्यसन्देहस्यैव
कोटिस्मृतिरूपत्वाच्चतुर्थक्षणेऽर्थसन्देह इति भावः ।।
प्रामाण्यसंशयघटितेति ।। कोटिस्मृतिरूपत्वात्तस्य तद्घटिता ४ मनस्संयोगादिरूपा या सामग्रीत्यर्थः । सामग्रीजन्येति
विशेषणं व्यर्थं एवं च नार्थे नैकान्त्यमित्याशङ्क्य तत्सार्थक्यं वक्तुमाह-- नत्विति ।। द्वीतीयहेतुर्मणिकृदभिमतएवोत्प्रोक्षितो न साक्षादुक्त इति एवमेव तस्याभिमतिः ५ किं सामग्रीपदप्रक्षेपेणेत्यतोऽसिद्धिरूपबाधकोपदर्शनेतत्कृतम् । असिद्धिवारकत्वेपि यथोक्तविशेषणविशेष्यभावेन वैयर्थ्यमिति भावः-- पटेपीति ।। पटज्ञानस्यापि ग्राह्यप्रामाण्याश्रयतया तद्ग्राह्यकानुव्यवसायग्राह्यत्वेन साध्याभावादिति भावः-- विशेषत इति ।।

१. म-कुं २.तदनु. -कुं ३.ग्राह्यपदं न- क. ४.तात्म-मु-अ-आ. ५.कुतोन ।
इत्यादिकं - अ-आ.

ज्ञप्तौ-परस्त्वा-न-भङ्गः) प्रामाण्यवादः पु - १२७.
---------- ---------- ----------

तथापि व्यावसायप्रामाण्यस्य स्वाश्रयविषयिका या १ प्रामाण्यानुमितितस्तद्धर्मिकप्रामाण्यसंशयजन्यसंशयविषयत्वादसिद्धिः । तद्वारणाय किञ्चिदिति विशेषणम् । एवं च नासिद्धिः । २ अनुमितिप्रामाण्यसंशयेन व्यवसायप्रामाण्यसंशयेप्यनुव्यवसाय २ प्रामाण्यसंशयेन तत्संशयाभावात् । न तु प्रामाण्यसंशयाजन्यसंशयविषयत्वं हेतुः । अर्थस्यापि तदजन्यसंशयं प्रत्यपि विषयत्वेन व्यभिचारात् । अत्र सर्वत्र विपक्षे हेतूच्छित्तिरेव बाधिका । स्वतस्त्वपक्षेऽनुव्यवसायस्यैव प्रामाण्यनिश्चयरूपत्वात् द्वितीये तत्स्थितिक्षणे तदभावघटिता या संशयसामग्री तदभावेन तृतीयक्षणे प्रामाण्यसंशयानुपपत्तेः ।।

तथा च तस्याप्यनुव्यवसायग्राह्यतया तद्धर्मिकप्रामाण्यसंशयजन्यसंशययोग्यत्वेन हेत्वभान्न व्यभिचार इति भावः -- नासिद्धिरिति ।। अखण्डाभावान्नासिद्धिवारकत्वं दोष ३ इति भावः-- अनुव्यवसायेति ।। तस्य प्रामाण्यनियमेन कदापि तत्र ४ सन्देहाभावादिति भावः । हेतूच्छित्तिं व्यनक्ति -- स्वतस्त्वेत्यादिना ।। प्रामाण्यनिश्चयेति ।। तथा चविशेषदर्शने कथं सन्देह इति भावः -- तदभावेति ।। प्रामाण्यनिश्चयरूपविशेषणदर्शनाभावेत्यर्थः ।।

१. प्रामाण्यपदं न -कुं-क-ख-ग-छ. २. अनुमितिप्रामाण्यसंशयेनेवानुव्यवसाय -ग. ३. दूषणं -आ. ४. प्रामाण्यसं- मु,अ-आ.

ज्ञप्तौ-परस्त्वा-न-भङ्गः) प्रामाण्यवादः पु - १२८.

---------- ---------- ----------

अतएव द्वितीये प्रामाण्यनिश्चयस्थितिक्षणे तदभावघटिसंशयसामग्र्यभावेन प्रामाण्यस्य स्वाश्रयनिश्चयसमानकालीनसामग्रीजन्यसंशयविषयत्वायोगात् । अनुव्यवसायस्य प्रामाण्यग्रहकत्वे ग्राहकप्रामाण्यसन्देहे ग्राह्यसन्देहनियमेन व्यवसायप्रामाण्यानुमितेः १ प्रामाण्यसन्देहनेवानुव्यवसाय २ प्रामाण्यसन्देहेनापि कादचिद्व्यवसायप्रामाण्यसन्देहापातात् । न चेष्चापत्तिः । अनुव्यवसायस्य प्रामाण्यनियमादिति ।।
उच्यते ।
आद्ये साध्येऽपसिद्धान्तो बाधो व्याघातश्च ।

अतएव ।। प्रामाण्यविश्चयस्य तन्निश्चयत्वादेवेत्यर्थः । द्वितीय इत्यस्य विवरणं स्थितिक्षण इति । तृतीय हेतूच्छित्तिं व्यनक्ति -- अनुव्यवसायस्येति ।।
प्रतिज्ञादोषांस्तावदाह--आद्यो साध्य इत्यादिना ।। उक्तरूपेण स्वाश्रयग्राहकत्वस्य प्रामाण्यग्राहकत्वरूपतया तादृशेनानुमित्यादिना ग्राह्यत्वस्य परमतेपि सिद्धत्वात्तदभावसाधनेऽपसिद्धान्तः । प्रामाण्यग्राहकेण प्रामाण्यं न ग्रह्यमित्युक्ते बाधो व्याघातश्च स्फुटएव । स्वातन्त्र्येणेत्युक्तावपि बाधोद्धारग्रन्थोक्तरीत्या बाध एव । उक्तरूपसाध्यस्यार्थेपि सत्वेन व्यभिचारप्रसक्त्य तद्वारकहेतुविशेषणवैयर्थ्याच्चेति भावः ।। अंश इति ।। सर्वं ज्ञानं गुण इति शब्द जन्यज्ञानप्रामाण्यांश
इत्यर्थः । तत्पक्षीकरणस्यापि प्रागुक्तत्वादिति भावः ।

१. तिप्रा - कुं. २. स्य - क - ख - छ.

---------- ---------- ----------

द्वितीयेंऽशे सिद्धसाधनम् । उपपादतं चैतत्परोक्तस्वतस्त्व १ निरुक्तिभङ्गे ।।

किञ्च साध्ये स्वशब्दः किं पक्षीकृतप्रामाण्यमात्र २ परः ? किं वा समभिव्याहृतपरः । नाद्यः । अप्रामाण्यस्याप्रामाण्यवत्यप्रामाण्यप्रकारकत्वरूपप्रामाण्याश्रयग्राहकेण ज्ञानेन ग्राह्यतया तदग्राह्यरूपसाध्यस्याप्रामाण्यरूपे दृष्टान्तेऽभावात् । नान्त्यः । घटरूपेऽर्थे व्यभिचाराप्रसक्त्या हेतौ ३ तृतीयपदस्य व्यर्थत्वात् ।

अस्मिन्पक्षे हि समभिव्याहृतो घट एव स्वशब्दार्थः ।

अत एवाह --उपपादितं चैतदिति ।। बाधव्याघातयोः कण्ठतोऽनुक्तावपि उपपादितप्रायत्वादुपपादितमित्युक्तम् ।।

दृष्टान्तहेतुदोषौ पक्षभेदेनाहः- किञ्चेति ।। अप्रामाण्यस्येति ।। शुक्तौ रूप्यत्वभ्रमानन्तरं बाधावतारदिदं ज्ञानमप्रमेत्यनुव्यवसाये यदप्रामाण्यवत्यप्रामाण्यप्रकारकत्वरूपं प्रामाण्यं तस्यापि पक्षत्वेन तत्प्रामाण्याश्रयग्राहकेण तद्घटकीतभूताप्रामाण्यस्य ग्राह्यतया तत्र साध्यवैकल्यमित्यर्थः । अप्रामाण्यवदित्यत्र ४ पक्षीभूतप्रामाण्यसंशयकोटिभूताप्रामाण्यवदित्यर्थस्य तट्टीकोक्तावपि तादृशप्रामाण्यघटकस्यापि तथात्वमपि भावः । व्यभिचाराप्रसक्तिं व्यनक्ति । अस्मिन्पक्ष इति ।।

१.परतस्त्व इत्यादिकं - कुं -क-ग-छ. २. मात्रपदं न -कुं-ग. ३. हेताविति न -कुं -क-ख-ग-छ. ४. स्य-मु-अ-आ.

---------- ---------- --------

घटे च घटाश्रयी १ भूतकपालग्राहकयावज्यज्ञानाग्राह्यत्वरूपं साध्यमस्त्येवेति कथं तत्र व्यभिचारप्रसक्तिः ।
किञ्चेतैरनुमानैः प्रमाण्यस्य किं साक्षग्रहणयोग्यत्वाभवः साध्यते २ निश्चयरूपफलाभावो वा । नाद्यः धर्म्यंश इव वैशिष्ट्यांशेपि त्वन्मते व्यवसायोपनीयत्वरूपा मन्मते व्यवसायोपनीते तस्मिन्साक्षणः सहजशक्तिरूपायोग्यतास्तीत्युक्तत्वेन बाधात् । संशयस्य निश्चयरूपफलाभावेनैवोपपत्त्या योग्यत्वाभावसाधनेऽप्रयोजकत्वाच्च । अन्त्येऽपि फलाभावसाधनं किं दोषशङ्कादिरूपेण प्रामाण्यविरोध्युपस्थापक ---

ननु ग्राह्यज्ञानप्रकारेत्यत्र ग्रह्यज्ञानशब्दस्यापि स्वाश्रयपरतया घटाश्रयकपालस्य निष्प्रकारप्रकारतया तद्विशेष्यविशेष्यकतया घटाश्रयग्राहकयावज्ज्ञानमप्रसिद्धमिति चेन्न । तादृशज्ञानाप्रसिद्धिरेव तद्ग्राह्यत्वं तदभावरूपसाध्यसत्वात् । अत एव 'साध्यमस्त्येव' इत्यक्तम् । यद्वा ३ कापालविषयतादृशज्ञानाप्रसिद्धिरेव तद्विषयत्वरूपफलाभावो घटे न सिद्धः । येन तत्र व्यभिचारप्रसक्तिर्न स्यादित्य ४ रुचेत्याह - किञ्चेति ।। धर्म्यंश इत्युपलक्षणम् । धर्मधर्म्यंशयोरिवेत्यर्थः -- अस्मिन्निति ।। वैशिष्ट्यांशविषय इत्यर्थः --उक्तत्वेनेति ।। बाधोद्धारग्रन्थे -- अप्रतिबन्धेति ।।

१. यभू-कुं-क-ग-ख. २. उत-ख. ३. ननु -आ. ४.त्यत आह - अ.

---------- ---------- ---------

--सामग्रीसमवधानेनाप्रतिबन्धदशायामुत प्रतिबन्धदशायाम् । नाद्यः । तदा प्रामाण्ये १ संशयाभावेनाश्रयासिद्धेः । स्वरूपासिद्धेश्च । नान्त्यः । इष्टापत्तेः ।
न च फलाभवेनैव योग्यत्वाभावस्मिध्यति । बाधस्योक्तत्वात् । वह्नौ दाहदशक्तेरिव साक्षणि प्रामाण्यग्रहणस्येव दोषशङ्कादिप्रतिबन्धेन प्रामाण्याग्रहण २ शक्तेः सहजत्वेपि मण्यादिप्रतिबन्धेनादाहस्येव दोषशङ्कादिप्रतिब्धेन प्रामाण्यग्रहणस्योपपत्तेश्च । उक्तं हि टीकाकारैः । 'न हि गोक्षुरकापसर्पणसापेक्षत्वेन गजस्य गमनशक्तिः परतन्त्रा 'इति ।

साध्ये संशयवेलायामग्राह्यमित्यनुक्तेर्विकल्पद्वयावकाश इति भावः -- इष्टापत्तिरिति ।। अप्रतिबद्धसाक्षवेद्यत्वस्य साक्षयोग्यत्वस्य वा स्वतस्त्वस्यास्मदभिमकतस्यानपायादिति भावः ।।
ननु फलाभावेन योग्यत्वाभावानुमानात्स्वतस्त्वहानिरेवेत्यत आह -- न चेति ।। बाधस्योक्तत्वादिति ।। त्वन्मत इत्यादिनेत्यर्थः । शक्तिरूपयौग्यत्वसत्वे तदग्रहोऽयुक्त इत्यत आह --वह्नाविति ।। प्रतिबन्धाभावसापेक्षत्वे कथं न स्वतस्त्वहानिरित्यत आह -- उक्तं हिति ।। वादावल्यामित्यर्थः ।
ननु मण्युक्तहेतूनां स्वोक्तहेतुप्रतिपक्षत्वेनात्रोपन्यासादुपाधेः प्रतिपक्षोन्नाकत्वपक्षे प्रतिपक्षे प्रतिपक्षान्तरवदुपाध्युद्भावनं व्यर्थमित्यतो मणिकृन्मतावष्टम्भेनाह -- उपाधेर्व्यभिचारेत्यादि ।।

१. ण्य-ग. २.णस्योपपत्तेश्च- इत्येतावदेववर्तते - क.

---------- ---------- --------

किञ्चोक्तेनानवस्थारूपेण प्रथमस्य प्रामाण्यग्रहणस्यानिपपत्तिरूपेण च तर्केण पराहतिः । अपि चोपाधेर्व्यभिचारोन्नाकत्वपक्षेऽनुव्यवसायविषयत्वयोग्यतारहितोपाधिघटितत्वामुपाधिः । तदग्राह्योपाधिघटितत्वं च तदग्राह्यत्वं विनाऽनुपपन्नम् । प्रत्यक्षाग्राह्यगुरुत्वघटितगुरुत्ववत्त्वादौ तथा दर्शनात् । १. त्वदियो हेतुस्तु तद्ग्रह्यत्वेपि ग्रहणरूपफलाभावेनैवोपपन्न इत्युपाधिस्साध्यव्यापकः ।

धर्मधर्मिवद्वैशिष्ट्यांशेपि योग्यताया उपपादिततत्वेनानुव्यवसाययोग्यतारहितोपाधिघटितत्वं पक्षीभूतप्रामाण्ये साधनवति नेति साधनाव्यापकत्वं स्पष्टम् । साध्यव्यापकत्वं कथमित्यतः साध्यं प्रति प्रयोजकत्वमस्य व्यनक्ति -- तद्ग्राह्येति ।। पूर्वोक्तोपाधेर्निष्कुप्यानुवादोयम् ।
हेतोरप्रयोजकत्वमाह -त्वदिय २ इति ।। तद्ग्राह्यत्वेपि -- तद्ग्रहणयोग्यत्वेपीत्यर्थः । एवं चोपाधिहेतत्वोरनुकूलतर्कभावाभावोक्त्या -
अनुकूलेन तर्केण सनाथे सति साधने ।
साध्यव्यापकताभङ्गत्पक्षे नोपाधिसम्भवः ।।
इत्यस्यानवकाश इति भावेनाह -- साध्यव्यापक इति ।।
साक्षणो ज्ञानगोचरस्य ज्ञानत्वांशेपि सविकल्पकत्वात्तत्सिद्ध्यर्थं परोक्तं निराह ।। किञ्चेति ।।

द्वितीयो - कुं- ख. २.द्वितीय -कुं.

ज्ञप्तौ-पस्त्वा -न-भङ्गः) प्रामाण्यवादः पु - १३३.
---------- ---------- ---------

किञ्चानुव्यवसायस्य नरसिंहाकारत्वे घटनिषयकं प्रमाणं न वेत्येव संशयः स्यात् । न तु घटविषयकं ज्ञानं प्रमाणं न वेति। ज्ञानत्वस्य धर्मितावच्छेदकत्वेनाज्ञानात् । किञ्चेद्ये संशयस्य तृतीयक्षणवृत्तित्वमसिद्धम् । असर्वज्ञेनातीन्द्रियातिसूक्ष्मक्षणेयत्ताया निश्चेतुमशक्यत्वेन स्वाश्रयनिश्चयावधिकतृतीयक्षण एव संशयो न तु चतुर्थादाविति
निर्णेतुमशक्यत्वात् ।
यदि त्वनुव्यवसायस्य प्रामाण्यविश्चयरूपत्वाभावादि्द्वतीयक्षणे तन्निश्चायाभावविशिष्टकोटीस्मरणरूपसंशयसामग्र्याः सत्वेन संशयस्य तृतीयक्षणवर्तित्वकल्पनं तर्हि संशयस्य तृतीयक्षणवृत्तित्वेनानुव्यवसायस्य प्रामाण्यनिश्चयरूप १ त्वाभावरूपं परतस्त्वं त्वाया साध्यत इत्यन्योन्याश्रयः ।

अज्ञानादिति ।। एवं च तदर्थं ज्ञानत्ववैशिष्ट्यज्ञानान्तराङ्गीकारे च स्वाश्रयनिश्चयावधिकतृतीयक्षणवृत्तित्वमसिद्धमिति भावः ।
ननु निश्चयपदेन सविकल्पक एव विवक्ष्यत इत्यत आह -- किञ्चेति ।। २ हेतुत्रयसाधारणदोषानुक्त्वा प्रातिस्विकरूपेणापि दोषमाह -- किञ्चाद्य इति ।। असिद्धमिति ।। सन्दग्धसिद्धमित्यर्थः । अन्योन्याश्रय इति ।।

१. रूपपदं न - कुं - ग - ख - छ. २. यद्वा एवं - मु - अ - आ.

ज्ञप्तौ-पस्त्वा-न-भङ्गः) प्रामाण्यवादः पु - १३४.
---------- ---------- ---------
न च चतुर्थादिक्षणवृत्तिनापि संशयेन परतस्त्वसिद्धिः । द्वितीयक्षणोत्पन्नेन कोटिस्मरणेन प्रामाण्यनिश्चयरूपप्रतिबन्धकवशात्तृतीयक्षणे संशयानुत्पादेपि तृतीयक्षणोत्पन्नेन प्रतिबन्धकध्वंसेन विशिष्टं तत्क्षणे १

तिष्ठद्यत्संशयसामग्रीरूपं कोटस्मरणं तेन चतुर्थक्षणे संशयोत्पादनसम्भवात् ।

सिद्धे चानुव्यवसायस्य प्रामाण्यविश्चयत्वाभावे संशयस्य तृतीयक्षणवृत्तित्वासिद्धिः । तत्सिद्धौ च तत्सिद्धिरित्यर्थः ।
ननु मास्तु हेतुनिश्चयः चतुर्थादिक्षणवृत्तिसंशयविषयत्वेनाप्युक्तसाध्यसिद्धिरस्त्वित्यतः प्रथमक्षणे धर्मिज्ञानरूपानुव्यवसायेन
प्रामाण्ये निश्चितेपि चतुर्थक्षणादौ तत्र संशयो नानुपपन्न इत्यप्रयोजको हेतुरित्याह -- न चेत्यादिना ।। द्वितीयेति ।। अनुव्यवसायास्थितिक्षणोत्पन्नेनेत्यर्थः-- प्रामाण्यनिश्चयरूपेति ।। पूर्वतनधर्मिज्ञानाख्यप्रामाण्यनिश्चयरूपेत्यर्थः -- तत्क्षण इति ।। २ तृतीयक्षण इत्यर्थः । सामग्रीरूपमिति ।। तदा तन्मते धर्मिज्ञानस्य नाशेपि तस्य कोटिस्मरण एवोपयोगेन तदभावस्यादोषत्वात् । तस्य नाशेपि स्मृत्युपनीते तस्मिन् ज्ञानं प्रमाणं न वेति संशयोपपत्तेश्च ।
न च तस्य प्रामाण्यत्वेनैव स्मृत्योपनयः तथैव प्रागनुभवादिति वाच्यम् । दोषेण प्रामाण्यांशप्रतिबन्धसम्भवात् ।

१. णवृत्ति - ख. २. चतुर्थ - अ.

ज्ञप्तौ-पस्त्वा-न-भङ्गः) प्रामाण्यवादः पु - १३५.
---------- ---------- ---------
द्वितीयहेतावप्यनव्यवसायस्य प्रामाण्यविषयकत्वे सिद्धे द्वितीयेऽनुव्यवसायस्य १ स्थितिक्षणे प्रामाण्यनिश्चयाभाव २ विशिष्टकोटिस्मरणरूपसंशयसामग्र्याः सत्वेन तस्या ३ अनुव्यवसायरूपनिश्चयसमानकालीनत्वसिद्धिः । सिद्धे च

तस्मिन्नुक्तरूपसामग्रीजन्यसंशयविषयत्वेन
प्रामाण्यस्यानुव्यवसायविषत्वासिद्धिरित्यन्योन्याश्रयः ।
एवं तृतीयहेतावप्यनुव्यवसायस्य प्रामाण्यनियमे सिद्धे किं प्रमैव प्रमात्वेन गृहीता अप्रमैव वेति संशयस्य प्रामाण्यानुमितिधर्मिकत्वमेव ----------

वस्तुतस्तु मन्मते दोषस्थले व्यवसायस्य साक्षवेद्यत्वात्त ४ त्प्रामाण्यस्य च मानसत्वात्तन्मात्रोपनयो न विरुद्ध इति भावः ।
द्वितीयहेतावपीति ।। स्वाश्रयनिश्चयसमानकालीनत्वं संशयसागग्र्यामसिद्धमिति योज्यम् ।
ननु धर्मिनिश्चयरूपानुव्यवसायस्य प्रामाण्यचविषयकत्वादेव विशेषादर्शनविशिष्टा
कोटिस्मरणादिसामग्री तत्कालीनेति ज्ञायत इत्यतो दुर्ज्ञानमेतदित्याह -- अनुव्यवसायस्येत्यादिना ।। द्वितीय
इत्यस्यार्थोऽनुव्यवसायस्य स्थितिक्षण इति ।
तृतीयहेतावपीति ।। अनुव्यवसायधर्मिकप्रामाण्यसंशयजन्यसंशविषयत्वं दुर्ज्ञानमिति योज्यम् । अनुव्यवसायस्य प्रामाण्यनियमदेव तत्सुज्ञानमित्यत आह -- अनुव्यवसायस्येति ।।

१. यस्थि - क-ख-छ. २.रूपप्रतिबन्धकाभाव-कुं-ग. ३. तस्यानिश्चय - क- ख-छ. ४. दप्रा-कुं.

---------- ---------- ----------

न त्वनुव्यवसायध्मिकत्वमित्यस्यार्थस्य सिद्ध्या व्यवसायप्रामाण्या १
नुव्यवसायधर्मिकप्रामाण्यसंशयजन्यसंशयाविषयत्वसिद्धे २
तस्मिन्ननुव्यवसायस्य प्रामाण्यनियमसिद्धित्यन्योन्याश्रय एव ।

एतेन प्रामाण्यं परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत् । परतस्त्वं च यत्प्रतिवादिना निषिध्यते तदेव ३ साध्यते । अत्र च भागासिद्धिर्न दोषः ।

सिद्धे च तस्मिन्निति ।। व्यवसायप्रामाण्यस्येत्यादिपरामर्शः । सिद्धान्तेप संशयादिस्थलीयप्रामाण्यानुव्यवसायस्य ४ प्रमात्वानियमादिति भावः ।
एवं मण्युक्तानुमानानि निरस्य द्वितीयस्तबके कुसुमाजलावुदयनोक्तं सुधायामाशङ्कितमनुमानं च निराह -- एतेनेति ।। निरस्तमित्यन्वयः ।
ननु परत्वस्यान्यत्वरूपस्य कोवलान्वयित्वेन स्वतस्त्वेप्युपपत्याऽर्थान्तरामित्यतस्तत्परिष्करोति -- परतस्त्वं चेति ।। तत्प्रकारप्रकारेत्यादिना प्रागुक्तरूपज्ञाना ५ ग्राह्यत्वं निषिध्यत इति तदेवेत्यर्थः ।
तथा च 'स्वग्राह्यत्वेपि कदाचित्परग्राह्यत्वात्स्वस्याप्यन्यापेक्षया परत्वात् 'इत्यादिमण्युक्तखण्डनानवकाश इति भावः -- अत्र चेति ।।
ननु 'अनभ्यासदशायामिति भागासिद्धिवारणार्थं इति वर्धमानोक्तेः कथं भागसिद्धिशङ्केति चेन्न । प्रामाण्यमात्रस्य पक्षत्वेन सांशयिकत्वादित्युक्तौ क्वचिदसिद्धेरनभ्यासदशायामित्युक्ता ६ वभ्यासदशोत्पन्न ७ ज्ञानप्रामाण्येपक्षैकदेशेऽनभ्यासोत्पन्नेपि सर्वत्र सन्देहाभावेन भागासिद्धिशङ्कायां प्रचीनमताभिप्रेतदोषत्वोक्तिरिति ज्ञेयम् ।

१. ण्यस्यानु-ख-छ-च. २. तु-मु-च-ग. ३.'साध्यते' इति न-कुं-ग-छ. ४. स्याप्रमात्वादि नि-अ. ५. ज्ञानग्रा-मु. ६.क्त्या-अ. ७. न्ने-अ.

ज्ञप्तौ-पस्त्वा-न-भङ्गः) प्रामाण्यवादः पु - १३७.
---------- --------- ----------

उद्देश्यस्य पक्षतावच्छेदकधर्मसमानाधिकरणसाध्यप्रतीतिरूपस्य फलस्य तत्समानाधिकरणसाधनप्रतीतिरूपस्य १ करणस्य चाविघातात् । यत्र २ सर्वत्र पक्षे साध्यप्रतीतिरुद्देश्या तत्रैव सा दौषः । अत्र च न काचन कृसृष्टिः ।
नापि सामान्यविप्रतिपत्त्यनानुगुण्यमिति निरस्तम् । बाधाप्रयोजकत्वाद्युक्तदोषात् ।

उद्देश्यस्येति ।। यथा भौगायतनत्वादिरूपा ३ व्यग्रशरीरादिलक्षणेनापि केवलप्यतिरेकिणेतरभेदादिसाधनम् अन्यथा तन्न स्यात्। तथेहापि यावति हेतुरस्ति तावति पक्षे पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिसम्भवात् । तावत एवोद्देश्यत्वात् । उद्देश्यसिद्धिफलकत्वादनुमानस्येत्यर्थः । तर्हि ४ दोष एव न स्यादित्यत आह -- यत्र त्विति ।। तथा च मणौ यदनभ्यासेति विशेषणमुदयनोक्तहेतुविशेषणं भङ्त्वा पक्षविशेषणं कृतं तदसिद्धिवारकं व्यर्थमित्युपेत्येति ज्ञेयम् ।
मण्युक्तपक्षापेक्षयात्र गुणविशेषणमाह - अत्र चेति ।। प्रचीनोक्तानुमानपक्षे पक्षतावच्छेदकनिर्वचनक्लेशो वा हेतुपक्षतावच्छेदकैक्यनिबन्धनः सिद्धनाधनता क्लोशो वा हेतुपक्षतावच्छेदकैक्यनिबन्धनः सिद्धसाधनता क्लेशो वा नरसींहाकारज्ञानविशेषणदुर्ज्ञानत्व -------

१. का-कुं-ग. २. तु- कुं-ग-छ. ३. व्याप्त-मु-अ-आ. ४. सा-मु.

---------- ---------- ----------
एतेनैव प्रामाण्यं परतो ज्ञायते । प्रामाण्याप्रामाण्यान्यतरमात्रकोटिकसंशय १ विषयत्वादप्रामाण्यवदित्याद्यपि निरस्तम् ।

तस्माज्ज्ञप्तावुप्तत्तौ च प्रामाण्यं स्वत एवेति ।

२ क्लेशो वा नेत्यर्थः । अप्रयोजकत्वादित्यादिपदेन प्रतिकूलतर्कपराहतिसोपाधिकत्वादिग्रहः । सुधाक्तदिशा स्वतः प्रमाणत्वेनाङ्गीकृतधर्मिज्ञानानुमितिप्रामाण्ये व्यभिचारस्य च ग्रहः -- एतेनैवेति ।। बाधादिनैवेत्यर्थः । दृष्टान्तघटनाय हेतावप्रामाण्यपदम् । अन्यतपरशब्द उभयपरः । प्रामाण्याप्रामाण्योभयमात्रकोटिकेत्यर्थः । संशयविषये घ ३ टाद्यर्थे व्यभिचारनिरासाय प्रामाण्याप्रामाण्यान्तरकोटिकेत्युक्तिः । इदं ज्ञानं ४ गुणो न वा प्रमाणमप्रमाणं वेति तदङ्तीकृतचतुष्कोटिकसंशयविषयज्ञान ५ गणत्वे व्यभिचारनिरासाय मात्रेत्युक्तिः । ६ यदि च विषयकत्वादित्यस्य कोटित्वादित्यर्थस्तदा गुणत्वे व्यभिचारवारणाय मात्रपदमिति ज्ञेनम् ६ । आदिपदेन प्रामाण्यं परतो ज्ञायते स्वतोऽग्राह्यत्वे सति ग्राह्यत्वादित्यादेर्ग्रहः ।

उपपादतज्ञाप्तिस्वतस्त्वेनैवोत्पत्तावपि तत्सिद्धप्रायमिति भावेनोत्तरवादोपत्रेपणायोक्तमुपसंहरति -- तस्मादिति ।। स्वतस्त्वे साधक ७ भावाद्बाधकाभावात्परतस्त्वपक्षे तदुभयावादित्यर्थः । उत्पत्तौ स्वतस्त्वं च सुधोक्तदिशा ज्ञानजनकमात्राधीनजन्मत्वमिति स्पष्टमिति भावः ।

१.कोटित्वात् -कुं-ग-च-छ. २. क्लेशादिः-मु-अ. त्वादिक्ले-आ-मु. ३. टत्वा-मु-अ-आ. ४. गुणुपदं नास्ति-अ-आ.
५.गुण इति न -मु-अ. ६.अयं-ग्रन्थः नास्ति-कुं-अ. ७. का-मु-अ-आ.

एतदप्युक्तं 'अन्यथा' इत्यादिना । फलाभावमात्रेण स्वरूपयोग्यत्वाभावसाधने लोकसिद्धसर्वव्यवस्थायोगादित्यर्थः ।।
।। ज्ञप्तौ परतस्त्वानुमानभङ्गः ।। ९ ।।

एतदपीति ।। निश्चयरूपफलाभावे योग्यत्वाभावो नेत्येतदपीत्यर्थः -- लोकेति ।। प्रतिबन्धकस्थलीयदाहाद्यभावेपि वह्न्योदस्तच्छक्तास्तीति लोकसिद्धव्यवस्थेत्यर्थः ।
।। ज्ञप्तौ परतस्त्वानुमानभङ्गः ।। ९ ।।

ननु कथमेतत् अनित्यप्रमा ज्ञानहेत्वतिरिक्तहेतुजन्या कार्यत्वे सति तद्विशेषत्वात् । अप्रमावत् ।

एतदिति ।। उत्पत्तौ च प्रामाण्यं स्वत एवेत्येतदित्यर्थः । कुत इत्यतः कुसुमाञ्जल्युक्तेन तत्वनिर्णयटीकाद्याशङ्कितेनानुमानेन विरोधं मानाभावं च हेतुद्वयमाह --अनित्यप्रमेति ।। प्रमेत्येवोदयनोक्तावपीश्वरज्ञानांशे बाधवारणाय तदभिप्रेतं स्वयमुक्तमनित्येति ।। अत एव अनित्यप्रमात्वं कार्यतावच्छेदकं इति रुचिदत्तोक्तिः । हेत्वधीनत्वे १ ज्ञानहेत्वधीनत्वे न साध्ये सिद्धसाधनमतो-- ज्ञानहेत्वतिरिक्तहेतुजन्येति ।। तद्विशेषत्वात् ।। ज्ञानविशेषत्वादित्यर्थः । ईश्वरज्ञाने व्यभिचारनिरासाय -- कार्यत्वे सतीति ।। ज्ञाने तद्दोषनिरासाय विशेष्यम् ।।

१. 'ज्ञानहेत्वधीनत्वे' इति नास्ति - आ- कुं.

अन्यथाऽप्रमापि प्रमा स्यात् । यदि दोषप्रतिबन्धान्न प्रमा १ तर्हि ज्ञानमपि २ सा
न स्यादित्यनुकूलतर्कसनाथानुमानविरोधात् । स्वतस्त्वे च मानाभावादिति चेन्न । प्रमाया ज्ञानत्वेन तद्धेतोर्ज्ञानहेतुततया तदतिरिक्तजन्यत्वसाधने बाधात् । विरोधाच्च ।
नापि ज्ञानत्वप्रयोजकहत्वतिरिक्तहेतुजन्येति साध्यम् । प्रत्यक्षत्वादिप्रयोजकानामिन्द्रियादीनां ----

एतेन मणौ जन्यत्वादीति हेत्वनुवादोऽनुचित इति सूचितम् । कुसुमाञ्जलौ मणौ चोक्तमनुकूलतर्कमाह-- अन्यथेति ।। प्रमात्वस्य ज्ञानसामग्रीमात्रप्रयोज्यत्वेऽप्रामायामपि प्रमात्वं स्यात् । तत्रापि ज्ञानसामान्यहेतोः सत्वादिति भावः -- ज्ञानमपीति ।। ज्ञानत्वप्रमात्वयोरेकसामग्रीप्रयोज्यत्वादेकांशे
प्रतिबन्धेऽपरांशेति तथात्वादिति भावः । मानाभावाच्चेति चान्वयः । व्याघातं चाह -- विरोधाच्चेति ।। ३ ज्ञानाजनकजन्यत्वार्थत्वेप्युक्तदोषावेवेति भावः ।।
मणिकुतोत्प्रेक्ष्य दूषितानपि पक्षान् शिष्याणां सुबोधायानूद्य निरा ४ करोति -- नापीति ।। प्रत्यक्षत्वादीत्यादिपदेनानुमितित्वोपमितित्वाशाब्दत्वानां तथा चाक्षुषत्वादीत्यत्र रासनत्वादीनां द्वितीयचतुर्थादिपदानां च परामर्शोपमानशब्दज्ञानानां रसनादीनां च ग्रहः ।

१. तदा-क. २.'सा'इति न -मु-च. ३.ज्ञानजनकाजन्यार्थत्वे -कुं ४.राह-मु-आ-अ.

---------- ---------- ----------

चाक्षुष्वादिप्रयोजकानां चक्षुरादीनां च ज्ञानत्वप्रयोजकातिरिक्तत्वेन यथायथं तैस्मिद्धसाधनात् ।
नापि ज्ञानसामान्यसामग्र्यतिरिक्तसामग्रीजन्येति साध्यम् । सामग्रीशब्देन कृत्स्नकारणचक्रविवक्षायां सामग्रीभे १ दे कार्यभेदनियमेन प्रमाया ज्ञानभिन्नत्वापत्तेः । कतिपयकारणच २ क्रविवक्षायां चोक्तरीत्येन्द्रियादिभिः सिद्धसाधनात् ।।
।एतेनानित्यज्ञआनत्वावच्छिन्नकार्यता ३ भिन्नकार्यत्व ---

सिद्धसाधनादित्युपलक्षणम् । ज्ञानत्वस्येश्वरज्ञानवृत्तित्वेन ४ करणाप्रयोज्यतया तत्प्रयोजकसामग्र्यप्रसिद्ध्य साध्यप्रसिद्धिरित्यपि बोध्यम् ।।
ननु ज्ञानत्वप्रयोजकहेत्वित्यस्य ज्ञानत्वाश्रयजनकसामग्रीत्यर्थो विवक्षितः । तेन नेन्द्रियादीभिः सिद्धसाधनम् । तेषामपि तदाश्रयजनकसामग्रीत्वेन तदन्यत्वाभावादित्यत आह -- नापि ज्ञानसामान्येति ।। ज्ञानत्वाश्रयसामग्रीत्यर्थः --- सामग्रीभेद इति ।। सामान्यविशेषकार्यस्थलेपि सामान्यकार्यसामग्रीतो विशेष ५ कार्यसामग्री न भिन्ना किन्तु मिलितैवेति भावः -- सिद्धसाधनादिति ।। इन्द्रियादीनामपि ज्ञानत्वाश्रयकतिपयकारणान्यत्वादिति भावः ।।
ज्ञानत्वस्य नित्यवृत्तितयानवच्छेदकत्वादाह-- अनित्यज्ञानत्वेति ।। अनित्यज्ञानत्वेना ६ नवच्छिन्ना नियता ७ व्यावर्तिता वा ८ या कार्यता ---

१. दयनियमेन-ग. २. चक्रपदं - न-मु-च. ।अयं ग्रन्थः-क-च. पुस्तके नास्ति. ३. अन्य-मु-छ-ग. ४.करण-कुं. ५.कार्यपदं न-मु. ६. नाव-कुं .अ-आ. ७.नित्यव्यावर्तिता -कुं. ८. वा इति - न -आ-कुं.

---प्रतियोगिककारणजन्येति साध्यत इति निरस्तम् । इन्द्रियादिभिः सिद्धसाधनात् ।।
एतेन अनित्यप्रमा प्रमा १ प्रमोभयहेतुभिन्नहेतुजन्या जन्यत्वात्, प्रमाऽप्रमान्यतरप्रतिबन्धकजन्या वा प्रमाऽप्रमान्यतरत्वात्,
स्वविरोध्यनुभवप्रतिबन्धकजन्या वा ---------

-- अनित्यज्ञानमात्रवृत्तिरात्ममनोयोगादिप्रयोज्या कार्यता तदन्यकार्यत्वं प्रमानिशष्ठप्रणानिष्ठं च तत्प्रतियोगिकं तन्निरूपितं यत्कारणंप्रमारूपकार्यकारणं २ अप्रमारूपकार्यकारणं गुणदोषलक्षणं तज्जन्येत्यर्थः । ३ दोषजन्यत्वे बाधाद्गुणजन्यत्वेन साध्यपर्यवसानं दृष्टान्ते प्रमायां दोषजन्यत्वेन साध्यानुगमो ज्ञेयः -- सिद्धसाधनादिति ।। कार्यत्वपदेन प्रमादिवृत्तिकार्यत्व ४ मिव प्रत्यक्षमात्रवृत्तिकार्यत्वमनुमित्यादिमात्रवृत्तिकार्यत्वं चाक्षुषादिज्ञानमात्रवृत्तिकार्यत्व ४ मपि भवतीति तत्तत्प्रतियोगिककारणानीन्द्रियादीन्यपि भवन्तीति तैस्मिद्धसाधनमित्यर्थः -- प्रमाऽप्रमेति ।। तदुभयहेतुर्ज्ञासामान्यसामग्र्यात्ममनोयोगादिः । तद्भिन्नहेतुर्गुणो दोषश्च । तज्जन्यत्वं च पक्षदृष्टान्तयोः प्रमाऽप्रमयोः पूर्ववज्ज्ञेयम् । प्रमेत्युक्त्या सिद्धसाधनत्वस्याप्रमेत्युक्त्या बाधस्य न निरासः । न च प्रागभावव्यक्तिविशेषणार्थान्तरम् । भावत्वेन विशषणात् ।
यन्मते गुणादेर्विरोधिप्रतिबन्धकत्वं स्वकार्यत्वं च तन्मतेनाह -- प्रमाऽप्रमान्यतरेति ।। ५ अनित्यप्रमेत्येवं प्रागुक्तपक्षानुकर्षो ६ ऽत्रोत्तरत्र च ज्ञेयः ५ । अन्यतरप्रतिबन्धकश्च गुणो दोषश्च । तज्जन्यत्वं पूर्ववत् । हेतौ जन्यप्रमेति योज्यम् ।

१.भ्रम-छ. २. एतन्नास्ति -कुं. ३. अनित्यप्रमेति प्रागुक्तपक्षानुकर्षः सर्वत्रज्ञेयः । दोष,-अ. ४. एतावत्-आ. पुस्तके नास्ति. ५. इयं पङ्क्तिर्नास्ति-आ-अ.
६. र्षः सर्वत्र - मु.

उ-प-चि-नुन-भङ्गः) प्रामाण्यवादः पु - १४३.

--अनित्यानुभत्वात् अप्रमावत् ष चाक्षुषप्रमा चाक्षुषभ्रमाजनकजन्या अनित्यप्रमात्वात् रासनप्रमावदिति निरस्तम् ।
प्रमाजनकव्यक्तिविशेषस्योभयहेतुभिन्नत्वेनाप्रमाप्रतिबन्धकत्वेन १
चाक्षुषभ्रमाजनकत्वेन च सिद्धसाधनात् ।
नापि अनित्यप्रमा अप्रमाव्यावृत्तधर्मावच्छिन्नकार्यताप्रतियोगिकारणजन्या अप्रमाविजातीयकार्यत्वात् । घटवदितियुक्तम् ।

प्रमाऽप्रमाबहिर्भूतमीश्वरज्ञानमिति मते तु यथाश्रुतमेव । अनुमित्यादिप्रतिबन्धकप्रत्यक्षसामग्रीजन्यत्वेन सिद्धसाधनवारणाय स्वविरोधीत्यनुभवविशेषणम् । अप्रमारूपोऽनुभव इत्यर्थः । स्वशब्दस्य पक्षीभूतानित्यप्रमामात्रपरत्वेनानुमित्यादेः स्वविरोधित्वाभावान्नोक्तदोषः । स्वविरोधिस्मृतिप्रतिबन्धकानुभवसामग्रीजन्यतया
सिद्धसाधनतावारणायानुभवदम् -- अप्रमावदिति ।। तत्र दोषजन्यत्वेन साध्यानुगमो ध्येयः -- चाक्षुषभ्रमाजनकेति ।। पक्षे गुणजन्यत्वेन दृष्टान्ते रसनेन्द्रियसंप्रयोगजन्यत्वेन साध्यं बोध्यम् ।
आद्यसूत्रं स्मृत्यनुभवसाधारणं २ साध्यम् ३ द्वितीयमनुभवसाधारणं ४ तृतीयं चक्षुरादिप्रत्यक्षसाधारणमिति साध्य ५ त्रयं विवेक्तव्यम् -- व्यक्तिविशेषस्येति ।।

निर्दोषार्थकरणसम्प्रयोगादिरूपस्येत्यर्थः -- अप्रमाप्रतिबन्धकत्वेनेति ।। तदनुत्पादव्याप्यत्वरूपप्रतिबन्धकत्वेनेत्यर्थः । ।अप्रमायाः ----

१. स्वविरोध्यनुभवप्रतिबन्धकत्वेन - छ. २. ध्येयम् - आ. ३. तृतीयं - आ. ४. चतुर्थं-आ. ५. चतुष्टयम्-मु. 'साध्यत्रयमिति'नास्ति-आ. ।इयं पङक्तिर्न.

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - १४४.

---------- ---------- ---------

अप्रमाव्यावृत्तधर्मावच्छिन्नकार्यत्वमिन्द्रिय १सम्प्रयोगस्य तत्प्रतियोगिककारणमिन्द्रियादीति तज्जन्यत्वेन सिद्धसाधनात् ।
नापि अनित्यप्रमा अप्रमा २ कारणविजातीयकारणजन्या अप्रमाविजातीयकार्यत्वात् घटवत् । अन्यथा
कार्यवैजात्यमाकस्मिकं स्यादिति युक्तम् । हेतौ विजातीयत्वं यदि विरुद्धजात्यधिकरणत्वं तद प्रमात्वस्याजातित्वेनासिद्धेः । यादि ३ तु ----
-

स्वविरोध्यनुभवत्वादप्रमाप्रतिबन्धकत्वेनेत्यनेनैव
स्वविरोध्यनुभवप्रतिबन्धकत्वेनेत्यस्याप्युक्तत्वान्न तस्य पृथगुक्तिः ।-- इन्द्रियसंप्रयोगस्येति ४ ।। ५ इन्द्रियसम्प्रयोगत्वस्याप्रमाव्यावृत्तत्त्वेन तदवच्छिन्नकार्यत्वं तस्येत्यर्थः । ६ इन्द्रियादिसम्प्रयोगस्ये ७ ति ध्येयम् । अग्र इन्द्रियादीति श्रवणात् -- तज्जन्यत्वेनेति ।। संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन जनकत्वादिन्द्रियस्यापि द्रव्यत्वादिति भावः ।।
मणुकृता सिद्धान्तितानुमानान्यप्यनूद्य निराह ।। नाप्यनित्यप्रमेत्यादिना ।। ८ अप्रमाविजातीयेति ।। अप्रमाकारण विजातीयेत्यर्थः ८ । तदुक्तमेवानुकूलतर्कमाह--अन्यथेति ।। विजातीयकारणाजन्यत्व इत्यर्थः -

- अजातीयत्वेनेति ।। इदं रजतमित्यादौ धर्म्यंशे सत्वेपि धर्मांशेऽफभवेन प्रमात्वस्याव्याप्यवृत्तित्वात् । ज्ञानत्वसमनियतत्वाच्चेति भावः ।।

१.संयोगस्य-छ. २. कारणपदं न -मु-च. ३.'तु'इति न-मु-च. ४. त्वस्येति-आ. ५. इन्द्रियसंप्रयोगस्येत्यत्र. इ-मु. ६ इन्द्रियसंप्रयोगत्वस्येत्यत्र इ - आ. ७. त्यपि - आ. ८. एतन्नास्ति - कु-आ.

उ-प-चि-नुन-भङ्गः) प्रामाण्यवादः पु - १४५.

विरुद्धधर्ममात्राधिकरत्वं तदा पटज्ञानविजातीयकार्ये घटज्ञाने व्यभिचारः । अनुमित्यादीसाधारणघटज्ञानमात्रानुगतकारणाभावात् । पाकजरूपरसादौ कारणवैजात्येपि १ कार्यवैजात्यदर्शनाच्च ।

स्यादेतत् ।अनित्यप्रमात्वं अनित्यज्ञानत्वावच्छिन्नकार्यत्वप्रतियोगिककारणताभिन्नकारणताप्रतियोगि २ कार्यतावच्छेदकम् । अनित्यज्ञानत्वव्याप्यकार्यतावच्छेदकधर्मत्वात् अप्रमात्ववत् ।

घटज्ञानजातीयमपि कार्यं तद्विजातीयकार्यकारणविजातीयघटेन्द्रियसन्निकर्षादिजन्यमिति न व्यभिचार इति मण्युक्तिनिरासाय व्यभिचारं व्यनक्ति-- अनुमित्यादीति ।। अप्रयोजकत्वं चाह --पाकजेति ।। न च तत्रापि तत्प्रागभावरूपहेतुवैजात्यमस्तीति वाच्यम् । भावरूपविजातीयेति साध्यार्थत्वात् । अन्यथा प्रागभावेनैव सिद्धसाधनतापत्तेरिति भावः ।।

मण्युक्तानुमानान्तरमाशङ्कते स्याद्तदिति ।। प्रमात्वस्य नित्यवृत्तितया कार्यतावच्छेदकत्वादनित्यप्रमात्वमित्युक्तिः । एवं साध्येपि ज्ञेयम् । अनित्यज्ञानत्वावच्छिन्नं यत्कार्यत्वं तत्प्रतियोगिका तन्निरूपिता कारणता

आत्ममनोयोगादिनिष्ठा तद्भिन्ना या कारणता गुणदोषनिष्ठ तत्प्रतियोगिककार्यतावच्छेदकमित्युक्तौ पक्षे गुणजन्यवावच्छेदकत्वेन ३ दृष्टान्ते दोषजन्यतावच्छेदकत्वेन ३ साध्यसिद्धिः । अन्यथा बाधादिति भावः । हेतावनित्यज्ञानत्वे व्यभिचारनिरासाय व्याप्यान्तं धर्मविशेषणम् । अभेदेपि व्याप्यत्वमिति पक्षे तु न्यूनवृत्तित्वं व्याप्यत्वं बोध्यम् । घट ४ नित्यज्ञानत्वादौ तद्वारणाय विशेष्यम् -- बाधकं विनेति ।।

१. कार्यपदं न -ग-क-ख. २. क-मु-च-ग. ३. इदं नास्ति -कुं. ४.टादि-अ.

न च विशेष्यासिद्धिः । अनित्यप्रमात्वं कार्यतावच्छेदकम् बाधकं विना कार्यमात्रवृत्तिधर्मात्वात् अप्रमात्ववदित्यनेन तत्सिद्धेः । नीलघटत्वादौ प्रत्येकानुगकप्रयोजकद्वयादेव निलरूपघटत्वयोः सिद्ध्या समाजस्यार्थिकत्वं बाधकम् । जन्यघटज्ञानत्वादौ १ तु स्वावच्छिन्नकार्यत्वप्रतियोगिककारणासम्भवो बाधक इति न तत्र व्यभिचार इति चेन्मैवम् । घटज्ञान इव वक्ष्यमाणरीतच्याऽनित्यप्रमामात्रे २ प्यनुगत ३ गुणाभावेनानुमान ४ द्वयेपि बाधात् । द्वितीये विशेषणासिद्धेश्च ।

अवच्छेदकान्तरोपपन्नकार्यताश्रयवृत्तित्वं वा स्वावच्छिन्नकार्यताप्रतियोगिककारणासम्भवो वा एकव्यक्तिकत्वं वा गौरवं वेत्यादि यत्कार्यतावच्छेदकत्वे बाधकं तद्ध्वनेत्यर्थः -- अप्रमात्ववदिति ।। तत्र बाधकचतुष्टयस्याप्यभावाद्धेतुसाध्ये व्यक्ते इति भावः ।।

हेतौ विशेषणकृत्यं मण्युक्तमेव दूषण ५ ज्ञानसौकर्यायाहः-- निलेति ।। प्रयोजकद्वयादिति ।। घटत्वप्रयोजकान्नीलत्वप्रयोजकाच्चेत्यर्थः-- समाजस्य ।। घटत्वनीलत्वरूपावच्छेदकान्तरोपपन्नकार्यत श्रवणवृत्तित्वमित्यर्थः -- स्वेति ।। स्वावच्छिन्नं यत्कार्यत्वं तन्निरूपितानुगतैककारणासम्भव इत्यर्थः -- घटज्ञान इवेत ।। जन्यघटज्ञान इवेत्यर्थः -- विशेषणेति ।। स्वावच्छिन्नकार्यत्वप्रतियोगिकैककारणासम्भवरूबाधकस्यैव सत्वेन बाधकं विनेत्यरस्यासिद्धेरित्यर्थः -- व्यर्थेति ।। ज्ञानत्वादौ नित्यवृत्तित्वबाधकाभवेनैव व्यभिचारनिरासादिति भावः ।।

१.तु इति न -कुं - ग. २. अपिपदं न - कुम. ३. कारणाभा - कुं.-क. ४. द्वयाभावेपि - ग. ५. ज्ञानपदं न -मु.

उ-प-चि-नुन-भङ्गः) प्रामाण्यवादः पु - १४७.

बाधकराहित्यस्यैव हेतुत्वसम्भवे व्यर्थविशेष्यत्वाच्च । साधकाभावेन सत्प्रतिपक्षत्वाच्च । अप्रमामात्रानुगतदोषाभावेन दृष्टान्तस्य साध्यसाधनवैकल्याच्च ।।
ननु प्रमाविशेष्यहेतूनां भूयोऽवयवेन्द्रियसन्निकर्षादीनां प्रमामात्रे सन्निकर्षत्वादिनाऽननुगमेपि गुणत्वेनानुगतिरस्तीति कथं बाध इति चेन्न । गुणत्वस्याजातित्वेन प्रमामात्रजनकत्वरूपतयान्योन्याश्रय १ यात् ।।

न च बाधकं विनेत्यत्र प्रागुक्तबाधकचतुष्टयमेव बाधकपदेन विवक्षितम् । अतो ज्ञानत्वादौ व्यभिचारनिरासाय विशेष्यमिति
वाच्यम् । सामान्यशब्दस्य विशेषणपरत्वमुपेत्य विशेष्य २ कृत्योक्तेरयुक्तत्वादिति भावः ।।

साधकेति ।। अनुगतकारणतावच्छेदकेन हि कार्यतावच्छेदकमुपेयम् । प्रकृते चानुगतकारणं नेति वक्ष्यमाणत्वादिति भावः -- दृष्टान्तस्येति ।। अनुमानद्वयेपीत्यनुकर्षः । अनुगतदोषाभावेनाद्यहेतौ कार्यतावच्छेदकत्वस्य द्वितीये स्वावच्छिन्नकार्यतेत्यादिबाधकाभावस्य चाभावेन साधनकैवल्यम् । अनुगतकारणाभवेन साध्यवैकल्यं चेत्यर्थः -- अजातित्वेनेति ।। संयोगत्वज्ञानत्वादिना साङ्कर्यादिति भवः । एतेन दृष्टान्ते भ्रमहेतूनां दोषत्वेनानुगमोप प्रयुक्तः -- अन्योन्याश्रयादिति ।।

१. त्वा - च . २. विशेषणकृ - कु - अ.

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - १४८.

एतदप्युक्तं 'प्रामाण्यं च स्वत एव अन्यथानवस्थानात् 'इति । उत्पद्यत इति शेषः । ज्ञानात्मिकाया भ्रमेपि धर्म्यंशेऽनुवृत्तायाश्च प्रमायाः १ ज्ञानहेत्वन्यहेतुजन्यत्वदिति साधने धटादिवदज्ञानत्वाद्यपत्या प्रमा ज्ञानं घटस्तु नेत्यादिव्यवस्थाऽयोगादित्यर्थः ।।
उत्पत्तो परतस्त्वे चिरन्तनानुमानभङ्गः ।। १० ।।

अनत्यप्रमात्वस्य कार्यतावच्छेदकत्वसिद्धावुक्तरूपगुणत्वसिद्धिः। तत्सिद्धौ च तत्सिद्धित्यन्योन्याश्रययादिर्यर्थः -- चिरन्तनानुमानभङ्गः । उदयनोक्तानुमानस्यैव मणिकृता परिष्कृतत्वेन नूतनानुमानाकारणात्तद्भङ्गेन मण्युक्तानुमानभङ्गोपीति चिरन्तनेत्येवोक्तम् ।।
।। २ उत्पत्तौ परतस्त्वे चिरन्तनानुमानभङ्गः ।। १० ।।
अथ मतं ग्राह्यप्रमा वा विशेष्यनिष्ठविशेषणज्ञानं वा अविद्यमानासंसर्ग्राग्रहो वा गुणः ।।

यदुक्तमनुगतगुणाभावेनानुमानद्वये बाधादित्यादि तन्नेति भावेनानुगुणमाशङ्क्य निराह -- अथेति ।। यद्यपि 'प्रमामात्रे नानुगतो गुण 'इत्येवोक्तं मणौ तथापि पक्षधरप्रगल्भख्यातृभिरनुगतगुणस्योक्तत्वात्तन्मताशङ्केयम् --ग्राह्येति ।। येन यद्ग्राह्यं तत्र तत्प्रमाहेतुस्त्यर्थः -- विशेष्यनिष्ठेति ।। विशेष्यसम्बद्धेत्यर्थः ।

१. ज्ञानहेत्वजन्यहेतुजन्यत्वादिसाधने - ख. २. परतस्त्वेऽनुमानभङ्गः - आ.

अनित्यप्रमामात्रानुगतगुणभङ्गः प्रामाण्यवादः पु - १४९.

--- --- ---

१ प्रमामात्रेऽनुगते हेतुः । नाचात्र २ प्रमाणाभावः । आद्ये ३ पक्षे विशिष्टज्ञानत्वेन विशेषणज्ञानजन्यां ४ धारावाहिकोत्तरप्रमां प्रति विशेष्यमपि विषयीकुर्वन्त्याः पूर्वस्या ग्राह्यमायाः कारणत्वे क्लृप्ते प्रमान्तरंप्रत्यपीश्वरनिष्ठाया ग्राह्यप्रमाया गुणत्वकल्पनात् । द्वितीयेपि विशिष्टज्ञानरूपं सामान्यं प्रति विशेषणज्ञानस्य विशेषणज्ञानत्वेनरूपेण सामान्येन कारणत्वे 'यत्सामान्ययोः कार्यकारणभावो बाधकाभावे सति तद्विशेषयोरपि सः

'इति न्यायेन विशिष्टप्रमां प्रति विशेष्यनिष्ठविशेषणज्ञानत्वेन कारणत्वकल्पनात् । तृतीयेपि संसर्गग्रहसामान्यं प्रत्यसंसर्गाग्रह ५ मात्रस्य कारणत्वेन तद्विशेषस्याविद्यमानासंसर्ग्राग्रहस्य संसर्गप्रमां प्रति कारणत्वकल्पनात् इति।।मैवं-

आद्यपक्षे धारवाहकपूर्वप्रमायां ग्राह्यप्रमात्वे सत्यपि तस्या विशेषणज्ञानत्वेनैव कारणतया ग्राह्यप्रमात्वेन तदभावात् ।।

तेनाशब्दइत्यादौ न दोषः । अविद्यमानो यो संसर्गः धर्मिधर्मसंम्बन्धाभावः तदग्रह इति तृतियपक्षार्थः । मतत्रयेपि क्रमेण युक्तीराह -- आद्येत्यादिना ।। प्रमान्तरं प्रतीति । ६ अनुभवं प्रतीत्यर्थः -- विशिष्टेति ।। जन्यविशिष्टज्ञानेत्यर्थः --
तदभावादिति ।। ७ कारणत्वाभावादित्यर्थः ।

१. प्रामाण्यमात्रे -ख. २. मानाभावः-छ-क-ख-मु. ३. द्यप-कुं-ग-च. ४. न्यधा-च-ग-ख-कुं. ५. मात्रपदं न - मु. ६. अनुत्तरप्रमां प्र- आ. ७. एतन्नास्ति - कुं - अ.

न्यायदीपयुततर्कताण्डवम् (प्र. प्ररिच्छेदः पु - १५०.

तत्र तस्याः समानाधिकरणाया एव कारणत्वक्लृप्त्या प्रमान्तरेपि समानाधिकरणाया एव १ कारणत्वक्लृप्त्या प्रमात्वेपि समानाधिकरणाय एव १ तत्कल्पनाप्रसङ्गाच्च ।।
ईश्वरज्ञानस्य भ्रमं प्रतीवोपादानसाक्षात्कारतयैव कारणत्वस्य क्लृप्तत्वेन ग्राह्यप्रमात्वेन काणत्वकल्पनस्य प्रामाण्यपरतस्त्वनिश्चयाधीनत्वेनान्योन्याश्रयाच्च।

ग्राह्यप्रमात्वेनैव कारणत्वमित्यत्र कल्पकाभावादिति भावः ।।
न च शाब्दप्रमायां ग्राह्यविशेषस्य वाक्यार्थस्य प्रमाहेतुरिति प्रमासामान्ये ग्राह्यप्रमासामान्यं हेतुरिति वाच्यम् । तथाप ग्राह्यप्रमामात्रस्यातिप्रसक्ततया तद्ग्राह्यप्रमायां तद्ग्राह्यप्रमाहेतुरित्यननुगम एवेत्यनुगतगुणालाभावत् । अप्रमात्वे दृष्टान्ते साध्यवैकल्यस्यैवमप्यपरीहाराच्चेति भावः ।।

नन्वस्तु विशेषणज्ञानत्वेनैव हेतुतेत्यत आह -- २ तत्रेति ।। ३ यद्वा ग्राह्यप्रमात्वेन तत्र कारणत्वेपि न सर्वत्रानुगतगुणालाभ इत्याह -- ४ तत्रेति ।। उक्तविशिष्टप्रमायां तस्याः विशेषणप्रमात्वेन हेतुभूतपूर्वप्रमाया इत्यर्थः -- क्लृप्त्येति ।। अन्यथातिप्रसङ्गान्निर्विकल्पकादरानापत्तेश्चेति भावः ।।
नन्वीश्वरज्ञानस्या ५ कारान्तरेण हेतुत्वात्क्लृप्ते ६ र्वा प्रमात्वस्य गुणप्रयोज्यत्वान्यथानुपपत्यावैतत्कल्प्यत इत्यत आह --
ईश्वरेति ।।

१. एतावन्नास्ति-छ-ख-मु. २. यत्रेति-आ. ३. यद्वेत्यादि नास्ति-अ. ४. यत्रेति-आ. ५. स्यप्र-आ.अ. ६. क्लृप्तवप्र-आ.

लिङ्गाभासविप्रलम्भकवाक्यजन्ययोर्यादृच्छिकसंवावेन
प्रमायोस्त्वदुक्तव्यधिकरणजन्यत्ववत्समानाधिकरणदोषजन्यत्वस्यापि
सत्वेनाप्रमाण्यास्याप्यपाताच्च ।।
धारावाहिके भ्रमे पूर्वस्य भ्रमस्योत्तरभ्रमं प्रतित्वदुक्तरीत्या ग्राह्यभ्रमत्वेन कारणत्वे क्लृप्ते भ्रमान्तरेपि ग्राह्यभ्रमाः कारणत्वेन कल्प्यः । स एव च भ्रममात्रेऽनुगते दोषः । एवं च संवादादिशुकादिवाक्यमूलत्वेन नित्यप्रमावद्विसंवादीशुकादीवाक्यमूलत्वेन नित्यभ्रमोपि सिद्ध्येदित्यतिप्रसङ्गाच्च ।। आद्यद्वितीययोर्विशेष्टज्ञानं
प्रति विशेषणज्ञानकारणत्वस्यैव मां प्रत्यसिद्धेश्च । वक्ष्यते चैतन्निर्विकल्पकभङ्गे ।।

यादृच्छिकेति ।। यादृच्छिकसंवादेन हेतुनावगतप्रमात्वयोरित्यर्थः -- अप्रामाण्यस्येति ।।
नचायं दोषः सिद्धान्तेपीति वाच्यम् ।। विषयसत्वाभावविशिष्टस्यैव दोषस्याप्रमाहेतुत्वात् । नचैवं परमते युक्तम् । उक्तरूपदोषाभावदेव प्रमात्वोपपत्तौ गुणस्य हेतुतानापत्तेरिति भावः ।।
नत्यभ्रमोपीति ।। अन्यथा प्रागुक्ताप्रमात्वदृष्टान्ते साध्यसाधनवैकल्यापत्तेः । इतोन्यस्यानुगतदोषस्याभावेन कार्यतावच्छेदकत्वासिद्धेरिति भावः -- विशेषणज्ञानकारणत्वस्यैवेति ।। दूरे यत्सामान्ययोरिति न्यायावतार इत्येवकारार्थः । १ प्रामाणिकत्वेनसिद्धमित्यत आह -- वक्ष्यत इति ।।

१. अयं ग्रन्थः नास्ति -कुं-अ--प्रामाणिकत्वमसिद्धमित्यत आग - आ,

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - १५२.

द्वतीयतृतीययोनिर्विकल्पक १ रूपप्रमाननुगमाच्च ।।
ननु निर्विकल्पकेप्यविद्यमानस्यासंसर्गस्याग्रहोस्त्येवेति चेन्न । असंसर्गाग्रहरूपो यः संसर्गग्रहप्रतिबन्धकस्तदभावतया संसर्गग्रह एव हेतुत्वात् ।।
न च निर्विकल्पकं प्रमाऽप्रमाबहिर्भूतम् । तथापि निर्विकल्पकस्य गुणाजन्यत्वेप्यप्रमाया अपि तदुपदत्तेः । तृतीयेऽविद्यमानासंसर्ग २ शब्देनोक्तस्य विद्यमानसंसर्गस्य योयम ३ ग्रहस्तस्य धारावाहिकद्वितीयादिप्रमाननुगमाच्च ।

रुचिदत्तादिस्तु विशेष्यनिष्ठविशेषणज्ञानं गण इत्ययुक्तम् । लोहितःस्फटिक इत्यादौ लौहित्यसाक्षात्सम्बन्धविषयभ्रमे अन्वयव्यभिचारात् । लौहित्यरूपविशेषणस्य परम्परासम्बन्धेन

विशेष्यनिष्ठत्वात् । न च तत्सम्बन्धविषयकप्रमायां तत्सम्बन्धेन विशेष्यवृत्ति यद्विशेषणं तज्ज्ञानत्वेन न हेतुतेति वाच्यम् । एवं हि तत्संम्बन्धविषयकतद्विशेषणविशेष्यकप्रमात्वं कार्यतावच्छेदकम् । तत्संम्बन्धेन ४ तद्विशेषणज्ञानत्वं कारणतावच्छेदकमित्यननुगम एव । किंच । भावत्वविशिष्टप्रत्यक्षे व्यभिचारश्चेत्यदूषयत् ।।
।अननुगमाच्चेति ।।नन्वीश्वरज्ञानमादाय द्वितीयमपिनिर्विकल्पके अनुगमयितुं शक्यमिति चेन्न । तस्य साधारणहेतुत्वेन विशेषाकारेण हेतुत्वकल्पकाभावादितिभावः । तृतीयमनुगतमिति शङ्कते -- नन्विति ।। अननुगमो न दोषायेति शङकते -- नचेति ।। बहिर्भूतमिति ।।

१. रूपपदं नास्ति-मु. २. र्गाग्रहश-कुं-च-ग. ३. य ग्रृ-कुं-च-ग. ४.तद्धिशेष्यवृत्ति-अ. ।अयं ग्रन्थः नास्ति-कुं - अ.

धारावाहिकद्वितीयादप्रमाननुगमाच्च । अविद्यमानासंसर्गस्य संसर्गरूपतया तदग्रहस्यासंसर्गाग्रहविशेषत्वाभावाच्च ।।
किञ्चानित्यप्रमामात्रानुगतगुणाङ्गीकारे प्रमारूपानुमित्यादौ प्रमात्वस्यानित्यप्रमामात्रानुगतगुणेन अनुमितित्वशाब्दत्वादेश्च लिङ्गपरामर्शशब्दकारणकत्वादीनैवोपपत्या यथायथं लिङ्गपरामर्शादिप्रतिनियतगुणोक्तिर्व्यर्था ।।

गुणदौषान्यतराजन्यत्वादितिभावः ।-- संसर्गरूपतयेति ।। नञ्द्वयेन विध्यमानसंसर्ग १ लाभम विना पर्यवसानाभावादिति भावः -- असंसर्गाग्रहविशेषत्वाभावाच्चेति ।। तथाच यत्सामान्ययोरिति न्यायावतारेण कथं तस्य गुणत्वलाभाय इति भावः ।।

एवमनुगतगुणपक्षत्रयं प्रत्येकं दूषयित्वा संहत्यपि दूषयितुं 'भूयोऽवयवेन्द्रियसन्निकर्षयथार्थलिङ्गसादृश्यवाक्यार्थज्ञानानां यथायथं प्रत्येकमेव गुणत्वं 'इति मण्युक्तं २ विरुद्धं चेति भावेनाह -- किञ्चेति ।। यद्वा उक्तप्रकारपक्ष एव युक्त इत्याह -- किञ्चेति ।।

न च प्रमात्वानुमितित्वादिरूपकार्यतावच्छेदकबलात्तदनुगुणोनुगतगुणः कश्चित्स्वीकार्य इति शङ्क्यम् । नीलघटत्वादाविव प्रमात्वानुमितित्वादेः स्वसामग्रीमहामहिम्नैवैकेत्र

समाजेनावच्छेदकान्तरोपपन्नकार्यताश्रयवृत्तिकत्वरूपबाधकेन तस्य कार्यतावच्छेदकत्वात् । अत एव प्रमात्वस्यानुमितित्वादेश्चप्रयोजकसामग्रीसमाजस्य प्रमामात्रानुगत गुणेनेति लिङ्गपरामर्शशब्दकारणकत्वादिनेत्युक्तिः ।।

१. र्गपर्य - मु - र्गाभावं वि - आ. २. क्तिविरु -मु. -अ -आ.

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - १५४.

किञ्च परतस्त्वनादिना १ हि विषयसत्वनैरपेक्ष्येण स्वत एवाप्रमाव्यावृत्तं ज्ञानसाधारणकारणादिकं किंचित्कारणं प्रमायां साधनीयम् । नतु २ ज्ञानसाधारणस्यैव विषयसत्वविशेषणेनाप्रमाव्यावृत्तिः साधनीया । स्वतस्त्ववादीनापि प्रमायां ज्ञानसाधारणकारणस्य विषयसत्वस्य ३ स्वीकृतत्वेन सिद्धिसाधनात् ।।

अत एव सुधायां 'ज्ञानजनकमात्राधीनजन्मत्वं स्वतस्त्वं 'इति मात्रशब्देन जनकान्तरमेव निषिद्धम् । न तु विषयसत्वम् । तस्यातीतादिविषयकानुमित्यादीसाधारणत्वेन प्रामाण्यशरीरान्तर्गतत्वेन च तदजनकत्वात् ।।

पूर्वोक्तमतत्रयेपि विषयसत्वमेव गुण इति फलितमिति ४ 'तच्चानेन साधितमित्यादिना 'वक्ष्यन् विषयसत्वं च न गुण इत्याह ।। किञ्चेति ।। अप्रमेति ।। अप्रमाकारणव्यावृत्तमित्यर्थः । ५ ज्ञानसाधारणकारणस्येति पररीत्योक्तिः । स्वमते ग्राह्यज्ञानविशेषणज्ञानयोरहेतुत्वादिति ज्ञेयम् ५ -- अप्रमेति ।। अप्रमाकारणव्यावृत्तिः-- अत एवेति ।। विषयसत्वस्यानुमतत्वादेवेत्यर्थः-- सुधायां जिज्ञासाधिकरणसूधायामित्यर्थ ।।

ननु विषयसत्वस्यापि प्रमाजनकतया जनकान्तरविषेधे विषयसत्वमपि सुधायां निषद्धमेव । अतस्तदनुप्रवेशे सति न सिद्धसाधनमित्यत आह -- तस्येति ।। विषयसत्वस्येत्यर्थः । अतीतेति ।। अनुमित्यादिप्रमाण्याय पूर्वं तत्र विषयसत्वस्य वाच्यतया तस्येदानीन्तनानुमित्यजनकत्वादिति भावः ।।

१.पीहि-मु. २. ननु-कुं-च-ग. ३. च-मु. ४. तिवक्ष्यन् - कुम- अ. ५ .इयं पङ्क्तिर्नास्ति - मु- आ.

एतेन यादृच्छिकसंवादेन प्रमायां लिङ्गाभासेन शब्दाभासेन च जन्यायामनुमितौ शाब्दप्रतीतौ च पक्षस्य वस्तुतः साध्यवत्वं योग्यता च गुण इति निरस्तम् ।। स्पष्टयिष्यते चैतत् ।।

तच्चानेन साधितम् । विशेषणज्ञानस्यासंसर्गाग्रस्य च भ्रमसाधारण्यात् । विशेष्यनिष्ठशब्देनाविद्यमानशब्देन च विषयसत्वस्यैवोक्तेः ।

तदजनकत्वादिति ।। यत्तु प्रमाणपद्धतौ साधनपदेन प्रमातृप्रमेययोर्व्यवच्छेद इति कारणत्वमात्रमुपेत्य साधकतमत्वाभाववचनं तदभ्युपेत्यवादेनेति भावः--एतेनेति ।। विषयत्वस्य

गुणत्वाभाववचनेनेत्यर्थः ।
वास्तवसाध्यवत्वयोग्यतयोर्विषयसत्वरूपत्वादिति भावः ।।
कथमिदं साध्यत्वादिकं विषयसत्वगर्भमित्यत आह -- स्पष्टयिष्यत इति ।। उक्तरभङ्ग इत्यर्थः।।
नन्वस्तु विषयसत्वं न गुणः । तथापि ग्राह्यप्रमेत्याद्युक्तपक्षत्रयेपि किमागतमित्यत आह-- तच्चेति ।। ज्ञानसाधारणकारणस्य विषयसत्वेन विशेषितत्वमनेन पक्षत्रयेण साधितं त्वयेत्यर्थः । कथमित्यतो व्यनक्ति -- विशेषणेत्यादिना ।। विशेष्यनिष्ठेति ।। ग्राह्यप्रमेति प्रमाशब्देनेत्यपि ध्येयम् ।।

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - १५६.

अन्यथा भ्रमेपि विशेष्यानिष्ठविशेषणज्ञानं विद्यमानासंसर्गाग्रहश्च प्रमाव्यावृत्तत्वाद्दोष इति तज्जन्यत्वेनैव परतस्त्वं स्यात् ।।
तस्माद्भ्रमे स्वत एव प्रमाव्यावृत्तं पित्तीदिकमिव प्रमायामपि स्तत एव भ्रमव्यावृत्तं भूयोवयवेन्द्रियसन्निकर्षादिकमधिकं वाच्यमिति किमनेन ।।
एतेन अनित्यप्रमात्वं अप्रमाकारणताव १
च्छेदकरूपानवच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकम् ।
भ्रमावृत्तिकार्यतावच्छेदकत्वात् । घटत्ववदित्याद्यपि निरस्तम् । २
कार्यतावच्छेदकत्वस्यैव निरासादिति ।।

परतस्त्ववादिनाहीत्यादिनोक्तप्रमेयानङ्गीकारे बादकमाह -- अन्यथेति ।। स्वत एवाप्रमाव्यावृत्तस्य ज्ञानसाधाराणस्याधिकस्यानिङ्गीकारे विषयसत्वेनैव परतस्त्वस्वीकार इत्यर्थः । ग्राह्यभ्रमोप्यत्रोपलक्ष्यः । यद्वा आद्यपक्षस्यातिफल्गुत्वाद्द्वितीयतृतीययोरेवात्र पूर्वत्र च दोषोत्कीर्तनमिति बोध्यम् -- स्वत एवेति ।। विषयसत्वनैरपक्ष्येणेत्यर्थः ।।

एवं प्रमात्वमात्रेऽनुगतकारणदूषणेन मण्युक्तमनुमानान्तरमपि निरस्तमित्याह -- एतेनेति ।। अप्रमेति ।। अप्रमाकारणतादोषादिनिष्ठा तदनवच्छेदकं रूपं विशेष्यनिष्ठविशेषणज्ञात्वादिकम् । तदनवच्छिन्नकारणतानिरूपितकार्यतावच्छेदकमित्यर्थः ।

१.नवच्छेदकरूपावच्छन्न - कुं - च - क. २. ' भ्रमावृत्ति' इत्यधिकं -छ-क-ख.

यज्ञपत्यक्तवक्रानुमानभङ्गः) प्रामाण्यवादः पु - १५७.

एतदुक्तं 'अन्यथा 'इत्यादिना । अनुगतगुणाभावेप्यनित्यप्रमात्वस्य कार्यतावच्छेदकत्वे घटत्वादिकं कार्यतावच्छेदकं न तु नीलघटत्वादिकमिति व्यवस्थाऽयोगादित्यर्थः ।
अनित्यप्रमामात्रानुगतगुणभङ्गः ।। ११ ।।

दृष्टान्ते दण्डत्वादिकमेवाप्रमाकारणतानवच्छेदकरूपं बोध्यम् । हेतावप्रमात्वे व्यभिचारवारणाय भ्रमाद्यवृत्तीति ।।
भ्रमनिष्ठात्यन्ताभावप्रतियोगीत्यर्थः । नत्या १ नित्यवृत्तिप्रमात्वादौ तन्निरासाय विशेष्यम् ।।
आदिपदेन अनित्यरजतप्रमात्वं रजताप्रमाकारणतानवच्छेदकरूपावच्छिन्नकारमताप्रतियोगिककार्यतावच्छेदकं रजतभ्रमावृत्तिकार्यतावच्छेदकधर्मत्वाद्घटत्ववदित्यादिग्रहः -- कार्यतेति ।। अनुगतगुणनिरासेन स्वावच्छिन्न कार्यत्वप्रतियोगिककरणासम्भवरूपबाधकस्यैव भावेन बाधकं विना

कार्यमात्रवृत्तिधर्मत्वात्कार्यतावच्छेदकमित्यस्यासंभवात् । तथाच बाधासिद्धी इति भावः ।
रजतानुमित्यादिसाधारणगुणाभावेन रजतप्रमात्वेपि न कार्यतावच्छेदकत्वमिति ज्ञेयम् ।।
अनित्यप्रमामात्रानुगतगुणभङ्गः ।। ११ ।।

---

१. त्यावृत्ति - कुं.

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - १५८.

अथापि स्यात् । प्रमामात्रानुगतगुणाभावेपि परतस्त्वं सेत्स्यति । न ह्यनित्यप्रमात्वस्योक्तकार्यतावच्छेदकत्वं परतस्त्वम् । किन्ति तस्य स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्ति १ त्वम् । तच्चानित्यप्रमामात्रानुगतगुणाभावेप्यननुगतगुणैरपि सेत्स्यति ।
तत्र च प्रमाणं अनित्यप्रमात्वं स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्ति स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताप्रतियोगिककारणत्वाश्रयमात्रानुत्पाद्यकार्यमात्रवृत्तिधर्मत्वात् । अप्रमात्ववदित्यनुमानम् ।

यज्ञपतिमाशङ्कते --- अथापीति ।। अथापीत्याद्युक्तमेव व्यनक्ति।। प्रमेति ।। उक्तेति ।। अप्रमाकारणतेत्यादिनोक्तेत्यर्थः -- तस्येति ।। अनित्यप्रमात्वस्येत्यर्थः -- स्वेति ।। स्वस्यानित्यप्रमात्वं य स्वाश्रयस्तन्मात्रवृत्तयस्तदितरावृत्तित्वे सति तद्वृत्तयो ये धर्माः जन्यप्रत्यक्षप्रमात्वादयस्तदवच्छिन्नकार्यताश्रय एव वर्तमानत्वमुक्तकार्यताश्रय २ एव वर्तमानत्वं उक्तकार्यताश्रय २

त्वव्याप्यत्वमिति यावत् ।।
तदुक्तमेव ३ पञ्चमात्रानुमानमाह -- अनित्यप्रमात्वमिति ।। बाधनिरासाया नित्येति ।। साध्यमुक्तार्थम् । साध्यहेत्वोः स्वपदं समभिव्याहृतपरम् । एवं चानित्यप्रमात्वाश्रय एव यो न वर्तते धर्मः अनित्यज्ञानत्वादिः तदवच्छिन्नकार्यतानिरूपितकारणाश्रयो मनस्संयोगादिः तन्मात्रानुत्पाद्य कार्यमनित्यप्रमा तन्मात्रवृत्तिधर्मत्वादिति हेत्वर्थः । अनित्यज्ञानकारणमात्रानुत्पाद्यकार्यमात्रवृत्तिधर्मत्वादिति फलितोर्थः ।।

१.धर्मत्वं - छ. २. एतावन्नास्ति -- मु-आ-अ. ३. पञ्चमात्रेति नास्ति - कुं.

अनेन सामान्यकारणमात्रानुत्पाद्यकार्यमात्रवृत्ति १ धर्मत्वरूपेण हेतुना साध्यमानं विशेषकारणजन्यत्वं सर्वप्रमानुगतगुणस्य बाधित्वेनाननुगतगुणजन्यत्वमादाय पर्यवस्यति ।।
अत्र च साध्ये आद्यं मात्रपदं स्वतस्त्वपक्षेप्यनित्यप्रमात्वस्य स्वाधिकदेशवृत्तिनाऽनित्यज्ञानत्वे २ नावच्छिन्नकार्यताश्रय एव वर्तमानत्वात्सिद्धसाधनमिति शङ्कानिरासाय । द्वितीयं तु सर्वासां प्रमाणां गुणजन्यत्वसिद्ध्यर्थम् ।।

हेतेरप्रयोजकतां निरस्यन् साध्यपर्यवसानप्रकारमाह -- अनेनेति ३ अननुगतेति ।। प्रत्यक्षप्रमाह्येकैकानुगतेत्यपि योज्यम् । अन्यथा जन्यप्रत्यक्षप्रमात्वादेरवच्छेदकत्वायोगेन बाधापत्तेरिति भावः ३ ।।
साध्ये मात्रपदद्वयं व्यवच्छेदार्थकं न तु कात्स्नार्थकमित्युपेत्य दुषणज्ञानसौकर्याय व्यावर्त्यं व्यनक्ति -- अत्र चेति ।।

द्वितीयमिति ।। ४ अनित्यप्रमात्वं तादृशकार्यताश्रय एव वर्ति न त्वन्यत्रेत्यस्य व्यवच्छेदार्थकमात्रपदेन लाभात्तस्य ५ जन्यप्रत्यक्षप्रमात्वानुमितित्वेपमितित्वशाब्दत्वाश्रयेषु सर्वत्र वर्तनं ६ तेषां सर्वेषां गुणजन्यत्व एवोपपद्यते । अन्यथा बाधात् । कात्स्न्र्यार्थत्वे तु यत्किंचित्तादृशधर्मावच्छिन्नकार्यताश्रये सर्वत्र
वर्तित्वोपपत्योष्टासिद्धेर्व्यवच्छेदार्थं एव द्वितीयोपीति भावः ।।
हेतावपि मात्रपदानि व्यवच्छेदार्थानीत्युपेत्यानुत्पाद्यान्तविशेषणकुत्यं वक्तुमाह -- हेताविति ।।

१.धर्मपदं नास्ति -क-छ-ख. २. त्वाव-ख. ३.अयं ग्रन्थः नास्ति - कुं. ४. अनित्यप्रमात्वमिति न -अ. ५. द-कुं. ६.लभ्यते । अन्यथा -अ.

हेतौ १ प्रथममात्रपादाभावे एतद्घटपटान्यतरत्वे व्यभिचारः । घटत्वपटत्वयोः
कार्यतावच्छेदकयोरेतद्घटपटान्यतरत्वाधिकरणमात्रवृत्तित्वाभावेन साध्याभावात् ।
२ अन्यतरत्वस्य च स्वानुगतकारणाभावेन कार्यतावच्छेदकत्वात् ।।
(अतः ३
स्वाश्रयमात्रावृत्तिधर्मावच्छन्नकार्यत्वप्रतियोगिककारणताश्रयमात्रानुत्पाद्येति कार्यं विशेषितम् ।

घटापटान्यतरत्वे साध्यसत्वादेतदित्युक्तम् । एतद्घटपटान्यतरत्वे साध्याभावं व्यनक्ति -- कार्यतेति ।। ययो ४ र्घटत्वपटत्वयोः कार्यतावच्छेदकत्वं न तयोः स्वाश्रयमात्रवृत्तित्वं ततोऽधिकदेशवृत्तित्वात्

। अन्यतरत्वस्याप्यनुगतकारणा भावेन कार्यतानुवच्छेदकत्वात् । एवं च ।५ स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयवृत्तित्वरूपसाध्याभावादित्यर्थः । एतेन प्रथममात्रपदस्यापि कृत्यमुक्तं ध्येयम् ।। ७ प्रथममात्रपदं हित्वा स्वाश्रयावृत्तिधर्मावच्छिन्नेत्यादेरेवोक्तावेतद्घटपटान्यतरत्वस्य स्वाश्रयवृत्तिकुड्यत्वादिधर्मावच्छिन्नकार्यताप्रतियोगिककारणताश्रयः कुड्याद्यसाधारणं तन्मात्रानुत्पाद्यं यदेतद्घटपटरूपं कार्यं ८ तद्वृत्तित्वेन एतद्घटपटान्यतरत्वे उक्तहेतोः सत्वेपि मूलोक्तदिशा साध्याभावेन व्यभिचारः ।

दत्ते तु मात्रपदे न दोषः । कुड्यत्वस्य एतद्घटप ९ टान्यतरत्वान्यतराश्रये अवृत्तिधर्मत्वेपितद्वृत्तित्वे सति ततोधकदेशवृत्तिधर्मत्वाभावेन तत्र हेतोरेवाभावात्।।

१. कार्यमात्रवृत्तित्वादित्येतावत्युक्ते -कुं. त्वाद्यमात्रपदाभावे-क-ख-च-छ. २. अयं ग्रन्थः-ग. पुस्तके नास्ति. ३. कुण्ड्चलितो ग्रन्थःनास्ति-ख-च-छ-मु. ४. योः कार्य-कुं. ५. अयं ग्रन्थः नास्ति-कुं ६. एतेनेत्याहभ्य 'असिद्धिरप्रसिद्धि' रितिपर्यन्तं-अ. पुस्तके नास्ति. ७. स्वाश्रयमात्र-कुं. ८. तन्मात्रवृ-मु-आ.
टत्वा - कुं अ.

यपक्त-वनुन-ङ्गः) प्रामाण्यवादः पु - १६१.

तेनैतद्घटपटान्यान्यत्वाश्रयकार्यस्य तदुभयान्यान्यत्वाधिकरणमात्रावृत्तिघटत्वपटत्वावच्छिन्नकार्यत्वप्रतोयोगिकक ारणत्वाश्रयमात्रोत्पाद्यत्वेन हेत्वभावान्न व्यभिचारः ।।

।प्रथममात्रपदाभावे) हेतु १ स्तत्र वर्तते । अन्यतरत्वाश्रयावृत्तिकुड्यत्वादिरूपधर्मावच्छिन्ना या कार्यता

तत्प्रतियोगिककारणत्वाश्रययीभूतं यत्कुड्यकारणं तन्मात्रानुत्पाद्ये एतद्घटपटरूपे कार्येऽन्यतरत्वस्य वृत्तेः । मात्रपदे दत्ते तु न व्यभिचारः ।

यद्यप्यत्र विवक्षितं तन्मात्रानुत्पाद्यत्वं तदुत्पाद्यते सति ततोऽधिकोत्पाद्यत्वम् । तच्चोक्तस्थले नास्ति ।
एतद्घटपटान्यतरत्वस्य कुड्यकारणोतत्पाद्यत्वे सति ततोधिकोत्पाद्यत्वरूपतन्मात्रानुत्पाद्यत्वस्य बाधात् । तथाच
हेत्वाभावादेन न तत्र व्यभिचारः । तथापि तन्मात्रानुत्पाद्यत्वं तदितरानुत्पाद्यत्वे सति तदुत्पाद्यत्वरूपतन्मात्रोत्पाद्यत्स्याभाव २ वत्वरूप यत्तदनुत्पाद्यत्वं तदस्त्येवैतद्घटपटान्यतरत्वाश्रये एतद्घटपटरूपेऽर्थ इति तावन्मात्रेण तत्र हेतुसत्वमुपेत्य व्यभिचारे चोदिते मात्रपदेन तन्निरासः ।।
मूले तु प्रकृताभिमततन्मात्रानुत्पाद्यत्वस्य तत्राभावात । कुड्याद्यसाधारणकारणेतरेतरेश्वरज्ञानोत्पाद्यत्वेन
तदितरानुत्पाद्यत्वस्याप्रसिद्ध्या तदभावस्य दुर्ग्रहत्वाच्च व्यभिचारचोदना न युक्तेत्यरुच्च्यैव प्रथममात्रपदस्येदं कृत्यमित्याद्यनुक्त्वा स्वाश्रयमात्रावृत्तिधर्मावच्छिन्नकार्यत्वप्रतियोगिककारणताश्रयमात्रानुत्पाद्येति कार्यं विशेषितमित्येवोक्तम् ।।

१. अयं ग्रन्थः ग पुस्तके नास्ति. १. स्तुत - मु क ख. २. वरूपं - मु.

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - १६२.

स्वाश्रमात्रावृत्तिपदेना १ न्यतरत्वाधिकदेशवर्तिनोर्घटपटत्वयोरपि सङ्गृहीतत्वेन तदवच्छिन्नकार्यताप्रतियोगिककारणत्वाश्रयीभूतं

यद्घटादिकारणं तन्मात्रोत्पाद्ये घटादाव २ प्यन्यतरत्वस्य वृत्या तदनुत्पाद्यकार्यमात्रवृत्तित्वरूपहेत्वभावात् ।।।
द्वितीयमात्रपदाभावेऽसिद्धिः । अनित्यप्रमात्वस्य स्वाश्रयाधिकदेशवृत्तिनाऽनित्यज्ञानत्वेनावच्छिन्ना या कार्यता तत्प्रतोयोगिककारणत्वाश्रयो यो मनःसंयोगादिः तदुत्पाद्यप्रमारूपकार्यवृत्तित्वेन तदनुत्पाद्यकार्यवृत्तित्वाभावात् । मात्रपदे दत्ते तु नासिद्धिः ।

३ केचित्तु प्रथममात्रपदाभावे इत्यादिः प्रथममात्रपदकृत्यपरतयापि पाठ उपलभ्यत इति पक्षे तु ४ तन्मात्रानुत्पाद्येत्यस्य तदितरानुत्पाद्यत्वविशिष्टतदुत्पाद्यत्वाभावत्वरूपत ५ न्मात्रानुत्पाद्यार्थकत्वेपीहाप्रसिद्धिनिरासाय तदितरानुत्पाद्यत्वमात्रं विवक्षिणीयम् । तच्च गगनादौ प्रसिद्धमिति तदभाव एतद्घटपटान्यतरत्वाश्रयकार्ये ग्रहीतुं शक्य इति व्यभिचारः चोदनोपपाद्या असिद्धिरप्रसिद्धिः । तथाच नासिद्धिवरकत्वे दोष इत्याहुः ।।

१.न्यान्यत्वादपि - कुं-ग. २. अपिपदं न -क-छ. ३. क्व-मु.आ. ४. तदनु - कुं. ५. तदनु - कुं .

यपक्त-वनुन-ङ्गः) प्रमाण्यवादः पु - १६३.

प्रमाया ज्ञानसामान्यकारणोत्पाद्यत्वेपि तन्मात्रा १ नुत्पाद्यत्वात् । तथात्वे ह्यप्रमापि प्रमास्यात् ।।
तृतीयं मात्रपदं तु कार्याकार्यवृत्तिधर्मेषु व्यभिचारवरणायेति चेन्मैवम् ।।

स्वतस्त्वेप्यनित्यप्रमामात्रवृत्तिना तत्तत्प्रमात्वरूपेण धर्मेणावच्छिन्ना या तत्तत्प्रगभावनिरूपिता कार्यता तदाश्रयमात्रवृत्तिस्यानित्यप्रमात्वे सत्वेन सिद्धनाधनम् ।।
न च प्रागभावस्यापि तत्तत्प्रागभावत्वेन तत्तद्व्यक्तिं प्रति न हेतुता किन्तु प्रागभावत्वेन कार्यमात्रं २ प्रति हेतुतेति वाच्यम् । उत्पन्नस्य ३ घटस्य स्वप्रागभावेप्यन्यप्रागभाव ४ सत्वेन पुनरुत्पत्तिदोषतादस्थ्यात् ।।

तथात्व इति ।। तन्मात्रोत्पाद्यत इत्यर्थः । कार्यकार्येति ।। ५ प्रमात्वादावित्यर्थः । अनित्यज्ञानत्वस्य ततोऽधिकदेशवृत्तित्वेन तत्र साध्याभावात् । प्रागभावनिरूपीता प्रागभावनिष्ठकारणतानिरूपिता ६ तत्तत्प्रमात्वावच्छिन्नकार्यतेत्यर्थः ।।
उत्पन्नस्येति ।। घटोत्पत्तिसमवहितोत्तरक्षणे तद्घटसामग्रीसत्वेन तया तस्यैव घटस्य पुनरुत्पत्तिप्रसङ्गदोषनिरासाय हि प्रागभावे हेतुतोक्ता । प्रागभावत्वेनैव हेतुत्वे हेतुतावच्छेदकावच्छिन्नयत्किञ्चिद्धेतिसत्वेपि कार्योत्पत्तिनियमेन
तादृशप्रागभावान्तरसत्वात्पुनस्तदुत्पत्तिदोषो न परिहृत एव स्यादिति न प्रागभावत्वेन हेतुता किन्तु तत्प्रागभावत्वेनेति प्रागुक्तदोष एवेति भावः ।।

---
१. त्रोत्पाद्यत्वाभावात् - छ. २. त्रहे - ख-च. ३. पटस्य -ख-च-ग. ४. वस्यस - च-छ. ५. प्रमेयत्वा - कुं-अ. ६. एतत्प्र - आ.

यदी तु सिद्धसाधनवारणाय साध्ये कार्यताशब्देन भावकारणनिरूपिता कार्यताऽभिप्रेता । तर्हि

सामान्यकारणमात्रानुत्पाद्यकार्यमात्रवृत्तित्वहेतोरभावरूपविशेषकारणेनाप्युपपत्त्याऽप्रयोजकता । तत्तद्घटत्वादौ व्यभिचारश्च ।

भावेति ।। भावनिष्ठकारणानिरूपितेत्यर्थः । अप्रयोजकतेति ।। सामान्यसामग्रीमात्रानुत्पाद्य १ कार्यमात्रावृत्तित्वस्य विशेषकारणजन्यत्वं विनाऽनुपपत्त्या तदाक्षेपकत्वेपि विशेषकाण २ त्वस्य भावत्वं विनाऽप्रयोजकैवेति भावः । तत्तद्घटत्वेति ।। घटत्वेन मृत्पिण्डत्वेनैव कार्यकारणभावो न तद्घटत्वेन ३ मृत्पिण्डत्वेन हेतुहेतुमद्भावः । एकव्याक्तिकत्वेन बाधकेन तद्घटत्वस्य कार्यतावच्छेदकत्वात् । बाधकं विना कार्यमात्रवृत्तिधर्मत्वादिति हेतुनैव कार्यतावच्छेदकत्व ४ साधनात् । तथाच स्वाश्रयमात्रवृत्तेः स्वस्य वान्यस्य वा धर्मस्य कार्यतावच्छेदकस्याभावेन तदवच्छिन्नकार्यताश्रयमात्रवृत्तित्वरूपसाध्याभावे ५ पि न स्वाश्रयमात्रावृत्तिघटत्वरूपधर्मावच्छिन्नकार्यताप्रतियोगिक ६ कारणमात्रानुत्पाद्यकार्यं तद्घट एव । स्वप्रागभावभूताधिककारणजन्यत्वात् । तथाच तन्मात्रवृत्तित्वरूपहेतुसत्वाद्व्यभिचार इत्यर्थः ।।

१. द्येन स्वकार्य - आ. २. णस्य - मु-आ. ३ 'न' इत्यधिकमस्ति-मु. ४. त्वासा-कुं. ५. अपिपदं न -कुं. ६. के-मु.

---------- ---------- ----------

तद्वारणाय हेतावपि कार्यमात्रेत्यत्र कार्यशब्देन भावकारणोत्पाद्यकार्यविवक्षायां स्वतस्त्ववादिनं प्रत्यसिद्धिः । प्रत्यक्षप्रमादाविन्द्रियार्थसन्निकर्षादेर्गुणस्य सत्वासिद्धिः ----

यत्सामान्यन्यायेन विशेषयोः कार्यकारणभावो न तत्वेन रूपेण किन्ति सामान्येनैव । न चैवं तन्मृत्पिण्डत्वेन हेतुहेतुमद्भावाभावे मृत्पिण्डान्तरादेतद्घटोत्पत्तिः स्यादिति वाच्यम् । मृत्पिण्डान्तरे एतद्घटप्रागभावाभावादेव तत उत्पत्यप्रसक्तेः । १ तत्प्रागभावत्वेन हेतुत्व २ कल्पनं पूर्वोक्तदिशोत्पन्नस्य पुनरुत्पत्तिबाधकादेवेति भावः -- भावकारणेति ।।
स्वाधिकरणमात्रावृत्तिधर्मावच्छिन्नकार्यताप्रतियोगिककारणमात्रानुत्पाद्यभाव कारणकार्येत्युक्तो तादृशकारणा ३
दधिकभावकारणजन्यकार्यमात्रवृत्तित्वादित्यर्थलाभात् ।
४ तद्घटत्वादौ च
स्वप्रागभावरूपाधिककारणजन्यकार्यमात्रवृत्तित्वेनोक्तहेत्वभावान्न व्यभिचार इति भावः --- असिद्धिरिति ।।
अनित्यत्वप्रमात्वव्याप्यीनित्यप्रत्यक्षप्रमात्वाद्याश्रयनिष्ठकार्यतानिरूपिता ५
नुगतगुणाभावादनित्यज्ञानसामान्यसामग्रीतोऽभावादिति भावः । अत एवोक्तं रुचिदत्तेनापि 'सन्दिग्धासिद्धे 'रिति ।।
यत्तूक्तस्थले व्यभिचारवारणाय यावत्कार्यमात्रवृत्तिधर्मत्वादिति विशेषणम् । तत्तद्घटत्वादेश्च तादृशैककार्य ६ मात्रवृत्ति ७ त्वादिति तन्न । तथापि नीलघटत्वादौ व्यभिचारानिरासात् ।

१. तत्त-कुं. २. त्वाक-कुं-आ. ३. णाधि-कुं. ४. तत्त-कुं. ५. दनु-आ.
६. मात्रपदं न -मु. ७. धर्म इत्याधिकं -आ. ८. मात्रपदं न -अ-आ.

---------- ---------- ---------
इत्यादित्वनुपदमेव निरसिष्यते ।।
यज्ञपत्युक्त १ वक्रानुमाभङ्गः ।। १२ ।।

एतेन साध्ये स्वाश्रयमात्रवृत्त्यनेक ८ मात्रवृत्तिधर्मेति विशेषणमिति निरस्तम् । अप्रयोजकत्वव्यभिचारयोपरिहारात् । यज्ञयत्युक्तेरर्वाचीनत्वान्न तन्निरीसो मूलारूढतया प्रदर्शिततः ।।
यज्ञपत्युक्त ३ वक्रानुमानभङ्गः ।। १२ ।।

अथ मतं अनित्यप्रत्यक्षप्रमात्वमनुमितिप्रमात्वं शाब्दप्रमात्वं च कार्यतावच्छेदकम् बाधकं विना कार्यमात्रवृत्ति २ त्वात् घटत्ववदिति प्रत्येकमेव प्रयोक्तव्यम् ।

अनित्यप्रमात्वं कार्यतावच्छेदकं बाधकं विना कार्यमात्रवृत्तिधर्मत्वात् इति मण्युक्तानुमाने प्रागल्भादिनोक्तानुगतगुणपक्षं निरस्य यज्ञपत्युक्तप्रमामात्रानुगतगुण ४ माक्षिप्यानुमानं च निरस्य यत्पक्षधरेणैव पक्षान्तरमुक्तं 'यद्यपि यथाश्रुतं साध्यं बाधितं अनित्यत्वप्रमानुगतहेत्वसिद्धेः अत एव स्वरूपासिद्धिरपि तथाप्यनित्यप्रमात्वमित्यनेन अनित्य ५ प्रत्यक्षप्रमात्वादिकमेव विवक्षितं कार्यतावच्छेदकव्यापकत्वमेव साध्यं तादृशकार्यमात्रवृत्तिधर्मव्यापकत्वादितिहेतुरिति वा स्मर्तव्यमिति 'तदनुरोधेन प्रमामात्राननुगतगुणपक्षमाशङ्कते -- अथेति ।। ६ मतमिति ।। इति प्रयोक्तव्यिमित्यन्वयः -- बाधकं विनेति ।। अवच्छेदकान्तरोपपन्नकार्य ७ ताश्रयवृत्तित्व ८ स्वावच्छिन्नकार्यताप्रतियोगिककारणासम्भव इत्यादिबाधकं विनेत्यर्थः ।।

१. वक्रपदं न -च-मु. २. धर्म-छ. ३. वक्रपदं न -मु. ४. पक्षियमनुमान -मु-अ-आ. ५. साक्षात्कारि-अ-आ. ६.
प्रथमिति प्र-मु-अ-आ. ७. कारणत्वानाश्रयवृत्तिस्वा-आ. ८. त्वंस्वा-कुं-आ.

प्रत्यक्षादिप्रमासु प्रत्येकानुगतगुणभङ्गः) प्रामाण्यवादः पु - १६७.

बाधकं च समाजस्यार्थिकत्वमनुगतहेत्वभावश्च । तेन नीलघटत्वादौ घटज्ञानत्वादौ च न व्यभिचारः । एतादृशप्रत्यक्षप्रमात्वादिकं प्रत्यनित्यप्रमात्वस्य व्यापकत्वमेव १ प्रमात्वस्य परतस्त्वम् । एवं च तत्तत्प्रागभावनिरूपितकार्यतया २ नार्थान्तरम् ।
न चात्राप्यनुगतहेत्वभावो बाधकः ।

नित्यवृत्तित्वादि ३ कार्यतावच्छेदकत्वबाधकस्य ज्ञानत्वादाविव निलघटत्वादावभावात् । विशिष्टहेतोरपि तत्र व्यभिचार इत्यतो विवक्षितपक्षधराद्युक्तबाधकशब्दार्थोक्त्योक्तदोषं निराह -- बाधकं चेति ।। समाजस्य मेलनस्य आर्थिकत्वं अवच्छेदकान्तरोपपन्नकार्यताश्रयवृत्तित्वमित्यर्थः -- अनुगतेति ।। स्वावच्छिन्नकार्यताप्रतियोगिका ४ नुगतहेत्वभाव इत्यर्थः -- तेनेति ।। बाधकं विनेत्यत्र विवक्षितबाधकाभावरूपविशेषणनेत्यर्थः।।
एवं जन्यप्रत्यक्षप्रमात्वादेः परतस्त्वप्रप्तवप्यनित्यप्रमात्वस्य तन्न प्रप्तमित्यत आह -- एतादृशेति।। प्रमात्वस्य अनित्येति योज्यम् । यद्वा ईश्वरज्ञानप्रमाण्यस्यापि परतस्त्वं प्राप्तमिति भावेन प्रमात्वस्येत्येवोक्तिः -- एवं चेति ।। अनित्यप्र ५ त्यक्षत्वादेः कार्यतावच्छेदकत्वेनानित्यप्रमात्वस्य तद्व्यापकत्वे साध्यमाने सतीत्यर्थः -- बाधक इति ।।

१. 'प्रमात्वस्य 'इति नास्ति मु-च. २. तामादय-छ. ३. रूप इत्याधिकं - कुं.
४. नुमानेह - अ. ५. प्रमात्वादे - आ.

---------- ---------- ---------

प्रत्यक्षप्रमायामिन्द्रियार्थसन्निकर्षस्यार्थस्य च अनुमितिप्रमायां यथार्थलिङ्गपरामर्शस्य शाब्दप्रमायां यथार्थवाक्यार्थज्ञानस्य च गुण १ स्यानुगमात् । भ्रमेत्वर्थोऽसन्निति न हेतुर्न वा २ तस्य सन्निकर्ष इति चेदुच्यते ।

प्रत्यक्षप्रमामात्रे न सन्निकर्षोर्थो हेतू । शुक्तौ रूप्यभ्रमकालेपि ३ तयोः सत्वेन शुक्तित्वेन शुक्तिप्रमाप्रसङ्गात् ।

स्वावच्छिन्नकार्यतानिरूपितैककारणाभावरूपबाधतसत्वाद्बाधकं विनेत्युक्तविशेषणासि ४ द्धिरिति भावः ।।

मण्याद्युक्तमेवाह -- प्रत्यक्षेति ।। अनित्येति योज्यम् -- गुणस्येति ।। अन्वयव्यतिरेकादिति मण्युक्तेरिति भावः । सादृश्यज्ञानमुपमितौ गुण इति मण्युक्तमप्यत्र नानूदितम् । उपमानस्यानुमानानतिरेकस्यान्यत्र व्यक्तत्वात् -- सन्निकर्षार्थाविति ।। अल्पनिरासत्वात्सन्निकर्षस्य पूर्वं निर्देशः ।

यद्वा 'नासिकास्तनयोर्ध्मार्घटो'रित्यादिनिर्देशेन 'अल्पाच्तरं पूर्वं'इत्यस्य प्राथिकत्वाद ५ र्थस्य यौ सन्निकर्षाविति भ्रमनिरासायैवं निर्देशाददोषः ।

अन्वयव्यभिचारमाह -- शुक्ताविति ।। तयोः शुक्तिरूपार्थतत्सन्निकर्षयोरित्यर्थः । इदंत्वेन प्रमात्व ६ स्य सत्वाच्छुक्तित्वेनेत्युक्तिः । ।तथायानुगतहेत्वभावरूपबाधकस्यैव भावाद्बाधकं विनेत्यसिद्धमिति भावः ।।।

१. स्य चा -छ. २. तत्र-मु-च. ३. अपिपदं नास्ति - छ. ४. द्धेरि- कुं . ५. ददोषः- अ. ६. स्येष्टत्वाच्छु-मु. स्येष्टत्वादाह- शुक्तत्वेनेति - आ. ७. इयं पङ्क्तिर्नास्ति -अ.

प्रति-प्रसु-प्रत्येत-गुङ्गः) प्रामाण्यवादः पु - १६९.

--- --- ---

दोषः प्रतिबन्धक इति चेत्तर्ह्यावश्यकत्वाद्दोषाभावादेव प्रमास्तु ।
किञ्च षड्विधसन्निकर्षान्यतरद्योगिप्रत्यक्षादौ प्रत्यभिज्ञायां च तत्तादौ नास्ति । तत्र च योगजधर्मसंस्कारादिः प्रत्यासत्तिश्चे १ त्तर्हि भ्रमेपि दोषस्तथा स्यात् ।

मण्यादिना दाहाभावेपि वह्नेर्दाहहेतुत्वाभाववदिहाप्यहेतुत्वं न सन्निकर्षादेः प्राप्यत इति भावेनाशङ्क्य निराह -- दोष इति ।। दोषाभावादेवेति ।। तस्य चानित्यप्रमामात्रेऽनुगतहेतुत्वात्किमुक्तसृष्ट्येति भावः ।
नन्वेवं दाहस्थलेपि मण्याद्यभाव एव हेतुः स्यान्न वह्निः । अन्वयव्यतिरेकबलाद्वह्नेर्दाहहेतुत्वे सन्निकर्षादेरप्यस्तु हेतुत्वम् । सन्निकर्षोत्कर्षेण प्रमोत्कर्षदर्शनाच्चेति चेत् । किमत्र सन्निकर्षपदेन लौकिक एवाभिमतोथालौकिकप्रत्यासत्तिसाधारणं सन्निकर्षमात्रमितित २ कल्पौ हृदि कृत्वाऽऽद्ये व्यतिरेकव्यभिचारमाह -- किञ्च षड्विधेति ।। संयोगसंयुक्तसमावायसंयुक्तसमावेतसमावायसमवाय ३ समवेतसमवाय विशेषणविशेष्यभावरूपेत्यर्थः । अन्यतरदित्यस्य प्राग्वत्साधुत्वं ध्येयम् । योगिप्रत्यक्षादिवित्यादिपदेन सामान्यज प्रत्यक्षग्रहः । प्रत्यभिज्ञायामित्युपलक्षणम् । सुरभिचन्दनमित्यादिप्रत्यक्षं च ग्राह्यम् । तेन
तत्तादावित्यादिपदेनोपनीतगन्धादीग्रहः ।
द्वितीयमाशङ्क्यान्वयव्यभिचारेणनिराह -- तत्र चेति ।। संस्कारादिरित्यादिपदेन ज्ञानसामान्ययोर्ग्रहः -- तथेति ।। प्रत्यासत्तिरित्यर्थः । तथाच तादृशप्रत्यासत्तौ सत्यामपि तत्र प्रमानुदयाद्व्यभिचार इति भावः ।

१. द्भमे- छ-ग-क-ख-कुं. २. विकल्पौ-अ-आ. ३. स्वस - मु. ४. जन्यप्र-आ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - १७०.

किञ्च चक्षुरादिवत्कारणत्वेन धर्मिग्राहकमानासिद्धोर्थः सन्नकर्षेणान्वयथासिद्धत्वादतीतादिविषयकयोगिप्रत्यक्षादिवसत्वाच्च न प्रत्यक्षप्रमाहेतुः । अन्यथा वर्तमानविषयकानुमितावप्यर्थो हेतुः स्यात् ।।
१ अपि च त्वन्मते भ्रमेपि यस्मिन्नंशे भ्रमत्वं तद्रजतत्वादिकं विशेषणं सदेव । वैशिष्ट्यं त्वमदप्यसत्ख्यातिभीतस्य तव मते न भाति १ ।।

एवमर्थस्याप्यनन्थासिद्धान्वयव्यतिरेकौ न स्तः । अन्यथाख्यातिविचारे सुधोक्तरीत्या क्वचिद्विशेषणाभावात्क्वचितद्विशेष्याभावादिति भावेनाह -- किञ्चेति ।। ननु सन्नकर्षेणैवार्थोन्यथासिद्धश्चेच्चक्षुरादिरपि तथा स्यादित्यत उक्तं चक्षुरादिवदित्यादि ।। रूपाद्युपलब्धयः करणसाध्याः क्रियात्वात् छिदिक्रियावदित्यनुमानेन सिध्यच्चक्षुरादिकं करणत्वेनैव सिद्धम् । नत्वर्थ इत वैषम्यमिति भावः--- अतीतेति ।। अतीतानागतविषयके योगिप्रत्यक्षे सामान्यजप्रत्यक्षे चेत्यर्थः -- अन्यथेति ।। उक्तदिशाऽन्यथासिद्ध्यकल्पन इत्यर्थ।।
अन्वयव्यभिचाराच्चार्थो न हेतुरिति भावेनाह -- अपिचेति ।। सदेवेति ।। तथा च तत्रान्वयव्यभिचारान्नार्थः प्रमायां हेतुरिति भावः । ननु वैशिष्ट्यांश एव भ्रमत्वम् । तच्चासदेव । अतो न व्यभिचार इत्यत आह -- वैशिष्ट्यं त्विति ।। तवेति ।। मणिकृत इत्यर्थः ।।

प्रदि-प्रसु-प्रत्येत-गुङ्गः) प्रामाण्यवादः पु - १७१.

---------- -------- ----------

किञ्च त्वन्मते प्रत्यक्षप्रमायामपि विशेषणज्ञानमेव हेतुर्न तु विशेषणम् । विशेष्यं तु भ्रमे १ सदेव ।।
ननु तथापि लौकिकप्रत्यक्षप्रमायां वैशिष्ट्यरूपोर्थोऽगुणः ।।

एतेन 'भ्रमे त्वर्थोऽसन्निति न हेतुः'इति प्रागुक्तं प्रत्युक्तम् ।।
२ ननु विशेषणमन्यत्र सदपि पुरतोऽसदेवेति चेत्तर्हि विशेषणमर्थश्चेदसम्भवि । विशेष्यं चेद्यव्यभिचारीत्याह -- किञ्चत्वन्मत इत्यादिना ।। सदेवेति ।। तथाच शुक्तिप्रमास्यात् । नास्ति च सा अतो न विशेष्यरूपोर्थः प्रमायां गुणतया हेतुरिति भावः ।।
३ ।ननु मणिकृन्मते वैशिष्ट्यरू ४ पार्थ एव प्रमारूपजन्यप्रत्यक्षमात्रे गुणोस्तु । भ्रमे च वैशिष्ट्यरूपोर्थः पुरतोऽसन्निति तस्य भ्रमा ५ हेतुतया भ्रान्तेः प्रमात्वानापत्तिः । अन्यत्र सत्वेन भ्रान्तौ भानोपप ६ त्तेश्चेति चेन्न । यत्र ७ क च न सत्वमात्रेण तद्गोचरजन्यप्रत्यक्षं प्रत्यनन्यथासिद्धनियतपूर्वक्षण ८ वृत्तित्वाभावेन हेतु ९ त्वानिर्धारणात्पुरतोऽसत्वेनाहेतुत्वस्य सन्निकर्षाभावेनोपपत्या पुरतस्सत्वस्य सन्निक १० र्ष एवोपयोगेन ११ सर्वथापि १२ तदहेतुत्वस्यैव १३ न्याय्यत्वाच्चेति ध्येयम् । ।
र१४ प्राचां मतमाशङ्कते --नन्विति ।। उक्तत्वादिति ।। चक्षुरादिवदित्यादिना ग्रन्थनेत्यर्थः । १५ वैशिष्ट्यरूपोर्थोर्थपदेन न विवक्षितुं शक्यः । किन्तु विशेषणं विशेष्यं वा १५ । १६ तच्चान्वयव्यभिचारान्न प्रमायां
हेतुरिति भावेनाह -- किञ्चेति ।।

१.पि-ग-क-च-छ. २.अर्थो हेतुरित्यत्रार्थपदेन किं विशेषणमभिहितमथ विशेष्यं तदुभयवैशिष्ट्यं वा आद्यद्वितीयौ प्रत्याह - अ. ३. ।अयं ग्रन्थः

नास्ति - अ. ४. पोर्थ-कुं-अ-आ. ५. महे-मु. ६.त्तिश्च-कुं -आ. ७.चित्स-मु, कुत्रचित्स-आ. ८.वर्ति-कुं-अ. ९.ता निवारणात् । पु,-मु-आ. १०. र्षोप-मु-आ. ११. सर्वत्रापि-आ. १२. प्यर्थाहे -मु-आ. १३. स्यन्या-मु-स्यैव सत्वाच्चे-आ. १४. तृतीयं शङ्कते - अ. १५. इयं पङ्क्तिर्नास्ति -अ. १६. तभ्रमे अन्वयव्यभिचाराच्च नार्थःप्रमाणं हेतुरिति भावेनाह - अ.

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - १७२.

भ्रमे तु चिरन्तनमतेऽसदपि वैशिष्ट्यं सदुपरक्तत्वेन भातीति चेन्न । अर्थो न हेतुरित्युक्तत्वात् ।।
किञ्च यद्वैशिष्ट्यमसत् न तदंशे त्वन्मते बाधस्तत्प्रयुक्तभ्रमत्वं वा सम्भवति। त्वन्मतेऽसतोऽभावविरहात्मत्वरूपप्रतियोगित्वाभावेन स्वप्रतियोगिकाभावप्रमारूपबाधायोगात् । यत्र तु रजतत्वांशे १ ते सम्भवतः न तदसदिति नार्थो भ्रमव्यावृत्तो हेतुः। एवं बाष्पे धूमभ्रमेणोत्पन्नायां यादृशच्छिकसंवादेन प्रमायामनुमितौ न यथार्थलिङ्गपरामर्शोस्ति ।

यदिति २ भिन्नं पदं -- त्वन्मते ।। प्राचीनतार्किकमते -- स्वप्रयोगिकेति ।। प्रा माणिकस्य घटादेरेवात्यन्ताभावोपगमेनाप्रामाणिकात्यन्ताभावानङ्गीकारात् । तदनङ्गीकारे हेतुरभावविरहेत्यादि । बाधायोगादित्युक्त्या तत्प्रयुक्तभ्रमत्वस्यप्ययोग उक्तप्राय इति भावः । त इति ।। ३ बाधभ्रमत्वे इत्यर्थः । उक्तरूरूपबाधयोगादेव तत्प्रयुक्तभ्रमत्वं च सम्भवतीति भावः । प्रत्यक्षप्रमायामवगतगुणासम्भवमुक्त्वा 'दृश्यते च यादृच्छिकसंवादिना

गुणाभावोपि ४ प्रमाजनकत्वं 'इति तत्वनिर्णयटीकां विवृण्वन्ननुमितावपि प्रागुक्तानुगतगुणं निराह -- एवमित्यादिना ।।

१.तत्सं-छ. २. न्नप-आ-कुं. ३. बाधभ्रमत्व इत्यर्थ' इति नास्ति-आ. भ्रमाज-अ.

प्रदि-प्रसु-प्रत्येत-गुङ्गः) प्रामाण्यवादः पु - १७३.

नचेश्वरे सोस्तीति वाच्यम् । उक्तरीत्या दोषजन्यत्वस्यापि सत्वेन भ्रमत्वस्याप्यापत्तेः । ईश्वरज्ञानस्य सत्य १ परामर्शत्वेन कारण्त्व २ कल्पनस्य परतस्त्वसिद्ध्यधीनान्योन्याश्रयाच्च । भ्रमघटादिसाधारणेनोपादनाद्यपरोक्षज्ञानत्वेन कारणत्वे ३ च तस्य न गुणता । अन्यथास्मदादिनिष्ठानां संशयप्रत्यक्षानुमिति निर्विकल्पकानां यथाक्रममीश्वरनिष्ठैर्विशेषदर्शनलिङ्गपरामर्शवाक्यार्थज्ञान ----------

ननु समानाधिकरणस्य तस्य तत्राभावेपि कार्यमात्रं प्रतिकारणस्येश्वरीयज्ञानस्य सल्लिङ्गविषयकस्य तत्रापि सत्वमस्ति सामानाधिकरण्यस्याप्रयोजकत्वात् । अतो न व्यतिरेकव्यभिचार इति भावेनाशङ्क्य निराह - नचेति । दोषेति ।। अस्मदी ५ यासल्लिङ्गपरामर्शरूपेत्यर्थः ।
ईश्वरज्ञानमपि किं सल्लिङ्गपरामर्शत्वेन हेतुरुतोपादानादिज्ञानत्वेन । आद्ये दोषमाह -- ईश्वरेति ।। अन्त्ये तु न तस्य गुणत्वेन हेतुत्वम् । तथात्वे भ्रमस्यापि गुणजन्यतापत्तिरिति भावेनाह -- भ्रमेति ।। भ्रमसाधारणेन घटादिसाधारणेनेत्यर्थः । उपादानादिप्रत्यक्षत्वेन हेतुतेत्युपपादनाय घटादीत्युक्तिः । विपक्षेऽनष्टप्रसङ्गद्योतनाय भ्रमेत्युक्तिः

। अतिप्रसङ्गान्तराण्याह -- अन्यथेति ।। तेनापि रूपेण हेतोस्सल्लिङ्गविषयकत्वमात्रेण गुणत्व इत्यर्थः ।

१. लिङ्गपरा - मु-च. २. त्वस्य - कुं-क-ग-छ-ख. ३. न तस्य गुणता - मु-ग-क-च. ४. शाब्दज्ञाननिर्वि- ग. ५. यसल्लिं - मु-आ. 'अस्मदीयेति नास्ति' अ.

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - १७४.

---------- ---------- ----------

-- विशेषज्ञानर्जन्यत्वाद्यथाक्रमं निश्चयत्वानुमितित्वशाब्दज्ञानत्वसविकल्पकत्वानि स्युः ।
अपिचैवं व्यधिकरणस्य १ परामर्शस्य गुणत्वे दोषत्वमपि तस्यैव २ स्यात् । सामानाधिकरण्यस्याप्रयोजकत्वात् । तथाचाभासानुमितिमूलत्वेन नित्यभ्रमः सिद्ध्येत् । किञ्चैवं सति स्थाणौ करादिविपर्ययजन्यस्य पुरूषत्वभ्रमस्येश्वरनष्ठया वक्रकोटरत्वादिप्रमया जन्यत्वात्स्थाणुप्रमात्वं स्यात् ।

येन केनापि रूपेण हेतोरपीश्वरज्ञानस्य गुणत्वकल्पनेतिप्रसङ्गान्तरं चाह -- अपिचेति । एवमित्यस्य व्यक्तीकरणं व्यधिकरणस्येत्यादि ।
नित्यभ्रम इति ।। ननु सति सम्भवे त्यागायोगात्तत्र सममानाधिकरण ३ एवासल्लङ्गपरामर्शरूपदोष सम्भवान्न व्यधिकरणदोषकल्पनेति चेन्न । गन्ध ५ प्रगभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादा ६ एवाभासानुमितौ समानाधिकरणदोषासम्भवे व्यधिकरणस्यैव ७ कल्प्यत्वेऽनुगतिलाभालाय सर्वत्र दोषत्वकल्पनौचित्यादिति भावः ।
ननु गुणे समानाधिकरण्यमप्रयोज्यकम् । दोषे तु तन्नियमः प्रयोजकः । गन्धप्रागभावावच्छिन्न इत्यादौ ८ बाधितत्वप्रमादिरेव कश्चित्कल्प्यत

इत्यत आह -- किञ्चेवे सतीति ।। व्यधिकरणस्यापि गुणस्य हेतुत्वे सतीत्यर्थः ।
स्थाणुप्रमात्वमिति ।। न च समानाधिकरणो दोषः प्रबल इति शङ्क्यम् ।

१. परामर्शस्येति -नास्ति - कुं. २. तवेत्याधिकं-क-. ३. णस्येवासल्लिं - कं.
४. षस्य सं--कुं. ५. नायं प्राग-अ. ६. वभावानु- आ. ७ दोषत्वकल्पनौ- अ. ८. बाधितत्व इति नास्ति -आ.

प्रदि-प्रसु-प्रत्येत-गुङ्गः) प्रामाण्यवादः पु - १७५.
---------- ---------- ----------
ननु तर्ह्यनुमितिसमानाधिकरणं वस्तुतःसाध्यव्याप्यवतः पक्षस्य व्याप्यवत्वेन ज्ञानं गुणोस्त्विति चोन्मैवम् । लाघवेन वस्तुतः साध्यवत्पक्षस्य ज्ञानेनैव प्रमात्वसम्भवात् । स च विषयसत्वोपहितत्वान्न गुण इत्युक्तम् ।
किञ्च १ प्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्यादिनुमाने वस्तुतोऽनेकतर्तृके लाघव-----

यादृच्छिकसंवादिनि प्रमानुदयापातात् । न चारोपे सति निमित्तानुसणमिति न्यायेन तत्र २ प्रमात्वादृष्ट्या न विशेषप्रमात्वेनेश्वरज्ञानं हेतुरिति युक्तम् । प्रामाण्यसिय स्वतस्त्वे नाप्युपपत्त्या ईश्वरज्ञानस्याप्यनुमितिप्रमायां न गुणत्वेन हेतुत्वमिति सुवचत्वादिति भावः ।
एवं यादृच्छिकसंवादिनि पूर्वोक्तगुणव्यभिचारमुक्त्वा ३ तत्स्थैर्याय व्यधिकरणस्य गुणत्वमनेकदोषोक्त्या निरस्येदानीं प्रकारान्तरेण तत्र गुणव्यभिचाराभावमाशङ्क्य दोषान्तरमाह ।। नन्वित्यादिना ।।

यादृच्छिकसंवादिनि धूमाभावेपि वह्निव्याप्यस्यालोकादेः सत्वेन तादृशे ४ पक्षे बाष्पे धूमज्ञानं व्याप्यवत्वज्ञानं भवतीति न तत्र व्यभिचार इति भावः -- वस्तुत इति ।। वस्तुतः साध्यवान ५ यः तादृशपक्षज्ञाननैवेत्यर्थः -- स चेति ।। उक्तरूपपक्षस्य ज्ञानमित्यर्थः । तच्चेति वक्तव्ये विधेयगुणा ६ पेक्षया पुल्लिङ्गप्रयोगः ।
उक्तरूपगुणस्यान्वयव्यभिचारं चाह -- किञ्चेति ।। अनेकेति ।।

१. गन्धप्रा-ग-ख-च-छ-क. २. तत्प्र-मु-अ. ३. त्सौकर्या-मु. ४. दोषान्तरप-अ. ५. यः इति नास्ति-कुं-अ. ६.णपदापे-अ.

न्यायदीपयुततर्कताण्ङ्वम् (प्र. परिच्छेदः पु - १७६.
---------- ---------- ----------
-तर्कानुग्रहादेककर्तृकत्वनषयानुमानेचोक्तगुणसद्भावात्प्रमा ज्ञायेत ।
न च बाधा १ भावसहकृतसत्यपरामर्शादिर्गुण इति वाच्यम् । आवश्यकत्वाद्बाधा २ भावेनैव प्रमात्वसम्भवेन गुणस्य हेतुत्वासिद्धेः ।

प्रसादः सकर्तुकः कार्यत्वात् घटवदित्य ३ नुमान इत्यर्थः -- उक्तेति ।। वस्तुतः साध्यव्याप्यवत इत्यादिनोक्तेत्यर्थः ।
एतेन पक्षतावच्छेदकावच्छेदेन ज्ञाप्यवति पक्षे लिङ्गज्ञानं गुण इति रुचिदत्तोक्तं निरस्तम् । वस्तुतोनेककर्तृकइत्यादिनोक्तदोषानतिलङ्घनात् । लाघवेन वस्तुतो ज्ञाप्यवत्पक्षस्य ज्ञानेनैव प्रमात्वसम्भवात् । तस्य च विषयसत्वोपहितत्वेनागुणत्वात् ।
एतेनैव पक्षतावच्छेदकाविरोधिसाध्यकानुमितिप्रमायां यथार्थलिङ्गपरामर्शो गुण इति पक्षधरोक्तमपि प्रत्युक्तम् । गन्धप्रागभावेत्युक्तस्थले त्वदुक्तगुणे सत्यपि पक्षतावच्छेदकाविरोधिसाध्यप्रमाया अनुसत्वोपाहितत्वात् । घनगर्जितस्थलेन व्यभिचाराच्च । 'दृश्यते च

यादृच्छिकसंवादिनोऽनाप्तवाक्यस्य गुणाभावेपि यथार्थज्ञानजनकत्वं 'इति तत्वनिर्णयटीकावाक्यं विवृण्वानः प्रागुक्तं शाब्दप्रमायामप्यनुगतगुणं निराह -- एवमिति ।। घटोस्तीति वक्तव्ये प्रमादादिना पटस्तीत्युक्तवाक्यमादिपदार्थः ।।

१. धका-क-छथ. २. धका-क.च. ३. त्याद्यनु-आ. ४. एवप-आ.

प्रदि-प्रसु-प्रत्येत-गुङ्गः) प्रामाण्यवादः पु - १७७.

एवं विप्रलम्भकादिवाक्यजन्यायां शुकादिवाक्यजन्यायां च यादृशच्छिकसंवादेन प्रमायां न यथार्थवाक्यार्थज्ञानमस्ति । १ न च तत्रापीश्वरे तदस्तीति शङ्क्यम् । व्यधिकरणजन्यत्वेन प्रमात्ववत्समानाधिकरणदोषजन्यत्वेनाप्रमात्वं च स्यादित्याद्यतिप्रसङ्गात् १ । किञ्च तद्धि न साक्षाच्छाब्दप्रमाजनकम् । वक्तृनिष्ठे तस्मिंश्चिरध्वस्तेपि श्रोतरि प्रमोत्पत्तेः । वक्तृनिष्ठे वाक्यरचनाद्वारा । रचनायां च न तत्करणम् । शुक २ बालादीनामिव तादृशपदावलीज्ञानमात्रेण तदुपपत्तेः ।

ननु तद्वाक्ये तादृशगुणाभावेपि ३ तज्जातीये वाक्यान्तरेऽस्तीत्यतस्तत्रापि तस्य न हेतुत्वमित्याह -किञ्चेति ।। चिरध्वस्तेपि तस्मिन्निति पूर्वेणान्वयः ।।

ननु कार्यमात्रं प्रति कारणीभूतमीश्वरज्ञानमेव यथार्थवाक्यार्थ ४ ज्ञानरूपं सद्रचनाद्वारा प्रमां प्रति दुणत्वेन कारणत्वमस्तु । अतो न यादृच्छिकप्रमायां व्यभिचारः । नापि तेन विना वाक्ययरचनोपपत्तिः । तस्य कार्यमात्रं प्रति हेतुत्वेन रचनायां तज्जन्यप्रमायां च हेतुत्वात् ।

शुकादिवाक्यजन्यप्रमायामपीश्वरीयप्रमामादायैव न व्यभिचार इति तदीयव्याख्या ५ त्रुक्तेः । ‘
भ्रान्तप्रतारकवाक्ये ६ शुकादिवाक्ये चेश्वरस्यैव यथार्थवाक्यार्थज्ञानं जनकं ‘इति मण्युक्तेरिति भावेन शङ्कते ।

१. अयं ग्रन्थः नास्ति-कुं-ग-ख-क-छ. २. वाक्यादी -कुं. ३. ‘यथार्थज्ञानजनकत्वं इति तत्वनिर्णयटीकां विवृण्वानः ‘इत्याधकमस्ति-आ. ४. ज्ञानपदं न -आ. ५. भिन्नं पदं-मु. ६. शुकादिवाक्येचेति नास्ति - आ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - १७८.
---------- ---------- --------
न च तत्रापीश्वरनिष्ठं यथार्थवाक्यार्थज्ञानं रचनाद्वारा हेतुरिति वाच्यम् । तस्य ज्ञानसामान्यं भ्रमं च प्रतीवोपादानापरोक्षत्वेनैव हेतुतया प्रमां प्रत्यसाधारण्याभावात् । अन्यथोक्तातिप्रसङ्गात् ।
विसंवादिशुकादिवाक्यरचनाहेतुत्वेन भ्रमोपि कल्प्यत इति नित्यप्रमावन्नित्यभ्रमप्रसङ्गाच्च ।।
ननु शाब्दप्रमायां योग्यता तत्प्रमा वा गुणः । न च सर्वत्र प्रमाणवाक्येऽस्तीति
चेन्न ।मदिष्टवेदापौरुषेयत्वाविरोधिनस्त्वदिष्टेश्वरसिद्धिविरोधिनश्चैवंविधगुण जन्यत्वस्य साधनेऽर्थान्तरात् ।।

न च तत्रापीति ।। यादृच्छिकसंवादिन्यामपीत्यर्थः-- उक्तेति ।। अन्यथाऽस्मादादीत्यादिनोक्तेत्यर्थः ।।
‘वयन्तु ब्रूमः ‘इत्युपक्रमस्य ‘१ शाब्दप्रमायां वक्तुर्यथार्यवाक्यार्थज्ञानं न गुणः । किन्तु योग्यत्वादिकं यथार्थतज्ज्ञानं वेति

मण्यु २ क्तं पक्षान्तरमाशङ्कते ।। नन्विति ।। योग्यता स्वरूपसती न हेतुरतो न गुणः इत्यस्तत्प्रमा ३ वेत्युक्तम् - त्वदिष्टेति ।।
'प्रमायाः परतन्त्रात्सर्गप्रलयसम्भवात् ।
तदन्यस्मिन्ननाश्वासान्नविधान्तरसम्भवः ।। '
इति कुसुमाञ्जल्युक्त्या प्रामाण्यपरतस्त्वस्येश्वरसिध्यर्थत्वोपगमा ४ द्यथार्थवाक्यार्थज्ञानस्य गुणत्वस्य एव पक्षे वेदे तादृशयथार्थवाक्यार्थज्ञान ५ नवत्वेने ६ श्वरसिद्धेरित भावः ।।

१. शब्द- मु-अ. २. क्तप-कु-आ. ३. चेत्यु-अ-आ. ४. दिति भावः। ननु-अ.
५. नत्वेने-मु. ६. शज्ञानत्वेने-आ.

प्रदि-प्रसु-प्रत्येत-गुङ्गः) प्रामाण्यवादः पु - १७९.
---------- ---------- ----------
किञ्च योग्यता १ किं शब्दप्रतिपाद्यस्य संसर्गस्य सत्वं किं वा संसर्गसत्वाविनाभूतं धर्मान्तरम् ।।
नाद्यः । शाब्दप्रमायां शाब्दप्रमाया वा तद्विषयस्य वाऽजनकत्वात् । विषयत्वस्य प्रमात्वान्तर्गतत्वेन तद्धेतुत्वायोगाच्च । २ प्रत्यक्षादिप्रमास्वपि ३ नियतविषयसत्वस्य सद्भावेन त्वदुक्तस्य शाब्दा ४ साधारण्यस्यायोगाच्च । अप्रमायामपि विषयसत्वस्यैव दोषत्वापाताच्च २ ।

ननु 'न वैदिकप्रमाया गुणजन्यत्वेनेश्वरसिद्धिः'इति मणिकुदुक्तेरेतन्मते हेत्वन्तरेणा ५ स्त्वीश्वरसिद्धिरित्यत आह-- किञ्चेति ।। 'वाक्यार्थाबाधो योग्यता 'इतीहैव प्रामाण्यवादे मण्युक्तेराद्यः कल्पः । योग्यता ६ बाधोक्त्यनुरोधेनान्त्यः -- धर्मान्तरमिति ।। अन्त्येऽतीतादिसाधारण्या ७

दिति भावः । ८ तद्धेतुत्वायोगाच्चेति ।। आत्माश्रयादिति भावः ८ -- विषयसत्वस्यैवेति ।। गुणविरोधिन एव दोषत्वादनुगतिसम्भवाच्च । तथाच भ्रमे ९ऽसतोपि भानं त्वयापि स्वीकार्यम् । अन्यथा भ्रमत्वमेव न स्यादिति भावः ।।
ननु शुकबालादिवाक्यजन्यप्रमायामन्यस्य प्रमात्वप्रयोजकस्याभावादनन्यगत्या विषयसत्वरूपापि १० योग्यतैव गुणः इत्येव वाच्यमित्यत आह - आवश्यकेनेति।।

१. किं शब्दो न -छ. २. अयं ग्रन्थो नास्ति-ख. ३. नियतपदं नास्ति -च-छ.
४. ब्दप्रमाऽसा-मु-च. ५. णेश्वर -आ. ६. वादो-कुं. ७. अभावेत्याधिकमस्ति-कुं. ८. इयं पङ्क्तिर्नास्ति-अ. ९. प्यस-मु-अ. १०.अपिपदं न -आ.

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - १८०.
---------- ---------- ----------
आवश्यकेन निर्दोषत्वेनैव प्रमात्वोपपत्तेश्च ।।
नान्त्यः । त्वया ह्येकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्व १ प्रमाविशेष्यत्वाभावो वा एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं वा योग्यतेत्युक्तम् ।।

वक्तु२ भ्रमविप्रवम्भादिदोष ३ भावे योग्यताया अप्यभावेन तदर्थं तस्यापेक्षणियत्वेनावश्यकत्वमिति भावः । योग्यतावादोक्तमाह --एकेति ।।

जलेन सिञ्चतीत्यादौ सेकरूप ४ एकोयः पदार्थः तत्संसर्गेऽपरपदार्थभूतजलनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारिका ६ या प्रमा । तद्विशे ७ ष्यत्वाभावोस्तीति तद्योग्यवाक्यम् । वह्निना सिञ्चतीत्यादौ ८ तु
सेकनिरूपितसंसर्गे वह्निनिष्ठात्यन्ताभावप्रतियोगी सेकसंसर्ग इति प्रमित्युदयेन
तत्रापरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वमेवास्तीति तदयोग्यवाक्यम् । अतो नाव्याप्त्यतिव्याप्ती । अत्र आकाशे शब्द इति योग्यवाक्ये शब्दनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वमवृत्तिपदार्थे आकाशेऽस्तीत्यव्याप्तिनिरासाय एक ९ पदार्थ इत्यनुक्त्वा एतपदार्थसंसर्ग इत्युक्तम् । आकाशसंसर्गस्तु न तथेति न दोषः । अपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वाभाव इत्येव पूर्तौ तादृशप्रतियोगित्वप्रमाविशेष्यत्वं प्रतिबन्धकमिति मतावष्टम्भेन तत्प्रमाविशेष्यत्वाभाव इत्यन्तमुक्तमित्याहुः ।।

१. प्राकरकप्रमा - मु. च. २. क्तृभ्र. मु-अ. ३. षाभा-आ. ४. पोयः-कुं. ५. सेकपदं नास्ति -अ-आ. ६. याः प्रमात्वात् - तद्धि-आ. ७. ष्याभाः -कुं.
८.तु, इति न -मु. ९. कः प-अ-आ.

---------- ---------- ----------
तत्र चाद्य १ पक्षेऽन्वयप्रमाविरोहो योग्यताद्वितीये जलेन सिञ्चतीत्यत्र सेकानन्वयप्रतियोगितावच्छेदका येऽग्नित्वादयो धर्मास्तुच्छून्यत्वं जले विद्यमानं योग्यतेति पर्यवस्यति । तत्र यद्यपि इदं द्वयं संसर्गसत्वाविनाभूतं न तु संसर्गरूपमिति न पूर्वोक्त २ दोषः ।

नरहरिस्तु उक्तात्यन्ताभावप्रतियोगित्वाभाव इत्येवोक्तौ वाक्यार्थ एव योग्यता स्यादिति तत्प्रामाविशेष्यत्वाभाव इत्युक्तमित्यब्रवीत् । तथाच योग्यतावादे स्पष्टयिष्यामः । घटसंसर्गत्वं गेहनिष्ठात्यन्ताभावप्रतियोगीतिप्रमाविषयत्वस्य घटसंसर्गेपि सत्वनेन गेहे घटोस्तीति वाक्येऽव्याप्तिनिरासाय प्रमाविशेष्यत्वाभाव इत्युक्तम् ।।
अत्र स्वपरसाधारणप्रमाविशेष्यत्वाभावनिश्चयस्याशक्यत्वात्प्रमाप्रवेशे गौरवाच्चेत्यादिदोषाद्वितीयं लक्षणम् । वन्हिसंसर्गत्वं हि सेकपदार्थनिष्ठात्यन्ताभावप्रतोयोगितावच्छेदकधर्मः तच्छून्यत्वं जलसं ३ योगेऽस्तीति जलेन सिञ्चतीत्यादिवाक्यं योग्यम् । अग्निनेति वाक्यं त्वयोग्यमिति नाव्यप्त्यादिदोषः । अत्रो ४ क्तरूपप्रतियोगि ५ त्वाभावस्य वाक्यार्थसंसर्गसत्वपर्यवसन्नतया तज्ज्ञानस्य शाब्दप्रमायामहेतुत्वादेतत्प्रतियोगितावच्छेदकधर्मशून्यत्वमित्युक्तम् ।।
अनन्वयेति ।।
एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यान्ताभावप्रतियोगित्वस्यानन्वय-रूपत्वादिति भावः -- अग्नित्वादय इति ।। अग्नित्वमृत्वापाषाणादयः ।

१. व्यस्तं पदं - ख-ग-क-च-छ. २. क्ता दोषाः-छ. ३. सर्गेऽस्ती - आ. ४. अत उक्तं -मु. ५. ताकाभा- आ.

तथाप्यत्र पक्षद्वयेऽनन्वयप्रमाविरहो वा अनन्वयप्रमाविरहप्रमा वा अनन्वय प्रतियोगितावच्छेदकधर्मशून्यत्वं वा तच्छून्यत्वप्रमा वा गुण इति फलिता १ र्थः ।

स चायुक्तः । आवश्यकेन निर्दोषत्वेनैव प्रमात्वोपपत्तौ संसर्गव्यप्यत्वस्य संसर्गाभावप्रमाविरहस्य वा तत्प्रमाया वा संसर्गाभावप्रतियोगिताच्छेदकधर्मशून्यत्व स्य वा तत्प्रमाया वा गुणत्वकल्पनेऽतिगौरवात् । न हि निर्दोषत्वे सति तयोर्वा तत्प्रमयोर्वा व्यतिरेकेण शाब्दप्रमाव्यतिरेको दृष्टः ।

अग्नि १ संसर्गत्वादेः सेकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वस्याग्नित्वादिधर्मनिबन्धनत्वादग्नि नत्वादय इत्युक्तम् ।
प्रतियोगितावच्छेदका इत्यस्याधिकरणतावच्छेदका इत्यर्थ इत्य प्याहुः । 'योग्यता तत्प्रमा वा 'इति प्रागुक्तकल्पद्व ४ योक्त्यनुरोधादाह । अनन्वयप्रमाविरहो वेत्यादि ।। आवश्यकेनेति ।। उक्तप्रमाविरहादेर्वाक्यगतनिर्दोषत्वेनैव सम्भवादिति भावः । संसर्गव्याप्यस्येत्येतत्प्रमाविरहस्य विशेषणम् । ननु निर्दोषत्वस्येव तयोरप्यन्वयव्यितरेकसिद्धकारणत्वस्य त्यागायोगा ५ दित्यत आह ।। न हीति ।। तयोरिति ।। उक्तरूपप्रमाविरहधर्मशून्यत्वयोरित्यर्थः । विसंवादिशुकादिवाक्येऽपि निर्दोषत्वं न सिद्धम् । भ्रान्त्यादिदोषाभावेप्यन्यस्य
कस्य चित्कल्प्यत्वादिति भावः । गुणजन्यत्वान्यथानुपपत्यै ६ व तत्कल्प्यत इत्यत आह -- न च शाब्देति ।। अद्यापीति ।। अनुगतगुणकल्पनवेलायामपीत्यर्थः ।।

१. तोऽर्थः - क-ख-च-छ. २. निष्ठसं-आ. ३. त्याहुः-कुं. ४. यानु - आ.
५. ग इत्या-कुं-आ. ६. एवकारो नास्ति-मु-अ. त्यैतत्क - आ.

न च शाब्दप्रमाया गुणजन्यत्वमद्यापि सिद्धम् । येन तन्निर्वाहाय तयोर्वा तत्प्रमयोर्वा गुणत्वं १ कल्प्यते २ ।।
किञ्च प्रत्यक्षादावपि विषयसत्वाविनाभूतस्य विषयासत्व ३ प्रमाविरहादेः सत्वात्स एव गुणः स्यात् । अतीन्द्रियार्थसन्निकर्षादेर्गुणत्वेक्तिरयुक्ता स्यात् । तत्र सतोपि तस्य गुणत्वेन जनकत्वे मानं नेति चेत्समं प्रकृतेपि ।।
एपिचैवमप्रमायामपि विषयासत्वाविनाभूतविषयाभावप्रमा वा विषयासत्वावच्छेदकधर्मवत्वं वा तयोः प्रमा दोषः स्यान्न तु काचादिः ।।

स्वतन्त्रान्वयव्यतिरेकाभावेऽपि हेतुत्वकल्पनेऽतिप्रसङ्गमाह -- किञ्चेति ।। प्रमाविरहादेरित्यादिपदेन तत्प्रमावच्छेदकधर्मशून्यत्वतत्प्रमयोश्च ग्रहः -- सन्निकर्षादेरिति । सल्लिङ्गपरामर्श आदिपदार्थः ।
अपिचैवमिति ।। विषयसत्वाविनाभूतस्य गुणत्व इत्यर्थः -- विषयासत्वाविनाभूतेति विषयाभावप्रमाविशेषणम् । प्रमाविशेष्यत्वमित्यर्थः -- तयोरिति ।। विषयाभावप्रमाविषयासत्वावच्छेदकधर्मवत्वयोरित्यर्थः -- नत्विति ।। तथाच भ्रमे काचादिर्दोष इति मण्याद्युक्तिरयुक्ता स्यात् । तदन्वयव्यतिरेकिविरोधश्च स्यादितिभावः ।।

१. गुणजन्यत्वं - ख. २. कल्प्येत-खः-क-च-छ. ३. प्रमापदं नास्ति - ग .

किञ्च शाब्दि १ संसर्गप्रमा नियमेन संसर्गव्याप्यधीजन्या चेदनुमितिः स्यात् ।।
किञ्च असंसर्गप्रमाविरहो वाऽसंसर्गप्रमाविरहप्रमा वा गुण मते अग्निना सिञ्चेदित्यादौ श्रोतुर २ न्वयप्रमाविरहदशायां संसर्गप्रमा स्यात् ।।

ननु विषयासत्वाविनाभूतधर्म ३ प्रमादे ३ प्रमादेर्विषयसत्वभ्रमविरोधित्वत्कथं दोषतेत्यतः संसर्गव्याप्यप्रमा गुण इति पक्षे दोषान्तरमाह -- किञ्च शाब्दी संसर्गप्रमेति ।। पर्वतवन्हिसंसर्गादिप्रमावदिति भावः ।।
ननु संशयोत्तरप्रत्यक्षमिव व्याप्यधीजन्यमपि नानुमिति ४ रूपमिति चेन्न । ।५ तत्र बलवत्प्रत्यत्रकरणकत्वेन व्याप्यधीकरणकत्वाभावात् । इह च नियमेन व्याप्यधीजन्यत्वे तत्कारणकत्वापातात् । न हि परामर्शादपि शब्दः प्रत्यक्षसामग्रीव ६ द्बलवान् ।।
न च व्यप्यत्वप्रकारकज्ञानजन्यत्वेन तदजन्यत्वान्ननुमितित्वम् । नियमेन तज्जन्यत्वे तथात्वेन ।तज्जन्यत्वावश्यं भावात् । अन्यथा प्रमेयत्वादिनापि ज्ञाने तत्प्रमाया गुणत्वापत्तेः । असंसर्गप्रमाविरहप्रमात्वादिना हेतुत्वापेक्षया ७
संसर्गव्यप्यत्वप्रमात्वस्य लधुत्वात् । अन्यत्र तेन रूपेण हेतुतायाः क्लृप्तत्वात् । असंसर्गप्रमाविरहप्रमात्वादिना हेतुत्वस्य प्रमाया गुणजन्यत्वसिद्ध्यधीनत्वेनान्योन्याश्रयाच्चेति भावः ।
संसर्गव्याप्यप्रमा गुण इति पक्षं निरस्यासंसर्गप्रमाविरहो गुण इति पक्षोपि दोषमाह -- किञ्चासंसर्गेति ।। क्वचित्तु असंसर्गप्रमाविरहप्रमा वेत्यपि पाठः ।

१. ब्दीयसं-ख. २. नन्वयप्रमाविरहदशायां -क-ख-च-छ. ३. भ्रमा-अ. ४.रूपपदं न -मु. ५.अयं ग्रन्थः लुप्तः - अ. ६.बल-मु. ७. या असं - अ.

प्रदि-प्रसु-प्रत्येत-गुङ्गः) प्रामाण्यवादः पु - १८५.

न च श्रोतुस्तद्विरहदशायामपीश्वरस्यासंसर्गप्रमास्ति सा च श्रोतुः संसर्गप्रमा १ बन्धिकेति वाच्यम् । तथात्वे ईश्वरस्य वाक्यार्थप्रमा गुण इति चिरन्तनमतत्यागायोगात् ।।

किञ्चेश्वरस्यानन्वयप्रमा न तावद्विषयासत्वावेदनेन प्रतिबन्धिका । श्रोतुस्तदावेदनस्य व्यधिकरणया स्वरूपसत्येश्वरनिष्ठप्रमाया कर्तुमशक्यत्वात् । नापि लिङ्गभूतया ज्ञातया तया तत्कर्तुं शक्यम् ।

तदा तूभयत्र दोषान्तरमाहेत्यवतार्य विरहदशायामित्यनन्तरं तत्प्रमादशायामित्यपिव्याख्येयम् -- संसर्गप्रमास्यदिति ।। तथाचान्वव्यभिचारान्नायं गुणत्वेन हेतुरिति भावः ।।

ननु तत्र सत्यप्युक्तरूपगुणे कार्याभावः प्रतिबन्धनिमित्तो नाहेतुत्वनिमित्त इति भावेनाशङ्क्य निराह -- नचेति ।। चिरन्तनमतेति ।। 'न वैदिकप्रमाया गुणजन्यत्वेनेश्वरसिद्धिः'। इत्यादिमण्युक्त्या प्रतीतश्चिरन्तनमतत्यागोऽयुक्तः स्यादित्यर्थः ।।

ननु व्यधिकरणस्य गुणत्वायोगेन त्यागेऽपिविरोधिविषयकत्वात्प्रतिबन्धकत्वं स्यादेवेत्यतो न युक्तं तदपीत्याह -- किञ्चेति।। प्रतिबन्धकत्वं किं विरोधिविषयज्ञानरूपेणोत साक्षात् । आद्योपि किं स्वरूपसती वा ज्ञाता सती लिङ्गतया वेति विकल्प्याद्यद्वयं क्रमेण निराह -- न तावादित्यादिना ।। तदावेदनस्य विषयासत्वज्ञापनस्येत्यर्थः । समानाधिकरणज्ञानेनै २ तदावेदनस्य

दृष्टचरत्वादिति भावः -- लिङ्गभूतयेति ।। अग्निना सिञ्चेदिति वाक्येऽन्वयोऽसन् तथेश्वरप्रमाविषयत्वात्संमतवदित्येवं लिङ्गतयेत्यर्थः । अन्त्यपक्षं निराह -- नापि सेति ।।

१. प्रतिबन्धि - ख-च. २. वत-कुं.

तथात्वे ह्यनन्वयप्रमाज्ञानस्यैव प्रतिबन्धकत्वेन तत्प्रमाया अज्ञानदशायां संसर्गप्रमा स्यात् । नापि सा विषयासत्वमनावेद्य स्वरूपेणैव विषयसत्वविरोधित्वेन विषयसत्वगर्भितप्रमाप्रतिबन्धिका । तथात्वेऽनन्वयस्यैव साक्षाद्विषयसत्वविरोधित्वेन प्रमाप्रतिबन्धकत्वौचित्येन प्रमाग्रहणवैयर्थ्यात् ।।
किञ्च वस्तुगत्यान्वयविषयाया अपि सर्वकार्यहेतुभूताया ईश्वरप्रमायाः शब्दप्रमां
प्रत्यपि हेतुत्वेन कथं तत्प्रतिबन्धकत्वम् । न च प्रमाया गुणजन्यत्वमद्यापि सिद्धम् । येनेश्वरज्ञानस्योपादानापरोक्षज्ञानत्वेन हेतुत्वमनन्वयप्रमात्वेन तु प्रतिबन्धकत्वमिति कल्पेत ।।
किञ्चानन्वयप्रतियोगितावच्छेदकधर्मशून्यत्वम् प्रणागुण इति मते अतीन्द्रियविषये वाक्ये संसर्गप्रमातः प्रगुक्तस्या ----

विरोधिविषयत्वेप्ययुक्तं प्रतिबन्धकत्वमित्याह -- किञ्च वस्तुगत्येति ।। ननु प्रमाया गुणजन्यत्वान्यथानुपपत्यैव द्वैरूप्यमाकारभेदेनेश्वरप्रमायाः १ कल्प्यत इत्यत आह -- न चेति ।।
प्रागुक्तमतान्तरमपि प्रातिस्विकदोषेण नराह -- किञ्चेति ।। अतीन्द्रियेति ।। 'ज्योतिष्टोमेन स्वर्गकामो यजेत 'इत्यादिवाक्ये ---

१. यां - आ.

प्रदि-प्रसु-प्रत्येत-गुङ्गः) प्रामाण्यवादः पु - १८७.

असम्भवान्न १ शाब्दप्रमाहेतुता ।।
एतेनायोग्यताज्ञानेन शाब्दज्ञानप्रतिबन्धात् तद्विघटनीयस्य योग्यताज्ञानस्य शाब्दधिहेतुत्वे सिद्धे तद्विशेषौ योग्यताप्रमाभ्रमौ शाब्दप्रमाभ्रमौ प्रति जनकाविति निरस्तम् । अयोग्यताया उक्तरीत्या विषयाभावरूपत्वे बाधवद्विषयाभावव्याप्यरूपत्वे सत्प्रतिपक्षवत्साक्षात्प्रतिबन्धकसम्भवे योग्यताज्ञानवनविघटकत्वकल्पकाभावात् ।

हेतुहेतुमद्भावादिरूपस्वर्गाद्यनन्वयप्रतियोगितावच्छेदकधर्मो ज्योतिष्टो २ मत्वादि र्न किन्तु कृषित्वादिरेवेति ज्ञानस्य तदन्वयप्रमित्यनन्तरभावत्वेन तद्धेतुत्वमयुक्तमित्यर्थः । योग्यताज्ञानस्य हेतुत्वोपपादनयोक्तमयोग्यतेत्यादि । साक्षादप्रतिब्धकस्य कार्यानुकूलकिञ्चिद्विघटकत्वरूपत्वात्प्रतिबन्धकत्वस्येति भावः । तद्विशेषाविति । 'इति न्याया ३ दिति भावः ।।
एतेनेत्येतद्व्यनक्ति -- अयोग्य ४ तेति ।। उक्तरीत्येति ।। 'योग्यता किं शब्दप्रतिपाद्यस्य ५ संसर्गस्य सत्वं 'इत्यादिनोक्तरीत्येत्यर्थः-- विषयाभावव्याप्येति ।। 'एकपदार्थसंसर्गः'इत्यादिनोक्तरीत्येत्यनुषङ्गः । योग्यताज्ञानेत्यादि । तथाच योग्यताज्ञानस्यैव शब्दज्ञाना ६ हेतुत्वे 'यत्समान्य 'इति न्यायानवतारान्न योग्यताप्रमाभ्रमौ गुणदोषौ सिद्ध्यत इति भावः ।।

१. तस्य शा- मु-च. २. मादि-कुं. ३. दपीति - मु. ४. ताया इति -कुं.

५. संसर्गपदं न -अ. ६. नहे - अ.

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - १८८.

व्यभिचारज्ञानासंसर्गग्रहाप्रामाण्यज्ञानानि तु न साक्षदनुमितिप्रवृत्तिप्रतिबन्धकानि भिन्नविषयकत्वादित्यनुमितिप्रवृत्तिहेतुभूतव्याप्तिज्ञानसंसर्गग्रहप्रामाण्यज्ञानविघटकानि । तस्माच्छाब्दज्ञाने आकाङ्क्षाऽऽसत्तौ अयोग्यतानिश्चयविरहस्य हेतवः । ते च भ्रमसाधारणाः । प्रमाणाबाधरूपा स्वरूप सती योग्यता तु प्रामाण्यान्तर्गतविषयसत्वमग्र्यं विशेषस्तु निर्दोषत्वमेवे २ ति वक्ष्यते ।

नन्वेवं व्याप्तिज्ञानमप्यनुमितिहेतुर्न स्यात् । तथा वैशिष्ट्यज्ञानं प्रमाण्यज्ञानं च प्रवृत्तिहेतुर्न स्यात् । तद्विघटकस्य व्यभिचारज्ञानादेः साक्षादेवानुमितिप्रतिबन्धकत्वसंभवादित्यत आह -- व्यभिचारेति ।। एवं योग्यतादेर्गुणत्वं निरस्य मणौ योग्यत्वादिकं गुण इत्यादिपदेन आकाङ्क्षाऽसत्योरप्यु ३ पादानं यत्तदप्ययुक्तमिति हेतुं वदन्नेवोपसंहरति -- तस्मादिति ।। अयोग्यतानिश्चयविरह इति ।। न तु योग्यताज्ञानमित्यर्थः । विवरिष्यते चैतद्द्योग्यतावाद इति भावः । भ्रमसाधारण ४ इति हेतुगर्भम् । न गुण इत्यन्वयः । नन्वेवं गुणनिरासे कार्ये वैजात्यस्य कारणवैजात्यनिमित्त ५ त्वाज्ज्ञान ६ सामान्यसामग्र्या अप्रमायामपि सत्वेन प्रमासामग्र्या ७ मप्रमासामग्रीतो वैलक्षण्याभावे तत्कार्यवैलक्षण्यं न स्यदित्यत आह -- अप्रमेति ।। निर्दोषत्वमेवेति ।।

१.ज्ञानसा-ख. २. त्युक्तम्-कं-ग. ३. प्युपपादनं-अ. ४. णा-कुं. ५. कत्वा-मु. ६. सामान्यपदं न-कुं. ७. ग्र्या अ-कुं -आ.

स्थूलावयविप्रत्यक्षप्रमादौ भूयोवयवेन्द्रियसन्निकर्षादेर्हेतुत्वभङ्गः पु - १८९.

तस्मादनित्यप्रमात्वपक्षकानुमानेष्विवानित्यप्रत्यक्षप्रमात्वादिपक्षकानुमानेष्वपि तदनुगतगुणाभावाद्बाधासिद्ध्यादीति ।।

१ तदप्युक्तं 'अन्यथा' इत्यदिना । अनुगतगुणाभावेपि जन्यप्रत्यक्षप्रमात्वादेः कार्यतावच्छेदकत्वे पूर्वोक्ता २ व्यवस्थापातादित्यर्थः । ३ एवमुत्तरत्रापि ४ द्रष्टव्यम् ३ ।।

प्रत्यक्षादिप्रमासु प्रत्येकानुगतगुणभङ्गः ।। १३ ।।

यद्यपि दोषाभावोपि न प्रामाण्यहेतुरिति वक्ष्यते । तथापि भिक्षुपादप्रसारन्यायेन गुणहेतुत्वनिरासाय दोषाभावस्य प्रमानिमित्तत्वोक्तिरिति ध्येयम् । पूर्वोक्त्येति ५ ।। अनत्यप्रमामात्रे अनुगतगुणभङ्गान्तो ६ क्त्येत्यर्थः ।।

प्रत्यक्षादिप्रमासु प्रत्येकानुगतगुणभङ्गः ।। १३ ।।

यत्तूक्तं मणौ ७ 'तत्तत्प्रमायां ८ भूयोवयवेन्द्रियसन्नकर्षयथार्थलिङ्गसादृश्यवाक्यार्थज्ञानानां यथायथं प्रत्येकमेव गुणत्वम् । अन्वयव्यतिरेकात् । ९ तत्तदप्रमायां पित्तादिलिङ्गभ्रमादीनां दोषत्ववत् प्रत्यक्षेविशेषदर्शनमपि गुणः ।तदनुविधानात् 'इत्यादितत्तात्पर्य १० माशङ्कते अथापि स्यादित्यादिना ।।

१. एतद-क-ख-ग-च-छ. २. नवस्था-छ. ३. एतन्नास्ति-मु-क-च. ४. योज्यं-क-ख-छ. ५.क्तेति-कुं-आ. ६. क्तेति-कुं-अ-आ. ६. तत्प्र-आ-अ. ८.याः-कुं. ९. तद-अ. १०. र्यार्थ-अ-आ.

अथा १ पि स्यात् भ्रमसामान्ये प्रत्यक्षादिभ्रमे २ वानुगत ३ दोषस्याभावेपि तत्तद्भ्रमविशेषे पित्तादि ४ रिव स्थूलावयविप्रत्यक्षप्रमायां भूयवयवेन्द्रियसन्निकर्षः,
संशयविपर्ययोत्तर ५ प्रत्यक्षप्रमायां विशेषप्रमा, नियमेन प्रमयोरनुमितिशाब्दप्रतीत्योः सत्यलिङ्गपरामर्शवाक्यार्थज्ञाने
चान्वयव्यतिरेकाभ्यां हेतू । एवं च प्रमाया अप्रमाव्यावृत्तानानुगताधिहेतिजन्यत्वात्परतस्त्वम् । त एवाननुगता हेतवः प्रमां प्रत्यसाधारणहेतुत्वे ६ नोपाधिना गुणा ७ इत्युच्यन्ते । तस्मादनित्यप्रमात्वमनित्यज्ञानत्वप्रयोजकाधिकप्रयोज्यं
तदन्वयव्यतिरेकानुविधायित्वात् ।

संशयेति ।। संशयोत्तरविपर्ययोत्तरेत्यर्थः -- विशेषेति ।। व्याप्येत्यर्थः । प्रमायोरीति प्रतीत्योर्विशेषणम् । तावता कथं प्रमात्वस्य ८ परतस्त्वमित्यत आह -- एवं चेति ।। उक्तसन्निकर्षादेर्हेतुत्वे सतीत्यर्थः । गुणजन्यत्वात्कथमेतदित्यत आह -- त एवेति ।। असाधारणेति । भ्रमव्यावृत्तेत्यर्थः ।।
मणिकृदभिमतमनुमानमाह -- तस्मादिति ।। उक्तसन्निकर्षादेर्गुणत्वेन तज्जन्यत्वेन प्रमायाः परतस्त्वसम्भवात्प्रायोग उच्यत इत्यर्थः -- तदन्वयेति ।। उक्तरूपसन्निकर्षादिलक्षणाधिककारणपरामर्शः ।

१ अपिस्यात् इति नास्ति - ग. २. च-क-कुं. ३. तस्यदो-मु-च-छ-ग. ४. कमिव-मु-च. ५. प्रत्यक्षपदं नास्ति -छ. ६. त्वे-मु-च-ग. ७. 'इति' इति नास्ति-छ. ८. परतस्त्वमि-आ.

स्थू-प्रमादौ-भूर्वे-सदे-र्हेङ्गुः) प्रामाण्यवादः पु - १९१.

अप्रमात्ववत् । अन्यथाऽप्रमापि प्रमा स्यात् । न चाप्रमाया १ मधिको दोषो हेतुरस्तीति वाच्यम् । तथात्वे भ्रमस्य प्रमात्वप्रयोज २ कजन्यत्वेसत्यधिकजन्यत्वेन प्रमाविशेषत्वापातादिति मम सिद्धान्तरहस्यमिति चेन्मैवम् ।
भूयोवयवेन्द्रियसन्निकर्षे शङ्खत्वादिविशेषतदर्शने च सत्यपि पीतःशङ्ख इत्यादिभ्रमस्य वेशो ३ रगभ्रमस्य बाष्पावयवे धूमवयविभ्रमेऽवयव्यंशे ---

हेतोरप्रयोजकत्वनिरासाय विपक्षे बाधमाह -- अन्यथेति ।। अनित्यज्ञानत्वप्रयोजकादधिकप्रयोज्यत्वे तन्मात्रप्रयोज्यत्व इत्यर्थः । आपादकासिद्धिमाशङ्क्याह -- न चेति ।। प्रमात्वप्रयोजकेति । अनित्येति योज्यम् ।
अनित्यज्ञानत्वप्रयोजकस्यैवानित्यप्रमात्वप्रयोजकत्वेन त्वदभिमतेरिति भावः -- इत्यादिभ्रमस्येति ।। तिक्तो गुड इत्यादिरादिपदार्थः -- ४ वंशेति ।। ५ अनुरगत्वस्य स्पर्शने दर्शने भूयोवयवेन्द्रियसन्निकर्षे सत्यपि ६ मण्डूकवसाक्तनेत्रस्य मण्डूकवसादोषेण जायमानस्य वंशे उरगभ्रमस्येत्यर्थः ।
तदिन्द्रयजप्रत्यक्षप्रमायां तदिन्द्रियविशेषदर्शनं हेतुरिति विशेषदर्शनस्य हेतुत्वे भवेदेवं विशेषविवक्षा । तदेवायुक्तमिति 'एवं भ्रमोत्तरप्रमायामपि 'इत्यादिना वक्ष्याम इति भावेन स्थलान्तरेप्युक्तसन्निकर्षस्य व्यभिचारमाह -- बाष्पेति ।। ७

।धूमेति ।। धूमरूपावयवीत्यर्थः ।

१. या अधि-ग-कुं. २. काधिकप्रयोज्यत्वे सत्यप्यधिक-मु-च. ३. शे-उर-मु.
४. विपरीतप्रत्यक्षं गुण इत्यत आह--वंशेति-अ-आ. ५. अनुगत्वस्य इति नास्ति- कुं. ६. 'मण्डूकवसाक्तनेत्रस्य'इत नास्ति-कुं. ।७. अयं ग्रन्थः नास्ति -मु-आ. तदिन्द्रियजप्रत्यक्षप्रमायां तदिन्द्रियजविशेषधीतद्दर्शनं हेतुरित्यत आह - बाष्पेति-अ.

---------- ---------- ----------

एव भ्रमस्य १ दर्शनेनान्वयव्यभिचारात् ।
यदि च तत्र पित्तमण्डूकवसाञ्जनादिदोषप्रतिबन्धात्प्रमानुत्पत्तिस्तर्ह्यावश्यकत्वाद्दोषाभाव एव २ हेतुः ।मम तु दोषाभावेनाप्रमारूपविपरीतकार्यानुत्पत्तौ ज्ञानसामग्र्यैव प्रमोत्पत्तिः।

यत्र स्थूलावयविप्रत्यक्षे भूयोवयवेन्द्रियसन्निकर्षो गुण इत्युक्तं तस्मिन्नेवेति विरोधस्फोरणायावव्यंश एवेत्युक्तम् । ३ अञ्जनादीत्यादिपदेन सारूप्यादिग्रहः -- दोषाभाव एवेति ।। यादृच्छिकसंवादिनि दोषाभावः प्रमाव्यभिचारीतितूत्तरभङ्गे निरसिष्यते इति भावः ।।
यत्तु सन्निकर्षाद्युत्कर्षेण प्रमोत्कर्षात्सन्निकर्षादिरेव हेतुरिति । तन्न । उक्तस्थलेषु तदुत्कर्षे सत्यपि प्रमानुदयेन व्यभिचारात् ।।
ननु सिद्धान्ते दोषाभावस्य प्रामाण्यहेतुत्वादुक्तस्थले प्रामाण्यप्रयोजकज्ञानसामग्रीसत्वात्प्रमोत्पत्तिः स्यादित्यत आह -- मम त्विति ।।

(४ विशेषदर्शनपदेन विशेषदर्शनसामान्यविविक्षायां प्रागुक्तान्वयव्यभिचारलगनेप्युक्तरूपविशेषदर्शनाविवक्षायां नोक्तगदोषलगनमित्यतो) ५।अनौपाधिकभ्रमोत्तरप्रत्यक्षप्रमायामेव विशेषदर्शनं गुणोऽतो नोक्त दोषः इत्यतो ।विशेषदर्शनाभावे भ्रमोत्तरप्रमाभाव इति व्यतिरेकोन्यथासिद्धो न विशेषदर्शनहेतुताकल्पक इति भावेन दोषान्तरमाह -- एवं भ्रमेति ।। संशयविपर्ययरूपभ्रमेत्यर्थः ।।

१. चद-च-ग-ख. २.'तव' इत्यधिकं-छ-ख. ३. सन्निकर्षमात्रव्यभिचारोदाहरणमेतत्-अ. ४. कुण्डलितो ग्रन्थः नास्ति - मु. ५. अयं ग्रन्थः कुण्डलितः - कुं.

स्थू-प्रप्रदौ-भूवैं-र्हेङ्गः) प्रामाण्यवादः पु - १९३.

एवं भ्रमोत्तरप्रमायामपि तदनुत्तरप्रमायां या क्लृप्ता सामग्रि भ्रमकाले सा न वर्तते चे १ त्तदभावादेव कार्याभावो न हेतुः । वर्तते चेद्विशेषदर्शनाभावेपि तदनुत्तरप्रमेव २ तदुत्तरप्रमाप्युत्पद्येतैव । न हि कार्ये ३ वैचित्र्याभावेपि कालभेदमात्रेण विचित्रहेत्वपेक्षा ।
यादि तदा संसयादिदोषः प्रतिबन्धकस्तर्ह्यावश्यकत्वाद्दोषाभावादे ४ व प्रमास्तु ।

एवं भ्रमेति।। संशयविपर्ययरूपभ्रमेत्यर्थः । प्रमायामपि न विशेष ५ प्रमाहेतुरित्यन्वयः । ननु भ्रमानुत्तरप्रत्यक्षसामग्र्या कथं तदुत्तरप्रत्यक्षप्रमा जायेतेत्यत आह -- न हीति ।। विचित्रेति ।। विशेषदर्शनरूपेत्यर्थः -- संशयादिति ।। विपर्यय आदिपदार्थः ।।

ननु संशयस्य ग्राह्यसंशयपर्यवन्नतया ६ प्रमाणापरिपन्थित्वात्कथं प्रतिबन्धकत्वशङ्का । अन्यथा तस्मिन्सति विशेषदर्शनादपि प्रत्यक्षानापत्तेरिति
चेन्न । विशेषदर्शनविरहविशिष्टसंशयादेः प्रतिबन्धकत्वेन तदभिप्रायेण संशयादिदोषः प्रतिबन्धक इत्युक्तेः ।।
दोषाभावादेवेति ।। ननु विशेषदर्शनविरहविशिष्टसंशयादिदोषाभावो हि संशयादिस्थले विशेषा ७ दर्शनरूप विशेषणाभावेनैव वाच्य इति विशेषदर्शनमेव पर्यवन्नमिति चेन्न । तावता तस्य प्रतिबन्धकरूपदोषाभावत्वेनैव हेतुत्वप्राप्त्या तेन हेतुत्वाप्राप्तेः । विशिष्टाभावसम्पादनेनान्यथोपक्षीणत्वाच्च ।।

१. चेत्सामग्र्य -ग-कुं. २. मावत्तदु-मु-च. ३. र्यवै-कुं. ४. वसास्तु-ग-कुं. ५. प्रमापदं न -आ. ६. प्रामाण्या-कुं. ७. षद-कुं.अ.

---------- ---------- ----------

किञ्च करादौ चरणादिभ्रमजन्ये संशयानन्तरभाविनि ---------

रुचिदत्तादयस्तु भ्रमस्थले विशेषादर्शनसहकुतसंशयादेः प्रतिबन्धकत्वे संशयो १ त्पत्तिकाले प्रत्यक्षापत्तिः । न च 'यज्ज्ञानं यत्र प्रतिबन्धकं तत्सामग्र्यपि तत्र प्रतिबन्धिका 'इति न्यायात्त २ दा संशयसामग्रीप्रतिबन्धान्न प्रत्यक्षमिति वाच्यम् । ३
एवमपि धर्मिज्ञानकाले दैवात्पुरुषत्वादिज्ञानवतः पुरुषत्वादिनिश्चयापत्तेः । संशयस्य तत्सामग्र्या वा तदानीमभावात् । न च दोषस्य प्रतिन्धकत्वान्न तदा दोषात्प्रत्यक्षमिति वाच्यम् । तर्ह्यावश्यकत्वात्संशयकालेपि तत एव दोषात्प्रत्यक्षानुत्पत्तिरस्तु । किं संशयस्य प्रतिबन्धकत्वाभ्युपगमेन ।

तथाच विशेषदर्शने सति विशेषादर्शनरूपदोषाभावादेव प्रत्यक्ष प्रमोत्पत्तिर्न तु निरुक्तिविशिष्टाभावस्य प्रत्यक्षप्रमाहेतुत्वम् । मानाभावात् । न च विशेषादर्शनस्य दोषत्वे संशयानुत्तरप्रमानुदयापत्तिरिति शङ्क्यम् । फलबले नैतस्य क्वचिदेव दोषत्वकल्पनादित्याहुः ।
दोषाभावादेव सास्त्विवत्यनन्तरं ममत्वित्यादिवाक्यमत्राप्यनु ४ वर्त्ययोज्यम् । भ्रमोत्तरप्रमाव्यतिरेकस्य विशेषदर्शनत्वेन विशेषदर्शन ५ व्यितरेकनिमित्तता नास्ति किन्तु दोषनिमित्ततेत्यन्यथासिद्धमुक्त्वा सत्यपि विशेषप्रमाव्यतिरेकादौ प्रमोत्पत्तेर्व्यभिचारान्न विशेषप्रमा ६ यथार्थलिङ्गपरामर्शादेः प्रमा प्रति हेतुत्वं दूरे
गुणत्वेनेति भावेनाह -- किञ्चेति ।।

१.यानु-मु. २.त्तत्सं-मु. ३. 'एवमपि इत्यारभ्य 'तर्हि' इति पर्यन्तं-आ. पुस्तके नास्ति. ४. वृत्या-आ. ५. व्यतिरेकपदं न -आ. विशेषदर्शन इति नास्ति -अ.
६. याः - कुं.

स्थू-प्रप्रदौ-भूर्वे-सदे-र्हेङ्गः) प्रामाण्यवादः पु - १९५.
---------- ---------- ---------
-- नियमेन प्रमारूपे पुरुषसाक्षात्कारे विशेषप्रमारूपस्य वह्न्यालोके धूमभ्रमजन्यायां नियमेन प्रमा १ यामनुमितौ यथार्थलिङ्गपरामर्शरुपस्य भ्रान्तविप्रवम्भकवाक्यजन्यायां नियमेन प्रमा २ यां शाब्दप्रतीतौ यथार्थवाक्यर्थज्ञानरूपस्य गुणस्याभावेपि प्रमात्वदर्शनेन व्यतिरेकव्यभिचारोपि ।।
किञ्च दुष्टायां ज्ञानसामग्र्यां सत्यमपि गुणव्यतिरेकेण प्रमाव्यतिरेको न दृष्ट इति गुण न हेतुः । ३ दृष्टो विसंवादिशुका ४ दिवाक्ये, तत्र भ्रान्तिविप्रलम्भादिदोषाभावादिति चेन्न ।

ननूक्तस्थले सर्वत्रेश्वरप्रमामादाय विशेषप्रमा ५ सत्यपरामर्शयथार्थवाक्यार्थज्ञानानां न व्यतिरेकव्यभिचार इति चेन्न । अस्मिन्पक्षे 'नचेश्वरे ६ सोस्तीति वाच्यं 'इत्यदिना दोषाणां पूर्वमेवोक्तत्वादिति भावः ।।

ननु गुणव्यतिरेकेण प्रमाव्यतिरेकस्यापि दर्शनादुक्तस्थलेष्वपि कश्चन गुणः कल्प्यत इत्यतो व्यतिरेकासिद्धदोषमाह -- किञ्चेति ।. शङ्कते --दृष्ट इति ।।

सत्यपि दोषाभावे गुणव्यतिरेकेण प्रमाव्यतिरेक इत्यनुषङ्गः । तत्र दोषाभावस्तवमुपपादयति -- तत्रेति ।। आदिपदेन प्रमादकरणापाटवयोर्ग्रहः । अप्रामाण्यस्य दोषजन्यत्ववादिना त्वयापि ७ तत्र कश्चिद्दोषः कल्प्यः । अन्यथा तस्य परत ८ स्त्वाहानेरित्याह -- गुणव्यतिरेकेणेति ।।

१. रूपेत्यधिकं-ग-कुं. २. रूपेत्यधिकं-ग-कुं. ३. ननु इत्यधिकं-मु-च-छ. ४. कवा-छ-ख. ५.यथार्थप-आ. ६. सास्ती-कुं. ७. तत्रेति नास्ति - कुं - आ. ८. स्त्वहाने - अ.

स्थू-प्रप्रदौ-भूर्वे-सदे-र्हेङ्गः) प्रामाण्यवादः पु - १९६.

तत्राप्यनित्यवाक्यदोषस्य विवक्षितार्थतत्वज्ञानाभावस्य वा शुकवाक्य १ मूलभूतवाक्यप्रयोक्तृपुंनिष्ठस्य भ्रान्त्यादेर्मूलदोषस्य वा सत्वात् । गुणव्यतिरेकेण प्रमात्वव्यतिरेके सिद्धेपि भ्रमत्वार्थं त्वयापि भ्रमत्वप्रयोजकत्वेन क्लृप्तस्य दोषस्य तत्र वक्तव्यत्वाच्च । अभावोपि हि करणापाटवविशेषादर्शनादिरिव

लोकव्यवहारात्प्रमाव्यावृत्तकारणत्वात्तत्वज्ञानविरोधित्वाच्च दोष एव ।

अङ्गीकृतं च त्वयापि नीलं तम इति भ्रमे दोषान्तरा २ भावेनाधिष्ठानभूत ३ स्याभावरूपस्य तमस एव दोषत्वम् । क्वचिद्गुणसन्निधानन्तु रासभवद्याद्दच्छिकं वा गन्धं प्रति क्लृप्तिकारणगन्धप्रागभावसहभूतपाकजरसप्रागभाववत्प्रमां प्रति क्लृप्तप्रयोजकदोषाभावसहभूतत्वेनान्यथासिद्धं वा ।।

ननु विवक्षितार्थतत्वज्ञानाभावस्याभावरूपत्वात्कथं दोषत्वमित्यत आह -- अभावोपिहीति ।। अन्वयाभावादिरादिपदार्थः -- अधिष्ठानेति ।। नैल्यारोपाधिष्ठानभूतस्यालोकाभावरूपस्येत्यर्थः । कुत्र चिद्वा गुणानुविधानस्य का गतिरित्यत आह -- क्वचिदिति ।। प्रमायां गुणानुविधानमभ्युपेत्यापि मण्युक्तान्यथासिद्धिमाह -- गन्धमिति ।।
ननु रसप्रागभावोन्यत्र कार्ये क्लृप्तान्वयव्यतिरेकत्वादस्त्वन्यथासिद्धः । गुणसन्निदिस्तु नान्यत्र कार्ये क्लृप्तान्वयादिः । प्रकृतकार्येण विना कार्यान्तरोपक्षीणो ह्यन्यथासिद्धिः ।

१. स्य मू - क-ख-छ. २. सम्भवेना - मु-च. ३. स्य भावाभावरू - छ.

किञ्च त्वयाप्यन १ न्यथासिद्धशब्दस्य यौगकत्व आत्माश्रयाल्लोकव्यवहारानुसारेण पारिभाषिक एवार्थ उक्तः । एवं च २ भ्रमरूपविपरीतकार्योत्पादक ३ दोषनिरासकस्य गुणस्य विपरीतकार्योत्पादक ३ ।दोषनिरासकस्य गुणस्य विपरीतकार्योत्पादक ३ ।निरासक्तवरूपान्यैवान्यथासिद्धिः पारिभाष्यताम् । लोके घटं प्रति दण्डत्व इव
कदलीकाण्डरूप --------

न हि गुणः कार्यान्तरेण सिद्धः । येनान्यथासिद्धः स्यादित्यत आह -- किञ्चेति ।। आत्माश्रयादिति ।। कारणलक्षणशरीरप्रविष्टस्यान्यथासिद्धशब्दस्य कार्यान्तरजनकत्वमिति ४ वा अनेन विना कारणान्तरे ५ ण कार्यं सिद्धमुत्पन्नमिति वार्थोक्तावात्माश्रयादित्यर्थः -- पारिभाषिक एवेति ।। 'अन्यथासिद्धत्वं च त्रिधा । येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तत्तथा।
घटं प्रति दण्डरूपस्य । अन्यं प्रति पूर्ववर्तित्वे ज्ञात एव यं प्रति यस्य पूर्ववर्तित्वमनगम्यते । शब्दं प्रति पूर्ववृत्तित्वं ज्ञान एव ज्ञानं प्रत्याकाशस्य । अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वम् । यथा गन्धवति गन्धानुत्पादाद्गन्धं प्रति गन्धप्रागभाव्सय नियतपूर्ववर्तित्वकल्पनात्पाकजस्थले गन्धं प्रति रूपादिप्रागभावानामन्यथासिद्धत्वं 'इत्यादिग्रन्थेनानुमानखण्डे कारणतावाद उक्त इत्यर्थः । अन्यैवान्यथासिद्धिरित्यनन्तरं लोकव्यवहारानुसारेणेत्यनुकर्षः । स चासिद्ध इत्याह -- लोक इति ।।

१.प्यन्य-कुं. २. चाप्रमा-छ. ३. ।एतावन्नास्ति - ख. ४.तितेनवि - कुं. ५.रोत्पत्तिका -अ. ६.'वा ' इति नास्ति - कुं.

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - १९८.

---------- ---------- ----------

-- विपरीतकार्योत्पादकस्य वेत्रबीजसम्बन्धिदावाग्निदाहस्य विरोधित्वे पदार्थे वेत्राङ्कुरं प्रति कारणत्वाव्यवहारात् । १ दाहविरोधिनो २ हेतुत्वे क्वाप्युत्सर्गापवादाभावप्रसङ्गाच्च । यस्य हि स्वसामग्री ३ वशेन प्रसक्तिस्तदौत्सर्गिकम् । सत्यामपि सामग्र्यां यद्वशात्तद्विपरीतं कार्यं भवति तत्तस्यपवादकम् ४।न च दाहविरोधिने हेतुत्वे दाहस्थले वेत्राङ्कुरसामग्र्यस्ति ।

दण्डत्वे यथा कारणता ५ ऽव्यवहारस्तथा कारणत्वाव्यवहारात् । किन्त्वन्यथासिद्धित्वेनैव व्यवहारादित्यर्थः ।।
एतेन 'किञ्चेदं गुणान्वयव्यतिरेकित्वं अन्यत्रानुपक्षीण ६ त्वं सामान्यं वा ।
नाद्यः । दोषनिरीसोपक्षीणत्वादि 'त्यादिदेवताधिकरणटीका विवृता ।।
७ लौकिकव्यवहाराभावेप्यस्तु हेतुत्वमित्यतः 'औत्सर्गिकत्वात्प्रामाण्यस्य 'इति तत्वनिर्णयटीकोक्तं विपक्षबाधकत्वेन संयोज्य तद्व्यनक्ति -- दाहेत्यादिना ।। अस्त्वेवमुत्सर्गापवादशब्दार्थः । विरोधिनोपि हेतुत्वे तदभावप्रसङ्गः कुत इत्यत आह -- न चेति ।। दाहस्थल इत्यादि ।। तथाच 'सत्यामपि तत्सामग्र्यां' इत्यादेरभावादुत्सर्गापवादाभावप्रसङ्ग इत्यर्थः ।।
एतेन तत्वनिर्णयटीकायां ज्ञप्तिस्थलेऽभिहितमिदं बाधकमुत्पत्तिस्थलेप्यनुसन्धेयमितिसूचितम् ।।

१. शास्त्रेदाह -ग. २. अभावस्येत्यधिकं-क-ख-छ. ३. बलप्रसङ्गेन- च. ४.भवति - छ. ५. त्वा-अ. ६.णंसा-मु. ७. लोकव्य - मु.

स्थू-प्रप्रदौ-भूर्वे-सदे-र्हेङ्गः) प्रामाण्यवादः पु - १९९.

अन्यथा दण्डाभावाद्घटानुत्पत्तरपि तदुत्पत्तेरपवादः स्यात् ।
अत एव यत्र संशयादिरूपा दोषाः १ प्रतिबन्धकाः तत्रैव तन्निरासार्थं २ भूयोवयवेन्द्रियसन्निकर्षविशेषदर्शनादिगुणापेक्षा । अन्यथा संशयोत्तरप्रम ३ येव तदनुत्तरप्र ४ मयापि विशेषदर्शनमपेक्ष्येत ।।
किञ्च दोषनिरासेऽवश्यं कारणस्य गुणस्य प्रमायामपि कारणत्वे गौरवम् । नच प्रमारूपं कार्यमनन्यथासिद्धम् । येनोभयं कल्प्येत ।।

एतेन अप्रमापि प्रमा ५ विशेषः स्यादिति निरस्तम् । प्रमात्वप्रयोजिकाया अदुष्टसामग्र्या भ्रमेऽभावात् ।

अन्यथेति ।। सामाग्र्यभावेपि कार्यानुत्पत्तेरपवादत्व इत्यर्थः -- तदुत्पत्तेरिति ।। घटोत्पत्तेरित्यर्थः -- अत एवेति ।। दोषनिरासोपक्षिणत्वादेवेत्यर्थः -- अन्यथेति ।। सर्वत्र प्रमामात्रे तद्धेतुतायामित्यर्थः ।।
नन्वस्तु दोषनिरासकत्वं गुणस्य प्रामाण्यहेतुत्वं चास्तु । अप्रामाण्ये गुणनिरासे च दोषाणां हेतुत्वमिवेत्यतः 'न चोभयकारणत्वकल्पकमस्ति' इति भाष्यटीकां विवृण्वन्नाह -- किञ्चेति ।। प्रमायाः परतस्त्वान्यथानुपपत्तिप्रमाणसिद्धगौरवं न
दोषायेत्यत आह -- न चेति ।। अनन्यथेति ।। ज्ञानसामान्यसामग्रीतो न सिद्धमति न चेत्यर्थः ।।
प्रागुक्तानुकूलतर्कं निराह -- एतेनेति ।। प्रमायाः दोषाभावसहितज्ञानसामाग्रजन्यत्वकथनेनेत्यर्थः ।

१. दर्शनदिप्र - क. २. र्थे - क. ३. मायामिव -कुं. ४. मायामपि - कुं. ५.विशेषपदं नास्ति - ग.

न्यायदीपयुततर्कताण्डनम् (प्र. परिच्छेदः पु - २००.
---------- ---------- ---------
अन्यथा दावाग्निदग्धवेत्रजन्यकदल्यङ्कुरोपि वेत्राङ्कुरविशेषः स्यात् ।।
ननु तत्र दाहेन दोषेण सहजाया वेत्राङ्कुकरजननशक्ते १ र्नाशाद्विपरीत २ शुक्तेश्चोत्पादाद्वेत्राङ्कुरसामग्र्येव नास्तीति चेत्समं प्रकृतेपि । ममापि ३ लोकसिद्धौत्सर्गिकापवादकसाम्यमेव प्रामाण्याप्रामाण्ययोरपेक्षितम् ।।

अन्ये तु यथा नीलरूपसामग्रीजन्यस्यापि चित्ररूपस्य न नीलरूपविशेषत्वात् । ।४ यथा न विरुद्धनिश्चद्वयसामग्रजन्यस्य संशयस्य न निश्चयविशेषत्वं । यथा च पाकजरूपसामग्रीजन्यस्य -----

परमुखेनैव समाधिं वाचयति -- नन्विति ।। अस्त्वेवं लोके प्रामाण्यादौ तु कथमित्यत आह - ममापीति ।। अनन्यथासिद्धशब्दार्थे तव यथा तथेत्यपरेत्यर्थः ।। प्रमायामभिमतसामग्र्यभावेनैव भ्रमस्य न प्रमाविशेषत्वमिति स्वयमेकं समाधिमुक्त्वाऽन्यापदेशेन समाध्यन्तरमाह - अन्येत्विति ।। न नीलेत्यादि ।। किन्तु विजातीयरूपान्तरत्वमित्यर्थः । तथैवोदयनाद्युक्तेरिति भावः -- विरुद्धेति ।। 'विरुद्धोभयारोसामग्रीद्वयसमाजादुभयारोप एक एव भवति । स एव संशय'ज्ञप्तिप्रामाण्ये मण्युक्तेरिति भावः - यथा च पाकजेति ।। तेजस्संयोगदेशकालादृष्टादिसामग्र्यस्तुल्यत्वादिति भावः ।।

१. र्विना- ग. २.कार्योत्पादेत्यधिकं -कुं. ३. 'हि' इत्यधिकं - च-छ-क-ख.

स्थू-प्रप्रदौ-भूर्वे-सदे-र्हेङ्गः) प्रामाण्यवादः पु - २०१.

---------- ---------- ----------

-- रसस्पर्शादेर्न रूपविशेषत्वं १ ।तथा भ्रमस्यापि न प्रमाविशेषत्वमित्याहुः ।।

तस्मादन्वयव्यभिचाराद्व्यतिरेकव्यभिचारादन्यथासिद्धेश्च गुणो न प्रमाहेतुः । भ्रमप्रतिबन्दीतूद्धरिष्यते । एतदप्युक्तं 'अन्यथा'इत्यादिना । अन्वयव्यभिचारे व्यतिरेकव्यभिचारे औत्सर्गिककार्यापवादकनिरासकत्वेनान्यथासिद्धौ च सत्यामपि गुणस्य हेतुत्वे रासभादेरपि हेतुत्वप्रससङ्गेन --

अस्मिन्पक्षे दृष्टान्तानामसत्प्रतिपत्तिर्वक्ष्यमाणदिशा प्रमासामग्र्यां दोषाभावस्यावश्यकत्वात्सामग्र्भावादेश्च तद्विशेष २ त्वाभावोपपत्तावुक्तसमाधिरयुक्ता इत्यरुचिबीजं ध्येयम् ।।
तस्मादित्युक्तं व्यनक्ति -- अन्वयेति । पीतःशङ्ख इत्यादिभ्रम इत्यर्थः -- व्यतिरेकेति ।। 'करादौ चरणादिभ्रमजन्य 'इत्यादिनोक्तप्रमाविशेष इत्यर्थः -- अन्यथेति ।। विरोधिनिरासोपक्षीणत्वोच्चेत्यर्थः । उभयकारणत्वे गौरवात्कल्पकाभावादप्रमायाः प्रमाविशेषत्वापत्तिरूपबाधकाभावाच्चेत्यपि ध्येयम् ।
नन्वेवं दोषस्यापि भ्रमहेतुत्वखण्डनसम्भवेन भ्रमेपि स्वत एव स्यात् । तत्र या गतिः प्रमायामपीत्यत आह -- भ्रमेति ।।
स्वतस्त्वानुमानोक्त्यनन्तरमुद्धरिष्यत इत्यर्थः।
एतदपीत्युक्तमेवान्यथादिशब्दार्थविविरणेन व्यनक्ति --अन्वयेत्यादिना ।।

१. ।अयं ग्रन्थः नास्ति - ग. २. णत्वा - मु.

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - २०२.

हेत्वहेतुव्यवस्थि १ त्ययोगादित्यर्थः ।।
२स्थूलावयवि ३ प्रत्यक्ष ४ प्रमादौ भूयोवयवेन्द्रियसन्निकर्षादेर्हेतुत्वभङ्गः।। १४।।

भूयोवयवेन्द्रियसन्निकर्षादेर्हेतित्वभङ्गः ।। १४ ।।

अस्तु तर्हि दोषाभावादेव प्रम् तस्यानन्यथासिद्धान्वव्यतिरेकित्वादिति चेन्न ।

कारणतावच्छेदकप्रतिबन्धकाभावादिसाधारणस्य प्रयोजकत्वमात्रस्यापादन इष्टत्वात्।।
'अदृष्टमिन्दियं त्वक्षं तर्कोऽदुष्टस्तथानुमा '
आगमोऽदुष्टवाक्यं च 'इति ब्रह्मतर्के,

अस्त्विति । तथाच ज्ञानहेतुतोऽधिकजन्यत्वात्स्वतस्त्वहानिरिति भावः । प्रयोजकत्वमापाद्यते कारणत्वं वा । आद्य आह -- कारणेति ।। प्रतिबन्धकाभावहेतुताया वक्ष्यमाणत्वाशयेनाह -- प्रतिबन्धकाभावादीति ।। कारमागिरादिपदार्थः । प्रयोजकत्वेति ।। तद्व्यतिरेक ६ प्रयुक्तव्यतिरेकप्रतियोगित्वमात्रस्य न त्वनन्यथासिद्धस्येत्यर्थः ।।
दृष्टत्वमेव क्रमात्सूत्रभाष्यटीकाकृतां संमत्या द्रढयति -- अदुष्टमिति ।। अक्षं अनुमा आगमः इति लक्ष्यनिर्देशः । तत्वनिर्णयोदाहृतब्रह्मतर्क इत्यर्थः ।

१.स्थायो - मु-ख. २.'इति' इत्यधिकं -छ. ३. व-क. स्थूलावयवेति नास्ति - ख. ४. क्षादो-मु-च. ५. स्थूलावयविप्रत्यक्षप्रमादौ 'इत्यधिकं-कुं. ६. प्रयोजकव्यति - मु - प्रयोजकप्रति - अ.

प्रमायां दोषभावस्य हेतुत्वभङ्गः प्रामाण्यवादः पु - २०३.
--- --- ---
'निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम् निर्दोषोपपत्तिरनुमा निर्दोषः शब्द आगमः'इति प्रमाणलक्षणे; 'दोषाभावस्य कारणत्वे १ च नास्माकमनिष्टम् तावता २ वेदापौरुषेयत्वाव्यघातात् 'इति भाष्यटीकायां चोक्तेः । दोषाभावस्यापेक्षितत्वेपि
प्रमाजनकशक्तिस्सहजा, न तु भ्रमजननशक्तिवदा ३ धेयेत्येतावततैव प्रमाण्यस्वतस्त्वसिद्धेश्च ।।

मानत्रयेपि दोषाभावापेक्षाद्योतनाय त्रितयोदाहरणम् । टीकायां चेति ।। देवताधिकरणभाष्यस्य टीकायामित्यर्थः । तत्र कारणत्वे चेत्यु ४ क्तिः प्रयोजकत्वे चेत्यर्थ इत्यग्रे व्यक्तम् ।।
नन्वेवमपि कथं न स्वतस्त्वहानिः । ज्ञानहेत्वतिरिक्तानपेक्षत्वाभावादित्यत आह
-- दोषाभावस्येति ।। एतावतैवेति ।। दोषाभावस्य कारणत्वपक्षे शक्त्याधायकत्वेपि प्रयोजकत्पपक्षे तदभावादिति भावः । उक्तं हीति ।। दोषेत्यादिनोक्तं प्रमेयं जिज्ञासाधिकरणसुधायामुक्तमित्यर्थः । औत्सर्गिकी उत्सर्गः सामान्यं ज्ञानमात्रजनिकैवेत्यर्थः । दोषापवादादित्यस्य दोषाहितशक्तिरूपापवादादित्यर्थ इति भावः ।।
नन्वेवं गुणस्यापि प्रयोजकत्वोपपत्तौ किं तन्निरासायासेनेति चेन्न । गुणवा ५ दिनोपि दोषाभावस्याव ६ श्यकत्वोपपादनात् । गुणस्य दोषनिरासोपक्षीणतोपपादनाच्चेति भावः ।।

१. पि-मु-च-चकारो नास्ति - ख. २. वेदपदं नास्ति - ग. ३. धास्ये -च. ४. क्तेः- कुं. ५. चि-अ. ६. श्योप-अ.

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - २०४.
---------- ---------- ----------
उक्तं हि सुधायां 'इन्द्रियादीनामौत्सर्गिकी शक्तिः प्रमाण्यजनने दोषापवादादप्रामाण्यमपि जनयति १ ' इति । कारणत्वस्यापादानंत्वयुक्तम् ।।
क्लृप्तकारणं २ चक्षुरादिकमादायैव दोषाभावस्य प्रमां प्रति नियतपूर्वभावित्व ३ ग्रहणेन दण्डत्ववत् दण्डगतदार्ढ्य ४ वत् शक्तिः कारणतावच्छेदके ५ ति पक्षे शक्तिवत् उपस्थितेष्टभेदाग्रहः प्रवर्तक

इत्यत्रोपस्थितिवत् विषयत्वेन विषयजन्यं ज्ञानं प्रत्यक्षमित्यत्र विषयत्वव ६ च चक्षुरादिनिष्ठकारणतावच्छेदकत्वमात्रेणान्वयव्यतिरेकयोरुपपत्तौ दोषाभावे -----

द्वितीयं निराह -- कारणत्वस्येति ।। कुत इत्यतः 'येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तत्तेनान्यथासिद्धं 'इति मण्युक्तान्यथासिद्धमत्वादित्याह -- क्लृप्तेति ।। ग्रहणेनेति ।। त्वदुक्तपारिभाषिकान्यथासिद्धत्वेन हेतुनेत्यर्थः । अस्य चक्षुरादिनिष्ठकारणतेत्यादिनान्वयः ।।

गुरुमतेनाह -- उपस्थितेति ।। उपस्थितं बुद्धौ विपरिवर्तमानं यदिष्टं रजतादि तेन पुरोवर्तिनो भादाग्रह इत्यर्थः । उस्थितेरपि पुरोवृत्तिगोचरप्रवृत्तिकारणत्वे
वैशिष्ट्यज्ञानस्यापि हेतुतापत्या भादाग्रहः प्रवृत्तिहेतुरिति मतहान्यापत्तेर्हेतुतावच्छेदकत्वं यथा तथेत्यर्थः ।।
न्यायमतेनाह -- विषयत्वेनेति ।। प्रत्यक्षमित्यत्रेति ।। इति प्रत्यक्षलक्षण इत्यर्थः।

१. यन्तीति - मु-च-छ-क. २. समस्तं पदं - मु-ख. ३. हेण-मु-च-क-ख. ४.दाढ्यर्यादिव -ख-कुं. ५. त्यत्र श-छ. ६. चकारो नास्ति -मु-च-ख.

प्रयां-दोभास्य-हेङ्गः) प्रामाण्यवादः पु - २०५.
---------- ---------- ----------
कारणतायाः दोषाभावत्वे १ कारणतावच्छेदकतायाश्च कल्पने गौरवात् । उक्तरीत्या सत्यपि दोषे प्रमात्वदर्शनेन प्रमासामान्यं प्रति व्यतिरेकव्यभिचाराच्च ।। उक्तं हि विष्णुतत्वनिर्णयटीकायां 'दोषाभावोपि

न प्रामाण्यकारणम् । यादृच्छिकसंवादिषु सत्यपि दोषे प्रमाण २ ज्ञानोदयात् 'इति ।।
किञ्च प्रतिबन्धकाभावे लोके कारणत्वाव्यवहारादौत्सर्गिककार्यापवादक ३ विरोधिकत्वरूपान्यैवान्यथासिद्धिः परिभाष्यता ४ मित्युक्तम् ।।

अन्यथासिद्धिमुक्त्वा व्यभिचारं चाह -- उक्तेति ।। 'किञ्च करादौ चरणादिभ्रमजन्य 'इत्यादिनोक्तरीत्यर्थः ।।
ननु दोषस्य प्रतिबन्धकतया तदभावस्य स्वतन्त्रावेव कार्यान्वयव्यतिरेकावतो न प्रागुक्तान्यथासिद्धिर्युक्तेत्यत आह - किञ्चेति ।। अन्यथासिद्धशब्दस्य त्वया यौगिकार्यं त्यक्त्वा लोकव्यवहारानुरोधेन त्रिधा पारिभाषिकार्थोक्तिरिहापि व्यवहारानुरोधेन त्वदुक्तान्यथासिद्धित्रयादन्येवान्यथासिद्धिः परिभाष्यतामित्युक्तमतीतभङ्गः इत्यर्थ -- उक्तं हीति ।। दोषाभावस्यान्यथासिद्धतया कारणत्वं नेत्येतज्जिज्ञासाधिकरणे --
'प्रत्यक्षवच्च प्रामाण्यं '
इत्यादिश्लोकव्याख्यानसुधायामुक्तमित्यर्थः ।।

१. तदवच्छे-क-ख-छ. २. माज्ञा-कुं. ३. विरहतारू-क-खृछ. ४. 'इत्युक्तं' इति नास्ति-छ-ख.

---------- ---------- ----------
उक्तं हि सुधायां 'तर्हि दोषाभावः कारणमित्यायातमिति चेन्न । तथा सत्युत्सर्गापवादयोः क्वाप्यभावप्रसङ्गात् इति ।।
न चैवं भाष्यचटीकायाः विष्णुतत्वनिर्णयटीक १ या सुध २ या च विरोध इति शङ्क्यम् । भाष्यटीकायां कारणशब्दस्यस्मदुक्तं यद्घटं प्रति

कुलालपित्रादिसाधारणं तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरुपं तन्मात्रपरत्वात् ।
उपलक्षणमेतत् 'दोषाभावव्यतिरेकनियमात्प्रामाण्यस्य परतस्त्वं किं न स्यादिति चेन्न । यादृच्छिक संवादिषु प्रामाण्येपि दोषाभावाभावेन कारणत्वभङ्गात् '
इत्यादिना वादावल्यामुक्तमित्यर्थः । उत्सर्गेत्यादेर्थस्तु 'दाहविरोधिनो हेतुत्व 'इत्यादिना पूर्वतनग्रन्थेनैव विवृतो ध्येयः -- भाष्यटीकाया इति ।। प्रागुक्ताया इत्यर्थः -- सुधया चेति । वादावल्या चेत्यपि ध्येयम् -- तद्व्यतिरेकेति ।। दोषाभावव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वं प्रामाण्यस्य यत्तद्रूपं प्रयोजकत्पमित्यर्थः । स्विविरप्रयुक्तविरहप्रतियोगिकार्यकत्वरूपं यत्प्रयोजकत्वमिति फलि ३ तोर्थः । उक्तं ४ हीति ।। वार्तिके दोषाभावस्योक्तरूपं प्रयोजकत्वमुक्तमित्यर्थः । तदभावतः गुणाधीनदोषाभावतः । अबोधकत्वरूपं विपरीतबोधकत्वरूपं वा ५ विपरीतबोधकत्वरूपमननुष्ठानरूपं व यदप्रामाण्यद्वयं तदभावः । तेन दोषाभावस्याप्रामाण्यनिरासोपक्षयेण ज्ञानसामग्रीत एव प्रमा जायत इत्युत्सर्गो न भग्न इत्यर्थः ।।

१. कायाः - क. २. धायाश्च-क. ३. तार्थः - मु. ४. क्तमिति - मु. ५. विपरीतबोधकत्वमिति नास्ति - मु.

प्रयां-दोभास्य-हेङ्गः) प्रामाण्यवादः पु - २०७.
---------- ---------- --------
'तस्माद्गुणभ्यो दोषाणामभावस्तदभावतः अप्रामाण्यचद्वयाभावस्तेनोत्सर्गो १ नपोदितः '
इति --

ननु कथं तर्हि दोषस्य प्रतिबन्धकत्वमपि । तत्रैव तस्मिन्सत्यपि प्रमाया दर्शनादिति चेन्न । त्रत यादृच्छिकस्य विषयसत्वस्योत्तेजकत्वेनोत्तेजकाभावविशि-
ष्टस्य प्रतिबन्धकस्याभावात् ।।
न च तर्ह्यावश्यकत्वाद्विषयसत्वमेव प्रमाप्रयोजकं न तु दोषाभावापेक्षेति वाच्यम् । शुक्तौ रूप्यभ्रमकाले शुक्तित्वादेर्विषयस्य सत्वेपि दोष २ रूपप्रतिबन्धेन शुक्तित्वादिप्रमाव्यतिरेकात् ।।
यद्वा इमं मा दहेत्यादौ मन्त्रादेरुद्देश्यव्यक्तिविशेष इव लिङ्गाभासस्य यत्र विषयसत्वाभावस्तत्रैव प्रतिबन्धकत्वाद्यादृच्छिकविषयसत्वस्थले केवलस्य प्रतिबन्धकस्याभाव एवास्ति । दोषाभावस्य स्वरूपेण हेतुत्वे तु व्यतिरेकव्यभिचारो दुष्परिहर इति दोषाभावोप न हेतुः ।

प्रागुक्तप्रतिबन्धकविरोधित्वरूपान्यथासिद्धिरयुक्तेति भावेन शङ्क्यते -- नन्विति ।। तत्रेति ।। यादृच्छिकसंवादिनीत्यर्थः ।। तस्मिन् दोष इत्यर्थः - मा दहेतीति ।। अस्य साधुत्वं संशयोपपादवनग्रन्थोक्तं ज्ञेयम् -- व्यतिरेकव्यभिचार इति ।। यादृच्छिकसंवादिनीत्यर्थः -- तस्मादिति ।।

१. ह्यपो - छ. २. रूपपदं न - कुं.

तस्मात्परतस्त्वे न किञ्चिन्मानम् ।।
एतदप्युक्तं 'अन्यथा 'इत्यादिना । औत्सर्गककार्यापवादकनिरासारूपस्यापि दोषाभावस्य हेतुत्वे
इदमौत्सर्गिकमिदमापवादकमिति व्यव १ स्थित्ययोगादित्यर्थः ।। प्रमायां दोषाभावस्य हेतुत्वभङ्गः ।। १५ ।।

अनुगतगुणस्यभावाद्दोषाभावस्य चाहेतुत्वादित्यर्थः ।।
प्रमायां दोषाभावस्य हेतुत्वभङ्गः ।। १५ ।।

स्वतस्त्वे तु अनित्यप्रमामात्रानुगतो गुण इति पक्षे अनित्ययथार्थज्ञानत्वं अनित्यज्ञानत्वानवच्छिन्नकार्यतावच्छेदकं --

स्वतस्त्वे त्विति ।। मानमित्यनुकर्षः । उच्यते इत्यर्थः । अननुगतगुणपक्षे सिद्धसाधनतावारणाय -- इति पक्ष इति विवेकायोक्तम् । अनित्यप्रमात्वं अनित्यज्ञानत्वावच्छिन्नकार्यत्वप्रतियोगिककारणताभिन्नकारणताप्रतियोगक कार्यतावच्छेदकं
अनित्यज्ञानत्वव्याप्यकार्यतावच्छेदकधर्मत्वादप्रमात्ववदिति मण्युक्तानुमानस्य प्रत्यनुमानमाह -- अनित्येति ।। विशेष्यमात्रस्य नित्यवृत्तितया कार्यतावच्छेदकत्वेन सिद्धसाधनवारणायानित्येति पक्षविशेषणम् । यथार्थेत्युक्तिरपि तद्वारणार्थैव ।

१. स्थाऽयो - मु - च.

उत्पत्तौ स्वतस्त्वे अनुमानानि) प्रामाण्यवादः पु - २०८.

अनित्यज्ञानावृत्तित्वरहितत्वात् ज्ञानत्ववत् । तत्समनियतधर्मघटितत्वात् यदेवं तदेवम् यथा पृथुबुध्नोदराकार १ घटितं २ घटत्वम् घटत्वानवच्छिन्नकार्यतानवच्छेदकम् ।

साध्ये ३ नित्यज्ञाननिष्ठकार्यतानवच्छेदकत्वेन सिद्धसाधन ४ वारणायानित्येतिपक्षविशेषणम् । यथार्थेत्युक्तिरपि तद्वारणार्थैव । साध्येऽनित्यज्ञाननिष्ठकार्यतानवच्छेदकत्वेन सिद्धसाधन ४ निरासायानित्येत्यादिकार्यताविशेषणम् । प्रमानिष्ठेत्यपि योज्यम् । तेन घटादिनिष्ठकार्यतानवच्छेदकत्वेन न सिद्धसाधनम् । हेताविन्द्रियत्वादिनोन्द्रिनिष्ठकारणताप्रतियोगिककार्यतावच्छेदके प्रत्यक्षत्वादौ व्यभिचारवारणाय नञ्द्वयम् ।तत्रानित्यज्ञानवृत्तित्वस्यापि सत्वेन तद्ग्राहित्याभावात् । उक्तदोषनिरासायैवानित्यज्ञानेत्यप्युक्तिः । असिद्धिनिरासायानित्येति -- ज्ञानत्ववदिति । तस्य नित्यवृत्तितया कार्यतानवच्छेदकत्वादनित्यज्ञानवृत्तित्वाच्चेति भावः -- तत्समेति ।। अनित्यप्रमात्वसमनियतो यो धर्मो अनित्यज्ञानत्वं तद्घटितत्वादित्यर्थः ।। भ्रमेपि धर्म्यंशे प्रमात्वेनानित्यप्रमात्वानित्यज्ञानत्वयोरन्योन्यं व्याप्याव्यापकभावादिति भावः । अत एव तत्समनियतधर्मघटितत्वद्योतनायैव अनित्यप्रमात्वमिति पक्षनिर्देशमकृत्वाऽनित्ययथार्थज्ञानत्वमित्युक्तम् -- यदेवमिति ।। यद्यत्समनियतधर्मघटितं तत्तदनवच्छिन्नकार्यतावच्छेदकमित्यर्थः -- पृथुबुध्नेति ।। पृथुबुध्नोदराकार ५ घटत्वं नामधर्मः । स्वमानियतघटत्वधर्मघटितत्वात्तदनवच्छिन्नकार्यता पटादिनिष्ठा तदनवच्छेदक इत्यर्थः ।।

१. धर्मपदं अधिकं - कुं. २. समस्तपदं-कुं-क. ३. अनित्य-कुं. ४. एतावन्नास्ति-मु. ५. घटपदं न -कुं.

न्यायदीपयुततर्कताण्डवम् (प्र,परिच्छेदः पु - २१०.

भ्रमावृत्तिकार्यतानवच्छेदकं वा भ्रमवृत्तित्वात् भ्रमात्ववत् ।।

न चै १ तेषां हेतूनामसिद्धिः । भ्रमेपि धर्म्यंशे प्रमात्वस्य सत्वात् । प्रमात्वस्य ज्ञानत्वघटितत्वाच्च । नाप्यप्रयोजकता । समानियतयोरेकस्यैव कार्यतावच्छेदकत्वे आवश्यके २ लाघवर्थे प्रमाण ४ स्वरसाल्लघुनोऽनित्यज्ञानत्वस्यैव तदौचित्यात् ५ । ।भ्रमे ज्ञानत्वप्रमात्वयोर्व्याप्यवृत्तित्वा ६ व्याप्यवृत्तित्वेत्वेकसामग्रीप्रयोज्यत्वेपि त्वन्मते वेगविभागयोरिव युक्ते ।

प्रचीनपक्षनिर्देश एव साध्यान्तरमाह -- भ्रमावृत्तीति ।। भ्रमावृत्तिकार्यता प्रमानिष्ठा कार्यता तदनवच्छेदकमित्यर्थः । अनित्ययथार्थज्ञानत्वं तादृशज्ञाननिष्ठकार्यतानवच्छेदकमित्येव साध्यकारणेऽनित्यज्ञानत्वे व्यभिचारः । तस्यात्ममनःसंयोगादिहेतुनिरूपितकार्यतावच्छेदकत्वात् । भ्रमवृत्तित्वाच्च । अतो भ्रमावृत्तीत्येवमुक्तिः । अनित्यज्ञानत्वस्य च तादृशघटादिनिष्ठकार्यतानवच्छेदकत्वान्न दोषः -- नचैषामिति ।। त्रयाणामित्यर्थः । भ्रमेपीत्यनेनाद्यन्तयोरसिद्ध्युद्धारः -- प्रमात्वस्येति ।। अनित्यप्रमात्वस्यानित्यज्ञानत्वघटितत्वादित्यर्थः ।।
यद्वा प्रमात्वस्य ज्ञानत्वघटितत्वेऽनित्यप्रमात्वस्यानित्यज्ञानत्वघटितत्वमर्थसिद्धमिति प्रमात्वस्येत्येवोक्तम् - लघुन इति ।। प्रमात्वस्य विषयसत्वघटितत्वेन गुरुत्वमिति भावः ।।

१. चैषां-ग-कुं. २. लघा-ग. तल्ला-क. ३.वप्रमा-मु-ध्वर्ये-च. ४.प्रसरात्-क-छ. ५.'भ्रमत्ववत्' इत्यधिकं-छ. ।अयंग्रन्थः-कुं. पुस्तके कुण्डलितः-च. पुस्तके स्खलितः हंसपादेन पूरितः-क. पुस्तके 'विभागयोरिव' एतावत्पर्यन्तमेव वर्तते . ६. अव्याप्यवृत्तित्वे इति नास्ति - छ.

---------- ---------- ----------

त्वन्मते वेगविभागयोरिव युक्ते । मन्मते तु प्रकारांशे प्रमात्वापवादक १ स्य दोषस्य सत्वात्तद्भवो युक्तः ।।
ननु विभागस्याव्याप्यवृत्तित्वं २ स्वात्यन्ताभावसामानाधिकरण्यम् । अत्यन्ताभावस्या ३ धिकरणविशेषसम्बन्धः स्वरूपानतिरिक्त इति न हेतुसापेक्ष इति चेत्तुल्यं प्रमात्वेपि ।। अनित्यप्रमात्वं दोषविरोधिवृत्तिधर्मावच्छिन्नकारण ४ त्वप्रतियोगिककार्यतवच्छेदकं दोषजन्यवृत्तित्वात् । भ्रमत्ववत् । दोषविरोधी गुणो दोषाभावश्चेति स्वतस्त्वसिद्धिः ।

अनित्यप्रमात्वमप्रमाकारणतावच्छेदकरूपावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं भ्रमावृत्तिकार्यतावच्छेदकत्वात् घटत्ववदिति मण्युक्तस्य प्रत्यनुमानमाह -- अनित्यप्रमात्वमिति । दोषः पित्तादिः । तद्विरोधिवृत्तिधर्मो गुणत्वादिरूपः । तदवच्छिन्नेत्यर्थः । दोषजन्यवृत्तित्वादिति हेतोरसिद्ध्युद्धारः प्राग्वत् ।।
ननूक्तानुमानेन दोषविरोधिनो गुणस्या ५ हेतुत्व ६ लाभेपि दोषाभावस्य हेतुत्वानिवारणात् ज्ञानहेत्वधिकजन्यत्वात् प्रमात्वस्य ज्ञानहेतुमात्रजन्यत्वक्षतिरित्यत आह -- दोषविरोधीति ।। विरोधित्वं च सहनवस्थानित्यत्वं ७ त्वा तन्निश्चयप्रतिबन्धकनिश्चयविषयत्वं वोभयानुगतम् । प्रतिबन्धकत्वं च तदनुत्पादव्याप्यत्वमिति भावः ।।

१.दस्य-कुं-ग-क. २. स्वपदं न -क-ख-छ. ३. स्यचाधि-क-ख-च-छ. ४. ताप्र-क-च-ख. ५. स्यहे-कुं. ६.
त्वाला-कुं. ७. 'वा' इति नास्ति -अ.

---------- ---------- ----------

अनित्यप्रमात्वं न कार्यतावच्छेदकम् । तथात्वे बाधकवत्वात् । घटज्ञानत्ववत् । न चासिद्धिः । अनुगतकारणाभावरूपस्य बाधकस्योक्तत्वात् ।।

प्रत्यत्रादिप्रमासु प्रत्येकानुगता गुणा इति पक्षे अनित्यप्रत्यक्षप्रमात्वं न विषयजन्यतावच्छेदकं, न षड्विधसन्निकर्षान्यतरजन्यतावच्छेदकं वा । तदजन्यवृत्तित्वात् । घटत्ववत् । न चासद्धिः । योगिप्रत्यक्षादेर्विषयेण षड्विधसन्नकर्षान्यतरेण याजन्यत्वात् ।

अनित्यप्रमात्वं कार्यतावच्छेदकं बाधकं विना कार्यमात्रवृत्तिधर्मत्वात् अप्रमात्ववदिति मण्युक्तस्य प्रत्यनुमानमाह --

अनित्यप्रमात्वमिति ।। अत्र पूर्वत्र च सिद्धसाधनताव्युदासायानित्येति प्रमात्वविशेषणम् -- तथात्वे ।। कार्यतावच्छेदकत्व इत्यर्थः -- बाधकेति ।

स्वावच्छिन्नकार्यताप्रतियोगकानगतैककारणासम्भवरूपबाधकवत्वादित्यर्थः -- घटेति ।। घटज्ञानमात्रेनुगतकारणाभावाद्घटज्ञानत्वं नावच्छेदकमित्युपपादितमधस्तदिति भावः-- उक्तत्वादिति ।। प्रमामात्रानुगतगुणभङ्ग इत्यर्थः -- इति पक्षे इति ।। विरोध्यनुमानमुच्यत इति योज्यम् ।।

विषयत्वं गुण इति पक्षमुपेत्याह - न विषयेति । इन्द्रियसन्निकर्षो गुण इति पक्ष आह -- न षड्विधेति ।। अन्यतरेति ।। अन्यतमेत्यर्थः । साधुत्वं पूर्वमुक्तं ध्येयम् । प्रागुपपादितमेव स्मारयति -- योगिप्रत्यक्षादेरिति ।। सामान्यप्रत्यक्षासत्तिजप्रत्यक्ष १ मादिपदार्थः ।

१. प्रमा आदि - कुं.

अनुमितिप्रमात्वं
सत्यलिङ्गपरामर्शत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं १ असत्यलिङ्गपरामर्शजन्यवृत्तित्वात् भ्रमत्वात् । शाब्दप्रमात्वं विवक्षितार्थतत्वज्ञानत्वावच्छिकारणताप्रतियोगिककार्यतानवच्छेदकं विवक्षितार्थतत्वज्ञानाजन्यवृत्तित्वात् भ्रमत्वात् ।।
न २ च तर्ह्यावश्यकत्वाद्विषयसत्वमेव प्रमाप्रयोजकं न तु दोषाभावापेक्षेति वाच्यम् । शुक्तौ रूप्यभ्रमकाले शुक्तित्वादेर्विषयस्य सत्वेपि दोषरूपप्रतिबन्धेन शुक्तित्वादिप्रमाव्यतिरेकात् २ ।।
अनित्यप्रत्यक्षप्रमात्वानुमितिप्रमात्वशाब्दप्रमात्वानि दोषविरोधवृत्तिधर्मावच्छिन्नकारणताप्रतियोगिककार्यतानवच्छेदकानि दोषजन्यवृत्तित्वात् भ्रमत्ववत् ३ ।।

अन्यतरेणेति ।। अन्यतमेनेत्यर्थः । अनुमितिशाब्दप्रमयोरपि गुणाजन्यत्वे क्रमेणानुमाने ४ आह -- अनुमितीत्यादिना ।। विवक्षितार्थतत्वज्ञानं गुण इति मत आह -- विवक्षितेति ।।
प्रत्येकमुक्त्वा मिलित्वापि दोषाभावस्याप्यहेतुत्वलाभायाह -- प्रत्यक्षेति ।। दोषविरोधीति ।। स च गुणो दोषाभावश्चेति स्वतस्त्वसिद्धिरिति भावः -- असिद्धिरिति ।। उक्तहेतूनामित्यर्थः ।

१. सत्यलिङ्गपरामर्शजन्यवृत्तित्वादित्यपि कुण्डलितं वर्तते - कुं. २. अयं ग्रन्थः नास्ति -कुं-छ-ग-ख. २-३.अतन्मध्यस्थः नास्ति-क. ४.नान्याह-कुं.

---------- ---------- ----------

नचासिद्धिः । करादौ चरणादिभ्रमजन्ये पुरुषज्ञाने प्रमात्वस्य सत्वात् । यथार्थयोग्यताज्ञानं न शाब्दप्रमाजनकम् ।
तद्व्यतिरेकापादनप्रयोजकापदनविषयव्यतिरेकाप्रतियोगित्वात् ।
पाकजगन्धे रसप्रागभाववत् ।।

अन्त्यहेतोर्घम्यंश इत्यादिपूर्वग्रन्थेनासिद्ध्युद्धारप्रकारस्य द्वितीयहेतोरपि संवादिशुकादिवाक्यजन्यज्ञाने भ्रान्तप्रकारकवाक्यजन्यज्ञाने १ च पूर्वोक्तदिशा सत्वेन सिद्धत्वादाद्यस्य तं व्यनक्ति -- करोति ।।
न च शुकादिवाक्यजज्ञानेपि तादृशेश्वरज्ञानजन्यत्वसत्वादसिद्धिरेवेति शङ्क्यम् । तस्य भ्रमसाधारणोपादानादिगोचरज्ञानत्वेनैव जनकतयात्राभिमतस्य विवक्षितार्थतत्वज्ञानत्वादिना रूपेणाजनकत्वादित्युक्तत्वात् ।।
योग्यताज्ञानं गुण इति मत आह -- यथार्थेति ।। योग्यता च वाक्यार्थरूपसंसर्गसत्वं वा प्रागुक्तदिशा तद्व्याप्यमन्यद्वेति भावः -- तदिति ।। शाब्दप्रमाव्यतिरेकापादाने प्रयोजकं निमित्तं यदापादनं तद्विषयेत्यर्थः । आपादानप्रकारश्चाग्रे व्यक्तः -- पाकजेति ।। तत्र यदि रसप्रागभावो न स्यात्तदा गन्धो न स्यादिति नास्ति । रसप्रागभावस्य कारणातावादे मण्युक्तदिशा
क्लृप्तकारणगन्धप्रागभावसाहित्यरूपान्यथा ३ सिद्धत्वेन गन्धव्यतिरेकापादनप्रयोजक ४ व्यतिरेकाप्रतोयोगित्वमत एव तदजनकत्वं चेति भावः -- उक्तरीत्येति ।। प्रत्यक्षादावनुगतगुणभङ्ग उक्तरीत्येत्यर्थः ।।

१.च इति नास्ति-कुं. २. ण जनकत्वस्याभावादित्युक्तत्वात्-मु-अ. ३.द्धिमत्वेन ४.आपादनविषयेत्यधिकं-अ.

न चा १ त्रासिद्धिः । उक्तरीत्या योग्यतायां स्वरूपतः सत्यामनन्वयनिश्चयविरहेणैव शाब्दप्रमोपपत्या यदि यथार्थयोग्यताज्ञानं न स्यात्तर्हि २ शाब्दी ३ प्रमा न स्यादित्यापादनासम्भवात् ।।

यज्ञपतीति ।। तन्मते हि स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्तित्वमेव प्रमात्वस्य परतस्त्वमि ४ त्युपेत्याननुगतगुणजन्यत्वेनाप्येतत्सिध्यतीत्युक्त्वा अनित्यप्रमात्वं स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्तीत्याद्यनुमानमुक्तम् । तत्प्रत्यनुमानमाह -- अनित्येति ।। सिद्धसाधनतानिरासायानित्येत्युक्तिः ।।

स्वेति ।। स्वस्यानित्यप्रमात्वस्य आश्रयमात्र ५ वर्ती धर्मः प्रत्यक्षत्वादिः तदवच्छिन्ना नानावृत्तिरनेकाश्रयवृत्तिश्च या ६ कार्यता तदाश्रयमात्रवृत्ति न भवतीत्यर्थः । अत्राद्यं मात्रपदं अनित्यप्रमात्वस्य स्वाधिकदेश ७ वृत्तिनाऽनित्यज्ञानत्वेनावच्छिन्ननानावृत्तिकार्यताश्रय एव वर्तमानाद्बाधनिरासाय । द्वितीयमपि तन्निरासायैव । अन्यथा अनित्यप्रमात्वस्य तादृशप्रत्यक्षत्वानुमितित्वचाक्षुषत्वादिधर्मावच्छिन्नकार्यताश्रयवृत्तितया बाधापत्तेः । अत्रानित्यप्रमात्वकस्य स्वाश्रयमात्रवृत्तिप्रत्यक्षत्वादिधर्मसमानाधिकरणकार्यताश्रय एव ८ सत्वेन तद्वृत्तित्वाभावेन साध्यपर्यवसाने बाधात् ।

१.अत्रेति नास्ति-मु-च-ख. २. श-छ. ३.यप्र-क-कुं. ४. त्यभिप्रे-अ. ५. त्रे वृत्तिधर्म-मु. ६.या इति नास्ति - कुं. ७.वर्तिना-मु. ८.एव इतिनास्ति-कुं.

न्यायदीपयुततर्कताण्डवम् (प्र. परिच्छेदः पु - २१६.

--- --- ---

यज्ञपतिमते अनित्यप्रमात्वं न स्वाश्रयमात्रवृत्तिधर्मावच्छिन्ननानावृत्तिकार्यताश्रयमात्रवृत्ति । विषयमात्रोपाधिकधर्मत्वात् । घटज्ञानत्ववत् ।।

जन्यप्रत्यक्षप्रमात्वादेः पराभिमतावच्छेदक १ त्वस्याभावेनैव साध्यपर्यवसानमिति भावः । स्वपदं २ समभिव्याहृतपरम् । ३
तेन अप्रमात्वे व्यभिचारवारणाय विषयमात्रोपाधिकेति हेतौ विशेषणम् । अप्रमात्वस्याननुगतपित्तादिदोषजन्यतावच्छेदकधर्मावच्छिन्ननानावृत्तिकार्यता श्रयमात्रवृत्तित्वेन विपक्षत्वेपि भ्रमविषयतदभावघटितत्वेन हेत्वभावात् । विषयोपाधिकेत्युक्तावप्युक्तदोषातादवस्थ्यान्मात्रेत्युक्तिः । विषयोपाधिकत्वे सति तदितरानुपाधिकत्वं हि तदर्थः । तत्र ज्ञानान्यतदितरानुपाधिकेत्यर्थो ध्येयः । तेन च प्रमात्वस्य विषयेतरज्ञानोपाधिकत्वादिसिद्धिः दृष्टान्ते साधनवैकल्यामिति शङ्कानवकाशः । विषयपदं च स्वविषयपरम् । तेन घटपटान्यतरत्वे
ज्ञानविषयघटपटमात्रोपाधिकहेतुरिति
स्वाश्रयमात्रवृत्तिघटत्वपटत्वावच्छिन्ननानावृत्तिकार्यताश्रय एव वर्तमाने साध्याभावाद्व्यभिचार इति शङ्कानवकाशः । यद्वा विषयतयोपाधित्वविविक्षाया अग्रे ४ स्पष्टत्वात्स्वेति न देयम् । तावतोक्तस्थले व्यभिचारनिरासात् ।।

घटज्ञानत्ववदिति ।। तत्र तद्व्याप्यस्य कार्यतावच्छेदकस्य कस्यचिदभावात्
स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्तित्वाभावरूपसाध्यमस्ति । न च तत्रापि घटप्रत्यक्षं धटानुमितित्वमित्यादिरेव
तद्व्याप्योस्तीति शङ्क्यम् ।
घटप्रत्यक्षत्वाद्यवच्छिन्नकार्यताप्रतियोगिकानुगतैककारणाभावान्न
घटप्रत्यक्षत्वादिकमवच्छेदकम् ।

१. त्वाभा-कुं. २. च-मु.अ. ३.तेनेति नास्ति-कुं. ४. स्फुदत्वात्-मु.

उत्तौ-स्वतस्त्वे-नुनि) प्रामाण्यवादः पु - २१७.

--- --- ---

तत्तत्प्रागभावनिरूपितकार्यताश्रय १ त्वेन बाध इति शङ्कानिरासाय नानावृत्तीत्युक्तम् । २ नात्रासिद्धिः । प्रमात्वस्य विषयमात्रोपाधिकत्वात् ।।
न च विषयजनितं ज्ञानं प्रत्यक्षमिति मते प्रत्यक्षज्ञानत्वे व्यभिचार इति वाच्यम् । विषयस्य विषयतयोपाधित्वस्य विवक्षितत्वात् । प्रत्यक्षज्ञानत्वे च तस्य जनकतयोपाधित्वात् । यथावस्थितार्थविषकत्वरूपे ३ प्रमात्वे तु तस्य विषयतयोपाधितत्वात् ।

अस्तु वावच्छेदक ४ म् । अथापीश्वरज्ञानसाधारणं घटज्ञानं न तन्मात्रवृत्तीति भावः ।।
ननु साध्ये परानुक्तं नानावृत्तीति कार्यताविशेषणमधिकं किमर्थमुपात्तमित्यत आह -- तत्तदिति ।।
तत्तत्प्रमाव्यक्तिप्रागभावविरूपितकार्यतावच्छेदकं तत्तत्प्रमाव्यक्तित्वम् । तदवच्छिन्नकार्यता च तत्तद्व्यक्तिमात्रनिष्ठा न तु व्यक्तिद्वयनिष्ठा ।

तथाच तादृशकार्यताश्रयमात्रवृत्तित्वेन तदभावसाधने बाधः स्यात् । नानावृत्तीत्युक्त्या तदन्यकार्यतैव लभ्यत इति तदाश्रयमात्रवृत्तित्वाभावसाधने तु न बाध इति भावः ।।
इति मत इति ।। विषयजन्यत्वं प्रत्यक्षलक्षणमिति मत इत्यर्थः -- प्रत्यक्षेति ५ ।। तत्र स्वव्याप्यचाक्षुषत्वरासनत्वादिधर्मावच्छिन्ननानाधिकरणनिष्ठकार्यताश्रय - वृत्तित्वस्यैव भावेन ६ विपक्षे विषयमात्रोपाधिकधर्मकत्व ७ सत्वादिति भावः । अप्रमत्वस्य साध्याभववत्वेपि हेतोरेवाभावान्न व्यभिचार इत्याह -- अप्रमात्वेति ।।

१.वृत्ति-क. २.नचा-छ. ३.पत्वेतु-क. ४.त्वं-कुं. ५.क्षज्ञानेति-मु-क्षज्ञानत्वेति - अ. ६. वत्वेन - अ. ७.स्यासिद्धत्वात् - अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २१८.
---------- ---------- ----------
अप्रमात्वोपाधिभूतं विषयान्यथात्वं तु नाप्रमाया विषय इति १ नाप्रमात्वे व्यभिचारः।।
भ्रमे पित्ता २ दिरिव प्रमायाम ३ नुगता एव गुणा हेतव इति मते । संशयोत्तरप्रमात्वं
सत्यविशेषदर्शनत्वानच्छिन्नकारणताप्रतियोगिककार्यतानवच्छेदकं
असत्यविशेषदर्शन ४ जन्यवृत्तित्वात् ज्ञानत्ववत् । संशयोत्तरप्रमा विशेषप्रमाजन्या न । तां विनाप्युपपन्नत्वात् भ्रमवत् । अत्रासिद्धिः प्रागेवोद्धृता ।

इति मत इति ।। विरोध्यनुमानं स्वतस्त्वसाधकमुच्यत इति योज्यम् । संशयाद्युत्तरप्रमायां विशेषप्रमा गुण इति वादिनं प्रत्याह -- संशयेति ।।

एतच्च सिद्धसाधनतावारणाय विशेषणम् । संशयोत्तरप्रमाविशेषदर्शनजन्या नेत्येवोक्तौ ज्ञानवदिति दृष्टान्तोक्तौ च तत्र साध्यहीनतया स्यादतस्तत्र प्रमात्वमित्युक्तिः -- सत्येति ।। यथार्थेत्यर्थः । असत्यमयथार्थं यद्विशेषदर्शनं करादौ चरणादिभ्रमरूपं तज्जन्यसंशयोत्तरप्रमावृत्तित्वादित्यर्थः ।।

ननु संशयोत्तरप्रमायां न सर्वत्र विशेषप्रमाहेतुः । करादौ चरणादिभ्रमजन्यसंशयोत्तरप्रमादिभिन्नस्थल एवेत्यतस्तदनुरोधेनाप्याह -- संशोत्तरप्रमेति ।। तां विनापीति ।। दोषाभावे ५ प्युपपन्नत्वादित्यर्थः-- अत्रेति ।। हेतुद्वय इत्यर्थः -- प्रागिति ।। 'करादौ चरणादिभ्रमजन्य'इत्यदिना 'एवं भ्रमोत्तरप्रमायामपि'इत्यादिना च ग्रन्थे नाननुगतगुणभङ्गः एवेत्यर्थः ।।

१.नप्र-छ. २.दय-ग. ३.ननु-च-छ-ग-क. ४.जन्यपदं न -ख. ५.वेनाप्यु-अ.

उत्तौ-स्वतस्त्वे-नुनि) प्रामाण्यवादः पु - २१९.

भूयोऽवयवेन्द्रिसन्निकर्षो न प्रमाया १ मसाधार २ णकारणम् । भ्रमजनकत्वात् । मनःसंयोगवत् । प्रमा ३ भ्रमसाधारणकारणातिरिक्तकारणा ४ जन्या । भ्रमधर्मिकान्याभावाप्रतियोगित्वात् । अनन्यथासिद्धतदन्वयव्यतिरेकानुविधानरहित्वाच्च । भ्रमवत् ।।

भूयोऽवयेन्द्रियसन्नकर्षो गुण इति पक्षनिरासकमनुमानमाह -- भूय इति ।। अत्राप्यसिद्धिः पीतःशङ्ख इत्यादिभ्रमजनकत्वाद्युक्त्या प्रागेवोद्धृतेति भावः ।।
प्रमा ज्ञानहेत्वतिरिक्तहेतुजन्येति प्रचीनानुमानस्य प्रत्यनुमानमाह --- प्रमेति ।। अतिरिक्तकारणपेदन गुणो दोषाभावश्चाभिमतः । भ्रमधर्मिकेत्यादिहेतोरप्यसिद्धिः । 'भ्रमेपि धर्म्यंशप्रमायां 'इत्यादिना प्रागेवोद्धृतेति भावः ।।
तार्किकमतेप्य ५ त्यन्ताभावस्याव्याप्यवृत्तित्वेन भ्रमे प्रमात्वत्तदत्यन्ताभावयोरंशभेदेन
सत्वेप्यन्योन्याभावस्याव्याप्यवृत्तित्वाभावेन ६
प्रमान्योन्याभावस्याव्याप्यवृत्तित्वाभावेन ६ प्रमान्योन्याभावस्य भ्रमे सर्वथैवाभावादिति भावः -- अनन्यथेति । अत्रापि गुणानां विरोधिदोषनिरासोपयोगस्योक्तत्वान्नासिद्धिरिति भावः ।।

१.असा-कुं. २.णं-क-च-ख-छ. ३.नभ्र-मु-च-छ-क-ख. ४.णज-मु-च-छ-क-ख. ३.अपिपदं न -मु-अ. ६.एतन्नास्ति-मु-अ.

अत्र सर्वत्रापि हेतूच्छित्तिरेव बाधिकेति ना प्रयोजकतेति दिक् ।
एतदप्युक्तम् 'अन्यथेत्यादिना '।। उक्तसाध्यानि विनोक्तहेतूनां पक्षेऽवस्थित्ययोगादित्यर्थः ।।
१ उत्पत्तौ स्वतस्त्वे २ ऽनुमानानि ।। १६ ।।

दिगिति ।। प्रमा गुणजन्या न भवति प्रमात्वादीशप्रमावत् । ३ प्रमा दोषविरोधिजन्या न भवति प्रमात्वा ३ दीशप्रमावदित्यादिरूहनीय इति भावः ।।
उत्पत्तौ स्वतस्त्वेऽनुमानानि ।। १६ ।।

अप्रमायां त्वदन्यथासिद्धान्वयव्यतिरेकित्वाद्दोषः कारणम् । क्वचित्सादृश्यादिके दोषे सत्यपि ------

ननु प्रमायां गुणस्येव भ्रमेप्यन्वयव्यतिरेकव्यभिचाराद्भ्रमविरोधिगुणनिरासादावुपक्षयेनान्यथासिद्धेश्च दोषो न हेतुरिति सोपि स्वतः स्यादित्यतः 'परतोप्रामाण्यम् 'इति तत्वनिर्णयाद्युक्तप्रमामाण्यस्य परतस्त्वं साधयितुमुक्तदोषं निरस्यन्भ्रमे दोषस्य हेतुत्वमाह --अप्रमायान्त्विति ।. हेतोर्विशेष्यासिद्धिम् -- निराह -- क्वचिदिति।।

१.इति २.स्यानु-मु.च-ख. ३. एतन्नास्ति-अ.

अप्रामाण्यस्य परतस्त्वम्) प्रामाण्यवादः पु - २२१.

-- भ्रमानुत्पत्तिरसंसर्गाग्रहादिहेत्वन्तरवैकल्यादिति नान्वयव्यभिचारः । विसंवादिशुकादिवाक्येपि दोषस्योक्तत्वान्न व्यतिरेकव्यभिचारोपि ।।
न च प्रमायां गुणः प्रतिबन्धकस्य दोषस्येवाप्रमायामपि दोषः प्रतिबन्धकस्य गुणस्य दोषाभावस्य वा निरासक इत्यन्यथासिद्ध इत्यप्रामाण्यमपि स्वतः स्यादिति वाच्यम् ।

'कारणे सत्यपि कार्यानुत्पादस्य सामग्र्यभावेनोपपत्तेः'इति तत्वनिर्णयटीकां हृदि कृत्वाह -- असंसर्गाग्रहादीति ।। विशेषादर्शनादिरादिपदार्थः ।।
एतेन यादृच्छिकसंवादिन्यपि दोषस्य व्यभिचारो निरस्तः । तत्र विषयासत्वादिसहकारिविरहात् ।।
उक्तत्वादिति ।। भूयोऽवयवेन्द्रियसन्निकर्षादिहेतुत्वभङ्गे '
तत्राप्यनित्यवाक्यदोषस्य विवक्षितार्थतत्वज्ञानाभावस्य '१
चेत्यादिनोक्तत्वादित्यर्थः ।
अनन्यथासिद्धेत्यादिहेतोर्विशेषणासिद्धिमाशङ्क्य निराह -- नचेति ।
प्रतोबन्धकस्येति ।। प्रतिबन्धकस्येति ।। प्रमाप्रतिबन्धकस्य दोषस्य यथा निरासकस्तथाऽप्रमाप्रतिबन्धकस्य गुणस्येत्यर्थः ।।
दोषस्यान्यथासिद्धिं वदता हि गुणस्य प्रतिबन्धकत्वमुपेत्य तदभावस्य भ्रमे कारणत्वं वा प्रमायां दोषाभावस्येव प्रयोजकत्वं २ वा वाच्यं । आद्ये भ्रमस्य न स्वतस्त्वापत्तिः । द्वितीये किं गुणाभाव एव प्रयोजकोऽर्थोत्तेजकाभाविशिष्टगुणः प्रतिबन्धकः तदभावश्च प्रयोजक इति वा नाद्यः ।

१.स्यवाइ-कुं-स्येवे-अ. २.'वा' इति नास्ति - मु.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २२२.

पीतःशङ्खः इत्यादिप्रत्यक्षे भूयोऽवयवेन्द्रियसन्निकर्षे १ शङ्खत्वादिविशेषदर्शनादिरूपे गन्धप्रागभावावच्छिन्नो घट २ इत्यानुमाने सत्यपरमार्शरूपे घटोस्तीति वक्तव्ये पटोस्तीति वाक्य ३ जन्यज्ञाने विवक्षितार्थतत्वज्ञानरूपे च गुणे सत्यपि पित्तबाधप्रमादरूपेण दोषेण भ्रमेत्पादनेन दोषस्य गुणनिरासोपक्षीणत्वायोगात् । स्वा ४ भावनिरासोपक्षीणत्वेनान्यथासिद्धौ च सहकारिमात्रापलापप्रसङ्गात् ।।

व्यभिचारादिति भावेनाह -- पीतःशङ्ख इत्यादिना ।। विशेषदर्शनादिरूप इति ।। पीतत्वाद्यसंसर्गग्रह आदिपदार्थः । सप्तम्यन्तरूपपदानां गुणपदेनान्वयः ।।
ननु क्वचित् किश्चद्गुण इत्यननुगणपक्षे पीतःशङ्खः इत्यादौ विपरीत ५ प्रत्यक्षादिरेव तश्चदन्यो गुणः । स तत्र वदन्तं प्रत्याह --
गन्धेति ।।
६ यद्वा विशेषप्रमा गुण इति मते व्यभिचारोक्तिरियमित्युपेत्य प्रत्यक्षादिभ्रमत्रयेपि गुणाभावव्यभिचारोक्तिरियमिति बोध्यम् ।।
पित्तेति ।। प्रत्यक्षे पित्तं अनुमाने बाधः शाब्दे प्रमादो दोषः इति विवेकः। दोषाभावस्य वा निरासक इत्येतन्निराह -- स्व ७ भावेति ।। सहकारीति ।। दण्डचक्रादेरपि स्वा ८ भावनिरासोपक्षयेण मृत्पिण्ड एक एव हेतुर्न कश्चिदपीति
स्यादित्यतिप्रसङ्ग इत्यर्थः।

१.र्ष-छ-ग-कु. २.टो-गन्धवान् पृथिवीत्वादित्या -मु-च. ३. जज्ञाने-च-ह-क. ४.स्वभा-छ. ५.ताप्र-कुं. ६.यद्वा दोषप्र-अ. ७.स्वाभा-कुं ८.स्वभा-मु.

ननु तथाप्यौत्सर्गिकस्याप्रमाण्यस्य क्वचिद्गुणः प्रतिबन्धकः । पीतःशङ्ख इत्यदौ तु विषयासत्वमृतेजकम् । त्वन्मते यादृच्छिकसंवादिलिलिङ्गाभावसादौ प्रमाप्रतिबन्धकस्य दोषस्य विषसत्वमिवेति चेन्न । अयथार्थधूमज्ञानेन ज्ञापनीयस्य वह्नेर्दैवात्सत्ववद्गुणेन ज्ञाननीयस्य श्वैत्यादेः शङ्खे सत्वेन १

विषयासत्वस्याभावात् । आरोप्यपीतत्वासत्वस्य च दोषापगमदशायामपिसत्वेन तदापि भ्रमापातात् ।।

द्वितीयकल्पेप्युत्तेजकं किं विषयासत्वमथ पित्तादिदोषः । आद्यमाशङ्कते -- नन्विति ।। औत्सर्गिकस्येति ।। कारणगतसहजशक्तिजन्यस्येत्यर्थः -- क्विचिदिति ।। प्रमोत्पत्तिस्थल इत्यर्थः -- उत्तेजकमिति ।। तथाच तदभाविशिष्टगुणाभावोप्रामाण्ये प्रयोजक इत्युक्तस्थलेषु तदभवादेव प्रमाया अभावे कारणगतसहजशक्त्यै २ वाप्रमोत्पादो न दोषरूपहेतुबलेन । दोषस्तु तत्रावर्जनीय सन्निधिरेवेति भावः -- त्वन्मत इति ।। 'यादृच्छिकस्य ३ विषयसत्वस्योत्तेजकत्वेने ४ 'त्यादिना दोषाभावहेतुत्वभङ्गे तथोक्तेरिति भावः।।
विषयासत्वमित्यत्र विषयपदेन गुणेन ज्ञाप्यो विषयो अभिमतः उत भ्रमविषय इति विकल्प्याद्यं निराह -- अयथार्थेति ।। द्वितीयं निराह -- अरोप्येति ।। तदापीति ।। प्रतिबन्धकस्य गुणस्योत्तेजकयुक्तत्वेनोत्तेजकाभावविशिष्टगुणाभावस्य सत्वादिति भावः ।।

१. अयं ग्रन्थः नास्ति - कुं-ख. २.वप्र-मु. ३. कवि-कुं. ४.त्वात् इ-कुं.

अस्तु तर्हि पित्तादि १ दोष उत्तेजक इति चेत्तर्हि दोषाभावविशिष्टस्य गुणस्याभावो भ्रमे२ प्रयोजक इत्युक्तं ३ स्यात् ।। ततो वरं दोष एव ४ प्रयोजक इति लाघवात् । दोहे तु नोत्तेजक एव हेतुः । तस्मिन्नसत्यपि दाहदर्शनात् । भ्रमस्य नासति दोषे दृष्टः ।।
किञ्च यादृच्छिकसंवादिलिङ्गशब्दाभासादिज्ञाने --------

द्वितीयं शङ्कते - अस्त्विति ।। पित्तादिरि ५ ति ।। काचकामलादिरादिपदार्थः -- उत्तेजक इति ।। औत्सर्गिका ६ प्रामाण्यप्रतिबन्धकगुणस्येति योज्यम् ।।
दोष एव प्रयोजक इतीति ।। ननु प्रमायां दोषाभाव इव दोषो भ्रमप्रयोजकश्चेदपि नाप्रामाण्यचस्य स्वतस्त्वभञ्जक इति चेन्न । तद्व्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वरूपकुलालपितृसाधारणप्रयोजकत्वो लाघवतर्केणावश्यं प्राप्ते सति प्रतिबन्धखगुणनिरासोपक्षयाभावे चोक्तदिशा सिद्धे सति प्रागुक्तानन्यथासिद्धान्वयव्यतिरेकहेतुबलेन कारणत्वमेव दोषस्य सिद्ध्यतीति तात्पर्यम् । अत एवोत्तरवाक्ये हेतुपदप्रयोगः ।।
दाहदर्शनादिति ।। मण्याद्यभावस्थल इति भावः । अस्तु भ्रमेप्येवमित्यत आह -- भ्रमस्त्विति ।।
दोषस्यान्वयव्यभिचारादुत्तेजकतया भ्रमहेतुत्वमयुक्तमिति भावेनाह -- किञ्चेति । ईश्वरज्ञानस्य सल्लिङ्गपरामर्शरूपत्वेन यथार्थवाक्यार्थज्ञानत्वेन गुणत्वाङ्गीकारात्वन्नयेनेत्युक्तम् ।

१.दिर्दो-छ-क. २.म-कुं. ३.क्तः-छ. ४.तत्रोत्तेजक-छ. ५.दीति-कुं. ६.कप्रा-मु.

---------- ---------- ----------

गुणे त्व १ न्नयेन विद्यमाने २ मन्नयेनाविद्यमाने चोत्तेजकस्य दोषस्य सत्वेनौत्सर्गिकमप्रमायां स्यात् ।।
ननूत्तेजकस्य दोषस्य विषयसत्वं प्रतिबन्धकमिति चेत्तर्हि विषयसत्वाभावविशिष्टो यो दोषस्तदभावविशिष्टस्य गुणस्याभावो

भ्रमप्रयोजक
इत्युक्तं स्यात् । स च दोषापेक्षयातिगुरुः । तस्माद्भ्रमे ३ अर्थस्यासत्वेन सन्निकर्षा ४ सम्भवेन तत्स्थानीयस्य दोषस्यावश्यकत्वात् । पित्तादिदोषोत्कर्षेण भ्रमोत्कर्षदर्शनात् । अनन्यथासिद्धान्वयव्यतिरेकित्वाच्चाप्रमायां दोषो हेतुरित्यप्रामाण्यं परत एव ।।
उक्तं हि भगवत्पादैः । 'परतोऽप्रामाण्यं 'इति ।

भ्रमसाधारण्येन हेतुतया गु ५ णत्वेनाहेतुत्वान्मन्नयेनाविद्यमान इत्युक्तम् -- औत्सर्गिकं ज्ञानजननशक्तिप्रयुक्तमित्यर्थः । सिद्धान्ते तु सत्यपि दोषे भ्रमरूपकार्यानुत्पादौ हेत्वन्तरवैकल्यादित्युक्तत्वान्नान्वयव्यभिचार इति भावः ।।
नन्वेवं सत्यप्युत्तेजके कार्यानुत्पादे हेत्वन्तरवैकल्यनिमित्तकः विषयासत्वरूपहेत्वन्तरसापेक्षजन्यत्वात्तस्येति भावेन शङ्कते -- नन्विति ।। तस्मादिति ।। दोषस्य गुणनिरासोपक्षयाभावादित्यर्थः । तावता कथं भ्रमहेतुत्वमित्यतो हेतुत्रयमाह -- भ्रम इत्यादिना ।। उक्तं हीति ।।

१.त्वन्व-छ. २.'मन्नयेनाविद्यमाने ' इतिनास्ति-छ. ३.विषयस्यास-छ-क. ४. भिन्नं पदं -कुं-क-ख. ५. णेनाहेतुत्वन्वयेनावि - अ.

---------- ---------- ----------
परतः अववादात् न तु प्रामाण्यमिव स्वतः उत्सर्गत इत्यर्थः ।।
१ अप्रामाण्य २ पततस्त्वम् ।। १७ ।।

विष्णुतत्वनिर्णय इत्यर्थः ।।

अप्रामाण्यस्य परतस्त्वम् ।। १७ ।।

करणगस्य यथार्थज्ञानसाधनत्वरूपप्रामाण्यस्य तु ज्ञानजनकत्वग्राहकमात्रग्राह्यत्वरूपं ज्ञप्तौ स्वतस्त्वम् । अयथार्थज्ञान ३ साधनत्वरूपाप्रामाण्यस्य ४ तु ज्ञानजनकत्वग्राहकमात्राग्राह्यत्व ५ रुपं परतस्त्वम् ।
नन्वस्त्वेवमुक्तदिशा ज्ञानप्रामाण्यस्योत्पत्तिज्ञप्त्योः स्वतस्त्वमथापि स्वतः प्रमाणैराम्नायैरित्युक्तिरयुक्ता । तत्प्रमाण्यस्योत्पत्तौ ६ स्वतस्त्वेपि ज्ञप्तौ पद्धत्युक्तदिशा तदभावादित्यत आह -- करणेति ।। स्वतस्त्वस्य स्पष्टत्वाय यथार्थज्ञानसाधनत्वरूपेति प्रामाण्यं विशेषितम् -- ज्ञानेति ।। ज्ञानजनकत्वग्राहकं च रूपादिज्ञानं करणसाध्यं कार्यत्वाच्छिदादिकार्यवदित्याद्यनुमानं वा चक्षुरादि ज्ञानजनकमित्यादिवाक्यं वा तन्मात्रग्राह्य ७ त्वरूपमित्यर्थः । ज्ञानजननशक्तेरेव प्रमाजननशक्तित्वादिति भावः ।।
'अप्रमाण्यं तथान्यत'इत्यनुव्याख्याने 'परतोप्रामाण्यम् 'इति तत्वनिर्णये चोक्तेराह -- अयथार्थेति ।। मात्रेत्युक्त्या सूचितमधिकं ग्राहकं व्यनक्ति -- दोषादिति ।।

१.इत्यप्र-छ. २.स्यप-ग-ख.क. ३.जनकत्व-छ. ४.तु-इतिन -ख. ५.त्वंपर-छ-ग-ख-क. ६.स्वतस्त्वेपि ज्ञप्तौ' इतिनास्ति-कुं. ७.ह्य रू -कुं.

करणप्रामाण्यस्य स्वतस्त्वम्) प्रामाण्यवादः पु - २२७.
---------- ---------- ----------
दोषादिज्ञानं विना भ्रमजनकत्वस्याज्ञानात् ।।

या तु पद्धतौ 'करणप्रामाण्यज्ञप्तिस्तु परत एव । इन्द्रियलिङ्गशब्दानां यथायथमनुमानत्वस्य २ त्वनुमानवेद्यत्वात् '
इत्युक्तिः सा करणग्राहक ३ मात्रग्राह्यत्वरूपं स्वतस्त्वं नेत्यभिप्रेत्य ।।
अत एव सुधायां 'करणानां ४ तु ज्ञप्तौ स्वतस्त्वं ५नास्त्येव 'इत्यादिना पद्धत्युक्तम ६ पक्षमुक्त्वा 'अथवा ज्ञानजनकत्वं येन गृह्यते तत एव यथार्थज्ञानजनकत्वस्य तदीयस्य ग्राह्यत्वं स्वतस्त्वम् 'इति पक्षान्तरमुक्तम् ।।

करणगकतकाचाकामलासिद्ध्यव्याप्तिभ्रमप्रमादादिदोषाणामज्ञाने विसंवादाज्ञाने च भ्रमजनकत्वाज्ञानात् । पूर्वोक्तदिशा ज्ञानजनकशक्तेः सहजत्वेपि भ्रमजननशक्तेः काचादिकरणगतदोषाहित्वेन ज्ञानजननशक्त्य ७ प्रमाजननशक्त्योर्भेदेन ज्ञानजननशक्तिग्राहकमात्रेण भ्रमजननशक्तेर्ग्रहणायोगात् । दोषादिज्ञानानुविधानाच्च भ्रमजननशक्तिग्रहस्येति भावः ।।
स्वतस्त्वोक्तेः प्रमाणपद्धतिविरोधमाशङ्क्य तदभिप्रायमाह -- यात्विति ।। सुधायामिति ।। जिज्ञासाधिकरणे प्रत्यक्षवच्च प्रामाण्यमित्यत्रेत्यर्थः ।।

१.क्षवे-मु. २.तत्तदनुमा-कुं. ३.मात्रपदं न -मु-च. ४.'तु' इति नास्ति-कुं. ५.नेत्यादिना -मु-च. ६.क्तप-च. ७.क्तिभ्रम-कुं.

---------- ---------- ----------
उत्पत्तौ स्वतस्त्वं तु करणगतायाः यथार्थज्ञान १ जननशक्तेः करणगता या करहेत्वासासादिता सहजा ज्ञानजननशक्तिस्तद्धत्सहजत्वं व तदभिन्नत्वं वा । अप्रमाजननशक्तिस्तु न सहजा किन्तु दोषाहितेत्यप्रामाण्यं परत इति दिक् ।।

'कारणानां च ज्ञानजननशक्त्यैव तद्याथार्थ्यजनकत्वं स्वतस्त्वम्' इति सुधोक्तिं द्वेधा विवृण्वन्नाह -- उत्पत्ताविति ।। करणगतस्य प्रामाण्यस्येत्यनुकर्षः । शक्तेरित्यस्य सहजत्वमित्यादिनान्वयः -- करहेत्विति ।। एतच्च जन्यकरणाभइप्रायम् न त्वपौरुषेयवेदाभिप्रायम् । शक्तिर्भेदमुपेत्य तद्वत्सहजत्वमित्युक्तिः दोषेण प्रमाशक्तिप्रतिबन्धेपि ज्ञानशक्तेरप्रतिबन्धनिर्वाहार्था । शक्तेरेकत्वेपि विषयभेदेन प्रतिबन्धाप्रतिबन्धयोरुपपत्तेः ।।

सुधोक्तिस्वारस्यानुरोधेनाह -- तदभिन्नत्वं चेति ।। 'वाक्यगते हि दोषास्तस्य यथार्थज्ञाननशक्तिं प्रतिबध्य विपरीतज्ञानजननशक्तिमाविर्भावयन्ति 'इति तत्वनिर्णयटीकायां वाक्यपदं इन्द्रियादीनामौत्सर्गिकी शक्तिः प्रामाण्यजनने दोषापवादादित्यादिसुधानुरोधादुपलक्षणमुपेत्याह -- अप्रमेति ।। करणगतेत्यनुकर्षः -- दोषाहितेति ।।

ननु यदि प्रमाजननशक्तिः ज्ञानजनकत्वग्राहकमात्रग्राह्या तर्हि भ्रमजननशक्तिरपि तथास्तम् ३ दोषादिज्ञानानुविधानात् ३ । सा परग्राह्या चेत् प्रमाजननशक्तिरपि गुणदोषाभावज्ञानानुविधानात्तथैव स्यात् । अप्रमाजनकत्वशङ्का ४ दिरूपविरोधिनिरासोपक्षीणं तच्चेत् दोषादिज्ञानानुविधानमपि तथा स्यात् ।

१.जनकत्व-ख. २.ज्ञानपदमधिकं-कुं. ३.एतावन्नास्ति-कुं. ४.आदिरूपेति नास्ति - मु.

--- --- ---

तथा यदि भ्रमजननशक्तिर्दोषाहिता १ तर्हि प्रमाजननशक्तिरपि गुणाहिता स्यात् । तस्याः सहजत्वे भ्रमजननशक्तिरपि तथा स्यात् । यदि दोषान्वयव्यतिरेकबलात् भ्रमाजननशक्तिर्दोषाधीना तर्हि गुणानुविधानात्प्रमाजननशक्तिरपि गुणाधीना स्यात् । गुणानां विरोधिदोषनिरासोपक्षयेणान्यथासिद्धौ दोषाणामपि विरोधिगुणनिरासेनान्यथासि २ द्धेः साम्यात् । गुणाभावसहकुतस्य करणस्य भ्रमजनकत्वे ३ न करणाप्रामाण्यस्य परतस्त्वे दोषाभावसहकुतस्य प्रमाजनकत्वात्प्रमाजनकत्वं परत एवेति स्यात् । दोषाभावस्य प्रयोजकत्वमेव न प्रमाजननशक्त्याधायकत्वं तर्हि गुणाभावस्याप्येवमिति सममिति चेन्न ।

ज्ञानप्रामाण्याप्रमाण्यस्वतस्त्वपरतस्त्वयोरुक्तसाधककलापस्याशेषस्यापि करणप्रमाण्याप्रामाण्यस्वतस्त्वपररतस्त्वयोरनुसन्धेयत्वात् । अभ्यासदशास्थले गुणाद्यनुसन्धानाभावेपि प्रमाजनकत्वज्ञानानुभवेन व्यभिचारात् । पीतः शङ्खइत्यादिभ्रमे विशेषदर्शनादिरूपे गुणे सत्यपि पित्तादिकरणदोषेण भ्रमोत्पादनेन गुणनिरासोपक्षीणत्वायोगादित्यादेरुक्तत्वादिति भावेनाह -- दिगिति।।

तथाह्यनुमानानि । प्रमाजननशक्तिः ज्ञानजनकशक्तिग्राहकमात्रग्राह्या तदन्याग्राह्यत्वे सति ग्राह्यत्वात् संमतवत् । यथार्थज्ञानजनकत्वं ज्ञानजनकत्वहेत्वधीनं न । ज्ञानजनकत्वाधिकरणमात्रवृत्तित्वात् ज्ञानजनकत्ववदित्यादिरूपेण ध्येयानि । भ्रमजनकेपि धर्म्यंशे प्रमाजनकत्वाभावान्नासिद्धिः । भ्रमजनकत्वे च यावज्ज्ञानजनकत्वाधिकरणे वृत्यभावान्न व्यभिचारः -- अप्रमाण्यमितीति ।। करणगताप्रामाण्यमित्यर्थः ।।

१.तर्हीति नास्ति-मु. २.द्धिः -मु. ३.सप्तम्यन्तं -मु.

एतदप्युक्तम् । 'परतोऽप्रामाण्य'मिति ।। तस्मात्प्रामाण्यस्य स्वतस्त्वादपौरुषेयोपि वेदः प्रमाणमेव ।।
करणप्रामाण्य १ स्य स्वतस्त्वम् ।। १८ ।।

प्रामाण्यवादः समाप्तः.

ननु कथं २ वेदास्यापौरुषेयत्वं । तत्र प्रमाणाभावात् । वाक्यत्वाद्यनुमानेन 'छन्दांसि जज्ञिरे 'इत्यादिश्रुत्या 'प्रतिमन्वन्तरं चैषां श्रुतिरन्या विधीयते '।

एवं न विलक्षणत्वा ४ दस्येति नयसिद्धं स्वतः प्रमाणैरितिश्लोकोक्तं प्रामाण्यस्वतस्त्वं समर्थ्य अधुना विलक्षणा ४-५ दिति हेतोरपौरुषेयत्वरूपवैलक्षण्यवत्वादित्यर्थान्तरोपगमेन ब्रह्मसूत्राभिमतमादिवर्जितैरिति श्लोकोक्तमपौरुषेयत्वं साधयितुं मणिकदाद्युक्तमाशङ्कते -- नन्विति ।। वाक्यत्वादीत्यापदार्थव्यक्तिरग्रे परोक्तानुमानखण्डनप्रस्तावे ज्ञेया । मण्याद्युदाहृतश्रुतिस्मृती चाह -- छन्दांसीति ।। ----------

---

१.ण्यस्य-छ. २.मस्या-छ. ३.त्वगु-कुं. ४.अयं ग्रन्थः नास्ति-अ. ५.णत्वादि-मु.

वेदापौरुषेयत्वे अनुमानानि) वेदापौरुषेयत्ववादः पु - २३१.

इत्यादिस्मृत्या च पौरुषेयत्वसिद्धेश्चे १ तिचेदुच्यते । ज्योतिष्टोमस्य स्वर्गसाधनत्वं वेदतात्पर्यविषयो वा पौरुषेयशब्देतरप्रमा २ णकः ----

'न चापौरुषेयं वाक्यमेव नास्तीति वाच्यम् । तदभावे सर्वसमयाभिमतधर्माद्यसिद्धेः'इति विष्णुतत्वनिर्णयवाक्यसूचितानां 'धर्माधर्मस्वर्गनरकादिकं प्रमाणोपेतं वस्तुत्वा'दित्यादिना जिज्ञासाधिकरणसुधोक्तसामान्यपरिशेषनिष्कर्षभूतानामुक्त्या प्रमाणाभावादिति हेतुं तावन्निराह -- ज्योतिष्टोमस्येति ।।

विशिष्यैवं पक्षनिर्देशे तद्बोधकैवाक्यस्यापौरुषेयत्वासिद्धिर्न तु सर्वस्यापि वेदस्येत्यतः सामान्यपक्षनिर्देशमाह -- वेदेति ।। यद्वा 'यः शब्दो वक्त्रा यदिच्छया प्रयुक्तः स तत्पर इति तदिच्छया वक्तृप्रयुक्तशब्दगोचरत्वमेव शब्दतात्पर्यविषयत्वमितिवेदतातात्पर्यपर्यालोचनया तस्य पौरुषेयत्वम् 'इति मणिकृदुक्तिखण्डनाय वेदतात्पर्यविषय इति सामान्य ३ पक्षनिर्देशः । यद्वा अस्मिन्पक्षे सप्रमाणकत्वादिति हेतुर्वस्तुत्वादिहेतुना प्रसाध्याङ्गक इति भावेनाह -- वेदेति ।।

आपातप्रतिपाद्ये बाधवारणाय -- तात्पर्येति ।। लौकिकशब्दतात्पर्यविषये बाधवारणाय वेदेति ।।

ननु कोयं वेदो नाम (१) यदि वेदपदार्थो वेदस्तर्हि इतिहासपुराणतात्पर्यविषये बाधः । 'इतिहाहपुराणः पञ्चमो वेदानां वेदः 'इति तयोरपि वेदपदार्थत्वात् । (२) नापि वेदशब्दमुख्यार्थो वेदः । मुख्यत्वप्रयोजकप्रवृत्तिनिमित्तस्येतिहासादिव्यावृत्तिस्यानिरूपणात् । (३) नापि शाखासमुदायो वेदः ।

१.रिति-कुं-ग. २.पकः-ख. ३.न्येन-मु.

--- --- ---

पौरुषेयशब्दाप्रमाणकत्वे सति सप्रमाणकत्वात् । यद्यदप्रमाणकत्वे सति सप्रमाणकं तत्तदितरप्रमाणकम् ।

शाखायाः १ वेदैकदेशत्वेनान्योन्यश्रयात् । (४) नापि सन्दिग्धकर्तृकं वाक्यं वेदः । वादिप्रतिवादिनोर्निश्चयात् । मध्यस्थसन्देहेन पक्षातावच्छेदककरणे अन्योन्याश्रयात् । वादिप्रतिवाद्यनुमानान्तरभावित्वान्मध्यस्थसन्देहस्य । (५) नापि प्रमाणशब्दो वेद इति युक्तम् । भारतादौ गतत्वात् । (६) नापि यथार्थवाक्यर्थज्ञानाजन्यप्रमाणशब्दो वेद इति । परमतेऽप्रसिद्धेः । प्रमाणशब्दमात्रस्य तादृशेश्वरज्ञानजन्यत्वात् । (७) न च जन्ययथार्थवाक्यार्थज्ञानजन्यप्रमाणशब्दो वेद इति युक्तम् । संवादिशुकबालादिवाक्येपि गतत्वेन बाधापत्तेः । सिद्धान्तिमते नित्यज्ञानव्यासप्रणीतभारतादावपि गतत्वाच्चेति चेत् ।।
उच्यते । '(८) शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यथार्थवाक्यार्थज्ञानजन्यप्रमाणशब्दत्वं वेदत्व 'मिति मण्युक्तरीत्या वा (१०) 'क्रमा २ विशिष्टावर्णा वेदः 'इति सुधोक्तदिशा वा (११) वक्ष्यमाणदिशा साक्षाद्धर्मादिबोधकशब्दो वेद इति वा (१२) प्रमाकरणामूलकत्वे सति प्रमाणशब्दो वेद इति वा (१३) पूर्वतन्त्रे विधिमन्त्राधिकरणे मन्त्रपदार्थोक्तरीत्या वेद इत्यभियुक्तप्रयोगविषयो वा वेद इति ३ तन्निरुक्त्युपपत्तेः ।
आद्ये सत्यन्तमात्रस्य वेदसमानार्थस्मृतौ ग ४ तत्वाद्विशेष्यम् । वोदार्थस्य शब्दतदुपजीव्यनुमानविषयत्वादसम्भववारणाय शब्दतदुपजीविप्रमाणातिरिक्तेत्युक्तिरिति ।।

१.यां-कुं. २.विशेषविशि-मु. ३.'इति' इत्यन्तरं 'वा' इति वर्तते-अ. ४.म-कुं.

वेदापौत्वे-ननि) वेदापौरुषेयत्ववादः पु - २३३.

--- --- ---

वक्ष्यमाणरीत्या पक्षधर्मताबलादपौरुषेयशब्दसिद्धिः ।।
अपौरुषेयशब्दप्रमाणकत्वं वा साध्यम् । तत्र चेन्द्रियलिङ्गपौरुषेयशब्दाप्रमाणकत्वे सति सप्रमाणकत्वं हेतुः ।

तात्पर्यं च तत्प्रमितिशेषत्वमित्यग्रे व्यक्तम् । तद्विष १ यो ज्योतिष्टोमादिरित्यर्थः । साध्ये बाधवारणाय पौरुषेयेत्युक्तिः । स्वतन्त्रपुरुषपूर्वरकशब्देत्यर्थः । पौरुषेयेतरेत्येवोक्तौ यत्किञ्चित्प्रत्यक्षादिरूपपौरुषेयेतरप्रमाणकत्वेनाप्युपपत्तेः । पौरुषेयशब्द २ सिध्यार्थान्तरवारणाय शब्दपदम् । पौरुषेयशब्दार्थे व्यभिचारनिरासाय ३ हेतौ सत्यन्तम् । अप्रयोजकतानिरासाय विशेष्यम् - यथासंमतमिति ।। श्रोत्राद्यप्रमाणकत्वे सति सप्रमाणकं रूपं श्रोत्रादीतरचक्षुःप्रमाणकमित्यर्थः ।।
ननु प्रत्यक्षादिप्रमाणकत्वेनापि साध्योपपत्यार्थान्तरमित्यत आह -- वक्ष्यमाणेति ।। न चात्र हेतुत्रयेपि विशेषणासिद्धिरित्यादौ वक्ष्यमाणदिशा प्रत्यक्षानुमानावेद्ये पक्षे उक्तरूपसप्रमाणकक्त्वाख्यहेतोः पक्षनिष्ठताया अपौरुषेयप्रमाणकत्वेन विना
पर्यवसानाभावादिति भावः ।।
ननु पक्षधर्मताबलादपि साध्यं सिध्यत् ४ व्यापकतावच्छेदकधर्मप्रकारेणैव सिध्यति नत्वन्यथा । अतिप्रसङ्गादसामर्थ्याच्च
। अन्यथा प्रामाण्याभावसाध्यकमण्युक्तव्यतिरेकिखण्डनायोगादिति वदन्तं प्रत्याह -- अपौरुषेयेति ।।

नन्वेवं प्रागुक्तहेतोरिन्द्रियलिङ्गविषये व्यभिचार इत्यत आह -- तत्र चेति ।। उक्तरूपसाध्य इत्यर्थः । पूर्वत्रात्र च विशेषणासिद्धिनिरासाय पौरुषेयेत्युक्तिः ।

१.यात्वज्जयो-कुं. २.ब्दासि-मु. ३.हेताविति नास्ति-मु. ४.पक्षताव-मु.

पूर्ववत्सामान्यव्याप्तिः । अप्रसिद्धविशेषणता तु व्याप्तौ सत्यां न दोषः । त्वन्मते अभावसाध्यके १ व्यभिचारेकिणि हेत्वभावेन साध्याभाव २ रूपस्य भाव ३ स्य व्याप्तिग्रहरूपानुमितिकरणस्येवेहापि साध्यप्रसिद्धिं विनैव ४ सामान्यव्याप्तिग्रहरूस्यानुमितिकरणस्य निष्पन्नत्वात् ।।
न च तन्निष्पत्तावपि विशेषणज्ञानरूपसहकारिविरहादनुमितिरूपविशिष्टज्ञानानुत्पत्तिरिति वाच्यम् । मन्मते तस्य विशिष्टज्ञानाहेतुत्वात् ।

'आश्रयसाध्यव्यधिकरणासिद्धयो न दूषणम् 'इत्यादिप्रमाणलक्षणं हृदि कृत्वाह -- नदोष इति ।।
सा किं साध्यज्ञाने तन्निरूपितव्याप्तिग्रहायोगाद्व्याप्तिज्ञानरूपकरणविघटकत्वेन दोष उत विशिष्टज्ञाने विशेषणज्ञानस्य कारणत्वेनानुमितिरूपविशिष्टज्ञानात्पादकत्वेन सति वह्निनत्वाभाववद्विशेष्यको न समर्थप्रवृत्तिजनकत्वादिति व्यतिरेकेणीत्यर्थः । उक्तमतत्पूर्वं परतचस्त्वे प्रामाण्यानुमित्यसम्भववादे ।।
द्वितीयमाशङ्क्य निराह -- न चेति ।। तस्येति ।। विशेषणज्ञानस्येत्यर्थः । उपपादयिष्यते चैतन्निर्विकल्पकभङ्ग इति भावः ।

परमतेप्यनुमित्युत्पादप्रकारमाह - त्वन्मतेपीति ।।
विशेषणज्ञानहेतुकत्वमतेपीत्यर्थः- अभावसाध्यकेति ।।
प्रागुक्तव्यतिरेकिणीत्यर्थः।।

१.केवलव्य-मु-च. २.वस्य-मु-च. ३.रूप-मु-च. ४.सामान्यपदं न -ग.

वेदापौत्वे-नुनि) वेदापौरुषेत्ववादः पु - २३५.

त्वन्मतेप्यबावसाध्यक १ व्यतिरेकिणीवात्राप्यादौ साध्यविशे २ ष्यिकाया एवानुमितेः सम्भवात् ।।
यद्वा वेदत्वमपौरुषेयवृत्ति । तदितरावृत्तित्वे सति वृत्तिमत्वात् । यदेवं तदेवं । यथा संमतम् ।।

मणिकृता ज्ञप्तिप्रामाण्यवादे'विशेषणज्ञानं विना कथं प्रामाण्यविशिष्टानुमितिरिति चेत् । प्रथमं न कथं चिज्ज्ञाने प्रामाण्यमित्यनुमित्यनन्तरं तेनैव तत्रेव ३ प्रमाण्यविशिष्टानुमितिः । अभावविशेष्यकप्रतीत्यनन्तरमभाववद्भूतलमिति ज्ञानवत् '
इत्युक्तेरिति भावः । अभावसिद्धिदोषहीनं प्रयोगान्तरमाह -- यद्वा वेदत्वमिति ।। पक्षनिरुक्तिः पूर्ववत्साक्षाद्धर्मबौधकशब्दत्वादिरूपेण ध्येया । साध्यस्य गगनादिवृत्तित्वे बाधादपौरुषेशब्दवृत्तत्वेनैव पर्यवसानामिति भावः । हेतौ तदत्यपौरुषेयपरामर्शः । सत्यन्तमात्रस्यावृत्तिमद्गगनादौ व्यभिचारनिरासाय विशेष्यम् । घटत्वादौ तन्निरासाय सत्यन्तम् ।। न च सिद्धान्ते --
'एकत्राप्यनवस्थस्य सर्वत्रावस्थितिः कथम् '
इत्यदिना वैशेषिकनयानुव्याख्याने गगनादेर्वृत्तिमत्वोक्तेर्विशेष्यं व्यर्थमिति शङ्क्यम् । असति शशश्रङ्गादौ स्वमते व्यभिचारवारकत्वात् ।।

वृत्तिमत्वं च समवायादिवृत्त्येपि ज्ञेयम् । तेन जगदाधारताप्रयोजकसम्बन्धेनेदानीं वेदत्वमिदानीं घटत्वमित्यादिप्रतीत्या कालेपि वेदत्वादेर्वृत्तिमत्वेनार्थान्तरत्वं हेतौ विशेष्यवैयर्थ्यमिति च शङ्कानवकाशः ।।
यदेवमिति ।। यद्यदितरावृत्तित्वे सति वृत्तिमत् तत्तद्वृत्ति ।

१.केकेवल-कुं-च. २.ष्य-मु. ३. एवेति नास्ति-कुं.

न्यायदीपयुततर्कताण्ङ्वम् (प्र.परिच्छेदः पु - २३६.

न यात्र हेतुत्रयेपि विशेषणासिद्धिः । वेदार्थे १ धर्मा २ धर्मादावस्मदादिप्रत्यक्षस्यावृत्तेः । ईश्वरयोगिप्रत्यक्षयोश्च धर्मादिवद्धेदं विना असिद्धेः । धर्मादिकं कस्यचित्प्रत्यक्षं वस्तुत्वाद्घटवदित्यादावद्यपि धर्माद्यसिद्ध्यऽन्येन्याश्रयात् ।

यथा घटेतरावृत्तित्वे सति वृत्तिमद्घटत्वं घटवृत्तीत्यर्थः । आद्ये हेतौ विशेषणासिद्धिं न चेत्यादिना ३ ग्रन्थेनोद्धारिष्यन् द्वितीयहेतावुपात्तस्येन्द्रियलिङ्गाप्रमाणकत्वरूपाधिकविशे ४ षण्स्यासिद्धिं सुधोक्तविशेषणेन तावदुद्धारन्निन्द्रियपेदनाभिमतं प्रत्यक्षं किमस्मदादिप्रत्यक्षमुतेश्वरयोगिप्रत्यक्षे ५ आद्ये आह -- वेदार्थ इति तस्यैव विवरणं -- धर्मेत्यादि ।। ज्योतिष्टोमादिर्धर्मः । अन्त्य आह -- ईश्वरेति ।। असिद्धेरिति ।। ईश्वरप्रत्यक्षेण योगिप्रत्यक्षेण वा धर्मादिकं सिद्धमित्यस्यास्मदाद्यप्रत्यक्षत्वेन वेदेनैव तस्यावगन्तव्यत्वात् । तथा च ७ वेदेनेश्वरादिप्रत्यक्षं विज्ञाय तेन धर्मादिस्वरूपावगत्यपेक्षया 'चोदनालक्षणोर्थो धर्मः 'इति जैमिन्युक्तदिशा वेदेनैव तन्निर्णयोस्तु किं बकबन्धप्रयासेनेति प्रत्यक्षाविषयत्वं तस्येति भावः ।।

अस्तु तर्ह्यनुमानेन धर्मादिगोचरेश्वरादिप्रत्यक्षसिद्धिरित्यत आह -- धर्मादिकमिति ।। प्रमेयत्वादि ८ हेतुरादि पदार्थः -- अद्यपीति ।। वेदेन विना धर्मादिसिद्धिर्नेति वदन्तं प्रति धर्मादिसाधकतयोपन्यस्तेश्वरादिप्रत्यक्षसाधकानुमानोपन्यासवेलायामपि । न केवलं पूर्वमित्यर्थः -- अन्योन्येति ।।

१.र्थध-छ-ग. २.अधर्मपदं न -छ-क. ३.ग्रे उद्ध-अ. ४.ष्यस्या-मु. ५.इति विकल्पो मनसि निधाय' इत्यधिकं-कुं. ६.आदपदं नास्ति-मु. ७.वेदेनेति नास्ति -मु. ८.हेतुपदं नास्ति-मु.

वेदापौत्वे-नुनि) वेदापौरुषेयत्ववादः पु - २३७.

ताभ्यामस्मदादीन्प्रति धर्माद्यसिद्धेश्च । इष्टापूर्तयोः प्रेक्षावत्प्रवृत्यन्यथानुपपत्या फलवत्मात्रानुमानेप्यस्य यागहोमादेरिदं फलमित्यस्यातिसूक्ष्मस्य विशेषस्यानुमानायोग्यत्वात् ।।
फलविशेषोद्देशेन ज्योतिष्टोमादिकर्मविशेषे बहूनां प्रेक्षावतां प्रवृत्तिस्तु चैत्यवन्दनादाविवोपपन्ना -- तदुक्तं भगवत्पादैः ।।

धर्मादिसिद्धौ तत्पक्षीकारेणेश्वरादिप्रत्यक्षसाधकानुमानसिद्धिः अनुमानसिद्धौ च तत्सिद्धप्रत्यक्षेण धर्मादिसिद्धिरित्यन्योन्याश्रयादित्यर्थः ।।
अस्तु वा वेदानुमानाभ्यां धर्मादिगोचरेश्वरप्रत्यक्षाभ्यां तथाप्यस्मदादेरनुष्ठानोपयोगिधर्मादिनिश्चयो नेश्वरयोगिप्रत्यक्षाभ्यां सिध्यतीति दोषान्तरं चाह -- ताभ्यामिति ।। तथाचास्मदादिज्ञानोपायो वेद एवैष्टव्य इति किमीश्वरादिप्रत्यक्षोपन्यासेनेति भावः ।।
एवमिन्द्रियाप्रमाणकत्वरूपविशेषणं समर्थ्य लिङ्गाप्रमाणकत्वरूपविशेषणासिद्धिमुद्धरति -- इष्टेति ।। दृष्टं यागः

पूर्तं तटाकादि 'अन्येभ्योपीदृश्यते' इति दिर्घविधानादिष्टापूर्तयोरिति साधु -- इत्य १ स्यापीति ।। तज्ज्ञानस्यैवानुष्ठानोपयोगित्वादिति भावः ।।
प्रवृत्तिविशेषणविशेषसिद्धिरस्त्वित्यत आह -- फलविशेषेति ।। स्वर्गादिरूपेत्यर्थः -- चैत्येति ।। २ यथा वेदबाह्यानामनेकेषामधर्मे च फलाहेतौ धर्मत्वादिभ्रान्त्या प्रवृत्तिस्तथा ३ न्धपरंपरयोपपन्ना । न तु धर्मादिस्वरूपं
निर्णाययतीत्यर्थः -- तदुक्तमिति ।। अपौरुषेयवाक्यत्वादन्येन प्रत्यक्षेणानुमानेन वा धर्मादिसिद्धिर्नेत्येतत् तत्वनिर्णये उक्तमित्यर्थः ।। तदभावे अपौरुषेयत्ववाक्याभाव इत्यर्थः ।।

१. स्येति -कुं. २.तथाच-मु. ३.तत्परं -मु.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २३८.

'तदभावे सर्वसमयाभिमतधर्माद्यसिद्धेः'। इति ।।
न च पौरुषेयवाक्येन तत्सिद्धिः । पुरुष्वज्ञान १ मिथ्याज्ञान विप्रलम्भप्रमादकरणापाटवा २ दीनां सम्भावितत्वेनानाश्वासात् ।।
तन्निवृत्यर्थमीश्वरस्य नित्यसार्वज्ञ्याद्यङ्गीकारे च तदर्थं धर्मबोधके शब्द एवापौरुषेयत्वमात्रं कल्प्यताम् ।

एवमिन्द्रियलिङ्गप्रमाणकत्वरूपविशेषणसमर्थनपरग्रन्थेनैवाद्यसाध्ये अपौरुषेयशब्दसिद्धिर्हेतोः पक्षधर्मताबलादित्येतदप्युपपादितं ज्ञेयम् ।।
यदप्याद्याद्वितीयहेत्वोः पौरुषेयशब्दाप्रमाणकत्वे सतीति विशेषणं यच्च तृतीयहेतावपौरुषेयेतरावृत्तित्वे सतीति विशेषणम् तदसिद्धं 'न च पौरुषेयवाक्येन तत्सिद्धिः । अज्ञानविप्रलम्भयोः प्राप्ते'रित्यादितत्वनिर्णयवाक्यार्थव्यक्तीकरणेनोद्धरति - नचेत्यादिना ।।

पौरुषेयेति । ईश्वरकृतेत्यर्थः ।। ज्ञात्वापि परप्रतारणं विप्रलम्भः । घटोस्तीतिवाच्ये पटोस्तीत्युक्तिः प्रमादः -- तन्निवृत्यर्थमिति ।। पुरुषेषु सम्भाविताज्ञानादिदोषनिमित्तकानाश्वासाभावसिद्ध्यर्थमित्यर्थः -- नित्येति ।। दोष ३ जन्यत्वेन भ्रमत्वनिवृत्तित्यर्थं नित्येति सार्वज्ञ्यविशेषणम् । शब्द एवेत्यत्र सप्तम्यन्तं शब्दपदम् । को विशेष इत्यत उक्तं -- मात्रमिति ।। तत्र तु सार्वज्ञादिकं बह्वित्यग्रे व्यक्तम् ।।

१.मिथ्याज्ञानेति -कुण्डवलितं -कुं. २.आदिपदं न -मु-च. ३.षाज-मु.

वेदापौरुषेत्वे-नुनि) वेदापौरुषेयत्ववादः पु - २३९.

अर्थापत्तेरुत्सर्गतः साक्षादुपपादकविषयत्वात् । न तु परम्परयोपपादकं वक्तरि सार्वज्ञ्यादिकम् । अन्यथा वेदस्यासर्वज्ञ्यप्रणीतत्वमङ्गीकृत्याश्वासार्थं तस्य सर्वज्ञप्रणीतशब्दान्तरमूलत्वं कल्प्यं स्यात् ।।
तदुक्तं भगवत्पादैः 'अपौरुषेयवाक्याङ्गीकारे न किञ्चित्कल्प्यम्' इति ।

विशेषान्तरं चाह -- अर्थापत्तेरिति ।। धर्मादिनिश्चयरूपस्योपपादकप्रमाणेन विनानुपपद्यमानस्यार्थापत्तिशब्दितस्य साक्षादुपपादकं हि धर्मादिप्रमापकशब्दे
अपौरुषेत्वम् । नित्यसार्वज्ञ्यादिकन्तु तत्र धर्मादिनिश्चयकत्वोपपादकोपपादकम् । अज्ञानादिदोषहीनपुरुषकृतत्वं तदुपपादकम् । तदुपपादकं च सार्वज्ञ्यमिति परम्परयोपपादकं बहु च तत्कल्प्यम् । तथाचाल्पत्वात्साक्षादुपपादकत्वात्तदेव कल्प्यमिति भावः । ननु लोके क्वापि शब्देऽपौरुषेत्वादृष्टेः परम्परा युक्तेवेत्यत आह -- अन्यथेति ।। एवं साक्षादुपपादके सम्भवति शब्दत्वपोरुषेयत्वयोः

सहदर्शनमात्रेण परम्पराश्रयण इत्यर्थः - अङ्गीकृत्येति ।। शब्दमात्रेऽसर्वज्ञप्रणीतत्वस्य लोके दर्शनादिति भावः -- तदुक्तमिति ।। अपौरुषेयत्वमात्रकल्पनं लघ्वित्येतत्तत्वनिर्णये उक्तमित्यर्थः ।।
यद्वाऽभ्युपेत्योक्तमपौरुषेयत्वमात्रं कल्प्यतामिति तदपि न कल्प्यमेवेत्येतत्संमत्युक्तिव्याजेनाह -- तदुक्तमिति ।। न किञ्चिदिति । अपौरुषेयत्वमपि वेदकर्तुरप्रसिद्धेरेव सिद्धमिति भावः ।।
वेदकर्तुपुरुषगतदोषहीनत्वोपपादकवक्तृसार्वज्ञ्यप्रतिपादकतया परम्परया धर्मादिबोधकापौरुषेयवाक्याङ्गीकार इति
भ्रान्तिनिरासाय प्रकृतोपयोगितयार्थमाह -- साक्षादिति ।। साक्षाद्धर्मादिबोधक इत्यर्थः ।।

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २४०.

साक्षाद्बोधके वाक्येऽपौरुषेयत्वमात्राङ्गीकार इत्यर्थः ।।
किञ्चाप्रामाणिकानां सार्वज्ञ्यविप्रलम्भकत्वाप्रमादकरणपटवोपदेष्टृत्वादीनां वेदे तत्कृतत्वस्य च कल्पनीयत्वे कल्पनागौरवं स्यात् ।।
न च सार्वज्ञ्ये १ नैवाविप्रलम्भादिसिद्धिः । सर्वज्ञेश्वरावतारेष्वपि विप्रलम्भादिदर्शनात् ।

एवं स्वपक्षे लाघवोपपादनेन पोरुषेयशब्दाप्रमाणकत्वादिरूपं अपौरुषेयेतरावृत्तित्वरूपं विशेषणं च समर्थ्य परपक्षे वक्ष्यमाणानुव्याख्यानोक्तगौरवोपपादनेन च समर्थयते -- किञ्चेति ।। यद्वा न किञ्चित्कल्प्यमित्ययुक्तं अपौरुषेयत्वस्य कल्प्यत्वादित्यतोस्तु तावदेतावत् तथापि न तवेन बह्विति भावेनाह -- किञ्चेति ।।
ननु सार्वज्ञ्यादिकं नाप्रामाणिकं कर्यत्वाद्यनुमानेन सिद्धेः । सार्वज्ञ्येनैव च

सर्वदोषहीनता सिध्यति । तथाहि । धर्मादिसाक्षात्कारवतो न रागादिदोषाः सम्भवन्ति । 'अविद्याक्षेत्रत्वमुत्तरेषाम् ' इति पतञ्जल्युक्त्या तेषामज्ञानमूलत्वात् । सर्वज्ञेऽज्ञानायोगात् । रागादिरहितस्य च तत्कार्यविप्रलम्भायोगात् । एवंभातमहानुभावस्य करणापाटवादेरनाशङ्क्यत्वात् । ज्ञानी सन्नज्ञलोकाय कुतो नोपदिशेत् । प्रसिद्धवेदे तदुपदेशकल्पनस्य लघुत्वाच्चेत्याशङ्क्य प्रत्याह -- न चेत्यादिना निरसिष्यत इत्यन्तेन ।। आदिपदेन अप्रमादादिकं उपदेष्टृत्वं वेदे तत्कृतत्वं च गृह्यते -- शरीरेपीति ।।

१.ज्ञ्यादि-च. २'आदिक' इति नास्ति -अ.

वेदापौरुषेत्वे-नुनि) वेदापौरुषेयत्ववादः पु - २४१.

सर्वज्ञस्य शरीरेपि शरीरत्वकृतकरणापाटवादेरवर्जनीयत्वात् । ज्ञानिनामप्युपदेशवैमुख्यदर्शनात् । वेदे तत्कृतत्वप्रसिद्ध्यभावेन तस्यापि कल्प्यत्वात् ।।
कार्यत्वाद्यनुमानेनेश्वर १ स्य सार्वज्ञ्यसिद्धिस्तु निरसिष्यते ।।
न च वेदादेव तस्य सार्वज्ञ्यादिसिद्धिः । वेदप्रामाण्यस्येश्वरसार्वज्ञ्यादिसिद्ध्यधीनत्वेनान्योन्याश्रयात् । अन्यथा बुद्धाद्यागमात्तस्यापि सार्वज्ञ्यादिकं सिद्ध्येत् । तदुक्तं भगवत्पादैः ।।
'अविप्रलम्भस्त्वज्ज्ञानं तत्कृतत्वादयोपि च । कल्प्या गौरवदोषेण पुंवाक्यं ज्ञापकं न तत् ।। इति ।।
तस्मान्न विशेषणा २ सिद्धिः ।।

वेदे तत्कृतत्वं च गृह्यते -- शरीरेपीति ।। त्वन्मते सर्वज्ञस्येश्वरस्य नास्ति शरीरं उपदेशौपयिकतया शरीरेऽङ्गीकृतेपीत्यर्थः ।ज्ञानिनामपीति ।।

सिद्धानामित्यर्थः । ३ व्यक्तमेतत्सर्वं तत्वनिर्णयटीकायाम् -- अन्योन्येति ।। सिद्धे सार्वज्ञ्ये तत्प्रणीतत्वेन वेदप्रामाण्यसिद्धिः तत्सिद्धो च तेन सार्वज्ञ्यसिद्धरित्यर्थः।।
तदुक्तमिति ।। जिज्ञासाधिकरणानुव्याख्यान इत्यर्थः ३ । तज्ज्ञानं धर्मादिप्रमितिः । तत्कृतत्वं तेन पुरुषेण कृतत्वम् । आदिपदात्करणपाटवादिग्रहः । ज्ञापकं
निश्चायकं धर्मादेरित्यर्थः । चो यत इत्यर्थे । ४ तत् तस्मादित्यर्थः ।

१.रसा-मु-च. २.णसि-कुं. ३.अयं ग्रन्थः नास्ति -अ. ४.इदं नास्ति-अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २४२.

यद्वा ईश्वरज्ञानं न प्रमेति मते वेदः कालभेदेनानियतानुपूर्वीको न दोषामूलकत्वे सति प्रमामूलकत्वरहितत्वात् गगनवत् । प्रमेति मते दोषामूलकत्वे सति प्रमाकरणामूलकत्वं हेतुः ।।

नियतैकप्रकारत्वमपौरुषेयत्वमिति सुधोक्तिमनुरुध्याह -- यद्वेति ।। हेतोरसिद्धिनिरासायोक्तम् -- न प्रमेति ।। मत इति ।। गुणजन्यस्यैव प्रमात्वेनेश्वरज्ञानस्य तदजन्यत्वान्न प्रमेति मत इत्यर्थः । सिद्धसाधनतानिरासाय साध्ये कालभेदेनेत्युक्तिः । पूर्वोत्तरकल्पभेदेनेत्यर्थः । नियतानुपूर्वीक इत्युक्तावेकप्रकारानुपूर्वीकत्वस्य साध्यत्वप्राप्तौ दृष्टान्ते साध्यवैकल्येन परस्याप्रसिद्धेः परोक्तसाध्यनिरासलाभाय च नञ्द्वयम् ।।
'प्रत्यक्षादिप्रमाणं वा विप्रलम्भादिकं वाऽस्य मूलं नोपलभ्यत इति प्रसिद्धिविषयत्वं वेदत्वम्'इति तत्वनिर्णयटीकायां प्रमाणपदं प्रमित्यर्थकमुपेत्य तदर्थमेव निष्कृष्य हेतुमाह -- दोषेति ।। विप्रलम्भादिदोषेत्यर्थः । भ्रान्तिमूलकवाक्ये प्रमितिमूलकपुंवाक्ये च

व्यभिचारवारणाय क्रमेण विशेषणविशेष्ययोरुक्तिः -- प्रमेतीति ।। गुणाजन्यत्वेपि दोषाजन्यज्ञानत्वात्तद्वति तत्प्रकारकत्वाच्च । ज्ञानत्वस्य प्रमात्वभ्रमत्वान्यतरव्याप्यतया भ्रमत्वहीनस्य प्रमात्वाभावे ज्ञानत्वभावप्रसङ्गाच्च प्रमेति मत इत्यर्थः ।।
इदानीं प्रमाणपदं प्रमितिकरणार्थमुपेत्याह-- प्रमाकरणेति ।। परमते वेदस्येश्वरज्ञानमूलकत्वेपि तस्याजन्यतया करणाभावत्स्वयमकरणत्वाच्च नासिद्धिरिति भावः ।।

यद्यप्यानुपूर्व्यगर्भितस्वरूपे गगने शश्वदेकप्रकारानुपूर्विकत्व १ मपौरुषेयत्वं नास्ति । तथाप्यनियतानुपूर्वीराहित्य २ रूपं तदस्त्येव ।।
यद्यपीदमनित्याद्घटादेर्न व्यावृत्तम् । तथापि पौरुषेवाक्यावद्व्यावृत्तत्वात् यद्बुद्धिपूर्वकाबु ३ द्धिपूर्वकवाक्यसाधारणं पौरुषेयत्वं तदभावरूपत्वाच्च न तद्व्यितिरेकसाधनेऽर्थान्तरम् ।।

यद्यप्येतन्मतेपि पूर्वोक्तदिशा भ्रमसाधारणोपादानादिगोचरज्ञानत्वेनैवेश्वरज्ञानस्य सर्वत्र हेतुतया ४ प्रमात्वेनाहेतुत्वात्प्राचीनहेतूक्तावपि नासिद्धिः । तथाप्यभ्युपेत्यवादेन वा प्रमात्वेन प्रमामूलकत्वविविक्षायाः प्रागनुक्तेर्वा हेत्वन्तरोक्तिः ।।
पर्यवसितसाध्ये साध्यवैकल्यामाशङ्क्य निराह -- यद्यपीति ।। ननूक्तरूपहेतुद्वयस्य घटादावपि सतस्तत्रानित्यत्वेने ५ व पक्षेप्यनित्यत्वेनैव ६ पर्यवसानसम्भवान्न शश्वदेकप्रमकारानुपूर्वीकत्वरूपसाध्यसिद्धिः स्यात् । विशेष्याभावमात्रेण विशिष्टाभावोपपत्तेरिति भावेनाशङ्क्य निराह -- यद्यपीति ।। पौरुषेयेति ।। तथाच

पुंवाक्यव्यावृत्तत्वस्यानुपूर्वीगतानैयत्याभावनिमित्तत्वस्यैव वाच्यत्वात् । प्रकृतेपि पक्षे हेतुसत्वस्यानुपूर्वीयुक्ते तदभावेन पर्यवसाने बाधात् । तद्गतानैयत्याभावेनैव पर्यवसानमिति भावः -- परोक्तमिति ।। सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं पौरुषेयत्वमिति मण्युक्तमितित्यर्थः -- बुद्धीति ।। चैत्रादिवाक्यं बुद्धुपूर्वकं शुकबालादिवाक्यं चाबुद्धिपूर्वकम् । तदुभयसाधरणं यन्नियतानुपूर्वीकत्वाभावरूपं तत्परोक्तमित्यर्थः ।।

१.रूप-च-छ-क-ख. २.लक्षणं -मु-च. ३.अबुद्धिपूर्वकेति नास्ति-मु-च. ४.तत्प्र-मु. ५.नै-कुं-अ. ६.पक्षेप्यनित्यत्वेनैन' इति नास्ति - कुं.

यद्वा स्वप्रतिपाद्यगोचरज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतानाश्रय इति साध्यम् । तत्र भ्रममूलकत्वे सति प्रमाकारणामूलक्तवं हेतुः । अपौरुषेयत्वपक्षेपि वेदस्य पदवली १
गोचरज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यताश्रयत्वात्तदभावसाधने बाधः । तन्निवृत्तित्यर्थं स्वप्रतिपाद्येत्युक्तम् । स्वप्रतिपाद्यज्ञानजन्य इत्येवोक्तं पदावलीदोचरमेवेश्वरनिष्ठं ज्ञानं वेदप्रतिपाद्यगोचरमपि भवतीति पुनरपि बाधः । तन्निवृत्यर्थं ज्ञानत्वावच्छिन्नेत्याद्युक्तम् ।।

वाक्यार्थगोचरज्ञानजन्यत्वं पौरुषेयत्वम् इति मते तदभावसाधकमनुमानमाह -- यद्वा स्वेति ।। ईश्वरज्ञानं प्रमेति मत इति ज्ञेयम् । वेद इत्यनुकर्षः । स्वेन वेदेन प्रतिपाद्यो योर्थो धर्मादिः तद्गोचरं यज्ज्ञानं तत्वावच्छिन्नकारणतानिरूपिता या कार्यता तदनाश्रय इत्यर्थः । गगनमेव दृष्टान्त इति भावः ।।

साध्यगतविशेषणयोः कृत्यं व्यनक्ति -- अपोरुषेयत्वेति ।। वेदस्येति ।। क्रमविशेषविशिष्टवर्णानां वेदत्वात्क्रमस्य च कृतकत्वात् कार्यताश्रयत्वस्तीति भावः -- इत्युक्तमिति ।। प्रतिपाद्येत्युक्तावपि पदवलीत्यादिशब्दप्रतिपाद्यत्वं पदवल्य अप्यस्तीत्युक्तदोषनिरीसायैव स्वेत्यप्युक्तिरिति भावः ।।
नन्वत्राप्युक्तसाध्यवतो गगनघटादितोऽव्यावृत्तोयं हेतुस्त २ त्रैवोक्तरूपज्ञानाजन्यत्वेनैवोपपन्नः सन् शश्वदेकप्रकारानुपूर्वीकत्वरूपविवक्षितापौरुषेयत्वं -----

१.गोचरेति नास्ति -छ. २.त्रयो - अ.

वेदापौत्वे-नुनि) वेदापौरुषेयत्ववादः पु - २४५.
---------- ---------- ----------
इदमपि साध्यं परोक्तस्य प्रमाप्रमा १ मूलकवाक्यसाधारणस्य पौरुषेयत्वस्याभावरूपम् ।।
न च शुकबालादिवाक्ये पररीत्या व्यभिचारः । तस्यापि पक्षतुल्यत्वात् ।।
यद्वा
स्वप्रतिपाद्यगोचरयथार्थज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतानाश्रय इति साध्यम् । तत्र च प्रमाकरणामूलकत्व २ मात्रं हेतुः ।।

३ साधयतीत्यर्थान्तरमित्यत आह -- इदमपीति ।। परोक्तस्येति ।। चिरन्तनोक्तस्येत्यर्थः -- पौरुषेयत्वस्येति ।। तथाच
पौरुषेयवाक्यादुक्तरूपसाध्यहीनाव्द्यावृत्तोयं
हेतुस्तादृशज्ञानाजन्यत्वरूपसाध्यमादाय पर्यवस्यन्नपि पराभिमतपौरुषेयत्वाभावरूपत्वात्तस्य नार्थान्तरम् ।

शश्वदेकप्रकारानुपूर्वीकत्वमिवेदमपि पारिभाषिकं किञ्चितपौरुषेत्वमिति भावः । एवमग्रेपि ।।
पररीत्येति ।। तन्मते वाक्यमात्रस्येश्वरज्ञानजन्यतयोक्तरूपसाध्याभावेपि तत्र हेतुसत्वादिति भावः -- पक्षेति ।। तस्येशज्ञानजन्यत्वेपि घटादिसाधारणोपादानादिगोचरज्ञानत्वेनैव तज्जन्यतया
स्वप्रतिपाद्यगोचरज्ञानत्वावच्छिन्नेत्यादिरूपसाध्यस्यापि सत्वेन तदभावसंमतेरिति भावः ।।
'वेदाः शब्द ४ जन्यवाक्यार्थगोचरायथार्थज्ञानजन्याः प्रमाणशब्दत्वात् 'इति मण्युक्तसाध्यस्याभावसाधकमाह -- यद्वास्वेति ।। वेद इत्यनुकर्षोत्रापि ध्येयः । प्रागुक्तमेव साध्यपदकृत्यं ध्येयम् ।।
भ्रान्तवाक्ये उक्तरूपसाध्यस्यापि सत्वेन विशेष्यमात्रस्याव्यभिचाराद्दोषमूलकत्वविशेषणस्य व्यर्थत्वमुपेत्याह -- तत्र ५ चेति ।। ६ निरुक्तसाध्य इत्यर्थः ।

१.भ्रम-छ. २.मात्रपदं नास्ति -मु-च. ३.नसा-मु. ४.शब्दाजन्य -मु. ५.त्रे-कुं. उक्त - कुं.

इदमपि साध्यं परोक्तस्य पौरुषेयत्वस्याभावरूपम् ।	प्रमाणवाक्यमात्रासाधारण १	विपक्षे

सर्वसमयाभिमतधर्माद्यसिद्धेरुक्तत्वादनुकूलतर्काणां च वक्ष्यमाणत्वा न्नप्रयोजकता ।।
एतेन वेदस्यानादित्वरूपमपौरुषेयत्वं बाधितं सिद्धान्तविरूद्धञ्च । क्रमविशेषविशिष्टानां ३ वर्णानां वेदत्वान्नित्यानां सर्वगतानां च तेषां स्वतः क्रमस्यायोगेनाभिव्यक्तिगतस्येव तस्य वक्तव्यत्वादभिव्यक्तेश्च जन्यत्वेन

तद्गतस्य ४ क्रमस्यापि जन्यत्वात् टीकायां 'क्रमस्य कृकत्वेपि 'इत्युक्तेश्चेति निरस्तम् ।
क्रमस्य कृतकत्वेप्याधुनिकाध्यापकेन स्वबुद्धिस्थपूर्वपूर्वादिवसीयक्रमानुसारेणैवोत्तरदिवसेष्विवेश्वरेणापि स्वबुद्धिस्थप्रवाहानादिपूर्वपूर्वकल्पीये क्रमानुसारेणैवोत्तरोत्तरक्लपेष्वपि वेदस्योच्चरितत्वे ५ न स्वातन्त्र्याभावेना ६ नियतानुपूर्वी ७ रहितत्वादिरूपोक्तत्रिविधापौरुषेयत्वे वाधाद्यभावात् ।।

पूर्ववदर्थान्तरताव्युदासायाह -- इदमपीति ।। उक्तहेतूनामपौरुषेयत्वेन विनाप्युपपत्तिमाशङ्क्याह -- विपक्ष इति ।। एतेनेति ।। यद्वेश्वरज्ञानमित्यादिनोक्तपक्षत्रयेणेत्यर्थः ।।
प्रतिज्ञातं द्वयमपि क्रमेण व्यनक्ति -- क्रमेत्यादिना ।। टीकायामति ।। तत्वनिर्णयटीकायामित्यर्थः ।। एतेनेत्युक्तम व्यनक्ति -- क्रमस्येति ।।

१.णस्य-च-छ-ग-ख. २.इदं हेतुवाक्यं नास्ति-कुं-ग-क. प्रथमहेतुर्नास्ति-छ-ख. ३.वर्णानामिति नास्ति-कुं-क. ४.क्रमस्येति नास्ति-कग. ५.सप्तम्यन्तः-कुं-ग-ख. ६.न -क-ग-छ. ७.कत्वादि-ख-छ.

वेदापौत्व-नुनि) वेदापौरुषेयत्ववादः पु - २४७.

---------- ---------- ----------

उक्तञ्च सुधायाम् 'नियतैकप्रकारत्वमपौरुषेयत्वम् 'इति । एतदप्युक्तं 'गौरवदोषेण'इति । क्रमाकृतकत्वस्याप्यपौरुषेयत्वप्रवेशे गौरवदोषेणेत्यर्थः ।।
यद्वा वेद आप्ताप्रणीतः प्रमाकरणामूलकत्वात् । गगनवत् शुकादिवाक्यवद्वा ।

उक्तञ्चेति ।। जिज्ञासानये 'नमानमपि वेदानाम् 'इत्यत्र । प्रकृतोपयोगितया अर्थमाह -- क्रमाकृतकत्वस्येति ।।
'वेदः आप्तप्रणीतः वेदत्वाव्द्यातिरेकेणे लौकिकवाक्यवत् 'इति परोक्तस्य प्रत्यनुमानमाह -- यद्वावेद इति ।। वाक्यार्थप्रमावत्वे सति विप्रलम्भादिदोषहीनो ह्याप्तः । तदप्रणीत इत्यर्थः । भ्रान्ताप्रणीततत्वेनार्थान्तरतानिरासायाप्तेत्युक्तिः -- प्रमाकरणेति ।। परमते वेदस्येश्वरप्रमामूलकत्वेपि तत्करणामूलकत्वस्य नासिद्धिरिति भावः ।।
अन्तरङ्गदृष्टान्तमाह --शुकादीति ।। शुकबालादिवाक्यवदित्यर्थः । प्रणीतत्वस्योच्चारणधटितत्वेन वा वाक्यर्थप्रमात्वेन रूपेण १ आप्तप्रमामूलकत्वेन वा विवक्षितत्वाच्छुकादिवाक्येपीश्वरप्रणीतत्वं नेति न साध्यवैकल्यम् । परमते तत्रेश्वरज्ञानस्य भ्रमसाधारण्येनैव हेतुत्वस्य प्रागुपपादनादिति भावः ।।
पक्षतावच्छेदकहेत्वेरैक्यमाशङ्क्य निराह -- अत्र चेति ।। अकर्तृकत्वप्रसिद्धमत्वं वेदत्वम् ।

१. तत्प्र - कुं.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २४८.

अत्र च पक्षतावच्छेदकं वेदत्वं प्रमाकारणामूलकत्वे सति प्रमाणशब्दत्वं न तु हेतुमात्रम् । प्रत्यक्षाभासादिमूलकशब्दाभासेऽति व्याप्तेः । येन पक्षतावच्छेदकस्यैव हेतुत्वे तत्समानाधिकरणसाध्यप्रतीतिरूपस्यानुमानफलस्य व्याप्तिग्रहकाल एव सिद्धत्वादनुमानवैयर्थ्यमिति शङ्क्येत ।।

अकर्तृकप्रसिद्धिमत्वं नाम प्रत्यक्षादिप्रमाणं वा विप्रलम्भादिकं वाऽस्य मूलं नोपलभ्यत इति प्रसिद्धिविषयत्वम् 'इति तत्वनिर्णयटीकोक्तस्य निष्कृष्टार्थमाह -- प्रमेति ।।
ननु न हेतुमात्रमित्ययुक्तं तथात्वेपि दोषाभावात्किमधिकप्रवेशेनेत्यत आह -- प्रत्यक्षेति ।। तथाच वेदपदेन शब्दाभासस्यापि पक्षतापत्तावंशे सिद्धसाधनता स्यादिति भावःठ । दोषान्तरञ्चाह - येनेति ।। तन्मात्रस्य पक्षतावच्छेदकीकरणेनेत्यर्थः -- तदिति ।। पक्षतावच्छेदकसमानाधिकरणं यत्साध्यं तत्प्रतीतिरूपस्येत्यर्थः । यत्र प्रमाकारणामूलकत्वं तत्राप्ताप्रणीतत्वमिति गगनादौ व्याप्तिग्रहदशयामेव हेतुसामानाधिकरण्येन तत्साध्यज्ञानस्य जातत्वात् । हेतोरेव पक्षतावच्छेदकत्वेनानुमानफलस्य सिद्धत्वादित्यर्थः ।।
यद्यपि साध्यविशेष्यकप्रतीतेर्व्याप्तिग्रहणदशायां जतत्वेपि साध्यविशेषणकप्रतीतेरिद्देश्यायास्तदानीमभावेन नानुमानवैयर्थ्यम् । तथाप्यतिशयाभावेन तादृशप्रतीतेरुद्देश्यत्वस्यैवायोगात् यत्प्रमाकारणामूलकत्ववत्

तदाप्ताप्रणीतत्ववदित्यपि व्याप्तिग्रहसम्भवाच्चैवमुक्तमिति ज्ञेयम् ।।
सामान्यपरिशेषाभ्यामप्यपौरुषेयत्वं साधयति -- यद्वावेदेति ।।

वेदापौत्वे-नुनि) वेतापोरुषेयत्ववादः पु - २४९.
---------- ---------- ----------
यद्वा वेदानुपूर्वीनिष्ठादिकारणता केनचिदवच्छिन्नाकारणतात्मकत्वात् दण्ड १ गतकरणता २ वत् ।।
न च क्लृप्तमानुपूर्वीग ३ तनियततत्तद्वर्णपदादिनिरुप्यत्वं विनान्यदवच्छेदकमस्ति । न चेश्वरविरचितत्वमेव तदवच्छेदकम् । तस्य

वेदानुपूर्वीमात्रसाधारण्येन सूक्तविशेषजपादिना फलविशेषानुपपत्तेरिति नियतानिपूर्वीकत्वरूपापौरुषेयत्वसिद्धिः ।।

आनुपूर्वीनाम वर्णानां क्रमविशेषः स च नित्यसर्वगतानां वर्णानामुच्चारणघटितो वा बुद्धघटतो वा वाच्यः । न तु स्वतः । तथाच तादृशानुपूर्वी दृष्टरूपार्थज्ञानार्थापि नियमादृष्टार्था । जपेन चादृष्टार्था सर्ववादिसंमतेत्यदृषष्ट ४ जनिका भवतीति तत्र विद्यमानादृष्टकारणतापक्ष इत्यर्थः । आदिपदेनार्थज्ञानकारणताग्रहः ।।
एवं सामान्यतः कारणतावच्छेदकसिद्धौ प्रसक्तमीश्वररचितत्वं निरसिष्यन् स्वभिमतमवच्छेदकमाह -- न च क्लृप्तमिति । पक्षान्तरं निराह -- न चेश्वरेति ।। सूक्तविशेषेति ।। पवमानसूक्तपूरुषसूक्तादिजपेन पठनादिना च श्रुतफलविशेषो न स्यादित्यर्थः । श्रूयते च फलविशेषः ।।
'यन्मे गर्भे वसतः पापमुग्रं चज्जायमानस्य च किञ्चिदन्यत् '।
जातस्य च यच्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि '।।
इत्यादिना --
आनुपूर्वीगतेत्यादिनोक्तमेवावच्छेदकम् । न त्वीश्वररचितत्वमित्येतदेवानेकविपक्षबाधकोक्त्या द्रढयति -- अन्यथेति ।। एतदप्युक्तमिति ।। अन्यथेत्यादिनोक्तमित्यर्थः ।।

१. ण्डादि-ग. २.तादि-ग. ३.तं -मु-च-क. ४.ष्टार्थ-मु.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २५०.

अन्यथैतत्कल्पेऽनर्थहेतुभूताया अन्यादृश्या आनुपूर्व्याः कल्पान्तरे श्रेयःसाधनत्वम् एत्कल्पेऽनर्थहेतोर्ज्योतिष्ठोमाद्यङ्गव्युत्क्रमस्य

ब्रह्महत्यादेश्चकल्पान्तरे श्रेयःसाधनत्वम् एतत्कल्पे दाहकत्वादिस्वभावस्य वह्न्यादेः कल्पान्तरेष्वदाहकत्वादिकं च कल्प्यं स्यात् ।।
एतदप्युक्तम् 'गौववदोषेणे 'ति ।।
यद्वा प्रत्यक्षन्यायामूला मत्वादिस्मृतिः प्रमाणमूला प्रमाणभूतस्मृतित्वात् । न्यायमूलस्मृतिवत् ।

रीत्यन्तरमाश्रित्य सामान्यपरिशेषाभ्यामपौरुषेयवाक्यसिद्धिं वदन् 'धर्मादिकं प्रमाणोपेतं वस्तुत्वात्'इति सुधोक्तसामान्यानुमानमुपलक्षणं मत्वा त्रेधा सामान्यानुमानमाह -- यद्वा प्रत्यक्षेति ।।
प्रत्यक्षादिमूलान्तेरेणार्थान्तरवारणाय प्रत्यक्षन्यायामूलेत्युक्तिः । प्रत्यक्षमूला न्यायामूलाचेत्यर्थः । प्रत्यक्षतोऽर्थमुपलभ्य रचितस्मृतिः प्रत्यक्षमूला । यथा आद्यभारतपुराणादिरूपा । तस्याः सर्वज्ञव्यासप्रत्यक्षमूलत्वात् । युक्तिबलादर्थं विज्ञाय रचिता स्मृतिर्न्यायमूला । यथा अथातो धर्मजिज्ञासेत्यादि १ मीमांसासूत्रादिरूरा स्मृतिः । अतादृशी य स्मृतिरित्यर्थः ।।
न च
न्यायमतेवाक्यमात्रस्येश्वरनिष्ठप्रत्यक्षप्रमाजन्यत्वात्प्रत्यक्षामूलस्मृतिरप्रसिद्धेति वाच्यम् । वाक्यार्थप्रमात्वेन तज्जन्यत्वस्यैव तन्मूलत्वेनेहाभिप्रेतत्वात् ।।

१. 'मीमांसासूत्रादि ' इति नास्ति - मु.

वेदापौत्वे-नुनि) वेदापौरुषेयत्ववादः पु - २५१.

---------- ---------- ---------

जन्या १ धर्मादिप्रमा करणजन्या जन्यज्ञानत्वात् संमतवत् धर्मादिकं प्रमाणोपेतं वस्तुत्वात् घटवदित्यादिनाऽपौरुषेयवाक्यसिद्धिः ।।

धर्मादिवुक्तरीत्या प्रत्यक्षानुमानप्रामाण्यस्यबाधितत्वादनन्तकल्पेषु भिन्नानन्तपौरुषेयवाक्याङ्गीकारे च गौरवात्कार्यत्वहेतोर्नित्यज्ञान इव कर्त्रैक्य इव चास्यापि सामान्यतो दृष्टस्यापौरुषेयवाक्ये तत्राप्यन्येषां सकर्तृकत्वप्रसिद्धेर्वेद च तदभावाद्वेदापौरुषेयत्वे पर्यवसानात् ।।
२ एतदप्युक्तं 'गौरवदोषेण 'इति ।।
३ वेदापौरुषेयत्वेऽनुमानानि ।। २१ ।।

प्रत्यक्षप्रमाकरणं वा प्रत्यक्षपदार्थो ध्येयः । नैयायिकानां न्यायएवातिविश्वासान्न्यामूलस्मृतिवदित्युक्तम् । ईश्वरप्रमांशे बाधवारणाय जन्येति प्रमाविशेषणम् -- संमतवदिति ।। चाक्षुषादिज्ञानवदित्यर्थः ।।
नन्वेतावता प्रमाणसामान्यसिद्धावपि -- धर्मादावुक्तरीत्येत्यादिना पर्यवसानादित्यरन्तेन ।। नचात्र हेतुत्रयेपि विशेषणासिद्धिरित्यादिग्रन्थेनोक्तरीत्येत्यर्थः -- एतदपीति । अनन्तकल्पेष्वित्यादिनोक्तमपीत्यर्थः ।।
एवं प्रसक्तं प्रत्यक्षानुमानपुंवाक्यरूपपक्षत्रयं प्रतिक्षिप्य विवक्षितसाध्यपर्यवसानमाह -- कार्यत्वेति ।। नित्यज्ञानादिसिद्धिप्रकारोग्रे कार्यत्वादिहेतुभङ्गः ।।

१.जन्यापदं न -क-ख-छ. २.इयं पङ्क्तिर्नास्ति - छ-कार्यत्वहेतोरित्यतः प्रागस्ति -क. ३.इति इत्यधिकं - छ.

अपौरुषेयत्वे अनुकूलकतर्कः) वेदापौरुषेयत्ववादः पु - २५२.

नचोक्तहेतूनामप्रयोजकता । यदि वेदः पौरुषेयः स्यात्तर्हि --
'यतस्ता हरिणा दृष्टा श्रुता एवा १ खिलैर्जनैः । श्रुतयो दृष्टयश्चेयि तेनोच्यन्ते पुरातनैः ।

इत्यादि २ स्मृतिष्वीश्वरेणापि दृष्टत्व ३ स्यैवौक्तिर्न स्यात् । वेदाध्येतृणां तत्र कर्तृविशेषस्मृतिश्च स्यात् । मुक्तकश्लोकादौ तन्नियमाभावेप्यनेककर्तृकाविच्छिन्नाध्ययनधारणादिम ४
त्युरुतरप्रबन्धात्मके भारतादौ ------

पौरुषेयत्वरूपविपक्षे बाधकानि विवक्षुस्तत्वनिर्णयोदाहृतब्रह्माण्डस्मृतौ दृष्टत्वोक्तिविरोधं तावदाह -- यदीत्यादिना ।। पौरुषेय इति ।। ५ स्वतन्त्रपुरुषेणेश्वरेण प्रणीतो यदित्यर्थः । श्रुता एव न तु कृता इत्यर्थः । दृष्टा एवेत्यप्येवकारान्वयमुपेत्याह -- दृष्टत्वस्यैवेति ।। 'वेदकर्तृरप्रसिद्धेः '

इति तत्वनिर्णयवाक्यसूचितं बाधकमाह -- वेदेति ।। यदीत्याद्यापादकानुवृत्तिः सर्वत्र ज्ञेया ।।
मुक्तश्लोका नाम तत्र तत्र नानाग्रन्थस्थाः ततस्तत उद्धृता इति वा, प्रबन्धेष्वनिबद्धा एव तेनतेन पुरुषेण कृताः सुभाषितश्लोका इत्याहुः ।।
अनेकेति ।। अनेककर्तृकं यदविच्छिन्नमध्ययनं यच्च तादृशं धारणं अविस्मरणेनानुसन्धानं आदिपदोक्तप्रवचनादिकं तद्वतीत्यर्थः ।

१.परै-कुं-क-ख. २.ष्वपीश्व-मु. ३.स्योक्तिः -मु-च. ४.ति गुरु-छ-ख. ५.वृत्तिरित्यधिकं वर्तते-कुं.

---------- ---------- ----------
१ तन्नियमात् ।।
एतेन कर्तृस्मरणस्या २ विध्यर्थत्वादिति निरस्तम् ।।
वेदे प्रतिकल्प ३ मनियतान्यनेका ४ नुपूर्व्याणि ५ तेषां यथावदध्ययनानि चाभ्युदयकारणानि, अन्यथाध्ययनानि च वाग्वज्रतयानर्थकारणानि,

तथाचाल्पप्रबन्धे तदभावेपि भारतादाविवोक्तविशेषणवत्युरुतरप्रबन्धे वेदे स्यादेव कर्तृस्मृतिरध्यापकानाम् । न च सास्तीति भावः ।।
एतेन गूढकर्तृकवाक्ये सत्यापि पौरुषेयत्वे कर्तृस्मृतिर्नेति व्यभिचार इति प्रत्युक्तम्। उक्तविशेषणवत्युरुतरप्रबन्धे तस्यावश्यकत्वादिति ।।
एतेन 'कपिलकणादगौतमैस्तच्छिष्यैश्चाद्यपर्यन्तं वेदे सकर्तृकत्वस्मृतिरस्ति'इति मणिकुसुमाञ्जल्यादावुक्तं निरस्तम् । अध्यापकानां स्मृतेरसिद्धेः ।।
यत्तु सुधायां 'किञ्चेश्वरः सर्गादौ यं वेदं निर्मायैकस्मै शिष्यायोपदिशन्ति तमेवान्यस्मा उपदिशति वेदान्तरं वा'इत्यादिनोक्तं तदपि बाधकं स्पष्टं विवृण्वन्नाह -- वेद इत्यादिना ।। आनुपूर्व्याणीत्यस्य कारणान्यनर्थकारणानित्यनयोश्च इति कल्प्यत्वादित्यनेन प्रत्येकमन्वयः -- यथावदिति ।। तस्मिंस्तस्मिन्कल्प इत्यर्थः -- वाग्वज्रतयेति ।। वाग्रूपवज्रतयेत्यर्थः ।।
'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात् ' ।।

१.तदिति नास्ति-छ-ख. २.स्यवि-च-क. ३.ल्पं नियता-ख. ४.न्यानु-च-क-ल्पं नान्यनेका -छ. ५.'तेषां' इति द्विवारं वर्तते -छ.

अभ्युदयादीनि च विजातीयकारणजन्यत्वात्ताार्णाद्यग्निवद्वितीयानीति कल्प्यत्वात्कल्पनागौरवं च स्यात् । अन्यथेश्वर एकस्मन्नेव कल्प एकस्मा एकयानुपूर्व्याविशिष्ट २ मुपदिशातीति स्यात् । एककल्पीयायाः पूर्वस्य

आनुपूर्व्या अपि ३ स्मरणान्न तत्याग इति चेत्तत्किमीश्वरः कल्पान्तरीयां पूर्वामानुपूर्वीं व्यस्मार्षीत् ।।
धर्मादिसिद्धिश्च न स्यात् । प्रकारन्तरेण तदसिद्धेरुक्तत्वात् ।

इत्यादेरिति भावः -- अभ्युदयादीनि चेति ।। प्रतिकल्पं जायमानानि स्वर्गादीनीत्यर्थः -- विजातीयेति ।।
भिन्नभिन्नानुपूर्वीरूपत्वाद्विजातीयकारणेत्यर्थः -- तार्णेति ।।
तृणाजन्याग्नावरणिजन्याग्निनतो वैजात्यम् आरणेयाग्नौ च तार्णाद्यग्निनतो वैजात्यं यथा त्वन्मते तथेत्यर्थः । एतच्चाग्रे तृणादीनमिकशक्तिसाधनवादे द्वितीयपिच्छेदे व्यक्तम् ।।
ननूक्तकल्पनाचतुष्टयमपि न दोषायेत्यतः प्रागुक्तापाद्यस्यानिष्टत्वद्योतनाय विपक्षे बाधकमाह -- अन्यथेति ।।
उक्तकल्पनाचतुष्टयस्य गोरवतया दोषत्वानभ्युपगम इत्यर्थः -- इति स्यादिति ।। गौरवस्य तवादोषत्वादिति भावः । वैलक्षण्यमाशङ्क्य समं प्रकृतेपीति भावेनाह -- एकेत्यादिना ।।
'नहि धर्मादिसिद्धिः स्यान्नित्यवाक्यं विना क्वचित् ।'
इत्यनुभाष्याद्युक्तबाधकञ्चाह -- धर्मादीति ।। यदि वेदः पौरुषेयः स्यादित्यनुवृत्तिः -- उक्तत्वादिति । न च हेतुत्रयेपि विशेषणासिद्धिरित्यादिग्रन्थेनेत्यर्थः ।

१.अन्यानु -कुं-छ-क-ख. २.वेदमित्यधिकं-वर्तते-छ. ३.वि -छ-क-ख-कुं-ग.

---------- ---------- ----------

वेदस्य पौरुषेयत्वे ईश्वरस्य बुद्धजिनादिना वेदस्य च बुद्धाद्यागमादिना तुल्यताया अपरीहार्यत्वे १ न वेदप्रामाण्यं च न स्यात् ।।
न च बौद्धागमाद्वेदे महाजनपरिग्रहो विशेषः । महत्वस्य पूज्यत्वरूपत्वे वेदपरिग्रहीतृणां पूज्यत्वस्याद्याप्यसिद्धेः । सङ्ख्यादिक्यरूपत्वे सन्दिग्धासिद्धेः । तुरुष्कागमादौ व्यभिचाराच्च ।

अन्यत्रादृष्टस्य सर्वज्ञत्वस्य कल्पमित्यत्र तत्वनिर्णयटीकायां तर्हि जिनादावपि तत्स्यादित्यापादितं साम्यमीश्वरवादेपि सममितिभावेनाह -- वेदस्य पौरुषेयत्व इति ।। ईश्वरकृतत्व इत्यर्थः -- बुद्ध २ जिनादिनेति ।। ईश्वरसार्वज्ञ्यवद्बुद्धादावपि तद्भावस्यापादनसम्भवादिति भावः ।।
'वेदस्य प्रामाण्यं महाजनपरिग्रहादवधार्यते 'इति मण्युक्तमाशङ्क्य निराह - न चेति ।। 'अपौरुषेयत्वाद्वेदस्य'इत्येतद्व्याख्यावसरे तत्वनिर्णयटीकोक्तखण्डनरीतिमनुसृत्य महत्वं विकल्प्य निराह -- महत्वस्येति ।। अद्यापीति ।। पौरुषेयतया वेदप्रामाण्यविवादवेलायामेव न किन्तु माहजनपरिग्रहात्प्रामाण्यमित्युक्तिदशायामपीत्यर्थः--- सन्दिग्धेति ।। बौद्धेषु वा वैदिकेषु वा सङ्ख्याप्रकर्षस्यानिर्णयादिति भावः ।।

१.त्वं- न चेदप्रामाण्यं च न स्यात् । न च -क. २.जिनेति नास्ति -मु.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २५६.

सप्तघटिकाभ्यन्तरभोजनादिरूपजीविकादिहेतुदर्शनशून्यत्वरूपत्वे वैदिकेष्वपि केषुचिज्जीविकादिहेतोर्दर्शनात् । बौद्धादिष्वपि केषुचित्तददर्शनाच्च ।
नापि सर्वसम्मतवैद्यशास्त्रपरिगृहीतार्थकत्वं महाजनपरिगृहीतत्वम् , वैद्यशास्त्रे रोगशान्त्यर्थं वैदिककर्मविशेषविधानादिति

वाच्यम् । बौद्धानुसारिवैद्यशास्त्रे तच्छान्त्यर्थं बौद्धागमोक्तकर्मणोपिविधानात् ।।
नापि सर्वसम्मतव्याकरणपरिपालनीयत्वम् । जैनव्याकरणपरिपालनीयत्वस्य जैनागमेति सत्वात् ।।

यत्तु कुसुमाञ्जलौ द्वितीयपरिच्छेदे 'हेतुदर्शनशून्यैर्ग्रहणाध्ययनधारणार्थानुष्ठानादिरेव महाजनपरिग्रहः'इत्युक्त्वा सप्तघटिकान्तभोजनादिरूपजीविकारूपो हेतुर्बौद्धेष्वस्ति न वैदिकेष्वित्युक्तम् तदाशङ्क्यनिराह -- सप्तेति ।। सप्तघटिकाभ्यन्तरे सप्तघटिकामध्ये प्रातःकाले भोजनाभ्यञ्जादिरूजीविकाहेतुर्येषु न दृश्यते ते महान्त इत्यर्थः । जीविकादित्यादिपदेन रागकुहकवञ्जनादिरूपकुसुमाञ्जल्युक्तहेत्वन्तरग्रहः -- बौद्धेति ।।
महत्वं निरस्य तत्परिगृहीतत्वं विकल्प्य निराह -- नापीति ।।
वैद्यशास्त्रपरिगृहीतार्थकत्वं व्यनक्ति -- वैद्यशास्त्र इति ।। १
धान्वन्तरमस्त्रारयुतयहोमजपादिरूपवैदिककर्मेत्यर्थः -- बौद्धागमोक्तेति ।।
ज्वरादिशान्त्यर्थं बुद्धार्चनादिकर्मण इत्यर्थः १ -- जैनेति ।।

१.अयं ग्रन्थः नास्ति - कुं -अ.

अपौत्वेऽनु-र्कः) वेदापौरुषेयत्ववादः पु - २५७.

न च सर्वदर्शनानुमतार्थकत्वम् वेदोक्त सत्यभाषणादीनां धर्मत्वस्य सर्वदर्शनानुमतत्वादिति वाच्यम् । बौद्धोक्तार्हिसाधर्मत्वस्यापि सर्वैः स्वीकारात् । साङ्ख्यैर्वैदिकहिंसाया अधर्मत्वस्वीकाराच्च ।।

न च मन्त्रायुर्वेदादौ संवादित्वम् । एकदेश संवादित्वस्य बौद्धोक्ताग्निस्तम्भादिकर्मस्वपि दर्शनात् । विसंवादाभावस्य च वेदेप्यभावात् ।।
तस्मादपौरुषेय १ वेदपरिग्रहादेव वैदिकानां पूज्यत्वम् । न तु तत्परिग्रहाद्वेदस्य प्रामाण्यम् ।।
एतदप्युक्तं 'गौरवदोषेणेति ।'बुद्धाद्यागमतुल्यत्वेन २ विपरीतलक्षणया लाघवदोषेणेत्यर्थः । तस्मात्पौरुषेयत्वे वेदस्य बौद्धागम ३ तौल्यमेवेति सुस्थ ४ एवानुकूलतर्कः ।।

'इन्द्रश्चन्द्रः काशकृत्स्नः पिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ।।'
इति कविकल्पद्रुमोक्तेस्तस्यापि व्याकरणकर्तृत्वप्रसिद्धेरिति भावः । व्यभिचारासिद्धी क्रमेणाह -- बौद्धेति ।। साङ्ख्यैरिति ।।
एतदपीति ।। बौद्धाद्यागमसाम्यमित्येतदपीत्यर्थः । लाघवदोषेण अप्रयोजकतापत्तिरुपदोषेणेत्यर्थः ।। तत्र हेतुः बौद्धद्यागमतुल्यत्वेनेति ।।

१.वेदपदं नास्ति-छ. २.'गौववदोषेण'इत्यधिकं -कुं-क-ख-छ. ३.तुल्यत्वं - छ. ४. एवकारो नास्ति -छ-क-ख.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २५८.
---------- ---------- ----------
किञ्च 'वाचा विरूपनित्यया । श्रुतिर्वाव नित्या । अनित्या वा न स्मृतयो याश्चान्या वाचः'इत्यादिश्रुत्या --
'अनादिनिधना नित्या वागुत्सुष्टा स्वयंभुवा ।'
'नित्या वेदाः समस्ताश्च शाश्वता विष्णुबुद्धिगाः '
इत्यादिस्मृत्या च विरोधः।।

वेदस्य पौरुषेयत्वे तत्वनिर्णयाद्युक्तश्रुत्यादिविरोधं च बाधकमाह -- किञ्चेति ।।
'तस्मै नूनमभिद्यवे वाचा विरूपनित्यया ।
वृष्णे चोदस्व सुष्ठुतिं '
इति मन्त्रस्यायमर्थः । अभितो द्यौः प्रकाशो यस्यासावभिद्युः तस्मा अभिद्यवे वृष्णे वर्षित्रे नूनं निश्चितम् हे विरूप नित्यया वाचा वेदलक्षणया सुष्टुतिं शोभानां
स्तुतिं चोदयस्व प्रेरय कुर्विति विरूपमृषिं प्रत्युच्यते ।।
वाक्छब्दो वागिन्द्रियेपि प्रसिद्ध इति स्पष्टां वेदविषयां श्रुतिमाह -- श्रुतिरिति ।। आदिपदेन ।।
'विज्ञेयं परमं ब्रह्म ज्ञापिका परमा श्रुतिः ।
अनादिनित्या सा तच्च '
इत्यादि १ ग्रहः । उक्तश्रुतिद्वये २ नानादित्वानुक्तेर्देवताधिकरणभाष्योक्तस्मृतिं चाह -- अनादीति ।। आदिनिधनवर्जितत्वेन नित्येत्यर्थः ।।
ननु विधिः प्रेरणा नियोग इत्यनर्थान्तरत्वाद्विध्युद्देशानां लौकिकवत् स्वतन्त्रवक्तृकत्वमेवेत्यादिचोद्यनिरासाय तत्वनिर्णयोक्तं ब्रह्माण्डपुराणवाक्यं चाह -- नित्य वेदाः समस्ताश्चेति ।। समस्तपदेन विधिभाग स्यापि गृहीतेरिति भावः-- विरोध इति ।।

१.वक्ष्यमाणपदमधिकं - कुं २.येऽनादि-मु.

अपौत्वेऽनु-र्कः) वेदापौरुषेयत्ववादः पु - २५९.
---------- ---------- ----------

न चेदं वाक्यं श्रुतीनां बहुकालीनत्वादुपचारितार्थम् । वावेत्यवधारणात् । तदृशीमाम १ पि स्मृतीनामनित्यत्वोक्तेश्च । स्मृतौ वाक्यशेषे --
'सर्गेसर्गेऽमुनैवैत उद्गीर्यन्ते तथैव च ।
तत्क्रमेणैव तैर्वर्णैः तैःस्वरैरेव नान्यथा'
इति क्रमाद्य २ व्यत्यासोक्तेश्च ।।
'तदुत्पत्तिवचश्चैव भवेद्व्यक्तिमपेक्ष्य ति '
इति वेदोत्पत्तिवाक्यगतिकीर्तनाच्च ।
'विज्ञेयं परमं ब्रह्म ज्ञापिका परमा श्रुतिः ।
अनादिनित्या सा तच्च विना तां न स गम्यते '
इति श्रुत्यन्तरस्थाऽनादिनित्यशब्दोर्ब्रह्मणि मुख्यवित्तिः वेदे त्वमुख्येति वृत्तिद्वयापाताच्च ।।
'यावद्ब्रह्मविष्ठितं तावती वाक् '
इति श्रुत्यन्तरे ब्रह्मतुल्यत्वेन सर्वदेशकालव्याप्ततयावस्थित्युक्तेश्च ।

वेदस्य पौरुषेयत्व इत्यापादकानुवृत्तिर्ज्ञेया । तादृशीनां बहुकालीनानामित्यर्थः -- स्मृताविति ।। नित्या वेदा इति स्मृताविवत्यर्थः -- तदुत्पत्तीति ।। स्मृतो वाक्यशेषे इत्यनुकृष्यते । नोपचरतार्थमिति साध्येन पञ्चम्यन्तनामन्वयः । तच्च ब्रह्म चानादिनित्यमित्यर्थः । न स गम्यत इति तच्छब्दस्य ब्रह्मशब्दोक्तः परमात्मेत्यर्थः -- यावदिति ।।

१.अपिपदं न - च. २. दावव्य - च.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २६०.
---------- ---------- ----------
एतदप्युक्तं 'गौववदोषेण 'इति । श्रुत्यादिविरुद्धक्रमवैजात्यरूपगौरवेणेत्यर्थः ।।

अपौरुषेयत्वे अनुकूलतर्कः ।। २० ।।

'सबस्रधा महिमानः सहस्रं यावद्ब्रह्म '
इति श्रुतौ यस्य सहस्रं अपरिमिता महिमानः प्रत्येकमपि सहस्रधा अपरिमितविधाः । तद्ब्रह्म यावत् देशकालव्यापितया विष्टितं विशेषण स्थितं वाक्वेदवागपि ताव २ द्देशकालव्यापनित्युक्तेरित्यर्थः । एतदपीति ।. पौरुषेयत्वे श्रुत्यादिविरोध इत्येतदपीत्यर्थः । तव्द्यनक्ति । श्रुत्यादीति ।।
अपौरुषेयत्वे अनुकूलतर्कः ।। २० ।।

न चो१ क्तानुमानानां सत्प्रतिपक्षत्वं भङ्क्यम् । वेदः पौरुषेयो वाक्यत्वाल्लौकिकवाक्यवदित्यत्र पुरुषाधीनोत्पत्तिकत्वरूपे सकर्तृकत्वे साध्ये उक्तरीत्या क्रमस्य कृतकत्वेन सिद्धसाधनात् ।

पञ्चमस्तब ३ के कुसुमाञ्जल्याद्युक्तमनुमानमाशङ्क्य प्रतिज्ञादोषेण निराह -- वेद इति ।। प्रमाकरणामूलकत्वे सति प्रमाणशब्दरूपो वेद इत्यर्थः -- उक्तरीत्येति ।। वेदापौरुषेयत्वानुमानवादे क्रमविशेषविशिष्टानां वर्णानामित्यादिनोक्तरीत्येत्यर्थः । 'नच लौकिकवाक्यवत्सकर्तृकत्वम् । तस्याकर्तृकत्वप्रसिध्यभावात् । 'इत्यादिना तत्वनिर्णय ४ तट्टीकयोरभिमतमप्रयोजकत्वं व्यनक्ति -- अर्थमुपलभ्येत्यादिना ।।

१.क्तहेतूनां-छ-क-ख. २.तीदे-कुं. ३.ककु-अ-कुं. ४.तदिति नास्ति-कुं-अ.

अर्थमुपलभ्य रचितत्वरूपे विप्रतिपन्ने पौरुषेयत्वे साध्ये च अबुद्धिपूर्वकत्वेपि रेखाविशेषवत्वेनैव पिपीलिकादिलिपेर्लिपित्ववत्, गुणाजन्य १ योः साक्षिज्ञानेश्वरज्ञानयोर्याथार्थ्यवत्, आकाङ्क्षादिमत्वेनैवाकाङ्क्षादिम २ त्स्वप्नादिवाक्यस्य वाक्यत्ववच्च वेदस्यापिवाक्यत्वस्योपपत्य गौववेणोक्तसाध्यं प्रत्यप्रयोजकत्वात् ।।
३ अन्यथा वेदो ज्ञानकरणेनाथर्मुपलभ्य रचितो वाक्यत्वादित्यपि स्यात् ३ । अर्थानभिज्ञोच्चारिते आधुनिके वेदे विसंवादिनि शुका ४ दिवाक्ये च व्यभिचाराच्च । उक्तश्रुत्यादिवाधप्रतिकूलतर्कपराहत्यादिसाधारणदोषाच्च ।।

विप्रतिपन्न इति ।। तथाच न सिद्धसाधनतादोष इति भावः । अबुद्धिपूर्वकत्वेपीत्यस्य वाक्यत्वस्योपपत्येत्यनेनान्वयः । तत्र दृष्टान्तत्रयोक्तिः -- रेखेत्यादि ।। स्वमतेनोक्तिः -- साक्षीति ।। शुकादिवाक्येपीश्वररचितत्वेन साध्यसत्वनिरासाय विसंवादिनीति विशेषणोक्तिः ।।
'तर्कपराहतं च वाक्यत्वानुमानं श्रुतिपुराणविरुद्धं चे 'ति तत्वनिर्णयटीकोक्तमाह -- उक्तेति ।। एतच्च प्रतिकूलतर्कपदेनाप्यन्वेति । वेदापौरुषेयत्वानुमाने येऽनुकूलतर्का उक्तास्ते सर्वे पौरुषेयत्वे प्रतिकूलतर्का इत्यर्थः । आदिपदेनानुकूलतर्कराहित्यग्रहः -- साधारणेति ।.

१.त्वेपि साक्षी-कु-छ-क-ग-ख. २.दुन्मत्ता-छ-दुःखप्रा-क. ३.इयं पङ्क्तिर्नास्ति -ग. ४. आदिपदं न -मु-च.

अत्रोक्तं मणौ १ वेदः सजातीयोच्चारणानपेक्षोच्चरितजातीयो वाक्यत्वात्संभवात् २ । अत्र साध्ये सजातीयपदं शब्दमूलकशब्दे व्यभिचार ३ परिहारार्थम् । शब्दस्यार्थैक्यमात्रेण मूलत्वोपपत्योच्चारण ४ सजात्यस्यानपेक्षितत्वात् । जातीयपदं त्वाधुनिकवेदे बाधनिरीसार्थम् । ५तत्र च न सिद्धसाधनम् । अपौरुषेयत्वपक्षे सर्वस्यापि वेदाध्ययनस्य गुर्वध्ययनपूर्वकत्वेन
सजातीयोच्चारणसापेक्षत्वात् । न चाप्रयोजकता । उक्तसाध्ये वेदातिरिक्तवाक्यत्वापेक्षया लघुत्वेन वाक्यत्वस्यैव प्रयोजकत्वादिति ६ मैवं ।।

पौरुषेयत्वानुमानमात्रसाधारणेत्यर्थः -- अत्रेति ।। वाक्यत्वहेतुदूषणविषये तत्परिहारार्थमन्यथानुमानमुक्तं शब्दखण्डे वेदपौरुषेयत्वावाद इत्यर्थः । वेदः पौरुषेयो वाक्यत्वादित्यत्र सजातीयोच्चारणानपेक्षोच्चारितजातीयत्वं पौरुषेयत्वमिति साध्यस्य निरुक्तत्वादेवं प्रयोग उक्तः सजातीयपदं समानजातीयानुपूर्वीकशब्दपरम् । सजातीयोच्चारणानपेक्षया तदपेक्षां विनैवोच्चारितो यस्तज्जातीय इत्यर्थः। सर्गादावीश्वरोच्चारितत्वं पर्यवस्यतीति विवक्षितसिद्धिरिति भावः ।।
अस्फुटत्वात्पदकृत्यं व्यनक्ति-- अत्रेति ।। पक्षधाद्युक्तमाह--बाधेति ।। तस्याध्यापकोच्चारणापेक्षयैवोच्चरितत्वाद्बाधः । जातीयपदे दत्ते तु तादृशादिकालीनजातीयत्वान्न बाध इति भावः।।

१.ननु तर्हि वेदः - छ-क-यच्चोक्तं मणौ ननु - ख. २.इत्यस्तु इत्यधिकं - छ-क.-ख. ३.निरासार्थं-छ-क-ख. ४.जातीयेत्यस्या-छ-क-ख. ५.अ - कुं-छ-क-ख. ६. चेन्मैवं -छ-क-ख.

वेद-पौत्वानु-दिङ्गः) वेदापौरुषेयत्ववादः पु - २६३.

---------- ---------- ----------

मीमांसकं प्रति सिद्धसाधनाभावेपि मां प्रति सर्गादावीश्वरेण स्वबुद्धिस्थपूर्वपूर्व १ कल्पक्रमणोच्चारणेपि तस्योच्चरणा २ न्तरानपेक्षत्वेन सिद्धसाधनात् । व्याप्य इव व्यापकतया हेतोरुक्तसाध्यं प्रति गौरवेणाप्रयोजकत्वाच्च । आकाङ्क्षादिमत्वं तु
त्वया ३ प्याहर्तव्यम् ।

रुचिदत्तस्तु पठ्यमानभारतादौ सम्प्रदायस्ते हेतुनिश्चये साध्यसंदेहे संदिग्धनैकान्त्यमिति जातीयपदमित्यवोचत् -- मीमांसकं प्रतीति ।। तस्य निरीश्वरवादित्वादिति भावः ।।
'पौरुषेत्वानुमानानामप्रयोजकत्वात् 'इति सुधोक्तिमनुरुध्याप्रयोजकत्वं व्यनक्ति -- व्याप्य ४ इवेति ।। यथा धूमादौ नीलधूमत्वादिकं न व्याप्यतावच्छेदकं किन्तु लाघवाद्धूमत्वादिकमित्युच्यते तथा व्याप्यकेपि पीतवह्निनत्वादिकं न व्यापकतावच्छेदकं किन्तु वह्निनत्वादिकमेव तद्वदिहापि वेदातिरिक्तवाक्यत्वापेक्षया वाक्यत्व लघ्वितिवत् साध्ये वाक्यत्वानिरूपितव्यापकतावच्छेदकं न
सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं किंतु
लाघवादुच्चरितत्वमेवेत्युक्तसाध्ये वाक्यत्वहेतुर्गौरवपराहतः सन्नप्रयोजको भवतीत्यर्थः ।।
नन्वेवं वेदे आकाङ्क्षायोग्यताऽसत्वादिमत्वमपि न सिध्येत् । लाघवेनोच्चारितत्वमात्रेण वाक्यत्वस्योपपत्या गौरवेणाकाङ्क्षादिमत्वं प्रत्यप्रयोजकत्वादित्यत आह -- आकाङ्क्षादीति ।। त्वयापि पौरुषेयत्ववादीनापीत्यर्थः ।

१.कल्पपदं नास्ति-मु-च. २.अन्तरपदं न - मु-च. ३.प्यनुसर्तव्यं -छ-क-ख.प्यादर्तव्यं-ग. ४.इवेति नास्ति-मु.

स्वयंप्रति १ भातानां वेदवाक्यनां सजातीयोच्चारणानपेक्षत्वेनांशे सिद्धसाधनाच्च ।। एतेन वेदत्वं सजातीयोच्चरणानपेक्षोच्चरितवृत्ति महाजनपरिग्राहतावच्छेदकत्वे सति वाक्यवृत्तित्वात् ।

वाक्यत्वस्याकाङ्क्षादिमच्छब्दरूपतया तदभावे वाक्यत्वस्य स्वरूपोच्छित्तेरुभयसंमततया तत्र गौरवदोषाभावात् । इह च त्वदुक्तगुरुभूतसाध्येन विनाप्यस्तु वाक्यत्वमित्युक्तौ बाधकाभावादप्रयोजकत्वमेव
वाक्यत्वस्येति भावः -- स्वयमिति ।। गुरुमखोच्चारणापेक्षां विनैवेत्यर्थः ।।
'जन्मान्तरे श्रुतास्तास्तु वासुदेवप्रसादतः ।
मुनीनां प्रतिभास्यन्ति भागेनैव न सर्वशः ' ।।
इति स्मृत्या जन्मान्तरेऽधीतानामस्मिञ्जन्मनि गुरुमुखोच्चारणापेक्षां विनैव कदाचित्कालविशेषे प्रतीतानां वेदवाक्यानामित्यर्थः ।।
यदत्रोक्तं रुचिदत्तानां तद्भिन्नत्वेन पक्षो विशेणीय इति तन्न । वेदः पौरुषेयो न वेति कृत्स्नवेदविषयपौरुषेयत्वविमत्यनानुवगुण्ये नार्थान्तरात् ।।
मण्युक्तप्रयोगान्तरं निराह -- एतेनेति ।। निरस्तमित्यन्वयः । अत्रापि साध्ये सजातीयपदं पूर्ववच्छब्दमूलकस्मृतित्वे व्यभिचारवारकं ध्येयम् । पठ्यमानवेदे बाधाप्रसक्तेर्न जातीयपदोक्तिः ।।
महाजनेति ।। यद्यपि मणौ प्रमाणतावच्छेदक वाक्यधर्मत्वादित्येव ------

१.तीतानां -छ.क,ख.

स्वाधिकरणसमानानुपूर्वीकसकलवृत्तित्वाद्वा १ । भरतत्ववत् । अत्र च पक्षस्यैकत्वेन नांशे सिद्धसाधनम् । आद्ये हेतावेतद्वेदत्वाद्यौ व्यभिचार २ परिहाराय माहजनेत्यादिसत्यन्तं विशेषणम् । एतद्वेदत्वं तु न ३ तदवच्छेदकम् । लाघवेन धूमत्ववद्वेदत्वस्यैव तदवच्छेदकत्वात् । यागत्वादौ व्यभिचारवारणाय वाक्यवृत्तित्वादित्युक्तम् ।

-- हेतुरुक्तस्तथापि प्रमाणतावच्छेदकत्वस्य प्रमाणमात्रवृत्तित्वरू ४ पत्वऽद्यतनवेदत्वे व्यभिचारात् । तदवच्छित्तिप्रत्ययजनकत्वे स्मृतिसाधारणस्यान्यस्यैव वाच्यत्वादित्यतः पक्षधराद्युक्तविविक्षानुरोधेन महाजनेत्याद्युक्तम् ।।

नरहर्युक्तविविक्षानुरोधेनाह -- स्वेति ।। स्वस्य वेदत्वस्य यदधिकरणम् सर्गादिकालीनो वाऽद्यतनैः पठ्यमानो वा वेदः तत्समानानुपूर्वीकाः सर्वैः पाठ्यमाना वेदाः तत्सकलवृत्तित्वादित्यर्थः -- भारतत्ववदिति ।। तस्य तादृशाद्यभरतवृत्तित्वात्साध्यवत्वंसाधनवत्वं च व्यक्तमिति भावः -- अंश इति ।।

स्वयंप्रतिभतवेदांश इत्यर्थः -- एतद्वेदत्वेति ।। बुद्धिस्थं किञ्चिच्चैत्रादिना पठ्यमानवेदत्वमेतद्वेदत्वपदेन गृह्यते । सत्यन्तेनोक्तदोषनिरासं व्यनक्ति -- एतद्वेदत्व ८ न्त्विति ।। धूमत्ववदिति ।। धूमत्वं यथावह्निव्याप्यत्वावच्छेदकं न त्वेतद्धूमत्वं तथेत्यर्थः -- द्वितीय इति ।। हेताविति अर्थः।

१.'वा'इति नास्ति -मु. २.वारणाय - छ-क-ख. ३.पक्षताव-मु-च. ४.पेऽद्यतन -अ. ५.न्न-कुं. ६.मिति -कुं -चेति -अ.

द्वितीये सकलपदेनैवैतद्वेदत्वादौ व्यभिचारनिरासः । एतद्वेदत्वस्य स्वाधिकरणेनैतद्वेदेन समानानुपूर्वि १ के पूर्ववेदे वृत्यभावादिति निरस्तम् । उक्तरीत्या वेदत्वस्य सजातीयोच्चारणानपेक्षेणेश्वरेण स्वयं प्रतिभातवेदैर्वसिष्टादभिश्चोच्चरिते वृत्या सिद्धसाधनात् । वाक्यवृत्तत्वस्यो २ च्चरितत्वेन माहाजनपरीग्राह्यतावच्छेदकत्वस्य च धर्मादिप्रमापकवृत्तित्वेनैवोपपत्योक्तं ३ साध्यं प्रति गौरवेणाप्रयोजकत्वाच्च । द्वितीयहेतोरपि स्वाधिकरणे सर्वत्र तुल्यानुपूर्वीप्रयोजक कण्ठताल्वादिरूपतुल्यकारणेनैवोपपत्या ४ गौरवेणोक्तसाध्यं प्रत्यप्रयोजकत्वात् ।।

व्यभिचारनिरासं व्यनक्ति -- एतद्वेदत्वस्येति ।। इतीति ।। मणावुक्तमेतेन निरस्तमित्यर्थः ।। एतेनेत्युक्तं व्यनक्ति -- उक्तरीत्येति ।। मां प्रतीत्यादिनोक्तरीत्येत्यर्थः-- स्वयंप्रतीभातवेदैरिति बहुव्रीहिः ।।
हेतौ विशेष्यविशेषणरूपांशद्वयस्याप्युक्तसाध्येन विनाऽन्यथोपपत्याऽप्रयोजकत्वलमाह -- वाक्येत्यादिना ।।
उच्चारितवृत्तित्वेनोपपत्येत्यन्वयः । गौरवेणेत्युपलक्षणम् । विपक्षे बाधकाभावेन चेत्यपि ध्येयम् । श्रुत्यादिबाधादिरुपप्रागुक्तसाधारणदोषोप्यत्रानुसन्धेयः -- तुल्यकारणेनेति ।। येन कारणेन वेदत्वाश्रयव्यक्तिषु सर्वत्र तुल्यानुपूर्वी भवति तादृशकारणेनैव हेतुरुपपन्नः ।

१.समस्त पदं -च-क. २.'च्चारि' इति संशोधितं दृश्यते -छ. ३.क्तसा-छ-च- क-ग-ख. ४.गौरवेण इति पदमनन्तरं वर्तते -मु-च-छ-क-ख- 'गौरवेण' इति नास्ति - ग.

वेद-पौत्वानु-दिङ्गः) वेदापौरुषयत्ववादः पु - २६७.

एतेन बुबोधयिषुपठितो वेदः स्वानपेक्षस्वसमानविषकज्ञानपूर्वकः । बुबोधयिषुवाक्यत्वात् लौकिकवाक्यवदिति निरस्तम् । स्वमानविषयकज्ञानपूर्वकत्वमात्रेण बुबोधयिषुवाक्यत्वस्योपपन्न १ त्वेन २ गौरवेण स्वानपेक्षज्ञानं प्रत्यप्रयोजकत्वात् । ३ । अन्यथोक्तेनैव हेतुना स्वानपेक्ष ४ स्वसमानविषयकज्ञानकरणसापेक्षत्वमपि सिध्येत् ।। मन्मतेईश्वर ५ ज्ञानस्य वेदानपेक्षत्वेन सिद्धसाधनाच्च ।
नापि वेदो वाक्यार्थगोचरयथार्थज्ञानजन्यः ।

न त्वन्येन । तच्च कारणं कण्ठताल्वादिकं न तु तलताडनादिरूपम् । तथा च
सजातीयोच्चारणानपेक्षोच्चरितवृत्तित्वप्रयुक्ततत्वाभावादप्रयोजकत्वं
हेतोरित्यर्थः ।। बुबोधयिष्विति ।। शिष्योन्बोधयितुमिच्छताऽध्यापकेन पठितो वेद इत्यर्थः । इदानीन्तनाज्ञपठितवेदे बाधवारणाय बुबोधयिषुपठितेत्युक्तिः । स्वेति सन्निहितो बुबोधयिषुपठितो वेद उच्यते । तदनपेक्षं तदजन्यमित्यर्थः । तत्समानविषयकं च यज्ञानं तत्पूर्वक ६ इत्यर्थः । तादृश च ज्ञानमीश्वरनिष्ठमिति तज्जन्यत्वेन साध्यसिद्धिरिति भावः । अज्ञोच्चरितवाक्ये वाक्यत्वस्य व्यभिचारनिरासाय बुबोधयिष्विति हेतौ विशेषणम् ।।
'अनुमानानाप्रयोजकत्वात् 'इति सुधोक्तमनुरुध्याह -- स्वसमानेति ।। मण्युक्तं प्रयोगान्तरं प्रत्याचष्टे -- नापि वेद इति ।।

१.त्वेगौ-मु-च. २.गौरवेण इति नास्ति -छ-क-ख. ३.एतावन्नास्ति - ग. ४.'स्वमानाविषयकरण' इत्यधिकं -क. ५.ज्ञानपदं नास्ति - ग. ६.कमि-कुं.

---------- ---------- ----------

प्रमाणशब्दत्वात् । भारतवदिति वाच्यम् । यथार्थज्ञानमात्रस्य हेतुत्वविक्षायामर्थबुबोधयिषय पठिते आधुनिकदांशे सिद्धसाधनात् । तन्निरासाय शब्दाजन्यत्वेन ज्ञानस्य विशेषणे च शब्दमूलकशब्दे व्यभिचारात् ।।
सोपि पक्षतुल्य इति चेन्न । प्रामाणण्यस्य स्वतस्त्वेन -----

मणौ वेदा इति पक्षनिर्देशेपि तत्रैव पठ्यमानवदेश्य पक्षसमत्वोक्तेः यत्किञ्चिद्वेदपक्षक १ त्वेपीष्टसिद्धेर्बहुवचनमविवेकमूलमिति सूचनाय वेद इत्येव पक्षनिर्देशः कृतः ।
अध्यापकानुपूर्व्यादिज्ञानडजन्यत्वेनार्थान्तरवारणाय साध्ये वाक्यार्थगोचरेत्युक्तिः । वाक्यार्थगोचरज्ञानजन्य इत्येवोक्तो ईश्वरे भ्रमसिद्धावपि नेष्टसिद्धिरिति तादृप्यसिद्धये यथार्थपदम् -- भारतवदिति ।। प्रत्यक्षमूलाद्यभारतवदित्यर्थः -- मात्रस्येति ।। शब्दा २ जन्यत्व विशेषणहीनस्येत्यर्थः । हेतुत्वेति ।। जनकत्वेत्यर्थः ।
नन्वेतद्धोषनिरासायैव शब्दा ३ जन्येति ज्ञानविशेषणमुक्तं मणावित्यत आह --तन्निरासायेति ।। 'तादृशस्यापि द्विकर्तृकत्वमिति 'मण्युक्तेर्भावमाशङ्क्याह-- सोपीति ।। प्राचीनमते पक्षसमेपि सन्दिग्धसाध्यवति हेतुनिश्चयेन व्यभिचारस्य दोषत्वेप्याधुनिकमते दोषत्वाभावस्येश्वरवादे मणावेव व्यनक्तत्वादिति -- प्रामाण्यस्येति ।। हेतो

विशेष्यस्य विशेषणस्य वोक्तरूपसाध्येन विनाऽनुपपत्या विशिष्टहेतुना साध्यसिद्धर्वाच्या । तत्र विशेष्यं शब्दत्वं तावन्नानुपपन्नम् । शब्दाभासेपि तस्य
सत्वात् । किन्तु विशेषणस्य प्रमाजनकत्रूपप्रामाण्यस्यैवानुपपत्या साध्यसिद्धिर्वाच्या ।

१.क्षीकारे-मु-अ. २.'ब्द' -कुं. ३.ब्द-कुं.

वेद-पौत्वानु-दिङ्गः) वेदापौरुषेयत्ववादः पु - २६९.

-- परतस्त्वेपि यादृच्छिकसंवादिवाक्य इवावश्यक योग्यतादि १ नोपपन्नत्वेन गौरवे २ णोक्तसाध्यं प्रत्यप्रयोजकत्वात् । अन्यथोक्तेनैव हेतुना
वाक्यार्थगोचरप्रमाकरणपूर्वकत्वमपि सिध्येत् ।।
एतेन यथार्थज्ञानत्वस्य करणतावच्छेदकत्वं विवक्ष्यत इति निरस्तम् । प्रामाण्यस्य स्वतस्त्वेन परतस्त्वेपि नित्यत्वेनेश्वरज्ञानस्य प्रमात्ववद्वेदस्यापि नित्यत्वेन प्रमाणशब्दत्वोपपत्तेः ।
एतेन वेदस्य यथार्थज्ञानपूर्वकत्वाभावेऽन्थपरम्परा स्यादिति निरस्तम् । प्रत्यक्षवद्गुणजन्येश्वज्ञानवच्च तदपूर्वकत्वेप्यन्धपरम्पराभावोपपत्तेः ।।
अत एव च देदजन्या प्रमा ३ करणगुणपूर्विका जन्यप्रमात्वात् चूक्षुषप्रमावदिति निरस्तम् ।

तस्याप्यन्यथोपपत्याऽप्रयोजकत्वमित्यर्थः । स्वतस्त्वेनेत्यस्य ज्ञानजनकत्वशक्त्यैवेत्यर्थः । उपपन्नत्वेनेत्यन्वयः -- परतस्त्वेपीति ।। गुणप्रयुक्तत्वेपीत्यर्थः । योग्यतादीत्यपदेन योग्यताज्ञानदोषाभावादिग्रहः --

अप्रयोजकत्वादिति ।। त्वदुक्तसाध्यं प्रतीत्यर्थः -- विवक्ष्यत इति ।। प्रागुक्तांशतः सिद्धसाधनतानिरासायेति योज्यम् ।।
वेदनित्यत्वेमण्याद्युक्तं बाधकान्तरं निराह -- एतेन वेदस्येति अन्धपरम्परेति ।। तथाच वेदेऽनाश्वसः स्यादिति भावः -- अत एवेति ।।

१.एवेत्यधिकं -मु-च - नाचोक्त - छ-ख-क. २.णाप्रयो - मु-च-क-ग. ३.का - छ-ग-ख-च.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २७०.
---------- ---------- ----------
अप्रयोजकत्वात् ।।
नापि वेदाः सर्वज्ञप्रणीताः वेदत्वात् व्यभिचारेकेण लौकिकवाक्यवदिति वाच्यम् । अप्रसिद्धविशेषणत्वात् ।।
ननु तर्ह्यसंसारिप्रणीता इति साध्यते । न चैवमप्रसिद्धविशेषणत्वम् । आत्मत्वमसंसारिनिष्ठम् जातित्वात् घटत्ववदित्यनेनासंसार्यात्मसिद्धौ, विमतः कस्यचिद्वाक्यस्य वक्ता आत्मत्वात् अहमिवेत्यनेन सामान्यतोऽसंसारिप्रणीतत्वसिद्धेरिति चेन्न । उक्तरीत्या गौरवेण वेदस्वरूपतत्प्रामाण्ययोरसंसारिप्रणीतत्वं विनाप्युपपत्याऽप्रयोजकत्वात् ।।
नापि वैदिकमहंपदं स्वतन्त्रवक्तृपरं अहंपद ----------

गुणाभावेपि प्रमात्वस्योपपन्नत्वादेवेत्यर्थः। तदेव व्यनक्ति । अप्रयोजकत्वादिति ।।
चिरन्तनानुमानान्तरमाशङ्क्य तत्वनिर्णयटीकोक्तदोषेण निराह । नापि वेदा इति ।। टीकोक्तमुपलक्षणमुपेत्य परोक्तमन्यदप्याशङ्क्य निराह --

ननु तर्हीत्यादिना ।। उक्तरीत्येति ।। प्रत्यक्षवद्गुणाजन्येश्वरज्ञानवच्चेत्यादिनोक्तरीत्योपपत्येत्यन्वयः ।
उदयनोक्तं १ प्रयोगान्तरमाशङ्क्य निराह । नापीति ।। 'तद्ब्रूह्यावेदहं ब्रह्मस्मीति ''अहमेव स्वयमिदं वदामि 'इत्यादौ श्रुताहमाद्यस्मदादेशपगदमित्यर्थः ।।

१.'प्रोयोक्तृ' इत्यधिकं - अ.

वेद-पौत्वानु-दिङ्गः) वेदापौरुषेयत्ववादः पु - २७१.

त्वात् संमतवदित्यनेन पौरुषेयत्वसिद्धिरिति वाच्यम् । तथात्वे त्वन्मते वेदे ' शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा ' इत्यादौ स्वतन्त्रवक्तुरीश्वरस्यैव, भारतादौ च
किं नो राज्येन गोविन्द-
शिष्यस्तेहं शाधि मां त्वां प्रपन्नम् ।
इत्यादौ व्यासस्यैव, लोके च 'वाच्यस्त्वया मद्वचनात्स राजा' इत्यादौ कालिदासादेरेवाहं शब्दार्थत्वापातात् ।।

'तथात्वे सङ्कल्पप्रार्थनादिवाक्यानामनर्थकत्वप्रसङ्गात्' इति तत्वनिर्णयटीकां विवृण्वन्नेव हेतुमाह -- तथात्व इति ।। तैत्तरीयोपनिषादि श्रुते प्रार्थनावाक्यं मे मम शरीरं विशिष्टाश्चर्षण्यः' १ प्रजा यस्य तत् विशिष्टप्रजायुक्तमस्तु मे मम जिह्वा मधुमत्तमा अतिशयेन स्वादुमती भवत्विति प्रार्थनाकर्तृयजमानवाचित्वेन श्रुतास्मदादेशरूपम २ इति शब्दार्थमीश्वरस्य स्यात् । तथा --
किं नो राज्येन गोवन्द किं भोगैर्जीवितेन वा ।
इति विषादपर गीतावाक्ये तथा --

‘ पृच्छामि त्वां धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेहं‘
इति शिक्षाप्रार्थनापे अर्जुनकर्त्तृकवाक्ये व्यासस्यैव न इत्यहमिति च श्रुतास्मच्छब्दार्थत्वप्रसङ्गात् । तथा रघुवंशे च मद्वचनादिते सीताप्रयुक्तास्मच्छब्दार्थत्वं कालिदासस्य स्यादित्यर्थः।

-

१.णयः -मु. २.मदिति-मु.

-

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २७२.

---------- ---------- ---------

ननु ‘शरीरं मे‘ इत्यादावीश्वरादेरेव स्वतन्त्रवक्तृत्वेपि मन्त्रलिङ्गप्रकरणादिना यजमानाद्यभिप्राया १ नुप्रवेशाङ्गीकाराद्यजमानार्जुनसीता २ दिरेवाहं शब्दार्थ ३ इति चेत्तर्हि वेदापौरुषेयत्वेपि ‘शरीरं मे ‘ इत्यादिप्रार्थनादिमन्त्रेषु मन्त्रलिङ्गादिना यजमानेश्वराद्यभिप्राया ४ नुप्रवेशस्य मयापि स्वीकृतत्वात्तत्र यजमान एवाहंशब्दार्थः ‘मामुपास्व‘ इत्यादौ त्वीश्वर इत्यस्तु ।।
किञ्च मन्मते ईश्वरस्यान्योच्चारणानपेक्षमेवोच्चारयितृत्वेन स्वतन्त्रवक्तृत्वमप्यस्ति।।
एतेन वैदिकेन स्या ५ मामाभूमेत्याद्युत्तमपुरुषेणापौरुषेयत्वसिद्धिः । तदभिधेयायाः सङ्ख्यायाः स्वतन्त्रवक्तृन्वयादिति निरस्तम् ।

-

‘न हि वयं वेदे पुरुषाभिप्रायप्रवेश एव नास्तीति वदामः‘ इतिटीकोक्तसमाधिं परमुखेनैव वाचयन्नाह -- ननु शरीरमित्यादिना ।। मन्त्रलिङ्गेति ।। मन्त्राणामर्थप्रतिपादनसामर्थ्यं हि मन्त्रलिङ्गमिति मीमांसकादिपरिभाषा । व्यक्तमेतल्लिङ्गप्रकरणादिस्वरूपमग्रे

द्वितीयपरिच्छेदे । यस्मिन्मन्त्रे यदर्थप्रतिपादनसामर्थ्यं प्रकरणस्थानादिकं वा विद्यते तदभिप्रायानुप्रवेशस्य तत्राङ्गीकारादित्यर्थः ।।
तर्हि ' मामुपास्व' इत्यादाव ६ नन्यपरे स्वतन्त्रवक्तृपरता स्यादित्यतः सिद्धसाधनत्वं चाह -- किञ्चेति ।। ७ स्यामेति ।। 'वयं स्यामतयो रयीणां,

-

१.'अनु' इति नास्ति-मु-च. २.दे-च. ३.ता-च. ४.'अनु' इति नास्ति-मु-च. ५.म भूवमि मु -छ-च. ६.वन्य-कुं. ७.स्यामिति-'स्यामहन्ते सदमिद्रातौ तव स्यां ' इति वर्तते -मु.

---------- ---------- ----------

तस्याः 'गृभ्णामि ते सौभगत्वस्य हस्तं 'इत्यदौ परतन्त्रवक्तृन्वयस्यापि दर्शनात् । प्रत्युत त्वत्पक्ष एव 'वयं स्याम पतयो रयीणां ''भूयिष्टां ते नम उक्तिं विधेम'इत्यादौ बहुवचनादिकमयुक्तम् । स्वतन्त्रवक्तृरीश्वरस्यैकत्वात् ।।
एतेन वैदिकेन युष्मच्छब्देन पौरुषेयत्वसिद्धिः । तस्य स्वतन्त्रवक्तृसंबोध्यवाचकत्वादिति निरस्तम् । 'त्वां प्रपन्नं ''वाच्यस्त्वया'इत्यादौ परतन्त्रवक्तृसंवेद्येपि तत्प्रयोगात् ।।

पतयो रयीणां, अपाम सोममृता अभूम, अभूमानागसो वयं'इत्यादौ श्रुतोत्तमपुरुषयस्य 'व्येकयोर्द्विवचनैकवचने'बहुषु बहुवचनं'इत्युक्तवचनरूपतया सङ्ख्यावाचित्वात्तदभिधेयायां सङ्ख्याया इत्युक्तम् -- तस्या इति ।। सङ्ख्याया इत्यर्थः । 'गुभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथा सः 'इति बहुवचनवाक्ये उद्वोढुपुरुषेण ते तव हस्तं सौभाग्याय गृभ्णामि ''हग्रयोर्भश्छन्दसि'इति

भदेशः गृह्णामीति कन्यां प्रत्युच्चार्यमाणे श्रुतोत्तमपुरुषोक्तसङ्ख्यायास्तद्वाक्यं प्रत्यस्वतन्त्रवक्त्रन्वयदर्शनादित्यर्थः । एकत्वादित्युपलक्षणम् । सर्वनम्यत्वात्प्रणामोक्तिश्च न युक्तेत्यपि ध्येयम् -- इत्यादाविति । पूर्वोक्तगीताहघुवंशवाक्यादौ व्यासकालिदासादेरेव स्वतन्त्रवक्त्रुतयाऽर्जुनसीतादेरेतादृशवक्तृत्वात्तत्संबोध्येपि कृष्णादौ युष्मत्पदादेशप्रयोगदर्शनाद्व्यभिचार इत्यर्थः ।।

न्यादीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २७४.

एतेनैव वैदिकाभ्यां यत्तच्छब्दाभ्यां पौरुषेयत्वसिद्धिः । तयोर्यथाक्रमां स्वतन्त्रवक्तृविष्ठबुद्धि १ विषये तादृशपरामर्शोपहिते च शक्तत्वादिति निरस्तम् । 'योस्मान्द्वेष्टि '२ इत्यादौ चास्वतन्त्रवक्तृबुद्धिविषयादावपि प्रयोगदर्शनात् । अन्यथा वैदिकानां किमहोबतधिगादिशब्दानामपि स्वतन्त्रवक्तृनिष्ठसंसयसुखदुःखोपहि ३ तार्थत्वाद्वेदस्य नित्यसंशयाद्याधारकृतत्वमपि स्यात् ।

वैदिकाभ्यामिति । 'यश्छन्दसामृशयो विश्वरूपः छन्दोभ्योध्यमृतात्सम्बभूव समेन्द्रो मेधया स्मृणोति 'इत्यादौश्रुताभ्यामित्यर्थः -- यथाक्रममिति ।। स्वतन्त्रवक्तृनिष्ठबुद्धिविषये यच्छब्दः तादृशपरामर्शोपहिते ४ विषये च तच्छब्द इत्यर्थः । पूर्ववदेव वेदे लोके च व्यभिचारमाह -- य इति ।। 'अप्रतिष्ठः स भूयाद्योस्मान्द्वेष्ट यं च वयं द्विष्म 'इत्यत्र यो द्वेष्टि सः अप्रतिष्टो भूयादिति 'वाच्यस्त्वया मद्ववचनात्स राजा'इति हधुवंशे च प्रयोगदर्शनादित्यर्थः ।।
स्वोक्तगत्यन्तरपक्षे अनुकूलतर्कं परपक्षे बाधकं चाह -- अन्यथेति ।। स्वतन्त्रवक्तृत्वादिकमेवाहमादिपदानामिति पक्षे इत्यर्थः । 'किं स्विद्धिमस्य

भेषजं को न आत्मा किं ब्रह्मेत्यादौ च किं शब्दः ५ इत्यादावहाशेब्दः '६ अहो बतासि यमेनैव ते मनोहृदयं विदाम'इत्यादौ बत शब्दः छन्दोगौपनिषदि सप्तमे 'आचार्यं वा ब्राह्मणां वा किञ्चिद्भृशमिव प्रत्याह धिक्त्वाऽस्त्वित्येनमाहुरित्यादौ च धिक्छब्दः श्रुतः।

१.'विशेण' इत्यधिकं -मु. २.'इत्यादौ' इत्यधिकं - क. ३.अर्थपदं नास्ति-छ. ४.परामर्शेत्यधिकं-मु-अ. ५.अत्र ग्रन्थपातः प्रदर्शितः-मु. ६.बतोबतासि इति वर्तते-मु-अ.

वेद-पौत्वानु-दिङ्गः) वेदापौरुषेयत्ववादः पु - २७५.

---------- ---------- ----------

१ तत्र संशयादिकमाहार्थं चेदि २ हापि स्वातन्त्र्यमाहार्यमस्तु १ ।।
एतदप्युक्तं 'गौरवदोषण'इति ।
एतेनैव काठकं कालापकं इत्यादि समाख्ययेश्वरसिद्धिः । ईश्वरस्यैव कठादिकायपरिग्रहेण तत्तच्छाखनिर्मातृत्वात् । अध्ययनमात्रस्य साधारण्यादिति निरस्तम् ।

तत्र किंशब्देन संशयः अहो ३ इति सुखं बत धिगिति दुखं प्रतीयत इतीश्वरो वेदकर्ता नित्यज्ञानादिमानिव नित्यसंशयादिमानपि तादृशवाक्यकर्तृत्वेन स्यादित्यर्थः ।।
आहार्यं चेदिति ।। एतेन 'न च जिज्ञासा ५ दयः सर्वज्ञे विप्रतिषिद्धा इति युक्तं शिष्यबोधनायाहार्यत्वोपपत्तेः 'इति
कुसुमाञ्जल्युक्तं निरस्तम् । सुखदुः खादेरवर्जनीयत्वात्तस्याप्यहार्योरोपत्वे तद्बोधकवेदभागस्याप्रामाण्यापत्तेरिति भावः।।

गौरवेति ।। नित्यसंशयादिमत्वरूपगौरवदोषेण पुंवाक्यं ज्ञापकं न तदित्यर्थः -- एतेनैवेति ।। अन्यथोपपन्नत्वकथनेनैवेत्यर्थः -- समाख्ययेति ।। 'यौगिकी संज्ञान समाख्या
'इति मीमांसकपरिभाषया कठेन कृतं काठकमित्यादियौगिकसंज्ञारूपसमाख्येत्यर्थः । तावता कथमीशकृतत्वमित्यत आह -- ईश्वरस्यैवेति ।। कठादिमुनिनाधीतत्वात्काठकमित्यस्त्वित्यत आह -- अध्ययनमात्रस्येत्वेति ।। अध्येत्रन्तर साधारण्यादित्यर्थः -- कठादिऋषिधृतत्वेति।।

१.अयं ग्रन्थः नास्ति-ग. २.दत्र-छ-क. ३.बत इत्यपि वर्तते -मु. अ. ४.संशयेत्यधिकमस्ति - अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २७६.

कठादिऋषिधृ १ तत्वमात्रेण काठकादिसंज्ञोपपत्तेः ।।
नापि वेदस्तात्पर्य २ पूर्वकः प्रमाणशब्दत्वात् भारतवत् । न चाप्रयोजकता । तात्पर्यज्ञानस्य शाब्दज्ञानानियामकत्वे हि नानार्थे श्लिष्टे च विनिगमकाभावेनार्थविशेषधीर्न स्यात् । यष्टीः प्रवेशयेत्यादावन्यानुपपत्यभावेन लक्षणा च न ----

तज्जन्मन्यश्रुतानां सुप्तप्रतिबुद्धैरिव कठादिभिर्दृष्टत्वस्य तन्निबन्धनत्वोपपत्तेः 'रिति तत्वनिर्णयटीकोक्तदिशा कठादिमुनिभिर्जन्मान्तरेधीतशाखाविशेषस्य प्रतिभाबलवेदानीं स्फुरितत्वेन तदृष्टत्वरूपद्बूद्धिधृतत्वेनोपपत्तेरित्यर्थः ।।

यत्तु मणौ 'तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यं 'मिति तात्पर्यस्वरुपं निरूप्यन्ते ३ 'लोके क्लृप्तत्वाद्वेदेपीदन्तात्पर्यमिति पौरुषेयत्वम् 'इत्यादिनोक्तं तदाशङ्क्य निराह -- नापीति ।। तात्पर्यपूर्वक इति ।। अर्थप्रतीतीच्छाया केनाचिदुच्चरित इत्यर्थः । ४ यद्वा अर्थप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यज्ञानपूर्वक एवार्थप्रत्यायक इति साध्यार्थः । प्रमादादिदोपूर्वकशब्दाभासे व्यभिचारनिरासाय प्रमाणेति हेतुविशेषणम् । अर्थप्रमितिजनकशब्दत्वादित्यर्थः ।।
मण्याद्युक्तमेवानुकूलतर्कं निष्कृष्याह -- तात्पर्यज्ञानस्येति ।। नानार्थ इति ।। ५ अक्षमानयेत्यादौ -- श्लिष्ट इति ।। राजा कुवलयोल्लासीत्यादौ पार्थिवजन्द्ररूपार्थद्वयश्लेषयुक्त इत्यर्थः -- अन्वयेति ।।

१.दृष्टत्व-छ. २.मूलकः-ख. ३.'अन्ते' इति नास्ति-कुं. ४.यद्वा इति नास्ति - कुं. ५.अज-मु -अश्व-अ.
वेद-पौत्वानु-धङ्गः) वेदापौरुषेयत्ववादः पु - २७७.
---------- ---------- ----------
-- न स्यादि १ त्युक्तानुकूलतर्कस २ द्भावात् । तात्पर्यस्य ३ चार्थप्रत्यायनेच्छयो ४ च्चरितत्वरूपत्वात्पौरुषेयत्वसिद्धिः । तस्माच्छुतिकुमार्यास्तात्पर्यरूपो ५ गर्भ एव पुंयोगे लिङ्गमिति वाच्यम् । तत्प्रमिति शेषत्वरूपस्य तात्पर्यस्येच्छाघटितत्वाभावात् । तद्घटितत्वेपि मन्मते सजातीयोच्चारणानपेक्षस्येश्वरस्यार्थप्रत्यायनेच्छयोच्चारणेपि सर्वदाप्येकप्रकारानुपूर्विकत्वरूपापौरुषेयत्वाहानेश्च ।

गङ्गायां घोष इत्यादौ प्रवाहग्रामयोराधाराधेयभावरूपान्वयानुपपत्या गङ्गापदस्य तीरे लक्षणाश्रीयते । यष्टीः प्रवेशयेत्यादौ तु यष्टीनां गृहप्रवेशान्वयसम्भवेन लक्षणाबीजान्वयानुपपत्यभावात् यष्टिपदस्य यष्टिमत्सु लक्षणा न स्यात् । तात्पर्यज्ञानस्य हेतुत्वे तु

यष्टिमत्प्रवेशतात्पर्यानुपपत्तिरूपलक्षणाबीजसम्भवाल्लक्षणा स्यादेवेति भावः ।।

तावता कथं पौरुषेयत्वमित्यत आह -- तात्पर्यस्य चेति श्रुतीति ।। श्रुतिरूपकुमार्यास्तात्पर्यरूपो गर्भ इत्यर्थः । यथा कुमार्यां ग ६ र्भेण चिह्नेन पुंयोगोस्ति तस्या इति ज्ञायते तथा श्रुतेरपि तात्पर्यरूपलिङ्गेन पुरुषकृतत्वरूपपुंयोगो ज्ञायते इत्यर्थः ।।

अस्त्वेवं वेदस्य तात्पर्यपूर्वकत्वं तावता न पौरुषेयत्वसिद्धिरिति भावेनाह -- तत्प्रमिति शेषत्वेति ।। ७ 'शेषः परार्थत्वात् 'इति जैमिन्युक्तदिशा तत्प्रमित्येकोद्देश्यकत्वं तच्छेषत्वं तदेव तत्तात्पर्यमित्यर्थः -- अन्यथेति ।। तत्प्रत्यायनेच्छयोच्चरितत्वमत्रेण तत्कृतत्व इत्यर्थः ।

१.उक्तेतिनास्ति - कुं - ग. २.सनाथत्वात् -मु-च. ३.च इति नास्ति - मु-च-ग. ४.च्चा-क-ख-ग. ५.पग-मु-छ-ख. ६.र्भीय-मु. ७.शेषपदं नास्ति-मु.

अन्यथात्व १ न्मतेप्याधुनिकेनार्थज्ञानवताध्यापकेन तदिच्छायोच्च २ रितस्य

वेदस्याधुनिक ३ कृतत्वं स्यात् । यादृच्छिकसंवादिकुशकादिवाक्ये इच्छारूपतात्पर्याभावेपि शाब्दप्रमादर्शनेन हेतोरप्रयोजकत्वाच्च ।।

न च तत्रापीश्वरेच्छा कल्प्या । अबाधितार्थत्वेन तत्कल्पनस्य शाब्दबोधानन्तरभावित्वेन तत्राहेतुत्वात् । ईश्वराभावं निश्चितवतोपि मीमांसकस्य शुकादिवाक्येन शाब्दप्रमादर्शनाच्च । नानार्थादावपि मन्मते नेच्छायां तात्पर्यं नियामकम् । किन्तु तत्प्रमितिविशेषत्व ४ रूपम् । त्वन्मतेप्यावश्यकं प्रकरणादिकमेवार्थविशेषज्ञापकमस्तु ।

पराभिमतेच्छाघटिततात्पर्यरूपसाध्ये प्रमाणशब्दत्वहेतोरप्रयोजकत्वं चाच - - यादृच्छिकेति ।। अबाधितेति ।। शुकादिवाक्यं तदर्थप्रत्यायनेच्छयेश्वरेणोच्चरितं अबाधितार्थत्वादित्यबाधितार्थत्वेन हेतुना तदिच्छयेश्वरोच्चारितत्वकल्पनस्येत्यर्थः । तत्र शाब्दबोधे ईश्वरोच्चरितत्वरूपतात्पर्यज्ञानस्याहेतुत्वादित्यर्थः ।।
अप्रयोजकत्वं प्रकारान्तरेण व्यनक्ति -- ईश्वरा ५ भावमिति ।। यत्तु तात्पर्यज्ञानस्य शाब्दज्ञाननियमकत्वमुक्तं तत्तथैव । परन्तु न त्वदभिमततात्पर्यज्ञानं नियामकं किंत्वन्यदेवेति भावेनाह -- नानार्थेति ।। तत्प्रमितीति ।। तात्पर्यज्ञातं सदिति शेषः । एतेन यष्टीः प्रवेशयेत्यादौ लक्षणा न स्यादिति दोषोपि नेति भावः -- आवश्यकमिति ।।

१.तत्पक्षे -क-ख. २.'च्चा' इति संशोधितं -च-क-ख-ग. ३.कृत पदं नास्ति - च-छ. ४.रूपपदं नास्ति-मु-छ-ख. ५.न्यत्वमिति -अ.

वेद-पौत्वानु-दिङ्गः) वेदापौरुषेयत्ववादः पु - २७९.
---------- ---------- ----------
ज्ञापके च धूमालोकादाविवाननुगमो न दोषाय ।।
यद्वा त्वन्मते काशीमरणश्रवणादिजन्यतत्वज्ञानेष्विव प्रकरणादिजन्यशाब्दबोधेष्वपि वैजात्यं कल्प्यताम् ।।
एतेन वैदिकानि निन्दावाक्यानि १ हानाभिप्रायपूर्वकाणि निन्दावाक्यत्वात् लौकिकनिन्दावाक्यवत् । एवं स्तुतिवाक्यमपि पक्षीकृत्य प्रयोक्तव्यमिति निरस्तम्।

तत्प्रत्यायनेच्छायोच्चरितत्वस्यापि प्रकरणादिनैव ज्ञातव्यत्वेन तात्पर्यज्ञानहेतुतयाप्यावश्यकमित्यर्थः।।

नन्वेवं क्विचिल्लिङ्गं क्वचित्प्रकरणम् क्वचित्समाख्येत्यननुगमोऽतोऽनुगतं प्रकरणादिजन्यं तात्पर्यज्ञानमेव हेतुरित्यत आह --
ज्ञापक चेति ।।
ननूक्तस्थले वह्निव्याप्यज्ञानत्वेन धूमालोकाज्ञानानामनुगमो वा धूमादिज्ञापकजन्यानुमितौ वैजात्ये २ न वास्तु । अन्यथा व्यतिरेकव्यभिचारेणानुमितिहेतुतैव न स्यादित्यत आह-- यद्वेति ।। काशीमरणेन श्रवणादिना च जन्येषु तत्वज्ञानेष्वित्यर्थः ।।
उदयनाद्युक्तमन्यदपि निराह -- एतेनेति ।। 'यदश्रुवशीयतत् रजतं हिरण्यमभवत्तस्माद्रजतं हिरण्यमदक्षिण्यमश्रुतं हि यो बर्हि ३ र्ददाति पुरास्य संवत्सराद्गृहे रुदन्तीति ''यदभिघारयेद्रुद्रायास्ये पशून्निदध्यात् 'इत्यादीनि निन्दावाक्यानीत्यर्थः --
स्तुतीति 'वायुर्वै क्षेपिष्टा देवता वायुमेव स्वेन भागेनोपधावति 'इत्यादि वाक्यमुपादेयाभिप्रायपूर्वकं स्तुतिवाक्यत्वाल्लोकिकस्तुतिवाक्यवदिति प्रयोक्तव्यमित्यर्थः ।।

१.हान्यपि -ख. २.त्यंवा-कुं. ३.षिद-अ. षुद-मु.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २८०.

अपौरुषेयत्वेपि मन्मते ईश्वराभिप्रायपूर्वकत्वस्य मीमांसकमतेप्य १ नादौ संसारेऽर्थाभिज्ञाध्यापकाभिप्रायपूर्वकत्वस्य सत्वेन सिद्धसाधनात् । स्वतन्त्रेति विशेषणे च गौरवात् । शुकादिवाक्यदाभिप्रायपूर्वकत्वाभावेपि गुणदोष बोधकत्वेनैव निन्दावाक्यतोपपत्तेश्च ।।
एतदप्युक्तं 'गौरवदोषेण 'इति । तस्मात्पौरुषेयत्वे नानुमानं मानम् ।।
नापि 'छन्दांसि जज्ञिरे'इत्यादिश्रुत्यादिकं तस्य --

‘तदुत्पत्तिवचश्चैव भवेद्व्यक्तिमपेक्ष्य तु ।

तत्वनिर्णयटीकोक्तमेव समाधिमाह --अपौरुषेयत्वेपीति ।। अप्रयोजकत्वं हेतोराह -- शुकादीति ।। तत्रापीश्वराभिप्रयकल्पनायां पूर्वोक्तदोषो ज्ञेय इति भावः ।
श्रुत्यादिकमित्यादिपदेन
‘प्रतिमन्वन्तरम् ‘इति प्रागुक्तस्मृतिग्रहः -- तस्येति ।।
श्रुत्यादेरित्यर्थः । स्मृत्यैव व्याख्यातत्वादित्यन्वयः --तदुत्पत्तीति ।। श्रुत्युत्पत्तिवचश्चेत्यर्थः । तुर्विशेषार्थः । आदिकालीनां व्यक्तिं २ त्विति । तेन प्रत्यहमुपाध्यायैर्व्यज्यमानत्वादुत्पत्तिव्यवहारप्रसङ्ग इति निरस्तम् । अत एवावान्तराभिमानानामित्यस्मात्पूर्वार्ध एव --

१.अनादौ संसारे इति नास्ति -छ-ख. २.मिति -मु.

---------- ---------- ----------
अवान्तराभिमानानां देवानां वा व्यपेक्षया ।।
नानित्यात्वात्कुतस्तेषामनित्यत्वं स्थिरात्मनां। इत्या १ दिस्मृत्यैवाभिव्यक्तिपरत्वेन सम्प्रदायप्रवर्तक २ परत्वेन च व्याख्यातत्वात् । तेनेश्वराधीनोत्पत्तिकत्वस्यैवोक्त्या मानान्तरेणार्थमुपलभ्य रचिचत्वरूपस्य प्रणीतत्वस्यासिद्धेश्च । न ह्युक्तरीत्या क्रमविशेषणघटितो वेद इदानीम ३ प्यस्मदा ४ द्यधीनोत्पत्तिक इति वयमपि वेदप्रणेतारः ।।

‘वेदानां सृष्टिवाक्यानि भवेयुर्व्यक्त्यपेक्षया ‘।
इति गत्युक्तसद्भावेपि तदनुदाहृत्य स्थलान्तरस्थमेव तदुत्पत्तीत्यर्धमुदाहृतम् -- ५ देवानां वेति ।। देहजन्मापेक्षयेत्यर्थः ।

मुख्याभिमानिश्रियस्तन्नेत्यतोऽवान्ताराभिमानानामिति । अमुख्याभिमानवतामित्यर्थः -- तेषामिति ।। वेदानामित्यर्थः -- स्मृत्यैवेति ।। तत्वनिर्णयोक्तब्रह्माण्डपुराणवचनेनैवेत्यर्थः ।।

'अग्नेरृग्वेदो वायोर्यजुर्वेदः'इत्यादिवाक्यगत्युक्तिपरतयापि तदुत्पत्तिवचश्चेत्यर्धस्यार्थमुपेत्याह -- सम्प्रदायेति ।। चिरकालविरचितस्य वेदस्य शिष्यप्रविष्येषु प्रख्यानं हि सम्प्रदायः । तत्कारित्वेन चेत्यर्थः । श्रुत्यादेरन्यथासिद्धिं चाह -- तेनेति ।। श्रुत्यादिनेत्यर्थः । अस्तु तावतैव प्रणीतत्वमित्यत आह-- न ह्युक्तरीत्येति ।। क्रमविशेषविशिष्टानां वर्णानामित्यादिनोक्तरीत्येत्यर्थः ।।

१.आदिपदं नास्ति -छ - अभिव्यक्तिपरत्वेनेति नास्ति - छ-क-ख. २.नप-मु-च-परेति नास्ति -छ-क-ख. ३.अपि इति
नास्ति -ख. ४.आदि पदं न - छ. ५.देवानां -मु.

ननु यथा वेदानादित्वश्रुतिर्न वेदस्वरूपानादित्वपरा । बाधात् । किंत्वानुपूर्व्यनन्यथात्वपरा । तन्मात्रेणैव शब्देऽनुत्पत्तिव्यवहारात् । तथा तदुत्पत्तिश्रुतिरपि तदन्यथात्वपरेति चेन्मैवम् । 'तत्क्रमेणैव 'इत्यादिस्मृत्याऽनुत्पत्तिश्रुतेः क्रमानन्यथात्वपरत्वे स्थिते उत्पत्तिश्रुतेस्तदविरोधाय क्रमोत्पत्तिपरत्वस्यैवोचितत्वात् । अन्यथा 'ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात् 'इति श्रुत्याऽसर्वज्ञस्याग्न्यदेरपि वेदप्रणेतृत्वं स्यात् । न चैकस्मिन्वाक्येऽनेकेषां स्वतन्त्रप्रणेतृत्वं युक्तम् । युक्तं तु सम्प्रदायप्रवर्तककत्वम् ।। एतदप्युक्तं 'गौरवदोषेण'इति ।।

छन्दांसीत्यादिश्रुत्यादेः क्रमोत्पत्तिपरत्वेनान्यथासिद्धिरयुक्तेति भावेन शङ्क्यते -- नन्विति ।। श्रुतिरिति ।। 'अनादि नित्या सा तच्च 'इत्यादिपूर्वोक्तश्रुतिरित्यर्थः -- बाधादिति ।। क्रमस्य कृतकत्वादिति भावः -- अन्यथात्वेति --

'वेदास्ते नित्यविन्नत्वाच्छ्रुतयश्चाखिलैः श्रुतेः ।
आम्नायोऽनन्यथापाठादिशबुद्धिस्थिताः सदा' ।।

इति माहावाराहस्मृतेरिति भावः -स्मृत्येति ।। प्रागुक्तयेत्यर्थः -- अन्यथेति ।। क्रमोत्पत्तिपरत्वमनुपेत्य तदन्यथात्वपरत्वोक्ताविवत्यर्थः । अस्त्विवत्यत आह --नचेति ।। एतदपीति ।। एकस्मिन्वाक्ये अनेकेषां स्वतन्त्रप्रणेतृत्वं न युक्तमित्येतदित्यर्थः -- गौरवेति ।। अनेकस्वतन्त्रप्रणेतृकत्वकल्पनाख्यगौरवदोषेणेत्यर्थः ।।

वेद-पौत्वानु-दिङ्गः) वेदापौरुषेयत्ववादः पु - २८३.

---------- ---------- ----------

यद्यप्यृष्यादयोपि केषुचित्पुरुषेष्वचिरावितस्य वेदैकदेशस्य कम्प्रदायप्रवर्तकाः । तथापि नेश्वरवत्सर्वपुरुषेष्वपि प्रलये चिर १ तदविरतस्य कृत्स्नस्य वेदस्य प्रवर्तका इति न तेषु वेदहेतुत्वव्यवहारः । ईश्वरोपि ह्यस्मन्मते --

'यो ब्रह्माणं विदधाति पूर्वं यो वेदां श्च प्रहिणोति तस्मै ' ।।

इत्यादिश्रुत्या वेदस्मप्रदायप्रवर्तकत्वान्महोपाध्याय एव । तस्माद्वेदानां पौरुषेयत्वरूपं सादित्मयुक्तम् ।।

अनित्यत्वं त्वत्यन्तायुक्तम् । तथाहि । क्रम २ विशेषविशिष्टा वर्णा एव वे ३ दाः । क्रमश्च बुद्धिनिमित्तक एव ।

सम्प्रदायप्रवर्तकत्वस्य वेदहेतुत्वव्यवहारे व्यभिचारमाशङ्क्य निराह -- यद्यपीत्यादिना ।। छन्दांसि जज्ञिरे तस्मादित्यादेः सम्प्रदायप्रवर्तकत्वेन

गत्युक्तिरयुक्ता हेतेरसिद्धेरित्यत आह -- ईश्वरोपि हीति ।। पौरुषेयत्वेति ।। स्वतन्त्रपुरुषप्रणीतत्वरूपमित्यर्थः ।।
यत्तु --
'प्रमायाः परतन्त्रत्वात्सर्गप्रलयसम्भवात् '।।
इत्यादिना कुसुमाञ्जलौ प्रलये वेदानामुत्सन्नत्वमुक्तम् । तदप्ययुक्तमित्याह - अनित्यत्वं त्विति ।। वेदानामित्यनुषङ्गः । क्रमस्योक्तदिशा कथं चित्पुरुषाधीनजन्मवत्वेन कृतकत्वसम्भवे प्यानुपूर्व्युच्छेदस्तु न युक्त एवेति तु शब्दार्थः -- इत्युक्तमिति ।।

१.तरेति नास्ति -छ-ख-ग. २.विशेषणं नास्ति -छ-क-ख-ग. ३.दः - छ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २८४.
---------- ---------- ----------
न तु स्वत इत्यक्तम् । ततश्च सर्वेषां सर्वथा वर्णविषयविवक्षितक्रमोपाधिभूतबुध्युपरम एव वेदे १ विनाशो वक्तव्यः । न तु
घटादीनामिवापरः । न चेश्वरस्य तथाविधबुध्युपरमो युज्यते । तस्य सर्वदा २ सर्वज्ञत्वात् ।

अपौरुषेयत्वानुमानवाद्रे उक्तमित्यर्थः- अपर इति।। स्वरूपध्वंसलक्षण इत्यर्थः ।।
तर्हि पुराणा ३ नापि नित्यत्वं स्यात् । ईश्वरबुद्धिनिमित्तकत्वस्य कदाप्यनाशादित्यतोऽस्त्येवैवं रुपं नित्यत्वम् । किन्तु क्रमव्यत्यासोपि तत्रेत्यनित्यत्वमिति भावेन तत्वनिर्णयोक्तमेवाह -- पुराणादीनामिति ।।
'पुराणानि तदर्थानि सर्गे सर्गेऽन्यथैव तु ।
क्रियन्तेऽतस्तनित्यापि तदर्थाः पूर्वसर्गवत् '।।

इति ब्रह्माण्डपुराणोक्तेरिति भावः ।।
नन्वेवं वेदपुराणयोरीश्वरबुद्धिनिमित्तकत्वेन नित्यत्वे पुराणानामप्यन्यथारजनं निष्फलमिति चेन्न 'भगवत्प्रवृत्तेः सर्वत्र ४ स्वप्रयोजनहीनत्वस्य 'न प्रयोजनवत्वात् 'इति सूत्रकृतैवोक्तेः परप्रयोजनानामतिसूक्ष्माणामुत्पेक्षितुमशक्यत्वात् 'इति तत्वनिर्णयटीकासुधायोरेव व्यक्तत्वात् ।।

१.दवि -च-छ. २.सर्वदा इति नास्ति -छ. सदा -ख.ग. ३.दीना-कु. ४.'स्व' इति न - कुं.

वेद-पौत्वानु-दिङ्गः) वेदापौरुषेयत्ववादः पु - २८५.

पुराणादिनामप्यन्यथारचनमेवानित्यत्वमि १ ति विधिप्रत्ययस्य लोकवद्वेदेप्याप्ताभिप्रयवाचकत्वात् । वैदिकविधिप्रत्ययेनैव २ वेदस्य पौरुषेयत्वमति तु विधिवादे नि ३ रसिष्यते ।।
४ पौरुषेयत्वानुमानादिभङ्गः ।। २१ ।।

नन्वेवमपि 'विधिर्नियोगः प्रेरणेत्यनर्थान्तरम् । स च प्रेरकपुरुषधर्मः । ५ अतो वैदिकानां विध्युद्देशानां लौकिकवत्स्वतन्त्रवक्तृकत्वमेवोचितम् । यस्तु पौरुषेयत्वं नोपैति तं प्रति विधिरेव । गर्भ इव श्रुतिकुमार्याः पुंयोग ६ प्रमाणम् 'इति विधिवाद् मणिकृदुक्तेः । 'आप्ताभिप्रायो विध्यर्थः 'इत्युदयनोक्तेश्च ।
'नित्या वेदाःसमस्ताश्च '
इति स्मृत्यक्त्या निरस्तत्वेपि विशिष्य न निरस्तमित्याशङ्कामनूद्य निरासस्थलमाह -- विधीति ।। ७ विधिवेदस्येति ।। विधिभागरूप ८ वेदस्येत्यर्थः -- विधिवाद इति ।। द्वितीयपरिच्छेदे ।।

९ पौरुषेयत्वानुमाना १० दिभङ्गः ।। २१ ।।

१.'इति' इति नास्ति -कुं. २.'विधि' इत्यधिकं वर्तते -ग-कुं. ३.राकरिष्यते-ग. ४.'वेद' इत्यधिकमस्ति -कुं-ग. इतिपौ-च-छ. ५.आप्तवैदिकानां विध्युद्धेशालौकिकवत् -स्वतं इत्यस्ति -अ. ६.गे-अ. ७.विधिपदं नास्ति -मु. ८.वेदपदं नास्ति -अ. ९.वेदपदमधिकं - कुं. १०. आदिपदं नास्ति - अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २८६.

ननु यदुक्तमीश्वरस्य सार्वज्ञ्यादिकमप्रामाणिकमेव बहु कल्प्यमिति तन्न । तस्य धर्मिग्राहक १ मानसिद्धत्वात् ।।
तथाहि । अदृष्टाद्वारकस्वोपादानागोचरजन्य कृतिजन्यभिन्नानि समवेतानि जन्यानि,

शास्त्रयोनित्वादिति ब्रह्मसूत्राभिमतमीश्वरस्यानानुमानिकत्वं साधयितुमाह -- यदुक्तमिति ।। वेदापौरुषेयत्वानुमानोक्तप्रस्ताव इत्यर्थः -- तस्येति ।। सार्वज्ञ्यादेरीश्वरधर्मिग्राहकमानेन सिद्धेरित्यर्थः ।। तेन सार्वज्ञ्यमात्रसिद्धावपि तेनैव विप्रलम्भवसिद्धेरग्रे
व्यक्तत्वादेव मुक्तिरिति ज्ञेयम् । तत्र कुसुमाञ्जलौ पञ्जमे परिच्छेदे --
'कार्यायोजनधृत्यादेः पदत्प्रत्ययतः श्रूयते ।
वाक्यात्सङ्ख्याविशेषाच्च साध्यो विश्वकृदव्ययः'।।
इतीश्वरे धर्मिण्यनेकमानान्युक्तानि । तत्र कार्यत्वरूपं मानमेकं मणौ प्रपञ्चितम् । तत्तावदनुवदति-- अदृष्टेति । अत्र जन्यानीत्यन्तं पक्षः । स्वजन्येत्यादीनि त्रीणि साध्यानीति विवेकः । पक्षे स्वपदं जन्येति निर्दिष्टवस्तुपरम् । अदृष्टाद्वारिका या स्वोपादानगोचरा साक्षादेव

स्वोपादानगोचरा या जन्या कृतिः तज्जन्यानि घटादीनि तद्भिन्नानि समवायवृत्त्या स्थितानि पृथिव्यादीनीत्यर्थः ।।
अत्र मणौ 'अदृष्टाद्वारकोपादानगोचरजन्यकृत्यजन्यानी'त्युक्तावपि यथाश्रुत उपादानपदस्य यत्किञ्चिदुपदानपरत्वे रूपाद्युपादानमृदङ्गोचरास्मदादीकृतिजन्यानां शब्दादीनां पक्षतानापत्तेः क्षित्याद्युपादानपरत्वे तद्गोचरजन्यकृत्यप्रसिध्या तदजन्यत्वाप्रसिद्धेस्तदीयव्याख्यानसूक्तपरिष्कारपूर्वकोयं स्वेत्यनुवादः ।

१. प्रमा - मु - च.

ईश्वरस्यानुमानकत्वभङ्गः) ईश्वरवादः पु - २८७.

समवेतपदस्थाने भावपदं वा प्रयोज्यम् । स्वजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि १ वा ।

तथा जन्यकृत्यजन्यत्वं हि जन्यकृतिजन्यान्यत्वमिति मणावेवोत्तरत्रोक्तेर्जन्यकृतिजन्य २ भिन्नेत्यप्यनुवाद इत्यदोषः ।।
भावेति ।। समवेतानि जन्यानीत्यत्र भावकर्याणीति वा प्रयोज्यमित्यर्थः। अदृष्टप्रागभाव ३ व्याप्य प्रागभावप्रतियोगीति साध्यांशस्य परिष्कारपूर्वकमनुवादः -- स्वजन्येत्यादि ।। स्वपदेनोपादानगोचरज्ञानादिकमुच्यते । स्वजन्यं यददृष्टं तत्प्रागभव्याप्यो यः प्रागभावः अदृष्टकारणीभूतज्ञानादिप्रागभावः तत्प्रतियोगि च यत्किञ्चिदुपादानभूतहविरादिगोचरज्ञानादि तद्भिन्नाः स्वजन्यादृष्टजनकभिन्ना इति फलितार्थः । या उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतयः तद्वता जन्यानीत्यर्थः ।

अत्रापरोक्षज्ञानपदं परोक्षान्यज्ञानार्थकं न त्वपरोक्षत्वजात्याक्रान्तज्ञानपरमित्यग्रे व्यक्तम् ।।
स्वजनकेति ।। स्वस्य कार्यस्य जनकं यददृष्टं तत उत्तरापक्षधरोक्तदिशाऽदृष्टाधिकरणक्षणोत्तरक्षणवर्तिन्यः न तु तदुत्तरक्षणोत्पत्तिमत्यः । तेन न बाधः शङ्क्यः । तादृश्य उपादानगोचरपरोक्षान्यज्ञानचिकीर्षाकृतयस्तद्वता जन्यानीत्यर्थः । ईश्वरज्ञानादेर्नित्यतया क्षित्यादिकार्यजनकादृष्टोत्तरत्वात् कुलालज्ञानादेरपि घटादिजनकादृष्टोत्तरत्वादिति न दृष्टान्तासिद्धिः । अपरोक्षेति बहुव्रीहिः ।

१.वा इति नास्ति -ग. २.त्वं नेत्य-अ. ३.प्रारम्भोवा व्याप्यप्रमिति योगीति साध्यांश - अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २८८.

अपरोक्षज्ञानचिकीर्षाप्रयत्नविषयीभवदुपादानानि वा । समवेतत्वे सति प्रागभावपतियोगित्वात् भावकार्यत्वाद्वा । घटवत् ।।
अत्र पक्षे जन्यानीतत्येवोक्तेः ध्वंसस्यापि पक्षत्वेनांशे बाधः स्यात् । तस्योपादानाभावात् । तन्निवृत्यर्थं समवेतानीति ।। तावत्युक्ते घटादेरपि पक्षत्वेनांशे सिद्धसाधनं स्यात् । तन्निवृत्यर्थं जन्यभिन्नानीति -- तावत्युक्तेऽङ्कुरादेरपि जन्यत्वादाश्रयासिद्धिः । तन्निव्यत्यर्थं जन्यकृतीति ।।

परोक्षान्यज्ञानचिकार्षाप्रयत्नविषयोपादानसमवेतानीत्यर्थः । च्व्यर्थलडर्थौ तु न विवक्षितौ ज्ञेयौ । घटवदिति ।। स्वपदस्य समभिव्याहृतपरत्वात्तत्र साध्यहेतुसत्वं व्यक्तमिति भावः ।।

हेत्वोर्ध्वंसे गगनपिरमाणादौ च व्यभिचारवारकं विशेषणद्वयं विशेष्यद्वयं चेति व्यक्तमित्युपेत्य पक्षसाध्यगतपदकृत्यानि दूषणोक्ति सौकर्याय तदीयव्याख्यानाद्युक्तानि व्यनक्ति -- अत्रेति ।। प्रयोग इत्यर्थः । अंशे बाध इत्युक्तं तद्गोचरज्ञानादिजन्यत्वं व्यनक्ति -- तस्योपादानाभावादिति ।। येन तद्गोचरज्ञानादिजन्यत्वं स्यादिति भावः -- अंशे सिद्धसाधनमिति ।। अदृष्टजनकभिन्नोपादानगोचरकुलालादिनिष्ठज्ञानादिजन्यत्वात् स्वजनकादृष्टोत्तरत्वात् कुलालज्ञानचिकीर्षादेरिति भावः ।।

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - २८९.

न चानीश्वरवादिनं प्रति व्यावर्त्याभावेन जन्यपदं व्यर्थम् । तन्मते प्रमेयो घट इति वत्तदुपरक्तबुद्धेरुद्देश्यत्वात् । उभयसिद्धप्रयोजनवत्वं तन्त्रम् । न १ त्वेकस्यैवप्रयोजनस्योभयसिद्धिः । तावत्युक्ते शब्दफत्कारादेः पक्षता न स्यात् ।

तस्य शब्दादि ।निमित्तभूतमृदङ्गताल्वादिगोचरास्मदादि २ निष्ठजन्यकृतिजन्यत्वात् । तदर्थं स्वोपादानगोचरेति ।। तज्जनकास्मदादि ।निष्ठकृतेर्निमित्त ३ भूतमृदङ्गादिगोचरत्वेप्युपादानीभूतकाशादिगोचरत्वाभावात् ।

तावत्युक्ते कालीरूपादेः पक्षता न स्यात् ।

मण्युक्तमेवाह -- तन्मत इति ।। तदुपरक्तेति ।। तद्विषयकेत्यर्थः । पक्षधराद्युक्तमाह -- उभयसिद्धेति ।। न्यायमते जन्यमात्रस्येश्वरकृतिजन्यतयाऽऽश्रयासिद्धिवारणरूपप्रयोजनवत्वं अनीश्वरमते च उद्देश्यसिद्ध्यादिरूपप्रयोजनवत्वमित्युभयसिद्धप्रयोजनवत्वमित्यर्थः ।।

एवं च शब्दफूत्कारादीनां पक्षतैवेति मण्युक्तं हृदि कृत्वाह -- तावत्युक्त इति ।। जन्यकृतीत्यादावेवोक्त इत्यर्थः । फूत्कारो मुखवायुविशेषः । न स्यादित्युक्तं व्यनक्ति -- तस्येति ।। तदर्थमिति ।। शब्दादेः पक्षतासिद्ध्यर्थमित्यर्थः । तां व्यनक्ति -- तज्जनकेति ।। मृदङ्गः शब्दस्य निमित्तं ताल्वादि च फूत्कारादेः ।। पक्षधराद्यक्तमाह - कालीति ।। काली नाम काचित्तपस्विनीतपसा स्वशरीरे गौरं रूपमुत्पादितवतीति तद्रूपादेरित्यर्थः -- तस्येति ।।

१.चै-छ. ।एतावन्नास्ति -छ. २.कृतेर्निमित्तीभूतेत्यादिवर्तते -ख. ३.त्ती -छ-क-ग.

तस्य स्वोपादानभूतशरीरगोचररतयोक्तरूपकृतिजन्यत्वेन तद्भिन्नत्वाभावात् । भाष्यं च तस्य पक्षतया । अन्यथा पक्षातिरिक्ते तत्र साध्यसन्देहेन सन्दिग्धानैकान्तिकतापत्तेः । तदर्थमदृष्टाद्वारेकेति । कालीकृतिस्त्वदृष्टद्वारैव रूपजनिकेति न दोषः ।।
साध्ये यद्यपि ज्ञानचिकीर्षाकृतीनां मध्ये एकैकोक्तावपीश्वरसिद्धिः । तथापि यावदभिमतविशेषण १ गुणवत्वसिद्ध्यर्थं त्रितयोक्तिः । साध्यविशेषणानामुद्देश्यसिद्धिप्रयोजकत्वात् ।।
अपरोक्षपदन्तूपादानज्ञानस्यापरोक्षत्वेनैव हेतुत्वाव्द्यापकातसिद्ध्यर्थम् । साक्षात्कारपदं तु नोपात्तम् । प्राभाकरं प्रति साक्षा २ त्वजातेरसिद्धेः । अपरोक्षपदेन तु परोक्षान्यज्ञानस्य विवक्षितत्वाददोषः ।

कालीशरीरोत्पन्नगौररूपस्येत्यर्थः -- सन्दिग्धेति ।। प्रचीनमतेनेदं दूषणं ३ बोध्यम् । मणिकृन्मते उक्तरूपसन्दिग्धानैकान्त्यं न

दोषायेत्यग्रे व्यक्तत्वात् -- यावदिति ।। यावन्तोऽभिमता विशेषणगुणास्तद्वत्वसिद्ध्यर्थमित्यर्थः -- व्यापकतेति ।। गगनपरमाण्वादिज्ञानस्य शब्दादिकं प्रत्युपादनत्वेपि चीकार्षाकृतिद्वारा शब्दाद्यहेतुत्वाद्भावकार्यत्वादिरूपहेतुव्यापकत्वसिद्ध्यर्थमपरोक्षपदोपादानमित्यर्थः । पक्षधरोक्तमाह -- साक्षात्कारेति ।। असिद्धेरिति ।। गुणगतजातेरनङ्गीकारात् । इन्द्रियजन्यज्ञाननपरत्वं तु न शङ्कार्हम् । बाधापातादिति भावः-- भाष्येति ।।

१.णसि-क-ख. २.त्कारत्वजा -छ. ३.ध्येयं-अ.

उपादानगोचरपदं तु भाष्यकाराद्युक्तध्वंसव्यावृत्तसक १ र्तृकत्वसिद्ध्यर्थम् । तावत्युक्ते सिद्धसाधनम् । अङ्कुरादेरपि स्वजनकादृष्टजनकयत्किञ्चिदुपादानभूतहविरादिगोचरज्ञानादिमदस्मदादिजन्यत्वात् । तदर्थमदृष्टेत्यादिभिन्नान्तं ज्ञानादिविशेषणम् । एवं च न सिद्धसाधनम् । काचरणप्रागभावस्य कार्यप्रागभावं प्रति व्याप्यत्वेनास्मदादिनिष्ठादृष्टजनकज्ञानादिप्रागभावस्य स्वजन्यादृष्टप्रागभावं प्रति व्याप्यत्वेन तद्भिन्नत्वाभावात् ।।

न चैवं कपाला २ दिरूपोपादानगोचरमदृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नं च यज्ज्ञानादि तद्वतास्मदादिनार्थान्तरम् । ज्ञानेच्छाकृतीनां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वेन कपालादि गोचरज्ञानादेः क्षित्याद्यजनकत्वेन बाधात् ।।

गौतमसूत्रभाष्यकारतट्टीकाकारोक्तेरित्यर्थः-- अङ्कुरादेरिति ।। सर्वस्यापि जीवोपभोग्यतया तत्तददृष्टार्जितत्वेन यदङ्कुरादिकं यज्जीवादृष्टजन्यं तददृष्टं
तावद्यज्ञादि ३ सत्कार्मजन्यम् । तादृशादृष्टजनकं स्वगतरूपाद्युपादानभूतहविरादिगोचरं यज्ज्ञानादि तद्वदस्मदादिजीवन्यत्वादित्यर्थः -- तदर्थमिति ।। सिद्धसाधनतानिवृत्यर्थमित्यर्थः -- व्याप्यत्वेनेति ।। यदा ज्ञानादिप्रागभावस्तदा तज्जन्यादृष्टप्रागभाव इति संभवादिति भावः -- वक्रोक्तिरिति ।।

१.सकार्यकत्व -क. २.आदिपदं नास्ति - च. ३.सकल -कुं.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २९२.

अत्र यद्यप्यदृष्टजनकभिन्नेत्युक्तेप्यस्मदादिभिर्न सिद्धसाधनम् । तथापीश्वरज्ञानादेरप्यदृष्टजनकत्वाद्बाधः । स माभूदिति वक्रोक्तिः । एवं च न बाधः । ईश्वरज्ञानादेरनादित्वेन प्रागभावप्रतियोगित्वस्यै १ वाभावेन तत्प्रतियोगिभिन्नत्वात् । तावत्युक्ते दृष्टान्तस्य साध्यवैकल्यम् । कुलालनिष्ठस्य घटजनकज्ञानादिप्रागभावस्य तन्निष्ठविहितादिक्रियान्तरो २ त्पत्स्यमानादृष्टप्रागभावं प्रति व्याप्यत्वात् । तदर्थं स्वजन्यत्वेनादृष्टं विशेषितम् । एवं च साध्यवैकल्यम् । उत्पत्स्यमानादृष्टस्य घटोपादानादिविषयकज्ञानादिजन्यत्वाभावात् ।

अदृष्टजनकभिन्नेत्यर्थ एवादृष्टप्रागभावप्रतियोगिभिन्नेत्युक्तिरित्यर्थः -- ज्ञानादीति ।। घटाद्युपादानकपालादिगोचरज्ञानादीत्यर्थः -- तन्निष्ठेति ।।

कुलालिनिष्ठेत्यर्थः । विहितादीति ।। निषिद्धा ३ करणमादिपदार्थः -- क्रियान्तरेति ।। कपालादिक्रियातोऽन्यक्रियेत्यर्थः ।।
स्वजन्यत्वनादृष्टं विशेषितमिति ।। यद्यपि पक्षधरादावदृष्टपदं स्वजनकादृष्चटपरं स्वपदं च समभिव्याहृतपक्षदृष्टान्तरूपकार्यपरमित्युक्तं तथापि तस्मिन्पदार्थः क्वचिदृष्टान्त इत्यननुगमः ।।
न चात्र ग्रन्थकृदभिमतसामान्यव्याप्तावननुगमो न दोषायेति रुचिदत्तोक्तं युक्तम् । यत्तद्भ्यां सामान्यव्याप्तिर्नानुमानभङ्गमित्यर्थापत्तौ ग्रन्थकृतैव निरासात् ।

१.एवकारो नास्ति - मु-च. २.रादिनो-च-छ-ग. ३.द्वक-अ.

ईस्य-नुकत्व-भङ्गः) ईश्वरवादः पु - २९३.

द्वितीयसाध्येऽस्मदादिभिः सिद्धसाधनवारणाय स्वजनकादृष्टोत्तरेति । तृतीये च विषयीभवदिति विशेषणम् ।।
अत्र च भाष्यादौ सकर्तृकत्वनिरुक्तावुपादानपदप्रक्षेपाद्ध्वंसव्यावृत्तसकर्तृकत्वसिद्ध्यर्थं पक्षसाध्यहेतुषु समवेतोपादाभावपदानि १ प्रयुक्तानि ।।

तथा
कुलालकृतेर्घटजनकादृष्टसमानजातीयागाम्यदृष्टप्रागभावव्याप्यप्रागभावप्रतियोगित्वेनोक्तदोषतादवस्थ्यात् । तदर्थं ठक्कुरोक्तदिशा जनकत्वं फलोपधानरूपं विविक्षणीयमिति क्लेश इत्युत्तरसाध्यासाङ्कर्याय च स्वजन्येत्येव विविक्षणीयमिति भावः -- सिद्धसाधनेति ।। तत्र स्वपदस्य समभिव्याहृतपक्षदृष्टान्तपरत्वात् अस्मदादिजीवकृतेः क्षित्यादिजनकत्वेप्यदृष्टद्वारैव न साक्षादिति

क्षित्यादिजनकादृष्टपूर्वभावितया तदुत्तरभावित्वाभावान्न सिद्धसाधनमिति भावः । ठक्कुरादौ तु कालीरूपादावंशतः
सिद्धनाधनवारणाय -- स्वजनकादृष्टोत्तरेति विसेषणमित्युक्तम् -- तृतीये चेति ।। सिद्धसाधनवारणायेत्यनुषङ्गः । इति विशेषणमिति ।। तस्य ज्ञानादिविषयोपादानसमवेतानीत्यर्थत्वेन
क्षित्यादोरस्मदादिज्ञानादिविषयसमवेतत्वाभावादिति भावः ।।
प्रागुक्तप्रयोगे ध्वंसस्य सकर्तृकत्वानापत्या सकलजगान्निर्मातृकर्तृसिद्धिर्न स्यादित्यतो यद्वेत्यादिना मणावुक्तं पक्षान्तरं तत्पूर्वोक्तपक्षतात्पर्यविविरणपूर्वमनुवदति -- अत्र चेत्यादिना ।। मात्रेणेति ।। उपादानादिघटितत्वेन विनेति मात्रपदार्थः -- पक्षादाविति ।।

१. प्रयुक्तपदं नास्ति - ग.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - १९४.
---------- ---------- ---------
यदा तु ध्वंससाधारमसकर्तृकत्वमात्रेणेश्वर १ सिद्धेस्तन्म्त्रं सिषाधयिषितं तदा पक्षादौ समवेतादिपदान्यनपरेक्षितान्येव । २ अस्मिंश्च पक्षे अस्मदादिनिष्ठघटादिजनककृतिध्वंसस्य ३ निरुक्तरुपकृतिजन्यत्वेन तद्भिन्नत्वाभावात्तस्य पक्षता न स्यात् । तदर्थं ३ कृतिपदस्थाने सविषय ४ त्रितयेति वाच्यम् ।।
एवं च कृतिध्वंसस्य प्रतियोगिभूतया कृत्याविरोधिगुणभूतेनोत्तरज्ञानेन च जन्यत्वेपि चिकीर्षाजन्यत्वाभावात् । चिकार्षाध्वंसस्य चोक्तरीत्या चिकीर्षाकृतिजन्यत्वेपि ज्ञानजन्यत्वाभावात्तयोरपि पक्षतासिद्धः ।।

पक्षसाध्यहेतुषु समवेतापादानभावपदान्यनपेक्षितानीत्यर्थः । ‘नन्वदृष्टाद्वारजन्यकृतिजन्यभिन्नानि जन्यानीत्येव पक्षनिर्देशे सति

घठजनककृतिध्वंसस्य पक्षता न स्यादित्यतो जन्येच्छाकृतित्यजन्यत्वं विवक्षणीयमित्युक्त्वा कृतिध्वंसादेः पक्षत्वमुपपादितम् । तदाह -- अस्मिंश्चेति ।। सविषयकेति ।। अदृष्टाद्वारकसविषयकत्रितयजन्यभिन्नानि जन्यानीति वाच्यमित्यर्थः -- विरोधीति ।। उत्तरात्मविशेषगुणभूतयोत्तरकृत्या जन्यत्वादित्यत आह -- चिकीर्षेति ।। ज्ञानेति ।। तस्य चिकीर्षातः पूर्वभावितया तज्जनकत्वेन तद्ध्वंसाजनकत्वादिति भावः -- तयोरपीति ।।

१.रःसिद्धः -छ. २.अन्यथेत्यधिकं वर्तते -छ. ३.अयंग्रन्थः नास्ति -छ. ४.कत्रि -च-मु. ५.त्यजन्य-कुं.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - २९५.

यद्वा क्षितिरेव पक्षः ।।
नन्वेवं पक्षादन्यत्राङ्कुरे संदिग्धानैकान्त्यम् । न च निश्चितसाध्याभाववति साधनसंदेह एव दोषो न तु सन्दिग्धसाध्येसाधनानिश्चयोपीति वाच्यम् । हेतौ साध्याभाववद्गामित्वसंदेहस्य १ दुषकताबीजस्योभयत्रापि सत्वात् । नचैवं
विधस्य संदेहस्य पक्षेपि सत्वादनुमानमात्रोच्छेदः । तदर्थमेव पक्षादन्यत्रेति विशेषितत्वादिति चेन्न ।.
पक्षादित्यत्र पक्ष ३ शब्देन प्रयोगविषयविवक्षायां स्वार्थानुमानोच्छेदात् ।

४ कृतिचिर्षाध्वंसयोरपीत्यर्थः ।।
नन्वेवमपि न सर्वध्वंसस्य पक्षता । चरमघटसुखादिध्वंसस्य पक्षबहिर्भावावश्यंभावात् । अन्यथा तस्य भोगतत्साधनेतरतया

अदृष्टाजन्यत्वेन स्वजनकादृष्टाप्रसिद्ध्योक्तरूपसाध्यासंभवेन तदंशे बाधापत्तेः । उक्तदिशा अन्योन्याभावस्य पक्षातवच्छेदकतया तस्य तन्मतेऽप्रसिद्ध्या आश्रयासिद्धेश्चेति पक्षधरोक्तरुच्या मणौ 'क्षितिरेव वा पक्ष'इत्यादिना पक्षान्तरमुक्त्वोपपादितं तदाह --यद्वेति ।। पक्ष इति ।। प्रतिज्ञाविषय इत्यर्थः । संदेहादिरूपपक्षताया अन्यत्रापि भावात् ।।
क्षितेरेव पक्षत्वे मण्युक्तबाधकशंका तदुत्तरं च निष्कृष्याहि -- नन्वित्यादिनेष्टसिद्धेरित्यन्तेन ।। अनुमानमात्रोच्छेदभयात्पक्षादन्येत्युक्तम् ।

१.समस्तं पदं - छ. २.नेतिनास्ति -च. ३.पदेन -छ. ४.कृतिपदं नास्ति - अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २९६.

पक्षलक्षणवद्विवक्षायां १ चांकुरस्यापि पक्षत्वात् । अत एव तत्र पक्षसमव्यवहारः । अङ्कुरस्यानुपादानं तु क्षितिमात्रोपादानेपीष्टसिद्धेः ।।
नन्वेवं संदिग्धोपाध्याहितः पक्ष एव व्यभिचारसंदेहोपि न दोषः स्यात् । न च तत्रानुकूलतर्काभावा ३ द्व्याप्त्यनिश्चयः । अत्र तु कार्यत्वरूपहेतूच्छित्तेरेव बाधकत्वात्त ४ न्निश्चय इति वैषम्यमित वाच्यम् । पक्ष् व्यभिचारसं ५ देहे ६ स्य दूषकत्वे तर्कस्यापि पक्षे व्यभिचारसंदेहेन प्रशिथिलमूलत्वापातादिति चेन्न ।।

पक्षस्वरूपमग्रे वकल्प्ययिष्यते - पक्षलक्षणवदिति ।। सिषाधयिषाविरहसहकृतसाधकबाधकमानाभावादरूपपलक्षणवदित्यर्थः -- अत एव - पक्षलक्षणसत्वेदेव । प्रतिज्ञाविषयत्वाभावत्समपदप्रयोग इति भावः --

इष्टसिद्धेरिति । तावतैवेश्वरसिद्धेरिति वा घटादौ निश्चितव्याप्तिकस्य लिंगस्य पक्षपक्षसमयोर्दर्शनेनोभयत्राप्यनुमित्यत्पत्तेरिति ७ वार्थः । संदिग्धसाध्यवति हेततुनिश्चयोन दोष इत्यत्र बाधकं वक्ष्यमाणसमाधिमाह -- नन्वित्यादिना अदोषत्वादित्यन्तेन ।। संदिग्धेति ।। स श्यामो मित्रातनयत्वादित्यष्टमगर्भस्थविषयप्रयोगे शाकपाकजत्वोपाधेः पक्षाद्व्यावृत्तिसंदेहेनाहितसाध्यसंदेहमूलो व्यभिचारसंशयोपीत्यर्थः । तत्र तस्यादोषत्वे व्याप्तिनिश्चयः स्यादिति भावः । तत्र व्याप्त्यनिश्चयोऽन्यनिमित्तक इत्याशङ्क्याह -- न चेति ।। तर्कस्यापीति ।। साध्याभावे हेतुर्न स्यादित्येवं रूपतर्कस्यापि आपाद्यापादकयोर्व्याप्तिसंदेहेनेत्यर्थः -- विप्रतिपत्यादीति ।।

१.त्वंकु-कुं. २.शयो-छ-ख. ३.न्निश्चयः -छ. ४.न्निश्च-छ. ५.शयस्य-क-छ-ख. ६.स्यादोषत्वात् । तस्य दू -कुं.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - २९७.

विप्रतिपत्यादिजन्यस्य पक्षताप्रयोजकस्य संशयस्यानुमित्यनुकूलत्वे १ नादोषत्वेप्युपाध्याहितस्य तस्या २ तथात्वेन दोषत्वात् ।।
नन्विदमप्रयोजकं नित्यायाःसर्वविषयायाश्चेश्वरकृतेरिदानीं संदिग्धत्वेन कृतिसामान्यस्य देशतः कालतो ३ वा
व्यतिरेकानिश्चयेन कार्यसामान्यंप्रति कारणत्वाग्रहात् ।
वह्निधूमसामान्ययोस्तु ह्रदादौ व्यतिरेकनिश्चयोस्तीति चेन्न ।।
घटकुलालकृतिरूपविशेषयोरेव व्यतिरेकस्य कारणत्वस्य वा ग्रहणेनाबाधे सामान्ययोरपि हेतुत्वसिद्धेः ।

साधारणधर्मादिरादिपदार्थः -- अतथात्वेनेति ।। अनुमित्यननुकूलत्वेनेत्यर्थः । 'अथ कृतिकार्ययोर्नान्वयव्यतिरेकाभ्यां व्याप्तिग्रहः 'इत्यादिना मण्युक्तमेव दूष्यांशं शङ्कापूर्वमनुवदति -- नन्विदमित्यादिना ।। भावकार्यत्वादिरूपानुमानमित्यर्थः -- इदानीमिति ।। अनुमानात्प्रागित्यर्थः । ईश्वरकृतिव्यतिरेकस्य न्यायमतेऽप्यभावेन प्राधान्यद्व्यतिरेकमात्र
एवाक्षेपसमाध्युक्तरिति ज्ञेयम् । अन्वयाक्षेपस्याप्युपलक्षणं वा । एवं ह्यनुमानमात्रोच्छेद इत्यत आह -- वह्नीति
।। घटेति ।। घटरूपकुलालकृतिरूविशेषयोरित्यर्थः -- कारणत्वस्येति ।। कार्यकारणभवस्येत्यर्थः ।

१.न तस्या -कुं. २.तस्येति नास्ति -कुं. ३.वा इति नास्ति -छ-ख.

न्ययदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - २९८.
---------- ---------- ----------
कथमन्यथाकाशादेः समवायिकारणस्य नित्यत्वाद्विभुत्वाच्च समवायिकारणसामान्यव्यतिरेकानिश्चयाच्छब्दादिसमवायिकारणत्वेनाकाशादिसिद्धिः ।।
नन्ववमपि दृष्टान्तः साध्यविकलः कुलालादिकृतेरेवान्वयव्यतिरेकाभ्यां कारणत्वग्रहणे १ मानाभावेन कुलालस्याहेतुत्वादिति चेन्न ।।
प्रयत्नवदात्मसंयोगस्य २ चेष्टाद्वारा घटहेतुतया तद्विशेषेणतया प्रयत्नस्येवात्मनोऽपि हेतुत्वात् ।।

प्रमाणवाक्यत्वेन वक्तृवाक्यार्थप्रमात्वेन कार्यत्वादिकल्पनेऽपि वाक्यसामान्यवक्तृज्ञानसामान्ययोस्तद ३ बाधादबाधन इत्युक्तम् -- आकाशादिसिद्धिरिति ।। तत्र घटकपालादिरूपविशेषणयोरेव

व्यतिरेकादिग्रहणेनेत्युक्तरीतेरेवानुसर्तव्यत्वादिति भावः -- अहेतुत्वादिति ।। तथाच कतिमज्जन्यत्वरूपसाध्यं तत्र नेत्यर्थः ।।
मानाभावेनेत्यसिद्धम् । कुलालो घटहेतुः तद्धेतुसंयोगावच्छेदकत्वात् कपालवत् घटहेत्वात्मसंयोगवदेकप्रयत्नवद्वेति मानाभावादिति भावेनाह ।। प्रयत्नेति ।। प्रयत्नस्यैवैत्युपलक्षणम् । असमवायिकारणसंयोगाश्रयकपालादेरिवेत्यपि ध्येयम्।।
नन्वात्मसंयोगे सति प्रयत्नं विना न चेष्टेति प्रयत्न एव हेतुर्न तु प्रयत्नवदात्मसंयोग इत्यत आह -- संयोगस्येति ।।

१.हणे-छ. २.चादृष्ट-ख. ३.भावा -कु.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - २९९.

संयोगस्य हेतुत्वे मानं तु, चेष्टा प्रयत्नवदात्मसंयोगासमवायिकारणिका स्वव्यधिकरणतदीय गुणव्यतिरेकप्रयक्तव्यकिरेकप्रतियोगित्वात् । यत्स्वव्यधिकरणतदियगुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगि तत्तदियसंयोगसमवायिकरणकम् १ ।

प्रयत्नवदात्मसंयोगस्य घटहेत्वभङ्गचेष्टाहेतुत्वे मानं त्वनुमानमित्यग्रेतनेनान्वयः -- चेष्टेति ।। शरीरस्पन्द इत्यर्थः -- प्रयत्नेति ।। प्रयत्नवत आत्मनः शरीरस्य च यः संयोगः तदसमवायिकारणिकेत्यर्थः । अभिघातकसंयोगेनार्थानतरनिरासाय प्रयत्नवदित्यादिविशेषणम् । हेतौ स्वेति परिस्मन्दः । स्वव्यधिकरणः स्वाधिकरणभिन्नाधिकरणकः तदीयः आत्मीयो गुणः प्रयत्नः तव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वादित्यर्थः । कलालरूपजन्यघटरूपे व्यभिचारनिरासाय तदियेत्युक्तिः । आत्मीयेत्यर्थः ।।

यद्वोक्तप्रतियोगिक्रियात्वादिति हेतुर्द्रष्टव्यः । अतो न व्यभिचारः । हेतोरेवाभावात् । एवं च तदियेति तच्छब्दस्य
समभिव्याहृतपरत्वेपि न दोषः । स्वव्यधिकरणपदकृत्यमग्रे व्यक्तम् ।।
यद्यपि मणौ 'या क्रिया व्यधिकरणयदियगुणजन्या 'इत्यादिव्याप्त्युक्त्या गुणजन्यत्वादिति हेतुर्वाच्या व्याप्तिश्च तथैव प्रदर्शनीया । तथापि क्रियाया ईश्वर २ गुणजन्यत्वेपि नेश्वरसंयोगासमवायिकारणकत्वमिति व्यभिचरानिरासाय तट्टीकार्थानुवादो गुणव्यतिरेकप्रयुक्तेत्यादिः ।।
यदिति ।। यत् परिस्मपन्दाख्यं कर्मेत्यर्थः । मणावपि या क्रियेत्येवोक्तिः ।

१.'केत्यनुमानं गुरुत्व' इत्यादि वर्तते -क. २.गुणपदं नास्ति -अ.

न्यादीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३००.

यथा स्पर्शवद्वेगवत्पवनाभिघातकारणिका पर्णादिक्रिया पवनसंयोगासमवायिकरणिकेत्यनुमानम् ।।
गुरुत्वव्यतिरेकप्रयुक्त व्यतिरेकप्रतियोगिनि गुरुत्वसमानाधिकरणे पतने गुरुत्ववद्रव्यसंयोगासमवायिकारणकत्वरहिते व्यभिचारनिरासाय हेतौ स्वव्यधिकरणेत्युक्तम् । अन्यथा चेष्टैव नोत्पद्येत । असमवायिकारणाभावात् । १ कारणप्रत्यासत्यभावेन प्रयत्नस्य हेतुत्वानुपपत्तेश्च ।।
न चैवमप्यात्मा हेतुभूसंयोगावच्छेदक एव न हेतुरिति वाच्यम् ।

अन्यथा कपालरुपजन्यघटरूपे व्यभिचारापत्तेः -- यथेति ।। यथा पर्णादिक्रियेत्यन्वयः । तत्र हेतुसत्वव्यक्त्यर्थं स्पर्शवदिति । पर्णादक्रिया स्वव्यधिकरणवायवीयेगरूपगुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिनीत्यर्थः --

पतन इति ।। आम्नफलादिपतन इत्यर्थः । स्वव्यधिकरणयदीयव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगीत्येतावत्युक्ते आम्नादिवृक्षपतनक्रियायां व्यभिचारः । तस्यां स्वव्यधिकरणो य आम्नादिवृक्षः स्वारम्भकावयवसम्बन्धित्वादवयवी यश्च तद्व्यतिरेकप्रयुक्तव्यतिरेप्रतियोगित्वेपि आम्नावयवसंयोगासमवायिकारणकत्वाभावात् अतो यदीयगुणेत्युक्तम् ।। विपक्ष बाधकरूपं हेतोरनुकूलतर्कमाह -- अन्यथेति ।। उक्तसाध्याभाव इत्यर्थः -- कारणेति ।। अन्यथेत्यनुषङ्गः । कारणीभूतप्रत्यासत्तीत्यर्थः । अप्रत्यासन्नस्य हेतुत्वेऽतिप्रसङ्ग इति भावः । 'असमवायिकारणसंयोगाश्रयस्य तत्कार्यजनकत्वनियमाच्च 'इति मण्युक्तमेवोदाहरणनिष्ठतया व्यनक्ति -- घटकारणेति ।।

१.'समवायि' इत्यधिकं वर्तते - ख.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३०१.

घटकारणीभूसंयोगाश्रयस्य कपालस्य घटकारणत्वदर्शनात् ।।
ननु घटादौ ज्ञानस्य कृतिद्वारैव हेतुत्वत्कृतिं च प्रतीष्टसाधनत्वानुमितेरेव हेतुत्वात्साक्षात्कारस्याहेतु १ त्वेन साध्यलैकल्यमिति चेन्न २ । कृतिर्हि सिद्ध ३ वृत्तिरसिद्धविषयिणी । तत्र साध्यांशे घटादाविष्ठसाधनत्वानुमितिसत्वेपि सिद्धांशस्य कपालादेः साक्षात्कारव्यतिरेकेण कृतिव्यतिरेकदर्शनेनोपादानसाक्षात्कारस्यापि हेतुत्वात् ।।
न च मनःक्रियाहेतुमनोविषयककृतौ व्यभिचारः समानाधिकरणस्य सिद्धमनोविषयक साक्षात्कारादेरभावादिति वाच्यम् । त्वगिन्द्रियगृहीतमनोवहननाडीगोचरकृत्या नाड्यां क्रियोत्पत्तौ -----

'अथ घटकृतिसाध्येष्टसाधनताज्ञानं चिकीर्षाद्वारा हेतुः । तच्च न प्रत्यक्षम् 'इत्यादिना मण्युक्तावेव प्रकारन्तरेण साध्यवैकल्यतत्समाधी निष्कृष्यानुवदति -- नन्वित्यादिना ।। साध्येति ।। उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वादिरूपसाध्येत्यर्थः -- व्यभिचार इति ।। यन्निष्ठा या कृतिः सा तद्गोचरापरोक्षपूर्विकेत्यस्य व्यभिचार इत्यर्थः ।। तमेव व्यनक्ति -- समानाधिकरणस्येति ।। साक्षात्कारादेरित्यादिपदेन
चिकीर्षाग्रहः । मनसोऽतीन्द्रियत्वादिति भावः -- मनोवहनेति ।।

१.त्वात् - मु-च. २.'न' इति नास्ति -छ-ख. ३.कृत्यसिद्ध- छ-ख.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३०२.

- वेगन्नाड्यां १ संयोगविशेषरूपनोदनेन मनसिक्रियोत्पत्तिः ।।
यद्यप्युपादानमात्रं सिद्धम् । तथा प्युपादेयवत्वेन साध्यत्वात्तत्र चिकीर्षा युक्ता ।।
न च घटे सिद्धविषयकसाक्षात्कारजनयत्ववदसिद्धविषयकपरोक्षज्ञानजन्यत्वस्यापि दर्शनादीश्वरस्य नित्यप्रत्यक्षवन्नित्यानुमितिः स्यादिति वाच्यम् । सिद्धपरमाण्वादिविषयकपरोक्षज्ञाने सत्यप्यपरोक्षत्वव्यतिरेकेण कृतिव्यतिरेकस्येव साध्यांशज्ञाने सत्यपि परोक्षत्वव्यतिरेकेण कृतिव्यतिरेकस्यादर्शनात् ।।

मनस आधारभूतेत्यर्थः - मनसि क्रियात्पत्तेरिति । तथा च यत्र कृतिनाड्यां तत्रास्त्यपरोक्षादिपूर्वकत्वम् । यत्र मनसि नास्त्यपरोक्षज्ञानं तत्र न कृतिरिति न व्यभिचार इति भावः ।।
नन्वेवमपि सिद्धे करणेच्छाभावेनोपादाने चिकीर्षायोगात्पुनः साध्यवैकल्यमित्याशङ्कामनूद्य निराह -- यद्यपीति ।। एवमप्रयोजकत्वसाध्यवैकल्ये निरस्य 'नन्वेवं घटादावनुमितिजन्यत्वदर्शनादीश्वरे
अनुमितिरपि स्यात् 'इत्यादिना मण्युक्तकपराहतिशङोत्तरे अनुवदति -- नचेत्यादिना ।। ईश्वरे जन्यज्ञानाभावाल्लिङ्गजन्यज्ञानं कथं स्यादिति आह -- प्रत्यक्षस्येन्द्रियजन्यत्वेपि नित्यप्रत्यक्षवदनुमितेर्लिङ्गजन्यत्वेपि नित्यानुमितिः स्यादित्यर्थः । अनुमिते २ रनित्यत्वे आदिकालीनद्व्यणुकाद्यजननात्तदविनाभूतशरीरेन्द्रिया ३ भावापाताच्चेति भावः अपरोक्षत्वेपि ।। तस्मिन् ज्ञान इत्यर्थः -- कृतीति ।। परमाणुगोचरकृतीत्यर्थः --साध्यांशेति ।।

१.ड्यास-मु-च-ख. २.तेर्नित्य-कुं. ३.अभावपदं नास्ति -मु.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३०३.

---------- ---------- ----------

ननु १ द्वेषयोनिकृतिसाध्ये चिकीर्षाभावद्व्यभिचारः । न च तत्रापि भगवतश्चिकीर्षा हेतुत्वेन कल्प्या । एवं हि द्वेषयोनिकृतिसाध्यदृष्टान्तेन क्षित्यादेपरपि द्वेषवज्जन्यत्वापातेन नित्यद्वेषापत्तेरिति चेन्न । तत्रापि द्वे २ ष्याभावस्यैवेष्ठत्वेन ------

घटपटादिरूपसाध्यांशस्येष्टसाधनत्वेनानुमितिरूपपरोक्षज्ञाने सति तद्विषयककपालादिनिष्ठकृतेर्दर्शनवत् साध्यांशस्येष्टसाधनत्वेनापरोक्षज्ञाने

सति साध्यविषयिण्यास्तद्धेतुनिष्ठायाः कृते व्यतिरेकस्य क्वाप्यदर्शनेन साध्यांश ३ स्येष्टसाधनत्वे ज्ञानत्वमेव वद्धेतुनिष्ठकृतौ प्रयोजकम् लाघवात् न तु तत्र साध्यांशस्येष्टसाधनत्व ४ ज्ञान परोक्षत्वमपि । गौरवात् । एवं चेश्वरस्यापि क्षित्यादिरूपसाध्यांशस्य ५ स्वष्टासाधनताज्ञानमपरोक्षरूपमस्तीति तद्धेतूपादनपरमाण्वादिकृतिर्युक्तेति न नित्यानुमित्यापत्तिदोष इति भावः ।।
एवं कृतेरपरोक्षज्ञानपूर्वकत्वे व्यभिचारमुद्धृत्य तत्प्रसङ्गागतमति प्रसङ्गं च निरस्येदानीं कृतेश्चिकीर्षापूर्वकत्वे व्यभिचारचोद्योत्त ६ रे मण्युक्ते ७ एवाह -- ननु द्वेषेति ।। द्वेषकारणकदुःखनिवृत्यनु ८ कूल कृतिसाध्ये ९ दुःखाभावादावित्यर्थः । तत्रेश्वरीयाचिकीर्षाकल्पनेन व्यभिचाराभावे प्यनिष्टप्रसङ्गस्तु स्यादित्याह -- एवंहीति ।। तत्र द्वेषयोनित्वमेव कृतेर्नास्ति
येन तदृष्टान्तेन क्षित्यादावपि द्वेषवज्जन्यत्वं स्यादित्याह --तत्रापीति ।।

१.द्वेषयोनि-इतिनास्ति-ख. २.षाभा-क. ३.स्य स्वेष्ठ-मु. ४.त्वं ज्ञाने -मु. ५.शज्ञा- 'स्वेष्ठासाधनता 'इतिनास्ति -मु. स्येष्ठ -अ. ६.रं - कुं. ७.क्तमे -कुं. ८. रूप-कुं. ९.चिकीर्षाजन्येत्यधिकं -कुं.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३०४.

- त १ त्साधनत्वेन ज्ञाने चिकीर्षाय एव २ संभवेन भिन्नविषयकद्वेषस्याहेतुत्वात् ।। न चेवं प्रवृत्तियत्नातिरिक्तस्य
क्रियाव्यतिरेकानुगुणस्य द्वेषप्रयोज्यस्य निवृत्तियत्नस्याभावाद्वेषे मानाभावः । द्वेष्मीत्यबाधितानुभावात् ।।

दुःखाभावसाधनेपि तत्साधनत्वेन द्वेष्याभावसाधनत्वेन ज्ञाने सति साधनगोचरचिकीर्षाया एव संभवेनेत्यर्थः -- भिन्नेति ।। शत्रुवषकद्वेषस्य तद्वधसाधनगोचरकृतेश्च भिन्नविषयत्वेन द्वेष्याभावसाधनकृतौ शत्रुविषयकद्वेषस्याहेतुत्वादित्यर्थः ।।
यदि द्वेषो न कृतिहेतुस्तर्हि द्वेषोऽलीक एव भवेदित्याशङ्क्य प्रत्यक्षेणासिद्धिमाह --न चैवमिति ।। एवं द्वेषस्य प्रवृत्तिरूपसाधनगोचरकृता ३ वहेतुत्वे द्वेषविषये मानाभाव इत्यन्वयः । दुःखसाधनादौ निवृत्तिरूप्रयत्नं प्रति भिन्नविषयस्यापि द्वेषस्यैव हेतुत्वात् द्वेषे निवृत्तिरुपकार्यमेव मानमित्यत उक्तम् -- प्रवृत्तीति ।। प्रवृत्तिरूपप्रयत्नेत्यर्थः --क्रियेति ।। अङ्गचेष्टादरुपकार्येत्यर्थः -- अभावादिति ।। दुःखादिकार्याभावनुकूल्यस्य दुःखगोचरद्वेषजन्य निवृत्तिरूप्रयत्नस्याभावादित्यर्थः । प्रवृत्तिरूपो निवृत्तिरूपश्चेति यत्नद्वैविध्यं यदि स्यात्तदा प्रवृत्तिप्रयत्नश्चिकार्षाद्वारेष्टसाधनताज्ञानायसाध्यः । निवृत्तियत्नस्तु द्वेषसाध्य इति द्वेषः प्रामाणिकः स्यात् । न चैवम् । प्रवृत्तिरूपप्रयत्नाभावस्यैव निवृत्तित्वात् ।।
न च निवृत्तिरूप्रयत्नाभाव एव प्रवृत्तिरिति वैपरीत्यं शङ्क्यम् ।

१.त्रसा-क. तत्रेत्यपि वर्तते -ग. २.वांस-क. ३.त्यहे-अ.

ननु तथापि घटादौ चेष्टाव्यापारककृतेरेव हेतुत्ववधारणात् क्षित्यादौ च चेष्टाया योग्या १ नुपलब्धिबाधितत्वा २ त्कृतेरहेतुत्वम् । न चैतस्मिन् --

सुषुप्तिदशायां निवृत्तिविरहसत्वेन प्रवृत्तिसाध्यचेष्टादिकार्याद्यापत्तेः ।।

न च तदा निवृत्तिविरह एव नेति युक्तम् । तदा दुःखसाधनत्वज्ञानविरहेण तन्निमित्तद्वेषस्य निवृत्तिहेतोरभावेन निवृत्तेरभावात् ।।
न चैवं प्रवृत्तियत्नो रागान्नित्तस्तु द्वैषादिति कुसुञ्जल्युक्तिविरोधः । तन्मते तथात्वेपि मणिकृन्मते तदभावात् । अन्यथा 'कुतस्तर्हि द्वेषः । शत्रून् द्वेष्मीत्यबाधितप्रत्यक्षा४ 'दिति मण्युक्तिविरोधात् ।।
एतेन यत्तु कुसुमाञ्जलिवाक्यानुरोधेन कुत इत्यादिमणिवाक्यस्य पक्षधरीयं क्लेशनार्थवर्णनं तत्तु मणुकृदभिप्रायाज्ञानमूलमिति विभावितं ध्येयम् ।।
एवं कृतेरपरोक्षज्ञानचिकार्षापूर्वकत्वं व्यभिचारनिरासेन समर्थ्य 'स्यादेतत् घटादौ कृतिसाध्यता हस्तादिव्यापाराद्वारैव न तु साक्षात् इत्यादिना मण्युक्तबाधशङ्कातत्समाधी आह -- ननु तथापीत्यादिना ।। अप्रयोजकत्वसाध्यवैकल्यव्यभिचारनित्यानुमितिनित्यद्वेषापत्तिरूपतर्कपराह त्यदोषाणामभावेपीत्यर्थः -- चेष्टेति ।। अङ्गचेष्टेत्यर्थः -- अहेतुत्वमिति ।। तथाच कृतिमज्जन्यं बाधितमिति भावः ।।
न चेष्टाकृत्योर्द्वारिभावापन्नतया घटादौ हेतुना किन्तु प्रत्येकमेव । न चैवं कृतिचेष्टयोः पौर्वापर्यानुपपत्तिः । पितापुत्रयोः पौर्वापर्ये ३ प्येकत्र घटे द्वयोः स्वातन्त्रेण हेतुत्वपदुपपत्तेः । तथा च यथोक्तसाध्ये न बाध इति भावेनाशङ्क्य निराह -- न चेति ।।

१.ग्योप-च. २.त्वेन कृ-मु-च.. ३.णैक -मु.

न चैकस्मिन् घटे पितापुत्रयोरिव चेष्टाकृत्योः स्वातन्त्र्येण हेतुना । घटानुकूलचेष्टाश्रयसन्निहितस्य तदनुकूलकृतिमतो
निगडनिश्चलदेहत्वेन चेष्टारहितस्यापि पुंसस्तद्धेतुत्वापत्तेरपि १ चेन्मैवं ।।

चेष्टाव्यापारककृतित्वेन कारणता न तावत्कार्यमात्रे क्षित्यादौ, व्यभिचारेण त्वयापि तथा नभ्युपगमात् ।।
नापि कृतिजन्यत्वावच्छिन्ने । आत्माश्रयेण कृतिजन्यत्वस्य स्वानवच्छेदकत्वात् । घटादौ कार्यविशेषे तथा कारणत्वे च सामान्यविशेषन्यायेन कार्यसामान्ये कृतित्वेनैव हेतुत्वात् ।।
अत एव चेष्टाजन्यत्वशरीरजन्यत्वादि २ रूपोपाधिरपि न ।

व्यभिचारान्न प्रत्येकं हेतुरित्याह -- घटेति ।। किं कार्यमात्रे कृतिजन्यकार्यमात्रे वा घटादिकार्यविशेषे वेति हृदि विकल्प्याद्यद्वयं निरस्यान्ते त्विष्टसिद्ध्या न बाध इत्याह -- चेष्टेत्यादिना ।। त्वयापीति ।। निरीश्वरादिनापि । न केवलमशरीरेश्वरवादिना मयेत्यर्थः -- अवच्छिन्न इति ।। कार्यमात्र इत्यनुकर्षः --सामान्येति ।। यद्विशेषयोः कार्यकारणाभावः बाधकाभावे तत्समान्योरपीति न्यायेन घाटादिरूपकार्यविशेषत्वेन चेष्टाद्वारककृतित्वेन कार्यकारणभावे व्यभिचाररूपबाधकाभावेन कार्यत्वेन कृतित्वेन कार्यकरणभावकल्पनपक्षेपि केवलकृतेरेव हेतुत्वादित्यर्थः -- अत एवेति ।। कृतित्वेन कृतिजन्यत्वस्य न्यायप्राप्तत्वादेवेत्यर्थः ।।

१. चेन्न -मु - च. २.रूपपदं न -छ-ख.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३०७.

गौरवेण चेष्टात्वादिना रूपेणा कारणत्वेनोपाधेरप्रयोजकत्वम् ।।
न १ न्वथापि ज्ञानमनित्यमेव कर्ता शरीर्येवेत्यादिव्याप्तिबाध इति चेन्न । ज्ञानत्वादेनित्यत्वादिना कार्यकारणभावादेरभावेन व्याप्तेरेवाभावात् ।

कार्यकृत्योश्च कार्यकारणभावात् । अन्यथाऽवयवोमहाने २ वेत्यादिव्याप्त्या परमणुरपि न सिध्येत् ।।
अत एवादृष्टाद्वारकानित्यज्ञानाजन्यत्वादिना सत्प्रतिपक्षत्वमपि निरस्तम् ।

अनित्यज्ञानादिमज्जन्यत्वादिरादिपादार्थः -- नेति ।। न भवतीत्यर्थः -- चेष्टात्वादिनेति ।। शरीरत्वारादिपदार्थः ।।
स्यादेतत् कर्ता शरीर्येव ज्ञानमनित्यमेवेत्यादिप्राथमिकव्याप्तिग्रहप्रत्यक्षविरोधात् इत्यादिनोक्तशङ्कोत्तरे निष्कृष्यानुवदति -- नन्वित्यादिना ।। अन्यथेति ।। व्याप्तिप्रयोजककार्यकारणभावस्य साध्येन विना हेतोरनवस्थितत्वादेरनुकूलतर्कस्याभावेपि व्याप्त्यभ्युपगम इत्यर्थः ।। व्द्यणुकं स्वन्यूनपरिमाणद्रव्यापब्धं कार्यत्वाद्घटवदित्याद्यनुमानेन परमाणुसिद्धिर्न स्यात् । योऽभावः स महान् यथा ३ त्र्यणुकादिः । अवयवश्चायं परमाणुरित्यनेन बाधादिति स्यादित्यर्थः ।।
नन्वथापि क्षित्यादिकं नोक्तसाध्यवत् अदृष्टद्वारकानित्यज्ञानाजन्यत्वात् ४ घटवदित सत्प्रतिपक्षत्वम् । असिद्धिनिरासाय हेत्वोरदृष्टद्वारकेत्याद्युक्तिरित्यत आह -- अत एवेति ।। तदेव व्यनक्ति ।

१.नुतथा -मु-च. नन्वपि - क-ख. २.एवकारो नास्ति -छ-ख. ३.द्वय-कुं. ४.शरीरजन्यत्वात् -अ.

---------- ---------- ---------
अप्रयोजकत्वात् । अजन्यत्वस्यै १ व हेतुत्वसम्भवेन व्याप्तिग्रहानौपयिकविशेषणान्तरवैयर्थाच्च ।।

अत एव शशशृङ्गप्रतिबन्ध्यपि निरस्ता । तत्रानुकूलतर्काभावात् ष कत्रैक्यं तु लाघवात् ।।
नन्वनुमितेर्व्यापकांशे व्यापकतापच्छेदकमात्रप्रकारकत्वादिहापि व्यापकः कर्ता व्यापकतावच्छेदककर्तृत्वेन न सि २ ध्येते । एकत्वेन कथं सेत्स्यतीति चेन्मैवं । अनुमितिसामाग्रीमहम्ना तथात्वेपि लाघवतर्कसहकारि ३ रूपप्रमाणसामग्रीमहिम्नाक्यस्य ४ प्रकारत्वेपपत्तेः । तच्चक्षित्यद्युपादानगोचरं ज्ञानादिकं लाघवादेकं नित्यं चेति विषसंकोचकाभावात्कपालघटादिगतरूप---

अप्रयोजकत्वादिति ।।
नन्वेवमयोग्यस्य साधने शशो विषाणवान् पशुत्वाद्गोवदिति शशश्रुङ्गसिद्धिरपि स्यादिति आह -- अत एवेति ।। अप्रयोजकत्वादेवेत्यर्थः । तदेव व्यनक्ति -- अनुकूलेति ।।
नन्वेवं कर्तृमात्रसिद्धावपि तदेकत्वं कुतः सिद्धमित्यत आह -- कत्रैक्यं त्विति ।। तदेव शङ्कोत्तराभ्यां व्यनक्ति -- नन्वित्यादिना ।। अस्तु कत्रैकः तद्गतज्ञानादेरेकत्वादिसिद्धिः कथमित्यत आह -- तच्चेति ।। ज्ञानादिकमित्यन्वयः ।।

१. 'एव ' इति नास्ति -कुं. -ग. २.ध्यतु-मु-च-क. ३.र-ग-ख-कुं. ४.स्वेत्यधिकं-ख.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३०९.
---------- -------- ----------
गुरुत्वादावीश्वरस्यै १ व कर्तृत्वेन रूपाद्युपादानभूतकपालादिगोचरत्वावश्यंभावाच्च सर्वविषयकमेवेति ।।

अत्रोच्यते । अनुपलब्ध प्राक्कोदिषु भूभूधरादिषु कार्यत्वमेव कुतः । सावयवत्वादिति चेत् । सावयवत्वं सांशत्वं चेद्गगनादौ व्यभिचारि २ --

एवमूदितमनुमानं दूषयितुं प्रतिजानीते -- अत्रोच्यत इति ।। 'हेतुविरोधो द्विविधः असिद्धिरव्याप्तिश्चे 'ति भगवत्पादोक्त्या हेतुदोषयोरसि ३ द्धिव्याप्त्यभावयोर्मध्येऽसिद्धेरेव प्राथम्यात् परैरप्यसिद्धविरुद्धेत्यादिप्राचां निर्देशेनासिद्धेः प्राथम्योपगमाच्च । समवेतत्वे ४ सतीत्यादिनाभिमतकार्यत्वहेतोरसिद्धिं तावत् 'किञ्चानुपलब्धप्रक्कोटिषु कार्यत्वं कुतःसिद्धम् 'इत्यादिना तत्वनिर्णयटीकोक्तां प्रपञ्चयति -- अनुपलब्धेति ।। प्रक्कोदिः प्रागभावः ।।
ननु क्षित्यादिकं कार्यं सावयवत्वाद्घटवदित्यनुमानात्तत्सिद्धिः । न च सावयवत्वेनैवोक्तरूपकृतिमज्जन्यत्वं साध्यतां किं मध्ये कार्यत्वसाधनेनेति वाच्यम्। पूर्वोक्तरीत्या कृति ५ जन्यत्वे कार्यत्वस्येव सावयवत्वस्यानुकूलतर्काभावात् कार्यत्वरूपसाध्येन हेतूच्छित्यादिरूपानुकूलतर्काभावदिति भावेनाशङ्क्यते -- सावयवत्वादिति चेदिति ।।
'तर्ह्येवमाकाशादीनामपि कार्यत्वप्रसङ्गात् 'इत्यादिशास्त्रयोनिसूत्रसुधोक्तिं हृदि कृत्वाह -- गगनादौ व्यभिचारीति ।। तदेव व्यनक्ति -- गगनेति ।।

१.एएवकारो नास्ति -मु-च-छ. २.रात् -क. ३.द्वयव्याप्तवो-कुं. ४.त्वदित्यदिना-मु. ५.मज्जन्य-कुं.

---------- ---------- ---------
गग १ नादेः परमाणोश्च संयोगत्वेन सांशत्व २ सिद्धेः । विस्तृतं चैतदन्यत्र । द्रव्यारब्धद्रव्यत्वं चेदकार्यत्ववादिनं प्रत्यसिद्धम् ।

गगनादिः सांशः संयोगित्वात् घटवत् । न चाप्रयोजको हेतुः । तस्येह पक्षी नेह पक्षीत्यबाधितप्रतीत्या गगनादौ व्याप्यवृत्तित्वायोगेन स्वात्यन्ताभावसामानाधिकरणष्ट्वापाव्याप्यवृत्तित्वस्य चैकत्र विरोधेनैकदेशरूपांशवृत्तित्वस्यैव गगनादौ
सर्वत्र व्याप्यवृत्तित्वायोगेनैकदेशरूपांशवृत्तित्वस्यैव वाच्यत्वात् । तस्याप्यौपाधिकत्वेऽनवस्थाद्यापातेन स्वाभाविकांशव्यतिरेकेण संयोगित्वस्यैवानुपपत्तेरिति भावः ।।
नन्वेवं गगनकालपरमाण्वादेरपि संयोगित्वेन सांशत्वे तुल्यन्यायतया ३ शस्यापि संयोगित्वेन सांशत्वं तदंशस्याप्योवमिति परमाण्वंशस्याप्यानन्त्यं स्यात् । तथा च गगनपरमाण्वोस्तुल्यपरिमाणतापत्तिः । किंच परमाणुत्वव्याघातः । अपि चोपादानादिरूपावयवादिरिक्तांशसत्वे मानाभावात् तद्रूपांशवत्वस्य गगनादावप्यभ्युपगमेऽनित्यत्वापेत्तेश्चेत्यत आह । विस्तृतं चैतदन्यत्रेति ।।
'अतः सर्वपदार्थानां भागाःसन्त्येव सर्वदा ।
सर्वदिक्ष्वभिसंबन्धादविभागः पराणुता ।।
इत्याद्यनुव्याख्यासुधायोर्वैशेषिकाधकरणे वस्तृतमित्यर्थः ।

१.नकालादेः -क-च-छ-ख. २.त्वेन-छ-ख. ३.सांश -कुं.

ईस्या-नुक्व-भङ्गः) ईश्वरवादः पु - ३११.
---------- ---------- ----------
द्रव्यसमवेत १ द्रव्यत्वं चेत् २ जात्यादेरिवाकार्यत्वेनाप्युपपत्या अप्रयोजकता । मध्यमपरिमाणत्वं चेत्तदाप्यप्रयोजकतैव -- गगनप्रदेशस्येव सांशत्वेनै ३ व तदुपपत्तेः । अवयवनैरपेक्ष्येणैव मध्यमी ४ भूतपरिमाणाश्रयत्वमात्रेण द्रव्यस्य मध्यमपरिमाणत्वोपपत्तेश्च ।।

सर्षपो यावंतं देशमवष्टभ्य वर्तमानो दृश्यते तावत्येवानधिकतदवयवपरंपरा गगनेप्येवमित्यङ्गीकारे तुल्यपरिमाणतापत्तेः । यतः स्वावयवं विना स्वतन्त्रमनवयवरूपमपकृष्टपरिमाणं नास्ति स परमाणुरित्युक्तेर्व्याघाताभावादित्या ५ द्युक्तेरिति भावः । तथोपादानातिरिक्तांशसत्वादिकं चोपाधिखण्डटीकाभावप्रकाशिकायां विस्तृतमित्यर्थः ।।

जात्यादेरिवेति ।। अद्रव्यस्य जातेरेकत्वसङ्ख्यापरिमाणादेर्द्रव्यसमवेतत्वप्यकार्यत्वे यथा द्रव्यसमेतद्रव्यस्याप्यकार्यत्वमस्तु । विपक्षे बाधकाभावादिति भावः -- गगनप्रदेशस्येवेति ।। यथा इह पक्षीत्यादिप्रतीत्या पक्ष्याद्याधारप्रदेशस्य मध्यमपरिमाणत्वेपि तस्य प्रदेशस्याप्युक्तदिशानेकांशयुतत्वं तथा क्षित्यादेरवयवारब्धत्वरूपकार्यत्वाभावेपि गगन ६ पूर्वोत्तरावधिशून्यानन्तांशयुतत्वाभावेनानेकांशयुतपरमाणुतोऽनेकांशयुतत्वेन च तदुभयपरिमाणान्यपरिमाणरूपमध्यमपरिमाणत्वस्योपपत्तेरित्यर्थः ।।

परिमाणस्यावयवोपचयहेतुकत्वमुपेत्योक्तम् । वस्ततस्तदेव मास्त्वित्याह -- अवयवेति । यथा परमाण्वादाववयवनैरपेक्ष्येणैवाणुपरिमाणं महत्परिमाणं च तथा मध्यमपरिमाणमस्तु ।

१.द्रव्यत्वं चेत् इतिनास्ति -कुं. २.'रूप्यसमवेत' इत्यपि वर्तते -क. ३.द्रव्यसमवेत -ख-ग. ३.'एव' इति नास्ति -छ-कुं. ४.मभू-क-छ-ख. ५.आदिपदं नास्ति -मु. ६.पूर्वोत्तरपदं न -मु.

भूम्यादेरुपलभ्यमाना भागास्तु नारम्यकरूपा अवयवाः किन्तु गगनस्य प्रदेशभेदा इव कालस्य क्षणादय इव चांशा एव सन्तु ।।
अत एव भूमेः खननादिना पूर्वावयवनिनाशेनावयव्यन्तरोत्पत्तेः कार्यत्वं सिद्धमिति निरस्तम् । क्षणादिनाशेन कालस्यापि तत्प्रसङ्गात् ।

प्रदीपगुणे प्रभायां दर्शनात् । न च प्रभा न गुणोपितु द्रव्यमिति युक्तम् । गुणाद्वाऽऽलोकवदितिसूत्रभाष्यटीकाचन्द्रिकासु
तदनुविधानादिना गुणत्वसमर्थनादिति भावः ।।
अवयवनैरपेक्ष्येणेत्या १ द्युक्तप्रमेये प्रत्यक्षबाधमाशङ्क्य निराह -- भूम्यादेरिति ।। नन्वाकाशप्रदेशानां विनाशादृष्टेर्भूम्यवयवानां तदृष्टेर्भूम्यवयवानां तदृष्टेर्वैषम्यमित्यत आह --कालस्येति ।। प्रदेशभेदक्षणलवादीनामौपाधिकत्वे भूम्यवयवा २ नामपि तथात्वमस्त्विति भावः -- पूर्ववयवीति ।। नोदनाभिघातादिनाऽवयवक्रियाद्वारा परमाणुपर्यन्तमसमवादिकारणसंयोगनाशेन पूर्वद्रव्यनाशे सति पुनरदृष्टाधीनपरमाणुसंयोगद्वारा खण्डक्षित्यादिकार्योत्पत्तेः पीलुपाकप्रक्रियासिद्धत्वात्कार्यत्वं सिद्धमित्यर्थः ।।
न चैवं खण्डक्षित्यदौ कार्यत्वसिद्धावप्यखण्डक्षित्यादौ न सिद्धमिति भागासिद्धिरिति वाच्यम् । नाशेन तत्रापि तदनुमानादिति भावः ।।

१.आदिपदं नास्ति - कुं. २.अदित्यधिकं --कुं.

ईस्या-नुकत्वं-भङ्गः) ईश्वरवादः पु - ३१३.
---------- --------- ----------
खनकादेरेव भूम्यादिकर्तृत्वापत्तेश्च । प्रत्यभिज्ञाविरोधाच्च । क्षणभङ्गापाताच्च।।
तदुक्तं भदवत्पादैः 'विपर्ययेणाप्यनुमातुं शक्यत्वात् 'इति ।

अत एवेत्युक्तं व्यनक्ति --क्षणादीति ।। न च क्षणादीनामौपाधिकत्वात्तत्रोपाधिनाश एवेति युक्तम् । विशेषणनाशे विशिष्टस्य नाशात् । अंशानामौपाधिकत्वस्योपाधिखण्डनादौ निरासेन स्वभाविकत्वाच्चेति भावः ।
खननादिना क्षितिनाशोत्पत्यङ्गीकारोऽप्युक्त १ एवेति भावेनाह -- खनकादेरिति ।। तथाचांशतःसिद्धसाधनता स्यादिति भावः ।।
यदत्रोक्तं मणौ 'तत्र क्षितिनाश एव कर्तृत्वं न तु खण्डक्षितौ 'अवस्थितिसंयोगेभ्य एव तदुत्पत्तेः इति । तन्न । तथात्वे खण्डक्षितिनाशेप्यकर्तृत्वापातात् । अनुभवविरोधस्योभयक्ष तुल्यत्वात् ।। एकदेशनाशकर्तृत्वे त्वखण्डक्षित्युत्पत्तिरेव नेति कुतः कार्यत्वं क्षित्यादेरिति भावेनाह -- प्रत्याभिज्ञेति ।। क्षणेति ।। प्रतिक्षणं क्षित्यादौ वाय्वाद्यभिघातादिनैकैकावयवापगमेन प्रतिक्षणं तदपगमनिमित्तनाशोत्पत्त्योरुपेयत्वादिति भावः ।।
एवं सावयवत्वं सांशत्वदिरूपेण विकल्प्य व्यभिचारासिद्ध्यन्यथासिद्ध्य उक्ताः । अस्तु सावयवत्वे यत्किंचित् । अथापि तर्कपराहतिः । सावयवत्वात् क्षित्यादिकं कार्यं चेत् अनुपलब्धप्राक्कोटित्वादकार्यमपि स्याद्गगनवदिति भावेन तत्संवादोक्त्या व्यनक्ति -- तदिति ।। क्षित्यादौ कार्यत्वानुमानं तर्कपराहतमित्येतत् 'न चानुमानात्तत्सिद्धः विपर्ययेणाप्यनुमातुं शक्यत्वात् 'इति तत्वनिर्णये उक्तमित्यर्थः ।।

१.एवेति नास्ति - कुं.

अस्मदाद्यनुपलम्भमानप्राक्कोटित्वेन हेतुना गगनादिदृष्टान्तेनाकार्यत्वस्याप्यनुमातुं शक्यत्वादित्यर्थः ।।
किंच घटादौ दर्शनमात्रेण भूभूधरादेः सावयवत्वेन कार्यत्वानुमाने रूपादौ दर्शनमात्रेण परमाण्वादेः सावयवत्वविपर्ययेण निरवयवत्वेन कार्यत्वानुमानं १ किं
न स्यात् ।।

प्रकृतोपयोगितया तद्वाक्यार्थमाह -- अस्मदिति ।। पूर्ववाक्यस्य तु सावयवत्वानुमानात् क्षित्यादौ कार्यत्वसिद्धिरिति न च वाच्यमित्यर्थ इति भावः ।
एतेन कार्यत्वस्यासिद्ध्युक्तिपरटीका २ मूलरूढेति दर्शितम् ।।
ननु सावयवत्वकार्यत्वयोर्घटादिषु भूयः सहचारदर्शनात्प्राक्कोटिरप्यस्ति क्षित्यादेरित्यनुमीयत इत्यसिद्धो हेतुरिति चेत् तत्किमन्यथानुपपत्तिरूपानुकूलतर्कसहितं सहचारदर्शन केवलं वा । नाद्यः । अन्यथोपपत्तेरुक्तत्वात् । नान्त्यः । अतिप्रसङ्गादित्याह -- किं चेति ।। मूलवाक्यं विवृण्वन्नेवाह -- सावयवत्वविपर्ययेणेति ।। फलितमाह -- निरवयवत्वेनेति ।।
न च गगनादौ व्यभिचारः शङ्क्यः । कार्यातिरिक्तस्य सर्वस्यापि विप्रतिपत्या पक्षत्वात् । अत एव परमाण्वादेरित्युक्तिः । न
च परमाणुकालाकाशादेः कार्यत्वे कारणान्तरमपि तस्योपेयम् तस्याप्येवमित्यनवस्थापत्यादिदोष इति वाच्यम् । बीजाङ्कुरवदुपपत्तेः । प्रलयस्य च निरीश्वरवादिनो संमते। । निरवयवमध्ये कस्य चिदकार्यस्य कस्यचित्कार्यर्योपगमवत् कस्यचित्सावयवस्यैवाकार्यस्याभ्युपेयत्वाच्च ।।

१.'कर्तरि' इत्यधिकं -क. २.अपि इत्यधिकं वर्तते -मु.

एतदप्युक्तम् 'विपर्यणेति '।।
किं च कर्त्रभावेपि कार्यत्वस्य सकारणकत्वमात्रेणोपपन्नत्वेनाप्रयोजकता १ । अन्यथा कर्मादिकारकविशेषाभावेनासनशयनादिकार्यं न स्यात् ।।
कर्मादिकं न सार्वत्रिकम् । कर्ता तु सार्वत्रिक इति चेन्न । तस्यैवाद्याप्यसिद्धेः ।

निरवयं द्रव्यमकार्यमेवेति चेत् निरवयं वस्तु कार्यमेव रूपादिवदित्युपपत्तेः ।।
नन्वववयवाभावे तत्समवेतत्वरूपकार्यत्वं बाधितमिति चेत् । रूपादिवदेवोपपत्तेः ।
द्रव्यस्यायं नियम इति चेत्तस्यैव निरस्यत्वात् । समवायस्याग्रे निरसिष्यमाणत्वेन परि २ माणत्वेनैव कार्यत्वोपपत्तेश्चेत्यादिज्ञेयमिति भावः -- एतदपीति ।। निरवयवत्वेन परमाण्वादेः कार्यत्वानुमानमित्यर्थः ।।
एवं कार्यत्वस्यासिद्धिमुक्त्वा व्याप्त्यभावोपपादनाय 'कारणाभावप्रयुक्तत्वात्कार्याभावस्य 'इत्यादिना टीकोक्तमनुकूलतर्काभावं प्रपञ्चयंस्तदपि मूलारूढं दर्शयति -- किंचेत्यादिना एतदप्युक्तमित्यन्तेन ।। अन्यथेति ।। कर्तृरूपकरकविशेषाभावेन कार्याभाव इत्यर्थः -- आसनेति ।। आस उपवेशने आस्ते शीङ् स्वप्ने शेते भा दीप्तौ भातीत्यादेरकर्मकत्वादसनादिकार्यं कर्मसंप्रदानापादानकारकहीनमिति कर्यं न स्यादित्यर्थः ।।

१.एव इत्यधिकं -छ. २. णामत्वे -अ.

घटादौ दर्शनं तु १ सकर्तृकत्वस्यैव शरीरधर्माधर्मसुखादुःखस्वप्रयोजनापेक्षादिमज्जन्यत्वादेरप्यस्ति ।।
एतदप्युक्तं विपर्ययेणेति '। परानङ्गीकृतशरी २ रजन्यत्वादिनेत्यर्थः ।।

विपर्ययेणेत्यस्य पराङ्गीकृतवैपरीत्येनेत्यर्थमुपेत्याह -- परानङ्गीकृतेति ।। तथा च कार्यत्वस्य शरीरसुखदुःखादिमज्जन्यत्वादिना सहभावदर्शनेपि यथा तत्र कार्यत्वमप्रयोजकं तथा स कर्तृकत्वेपीति भावः । अस्मिन्पक्षे 'न चानुमानात्तत्सिद्धिः 'इति पूर्ववाक्यस्य कार्यत्वानुमानात्सकर्तृकत्वसिद्धिरिति न चेत्यर्थो ध्येयः ।।
ननु लोके सकर्मकाकर्मकादिकार्यं दृष्टिमित्यस्तु कर्मादिहीनमपि कार्यम् । कर्तृहीनस्तु न दृष्टम् । किन्तु कर्तृमदेव । क्षित्यादि तु ३ विप्रतिपन्नम् । न च शरीरादिमत्कर्तृकमपि दृष्टिमित्युक्तमिति वाच्यम् । कृतिं विना कार्यत्वानुपपत्तिवत् शरीरादिकं
विना तदनुपपत्तेरभावात् । कार्यत्वं हि कृतिकर्मत्वम् । ऋहलोर्ण्यदिति ष्यत्प्रत्ययान्तस्य करोतेस्तदर्थत्वात् । न च
कार्यशब्दो रूढः ।
'भवेतां यदि वृक्षस्य वाजिकर्णो कथं च न ।
अदृ ४ ष्टां समुदायस्य कः शक्तिं जातु कल्पयेत् '।।
इति प्रोक्षण्यधिकरणवार्तिकोक्तरीत्याऽवयवार्थसम्भवे समुदायशक्तिकल्पनानुपपत्तेः। अन्यथा प्रोक्षण्यादिशब्दोप्युदकविशेषे रूढ इति स्यादित्यतोऽस्तु नाम कार्यत्वं कर्तृजन्यत्वे प्रयोजकं तथापि त्वदुक्तविशिष्टसाध्येत्वप्रयोजकमेवेत्याह -- किञ्चेत्यादिना ।।

१.तु. इति नास्ति क-ख. 'कर्तृरिव' इति वर्तते -ग. २.रिज-क-कुं. ३.तो -मु. ४. क्लृप्तां - अ.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३१७.

किंचास्तुकृतेः कार्यसामान्यं प्रति हेतुत्वम् । तथापि १ त्वतुक्तस्वजन्येत्यादिबहुविशेषणविशिष्टकृतित्वेन न । किन्तु तद्विपरीतेन लघुना कृतित्वेनैव ।।

न चैवं कपालगोचरकृत्यभावेपि २ पटगोचरकृत्या घटोत्पत्तिः शङ्क्या । घटरूपकार्यविशेषं प्रति कपालगोचरकृतिरूपविशेषस्य हेतुतया तद्रहितायाः सामान्यसामग्र्याः कार्यजनकत्वात् ।।

न चैवं प्रकृतेपि क्षित्युपादानगोचरकृतिरूपकारणविशेषः कल्पत इति वाच्यम् । त्वया कल्प्यमाकृतिविपरीतायाः क्लृप्तायाः क्षितिजनकादृष्टजनककृतेरेवेह विशेषकारणत्वात् ।।

ज्ञानचिकीर्षाकृतिनां प्रत्येकमेव हेतुतया साध्यत्रयोपगमेन मिलितानामहेतुत्वात्कृतेरित्येवोक्तं न तु ज्ञानादेरिति । एवमग्रेपि । तदिति ।। हेतुत्वमित्यर्थः ।।

एतदपि दूषणं मूलारूढमिति भावेन कार्यत्वानुमानात् स्वजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वादिसिद्धर्न चेति पूर्ववाक्यार्थमुपेत्य

विपर्ययेणेत्युत्तरवाक्यस्थविपर्ययशब्दार्थं वदन्नेवाह -- तद्विपरीतेनेति ।। कार्यविशेषं प्रतीति ।। यत्सामान्यन्यायादिति भावः ।।

न चानुमानत्तत्सिद्धिरिति पूर्ववाक्यस्थतत्सिद्धिशब्दार्थं विवृण्वन्नेव शङ्कामनूद्य निराह -- नचैवमिति ।। प्रकृतेपीति ।। क्षित्यादावपीत्यर्थः ।।

उत्तरवाक्यस्थविपर्ययशब्दार्थं वदन्नेव हेतुमाह -- त्वयेत्यादिना ।। क्षितिजनकादृष्टेति ।। हविरादिगोचरजीवकृतेरेवेत्यर्थः । अदृष्टस्य यज्ञादिसत्कर्मजन्यत्वात् ।।

१.न इति अत्रास्ति - मु. तत् इत्यधिकं-छ. २.यत्किंचिद्रो -ग- कुं.

न च कपालगोचरकृतिव्यतिरेकेण घटव्यतिरेक इव क्षित्युपादानगोचरकृतिव्यतिरेकेण क्षितिव्यतिरेको दृष्टः । येन सापि हेतुः स्यात्।

नन्वेवं घटादावपि तज्जनकादृष्टदजनककृतेरेव हेतुत्वमस्तु । न तु कपालगोचरकृतेरविशेषादित्यत आह -- न चेति ।। येन सापीति ।। क्षितिजनकादृष्टजनकहविरादिगोचरजीवकृतिव्यतिरेकेण क्षित्यादव्यतेरेस्तु 'कार्यमात्रेऽदृष्टं हेतुः 'इति
वदतस्तवापि संमत इति तादृशकृतिस्तु स्यादेव हेतुरिति भावः । उक्तं च सुधायाम् 'अदृष्टवतां जीवात्मनामेव कर्तृत्वोपपत्तेः 'इति शास्त्रयोनिसूत्रे ।।
नन्वेवं नेदं सकर्तृकत्वं तथात्वे भोजकादृष्टद्वारा भोक्तृकृतिजन्ये घटादौ भोक्तृकर्तृकत्व व्यवहारापत्तेः । उक्तं च मणौ 'अत एव घटभोक्ता न तत्कर्ता व्यवह्रियत इति 'इति चेन्न । अदृष्टद्वारकघटाद्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमतोपि
तदनुकूलाङ्गचेष्टानिरपेक्षकृतित्वाव्यवहारात् तदनुकूलचेष्टावत्येव तव्यवहारात् त्वदुक्तचेष्टानिरपेक्षकृतिमज्जन्यत्वेपि

सकर्तृकत्वव्यवहारानापत्या सकर्तृकत्वविवादापरिहारेणार्थान्तरतापत्तेः । शरीरचेष्टादिहीनेपि क्षित्यादतर्तरि कर्तृत्वं पारिभाषिकं चेत् अदृष्टद्वारा क्षित्यादिजनककृतिमत्यपि कर्तृत्वं
पारिभाषिकमेवास्त्विति भावः ।।
नन घटादावुपादान १ व्यतिरेकेण घटादिव्यतिरेकदृष्ट्या तादृशकृतिमति कुलाले मुख्यकर्तृत्वोपपत्तेरिहापि क्षित्याद्युपादानकृतिमान् मुख्य एव कर्ता स्यादित्यत आह -- घटादाविति ।।

१. कृतिपदं नास्ति - कुं.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३१९.
---------- --------- ---------
घटादौ दर्शनमात्रेण तत्कल्पने च त्वदुक्तचेष्टानिरपेक्षकृतिविपरीता चेष्टा द्वारककृतिरेव कल्प्या स्यात् ।।
एवं च कृतेः कारणतावच्छेदककृतित्वेनैव जनकता साध्यते १ चेदस्मदादिकृत्या सिद्धसाधनम् । तन्निवृत्यर्थं स्वजन्येत्यादिविशेषणोपादानेऽप्रयोजकता । तेन रूपेण कृतेरकारणत्वात् ।।

न चानुमानात्तत्सिद्धिरिति पूर्ववाक्यार्थानुवादो -- घटादौ दर्शनमात्रेण तत्कल्पने चेति ।। स्वोपादानगोचरकृतिकल्पने चेत्यर्थः । क्षित्यादाविति योज्यम् । उत्तरवाक्यस्थविपर्ययशब्दार्थं वदन्नेवापाद्यमाह -- त्वदुक्तेति ।। चेष्टाद्वारककृतिरेवेति ।।
ननूक्तमत्र घटादौ कार्यविशेषे चेष्टाद्वारककृतिदृष्टावपि यत्सामान्यविशेषन्यायेन कार्यसमान्ये कृतित्वेन हेतुत्वादिति चेन्न ।

क्लृप्तया क्षितिजनकदृष्टजनककृत्यैवौपपत्तावक्लृप्तकृतिकल्पनस्यैव बाधकत्वेन बाधकाभाव इत्यस्यासिद्धेरिति भावः ।।
छलोत्तरत्वनिरासायानुमानदोषं निष्कृष्याह -- एवं चेति ।। दर्शनमात्रस्यातिप्रसञ्जकत्वे सतीत्यर्थः -- अकारणत्वादिति ।। घटादौ दर्शनमात्रस्य शरीरचेष्टाद्यतिप्रसञ्जकत्वात् यत्सामान्यविशेषान्यायस्या २ क्लृप्तानेकादृष्टकल्पनाप्रसङ्गबाधितत्वेनाग्रे दूष्यत्वेन चानवतारादि भावः ।।

१. ध्याचेत् - कुं. २.स्यक्ल - कुं.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३२०.

किंचोपादानशब्दो यदि यत्किंचिदुपादानपरस्तदा शब्दफूत्कारादौ सिद्धसाधनम् । तस्यापि यत्किंचित्प्रत्युपादानभूतमृदङ्गादिगोचरास्मदादिनिष्ठज्ञानादिजन्यत्वात् । यदि तु सर्वलोकसिद्धव्युत्पत्यनुसारेण समभिव्याहृतपरस्तदोपादानशब्दार्थीभूतसमायिकारणे लाघवात्समवायिका १ रणभागत्यागेन ---

नन्वस्तु तर्हि उपादानागोचरेत्याद्येव साध्यमित्यतः 'कार्यसामान्यं हि कारणसामान्यायत्तम् 'इति टीकां हृदि कृत्वा पराभिमतसाध्यं निराह -- किंचोपादानेत्यादिना ।। सिद्धेति ।। अंशतःसिद्धसाधनमित्यर्थः।।
न च तत्र ज्ञानेच्छयोर्न कारणत्वम् । किं तु कृतिमात्रस्यैव मिलितानां तेषां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वादिति वाच्यम् । ज्ञानादिघटितं साध्यत्रयमेवेदमिति मणिकृदभिमतत्वेनोक्तदोषापिरिहारात् ।।

यतत्रोक्तं ठक्कुरादावुपादानगोचरत्वेन यस्य ज्ञानादेर्जनकत्वं तादृशज्ञानादिजन्यज्ञानं साध्यम् । तेन च रूपेण
स्वविषयसमवेतकार्यंप्रत्येव जनकत्वान्न दोषः । स्वजन्या २ दृष्टेत्यादिविशेषणं तु का ३ लीरूपेंऽशतःसिद्धसाधनतावारणायेति । तन्न । वक्ष्यमाणदिशा लाघवेन कारणगोचरज्ञानादित्वेन जनकतयोक्तरूपेण जनकत्वस्य क्वाप्यकल्पनात् ।।
यत्किञ्चिदिति ।। स्वगतरूपाधिकं प्रतीत्यर्थः । मृदङ्गादीत्यादिपदेन ताल्वादिग्रहः -- उपादानशब्दार्थीभूतेत्यादि ।। वेदान्तिमत इव परीणामिकारणानङ्गीकारात्समवायिकारणेत्युक्तम् ।

१.कारणपदं नास्ति - च-क-ख-ग. २.न्येत्यादि -कुं. ३.र्यरु -मु.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३२१.

क्षित्यधिकं प्रति त्वदुक्तविपरीतक्षित्यादिकारणगोचरकृतित्वेनैव
कारणत्वग्रहात्तथाभूतकरणसाधनेपि सिद्धसाधनमेव । क्षितिजनकादृष्टजनकज्ञानादेरदृष्टद्वारा क्षितिजनकहविरादिविषयत्वात् । न च हविरादि क्षितिं प्रति प्रयोजकमेव न तु कारणमिति वाच्यम् । तत्रा १ पि कारणशरीरप्रविष्टानन्यथासिद्धभागत्यागेन त्वदुक्तविपरीतनियतपूर्वव २ र्त्तिरूपप्रयोजकगोचरकृतित्वेनैव हेतुत्वेऽतिलाघवात् ।

स्वोक्तदोषं मूलारूढं दर्शयितुं न चानुमानात्तत्सिद्धिरिति पूर्ववाक्यस्य क्षित्याद्युपादानगोचरज्ञानादित्वेन तज्जन्यत्वसिद्धिर्न चेत्यर्थमुपेत्योत्तरवाक्यस्य विपर्ययशब्दार्थमाह -- त्वदुक्तेति ।। कारणत्वग्रहादिति ।। घटादौ लाघवेन घटादिकारणगोचरकृतित्वेनैव कारणताग्रहात् क्षित्यादावपि तथैव कारणत्वकल्पनादित्यर्थः ।.

अस्तु तथैवोपादानपदं कारणमात्रपरम् । तावतापीश्वरसिद्धे ३ रित्यत आह -- तथाभूतेति ।। क्षित्यादिकारणगोचरकतित्वेन रूपेण कृतिरूपकारणसाधने ४ चेत्यर्थः । उक्तरूपज्ञानवज्जन्यं चिकीर्षावज्जन्यमित्यत्राप्येवं दोषो ध्येय इति भावेन कृतिमात्रस्य प्राग्व्वयहारेपि ज्ञानादेरित्युक्तम् । न चैतदर्थमेव स्वजन्यादृष्टेत्यादि विशेषणमुक्तमिति वाच्यम् । तत्पक्षेऽप्रयोजककत्वदोषस्य हेतावुक्तत्वादिति भावः -- प्रयोजकमेवेति ।। घटे कुलालपितृवदिति भावः । मूलारूढताप्रदर्शनाय त्वदुक्तविपरीतेत्युक्तिः । एवमग्रेपि -- प्रयोजकगोचरेति । त्वदुक्तेत्यर्थः ।।

१.था-ग-कुं. २.वृत्ति-छ.ख-कुं. ३.द्धि-अ. ४.नेपी-मु-'च' इति नास्ति-अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३२२.

यच्चोक्तं विशेषयोरनन्वयव्यतिरेकेण वा कारणत्वेन वा सामान्योरपि कारणत्वमिति । तत्र च न तावदाद्यः । अन्वयव्यतिरेकचोस्त्वदुक्तविपरीते स्वसमानप्रकारककार्यकारणभावग्रह एव सामर्थ्यस्य क्लृप्तत्वात् । अधिक १ सामर्थ्यकल्पनायां च बीजाभावात् ।

ननु यदुक्तं क्षित्याद्युपादागोचरकृतिव्यतिरेको न दृष्टः । येन सा पि हेतुरिति । तन्न । विशेषयोरन्वयादिदृष्ट्या सामान्ययोरपि तत्कल्पनादित्यत आह -- यच्चोक्तमिति।। नन्विदमित्यप्रयोजकमित्यादिशङ्कोत्तररूपपूर्वग्रन्थ इत्यर्थः -- त्वदुक्तविपरीत इति ।। घटकुलालकृत्योरन्वयादिना कार्यसामान्यकृतिसामान्ययोः कार्यकारणभाव इति यत्वदुक्तं तद्विपरीते

घटत्वकुलालकृतित्वरूपान्वयव्यतिरेकप्रकारसमानप्रकारकार्यकारणभाव एव सामर्थ्यमित्यस्य दण्डघटादौ निर्णीतत्वादित्यर्थः ।।
बीजेति ।। ननु बाधकाभाव एव बीजमिति चेन्न । तादृशसामर्थ्यकल्पनायामनेकादृष्टकल्पनस्यैव बाधकत्वात् । घटादावदृष्टस्य
हस्तचेष्टानिरपेक्षकृतिजन्यत्वनित्यसर्वविषयज्ञानादिजन्यत्वादेरनेकस्य कल्प्यत्वात् । क्लृप्तसामर्थ्यमात्रस्वीकारे तु लाघवात् । अन्यथा तन्तुरूपयोरन्वयव्यतिरेकाभ्यां कार्यगतरूपसामान्यं प्रति कारणतरूपसामान्यं कार्यगतगुणमात्रं प्रति
कारणगतगुणमात्रं कारणमिति वा कल्प्यं स्यात् । २ तत्र यद्यद्बाधकमुपनिपतति तत्सर्वमपि तदनुगुणप्रक्रियाकल्पनया परिहार्थं स्यादिति भावः ।।

१.केसा - छ-कुं. २.'तत्र' इति एकमेव वर्तते -मु.अ.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३२३.
---------- ---------- ------
नापि द्वितीयः विमते सामान्यं कर्यकारणभावापन्ने बाधकं विना कार्यकारणभावापन्नविशेषसंबन्धित्वात् । धूमवह्निसामान्यवदित्यत्र व्यतिरेकावच्छेदकरूपवत्वस्यै १ वोपाधित्वात् । न च साधनव्यापकता । त्वत्पक्षे कृतित्वस्य देशतः कालतश्च व्यतिरेकहितेश्वरकृतिवृत्तित्वेन व्यतिरेकानवच्छेदकत्वात् ।

सामान्ये इति द्विवचनान्तम् । कार्यसामान्यकृतिसामान्ये इत्यर्थः -- बाधकं विनेति ।। सामान्ये व्यभिचाररूपबाधकं विनेत्यर्थः ।

यद्धर्मवत्वेनोपस्थितयोः २ विशेषयोः कार्यकारणभावस्तद्धर्मालिङ्गतत्वं तत्संबन्धित्वं ध्येयम् । घटकुलालयोः
कार्यकारणभावे कार्यसमान्यपुरुषसामान्ययोः प्रमाणवाक्यत्वेन वक्तृवाक्यार्थप्रमात्वेन कार्यत्यादिकल्पनेऽपि वाक्यसामान्यवक्तृज्ञानसामान्ययोश्च तदभावद्व्यभिचारवारणाय बाधकं निनेति -- व्यतिरेकेति ।। अत्र रूपशब्दो धर्मपरः । धमसामान्यवह्निसामान्ययोः कार्यकारणभावो हि न तादृशधूमविशेषवह्निविशेषसंबन्धित्वनिबन्धनोऽपितु यत्र वह्न्यभावस्तत्र धूमाभाव इति व्यतिरेकं प्रत्यवच्छेदक ३ भूतवह्नित्वधूमत्वाख्यधर्मवत्वनिमित्त एव । कार्यकारणभावापन्न घटदण्डादिस्थले सर्वत्र तथा दर्शनेन ४ साध्यव्यापकत्वं व्यक्तमिति साधनव्यापकत्वं व्यनक्ति ४ -- न चेत्यादिना ।।
व्यतिरेकावच्छेदकरूपवत्वस्यैव कारणयायां तन्त्रत्वे शब्दसमवायिकारणतयाऽऽकाशसिद्धर्न स्यात् । ५ तथा ज्ञानादिसमवायिकारमत्वेन आत्मसिद्धश्च न स्यात् ५ । परत्वापरत्कारणतया देशकालसिद्धश्च न स्यात् ।

१.एवकारो नास्ति - च-छ-क-ख. २.विशेषयोरिति नास्ति -कुं. ३.भूतपदं नास्ति -अ. ४.'नात्। साध्यव्यापकत्वं व्यनक्ति' इत्यस्ति-कुं. ५.इयं पङ्क्तिर्नास्ति - अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३२४.
---------- ---------- ---------
न चैवमाकाशाद्यसिद्धिः । साक्षिणैव तत्सिद्धेः । शब्दादिकारणत्वेन तदसिद्धावपि गुणस्य समवेतत्वव्याप्त्या शब्दसमवायिकारणत्वेनैव तत्सिद्धेश्च ।

तेषां नित्यविभुत्वेन व्यतिरेकावच्छेदकरूपवत्वाभावादित्याशङ्क्य निराह -- न चैवमिति ।। साक्षिणैवेति ।। आत्मस्वरूपज्ञानरूपेण साक्षइणैवेत्यर्थः । शब्दज्ञानाविधउरजातिबधिरादेरप्याकाशप्रतीत्या शब्दकारणतयैवाकाशधीरिति नियमाभावात्साक्षिणैवेत्युक्तम् ।।
विवृतं चैतत् ।
'सत्यत्वं गगनादेश्च साक्षिप्रत्यक्षसाधितम् ।'
इत्याद्यानुमानिकपादीयानुव्याख्यानसुधयोर्वादावल्याञ्चेति भावः ।।
किंच 'द्र १ व्यकारणत्ववत् समवायिकारणत्वं विशिष्टंम न ग्राह्यं किंतु समवायित्वसमानाधिकरणं कारणत्वमेव समवायिकारणत्वम् । तथा च 'उभयग्राहकसमाजादुभयग्रहे २ अर्थसमाज 'इति पक्षधाद्युक्तेः केवलसमवायित्वग्राहकोपनिपातेन तन्मात्रेस्यापि ग्रहणसम्भवादिति भावेन साक्षिणि विप्रतिपन्नं प्रत्यन्यथाप्याकाशसिद्धमाह -- शब्देति । समवायित्वेनेति । समवायवृत्या शब्दाश्रयत्वेनेत्यर्थः । शब्दः क्वचिदाश्रितः गुणत्वादिति सामान्यतस्तदाश्रयसिद्धौ ३ शब्दोष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टग्व्यवृत्तित्वे बाधकोपपन्नत्वे सत्याश्रितत्वादिति सामान्यपिरशेषाभ्यां
शब्दादिसमवायित्वेनैव सिद्धिसम्भवादिति ४ भावः ।।
समवायिकारणत्वं विशिष्टमेव ग्राह्यमिति मतेपि तेन ५ रूपेणाकाशसिद्धिप्रकारं मण्युक्तमेव दर्शयति --निमित्तेति ।।

१.'व्ये सम' इत्येव वर्तते -कुं. २.वार्थः समा -मु. नार्थः समा-अ. ३.शब्दपदं न - कुं. ४.त्यर्थः -अ. ५.'स्व'
इत्यधिकं -कुं.

---------- ---------- ---------

निमित्तकारणताग्रहे यत्र यदा न दण्डस्तत्र तदा न घट इति संसर्गाभावरूपस् व्यतिरेकस्य तन्त्रत्वेपि समवायिकारणत्वग्रहे यन्न समवायिकारणं तत्र न कार्यमित्यन्योन्याभावरूपव्यतिरेकस्यैव तन्त्रत्वेन शब्दसमवायिकारणत्वेनापि तत्सिद्धिसम्भवाच्च । न च समवायिभिन्न इव त्वन्मते कृतिविषयिभिन्नः प्रसिद्धः । येन कृतेरप्यन्योन्याभावरूपव्यतिरेकेण कारणता गृह्यत । सर्वस्यापीश्वरकृतिविषयत्वात् । पारिमांडल्यस्यापि स्वनिष्ठघटाभावसाक्षात्कारँ प्रति संयुक्तसमवेतविशेषणतारूपप्रत्यास १ त्यन्तर्भूततया हेतुत्वेनेश्वरकृतिविषयत्वात् ।

आदिपदेन व्याप्त्यसमवायिकारणग्रहः -- संसर्गाभावरूपस्येति ।। निमित्तकारणकार्ययोराश्रययिभावाभावात् संसर्गाभावस्य तन्त्रत्वमिति भावः ।।

नन्वेवं चेदीश्वरकृतिसिद्धिरप्येवमस्तु । यन्न कृतिविषयः न तत्र कार्यमित्यन्योन्याभावरूपव्यतिरेकेणैव कृतिकार्ययोः कार्यकारणत्वग्रहसम्भवेन क्षितिरूपकार्यानुकूलकृतिसिद्धिरित्यत आह - न चेति ।। सर्वस्यापीति ।। ईश्वरकृतेः कारणमात्रविषयकत्वात् सर्वस्यापि यत्किंचित्प्रतिकारणत्वादिति भावः।।

नन्वस्त्वात्मकालकाशादेरपि स्वगतगुणोपादानतयेश्वरकृतिविषयत्वम् । परमाणुपरिमाणस्य पारिमाण्डल्यशाब्दितस्य किंचित्प्रत्यप्यकारणत्वात् । तत्र यन्न कृतिविषयो न तत्र कार्यमिति व्यतिरेकग्रहः सुशक इत्यत आह- - पारिमाण्डल्यस्यापीति ।। व्द्यणुकगतह्रस्वपरिमाणस्याप्युपलक्षणं ध्येयम् -- योग्यप्रतियोगिकत्वादेरपि ।।

१. त्ति भू - छ - क -ख.

न च तत्र घटाभावो न प्रत्यक्षः । अभावप्रत्यक्षत्वप्रयोजकत्वेन त्वदुक्तस्य योग्यप्रतियोगिकत्वादेस्तत्रा १ पि सत्वात् । एवं च त्वतुक्तदेशकालापरिच्छिन्नकृतिजन्यत्वविपरीतपरिच्छिन्निकृतिजन्यत्वेनाप्यनुमितिः स्यात् ।।

यच्चोक्तमुपादानज्ञानं साक्षात्कारत्वेनैव २ हेतुरिति ----

अन्योन्याभावप्रत्यक्षे ह्यधिकरणप्रत्यक्षं तन्त्रम् । न त्वभावप्रत्यक्षमात्रे । अभावप्रत्यक्षे हि प्रतियोगियोग्यत्वं वा यत्र यत्सत्वमनुपलब्धविरोधीत्युक्तदिशा
प्रतियोगिसत्वप्रसञ्जनप्रसञ्जितप्रतियोगकत्वरूपमनुपलब्धेर्योग्यत्वं वा तन्त्रम् । तच्च पारिमांडल्यादावभावग्रहेप्यस्तीति स्यादेवाभावः प्रत्यक्ष इत्यर्थः ।।

न द्वितीय इत्यादिनोक्तं दोषं 'विपर्ययेणाप्यनुमातुं शक्यत्वात् 'इति मूलारूढं कुर्वन्नेव निष्कृष्य दर्शयति -- एवं चेति ।। बाधकाभावेन व्यतिरेकरूपवत्वस्य कारणत्वे तन्त्रत्वे सतीत्यर्थः -- परिच्छिन्नेति ।। असर्वविषयानित्यर्थः । तथाच कार्यत्वहेतुरप्रयोजक इति भावः ।।

एवं पराभिमतकृतिजन्यत्वांशे कार्यत्वहेतोरप्रयोजकत्वमुक्त्वा अपरोक्षज्ञानजन्यत्वांशेप्यप्रयोजकत्वमिति भावेन कृतेरपरोक्षज्ञानपूर्वकत्वं प्रागुक्तं निराह -- यच्चोक्तमित्यादि ।। हेतुरिति ।। कपालादिकृतावित्यर्थः ।। तथाच क्षित्यादिनिष्ठकार्यत्वहेतोर्व्यापकतया क्षित्यादिजनकमपीश्वरज्ञानपरोक्षमेव सिद्ध्यतीति
यदुक्तमित्यर्थः -- त्वन्मते चेष्टेत्यादि ।।

१.अपिपदं नास्ति -ग-कुं. २.'कृति' इत्यधिकं - छ-क-ख-ग.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३२७.

-- १ तदपि न । त्वन्मते चेष्टोपादानस्य वायवीयशरीरस्याप्रत्यक्षत्वेपि तदधिष्टातुरात्मनश्चेष्टाहेतुकृतेरावश्यकत्वेन
त्वदुक्तापरोक्षज्ञानत्वविपरीतेन ज्ञानत्वेनैव कृतिहेतुत्वात् । परमाण्वादिपरोक्षज्ञानेन कृत्यभावस्तु न साक्षात्वविरहात् । किं तु कृतियोग्यताप्रयोजकदेशकालविशेषसत्वविषयकत्वविरहात् । अत एवान्धस्याप्ताक्यादिना देशकालविशेषहेयोपादेयज्ञाने सति हानोपादाने युक्ते । यच्च कपालदृष्टान्तेन कारणीभूतसंयोगाश्रयत्वेनात्मनः --------

वायवीयशरीरादावुपादानापरोक्षज्ञानाभावेपि चेष्टाहेतुतया कृतिसत्वेनापोक्षत्वस्य कृतौ व्यभिचारादिति भावः ।।
तर्हि परमाण्वाकाशादिगोचरलिङ्गादिजन्यज्ञानेनापि तद्गोचरकृतिः स्यादित्यत आह -- परमाण्वादीति ।। देशेति ।। कपालादेरिव देशविशेषे कालविशेषे सत्वाभावादित्यर्थः । परमाणोर्नित्यत्वेन कालविशेषसत्वं नास्ति गगनादौ तु देशविशेषसत्वं नेति न तत्र कृतिरिति भावः -- अत एवेति ।। ज्ञानत्वेनैव कृतिहेतुत्वादेवेत्यर्थः -- हेयेति ।। तत्र सर्पोस्ति अत्र रजतमस्तीति ज्ञाने सतीत्यर्थः ।.
नन्वस्त्वपरोक्षज्ञानवत्वसिद्ध्यभावस्तथापि कुलालवत्कार्यहेतुतया स्यादेवेश्वरसिद्धिः । कुलेले घटहेतुत्वस्य प्रागेव साधनादित्यतः प्रागुक्तं दृष्टान्ते साध्यवैकल्योद्धारमनूद्य निराह -- यच्चेति ।। घटकारणीभूतसंयोगाश्रयस्य कपालस्य घटकारणत्वदर्शनादितिग्रन्थेनोक्तमित्यर्थः -- लघुन इति ।।

१.तन्न - ग.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३२८.

-- कारणत्वसाधनं १ तन्न । कपालादेः कारणत्वे त्वदुक्त विपरीतस्य लघुनः कार्याश्रयत्वस्यैव तन्त्रत्वात् ।

कार्यासमवायिकारणसंयोगाश्रयत्वापेक्षया कार्यश्रयत्वस्य लघुत्वात् । तथा चात्मनस्तदभावापन्न घटहेतुत्वमिति दृष्टन्तः साध्यविकल एवेति भावः । न च भुतकालादेरपि घटकारणत्वप्रसङ्गः। समवायवृत्या तदाश्रयत्वस्याभिमतत्वात् ।।
एतच्चाभ्युपेत्योक्तम् । वस्तुतस्तु समवायस्याग्र निरसिष्यमाणतया ।।
'तन्तुभ्योन्यः पटः साक्षात्कस्य दृष्टिपथं गतः '
इति स्मृत्या संयोगाविशेषवशिष्टकपालद्वयातिरिक्तघटस्यैवाभावादृष्टान्तासिद्धिः।।
किं च संयोगस्य हेतुत्वोपगमेपि तदवच्छदकत्वेनान्यथासिद्धत्वादात्मनो न हेतुत्वम् । न चैवं चेष्टाद्वारा घटहेतुप्रयत्नवदात्मसंयोगावच्छेदकत्वेनात्मनोन्यथासिद्धौ तत एव प्रयत्नस्याहेतुत्वमिति युक्तम् । प्रयत्नस्य स्वतन्त्रान्वव्यतिरेकाभ्यामेव हेतुत्वेन तस्य तादृशसंयोगविशेषणत्वनिबन्धनत्वाभावात् । प्रयत्नवदात्मसंयोगस्य हेतुत्वेन मनाभावाच्च । येन तदाश्रयतयाप्यात्मा हेतुः स्यात् । स्वव्यधिकरणतदीयगुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वं तु मन्त्रपाठजन्यविषच २ लने मन्त्ररूरशब्दगुणकाकाशसंयोगासमवायिकारणत्वहीने स्वव्यधिकरणमन्त्ररूपाकाशीयगुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपहे तुमति व्यभिचारि । तथा

तुलायामेकदिगवस्थिताधकगुरुत्वजन्यापरदिगवथितोन्नमनक्रियायां च व्यभिचारि ।

१.तत्र - छ - क - ख. २.हाने - अ.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३२९.

यच्चोक्तं ज्ञानमनित्यमेवेत्यादि व्याप्तिरमूलेति तन्न ।

न च तत्रापि साध्यमस्तीति वाच्यम् । विप्रतिपत्तेः । न च क्रमेण स्थलद्वये व्यभिचारवारणायादृष्टाद्वारकेति प्रत्यक्षेति च गुणविशेषणम् । मन्त्रस्त्वाशुतरविनाशित्वाददृष्टद्वारैव विषचलनहेतुः गुरुत्वगुणश्च न प्रत्यक्ष इति वाच्यम् । तथात्वे स्वव्यिधिकरणपदवैयर्थ्यापत्तेः । प्रत्यक्षपदेनैव प्रागुक्ततत्कृत्यलाभाददृष्टवदात्मसंयोगस्य कारणताभङ्गप्रसङ्गाच्च । चेष्टायामात्मकारणत्वप्राप्तवपि घटं प्रत्यात्मनः कारणत्वासिद्धेश्च ।।
एतेन मूर्तवृत्तियत्कार्यं यदियगुणनिमित्तकारणकं तत्तत्संयोगजन्यमिति व्याप्त्या संयोगकारणत्वसिद्धिः । अत्र शब्दजन्ये गगनसंयोगजन्ये शब्दगोचरप्रत्यक्षे व्यभिचारनिरासाय मूर्तेति । तन्तुरूपजन्ये तन्तुसंयोगाजन्ये पटरूपे तन्निरासाय निमित्तेति । दण्डावयवीयदण्डनिमित्तके दण्डावयवसंयोगाजन्ये घटे तद्वारणाय गुणेति पदमिति रुचिदत्तोक्तं निरस्तम् । पूर्वोक्तोन्नमनक्रियायां व्यभिचारादित्यलम् ।। नन्वस्तूपादानगोचरज्ञानं ज्ञानत्वेनैव कृतिहेतुर्न त्वपरोक्षत्वेन । अस्तु च घटादौ कुलालकृत्यादेरेव हेतुतया कुलालस्याहेतुत्वेन तद्दृष्टान्तेश्वरस्या च क्षित्यादिहेतुतया सिद्ध्यभावः । तथापि तादृशज्ञानं कार्यत्वहेतोः पक्षधर्मताबलान्नित्यमेव सिध्यतीति तदाश्रयतयेश्वरसिद्धिर्भवतु को दोषः ।

न च ज्ञानमनित्यमेव साक्षात्कारस्त्विन्द्रयजन्य एव इच्छा ज्ञानजन्यैव कृतिरिच्छाजन्यैवेत्यादिव्याप्तिबाधः । ज्ञानत्वानित्यत्वयोः कार्यकारणभावादेरभावेन व्याप्तेरमूलत्वात् । कार्यकृत्योश्च कार्यकारणभावादित्युक्तत्वादित्यतस्तन्निराह -- यच्चेति । यथाहि कृतिचजन्यत्वमेव प्रयोजकं लाघवात् न तु शरीरजन्यत्वादिकमित्युच्यते तथा आत्मविशेषगुणत्वादिरेव मनःप्रभृतिकारणजन्यत्वे प्रयोजक इति आत्मविशेषगुणत्वस्येश्वरीयज्ञानेच्छाकृतिषु तिसृष्वपि सत्वात् । साक्षात्कारत्वेच्छात्वकृतित्वरूपधर्मत्रयस्यापीश्वरीयज्ञानादौ प्रत्येकं सत्वेन च मनःप्रभृतिकारणजन्यत्वापत्त्या अनित्यत्वस्य दुर्वारत्वादिति भावः ।।

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३३०.

लाघवेन कृतिजन्यत्वे जन्यत्वस्यै १ व मनोजन्यत्वे आत्मविशेषगुणत्वस्यैव इन्द्रियजन्यत्वे साक्षात्कारत्वस्यैव ज्ञानजन्यत्वे इच्छात्वस्यैव इच्छाजन्यत्वे कृतित्वस्यैव तन्त्रत्वेन व्याप्तेः समूलत्वे त्वदुक्तविपरीतस्येश्वरज्ञानाद्यनित्यत्वस्या २ नुमातुं शक्यत्वात् ।।
न चास्या व्याप्तेरस्मदादिज्ञानादिमात्रवषयकत्वात्कार्यत्वानुमानेन च पक्षधर्मताबलादस्मदादि भिन्नकर्तृसिद्ध्या भिन्नवषकत्वादप्रतिबन्धकतेति वाच्यम् ।

सङ्ख्यापिरमाणाद्यात्मसामान्यगुणे मनोजन्यत्वाभावाद्विशेषगुणत्व ३ स्येत्युक्तम् । मनोजन्यत्वं च मनस्त्वेन रूपेण तज्जन्यत्वं ध्येयम् । तेन मनःक्रियायामात्ममनः
संयोगादौ च मनोजन्ये नाव्याप्तिदोषः । एवं ज्ञानजन्यत्व इत्यादिना तज्जन्यत्वं ध्येयम् ।।

'वयं तु ब्रूमः पक्षधर्मताबलान्नित्यत्वं सिध्यति 'इत्यादिना मण्युक्तमेवाशङ्क्य निराह - न चास्या व्याप्तेरिति ।। ज्ञानमनित्यमेव साक्षात्कार इन्द्रियजन्य एव इजच्छाज्ञानजन्यैवेत्यादिव्याप्तेरित्यर्थः -- मात्रेति ।। पक्षधर्मताबललभ्याप्रसिद्धज्ञानाद्यविषयकत्वादित्यर्थः -- ४ कर्त्रिति ।। अपरोक्षज्ञानचिकीर्षाकृतिमत्पुरुषसिद्ध्येत्यर्थः ।

१.स्थलचतुपष्टयेपि 'एव' इति नास्ति -ख. २.अपि इत्यधिकं - ख -ग. ३.णस्ये - अ. ४.कृतीति - अ.

सामान्यप्रत्यासत्याभ्युपगमे समानविषयकत्वात् । तदनभ्युपगमे स्थापनानुमानव्याप्तेरप्रसिद्धकर्तुसाधकत्व इवास्या अपि व्याप्तेस्तद्बा १ धकत्वे समानप्रकारकत्वस्यैव तन्त्रत्वात् । अन्यथा बाधसत्प्रतिपक्षाव २ प्यप्रतिबन्धकौ स्याताम् । प्रत्यक्षादिसिद्धाभावप्रतियोगि यच्छैत्यम् तदन्यस्यैव शैत्यादेः पक्षधर्मताबलात्सिद्धिरिति तत्रापि सुवचत्वात् । अदृष्टद्वारकशरीरजन्यत्वमुपाधिश्च ।

किमेतद्भिन्नविषयत्वं यत्र धूमस्त्वाग्निरिति महानसादौ धूमवह्न्योर्व्याप्तिग्रहः सामान्यप्रत्यासत्या पर्वतादिपक्षनिष्ठधूमवह्नी अपि विषयीकरेतीति त्वन्मतरीत्योच्यते, अथ सामान्यप्रत्यासत्तेरभावात् अन्यत्र जायमानव्याप्तिग्रहः पक्षीयहेतुसाध्येनावगाहते तथापि समानप्रकारकत्वमात्रेण पक्षीयहेतुसाध्ययोर्लिङ्गलिङ्गिभावे नियामक इति मीमांसकरीत्योच्यत, इति विकल्पौ हृदि कृत्वा क्रमेण निराह -- सामान्येति ।। समानेति ।। कार्यत्वकृतिजन्यत्वरूपसमानप्रकारकत्व ४

स्यच ज्ञानत्वानित्यत्वरूपसमानप्रकारकत्व ५ स्यते ४ त्यर्थः -- अन्यथेति ।। उक्तव्याप्तेरबाधकत्व इत्यर्थः ।।
बाधादेरप्रतिबन्धकत्वं व्यनक्ति -- प्रत्यक्षेति ।। वह्निः शीतो वस्तुत्वादित्यादौ यत्पक्षधर्मताबललभ्यं शैत्यं तदन्यस्यैव शैत्यस्याभावः पक्षीभूतवह्निव्यति ६ रिक्ते गृहीत इति पक्षीभूतवह्नावेव वा यदि शैत्याभावो गृहीतः -----

१.द्वन्ध-ख. २.'अपि' इति नास्ति -ख. ३.धर्मपदं न -ख. ४.एतावन्नास्ति -अ. स्यैव-कुं. ५.स्येव ज्ञानत्वनित्यत्वरूपसमानप्रकारकत्वस्यैवेत्यर्थः -- कुं. ६.रेके-अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३३२.

न चायं पक्षधर्ममात्रव्यावर्तकविशेषणवत्वात्साधनघटितत्वाद्व्याप्तिग्राहकतौल्येन हेतुसमानयोगक्षेमत्वाच्चानुपाधिरिति वाच्यम् ।

-- तदापि त्वगिन्द्रियगृहीताभावप्रतियोगिशैत्यादन्यदेवे १ दं साध्यमानं शैत्यमिति वक्तुं शक्यत्वादित्यर्थः ।।
एवं कार्यत्वानुमानेऽसिद्ध्यप्रयोजकत्वबाधानुक्त्वोपाधि २ ञ्चाह -- अदृष्टेति ।।
क्षित्यादेरदृष्टद्वाराऽस्मदादिशरीरजन्यत्वात्साधनाव्यापकत्वायादृष्टाद्वारकेति शरीरेति च विशेषणम् । घटादौ साध्यव्यापकत्वं व्यक्तम् ।।
उपाध्याभासोयमित्याशङ्क्य निराह -- न चायं पक्षमात्रेति ।।

तादृशस्याप्युपाधित्वे पर्वतेतरत्वादेरप्युपाधितापत्याऽनुमानमात्रोच्छेद इति भावः -- साधनेति ।। कार्यत्वापरपर्याय जन्यत्वघटितत्वादित्यर्थः । तादृशस्याप्युपाधित्वेऽतिप्रसङ्गादिति भावः ।।
यद्यपि समवेतत्वे सति जन्यत्वं साधनं न तु जन्यत्वमात्रम् । तथापि साधनविशेषितवत्साधनैकदेशविशेषितोपि नोपाधिरिति भावेनेदं योज्यम् । यद्वा ध्वंससाधारणपक्षत्वे जन्यत्वमेव हेतुरिति तदभिप्रायमेतत् ।।
व्याप्तिग्राहकेति ।। यत्र सकर्तृकत्वं यत्र शरीरजन्यत्वमिति व्याप्तिग्राहकं भूयःसहचारदर्शनादिकं यत्र जन्यत्वं तत्र सकर्तृकत्वमिति व्याप्तिग्रहेपि तुल्यमिति ३ व्याप्तिग्राहकतौल्येनेत्यर्थः । तथाच साध्यव्यापकत्वानिश्चयान्नोपाधिरिति भावः।।
४ शङ्काग्रन्थमण्युक्तमेव समाधिमाह -- शरीरजन्यत्व इत्यादिना दर्शनादित्यन्तेन ।। अननुगतत्वेनेत्यनन्तरं अनवच्छेदकत्वादिति शेषः ।

१.'इदं' इति नास्ति -अ. २.च इति नास्ति-अ. ३.त्यर्थः -व्याप्ति-अ. ४. ३ ३ ३ पृष्टे, 'हेतुसमानयोगक्षेमस्येती' त्यारभ्य ' सिद्ध्यतीति भावः ' इत्यन्तं अत्रास्ति -मु.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३३३.

शरीरजन्यत्वे त्वदभिमतघटित्वादेरननुगतत्वेन तद्विपरीतस्य १ कर्तृजन्यत्वस्यैवाच्छेदकत्वेन साध्यव्यापकत्वात् । सति च साध्यव्यापकत्वे बाधोन्नीतस्य पक्षेतरत्वस्य सह्निनाधूमसाधन आद्रेन्धनप्रभववह्निमत्वरूपस्य साधनघटितस्य जलस्य रसत्वेन गन्धवत्वे साध्ये पृथिवीत्वरूपस्य हेतुसमानयोगक्षेमस्य चोपाधितादर्शनात् । न च कर्तृजन्यत्वे लाघवेन

जन्यत्वस्यैवावच्छेदकत्वाद्धेतोर्व्याप्ति निश्चये साध्यव्याप्यहेत्वव्यापकत्वादुपाधेः साध्याव्यापकतेति वाच्यम् ।

मूलारूढताभिव्यक्त्यर्थं तद्विपरीतेत्युक्तम् । साध्येति ।। सकर्तृकत्वरूपसाध्येत्यर्थः । पक्षेतरत्वस्येति ।। तेजोऽनुष्णं पदार्थत्वादित्यत्रातेजत्व २ रूपोपाधेर्व्यावृत्या
तद्व्याप्यसाध्या ३ भावस्यापि निर्णयादिति भावः ।।
वह्निनेत्यादि ।। ननु तत्र धुमवत्वे वह्निमत्वमात्रमप्रयोजकम् । अनुकूलतर्काभावात् । साधनघटितोपि स्यादुपाधिरिति चेत्तुल्यं प्रकृतेपि त्वदभि ४ प्रेतसकर्तृकत्वे कार्यत्वहेतोरहप्रयोजकत्वस्य प्रागुपपादनादिति भावः ।।
हेतुसमानयोगक्षेमस्येति ।। रसत्वस्य गन्धवत्वेन व्याप्तिः पृथिवीत्वोपहिते ग्राह्या । नत्वन्यत्र । सा च तत्र येन मानेन ग्राह्या तेनैव च गन्धवत्वपृथिवीत्वयोरपि सिद्ध्यतीति भावः । 'लाघवेन बाधकं विना कर्तृजन्यत्वे हि जन्यत्वमवच्छेदकं न तु शरीरजन्यत्वं गौरवात् । तथाच न शरीरजन्यत्वे सकर्तृक ५ त्वव्यापकम् । घटादौ त्वार्थःसमाजः । घटत्वेन शरीरजन्यत्वनियमात् 'इत्यादिना मण्युक्तमाशङ्क्य निराह । न च कर्त्रीति । हेतोरिति । जन्यत्व हेतोरित्यर्थः । ध्वंससाधारणपक्षत्वपक्षे जन्यत्वस्यैव हेतुत्वादिति भावः ।।

१.समस्तं पदं -कुं-ग-छ. २.रूपपदं नास्ति -अ. ३.ध्यस्याप्यभावनिर्ण - अ. ध्यव्याप्त्यभावनि - मु. ४.मते -अ- मु. ५.त्वे - अ.

---------- ---------- ----------

त्वदुक्तरीत्या कर्तृजन्यत्वे जन्यत्वमदच्छेदकं शरीरजन्यत्वे तु घटत्वादिकं वा अथवा तद्विपर्ययेण शरीरजन्यत्वे १ जन्यत्वं कर्तृजन्यत्वे तु घटत्वादिकं २ वेति सन्देहेन सन्दिग्धोपाधेर्दुष्परिहारत्वात् ।।
न च कर्तृजन्यत्वं प्रथमं ज्ञातं सच्छरीरजन्यतावच्छेदकत्वेन कल्प्यम् । तच्च कार्यत्वावच्छिन्नमेव ज्ञातमित्युपजीव्यविरोधान्न कर्तृजन्यत्वं शरीरजन्यतावच्छेदकमिति वाच्यम् । त्वदुक्त ३ रीत्या शरीरजन्यत्ववत्तद्विपरीतकर्तृजन्यत्वस्यापि प्रथमं घटत्वाद्यवच्छेदेनैव ज्ञानसम्भवात् ।।

प्रथमं कर्तृजन्यत्वे जन्यत्वमवच्छेदकं क्लृप्तमिति तद्विरोधेन शरीरजन्यत्वे न सकर्तृकत्मवच्छेदकं अत एव न सन्दिग्धोपाधित्वमित्यादिमण्युक्तमाशङ्क्य निराह -- न च कर्तृजन्यत्वमिति ।। तच्चेति ।। कर्तृजन्यत्वमित्यर्थः । कर्तृजन्यत्वे लाघवेन जन्यत्वस्यैवावच्छेदकत्वात् । कार्यत्वावच्छिन्नं कार्यत्वव्यापकम् । कर्तृजन्यत्वं शरीरजन्यतावच्छेदकं न सम्भवति । तस्य कार्यत्वरूपहे ४ त्वव्याकत्वात् । शरीरजन्यत्वं ५ सकर्तृकत्वव्याप्यकार्यत्वाव्यापकं ६ सकर्तृकत्वव्यापकं ७ चेत्यस्यायोगात् । अत उपजीव्यविरोधान्न कर्तृजन्यत्वं शरीरजन्यतावच्छेदकमित्यर्थः -- शरीरजन्यत्ववदिति ।।

१.कर्तृपदमधिकं -कुं. छ. २.चेति-च. ३.रीत्या -इतिनास्ति -मु.च-क-ख.रा. ४.तुव्या-अ. ५.त्वस-अ. ६.कस-अ. ७.कत्वेचे -अ.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३३५.

---------- --------- ---------

किंच कृतिकार्ययोः कार्यकारणभावग्रहेपि न ज्ञानेच्छयोः सिद्धिः ।

शरीरजन्यत्वं घटत्वादिनाऽवच्छिद्यते यत्र घटत्वादिकं तत्र शरीरजन्यत्वमिति कर्तृजन्यत्वं तु कार्यत्वेन यत्र कार्यं तत्र कर्तृजन्यत्वमिति एतच्च प्रथमं ज्ञायत इति यथा त्वोच्यते, तथैव कर्तृजन्यत्वं घटत्वादिनैवावच्छिद्यते यत्र घटत्वादि १ तत्र
कर्तृजन्यत्वमिति प्रथमं चास्य ज्ञानं सम्भवत्येन । ग्राहकसत्वात् । तथा च कर्तृजन्यत्वं घटत्वादिनावच्छिन्नतया प्रथमं ज्ञातमिति तद्विरोधान्न कार्यत्वावच्छिन्नत्वेन पश्चाज्ज्ञातुं शक्यमिति कार्यत्वस्येन कर्तृजन्यत्वाव्याप्यत्वात्तेन कथं त्वदभिमतसकर्तृकत्वानुमानम् । प्रत्युत शरीरजन्यत्ववच्छेदकत्वेनैव कार्यत्वस्यावगमात्तेन तदनुमानमेव स्यादित्यर्थः ।।
ननु यत्सामान्यविशेषन्यायेन कृतित्वकार्यत्वयोरवच्छेद्यावच्छेदकभावग्रहे सति कृतिजन्यत्वव्याप्यकार्यत्वा २ व्यापकत्वात्साध्यापव्यापकत्वं शरीरजन्यत्वस्येति चेन्न । प्रागेन यत्सामान्येति न्यायलभ्यपक्षस्य खण्डनात् ।।

अभ्युपेत्यापि कार्यत्वेन कृतिजन्यत्वानुमानम् । ज्ञानचिकीर्षावत्वांशे शरीरजन्यत्वमुपाधिर्भवत्येव । न हि कृतित्वकार्यत्वयोरिव ज्ञानत्वकार्यत्वयोरिच्छात्वकार्यत्वयोर्वा व्याप्यव्यापकभावे बीजमस्ति । येन ज्ञानेच्छाजन्यत्वव्याप्यकार्यत्वाप्यापकत्वाच्छरीरजन्यत्वं साध्यव्यापकं स्यादित्यत आह -- किंचेति । ग्रहेपीत्यस्य ग्रहात्कार्यत्वेन कृतिसिद्धावपीत्यर्थो ध्येयः -- न
ज्ञानेच्छयोः सिद्धिरिति ।। तयोः शरीरसंबन्धनिमित्तत्वादीश्वरे च त्वया तदनङ्गीकारादिति भावः ।।

१. सकर्तृ - अ. २. त्वस्या - कुं .

आत्मनः शरीरसम्भन्धे ज्ञानगतकार्यत्वस्येव ज्ञानादिसम्भन्धेपि त्वदुक्तकृतित्वमात्रविपरीतकृतिगतकार्यत्वस्यै १ व तन्त्रत्वात् ।
न च २ कृतिवज्ज्ञानेच्छयोरपि स्वासन्त्र्येण कार्यहेतुत्वात्तत्सिद्धिः । आत्मसंयोगे सत्यपि कृतिव्यतिरेकेणेव कृतौ सत्यां ज्ञानादिव्यतिरेकेण कार्यव्यतिरेकादर्शनात्।।

ननु कार्यत्वेन कृतिसिद्धावुपेतायां कृतेर्ज्ञानेच्छापूर्वकत्वस्य घटकृत्यादौ दर्शनात्कृत्यानुषङ्गिकतया तयोरपि सिद्धिः स्यादेव । न च शरीरसम्भन्धे तन्त्रयोर्ज्ञानेच्छयोर्भावात्तत्प्रत्युक्तशरीरसम्भन्धसिद्धिः । तस्य जन्यज्ञानादिप्रयुक्तत्वादित्यतः तर्हि जन्यकृतावेव ज्ञानेच्छापूर्वकत्वं नत्वजन्यत्वकृताविति कार्यत्वस्य पक्षधर्मताबलान्नित्यकृतिसिद्ध्या न ज्ञानेच्छयोः सिद्धिरिति भावेनाह -- आत्मनः इति ।।
नन्वस्तु कार्यत्वेन कृतेरि ३ व स्वान्त्र्येण ज्ञानादिसिद्धिः । शरीरजन्यत्वोपाधेः साध्यव्याप्यचहेत्वव्यापकत्वेन निराससम्भवादिति भावेनाशङ्क्य निराह -- न चेति ।। यद्वा ज्ञानेच्छयोः सिद्धिः किं कृत्यनुषङ्गिकत्वेनोतस्वान्त्र्येणा ४ थ ज्ञातस्यैव कृतिविषय ६ त्वात्कृतेःस्वातोर्थासम्बद्ध ७ त्वद्विषयेण सह कृतेः प्रत्यासत्तित्वेन । आद्यस्योत्तरं -- आत्मन इत्यादि ।। द्वितीयमाशङ्क्य निराह -- न चेत्यादि ।। आत्मसंयोग इति ।। आत्मनो विभुत्वेन त्वन्मते सदा संयोगा ८ दिति भावः ।

१.एवकारो नास्ति-छ-कुं-ग. २.कृतिवदिति नास्ति-ग. ३.रेव -कुं. ४.अथ इति न -अ. ५.न-कुं. ६.वेद्य इत्यधिकं -अ. ७.न्धात्-मु- अ. ८.गभावा -अ.

संभवा-मु

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३३७.
---------- --------- ---------

न च कृतेर्विषयप्रत्यासत्त्यर्थं ज्ञानापेक्षा कृतिविषययोर्ज्ञानस्यैव १ प्रत्यासत्तित्वादिति वाच्यम् । कृत्यजनकज्ञानस्य प्रत्यासत्तित्वेऽतिप्रसङ्गात्तज्जनकज्ञानस्य च कृतिकाले नष्टत्वेनाप्रत्यसत्तितया ज्ञाने ज्ञानस्वरूपस्येव कृतावपि कृतिस्वरूपस्यैव प्रत्यसत्तित्वात् । अन्यथा कृतिकालं ज्ञानाभावेन घटं करोमीति घटतत्योः सम्बन्धधीर्न स्यात् । तस्मात्वदुक्तकृत्यादि २
त्रयविपरीतकृतिमात्रवत्वेनाप्यनुमितिः स्यात् ।।
३ किंचास्तु कृतिप्रत्यासत्तित्वेन ज्ञानसिद्धिः।

नन्वस्त्वतिप्रसङ्गभिया जन्यकृतावन्यत्र जनकज्ञानस्य प्रत्यासत्तित्वम् । एवं च ज्ञानस्य कृतिप्रत्यसत्तित्वे क्वचित्सिद्धे सतीहागत्यानीदृशस्याप्यस्तु प्रत्यसत्तित्वमित्यतोन्यत्रापि तन्नास्तीत्याह -- तज्जनकेति ।। अनन्यगत्यास्तु नष्टस्यापि तथात्वमपीत्यत आह -- ज्ञान इति ।। उक्तं च 'न प्रयोजनवत्वात्' इत्यधिकरणसुधायाम् ।।
'महातात्पर्ययुक्तेश्च '
इत्येतद्व्याख्यावसरे 'प्रयत्नस्य विषयनियमार्थं बुद्धिरेष्टव्येति चेन्न ---

१.एतवकारो नास्ति - रा. २. त्रितय - कुं - छ - ग. ३. एतावन्नास्ति - क.

न्यायदीपयुततर्कताण्ड्वम् (प्र.परिच्छेदः पु - ३३८.
---------- ---------- ------

इच्छा तु कथं सिद्ध्येत् । तथा च त्वदुक्त १ त्रितयविपरीतद्वितयवत्वेनाप्यनुमितिः स्यात् ।।।
किच्चोपाधेर्व्यभिचारोन्नायकत्वपक्षे त्वदुक्तसकर्तृकत्वविपरीताकर्तृकत्वस्य शरीरजन्यत्वेनाप्यनुमातुं शक्यत्वात्सत्प्रतिपक्षता । न च कर्त्रजन्यत्वेऽजन्यत्वस्यैव तन्त्रत्वादप्रयोजको हेतुः । २ शरीरजन्यत्वे कर्तृजन्यत्वं वावच्छेदकं कर्तृजन्यत्वे
कार्यत्वं वेति संदेहस्योपपादितत्वेन स्थापनाहेतुतौल्यात् ।।

-- बुद्धिवत्स्वतोविषयप्रवणतोपपत्तेः इति ३ इति भावः -- कथं सिध्येदिति ।। किं कृत्यानुषङ्गिकत्वेनाथ स्वतन्त्र्येणोत कृतिप्रयत्नसत्तित्वेन । न पक्षत्रयमपि सम्भवति । पूर्वोक्तदोषादिति भावः ।।
एवं कार्यत्वहेतोः सोपाधिकत्वमुक्त्वा सत्प्रतिपक्षतां चाह -- किच्चेत्यादिना ।। ननु प्रमाणलक्षणे 'स एवोपाधिदोषोपि 'इत्युक्तोपाधेः प्रतिपक्षत्वेनैव दोषत्वोपगमात्, प्राचीनन्यायमते तथैवाभ्युपगमाच्चोपाध्युक्त्यैव तद्व्यतिरेकरूपप्रतिपक्षस्योक्तत्वात् किंचेति दोषान्तरतयोक्तिरयुक्तेत्यत आह -- व्यभिचारेति ।। मणिकृन्मते व्यभिचारोन्नायकत्वोपगमनोपाध्युक्त्या हेतोर्व्यभिचारबुद्धेरेवोदयेन प्रतिपक्षबुद्धेरनुदयादिति भावः -- विपरीतेति ।। विमतं क्षित्यादि अकर्तृकं शरीराजन्यत्वाद्गगनवदित्यनुमातुं शक्यत्वादित्यर्थः । अत्र शरीरजन्यत्वदसिद्धिरिति शङ्कानवकाशः -- अप्रयोजक इति ।। अकर्तृकत्वे अजन्यमात्रस्य प्रयोजकत्वादिति भावः ।'सन्देहस्येति प्रतिपक्षतानिर्वाहायोक्तम् ।

१.कृत्यादि इत्यधिकं -कुं-छ-क. २.शरीरजन्यत्वं कर्तृजन्यत्वं वा - क. ३. पुनः 'इति' इति नास्ति -कुं-अ.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३३९.

---------- --------- ----------

अथ मतं आकाशादवजन्यत्वस्यैवाकर्तृकत्वेन व्याप्तिग्रहाच्छरीरविशिष्टे तस्मिंस्तदभावव्द्याप्यत्वासिद्धिः । तथा १ च विशेषणविशेष्ययोरेकैव व्याप्तिर्व्यासज्यवृत्तिरिति वा, विशिष्टव्याप्तिशब्दार्थः विशेष्यनिष्टैव व्याप्तिर्विशेषणेनावच्छिद्यत इति वा । तत्र व्यासज्यवृत्तित्वे केवलविशेष्यावृत्तित्वासंभवो हेतुः । विशेषणेनावच्छेद्यत्वे तु विशेष्यतावच्छेदकस्य व्या २ प्यतावच्छेदकत्वासम्भवः । प्रकृते तु नोभयम् ।

वस्तुतस्तु कर्तृजन्यत्वे कार्यत्वं नावच्छेदकम् । तेन विनापि तस्योपपत्तेः। अन्यथा कर्मजन्यतावच्छेदकमपि कार्यत्वं स्यादित्यादिना
कार्यत्वहेतोरप्रयोजकत्वस्योक्तत्वादिति -- तौल्यादिति ।। तथा च नाप्रयोजकत्वमिति भावः ।।
अपि च 'शरीर ३ जन्यत्वे व्यर्थविशेषणत्वम् । लाघवेनाजन्यत्वस्यैव व्याप्यत्वा'दित्यादिना मण्याद्युक्तं निष्कृष्यानुवदति
-- अथ मत मित्यादिना अत्रोच्यते इत्य ४ न्तेन -- विशिष्टव्याप्तीति ।। विशिष्टहेतुनिष्ठा व्याप्तिरिति शब्दार्थ इत्यर्थः -- तत्रेति ।। कल्पद्वय इत्यर्थः -- हेतुरिति ।। यथा शब्दो नित्यः भावकार्यत्वादित्यादौ -- विशेषणेनेत्यादि ।। यथा कृष्णागरुवह्निमान् सुरभिधूमवत्वादित्यादाविति भावः -- विशेष्यत्वावच्छेदकेति ।। अजन्यत्वारूपावच्छेदकेत्यर्थः ।।

१.हि - कुं-छ-ग-रा. २.प्त्य -कुं-छ-ग. ३.रा-मु. ४.तिपर्यं -अ.

न्यायदीपयुततर्कताण्डवम् (प्र.पिरिच्छेदः पु - ३४०.

---------- ------- ----------

व्याप्तौ केवलविशेष्यरूपाजन्यत्वनिष्ठतायाः विशेष्यत्वावच्छेदकावच्छिन्नतायाश्च सम्भवात् । न च व्याप्तिवत्प्रक्षधर्मताया अप्यनुमित्यङ्गत्वात्तत्सिद्ध्यर्थं विशेषणमिति वाच्यम् । व्याप्तिसमानाधिकरणाया एव तस्या अङ्गत्वेनात्रविशेष्यनिष्ठव्याप्तिव्यधिकरणाया विशिष्टवृत्तिपक्षधर्मताया अनङ्गत्वात् ।।

न च चक्षुस्तैजसं रूपादिषु पच्जसु १ रूपस्यैव ग्राहकद्रव्यत्वात् इत्यादौ विशिष्टवृत्तिपक्षधर्मता विशेष्यवृत्तिव्याप्तेरङ्गं दृष्टमिति वाच्यम् । तत्राप्यवधारणमहिम्ना रूपेतरविशेषगुणाव्यज्जकत्वे सति रूपग्राहकत्वस्य हेतृत्वेन विशेष्यमात्रस्य मनसि व्यभिचारितया व्याप्तेरपि विशिष्ठत्वात् । न चात्राजन्यत्वरूपस्य विशेष्यस्य व्यभिचारोस्ति ।।

रुपादिषु पच्जस्विति स्वरूपकथनं मत्वाह -- तत्रापीति ।।

ननु रूपस्यैवेत्यादेरेव रूपेतरविशेषगुणेत्याद्यर्थकत्वे रूपादिषु पच्जस्विति व्यर्थम् २ । अतो रूपेतराव्यज्जकत्वमेव तदर्थो वाच्यः । तथा च चक्षुषो रूपत्वस्यापि व्यज्जकतया हेतोरसिद्ध्यापत्या तन्निरासकविशेषणविशिष्ट एव पक्षधर्मता

व्याप्तिस्तु विशेष्य इत्यरुचेरप्रसिद्धिवारकत्वेन सार्थक्यं मन्वान आह -- यद्वेति ।। अलब्धात्मकत्वस्येति ।। क्वाप्यप्रसिद्धेर्मनःप्रभृते रूपत्वस्यापि ग्राहकत्वादिति भावः ।।

१.मध्ये इत्यधिकं -कुं-छ. २.अत्र 'एकविशेषणं विशिष्टावरकधर्मताव्याप्तिस्तु विशेषादित्यरुचेः 'इति पङ्क्तिरस्ति - अ.

---------- --------- ----------

यद्वा मनसि व्यभिचारवारकस्यावधारणस्य रूपादिष्विति विशेषणं विना १ लब्धात्मकस्य व्यभिचारवारणाशक्त्या विशेषणस्यापि तल्लाभसंपादनद्वारा व्यभिचारवारणाप्रयोज २ कत्वमेव । अजन्यत्वं तु शरीरविशेषणं विनापि गगनादौ लब्धात्मकम् ।।

अथ मत नीलधूमादावपि विशिष्टनिष्ठैव ३ व्याप्तिः । तत्र व्यभिचारोपाध्योरभावात् । अन्यथा विशेषणानामव्याप्यत्वे निराश्रया व्याप्तिः स्यात् । किं तु नीलधूमत्वं न तदवच्छेदकम् । गौरवात् । अपि तु धूमत्वमेव । न च व्यभिचारवारकनैल्यविशेषणवत्त्वेनाज्ञात एवं व्याप्तिग्रहात्तद्वत्त्वेन ज्ञाते व्याप्तिप्र ४ माविरह इति वाच्यम् । सहचारदर्शने ५ व्यभिचारादर्शने च सति द्रव्यत्वादिमत्तयाऽज्ञातेपि धूमेऽव्यभिचारादिरूपव्याप्तिग्रहादिति चेन्मैवम् ।

'नीलधूमादौ व्याप्तिरस्त्येव। अन्यथा विशेषणानामव्याप्यत्वे निराश्रया व्याप्तिः स्या 'दित्यादिना मण्युक्तविशिष्टनिष्ठव्याप्तिपक्षा ६ शङ्कामनुवदति -- अथ मतमित्यादिना मैवमित्यन्तेन ।। नीलधूमादावपीति ।। तथा च शरीरजन्यत्वेपि विशिष्टहेतौ व्याप्तिरस्त्यैवेति ७ तत्र व्याप्त्यसिद्धिप्युत्पादनमयुक्तमिति भावः ।।

१.नुपल-क. २.नक-कुं-ग-छ. ३.एवकारो नास्ति -कुं-छ-क. ४.मिति-कुं-च-ग.
५.उपाध्यभावदर्शने -ग. ६.क्षश-कुं-क्षाननु-अ. ७.तत्रेतिद्विवारमस्ति-अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३४२.

---------- ---------- ----------

अनुमितिप्रयोजकव्याप्तिविरहो हि व्याप्यत्वासिद्धिः . तत्प्रयोजिका च व्याप्तिः साध्यसामानाधिकरण्यावच्छेदकरूपवत्व १ लक्षणा न त्वव्यभिचाररूपाऽनौपाधिकत्वरूपा वा । गौरवात् । अपदार्थत्वे न अवाक्यार्थत्वेन चोदाहरणवाक्येन तदप्रतीतेश्च । तद्विरहश्च सामानाधिकरण्याभावेन वा यथा निरधिकरणे वस्तुनि, सत्यपि तस्मिंस्तस्य साध्यनिरूपितत्वविरहाद्वा यथा विरुद्धे, सतोरपितयोर्धर्मस्यानवच्छेदकत्वविरहाद्वा यथेयं पृथिवी द्रव्यत्वादित्यत्र द्रव्यत्वे ।

विशिष्टहेतोर्व्याप्तिविरहवादी अवान्तरविशिष्टनिष्ठव्याप्तिपक्षचोद्यं व्याप्तिवादे २ मणिकृदभिमतव्याप्तिलक्षणमुपेत्य निराह -- मैवमित्यादिना ।। गौरवादिति ।। नञ्घटितत्वादिति भावः -- उदाहरणेति ।। यो यो धूमवानसनावसावग्निमानित्यादिरूपवाक्येन धूमे वह्निरूपसाध्यनैकाधिकरण्यस्य तदवच्छेदकधूम ३ त्ववत्वस्य च प्रतीतेरिवाव्यभिचारादेरप्रतीतेरित्यर्थः -- वस्तुनीति ।। पर्वतोग्निमान् गगनवत्वादित्यत्र गगनाख्यवस्तुनीत्यर्थः -- तस्मिन्निति ।। सामानाधिकरण्य इत्यर्थः -- विरुद्ध इति ।। पर्वतोऽग्निमान् ह्रदत्वादित्यादावित्यर्थः -- द्रव्यत्व इति ।। तत्र सामानाधिकरण्यस्य तस्मिन्पृथवीत्वसामानाधिकरण्यावच्छेदकम् । द्रव्यत्वस्य पृथवीत्वमात्रसामानाधिकरण्याभावादिति भावः ।

१.रूपा - ख. २. द -कुं. ३. मव - कुं. ४.व्यवत्वं - कुं.

व्यर्थविशेषणे च नीलधूमादौ सामानाधिकरण्ये तस्य साध्यनिरूपितत्वे च सत्यपि नीलधूमत्वस्य वह्निनिरूपितसामानाधिकरण्यावच्छेदकत्वविरहाव्याप्तिविरहः ।
नन्विहावच्छेदकत्वं न तावदवच्छित्तिप्रत्ययहेतुत्वादिकम् । आत्माश्रयात् । नाप्यवच्छेद्यान्यूनानातिरिक्तवृत्तित्वम् ।
वह्निसामानाधिकरण्यवत्वलोकादावविद्यमाने धूम १ त्वादावपि तदभावात् ।
किंत्वनतिरिक्तदेशकत्वम् । तच्चनीलधूमवत्वेप्यस्ति । न च तत्रातिव्याप्तिवारणायावच्छेद्यनतिरिक्तदेशकधर्मान्तराघटितत्वे सतीति विशेष्यते ।

अस्तु प्रकृते किमित्यत आह -- व्यर्थेति ।। आदिपदेन शरीरा २ जन्यत्वादिग्रहः -- अवच्छेदकत्वविरहादिति ।। गौरवादिति भावः । तथा च विशिष्टो ३ हेतुर्व्याप्तिशून्य एवेति भावः ।।
विशिष्टनिष्ठव्याप्तिवादी व्याप्तिवादे पक्षधराद्युक्तमवच्छेदकत्वनिरुक्तिनिष्कर्षमनुवदन्नीलधूमत्वादावपि साध्यसामानाधिकरण्यावच्छेदकत्वमस्तीति शङ्क्यते -- नन्वित्यादिना मैवमित्यन्तेन ।। ४ आदिपदेनावच्छेद्यव्याप्यत्वावच्छेद्यसमनियतत्वादिग्रहः -- आत्माश्रयादिति ।। हेतु ५ त्वस्य नियतपूर्ववृत्तित्वरूपत्वान्नियमस्य व्याप्तितया व्याप्तिज्ञाने व्याप्तिज्ञानस्यावश्यकत्वादिति भावः -- अतिव्याप्तीति ।।

१.वत्वा -च. २.रज-अ. ३.ष्टहे- कुं. ४.इयं पङ्क्तिः ' अतिव्याप्तीति ' इत्यतः प्रगस्ति - अ. ५.कत्व - अ.

---------- ---------- ------

नीलधूमत्वस्य च धूमत्वरूपतादृशधर्मान्तरघटितत्वान्न तदवच्छेदकतेति वाच्यम् । एवं सति व्याप्तिशरीरस्याभाव १ द्वयघटितत्वेनातिगौरवात् । उदाहरणवाक्ये तदभावाच्चेति चेन्मैवम् ।।

अवच्छेदकत्वं हि विशेषणताविशेषरूपः स्वरूपसम्बन्धः । न चास्याप्युदाहरणवाक्यादप्रतीतिः ।

उदाहरणस्थधूमपदोपस्थापितस्य धूमत्वस्योदाहरणवाक्योपस्थापितेन धूमगतवह्निसामानाधिकरण्येन सहावच्छेदकत्वरूपसम्बन्धस्य संसर्गविधया भानात् ।

प्रमेयधूमत्वद्रव्यधूमत्वनीलधूमत्वैतद्धूमत्वादावपि वह्निसामानाधिकरण्यरूपावच्छेद्यानतिरिक्तदेशकत्वसत्वादतिव्याप्तीत्यर्थः -- अभावद्वयेति ।।

साध्यसामानाधिकरण्यानतिरिक्तदेशकधर्मान्तरघिटितत्वे सति साध्यसामानाधिकरण्यानतिरिक्तदेशकत्वमित्यत्र यद्यपि नञ्त्रयप्रवेशादभावत्रयं तथापि अनतिरिक्तेत्यस्यैव द्विरुपादानादभावद्वयेत्युक्तम् । यद्वा सत्यन्तप्रविष्टनञ्द्वयापेक्षया अभावद्वयेत्युक्तम् ।।

केचित्तु तादृशधर्मान्तराघटितत्वे सति साध्यसामानाधिकरण्यदेशत्वं तदर्थः । एवं चाभावद्वयमेवेत्याहुः । तच्चिन्त्यम् । प्रमेयत्वद्रव्यत्वादावतिव्याप्तेः ।।

को विशेषणताविशेषः । विशिष्टज्ञानजनकज्ञानविषत्वादिरूपत्वे चात्माश्रयादित्यत आह -- स्वरुपसम्बन्ध इति ।।

ननु कुत एवमिति चेत् । अवच्छेदकत्वनिरुक्तेरिति वदन्ति । तथाहि । यदुक्तमवच्छेद्यानतिरिक्तदेशकत्वमवच्छेदकत्वमिति । तन्न ।

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३४५.

स च स्वरूपसम्बन्धो लघुनि धूमत्व एव कल्प्यते । न तु गुरुणि नीलधूमत्व इति नीलधूमे न व्याप्तिः ।।
न च लघुधूमत्वमपि नीलधू १ मेऽस्तीति वाच्यम् । हेतुतावच्छेदकस्यैव हि सामानाधिकरण्यावच्छेदकता वाच्या । उपस्थितत्वाद्धर्मान्तरकल्पने गौरवाच्च । इह २ तु हेतुतावच्छेदकत्वेनोपात्तस्य नीलधूमत्वस्य शरीरजन्यत्वस्य च सामानाधिकरण्यानवच्छेदकत्वेन व्याप्यत्वासिद्धेः ।।

इदं सुखि आत्मत्वादित्यादावीश्वरात्मनि सुखाभावसमानाधिकरणे व्यभिचारिणि गतत्वात् । आत्मत्वस्य जीवात्मनि सुखसामानाधिकरण्येनात्मत्वत्वस्य
सुखसामानाधिकरण्यानतिरिक्तवृत्तित्वात् ।।
न च साध्याभावचसमानाधिकरणावृत्तित्वमवच्छेदकत्वम् । आत्मत्वं त्वीश्वरात्मनि सुखाभावसमानाधिकरणमेवेति वाच्यम् । केववान्वयसाध्यकहेतावभावात् । तत्र साध्यकहेतावभावात् । तत्र साध्याभावाप्रसिद्धेः ।।
नापि साध्यसामानाधिकरण्याभावाधिकरणावृत्तिमवच्छेदकत्वम् । आत्मत्वं त्वीश्वरात्मवृत्तित्वावच्छेदेन सुखसामानाधिकरण्याभावाधिकरणमेवेति वाच्यम् ।
वृक्षः एतत्कपिसंयोगवान् एतद्वृक्षत्वादित्यदाव्याप्तेः । एतद्वृक्षत्वस्यापि मूलावच्छेदेनैतत्कपिसंयोगसामानाधिकरण्याभावाधिकरणत्वात् । यदि चैतद्वृक्षत्व एतत्कपिसंयोगसामानाधिकरण्यस्य सत्वात्कथं तदभाव इति ।

तर्ह्यात्मत्वेपि तुल्यमेतत् । विरुद्धयोरप्यवच्छेदकभेदेनाविरोध इत्येतस्यापि साम्यात् ।

१. मत्वे - ग - ख. २. च - क - रा - ख.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३४६.

न चैवं विमतो निर्धूमः आद्रेन्धनप्रभववह्निरहितत्वात्, सुरभि १ धूमरहितः चन्दनप्रभववह्निरहितत्वादित्यादावपि व्याप्यत्वासिद्धिः स्यादिति वाच्यम् । तत्र कार्यमाकारणभावमूलकानुतर्केण वह्निरहितत्व २ आन्द्रेन्धनप्रभववह्निरहितत्वा ३ दावपि व्याप्तिनिश्चयादिति ।।

नापि अधिकरणैकदेशानवच्छेदेन साध्यसामानाधिकरण्याभाववदवृत्तित्वं तत् । एतद्वृक्षत्वे चाधिकरणैकदेशमूलावच्छेदेनैव साध्यसामानाधिकरण्यमिति विशिष्टव्यतिरेकस्य तत्रापि सत्वान्नाव्याप्तिः । आत्मत्वे तु ईश्वररूपाधिकरणवृत्तित्वावच्छेदेनैव साध्यसामानाधिकरण्याभाववत्वम् । न तु तदैकदेशावच्छेदेनेति न तत्रातिव्याप्तिः । केवलान्वयिनि च तादृशसाध्यसामानाधिकरण्याभाववत्वं गगनादौ प्रसिद्धमिति न कोपि दोष इति युक्तम् । सुखादेरव्याप्यवृत्तितया जीवात्मन्यप्यात्मत्वस्य सुखसामानाधिकरण्याभावाधिकरणतया तत्र तदेकदेशवृत्तित्वस्यैवावच्छेदकत्वादिति दिक् ।।

तस्मादवच्छेदकत्वानिरुक्तेः स्वरूपसम्बन्ध एवावच्छेदक ४ त्वमिति नीलधूमेऽस्तीति । तथा च तादृशावच्छेदकधर्मवत्वान्नीवलधूमोपि व्याप्य एवेति शङ्किकतुर्भावः ।।

न चैवमिति ।। गुरुधर्मस्य व्याप्यतानवच्छेदकत्वे कारणविशेषाभावेन कार्यविशेषाभावानुमानं न स्यादित्यर्थः ।।

१.धूमपदं- न -क. २.इव इत्यधिकं - कुं-छ-क-ख-ग. ३.दित्या -कुं-छ. ४.कमि -कुं.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३४७.

अत्रोच्यते ।।
व्यभिचारज्ञानस्य ह्यनुमितिप्रतिबन्धकत्वमनुभवसिद्धम् । त्वदनुमतं च । तच्च न बाधादिवत्साक्षा १ त्साध्यविरु २ द्धविषयकत्वात् । किं तु करणीभूतव्याप्तिज्ञानविघटनद्वारा । तच्च व्याप्तेस्त्वदुक्तसाध्यसामानाधिकरण्यावच्छेदकरूपवत्वविपरीतेव्यभिचाराभाववविशिष्टसहचाररूपत्व एव युक्तम् ।

एवं नीलधीमदृष्टान्तेन शरीरजन्यत्वस्य व्याप्यत्वासिद्धत्वे पूर्वपक्षिते ३ सति न मण्युक्तं व्याप्तिस्वरूपमनुमित्यङ्गम् किंत्वन्यदेव तच्चास्ति नीलधूमे शरीरजन्यत्वे च अतो न व्याप्तिशून्यत्वमिति भावेन सिद्धान्तयति -- अत्रोच्यत इत्यादिना ।। त्वदनुमतं चेति ।। अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वमिति व्यभिचारादिहेत्वाभासलक्षणोक्तेरिति भावः ।।
अनुमितिप्रतिबन्धकत्वं हि द्वेधा । अनुमितिविषयविरोधिविषय ४ त्वेन साक्षादेव वा, तत्कारणीभूतज्ञानविषयाभावगाहित्वेन तत्करणवघटकत्वेन वा । तत्राद्यं बाधप्रतिपक्षयोरेव । न त्वन्यस्य । द्वितीयं तु स्यादिति भावेनाह -- तच्चेत्यादिना ।। व्याप्तिज्ञानेति ।।
यद्यपि परामर्श एवानुमितिकरणम् तार्किकमते । यथाह 'लिङ्गपरामर्शोऽनुमान 'मिति । तथापि करणस्य व्यापारवत्वनियमात्परामर्शस्य करणत्वे व्यापाराभावाव्याप्तिज्ञानं करणं

परामर्शोऽवान्तरव्यापार इति लिङ्गकरणतावादे मणिकृदुक्तरीत्या करणीभूतव्याप्तिज्ञानेत्युक्तम् -- तच्चेति ।। व्याप्तिज्ञानविघटकत्वमित्यर्थः । मूलारूढतां दर्शयितुं विपरीत इत्युक्तिः ।।

१.त् । सा-च-क. २.द्वा-च-क-ग-रा. ३. 'सति' इति नास्ति -कुं. ४.कत्वे - कुं -अ.

विरुद्धवत्सहचाररूविशेष्यांशविरोधेपि व्यभिचाराभावरूपविशेषणांशेन सह वैषयिकविरोधात् । न तु साध्यसामानाधिकरण्यावच्छेदक १ रूपवत्वात्मकत्वे २ तद्युक्तम् । परस्परविरहानात्मकत्वेन साक्षादविरोधात् ।।

न च व्यभिचारेण हेतुतावच्छेदकस्य साध्यसामानाधिकरण्यानवच्छेदकत्वानुमात्पम्परया विरोधः । व्यभिचारज्ञानान्तरमेव व्याप्तिविरहज्ञानानुभवेन परम्पराकल्पनेऽनुभवविरोधात् ।

युक्तमित्येतद्व्यनक्ति - विरुद्धवदिति ।। साध्याभावमात्रसम्बद्धविरुद्धहेत्वाभासवदित्यर्थः -- वैषयिकेति । भावाभावरूपविरुद्धविषयकृतेत्यर्थः -- तद्युक्तमिति ।। व्याप्तिज्ञानविघटकत्वं युक्तमित्यर्थः -- परम्परयेति ।। पर्वतो धूमवाने वह्निमत्वादित्यत्र वह्नित्वादिरूपहेतुतावच्छेदकं न साध्यसामानाधिकरण्यवच्छेदकम् साध्याभावसमानाधिकरणवृत्तित्वादिति साध्यसामानाधिकरण्या ३ नवच्छेदकत्वानुमितिः । तया च

तादृशावच्छेदकधर्मवत्व ३ रूपव्याप्तज्ञानं नेति व्यभिचारज्ञानस्यानवच्छेदकत्वज्ञानद्वारा व्याप्तिज्ञानप्रतिबन्धकत्वमित्यर्थः ।।

१.कत्वात्मकत्वे -छ. रूपपदं न -ग. २.कत्वेन-कुं. ३.अयं ग्रन्थः नास्ति - अ.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३४९.

बाधा १
दिवत्साक्षादनुमितिप्रतिबन्धकत्वस्यासिद्ध्यादिवत्परामर्शविषयाभावत्वस्य २ चाभावेनोपाधिवद्धेत्वाभास ३ त्वोपाधित्वाभावात्तेश्च ।।
न चोदाहरणवाक्येन तदप्रतीतेः तदप्रतीतिः । तत्र वीप्सास्तीति मते 'नित्यवीप्सयोः 'इति सूत्रेण व्याप्तिप्रतिपादनेच्छायां सत्यामादिष्टस्यैकार्थ -

--

अनुभवे विवदमानं प्रत्याह -- बाधा ४ दिवदिति ।। हेत्वाभासत्वोपाधित्वेति ।। अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वस्य हेत्वाभावसतायामुपाधि ५ त्वरूपत्वात्तस्य च व्यभिचारोन्नायकोपाधाविव साध्यसामानाधिकरण्यानवच्छेदकत्वानुमापके
व्यभिचारेप्यभावेनोपाधिवद्व्यभिचारोपि हेत्वाभावसो न स्यादित्यर्थः । तदप्रतीतिरिति ।। व्यभिचाराभावविशिष्टसहचाराप्रतीतिरित्यर्थः । तत्रेति ।। उदाहरणवाक्य इत्यर्थः । अवयवग्रन्थे पक्षद्वयस्याप्युक्तेः । वीप्सास्तीति मते नास्तीति मत एति मतद्वयोक्तिः । सूत्रेण व्याकरणसूत्रेणेत्यर्थः ।।

सूत्रस्थवीप्साशब्दार्थमाह -- व्याप्तीति । आदिष्टस्य आदेशतया विहितस्य । व्याकरणेऽष्टमाध्यायाद्यपादे 'नित्यवीप्सयोः'इत्यत्र '
सर्वत्र द्वे'इत्यधिकारसूत्रस्थपदद्वयानुवर्तनेन क्रियापौनःपुन्यरूप ६ नित्येऽर्थे वीप्सायां च वर्तमानस्य सर्वस्य वर्णसमुदायरूपपूर्वतनशब्दस्य द्वे भवत इत्यर्थः ।।
अत्र च पक्षद्वयं सम्भवति । पूर्वस्थितशब्दस्य स्थाने शब्दतोऽर्थतश्च समानशब्दरूपे द्वे आदेशौ भवत इति वा, पूर्वतनशब्दस्य द्विरुच्चारणं भवतीति वा ।

१.आदिपदं न -ग-. २.वा-छ. 'च' इति नास्ति -ग. ३.सोपाधि-क-ख-रा. ४.आदिपदं न -मु. ५.धिरु - कुं. ६.मित्यर्थे - अ.

न्यायदीपयुततर्कमाण्ड्म् (प्र.परिच्छेदः पु - ३५०.
---------- ---------- ------
-- वाचकत्वेनैकपदरूपस्य योय इत्यस्य शब्दस्यानुमित्यङ्गत्वेन निर्णीताव्यभि १ चारविशिष्टसहचार २ रूपव्याप्तिवाचकत्वोपपत्तेः ।।
वीप्सा नास्तीति मते उदाहरणोत्पादितसहचारदर्शनसहकृतेन मनसैवोक्तव्याप्तिज्ञानसम्भवात् । तथाच व्यभिचाराभावविशिष्टसहचाररूपा व्याप्तिर्नीलधूमे शरीरजन्यत्वे चास्तीति कथं तयोर्व्याप्यत्वासिद्धिः ।।

तत्राद्यपक्षस्यैव भाष्ये मञ्जर्यां च स्थिरत्वोक्तेरादिष्टस्येत्युक्तम् । तत्र स्थानिवद्भावेनार्थवत्वात्प्रातिपदिकत्वम् । अर्थैक्यात्समुदायस्यैकपदत्वं चेति
भावेनैकार्थ्येत्याद्युक्तिः ।।

शब्दस्येति ।। वाचकत्वेनान्वयः। वीप्सित ३ शब्देन यावत्साधनाधिकरणोपस्थितौ तत्र साध्यवत्वविधानात् यावत्स्वाश्रयाश्रितसाध्यसम्बन्धरूपव्याप्तिप्रतीतेः तस्या एवानुमित्यङ्गत्वनिर्णयादिति भावः ।।
यत्तु मणावुदाहरण ४ निरूणप्रस्तावे 'वीप्सायामपि व्यभिचारतादवस्थ्यमिति तु वय'मित्युक्तम् । तदयुक्तम् । व्याप्तिप्रतिपादनेच्छायामादिष्टस्य यो य इत्यस्यच यावत्साधनाधिकरणे साध्यसम्बन्धबोधनशक्तेर्व्युत्पन्नत्वेन व्यभिचारशङ्कानवकाशात् ।।
एवं नीलधूमादिसाधारण्येन व्याप्तिमुपपाद्येदानीं, नीलधूमादौ प्याप्त्यभावेपि शरीरजन्यत्वेऽस्ति न च शरीरपदस्यासिद्धिवारकतया व्यभिचारावारकत्वेन व्यर्थत्वात्कथं व्यर्थविशेषणवति व्याप्तिरित्यतो व्याप्त्याश्रयविकासकतया व्याप्तिग्रहौपयिकत्वेन न व्यर्थविशेषणत्वमिति भावेन तां तत्रोपपादयति -- किञ्चेत्यादिना ।।

१.चरितसह-कुं-रा. २.'ग्रहसम्भवात् । तथाच' इत्यादि वर्तते -क. ३.प्साश-कुं. ४.'निरूपण' इति नास्ति -अ.

किञ्च हेतुशरीरघटकं द्विविधम् । किंचित्संकोचकम् । यथा नीलधूमादित्यत्र नीलत्वम् । किंचद्विकासकम् । यथा प्रमात्वाश्रयविषयत्वादित्यर्थकेप्रमेयत्वादित्यत्राश्रयविषयत्वम् । १ प्रमेयत्वादित्युक्त २ व्यभिचाराभावात् । तत्र संकोचकविपरीतस्यान्त्यस्य स्वेन विकासितदेशे ३ व्याप्तिग्रहौपयिकत्वान्नव्यर्थता । अन्यथा लक्षणरूपे व्यतिरेकिणि भागासिद्धिरूपाप्याप्तिहरणाय विशेषणं न प्रयुज्येत ।

संकोचकमिति । हेतुलक्षणस्य प्याप्त्यधिकरणस्याल्पत्वसम्पादकम् । धूमादित्य ४ नेन नीलानीलसाधारणधूमत्वाधिकरणमात्रस्य । व्याप्त्याश्रयत्वं लभ्यते । नीलत्वविशेषणे तु नीलधूममात्रस्येति नीलत्वं व्याप्त्यधिकरणसेकोचकम् ।
घटोऽभिधेयः प्रमात्वाश्रयविषयत्वादित्यत्र प्रमात्वादित्युक्ते तन्मात्रस्यैव व्याप्त्यश्रयत्वलाभो नान्यत्र । विशेष्यभागस्याप्युक्तौ तु प्रमेयत्वमात्रस्यापि तथात्वलाभाद्व्यधिकरणविकासकमित्यर्थः ।।
ततः किमित्यत आह -- तत्रेति ।। द्वयोर्हेतुशरीरघटकयोर्मध्य इत्यर्थः । अन्त्यस्येति ।। व्याप्त्याश्रयविकासकस्येत्यर्थः । असिद्धिवारकस्यापीति शेषः । अन्यथेति ।। असिद्धिवाकत्वेनैव व्यर्थत्वे गुणाश्रयो द्रव्यमित्यत्र गुणान्त्यताभावानधिकरणत्वरूपद्रव्यलक्षणे
गुणानधिकरणत्वस्याद्यक्षणस्थितघटादौ सत्वेपि द्वितीयादिक्षणस्थे तस्मिन्नभावेनाव्याप्तिवारणायात्यन्त्यन्ताभावेति विशेषणं नोपादीयेत ।

१.प्रमात्वा -छ-ग. २.क्तेपि-छ-ग-क-रा. ३.व्याप्तिग्रहानौपयिकत्वाद्वयर्थता-ख-छ. ४.न्तेने -अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३५२.

शरीरपदं १ चाजन्यत्वस्यांकुरादावसंभावितस्य विकासकमिति न व्यर्थम् ।।
अपि च शरीरजन्यत्वादीत्यत्र शरीरविशिष्टोऽभावो २ न हेतुः । किन्तु शरीरविशिष्टस्य जन्यत्वस्याभावः ।

तस्य द्रव्यमितरेभ्यो भिद्यते गुणात्यन्ताभावानधिकरणत्वात् व्यतिरेकेण गुणादिवदित्यत्र द्वितीयादिक्षणस्थघटादौ भागा ३ सिद्धिवारकत्वात् ।

लक्षणमपि केवलव्यतिरेकी ४ त्युक्तत्वेन व्यावृत्तिव्यवहारयोः साधने लक्षणस्य केवलव्यतिरेकित्वादिति भावः ।।
यद्वा गुणाभावानधिकरणत्वादित्युक्तावाद्यक्षणस्थघटे भागासिद्धिवारणायात्यन्तेति विशेषणं नोपादीयेतेत्यर्थः ।।
अस्त्वेवं प्रकृते किमित्यत आह -- शरीरेति ।। अजन्यत्वादित्येवोक्तावङ्कुरादावसम्भावनया हेत्वसिद्धिशङ्कायां तत्रापि हेतुसत्वोपपादकत्वेन हेत्वधिकरणबाहुल्यसम्पादकत्वेन हेतुविकासकम् । तत्रादृष्टा ५ द्वारकशरीरजन्यत्वाभावस्य प्रत्यक्षत
एवावगमसम्भवात् । अतो न
व्यर्थं शरीरविशेषणमित्यर्थः ।।
न केवलं हेतुविकासकत्वेन शरीरपतमर्थवत् किन्तु 'विशिष्टस्योपाधेः साध्यव्यापकत्वमस्त्येव । उपाध्यभावश्चात्र प्रतिपक्षत्वेनोक्त 'इति तत्वनिर्णयटीकोक्तदिशा विशिष्टाभावरूपहेतुसरूपोपस्थापकतयापि व्याप्तिग्रहौपयिकत्वेनेत्याह -- अपिचेति ।। अभाव इति ।। जन्यत्वाभाव इत्यर्थः -- न हेतुरिति ।। तथात्वे हि जन्यत्वाभावमात्रस्य गगनादावकर्तृकत्वेन व्याप्तस्य हेतुस्वरूपस्याजन्यत्वपदेनैवोपस्थितिसम्भवेन शरीरपदं व्यर्थं स्यात् ।

१. चज-कु. २.अत्रग्रन्थपातः दर्शितः-मु. ३.भागेऽसि-मु. ४.कीयुक्त-कुं. ५.ष्टद्वा - कुं.

---------- -------- --------
स च विशेषणविशेष्ययोरभावाभ्यां भिन्न एव । विशेषणविशेष्यसम्बन्धो विशिष्टमिति मते पदार्थान्तरमिति मते च प्रतियोगिभेदात् । विशेषणावच्छिन्नं विशेष्यमेव विशिष्टमिति मते प्रतियोगितावच्छेदकभेदाते

। तादृशविशिष्टाभाव १ धीश्च न विशेषणज्ञानं विना युक्ता । प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानसाध्यत्वादभावज्ञानस्य ।।
एवं च शरीरविशेषणं विशेष्याभावविपरीतव्याप्त्याश्रयीभूतविशिष्टाभावोपस्थाप २ नौपयिकं व्याप्तिग्रहौपयिकमेव । आश्रयज्ञानं विना व्याप्तेरग्रहात् ।।

न चैवमित्यर्थः । न च भिन्न एवेत्यन्वयः । यदि न भिन्नस्तदा लाघवेन विशेष्याभावादेरेव व्याप्यतया विशिष्टाभावो न व्याप्यः स्यात् । न चैवमित्यर्थः ।।
कुत इत्यतस्तद्व्यनक्ति । विशेषणेति ।। प्रतिवादिमतानुरोधेनाह -- पदार्थान्तरमितीति ।। अस्त्वतिरिक्तोऽभावस्ततः किमित्यत आह -- तादृशेति ।। प्रतियोगितावच्छेदकप्रकारकेति ।। तथा च शरीरजन्य ३ त्वत्वेन शरीरजन्यज्ञानं न शरीरज्ञानं विना युक्तमित्यर्थः । ततः किमित्यत आह -- एवं चेति ।।
यदत्रोक्तं मणौ 'शरीरजन्यत्वाभावो नाखण्ड्ये हेतुः । यदि हि शरीरजन्यत्वं सकर्तृकत्वप्रयोजकं स्यात्तदा तदभावप्रयुक्तः सकर्तृकत्वाभाव इति ----

१.वस्य धि -कुं-ग विशिष्टस्याभावस्य- ग. २.नेनव्याप्ति -कुं नौपाधिकं - क. ३.त्वेन -कुं.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३५४.
---------- ---------- --------
न च गगनादौ व्याप्तिग्रहार्थं विशिष्टाभावग्रहकाले विशेष्याभावस्यापि ग्रहनियमाल्लाघवेन तत्रैव व्याप्तिग्रहान्न विशिष्टाभावे तद्ग्रह इति वाच्यम् । विशेष्याभावाग्रहणेपि शब्दादिना विशिष्टाभावग्रहणे १ न नियमाभावात् । क्वचिदुपस्थितिमात्रेण लाघवा २ दरे अयं घटो जन्यः कृतकत्वादित्यत्र

लघुनि शीघ्रोपस्थितिके च घटत्वे सत्यपि कृतकत्वनिष्ठव्याप्तिग्रहं प्रतीव प्रकृतेपि लघौ विशेष्याभावे सत्यपि ।विशिष्टाभावनिष्ठव्याप्तिग्रहं प्रति भिन्नविषयत्वेन गौरवस्याप्रतिबन्धकत्वात् ।

-- तस्य साध्यव्या ३ प्यता स्यात् । न चैवम् । किन्तु जन्यत्वम् । लाघवादि'त्यादि तत्तु 'अदृष्टाद्वारकशरीरजन्यत्वमुपाधिश्च'इत्यादिनोपाधेः सकर्तृकत्वप्रयोजकत्वप्रतिपादनपरपूर्वग्रन्थेनैव निरस्तमित्यभिप्रेत्य लाघवेन विशेष्याभावस्यैव व्याप्यत्वं न विशिष्टाभावस्येति विशिष्टाभावस्य व्याप्यत्वासिद्धिचोद्यं निराह -- न चेत्यादिना । सामग्रीवशेनाजन्यत्वस्यापि क्वचिदुपस्थितिसम्भवादस्तु विशिष्टाभावस्याव्याप्यत्वमित्यत आह -- क्वचिदिति ।। भिन्नविषयत्वेनेति ।। विशिष्टाभावमध्ये विशेष्याभावस्याप्रवेशात् । अत एव पूर्वं 'विशेषणविशेष्ययोरभावाभ्यां भिन्न एव'इत्युक्तमिति भावः ।।

१.हणे-कुं. २.हेण-ख-रा. णनि-क. २.देरिव-छ.।अयं ग्रन्थः नास्ति -क - 'गौरवस्या 'इत्यनन्तरं 'व्याप्तिर्विशेष्या'इत्यादेः सत्वेन लोपः सूचितः -- ख. ३. पकता - अ.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३५५.

नहि नीलधूमनिष्ठा व्याप्तिर्धूमत्वेनेव ।विशिष्टाभावनिष्ठा व्याप्तिर्विशेष्याभाव १ त्वेनावच्छेत्तुं शक्या । तत्र तदभावात् । येनावच्छेदकांशे लाघवं सहकारि २ स्यात् ।।

नन्वेवं वह्न्यनुमापकं धूमप्रागभावादौ, पृथिव्या इतरभेदानुमापके पृथिवीत्वसमवाये च, त्वदभिमता व्यर्थविशेष्यता न स्यात् । धूम ३ पृथिवीत्वा ४ दिनिष्ठव्याप्तितो

धूमप्रागभावपृथिवीत्वसमवायनिष्ठव्याप्तेर्भिन्न ५ त्वेन तस्याः धूमपृथिवीत्ववृत्तिधर्माभ्यामवच्छेत्तुमशक्यत्वादिति चेन्न । इष्टापत्तेः ।।

नन्वखण्ड्स्य प्याप्यत्वेप्यखण्ड्निष्ठा व्याप्तिर्जन्यत्वाभाव ६ त्वेनैवावच्छिद्यते । नीलधूमनि ७ ष्ठा व्याप्तिर्धूमत्वे ८ नैव । तथा च हेतुस्वरूपोपस्थितौ विशेष्याभावविशिष्टाभावयोर्भिन्नत्वेन लाघवासहकरेप्यवच्छेदकग्रहे लाघवं सरकारि स्यादेवेत्यत आह -- न हीति ।। तत्रेति । विशिष्टाभावे जन्यत्वाभाव ९ त्वाभावादित्यर्थः ।। उक्तार्थे बाधकमाशङ्क्येष्टापत्या निराह -- नन्वित्यादिना ।। वह्नीति ।। गिरिर्वह्निमान् धूमप्रागभाव १० वत्वात् पृथिवी इतरभिन्ना पृथिवीत्वसमवायवत्वादित्यादावित्यर्थः । तर्हि विशेष्यत्वं क्वापि दोषो न स्यादित्यत आह -- व्यर्थेति ।। आदिपदेन तादृशालोकवत्वादिग्रहः ।।

१.ववत्वेन-कुं. २.री-ग-क. ३.मे-ग. ४.आदि पदं न -कुं. ५.विषय -क. ६.वेनै-कुं. ७.ष्ठव्या-अ. ८.नेव-कुं. ९.वाभा-कुं. १०.वात्-अ.

व्यर्थविशेष्योदाहरणन्तु अयमभिधेयत्व १ वान् २ प्रमेयत्वे सति धूमत्वादित्यादिकम् । नीलधूमादित्यादौ विशेषणाश्रयनिष्ठव्याप्तेर्विशेष्यतावच्छेदकेन धूमत्वेना ३ वच्छेदसम्भवरूपव्यर्थविशिषेणतादु ४ ष्टिबीजस्यैव प्रकृतेपि विशेष्यतावच्छेदकावच्छिन्ननिष्ठव्याप्तेर्विशेषणतावच्छेदकेन प्रमेय ५ त्वेनावच्छेदकसंभवरूपस्य व्यर्थवि ६ शेष्यतादु ष्टि ७ बीजस्य सम्भवात् ।।

तस्माव्यर्थविशेषणस्य न क्वापि व्याप्यत्वासिद्धित्वेन दुषणता ।।

नन्वत्राप्यखण्डं विशेष्यमात्रादन्यदेन व्याप्त ८ मिति सुवचनमित्यतो व्यर्थविशेषणस्थल इवात्रापि दूषकताबीजप्रदर्शनेन व्यर्थविशेष्यतां व्यनक्ति -- नीलेति ।। विशेषणाश्र ९ यनिष्ठेति ।। नैल्यरूपविशेषणयुक्तधूमनिष्ठेत्यर्थः । विशिष्टस्य पदार्थान्तरत्वाभावमतेनैव मुक्तिः । विशेष्यतावच्छेदकेना धूमत्वेनेत्यर्थः । सम्भवेति ।। व्यभिचाराभावादिति भावः ।। दुष्टीति ।। विशेषणस्य दुष्टताबीजस्येत्यर्थः । प्रकृतेचपि प्रमेयवत्वे सति धूमवत्वादित्यादावित्यर्थः । सम्भवरूपस्येति । प्रमेयवत्वादित्युक्तेपि व्यभिचाराभावादिति भावः।।
व्यर्थविशेषणस्य दूषणताबीजं निर्धारयन्नेव शरीरजन्यत्वे तन्नास्तीत्युपपादयति ।। तस्मादिति ।। नीलधूमादेरपि व्याप्यताया उपपादनादित्यर्थः ।

१.यवान्-ग-कुं. २.प्रमेयवत्वे सति धूमवत्वादित्यस्ति -कुं. ३.धूमत्वेनेति नास्ति -ग-कुं. ४.ष्ट-छ-ख-क-रा. ५.त्वत्वेन-मु. ६.षणता-च-ख-क. ७.ष्ट-छ-क-ख-रा. ८.प्य-अ. ९.आश्रयपदं न -अ.

---------- --------- -------
किन्तु विशिष्टस्य हेतुत्वाभिप्रायेण प्रयोगेऽधिकत्वेन । हेतुद्वयोक्तौ द्वितीये प्रथमेन कृत १ कार्यत्वस्येव विशिष्टेपि विशेष्येण कृतकार्यत्वस्य दु २ ष्टिबीजस्य ३ सत्वात् । विशेष्यस्यैव हेतुत्वाभिप्राये त्वर्थान्तरत्वेन । प्रकृते तु विशिष्टाभावरूपहेतुकार्यस्यान्येनाकारणान्नाधिकत्वम् ।।

न च विशिष्टाभाव ४ कार्यं विशे ५ ष्याभावेन कर्तुं शक्यम् । विशिष्टोपस्थितौ विशेष्याभावोपस्थितिनियमस्य, तस्य हेतुत्वान्वये ८ विशेष्याभावस्य हेतुत्वान्वयनियमस्य चाभावात् ।।
नाप्यर्थान्तरम् । असिद्धिवारकत्वेन प्रकृतोपयोगात् ।

अन्वितोपयुक्तापुनरुक्तकृतकार्यप्रयोगस्याधिकत्वात्कथमात्रान्येन कृतकार्यत्वमित्यत आह ।। हेतुद्वयेति ।। धूमवत्वादालोकवत्वाच्चेत्येवं रूपेणेति भावः ।
अर्थान्थरत्वेनेति ।। प्रकृतानुपयुक्ता ११ न्वितोक्तिरर्थान्तरमित्युक्तर्थान्तररूपनिग्रहसस्थानत्वेनेत्यर्थः । अत्रापि दूषणता व्यर्थविशेषणस्येत्यनुषङ्गः ।

१.करणत्वस्य -क-रा. २.ष्ट--छ-क-रा. ३.सम्भवात् -छ-कुं. ४.रूप-छ. ५.षणा-ख. ष्येण-क. ६.ष्योप-च-छ-ख-ग-क-रा. ७.ष्यस्य-कुं ८.यनियमस्य चा -छ-कुं. ९.अधिकत्वं नेति -अ. प्रयोग इत्यस्याधिकत्वेनेति -मु. १०.' व्यधिकरणस्य' इत्यधिकं -कुं. ११.क्तोक्ति - अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३५८.
---------- ----- -----
एतदेवाभिप्रेत्योक्तं टीकाकारैः 'पक्षधर्मतासिद्ध्यर्थत्वात्'इति । तस्मात्सत्प्रतिपक्षत्वं दुष्परिहरम् ।।
तदेवं कार्यत्वहेतोर्दुष्टतया प्रमित्यनुन्मुखत्वाल्लाघवतर्कानुगृहितेन तेन कर्त्रैक्यसिद्धिरित निरस्तम् । कार्यसामान्यस्य कर्तृमात्रसापेक्षत्वेपि तद्विशेषस्य घटस्य कुलालरूपकर्तृसापेक्षत्ववत्, वेदस्य शरीरसहकृतेश्वरसापेक्षत्ववच्च गुरुतरकार्यस्य सजातीयकारकस १

हितकर्तृसापेक्षत्ववदर्शनेन
त्वदुक्तैककर्तृकत्वविपरीतानेककर्तृकत्वेनाप्यनुमातुं शक्यत्वाच्च ।।

एतदेवाभिप्रेत्योक्तमिति ।। विमतं विकर्तृकं अस्मत्सम्मतकर्तृरहितत्वादिति तत्वनिर्णय २ टीकायामुक्तमित्यर्थः । शरीरेति विशेषणस्येति शेषः ।। यदपि मणौ 'ननु क्षित्यादावेन ३ कर्तृसिद्धिः कुतः'इत्यादिना 'उच्यते'इत्यन्तेनैककर्तृसिद्धिमाक्षिप्य 'तत्र प्रमाणे लाघवगुविषयते'इत्यादिना समाधानमुक्तं तदपि निराह -- तदेवमिति ।। तद्विशेषस्येति ।। कार्यविशेषस्येत्यर्थः । शरीरेति ।। 'सर्गादावदृष्टभेदान्मीनशरीरोत्पत्तावदृष्टवदात्मसंयोगाददृष्टसहकृतप्रयत्नव दीश्वरसंयोगाद्वा
सकलवेदार्थगोचरज्ञानविवक्षासहकृतान्मीनकण्ठताल्वादिक्रियातज्जन्यसंयोग ाद्वेदोत्पत्तिः'इति मण्युक्तेरिति भावः -- विमतनेककर्तृकं
गुरुतरकार्यत्वात्प्रासादादिकार्यवदित्यनुमातुं शक्यत्वादित्यर्थः ।।

१.हकृत-मु. २.'वाक्य' इत्यधिकं -अ. ३.क-अ. ४.कारकेत्यधिकं-कुं.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३५९.
---------- --------- --------
वैदिकेश्वरस्य तु वेदेनैव सर्वं सिद्धम् । तस्मान्न कार्यत्वहेतुनेश्वरसिद्धिः ।।
एतेन अस्तु तर्हि परमाण्वोर्द्रव्यारम्भकसंयोगहेतु ---

ननेवं त्वन्मतेपीश्वरसिद्धिः कर्त्रैक्यसिद्धिः नित्यज्ञानादिसिद्धिश्च न स्यात् । अनुमानस्य त्वया दूषितत्वादित्यतः 'वैदिकेश्वरस्य तु वेदेनैव सर्व १ शक्तित्वोक्तेः सर्वमुपपद्यते'इति भाष्यवाक्यं हृदि कृत्वाह --- वैदिकेति ।।

वेदैकसमधिगम्येत्यर्थः -- वेदेनेति ।। 'द्यावा भूमी जनयन्देव एकः, २ परस्य शाक्तिर्विवधैव श्रूयते स्वाभाविकां ज्ञानबलक्रिया च, यदात्मको भगवांस्तदात्मिका व्यक्तिः'इत्यादिभाष्याद्युक्तवेदेनेत्यर्थः ।।
एवं --
कार्ययोजनधृत्यादेः पदात्प्रत्ययतः श्रूतेः ।
वाक्यात्सङ्ख्याविशेषाच्च' ।
इति कुसुमाञ्जलिसङ्गृहीतेश्वरसाधकहेतूनां मध्ये मण्युक्तकार्यत्वहेतुप्रपञ्चनं निरस्येदानीं' अनयैव दिशा सर्वाणि जगत्कारणमात्रसाधनानिस्वतन्त्रानुमानानि निरसनीयानि' इति शास्त्रयोनिसूत्रसुधोक्तिं विवृण्वानः कुसुमाञ्जल्युक्तहेत्वन्तराण्यपि क्रमेण निराह -- एतेनेत्यादिना ।।

१.कर्तृत्वो - कुं. २.अपरा - कुं.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३६०.

--क्रियारूप १ कार्यायोजनेनेश्वरसिद्धिः । विमतं परमाण्वादि चेतनाधिष्टितं स्पन्दते जडत्वात् शरीरवदित्यनुमानात् । अन्यथा जडत्वहानेरिति निरस्तम् ।
उक्तरीत्या त्वदुक्तविपरीतस्यास्मदादीनामेवादृष्टद्वारा २ प्यधिष्ठातृत्वस्य सम्भवेन सिद्धसाधनात् । अदृष्टाद्वारकेति विशेषणेऽप्रयोजकत्वात् ।

कार्ययोजनेति ।। यद्यपि कुसुमाञ्जलौ 'आयोजना खल्वपि 'इत्यादिना आयोजनमेव हेतु ३ रुपात्तः । कार्येति कार्यत्वं हेतुः । तथापि 'युज्यते संयुज्यते अन्योन्यं द्रव्यमनेनेत्यायोजनं द्व्यणुकारम्भसंयोगजनकं सर्गाद्यकालीनपरणाणुकर्म' इति वर्धमानोक्त्या कार्यपदेन द्व्यणुकादिकार्या

४ योजनमित्यन्वयमुपेत्य कार्यायोजनेनेत्युक्तमिति ज्ञेयम् । क्वचित्तु 'आयोजनेनेत्यत्येव 'पाठः ।।
सिद्धिरित्युक्तं प्रयोगोक्त्या व्यनक्ति ।। विमतमिति ।। तत्किमित्यतः । परमाण्वादीति ।। आदिपदेन द्व्यणुकादिग्रहः । चेतनाधिष्ठिं सदेव स्पन्दत इति साध्यार्थः । अप्रयोजकत्वं हेतोर्निराह । अन्यथेति । चेतनवत्स्वत एव स्पन्दवत्व इत्यर्थः । एतेनेत्युक्तं व्यनक्ति । उक्तरीत्येति ।।
उक्तदोषनिरासायादृष्ठाद्वारकचेतनेति विशेषणमाशङ्क्य निराह -- अदृष्टेति ।। जडत्वहेतोरदृष्ठद्वारकचेतनाधिष्ठितत्वेनाप्युपपत्तेरप्रयोजको हेतुरिति भावेनाह -- अप्रयोजकत्वादिति ।।

१.'अप्रयोजनेन' इत्यपि पाठः -च. अयमेवपाठः -ख-क-रा. २.अपि पदं न -कुं. ३.रुक्तः - मु. ४.'अर्था' इत्यधिकं - कुं.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३६१.
---------- ---------- ------
अनेनेश्वर १ सार्वज्ञ्यासिद्धिश्च । इदमुत्तरानुमानेष्वपि द्रष्टव्यम् ।।
एतेनैव विमतं ब्रह्माण्डादि धारकप्रयत्नवता धृतम् गुरुत्वे सत्यपातित्वात् वियति विह २ ङ्गमशरीरवत् ।

ननु अदृष्टस्यापि केनचिदधिष्ठातृचेतनेन भाव्यमिति स एवेश्वर इति चेन्न । तत्राधिष्ठातुः कृत्याभावात् । न तावन्नोदनादिकम् । अद्रव्यत्वात् । न चातिशयाधानम् । स किं गुणोऽतीन्द्रयः कश्चिच्छक्तिविशेषः । न द्वयमपि ।
त्वया गुणे गुणान्तरानङ्गीकारात् । शक्यनभ्युपगमाच्च । नापि सहकारिसमवधानम् । अदृष्टादेव तदुपपत्तेः। नापि कार्यकारित्वम् ।

तस्यादृष्टस्वभावत्वात् । एककार्योत्पत्यनन्तरं कार्यान्तरा ३ नुत्पादनं ४ च प्रबलादृष्टान्तरप्रतिबन्धेनोपपत्तेरिति सुधायामेव व्यक्तत्वादिति भावेन दोषान्तरमाह -- अनेनेति ।। उक्तानुमानेन कस्यचिच्चेतनस्यैव सिद्ध्या तत्सार्वज्ञ्यासिद्धेः । सार्वज्ञ्यस्य धर्मिग्राहकमानसिद्धत्वादि ५ तीश्वरवादोपक्रमात्पूर्वं त्वदुक्तमयुक्तमिति भावः -- इदमिति ।। सार्वज्ञ्यासिद्धदीषणमित्यर्थः ।।
धृतिरूपं हेत्वन्तरमपि कुसुमाञ्जल्युक्तदिशानूद्य निराह -- एतेनेति ।। ब्रह्माण्डादीत्यादिपदेन पृथिव्यादिग्रहः । साध्ये व्यापकतासम्पत्तये धारकेति प्रयत्ने विशेषणम् । अन्यादृशप्रयत्नस्यापतनाहेतुत्वात् । लघुवस्तुन्यपतनवति व्यभिचारवारणाय गुरुत्वे सतीति ६ हेतुविशेषणम् । पतमाने गुरुत्ववति तन्निरासाय विशेष्यम् -- वियतीति ।। गगने विहरत्पक्षिशरीरं यथा प्रयत्नवता चेतनेन विहगजीवेन धृतं --

१.स्यसा -कुं. २.हग-कुं. ३.अन्तर इति नास्ति -कुं. ४.नस्य न - कुं. ५.इति इति नास्ति -अ. ६.हेतौ-कुं-अ.

विमतं ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाठ्यमानपटवदिति निरस्तम् । उक्तसिद्धसाधनाप्रयोजकत्वान्यतरानिस्तारात् ।।
न च घटादिनिर्माणं स्वतन्त्रपुरुषविश्रान्तं निर्माणत्वात् इदानींतनापूर्ववस्तुनिर्माणवत्, घटादिशब्दव्यवहारः स्वतन्त्रपुरुषविश्रान्तः व्यवहारत्वात् डित्थादिशब्दव्यवहारवत्. लिपिव्यवहारः स्वतन्त्र १ पुरुषविश्रान्तः व्यवहारत्वात् इदानींतननूतनलिपिव्यवहारवदित्याद्यनुमानैस्तत्सिद्धिरिति वच्यम्।

२ तथा ब्रह्माण्डादिधारकः कश्चन चेतनःसिद्ध्यति । स एवेश्वर इति भावः ।।
३ धृत्यातेरित्यत्रापिंपदोपात्तानुमानं व्यनक्ति । विमतमिति ।। उक्तेति ।। एतच्चोपलक्षणम् । प्रबलादृष्टप्रतिबन्धेन गुरुत्ववतोप्यपतनोपपत्याप्यप्रयोजकत्वमपातित्वहोतोः । सन्दिग्धासिद्धत्वं च 'पततोपि तस्य महत्वेन पतनानुपलम्भवात्'इति सुधोक्तमपि ध्येयम् ।। पद्यते गम्यते व्यवहाराङ्गमर्थोऽनेनेति वृद्धव्यवहार एव पदशब्देनोच्यते । ततोपीश्वरसिद्धिः । तथाहि । यदेतत्पटादिनिर्माणनैपुण्यम् कुविन्दादीनां वाग्व्यवहारश्चेत्यादिकुसुमाञ्जल्युक्तिं ४ हृदि कृत्वा पदादीश्वसिद्धिरित्येतदपि निराह -- नचेत्यादिना ।। स्वन्त्रेति ।। तज्जातीयनिर्माणानुपजीवित्वं पुरुषस्य स्वान्त्र्यम् । द्वितीये तु तज्जातीयव्यवहारानुपजीवित्वम् । तत्र पर्यवसितत्वं तत्र विश्रान्तत्वम् । अस्मदादिपुरुषविश्रान्तत्वेन बाध ५ वारणाय । स्वतन्त्रेति ।। लाघवेनेत्यस्य कल्पनादित्यन्वयः -- सुप्तेति ।। पूर्वकालैकेति समासः ।

१.पुरुषपदं न -ख-रा. २.यथा-अ. ३.धृत्यादेरित्यादिपदोपक्रान्तानुमानं-अ. ४.क्तं-मु-अ. ५.निरासाय-कुं-मु-अ.

लाधवेन सर्गादिवभवानां सुप्तप्रबुद्धन्याये न त्वदभिमतविपरीतस्य कल्पान्तरीयसंस्कारोद्बोधमात्रस्य कल्पनादेन घटादिनिर्माणादेरुपपत्या हेतूनामप्रयोजकत्वात् । अन्यथा ईश्वरस्य, द्व्यणुकादिक्रमेणारब्धतदीयानन्तरशरीरादेश्च कल्पने गौरवात् ।।

सुप्तः सन् यः पश्चात्प्रबुद्धः स यथा सुप्तेः पूर्वमनुभूतं घटनिर्माणादि करोति तथैव सुष्ट्या १ दावदृष्टादिवशेन लब्धदेहः सर्गाद्यकालीनकुलादिरेव प्रलयात्पूर्वकालीनानुभवजन्यसंस्कारोद्बोधेन प्रागनुभूतं स्मृत्वा सर्गादौ घटादिनिर्माणं तद्व्यवहारं च करोतीत्युपपत्या त्वदभिमतस्वतन्त्रपुरुषकृतत्वा २ सिद्धेरप्रयोजकत्वादित्यर्थः ।।
तर्कपराहतिं चाह -- अन्यथेति ।। स्वतन्त्रपुरुषेणैव घटादिनानाचित्रनिर्माणानां सृष्ट्यादौ कृतत्वे कुलालकुविन्दादिनानाशरीराणां धारणेनेश्वर एव तानितानि विचित्रनिर्माणानि करोतीत्यनन्तदेहकल्पनमीश्वरस्य स्यात् । तानि च द्व्यणुकादिक्रेण जन्यानीति कल्पनीयमित्यप्रामाणिकानेककल्पनाद्गौरवमित्यर्थः।।
'प्रत्ययपदेनात्राश्वासविषयः प्रामाण्यमुच्यते' इत्यादिना 'न चासर्वज्ञो धर्माधर्मयोः स्वातन्त्र्येण प्रभवति' इत्यन्तेन कुसुमाञ्जलिग्रन्थेनोक्तं प्रत्ययादीश्वरसिद्धिरित्येतत्प्रमेयमपि निष्कृष्यानूद्य निराह ।

१. आदिपदं न - कुं. २. प्रसि - मु.

न च वाच्यं सर्गादौ ब्राह्मणत्वादेरधिकारस्या १ ज्ञाने कर्मानुष्ठानसंभवात् स्वतस्तदभिज्ञः कश्चित्स्वीकार्य इति । स्तनपानप्रवृत्तिहेत्विष्टसाधनतानुमितिहेतुव्याप्तिस्मृतिव २ त्सर्गादि ३ भवानां प्राचीनकल्पानुष्ठितस्य ब्राह्मण्या ४ दिहेतोः कर्मणः, तस्य ब्राह्मणत्वा ५ विनाभावस्य च, स्मृतिसंभवात् ।।

नचवाच्यमित्यादिना ।। स्वतस्तदिभिज्ञान इति ।। अन्यथाऽनाश्वासेनानुष्ठानलोपापत्तेरिति भावः । स्तनेति ।। स्तनपानप्रवृत्तिहेतुर्या इष्टसाधनतानुमितिः तद्धेतुव्याप्तिस्मृतिवदित्यर्थः । सर्गेति ।। सर्गेदावुत्पन्नानां ब्राह्मणादीनामित्यर्थः । तस्येति ।। कर्मण इत्यर्थः ।।

श्रुतेरिति हेतोर्ह्ययमर्थः । वेदाः सर्वज्ञप्रणीताः वेदत्वाव्यतिरेकेण पामरवाक्यवदिति श्रुतिरूपकार्येण व्यतिरेकिहेतुनेश्वरसिद्धिरिति । वाक्यादित्यस्य तु वेदावाक्यानि पौरुषेयाणि वाक्यत्वादस्मदादिवाक्यवदित्यन्वयिना वाक्यत्वहेतुनेश्वरसिद्धिरिति । तदुभयमपि वेदापौरुषेयत्ववादे निरस्तमित्युपेत्य 'सङ्ख्याविशेषाच्च साध्यो विश्वकृदव्ययः'इत्यस्य प्रपञ्चनपरेण 'सङ्ख्याविशेषात् खल्वपि'इत्यादिना कुसुमाञ्जनिग्रन्थेनोक्तं निष्कृष्यानुवदन् शङ्क्यते -- नन्वित्यादिना ।। द्रव्यत्वेन हेतुना त्र्यणिकस्य परिमाणवत्वे सिद्धे तस्य परिमाणस्य कार्यगुणत्वेन जन्यत्वे च सति भावकार्यस्य च कारणत्रयजन्यतया त्र्यणुकस्य समयिकारणस्यादृष्टा ६ निर्मितस्य भावेप्यसमवायिकारणं व्द्यणुकागतत्रित्वसङ्ख्या वाच्या त्रिभिर्व्द्यणुकैस्त्र्यणुकारम्भादिति भावेन सङ्ख्या जन्यत्वं तावद्धर्मानोक्तप्रयोगोक्त्या साधयति - त्र्यणिकपरिमाणमिति ।।

१.राज्ञा -ख. २.त्स्वर्गा-ख. सर्वत्राप्येवमस्ति-क. ३.भुवां-छ., भावानां-ख-क., भाविनां -रा. ४.णत्वादि-व-छ-क-ख-रा. ५.आदि इत्यधिकं -ग-कुं. ६.कपालमात्रेणारब्धघटान्तरगतातिशयितपरिमाणवत् -- ख.

ननु त्र्यणुकपरिमाणं सङ्ख्याऽसमवायि १ कारणकं परिमामप्रचयाजन्यपरिमाणत्वात् । एतद्घटारम्भककपालद्वयसमानपरिमाण २ ककपालत्रयारब्धघटान्तरगतातिशयितपरिमाणवत् । न च विशेषणासिद्धिः । त्र्यणुकपरिमाणस्य द्व्यणुकपरिमाण----

तदुक्तरित्या द्व्यणुकपरिमाणस्य पक्षतोपगमेनोक्तरुपसाध्यसाधनेपि वक्ष्यमाणदिशा
परमाणुगतद्वित्वरुपसङ्ख्यानिमित्तकारणापेक्षाबुध्याश्रयत्वेनेश्वरसिद्धिरस्ति । तथापि पररमाणुव्द्यणुकपरिमाणयोर्द्वयोरप्यणुपरिमाणत्वात् व्द्यणुकपिरमाणपक्षतापक्षे हेतोर्विशेषणासिद्धेर्वक्ष्यमाणदिशा
परिर्तुमशक्यत्वात् त्र्यणुकपरिमाणस्य पक्षत्वोक्तिः । हेतौ परिमाणाजन्येत्युक्त्या घटादिपरिमाणे प्रचयाजन्येत्युक्त्या तूलपिण्डपरिमाणे जन्येत्युक्त्या परमाण्वादिपरिमाणे गुणत्वादित्यनुक्त्वा परिमाणत्युक्त्या घटगतरूपादौ व्यभिचारशङ्का निरस्ता । न च हेतोरप्रयोजकत्वं शङ्क्यम् । जन्यपरिमाणस्य सङ्ख्यापरिमाणप्रचयरूपत्रितयजन्यत्वात् । द्वाभ्यामजन्यत्वे सति जन्यत्वस्य सङ्ख्याजन्यत्वेन विनानुपपत्तेरिति भावः ।।
वर्धमानाद्युनुक्तमपि दृष्टान्तं स्वयं दर्शयति -- एतद्घटेति ।। कश्चिद्बुद्धस्थो घट एतद्घटपदेनोच्यते । घटान्तरगतातिशयितपरिमाणे कपालस्थत्रित्वसङ्ख्याजन्यरूपसाध्यस्योक्तरूपहेतोश्च सत्वं व्यक्तमिति भावः-- अणुत्वापत्तेरिति ।। तथा च त्र्यणुकस्याप्रत्यक्षतापत्तेरिति भावः ।।

१.यी - क - ख - ग. २. ष्टादेर्निमित्त - कुं.

--जन्यत्वे १ तद्वदेवाणुत्वापत्तेः । निरवयवावयवारब्धे २ द्व्यणुके द्व्यणुकान्तरनिष्ठभूयोवयवासंयोगित्वं ३ सति तत्संयोगित्वरूपस्य प्रचयस्याप्यसम्भवात् । तस्मात्र्यणुकपरिमाणं प्रति परमाणुपरिमाणं न परिमाणा ४ रम्भकं अणुपरिमाणत्वात् द्व्यणुकपरिमाणवत् । न चाप्रयोजकता । व्द्यणुकपरिमाणस्य परमाणुपरिमाणा ५ दणुकमत्वापत्तेः । तस्मात्परिशेषाद्व्यणुकपरिमाणस्य परमाणुनिष्ठद्वित्वसङ्ख्यैवासमवायि ६ कारणम् ।

प्रचयस्वरूपं वदन्नैव तदजन्यत्वं व्यनक्ति -- निरवयवेति ।। निरवयवाभ्यां परमाणुरूपावयाभ्यामारब्ध इत्यर्थः । वर्धमानोक्तप्रयोगान्तरमाह -- एवमिति ।। सङ्ख्याया एव जनकत्वेन व्द्यणुकपरिमाणजन्म न तु तत्परिमाणेनेति न बाधो व्द्यणुकपरिमाणानुत्पादो वा शङ्क्य इति भावः । अयं च प्रयोगो व्द्यणुकपरिमाणे । तत्रोक्तप्रयोगोऽत्रापि ध्येयः ।।
व्द्यणुकपरिमाणेऽणुत्वस्योपगमेनेष्टापत्तिनिरासायाह -- अणुतमत्वेति ।। तस्मादिति ।। परिमाणस्याजनकत्वात् प्रचयस्य च प्रागुक्तरूपस्यासम्भवादित्यर्थः । ततश्च किमीश्वरसिद्धावागतमित्यतः कुसुमाञ्जल्युक्तप्रयोगमाह -- ते चेति ।।

१.त्ववत्-क. २.ब्ध-कुं. ३.गरु-क. ४.न्तरा-छ-क-ख-रा. ५.णवद-कुं. ६.प्रायः 'यी' इत्येवास्ति - क-रा.

ते च त्रित्वद्वित्वे अपेक्षाबुद्धिजन्ये अनेकवृत्तिसङ्ख्यात्वात् घटवृत्तिद्वित्वादिवत् । अपेक्षाबुद्धिश्चास्मादादिष्वसं १ भविनी तदाधारमीश्वरं कल्पयतीति चेन्मैवम् ।।
सङ्ख्यायो २ नित्वेपि व्यणुकपरिमाणं प्रति त्वदुक्तपरमाणुगतद्वित्वविपरीतयोः
परमाणुगतैकत्वयोः त्र्यणुकपरिमाणं च प्रति व्यणुकनिष्ठैकत्वानामसमवायिकारणत्वसंभवात् ।

३ व्यणुकपरिमाणगते इत्यर्थः । एकत्वे व्यभिचारवारणाय हेतावनेकवृत्तीत्युक्तिः । संयोगादौ तद्वारणाय सङ्ख्यात्वादित्युक्तिः । तदाधारमीश्वरमिति ।। द्वित्वस्य
निमित्तकारणभूतापेक्षाबुद्धिनाश ४ नाश्यत्वनियमेपीश्वरबुद्धेर्नित्यतया कारणान्तरनाशप्रयुक्त एव परमाण्वादिगततद्वित्वादिनाश इति न तस्य नित्यत्वशङ्केति भावः ।।
आद्यहेतोरन्यथोपपत्या त्वदभिमतापेक्षाबुद्ध्याश्रयत्वेन नेश्वरसाधकतेत्यप्रयोजकत्वमिति भावेन सिद्धान्तयति ।। मैवमित्यादिना ।। संख्यायोनित्वेपीति ।। व्यणुकत्र्यणुकपरिमाणयोः परमाणुकगतसङ्ख्याजन्यत्वेपीत्यर्थः ।
अपीत्यभ्युपगमवादः -- व्यणुकेति ।। व्यणुकत्रयनिष्ठेत्यर्थः ।।
ननु नैवं सम्भवति । एकत्वानामनेकत्वात् । द्वित्वत्रित्वयोस्तु प्रत्येकमेकैकत्वेन लाघवात् द्व्यणुकत्र्यणुकगतपरिमाणयोर्द्वयोरपि
स्वावयवगतैकत्वसङ्ख्याजन्यत्वाविशेषेण त्र्यणुकपिमाणस्याप्यणु ५ त्वापत्तेश्चेत्यत आद्यं निराह -- एकत्वानामिति ।।

१.म्भवि-कुं-छ-ख. २.गित्वे-छ-ख-ग-रा. ३.त्र्यणुकव्यणुकगते-कुं. ४.शेना-मु. ५. त्वेपपत्तेः - कुं.

एकत्वानामनेकत्वेपि क्लृप्तत्वात् । द्वित्वत्रित्वयोस्तु प्रत्येकमेकत्वेपि कल्प्यत्वात् ।। न च त्र्यणु १ करिमाणस्य द्व्यणुकगतानेकैकत्वासमवायिकारणकत्वे द्व्यणुकपरिमाणवदणुत्वं स्यादिति वाच्यम् । अणुत्वरूपं २ विशेषं प्रति ३ नित्यसङ्ख्यात्वेन महत्वरूपं विशेषं प्रति जन्यसङ्ख्यात्वेन हेतुत्वोपपत्तेः ।।

अन्त्यमाशङ्क्य निराह -- न चेति ।। नित्येति ।। परमाणुगतैकत्वयोः नित्यत्वात्तज्जन्यं द्व्यणुकपरिमाणमणु । द्वयणुकगतानां त्रयाणामेकत्वानां जन्यत्वाज्जन्यं त्र्यणुकपरिमाणं महदित्युपपत्तेरित्यर्थः ।।

यद्यपि त्रिभिरेकत्वैर्जन्यत्वादेव त्र्यणुकपरिमाणं महत् एकत्वद्वयजन्यत्वाद्व्यणुकपरिमाणमण्विति सुवचम् । तथापि चतुरणकादि परिमाणस्यापि सङ्ख्यात एव जननोपपत्तेरिति वैशिषिकाधिकरणसुधोक्तदिशा सर्वकार्यपरिमाणानामप्येकरूपत्वलाभेन क्लृप्ततत्तत्समवायिकारणगतानेकैकत्वसङ्ख्याजन्यत्वमेव स्यात् । त्र्यणुकादिकार्यगतपरिमाणस्य सर्वस्यापि त्वन्मते महत्वेन जन्यसङ्ख्योत्पन्नत्वेनाणुपरिमाणवैलक्षण्योपपत्तेरिति भावेनैव जन्यशङ्ख्यात्वेनेत्येवमुक्तम् ।।

ननु कारणगतैकत्वसङ्ख्यायाः कार्यगतपरिमाणं प्रति नियतपूर्ववृत्तित्वेपि द्वित्वत्रित्वादिसङ्ख्यां प्रत्यसमवायिकारणतया क्लृप्तत्वेन तन्तुरूपादेरिवान्यथासिद्धत्वान्न परिमाणकारणत्वम्, कुतस्तद्विशेषासमवायिकारणत्वमिति चेन्न ।

१.अत्र सर्वत्र ककारो नास्ति -ख. २.पवि-क-रा-कुं. ३.प्रतिजन्यसंख्यात्वेन-ख.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३६८.

किंच द्रव्यारम्भकत्वेन क्लृप्स्य त्वदुक्तसङ्ख्याविपरीतस्यैकस्य संयोदस्यैव परिमाणहेतुता कल्प्या । नियतपूर्ववृत्तित्वेन क्लृप्तेतस्मिन्नन्यथासि १ द्धिमात्रकल्पने लाघवात् । न तु द्वित्वस्य । तत्स्वरूस्यानन्यथासि २ द्धत्वमात्रकल्पने लाघवात् । न तुद्वित्वस्य । तत्स्वरूपस्यानन्यथासिद्धनियमपूर्ववृत्तित्वानां च कल्पने गौरवात् ।।

अन्यत्र तथात्वेपि परमाणु ३ गतैकत्वसङ्ख्याया असम्भवितातापेक्षाबुद्धिजन्यपरिमाण्वादिगतद्वित्वबहुत्वसंख्ये १ प्रत्यसमवायित्वकल्पनापेक्षया
परिमाणसमवायिकारणकल्पनस्यैयोचितत्वात् । तद्धेतोरेवास्तु हेतुत्वं किं तेनेति न्यायात् । अनेकत्वं तु क्लृप्तत्वात्कल्प्य
द्वित्वाद्यपेक्षया लघ्वित्युक्तम् ।।
यद्येकत्वानामेनकत्वेनापरितोषं मन्यसे तर्हि क्लृप्तत्वाद्द्रव्यारम्भकमेव परिमाणारम्भकमस्तु । किं सङ्ख्ययापीत्याह -- किञ्चेति ।। एकस्येति ।। त्र्यणुकारम्भकद्व्यणुकत्रयसंयोगस्यानेकत्वेपि द्व्यणुकारम्भकपरमाणुद्वयसंयोगस्यैकत्वादेकस्येत्युक्तम् । अत एवाग्रे 'न तु द्वित्वस्ये'त्येवेक्तिः ।।
ननु द्रव्येत्पत्तावन्यथासिद्धस्य कथं परिमाणहेतुतेत्यत आह -- नियतेति ।। अनन्यथेति ।। अनन्यथासिद्धिश्च नियमश्च
पूर्ववृत्तित्वं च तेषामिति विग्रहः । द्वित्वजन्यत्वेपि परिमाणस्य नेश्वरसिद्धिरित्याह -- किञ्चेदानींतनेति ।।

१.द्वत्व-ख-क. २.द्विमात्र-कुं-ग, द्धनियतपूर्ववर्तित्वानां -च-ख-रा, नियमपूर्व-ग.
ण्वादि -अ. ४.'संख्ये' इति नास्ति-कुं.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३७०.
---------- ---------- -------
किञ्चेदानींतनब्राह्मणस्य ब्राह्मणपूर्वकत्वेपि सर्गादिकालीनस्य तस्यादृष्टविशेषोपहितभूतपूर्वकत्ववत्
इदानींतनद्वित्वादेरपेक्षाबुद्धिजन्यत्वेप्यादिकालीनस्यादृष्टविशेषोपहितपरमाणु मात्रपूर्वकत्वमस्तु । अन्यथा नित्यापेक्षाबुद्धिवन्नित्यब्राह्मणोपि कल्प्यः स्यात् ।।
युक्तं चैतत् । अन्यथा समवाय्यपेक्षाबुद्धिनाश १ रूपयोः परमाणुवृत्तिद्वित्व २ नाशहेत्वोपभावेन तन्नाशाभावापातात् । अदृष्टविशेषोपहिताया ईश्वरनिष्ठापेक्षाबुद्धेर्हेतित्वेन तन्नाशाद्वित्व ३ नाशे आवश्यकत्वाददृष्टविशेष एव हेतुरस्तु ।

'ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः परिकीर्तितः'।
इति स्मृतेराह-- ब्राह्मणस्येति ।। भूयेति ।। पृथिव्यादिपञ्चमाहाभूतेत्यर्थः ।
सर्गादावदृष्टोपगृहीतभूतभेदान्मीनादिशरीरोत्पत्तावित्यादिमणिकृदाद्युक्तेरिति भावः।।
वैजात्ये समानेऽपि कोत्र पक्षे विशेष इत्यत आह -- युक्तं चैतदिति ।। अन्यथेति
।। नित्येश्वरापेक्षाबुद्धिजन्यत्व इत्यर्थः -- तन्नाशेति।। द्वित्वनाशेत्यर्थः । ईश्वरापेक्षाबुद्धेर्नित्यत्वादवनिनाशेऽपि तदुत्पादित द्वित्वादे

निमित्तान्तरनाशेन नाश इति वर्धमानोक्तमाशङ्क्य निराह -- अदृष्टेति ।। तन्नाशेति ।। अदृष्टनाशेत्यर्थः -- न चैवमिति ।। क्वचि ४ द्वृष्टोपहितपरमाणुपूर्वकत्वे ---

१.रूपपदं न -छ-च-क-ख-रा. २.विनाश-मु-च-छ-क-रा. ३.त्वादि-रा. ४.ददृष्टो-कुं.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३७१.

न चैवमननुगमः । ब्राह्मणवद्वैजात्यसंभवात् ।।
किंच द्वित्वादेरपेक्षाबुद्धिजन्यतैव न । अन्वयव्यतिरेकानुविधानस्य व्यञ्जकत्वेनाप्युपपत्तेः । न चाविनिगमः । सेनादिबुद्ध्यालम्बनस्येयत्तयाऽनिश्चितानेकैकत्वबुद्धिजन्यस्य बहुत्वस्य सत्वेपि इयत्तया विनिश्चितैकत्वबुद्धिरूपव्यञ्जकाभावेन शतत्वाद्यप्रतीत्या व्यञ्जकत्वस्य त्वयापि स्वीकारात् ।।
वस्तुतस्तु व्द्यणुकादिपरिमाणं त्वदुक्तसङ्ख्या विपरिमाणजन्यमेव ।

-- क्वचिदपेक्षा १ बुद्धिपूर्वकत्वे च सतीत्यर्थः -- ब्राह्मणवदिति ।। आदिकालीनब्राह्मणस्य कारणवैजात्यवदिहापि संभवादित्यर्थः । यद्वा तृणारणिमणिन्यायेनादिकालीनेदानींतनयोर्ब्राह्मणयोर्भिन्नकारणजन्ययोर्वैजात्यावदिहाप्युपपत्तेरित्यर्थः ।।
२ द्वित्वादेरपेक्षाबुद्धिजन्यत्वमभ्युपेत्योक्तम् । वस्तुतस्तदेव नास्ति । येन तदाश्रयतयेश्वरसिद्धिः स्यादित्याह --किञ्चेति ।। तदन्वयाद्यनुविधाना ३ त्कथमित्यत आह -- अन्वयेति । एवमुत्प्रेक्ष्य स्वयं पक्ष चतुष्टयमुक्त्वा इदानीं --
'महत्वं चैव दीर्घत्वं त्र्यणुकाद्येषु कल्पितम् ।

तस्माच्च सदृशं कार्यं तत्कार्येषूपजायते ।।
यथा तथैव ह्रस्वत्वात्पारिमाण्डल्यतोपि हि ।
जायेत सदृशं कार्ये परिमाणं समत्वतः ‘ ।।
इत्यादिवैशेषिकाधिकरणानुव्याख्यानोक्तसमाधिमाह -- वस्तुतस्त्विति ।।
विपर्ययेणापीत्यादिवाक्यारूढत्वाय
त्वदुक्तसङ्ख्याविपरीतेत्युक्तिः ।।

बुद्धिपदं न -मु. २.द्वित्वाश्रय कार्यबुद्धि -अ. ३.नरूपमित्यत आह - अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३७२.

परमाणुव्द्यणुकपरिमाणं रम्भकंद्रव्यसमवायिकारणपरिमाणत्वात् त्र्यणुकपरिमाणवदित्याद्यनुमानात् ।।	परिमाणा	१
न च परमाणुपरिमाणं २ परिमाणानारम्भकं नित्यपरिमाणत्वात् गगनपरिमाणवत्, अणुपरिमाणत्वात् मनःपरिमाणवदित्य ३ नेन सत्प्रतिपक्षता । द्रव्यसमवायिकारणपरिमाणत्वाभावस्योपाधित्वात् ।।		

सुधोक्तप्रयोगमाह- परमाणुव्द्यणुकपरिमाणमिति ।। समुदायाभिप्राय ४ मेकवचनम् । परिमाणे इत्यर्थः । स्वस्वकार्यव्द्यणुकत्र्यणुकगतपरिमाणारम्भके इति ५ साध्यार्थः । द्रव्यसमवायिकारणगतपरिमाणत्वादिति हेत्वर्थः । अत्र द्रव्येत्युक्त्या शब्दसमवायिकारणगतगगनपरिमाणे, समवायीत्युक्त्या घटकारणदण्डादिपरिमाणं. गुणत्वादित्यनुक्त्वा परिमाणत्वात्युक्त्या परमाण्वादिगतरूपादौ व्यभिचारशङ्का निरासः । आदिपदेन ‘व्द्यणुकत्र्यणुकपरिमाणे स्वाश्रयसमवायिकारणगतपरिमाणारब्धे

कार्यगतपरिमाणत्वात् चतुरणुकादिपरिमाणव'दित्यादिसुधोक्तग्रहः । इत्याद्यनुमानात्परिमाणजन्यमेवानुमीयत इति पूर्वेणान्वयः ।।
सुधोक्ते एव प्रतिपक्ष ६ शङ्कातत्समाधाने चाह -- न चेत्यादिना ।। मृत्पिण्डादिपरिमाणे व्यभिचारवारणाय हेतौ नित्येत्युक्तिः -- द्रव्येति ।।

१.अन्तरा इत्यधिकं-कुं. 'परिमाण' इत्यारभ्य, न वेत्यादौ 'परिमाणं' इत्यन्तं नास्ति -क. २.न परिमाणारम्भकं-मु-छ-ख. ३.दित्यनुमानेन -कुं-क. ४.येणै-इ. ५.त्यर्थः -इ. ६.क्षाशं -मु.

ईस्या-नुकत्वः-भङ्गः) ईश्वरवादः पु - ३७३.
---------- ------- --------
न चाप्रयोजके हेतुः । कारणगतगुणानां कार्य १ गुणं प्रति सजातीयत्वेनानम्भकत्वस्योत्सर्गिकत्वत् । परिमाणसामान्यं प्रति कारणत्वग्रहदशायां परिमाणत्वस्य नियमेनोपस्थितेश्च ।।

गगनकालपरिमाणे साध्यव्यापकत्वात् साधनवति पक्षेऽभावेन साधनाव्यापकत्वादिति भावः। न च पूर्वसाधनव्यतिरेकत्वान्नायमुपाधिः, प्रतिपक्षमात्रोच्छेदापत्तेरिति वाच्यम् । प्राची २ नहेतोरनुकूलतर्कवत्वेन साध्यव्याप्यत्वनिश्चये सति तद्व्यतिरेकस्य प्रतिपक्षानुमाने साध्यव्यापकत्व निश्चयात् । यत्र तु स्थापनाया आभासत्वं तत्रैवं विशेषादर्शनदशायां सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकस्य साध्यव्यापकत्वेनानुपाधित्वम् । यथा शब्दोऽनित्यः गुणत्वादित्यत्र शब्दो नित्यो व्योमैकगुणत्वादित्यनेन सत्प्रतिपक्षे गुणत्वाभावेनोपाधिः । जलपरमाणुरूपे साध्याव्यापकत्वात् । अत्र पूर्वसाधनव्यतिरेकस्याप्युपाधित्वे न कोपि ३ दोष इति भावेन स्थापनायां निरुपाधिसहचारकार्यकारणभावग्रहरूपानुकूलतर्कौ व्यनक्ति । न

चाप्रयोजको हेतुरित्यादिना ।। औत्सर्गिकत्वादिति ।। जातित एव प्राप्तत्वात् अपवादाभावे तस्यापि प्रमाणत्वात् । बाधकस्य चेहाग्रे निरसिष्यमाणत्वात् अस्याप्युत्सर्गविषत्वमेवेति भावः।।
नचैवमपि तूलपिण्डादिपरिमाणस्य ४ शिथिलभूयोऽवयवसंयोदरूपप्रचयमात्रजन्यत्वात् तूलपिण्डसमवायिकारणगतपरिमाणे व्यभिचारी ५ स्थापनाहेतुरिति वाच्यम् । तस्यापि पक्षतुवल्यत्वात् ।।

१.'गत' इत्यधिकं-छ. २.गुक्त-मु. ३.विशेष इति -इ. ४.प्रशि-अ. ५.रस्था-अ-इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३७४.

ननु तूलपिण्डादिपरिमाणे प्रचयाख्य संयोगविशेषस्य समानपरिमाणाल्पसङ्ख्याकावयवारब्धापेक्षया तादृशाधिकसंख्याकावयवारब्धद्रव्यगतातिशयितपरिमाणे बहुत्वसङ्ख्यायाश्च कारणत्वदर्शनात् सामान्यविशेषन्यायेन परिमाणसामान्यं प्रति संयोगसामान्यस्य संख्या १ सामान्यस्य वा कारणत्वमस्त्विति चेन्मैवम् ।

न चैवं सत्यंशे बाधः । प्रचयकारणताया अप्यनिवारणात् । न चोभय२ कारणत्वकल्पने गौरवदोषः । 'द्वयोरपि क्लृप्तशक्तित्वा'दिति सुधायामेवोक्तत्वत् । न च क्लृप्तशक्तित्वं परिमाणे ३ ऽसिद्धम् । कारणगतेत्यादिनोक्ततर्कद्वयसिद्धत्वात् । वक्ष्यमाणदिशा प्रचयसङ्ख्ययोः परिमाणहेतुत्वादिति भावः ।।

कारणपरिमाणस्य कार्यपरिमाणं प्रतीव प्रचयसङ्ख्ययोरपि कारणत्वं क्लृप्तमिति इह परमाण्वादिगतसङ्ख्यापि कारणं स्यादिति शङ्कते -- नन्वति ।। संयोगविशेषस्येति ।। कारणत्वदर्शनादित्यन्वयः । ४ प्रचयः प्रसङ्गादुपात्तः । बहुत्वस्य कारणत्वग्रहे स्थलमाह । समानेति ।। तुल्यपरिमाणकपालद्वयारब्धघटापेक्षया ५
तत्तुल्यपरिमाणकपालत्रयजन्यघटगतपरिमाण इत्यर्थः । तादृशेति ।। पूर्वद्रव्यावयवसमानपरिमाणेत्यर्थः ।। सामान्येति ।। यद्विशेषयोः कार्यकारणभावो बाधकाभावे तत्सामान्ययोरपि कार्यकारणभाव इति न्यायेनेत्यर्थः ।।
कार्यगतपरिमाणं प्रति कारणगतपरिमाणमेव सर्वत्र हेतुर्न तु प्रचयादिरपीति सिद्धान्तयति -- मैवमित्यादिना ।।

१.या वा -छ-संख्यासमामान्येति नास्ति -ख. २.यत्र का -कुं. ३.णसि-मु. ४.प्रचयेत्यादि नास्ति-कुं. -इ. ५.तत् इति नास्ति -मु.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३७५.

औत्सर्गिकस्य नियतोपस्थितिकस्य च १ साध्ये सत्येव तद्विपरीते प्रमाणप्रवृत्तेः । न चैवं द्व्यणुकत्र्यणउकपरिमाणयोः परमाणुपरिमाणसाजात्यं स्यादिति वाच्यम् ।
गुणत्वासाक्षात्द्व्याप्यजात्या साजात्यापादन इष्टापत्तेः । तद्व्याप्यजात्या तदापादने तन्तुपरिमाणगतस्य महत्वव्याप्यस्या २ पकर्षरूपजातिविशेषस्य ३ पटपरिमाणेऽभावेन व्यभिचारात् । अन्यथा संख्यासंयोगजन्यत्वेऽपि महत्समवेतयोस्तयोरणउत्वजनकत्वं स्यात् ।।
किञ्च द्व्यणुकादिपरिमाणस्य केवलसङ्ख्यायो ४ नित्य एव द्वित्वादिवत्सङ्ख्यात्वेन कारणसाजात्यं स्यात् ।।

५ यद्वा अन्यत्र सङ्ख्याया ६ मपि ७ क्लृप्तशक्तित्व ८ मस्तु । प्रकृते तु उत्सर्गतः प्राप्तपरिमाणहेतुत्वमेवास्तु बाधकाभावादित्याह -- मैवमित्यादिना ।। अस्ति ९ परमाण्वादिपरिमाणारम्भवादेऽपि तुल्यपरिमाणापत्तिरेव बाधिकेत्याशङ्क्य निराह -- न चैवमिति ।। परमाण्वादिपरिमाणस्य स्वकार्यगतपरिमाणारम्भकत्व इत्येवंशब्दार्थः -- साजात्यमिति ।। तथा चाप्रत्यक्षतापत्तिरिति भावः । साक्षाद्व्याप्येति ।। परिमाणत्वजात्येत्यर्थः ।।
तद्व्याप्यव्याप्येति ।। परिमाणं चतुर्विधम् । अणुत्वं, महत्वं, दीर्घत्वं ह्रस्वत्वं चेति ।

१.च इति नास्ति-कुं. २.स्योत्क-कुं-ग. ३.पटपदं न -ख. ४.गिते-क-छ-रा. ५.यद्वेत्यादि नास्ति -इ. ६.या अपि -मु. ७.'क्लृप्त.....प्रकृतेतु' इत्यन्तं नास्ति -मु. ८.त्वेपीहोत्सर्ग-अ. ९.स्तु-मु.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३७६.
---------- ---------- ---------
किञ्च परसिद्धं १ परिमाणत्वावान्तरमणुत्वादिजातिभेदमङ्गीकृत्ये २ दमुक्तम् ।।
वस्तुतस्तु यथा त्र्यणुकादिषु महत्वमे ३ कजातीयमेवोत्कर्षापकर्षवत्, यथा ४ चाणुत्वं परमाणुद्व्यणुकयोः एवं परिमाणमवान्तरजातिरहितमेव सर्वद्रव्येषूत्कार्षापकर्षवद्वर्तते । एतस्यैवोत्कर्षापकर्षो च प्रतियोगिभेदेन सन्निकर्षविप्रकर्षाविवाविरुद्धौ विस्तरस्तु सुधायां द्रष्टव्यः ।।

नीलत्वपीतत्वाद्यवान्तरजातिवत्परिमाणत्वान्तरजातिचतुष्टयमुपेत्य

परमाणावेवाणुपरिमाणं द्व्यणुके ह्रस्वपरिमाणं त्र्यणुकादौ महत्वादित्यभ्युपगमेन
द्व्यणुकेप्यणुत्वरूपपरिमाणत्वावान्तरजातिमत्परिमाणं त्र्यणुके च ह्रस्वत्वरूपपरिमाणत्वव्याप्यजातिमत्परिमाणं स्यादित्यापादाने चेत्यर्थः ।।
स्वोत्प्रेक्षितपक्षैः सहोक्तानि पञ्चमा समाधानान्यपि ६ परिमाण ७ प्रवादाननु ८ कूलानीति मन्वानः 'परमतमाश्रित्य परस्येदं दूषणाभिधानम् 'इति सुधोक्तं हृदिकृत्वाह - किञ्च परासिद्धेत्यादि ।।

१.द्धप-ग-कुं. २.त्यचे-मु. ३.एकपदं न -छ-ख-क-रा. ४.वा-च-छ-क-रा. अवयवाणुत्वं पर-ख. रसा-कुं-ग. ६.न परि-मु-अ. ७.ण्वादा -मु - अ. ८.दानुकू - मु - अ.

ईस्या-नुकत्व-भङ्गः) ईश्वरवादः पु - ३७७.
---------- ---------- ---------
तस्मादीश्वरस्य ५ सार्वज्ञादेर्वेदनिरपेक्षानुमानेनासिद्धेः कल्पनागौरवं सुस्थम् ।।
१ ईश्वरस्यानुमानिकत्वभङ्गः ।। २२ ।।
२ ईश्वरवादः समाप्तः ।।

सुधायामिति ।। वैशेषिकाधिकरणे समयपाद इत्यर्थः ।।
ईश्वरस्यानुमानिकत्वभङ्गः ।। २२ ।।
ईश्वरवादः समाप्तः ।।

ननु तथापि वर्णसमुदायरूपस्य ३ वेदस्य न नित्यत्वम् । शान्तः कोलाहलः श्रुतपूर्वो गकारो नास्तीत्यादिप्रत्यक्षेण, वर्णोऽनित्यः भावत्वे सति कृतकत्वादितयनुमानेन च वर्णानामेवानित्यत्वादिति चेदुच्यते ।

तथापीति ।। पौरुषेयत्वे धर्माद्यसिद्धावपि ४ कल्पनगौरवदोषभावेपि वेद ५ पौरुषेयत्वे मानाभावेपीत्यर्थः । न नित्यत्वमिति ।। नानादिनित्यत्वमित्यर्थः ।।
द्वितीयस्तबके कुसुमाञ्जलावुदयनोक्तमाह ।। शान्त इति ।। श्रुतेति ।। पूर्वं श्रुतः श्रुतपूर्व इत्यर्थः । शब्दोऽनित्य उत्पत्तिधर्मत्वादित्युदयनानुमानस्य
परिष्कारपूर्वं मणानुक्तस्यायमनुवादो वर्ण इत्यादि ।।

१.इति इत्यधिकं -छ. २.ईश्वरवादः समाप्तः इति-ख. पुस्तकभिन्नेषु नास्ति. ३.वेदपदं न -रा. ४.प्यपौ-इ. ५.दापौ-इ-अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३७८.
---------- ---------- ----------
शान्तः कोलाहल इति धार्ध्वनि १ वषयैव । ध्वनिविशेषस्यैव कोलाहलत्वात् । श्रुतपूर्वो गकारो नास्तीति धीस्तु नास्त्येव ।श्रुत २ एव गकारः पुनःश्रूयते एक एव गकारोऽसकृदुच्चारित इत्यादिप्रत्याभिज्ञाविरोधात् । किन्तूच्चारणेनोपलब्ध ३ वर्णस्यानुपलब्धिमात्रेण श्रुतपूर्वो गकारो न श्रूयत इत्येव ४ धीः । उक्तं हि टीकाकारैः 'प्रागुच्चारणा ५ दनुपलब्धा वर्णा
उच्चारणे सत्युपल ६ लभ्यन्ते इत्येवानुभवसिद्धम् । न तु तेषामुत्पत्तिर्विनाशो वा'इति ।।

मणौ वर्णात्मकशब्द इत्युक्तावपि मणिकृन्मतेंऽशतस्सिद्धसाधनस्या दोषत्वाद्वर्णपदानर्थकत्यम् । वर्ण इत्येव तु छलत्वात्तथाशङ्कैव न युक्तेति वर्णोऽनित्य ७ इत्येवानुवादःकृतः ।

वर्णानामनित्यत्वेपि न वेदनित्यत्वक्षतिः । तथाप्यभ्युपेत्य तत्समाधत्ते । उच्यत इत्यादिना ।। व्यक्तं चैतद्वेदान्ते ग्रन्थ एव ।।
ध्वनिविशेषस्यैवेति ।। यत्तु वर्धमाने ८ अनभिव्यक्तवर्णत्वव्याप्यजातिविशेषो वर्णसमूह एव कोलाहल इत्युक्तम् । तन्न । वर्णशून्यध्वनिविशेषेपि कोलाहलपदप्रयोगात् ।। प्रत्यभिज्ञेति ।। तद्भ्रान्तित्वं त्वग्रे निरसिष्यत इति भावः ।। उक्तं हीति ।। 'न चोच्चारणकाल एव वर्णा ९ नुत्पत्तिरिति वाच्य'मिति तत्वनिर्णयवाक्यसम्बन्धिटीकायां
वर्णजन्मवर्णाभावबुध्योरुच्चारणक्रियाविषत्वमित्येतदुक्तमित्यर्थः ।।

१.विशेष इत्यधिकं-मु. २.पूर्व इत्यधिकं-ख. ३.स्य व -च-ग-ख-कुं. ४.'एव' इति नास्ति-क-ख-कुं. ५.णानु-कुं. ६.ब्धा-ख. ७. नित्य इति नास्ति -कुं. ८.नाभि -मु. ९.नामु -अ-इ.

अस्तु वा सा । १ तथापि घटो नास्तीतिवन्न विशेष्यमात्रनिषेधिका । श्रुतपूर्वत्वनिशिष्टनिषेधस्त्वलं कृतपूर्वश्चैत्रो नास्तीतिवत्पूर्वकालावच्छिन्नश्रवणध्वं २ सरूपविशेषण ३ निषेधेनाप्युपपन्नः ४ ।।
अस्तु वा सा विशेष्यमात्रनिषेधिका । तथापिव्यञ्जक उच्चारणेऽव्यञ्जकत्वभ्रान्त्याऽलिङ्गेऽनुपलब्धिमात्रे
योग्यानुपलब्धिरूपलिङ्गाभिमानाद्भ्रान्तिरूपानुमितिरेव सा ।

अनुभवे विप्रतिपन्नं प्रत्याह -अस्तु वा सेति ।। श्रुतपूर्वो गकारो नास्तीति धीरित्यर्थः । न विशेष्यमात्रेति ।। घटस्य केवलत्वादस्य च

सविशेषणत्वादिति भावः । अलमिति ।। पूर्वमलंकृतोऽलंकृतपूर्व इत्यर्थः । विशेषणनिषेधेनेति ।। 'सविशेषणे हि विधिनिषेधौ विशेष्ये बाधे विशेषणमुपसंक्रामत' इति न्यायादिह न विशेष्यबाधस्य प्रागुक्तप्रत्यभिज्ञानविरोधेन व्यक्तत्वादिति भावः ।।
विशेष्यबाधे विवादिनं प्रत्याह ।। अस्तु वा सेति ।। धीरिस्यर्थः । तथापीति ।। भ्रान्तिरूपेत्यादिनान्वयः । भ्रान्तिरूपत्वे बीजमाह ।। व्यञ्जक इति ।। वर्णौ नास्ति अनुपलब्धेः स्तम्भादिवदिति लिङ्गाभालजन्यानुमितिरेव । न प्रत्यक्षरूपा । नापि प्रमितिरूपा । परमाण्वादावनुपलम्भे सत्यपि नास्तित्वाभावेन व्यभिचारितयानुपलब्धिमात्रस्यालिङ्गत्वेन तल्लिङ्गत्वस्याभिमानिकत्वात् । अलिङ्गे च लिङ्गत्वाभिमानो योग्यानुपलब्धित्वभ्रममूलः। सोपि भ्रमः उच्चारणस्य न वर्णाभिव्यञ्जकत्वम् । किन्तूत्पादकत्वमेवेति भ्रान्तिमूल एवेत्यर्थः।।

१.'तथापि' इति नास्ति-छ- २.ध्वंसपदं नास्ति -मु-च, ध्वंसेनाप्यु-रा. ३.ध्वंसेनाप्युप -छ-ख. ४.न्ना - कुं.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३८०.

न तु प्रत्यक्षा । प्रत्यासत्यभावात् ।।
न चेन्द्रियविशेषणता प्रत्यासत्तिः । चक्षुषा स्वविशेषणीयभूतस्य घटनिष्ठरूपप्रतियोगिकाभावस्य ग्रहप्रसङ्गाक् ।

एतेन श्रुतपूर्वो गकारो नास्तीति प्रतीतिर्निरनुमानादित्यसत् । शब्दस्यैव पक्षीकरणे हेतोरनाश्रयात्वम् । आकाशस्य पक्षत्वे तद्वत्तयानुपलभ्यमानत्वहेतोर १ नेकान्तिकत्वम् । शब्दसद्भावकालेपि

तस्य सत्वात् । एवं कालपक्षेपि दोषात् । अहमिदानीं निःशब्दश्रोत्रवान् शब्दोपलब्धिधरहितत्वात् बधिरवदिति चेन्न । दृष्टान्तस्य साध्यविकलत्वात् व्याहतत्वाच्चेत्यादिखण्डनं
निरस्तं ध्येयम् ।।
अतीतघटादौ ज्ञानविषयत्वाभावप्रतियोगित्वादिधर्मवदनुपलभ्य मानधर्मस्यापि सम्भवेनासिद्ध्यादेरनापत्तेरिति । न तु प्रत्यक्षेति ।। तादृशबुद्धेः प्रत्यक्षत्वेपि शुक्तिरूप्यादिप्रत्यक्षवत्प्रत्यभिज्ञारूपप्रबलप्रत्यक्षबाधाद्भ्रान्तिरेवेति सुवचम् । तथाप्युदयनोक्तप्रत्यक्षत्वोपपादनखण्डनायैवमुक्तिः ।।
अस्ति हि श्रोत्रशब्दाभावयोर्विशेषणविशेष्यभाव इत्यादिनोदयनोक्तमाशङ्क्य निराह -- न चेन्द्रियेति ।। श्रोत्ररूपेन्द्रिये शब्दाभावस्य सत्वेन तयोः सम्बन्धान्तरमात्रेण तदुपश्लिष्ट्स्वभावरूपविशेषणताप्रत्यासत्तिरित्यर्थः । विशेषण २ भावेनैव समवायावयोर्ग्रहणादिति भावः -- चक्षुषेति ।। स्वसम्बन्धिविशेषणतयैवाभावादेरिन्द्रियेण ग्रहणात् । न तु स्वविशेषणत्वेनैव ।

१. नैका - अ- इ. २.विशेष्य इत्यधिकं -मु.

वर्णा-त्वस्य-प्रत्व-भङ्गः) वर्णवादः पु - ३८१.
---------- ------- --------
१ त्वदभिमतस्य योग्येऽधिकरणेऽनुपलब्धिरूपस्येन्द्रियसचहकारि २ णोऽसत्वाच्च । त्वन्मते ३ चाधिकरणस्य गगनस्यायोग्यत्वात् ।।
न चाधिकरणस्यायोग्यत्वेपि प्रतियोगिनो योग्यत्वात्तत्सहकारिणी योग्यस्यानुपलब्धिरस्तीति वाच्यम् । पार्थिवपरमाणौ जलत्वाभावस्य प्रत्यक्षत्वप्रसङ्गात् ।।

तथात्वे घटनिष्ठं यद्रूपं तत्प्रतियोगिकाभावस्य चक्षुष्यपि सत्वेन चक्षुषा विशेषणतारूपप्रत्यासत्या मम चक्षुषा घटरूपं नेति रूपाभावग्रहणप्रसङ्ग इत्यर्थः।।

ननु प्रत्यासत्तेः फलबलकल्प्यत्वाद्रूपाभावादिना विशेषणतारूपप्रत्यासत्तिकल्पकं नेत्यतो दोषान्तरमाह -- योग्य इति ।। यद्वा स्वसम्बन्धिविशेषणतयैवाभावादेरिन्द्रियेण ग्रहणात् ।। चक्षुषा च घटादिरूपाभावो रूपत्वादौ रूपं नेति गृह्यत एव । प्रकृते च श्रोत्रसंम्बन्ध्याकाशविशेषणतास्त्येव शब्दाभावस्येत्यतः किं योग्ये स्वसंबन्धिनि विशेषणतयाभाव ग्रहः उतायोग्ये ? आद्य आह -- योग्य इति ।। अनुपलब्धीति ।। प्रत्यक्षयोग्यप्रतियोगिनोऽनुपलब्धीत्यर्थः । सिद्धान्ते साक्षिप्रत्यक्षत्वादाह -- त्वन्मत इति ।। अन्त्योऽतिप्रसङ्गदुष्ट इति भावः । ननु नातिप्रसङ्गः । प्रतियोगिनो योग्यत्वस्यातिप्रसङ्गभञ्जकत्वादिति भावेनाशङ्क्य निराह ।। न चेति ।।

त्वदभिमतस्येति नास्ति -ग. २.रूप इत्यधिकं-ग. ३.च इति नास्ति -क-रा.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३८२.

न च प्रतियोगिवद्व्याप्येतरप्रतियोग्यु १
पलम्भकसामग्रीरूपयोग्यताविशिष्टानुपलब्धिस्तत्सहकारिणी । एवं च जातिग्रहे व्यक्तियोग्यताया अपि कारणत्वात्परमाणोश्चा २
योग्यत्वान्नोक्तदोषः ।

यद्वा अनुपलब्धिर्हिप्रत्यक्षस्याभावग्रहे सरकारिणी । सा च नानुपलब्धिमात्रम् । अति प्रसङ्गात् । किन्तु योग्यानुपलब्धिः । सा च योग्येऽधिकरणेऽनुपलब्धिरूपा वा, योग्यस्य प्रतियोगिनोऽनुपलब्धिरूपा वा, योग्य ३ रूपानुवलब्धि ४ भूतानुपलब्धिरूपा वा ? तत्रानुपलब्धेर्योग्यत्वं च किं प्रतियोगितद्व्याप्येतरेत्यादिरूपं वा, प्रतियोगिसत्वविरोधित्वरूपं वा, प्रतियोगिसत्वा ५ पादनेत्यादिरूपं वा ? पक्षपञ्चकेऽपि न वर्णाभावस्य प्रत्यक्षतासिद्धिरिति भावेनाद्यं निराह । योग्य इति ।। द्वितीयमाशङ्क्या निराह ।। न चेति ।।
उक्तदोषनिरासाय तृतीयं पक्षं ६ कुसुमाञ्जल्युक्तमाशङ्क्य ७ निराह । न चेति ।। प्रतियोगि ८ घटादि, ९ यच्च
घटादिव्याप्यं सन्निकर्षादि, ताभ्यामित्तरा १० घटादिलक्षणप्रतियोग्युपलम्भकसामग्री सैवानुपलब्धेर्योग्यता । तद्विशिष्टानुपलब्धिरभावप्रत्यक्षे सहकारिणीत्यर्थः । घटाभावप्रत्यक्षे तथादर्शनादिति भावः । प्रतियोगिसत्वेनुपलब्धेरेवाभावः । तव्याप्ये सत्यपिप्रतियोगिनः सत्वनियमेनानुपलब्धिर्नेति ताभ्यामितरत्वेनोपलभ्यकसामग्री विशेषिता ।। नोक्तदोष इति ।। उपलम्भकसामग्रीरूपयोग्यताऽभावेन पार्थिवपरमाणौ जलत्वाद्यभावप्रत्यक्षतापत्तिदोषो नेत्यर्थः ।११ नन्वेवं शाब्दाभावोपि न प्रत्यक्षः स्यात् जातिग्रह इव विशेषणग्रहेप्याश्रययोग्यत्वस्य तन्त्रत्वा . . . . योग्यानुपलब्ध्यभावादित्यत आह ।। विशेषणेति ।।

१.ग्यनुप-रा. २.च इति नास्ति-छ. ३.भूत-मु-अ. ४.रूप-मु-अ. ५.संजन-मु. ६.'यद्वा' इत्यादि एतत्पर्यन्तो ग्रन्थः नास्ति -इ. ७.'आशङ्क्य'इति नास्ति-कुं. ८.गी-मु. ९.दिः -मु-अ. १०.नन्वित्यादि नास्ति -अ-इ-मु.

विशेषणग्रहे त्वाश्रययोग्यता न हेतुः । अन्यथागन्धादिग्रहो न स्यादिति । शब्दाभावग्रह १ उक्तरूपानुपलब्धिरस्तीत्युदयनोक्तं युक्तम् । एकस्य संयोगिनोऽपगमे सति संयोग २ ध्वंसस्याप्रत्यक्षतापातात् । तत्र प्रतियोगिभूतात्संयोगात्तद्व्याप्यात्सन्निकर्षाच्चातिरिक्तस्य संयोगोपलम्भकस्यैकस्य संयोगिनोऽभावात् । वर्णोपलम्भकस्योच्चारणस्याभावेनोपलम्भकसामग्र्या असत्वाच्च ।। एतेन प्रतियोगिसत्वविरोध्यनुपलपलब्धिरूपा ३ योग्यानुपलब्धिस्तत्सहकारिणी,

शब्दरूप ४ रसगन्धातिविशेषणेत्यर्थः । तथा च गगनलक्षणाधिकरणस्यायोग्यत्वेप्युक्तरूपयोग्यताविशिष्टशब्दानुपलब्धेर्भावेन। श्रोत्रेण गगने शब्दाभावग्रहो युक्त इति भावः कुतोप्रत्यक्षत्वापात इत्यतः यावदुलम्भकमेलनरूपसामग्र्यभावादिति भावेनाह ।। तत्रेति ।। एकसंयोगिनोपगमस्थल इत्यर्थः ।। ननु संयोगाभावान्याभावप्रत्यक्षे सहकारिणीयमनुपलब्धोर्योग्यतेत्यत आह।वर्णेति।। सन्निकर्षग्रन्थान्ते मण्युक्तदिशा शब्दाद्यभावप्रत्यक्षत्वानुकूलं चतुर्थपक्षभूतं योग्यत्वमनूद्य निराह ।। एतेनेति ।। प्रतियोगिसत्वविरोधीति बहुव्रीहिः । यस्या अनुपलब्धेः प्रतियोगिसत्वं विरोधि सानुपलब्धिर्योग्यानुपलब्धिः । भूतले घटाद्यनुपचलब्धस्तादृशी । परमाण्वाद्यनुपलब्धिस्तु नैवम् ।

१.तु इत्यधिकं -क-ख-कुं-रा. २.प्रध्वं -ख. ३.पयो-च. ४.रूपपदं न -कुं-अ.

सा च शब्दाभावे संयोगध्वंसे चास्ति, शब्दादेः १ सत्वेनुपलब्ध्ययोगात्, पार्थिवपरमाणुगते जलत्वाभावे तु नास्ति, व्यक्तेरयोग्यत्वेन जलत्वानुपलब्धिसम्भवादिति मण्युक्तं निरस्तम् । उक्तप्रत्यभिज्ञया शब्दस्य सत्वेपि व्यञ्जकाभावेनानुपलभ्यसम्भवात् ।।

एतेनैवप्रतियोगिस २ त्वासञ्जनप्रयु ३ क्तसञ्जनविषयभूतोपलब्धेरभावरूपा योग्यानुपलब्धिस्तत्सहकारिणी । अत एव ४ पक्षिलभाष्ये यदिस्यात्तर्ह्युपलभ्येतेति तर्कपुरस्कारमेवाभावज्ञानं व्यत्पादितम् । न चैवं घटे मनस्त्वात्यन्ताभावो वायौ रूपवदन्योन्याभावश्च प्रत्यक्षः स्यात् ;

तत्सत्वेप्यनुपलब्धिसम्भवादिति भावः ।। तत्सहकारिणीति ।। अभावप्रतच्यक्षसहकारिणीत्यर्थः । अस्मिन्पक्षे उदयनपक्षोक्तं ५ दोषद्वयं नेति व्यनक्ति ।। न चेति ।। शब्दादेरित्यादिपदेन संयोगग्रहः । पूर्वोक्तदोषश्च नेत्याह ।। पार्थिवेति ।। उक्तेति ।।

एक एव गकारोसकृदुच्चारित इति प्रागुक्तप्रत्यभिज्ञयेत्यर्थः ।।

पञ्चमं पक्षमनूद्य निराह -- एतेनेति ।। प्रतियोगिसत्वासञ्जनेति ।। आसञ्जनं देश विशेषे वर्तमानता । तत्प्रयुक्तासञ्जनविषयत्वं यस्या उपलब्धेः तादृशोपलब्ध्यभावो योग्यानुपलब्धिः । प्रतियोगिसत्वासञ्जनप्रसञ्जितप्रतियोगिताकत्वमनुपलब्धेर्योग्यत्वमित्यर्थः

--

तत्सहकारिणी अभावप्रत्यक्षसहकारिणि -- उक्तेति ।। व्यञ्जकाभावेनेत्युक्तरीत्येत्यर्थः ।

१.दौ-छ. २.त्वन्प्र इति शोधितमस्ति - छ-त्वाप्र-ख. ३.योज्या -छ.

यदि घटे मनस्त्वं स्यात्तर्हि योग्यव्यक्तिवृत्तित्वात् घटत्वमिवोपलभ्यत ; यदि महति वायौ रूपवत्तादात्म्यं स्यात् तर्हि पृथिव्यामिवोपलभ्येतेत्या २ सञ्जनसम्भवादिति वाच्यम् । उक्तयोग्यानुपलब्धेः सत्वेनेष्टापत्तेरिति निरस्तम् । उक्तरीत्या शब्दस्य सत्वेप्यनुपलभ्यसम्भवेन शब्दसत्वासञ्जनेनोपलब्ध्यासञ्जनासम्भवात् । कथं च विपर्यये पर्यवसाननहितेतर्के नियमेन सापेक्षस्याभावज्ञानस्याननुमितित्वम् । तस्मात्पररीत्यापि न वर्णध्वंस ऐन्द्रियकः । पराभिमतस्य ३ सत्तयेन्द्रियसहकारिणोऽनुपलभ्यस्याभावात् ।।

अस्मिन्पक्षेऽनुमितित्वं स्फुदमित्याह -- कथमिति ।। यदिह शब्दः स्यादुपलभ्येत नोपलभ्यते अतो नास्ति शब्द इति विपर्यये पर्यवसानसहिते । तर्क इति विषयसप्तमी । तादृशतर्कविषये नियमेनापेक्षासहितस्येत्यर्थः । त्वन्मते तर्कस्या ४ नुमानानुग्रहकमात्रत्वेनानुमितिरेव तर्कसापेक्षत्वादिति भावः -- पराभिमतस्येति ।। प्रतियोगिसत्वप्रसञ्जितप्रतियोगिकत्वादिरूपयोग्यत्वस्येत्यर्थः । अनुपलभ्यस्येत्यन्वयः-- सत्तयेति ।। स्वरूपसत्तया न तु ज्ञान ५ येत्यर्थः । तथात्वेह्यनुमानरूपतया पृथड्मानत्वेनेन्द्रियसहकारित्वाभावादिति भावः ।।

१.त्येवो -ख. २.सर्वत्र 'प्र' इत्यधिकमस्ति-ख. ३.सत्तयेति नास्ति-छ-रा. ४.'नियमेन' इत्यधिकं -मु-ए. ५.ततया-मु.

मन्मते तु नेन्द्रियस्यानुपलब्धिः सहकारिणी । तथा हि । सहकारिण्या अनुपलब्धेः प्रत्यक्षाप्रत्यक्षसाधारणोपलब्धिसामान्याभावरूपत्वे शङ्के शङ्खत्वेन
लिङ्गेन श्चैत्येऽनुमिते श्वतो नेत्यभावभ्रमानुदयप्रसङ्गः ।।
न चोक्तरूपानुपलब्धिरभावप्रमाहेतुरिति वाच्यम् । गुञ्जापुञ्जे चक्षुषारोपितेन वह्नित्वेनोष्णस्पर्शानुमितौ सत्यां त्वचोष्णस्पर्शाभावप्रमानुदयप्रसङ्गात् ।।

ननु भवन्मते घटाभावादिग्रहे चक्षुरादेर्यादृशोऽनुपलभ्यः सहकारी तादृश एव ममापि शब्दाभावग्रहेऽस्त्वित्यत आह -- मन्मते त्विति ।। चक्षुरादीना घटादेरिव तदभावस्यापि साक्षात्संयोगसम्बन्धेनैव ग्रहणोपपत्तौ किमनुपलब्धिसहकारिणेति भावेन सहकारिताखण्डनमारभते -- तथा हीति ।।
अनुपलब्धिरिन्द्रियसहकारिणीति वदन् १ प्रष्टव्यः अनुपलब्धिपदेन प्रत्यक्षादिसाधारणप्रतियोगिज्ञानसामान्याभोवो वा प्रत्यक्षादिसाधारणप्रतियोगिप्रमाभावो वा प्रतियोगिप्रत्यक्षाभावो वा अभावग्राहकेन्द्रियकरणकप्रतियोगिप्रत्यक्षाभावो (वा) विवक्षितः । आद्येपि २ फलीभाताभावग्रहपदेनाभावज्ञानमात्रताभावप्रमेति । आद्य आह -- सहकारिण्या इति ।। आद्यस्य द्वितीयमाशङ्क्य निराह -- न चेति ।। वह्नित्वेनेत्यनन्तरं लिङ्गेनेति शेषः ।।

१. ' वादी ' इत्यधिकम् - इ. २. अपिपदं न - मु.

न च प्रमात्वविशेषितोक्तपलब्धिसामान्याभावोऽभावप्रमाहेतुरिति वाच्यम् । शुक्तौ रूप्यभ्रमे सत्यपि रूप्यप्रमाऽभावस्य सत्वेन रूप्याभावप्रसङ्गात् ।। न चोक्तरूपानुपलब्धिः प्रत्यक्षरूपोपलब्धिविशेषाभावरूपा, ततो नोक्तदोष इति वाच्यम् । तथापि मण्डूकवसाञ्जनदोषेण वंशमुरगत्वेन १ चक्षुषा पश्यतस्त्वचोरग २ त्वाभावप्रमितिप्रसङ्गात् ।।
प्रत्यक्षशब्देनाभावग्राहकत्वेना ३ भिप्रेतेन्द्रिय ४ कारणकज्ञानविवक्षायामपि कपाले घटो ५ स्तीति चाक्षुषसाक्षात्कारस्य विनश्यदवस्थाऽऽपन्ने घटे उत्पन्नत्वाद्घटध्वंसानन्तरं चक्षुषा घटध्वंससाक्षात्कारो न स्यात् । ध्वंससाक्षात्कारोत्पत्यपेक्षया पूर्वक्षण रूपे ध्वंसोत्पत्तिक्षण उक्तरूपस्य घटसाक्षात्कारस्य स्थित्या तदभावरूपहेत्वभावात् ।।
तस्माद्भावसाक्षात्कारेऽभावानुपलब्धिरिवाभावसाक्षात्कारेऽपि ६ न भावानुपलब्धिः सहकारिणी ।

द्वितीयमाशङ्क्य निराह -- न च प्रमात्वेति ।। तृतीयमनूद्यनिराह -- न चोक्तरूपेति ।। अभावग्राहकेन्द्रियसहकारिरूपेत्यर्थः । अन्त्यपक्षमनूद्य निराह - प्रत्यक्षेति ।। चाक्षुषसाक्षात्कारस्येति ।। विनश्यदवस्थापन्नघटविषये ७ जातस्येति भावः ।।

१.चक्षुषा इति नास्ति - ख। २.गाभाव -च-छ. ३.भिमतें-च-ख-क. ४.करणक-ख-क-रा. ५.नास्तीति -छ-क. ६.'न' त्यनन्तरमस्ति -च-मु. ७.द्वारस्येति - अ.

किं त्ववर्जनायसन्निधिः । तदुक्तं पद्धतौ अनुपलब्धिस्त्ववर्जनीयसन्निधिरेवेति । अभावप्रत्यक्षतायां त्व १

धिकरणयोग्यता तन्त्रम् । अन्यथा परमाणौ जलत्वाभावग्रहप्रसभङ्गस्यापरिहार्थ २ स्यात् । इतरनिरूप्येषु ज्ञानेच्छादीर्घत्वपरत्वपृथक्त्वादिषु क्लृप्तत्वाच्च । अन्योन्याभावग्रहे त्वायाऽपि स्वीकृतत्वाच्च । न तु त्वदुक्तानेकविशेषणविशिष्टानुपलब्धिस्तन्त्रम् । अक्लृप्तत्वात् । विशेषणप्रयोजनस्यातिप्रसङ्गनिरासस्य दीर्घत्वादौ क्लृप्ताधिकरणयोग्यतयैव सिद्धेश्च ।।
नन्वभावप्रत्यक्षत्वप्रयोजकाधिकरणयोग्यता किमिन्द्रियग्राह्यत्वमात्रं किं वा प्रतियोगिग्राहकेन्द्रियग्राह्यत्वं यद्वाऽभावग्रहकेन्द्रियग्राह्यत्वम् ।

तर्ह्यभावप्रत्यक्षे किं तन्त्रमित्यतः 'तत्प्रत्यक्षतायां धर्मिण एव प्रत्यक्षतोपयुज्यते' इति पृथगधिकरणीयसुधावाक्यं हृदिकृत्वाऽऽह ।। अभावेति ।। इतरेति ।। सम्बन्धिकपदार्थेष्वित्यर्थः -- अनेकेति ।। प्रतियोगिसत्वासञ्जनप्रसञ्जितप्रतियोगि
३कत्वादिरूपानेकविशेषणाविशिष्टेत्यर्थः।।
नन्वनुपलब्धिमात्रस्य ग्राहकत्वे पार्थिवपरमाण्वादौ जलत्वाद्यभावः प्रत्यक्षः स्यादित्यतिप्रसङ्ग इत्यत आह -- विशेषणेति ।। दीर्घत्वेति परिमाणविशेषः । आदिपदेन पृथक्त्वादिप्रागुक्तधर्मग्रहः ।।
अस्तूक्तरीत्याऽभावप्रत्यक्षत्वेऽधिकरणयोग्यत्वस्यमेव तन्त्रं तावताऽपि शब्दाद्यभावप्रत्यक्षता सेत्स्यतीति भावेन शङ्कते -- नन्विति ।।

१.यामधि-क-ख-कुं. २.रात्-क-ख-ग-कुं. ३.गित्वा-कुं.

---------- ------- ----------

आद्येऽधिकरणं प्रतियोगिसमवायि चेदाश्रयनाशजन्यो भूतलिष्ठो घटध्वंसः प्रत्यक्षो न स्यात् । आश्रयमात्रं चेच्छब्दाधिकरणमपि योग्यमेव । वने सिंहनाद इत्यादिप्रतीत्या विशेषणरूपप्रत्यासत्याधिकरणस्य वनस्यापि प्रत्यक्षत्वात् । न द्वितीयः । स्तंभजीवनिष्ठयोः पिशायेश्वरान्योन्याभावप्रत्यक्षत्वापातात् । न तृतीयः। वायुगुडपाषाणेषु रूपतिक्तरससौरभाभावप्रत्यक्षत्वापातादिति चेन्न ।।

प्रत्यक्षो न स्यादिति ।। तत्राश्रय १ भूतसमवायिनोनाशेनै २ न्द्रियकत्वारोपाधिकरण ३ योग्यताऽभावात् । भूतलस्य चासमवायित्वादिति भावः -- वनस्यापि प्रत्यक्षत्वादिति ।। तथा च तदभावस्यापि प्रत्यक्षत्वमेवेति भावः ।।
अप्रत्यक्षत्वेति ।। मणौ हि सन्निकर्षग्रन्थान्ते स्तम्भे पिशाचतादात्म्या ४ भावः प्रत्यक्ष इति प्रतियोगिसत्वविरोध्यनुपलब्धिरूपयोग्यानुपलब्धिरभावप्रत्यक्षनियामिकेति प्रत्यक्षेस्तम्भादौ पिशाचा ५ न्योन्याभावप्रत्यक्षत्वमुपपादितम् ६ तन्न स्यात् । तत्र भवदभिमत ७ प्रतियोगिग्राहकेन्द्रियग्राह्यत्वरूपाधिकरणयोग्यताया अभावात् । प्रतियोगिनस्तत्रातीन्द्रियत्वादिति भावः ।।
वायुगुडेत्यादि ।। तत्र यथाक्रमं रूपतिक्तरसगन्धाभावानां चक्षूरसनघ्राणेन्द्रियग्राह्यत्वात् वाय्वादीनां च क्रमेण चक्षूरसनघ्राणा ८ विषयत्वेन तत्राभावग्राहकेन्द्रियग्राह्यत्वाभावादिति भावः ।।

१.यी -अ. २.वेन्द्रि -अ. ३.णेयो-कुं. ४.त्म्या -कुं. ५.द्यन्यो-अ. ६तत्तवापि संमतमित्यधिकम् -अ. ७.तस्यप्र -इ-अ. ८.द्यवि -मु.

---------- ------ --------

यन्निष्ठत्वेनाभावो ज्ञायते तस्य प्रतियोगिसमवा १ यिरूपस्य वान्य २ रूपस्य
वाऽधिकरणस्याभावग्रहकत्वेनाभिमतेन्द्रियग्राह्यत्वमधिकरणयोग्यतेति स्वीकारात् ।। एवं च कपालनाशजन्यस्य भूतलनिष्ठस्य घटध्वंसस्य स्तम्भजीवनिष्ठयोः पिशाचेश्वरान्योन्याभावयोश्च प्रत्यक्षता । सिद्धा भूतलस्तम्भयोर्घटध्वंसपिशाचान्योन्याभावग्राहकचक्षुरादिग्राह्यत्वात् । जीवस्यापीश्वराद्भेदग्राहकसाक्षिग्राह्यत्वात् ।।
अत एवोक्तमनुव्याख्याने ।।
'शास्त्रगम्यपेशानाद्भेदः स्वात्मन ईयते ।
अनुभूतिविरोधेन कथमेकत्वमुच्यते' ।। इति ।।

अधिकरणपदेनाभावप्रतीत्यधिकरणमात्रमित्युपेत्य अन्त्यपक्षाङ्गीकारेण समाधिमाह -- यन्निष्ठत्वेनेति ।। पूर्वोक्तदोषं निराह -- एवं चेति ।। तार्किकरीत्या मानसत्वभ्रमनिरासायाह -- जीवस्येति ।। यद्वा जीवेश्वरभेदस्य द्वासुपर्णेत्याध्यागमग्राह्यतया कथमिन्द्रियग्राह्यत्वमित्यत आह -- जीवस्येति ।। भेदान्योन्याभावयोरेकत्वाद्भेदेत्युक्तम् -- साक्षीति ।। स्वरूपेन्द्रियग्राह्यत्वादित्यर्थः -- अत एवेति ।। उक्त ३ रूपेन्द्रियग्राह्यत्वरूपाधिकरणायोग्यत्वस्याभावप्रत्यक्षे ४ तन्त्रत्वादेन । द्वितीयाध्यायतृतीयपादे 'पृथगुपदेशात्'इत्यत्र शास्त्रैकगम्येश्वरभेदो जीवे साक्षिप्रत्यक्षसिद्ध इत्युक्तमित्यर्थः - ईयत ।। साक्षिणा ज्ञायत इत्यर्थः ।।

१.य- च-ख. २.'अन्यरूपस्येति नास्ति' -छ. ३.स्वरू -अ. ४.क्षत्वतं - इ-अ.

---------- ---------- --------

वनादिकं च शब्दाभावग्राहकत्वेनाभिमतश्रोत्राग्राह्यमिति न शब्दाभावस्य श्रवणता ।। यत्तु वाय्वादौ रूपाद्यभावानामप्रत्यक्षत्वापादनं, तन्न । १ त्वन्मते नीरूपो वायुः न तिक्तः इति वाय्वादिविशेष्यकप्रतीतीनामिव मन्मतेपि २
वायौ न रूपं गुडेन तिक्ततेति वाय्वादिविशेषणकप्र ३ त्ययानामपि लैङ्गिकत्वेनेष्टापत्तेः । तत्र विशेष्ययोग्यतारूपप्रत्यक्ष ४ त्वहेत्वभावेनेव प्रकृतेपि दीर्घत्वादौ क्लृप्ताधिकरणयोग्यतारूपद्धेत्वभावेन योग्यानुपलब्धिरूपलिङ्गाद्यनुसंधानकल्पनात् । न च भट्टमत इव मन्मतेऽनुपलब्धिरप्यनुमेया ।
येनानुपलब्धेरप्यनुपलब्ध्यन्तरानुमेयत्वेनानवस्था स्यात् ।।
न चैवं वाय्वादौ रूपाद्यभावस्यानुमेयत्वे चक्षुरादिव्यापारवैयर्थ्यम्,

शब्दाधिकरणमपि योग्यमेवेति प्रागुक्तं निराह -- ५ वनादिकमिति ।। प्रागुक्तं ६ दोषान्तरं च निराह -- यत्विति ।। ननु वाय्वादिविशेष्य ७ कप्रतीतावधिकरणयोग्यत्वाभावाल्लैङ्गिकत्वं युक्तमित्यत आह -- तत्र विशेष्येति।। प्रकृतेपीति ।। वाय्वादिविशेषणरूपाद्यभावप्रतीताविवत्यर्थः । स्यादित्यनन्तरं किंतु साक्षिप्रत्यक्षेति योज्यम् । 'अस्मत्पक्षेऽनुपललब्धेः स्वप्रकाशसाक्षिसिद्धत्वान्नानवस्थे'ति प्रमाणलक्षणटीकोक्तेरिति भावः ।

१.त्व-क-छ-ख-क-रा. २.अपिपदं-ख-क-ग-रा. ३.तीतानां-क. ४.क्षहे - ग-ख-क-रा. ५.वेदादिकमिति -ई वर्णादिकमिति -अ. ६.क्तदो-इ. ७.ष्यप्र-अ.

---------- ------ ------

पक्षस्य वाय्वादेश्चक्षुराद्ययोग्यत्वात्, लिङ्गीभूताया अनुपलब्धेश्च साक्षिवेद्यत्वात्, प्रतियोगिनश्च स्मरणादिति वाच्यम् । लिङ्गिभूतानुपलब्धिविशेषणयोग्यतान्तर्गतालाकोदिग्रहार्थत्वात् ।।
उक्तं हि प्रमाणलक्षणे 'योग्यानुपलब्धेश्च लिङ्गत्वम्'इति । लिङ्गत्वेनोक्ता १ योग्यानुपलब्धिश्च २ न ग्राहकाभाव ३ प्रयुक्ता ।।

वैयर्थ्यमित्युक्तं व्यनक्ति-पक्षस्येत्यादिना ।। रूपादिलक्षणप्रतियोगिज्ञानार्थं च नेत्याह -- प्रतियोगिनश्चेति ।। अनुपलब्धिविशेषणेति ।। अनुपलब्धिमात्रं नाभावग्राहकम् व्यभिचारात् । किंतु योग्यानुपलब्धिरेव । योग्यता च प्रतियोग्युपलम्भकसामग्र्यादिरूपेति भावः । योग्येति ।। टीकोक्तरीत्या योग्यस्यानुपलब्धिः ४ योग्यानुपलब्धिरिति विग्रहः । संसर्गाभावग्रहे प्रतियोगियोग्यताऽपि तन्त्रमित्यग्रे व्यक्तत्वात् ।।
न चैव 'मनुपलब्धिस्त्व ५ र्वर्जनायसन्निधि 'रिति प्रागुक्तपद्धतिवाक्याविरोधः 'अभावो ६ नुमा प्रत्यक्षं चे'तिप्रमाणलक्षणेऽभावद्वैविध्यस्याप्युक्त्या
प्रत्यक्षेणाभावग्रहेऽनुपलब्धिरवर्जनीयसन्निधिः अन्यत्र लिङ्गत्वेनेत्याविरोधात् ।।
नन्वनुपलब्धिलङ्गतास्थलेऽनुपलब्धेरुपलम्भकसामग्र्यभावनिमित्तकतया तत्साहित्यरूपयोग्यताख्यविशेषणाभावाद्धेतोरलसिद्धिरित्यत आह -- लिङ्गत्वेनेति ।।

१.क्तनुप-ग-ख. २.'न' इति नास्ति -ग-छ-क-ख-रा. ३.वाप्र-ग-छ. ४.ब्धिरिति विग्रहः -इ. ५.'तु' इति नास्ति -इ. ६.वेऽनु-मु.

---------- --------- ----------

न चाधिकरणयोग्यतायास्तन्त्रत्वे आत्मादौ धर्माद्यभावोपि प्रत्यक्षः स्यादिति शङ्क्यम् । संसर्गाभावग्रहे त्वदभिमता प्रतियोग्यताऽपि तन्त्रमिति मया स्वीकृतत्वात् । दृष्टानुसारिणी हि कल्पना ।
ध्वनिध्वंसोपि योग्यानुपलब्धिरूपलिङ्गगम्य एव । न तु प्रत्यक्षः । अत एव ।।
'क्वचिद्घटाद्यभावोपि प्रत्यक्षेणआवगम्यते । 'इति ब्रह्मतर्के, 'अभावोऽनुमा प्रत्यक्षं च परामर्शापरामर्शाविशेषादिति'प्रमाणलक्षणे, 'प्रायेणानुमानेऽन्तर्भाव १ ज्ञापनाय क्रमोल्लङ्घन'मिति प्रमाणलक्षणटीकायां च, प्रत्यक्षप्रतियोगिकाभावस्यापि क्वचिदेव प्रत्यक्षत्वमुक्तम् ।।

कुसुमाञ्जल्याद्युक्तमाशङ्कते - न चेति ।। तन्त्रत्व इति ।। अभावप्रत्यक्षत इति
शेषः -- प्रतियोगियोग्यताऽपीति ।। एतेन 'अधिकरणयोग्यत्वं भेदग्रहे तन्त्र'
मिति सुधोक्तिः 'प्रतियोगियोग्यत्वं तन्त्र'मिति लक्षणटीकोक्तिश्चाविरुद्धोपपादिता ज्ञेया -- अत एवेति ।। प्रागभावादिरूपसंसर्गाभावग्रहेऽधिकरणप्रतियोगिनोर्द्वयोरपि
योग्यत्वस्यापेक्षितत्वादेवेति २ बाहुल्येनानुमानान्तर्भावादेवेत्यर्थ। क्वचिदेव प्रत्यक्षत्वमुक्तमित्यन्वयः । तत्वनिर्णयोक्तब्रह्मतर्कवाक्ये इत्यर्थः -- क्रमेति ।। अभावोऽनुमा प्रत्यक्षं चेति ३ मुलवाक्यं प्रत्यक्षमनुमा चेति वक्तव्ये अनुमाप्रत्यक्षंचेति ----

१.सूचनाय-ग-कथनाय-क. २.'वा' त्यधिकम्-मु. ३.इतः, 'क्रमव्यत्यासो' इत्येतत्पर्यन्तं नास्ति -इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३९४.
---------- ---------- ---------
तस्माद्वर्णानित्यत्यवादिनस्तव रीत्याऽपि वर्णध्वंसग्रहे सहकारि १ णोऽभावात्प्रत्यासत्त्याभावाच्च तदनित्यत्वे न प्रत्यक्षं मानम् ।।
शब्दानित्य २ त्वस्य प्रत्यक्षत्वभङ्गः ।। २३ ।।

-- क्रमव्यत्यासो बाहुल्येनाननुमानान्तर्भावद्योतनायेति टीकार्थः ४ -- सहकार्यभावादिति ।। योग्यानुपलब्धिरूपसहकार्यभावादित्यर्थः -- प्रत्यासत्तीति ।। इन्द्रियविशेषणतादेर्दूषितत्वादिति भावः । 'न प्रत्यक्षम्' इति पदविभागः ।।
वर्णानित्यत्वस्य ५ प्रत्यक्षत्वभङ्गः ।। २३ ।।

ननु तर्हि योग्यानुपलब्धिरूपं लिङ्गं वर्णध्वंसादौ मानम ३ स्त्विति चेन्न । व्यञ्जकाभावेनाप्यनुपलम्भसंभवेन विशेषणासिद्धेः ।।

'व्यञ्जकभावाभ्यामेवोपलम्भानुपलम्भा'विति तत्वनिर्णयटीकां हृदि कृत्वाऽऽह -- व्यञ्जकेति ।। ध्वनिरूपव्यञ्जकेत्यर्थः -- विशेषणेति ।। प्रतियोग्यनुपलम्भक ६ सहितानुपलब्धेरेव
योग्यानुपलब्धित्वाद्व्यञ्जकाभावनिबन्धनानुपलब्ध्यभावनिश्चयेंऽधकारावृत्ते घटवति गेहे घटाभावप्रमापातादिति भावः ।।

१.र्यभा-ग. २.त्वप्र-ग. ३.स्ती-ख-रा. ४.ततः 'प्रत्यासत्तीति' इत्येवास्ति - इ. ५.त्वप्र -मु. ६.म्भस-इ.

वर्णानित्यत्वे अनुमानभङ्गः) वर्णवादः पु - ३९५.
---------- -------- --------

एतेन वर्णाः १ प्रयत्नोत्पाद्यः २ तदनभिव्यङ्ग्यत्वे सति तदनन्तरमुपलभ्यमानत्वात् घटवत् इति निरस्तम् । विशेषणस्यापाततः सन्दिग्धासिद्धेः । विमर्शे वक्ष्यमाणरीत्या ३ निश्चितासिद्धेश्च ।।
एतेनैव वर्णोऽनित्यः उत्पत्तिमत्वे सति भावत्वत् , सामान्यवत्वे सति अस्मदादिबहिरिन्द्रिय ४ ग्राह्यत्वात् ५ घटवत्, प्रत्यक्षविशेषगुणत्वात् घटरूपवत्,

मणिकृदाद्यभिमतहेतूनाशङ्क्य निराह - एते ६ नेति ।। प्रयत्नाभिव्यङ्ग्ये प्रयत्नानन्तरमुपलभ्यमाने व्यभिचारनिरासाय हेतौ तदित्यादिसत्यान्तम् । गगनादौ तन्निरासाय विशेष्यम् -- आपातत इति ।। नित्यत्वसाधकविसेषादर्शनदशायामित्यर्थः -- विमर्श इति ।। उत्तरभङ्गे वक्ष्यमाणदिशा प्रत्यभिज्ञाविरोधादनित्यो न भवतीति विशेषदर्शने सतीत्यर्थः ।
एतेनैवेति ।। ध्वंसे व्यभिचारनिरासाय हेतौ भावत्वादिति विशेष्योक्तिः । गगनादौ तन्निरासाय सत्यन्तम् । द्वितीयहेताविन्द्रियप्रत्यक्षत्वादित्यस्यैन्द्रियकरणज्ञान ७ विषयत्वादित्यर्थः । क्वचिदिन्द्रियग्राह्यत्वादित्येव पाठः । तत्र प्रत्यक्षत्वमात्रस्यात्मनि व्यभिचारात् बहिरिन्द्रिये ८ त्युक्तिः । तथापि योगिबहिरिन्द्रियप्रत्यक्षत्वमादायोक्तदोषनिरासाय -- अस्मदादीति ।। घटत्वादौ तन्निरासाय सत्यन्तम् । तन्मात्रस्यात्मन्यपि सत्वाद्विशेष्यम् । तृतीये च गुणत्वमात्रस्य गगनादिपरिमाणादौ, --

१.र्णाः -छ. २.द्याः -छ. ३.संदिग्धा -क. ४.प्रत्यक्षत्वात् -ग. ५.च इत्यधिकं-छ. ६.नैवेति -अ. ७.करणत्वात्-अ. ८.ग्राह्येत्यधिकं -मु.

---------- ---------- --------

उत्कर्ष १ वत्वात् मधुरादिरसवत् बहिरिन्द्रियव्यवस्थापकगुणत्वात् घट २ रूपवदित्यादि ३ मण्युक्ता ४ नुमानं तत्र मानम् । विपक्षे च शब्दध्वंसग्राह्यकप्रत्यक्षानुपपत्तिर्बाधिकेति निरस्तम् । विपक्षे बाधकस्यैव निरासात्।।

विशेषगुणत्वस्य जलपरमाण्वादिरूपादौ, प्रत्यक्ष ५ गुणत्वमात्रस्य चात्मकत्वादौ, सत्वाद्व्यभिचारनिरासाय प्रत्यक्ष ६ गुण्त्वादित्युक्तिः -- उत्कर्षेति ।। उत्कर्षवत्वे सत्यपकर्षवत्वादित्यर्थः । एकैकस्य गगना ७ दिपरिमाणे परमाण्वादिपरिमाणे च सत्वादुभयोक्तिः । तारमन्द्रत्वादिरूपोत्कर्षादिः पक्षे, दृष्टान्ते च माधुर्यादिशयादिः, तथापि जातिरूपोत्कर्षादिरुभयत्र सम इति भावः -- बहिरिन्द्रियेति ।। शब्दज्ञानं करणसाध्यम् कार्यत्वात् इति करणसामान्यसिद्धौ चक्षुरादेरूपादिज्ञानकरणत्वादिना
शब्दज्ञानहेतुत्वात्परिशेषाच्चक्षुरादिबाह्येन्द्रियचतुष्टयादन्यच्छोत्रेन्द्रियं सिद्ध्यतीति श्रोत्ररूपबिहिरिन्द्रियव्यवस्थापकगुणत्वादित्यर्थः । गुणत्वमात्रस्य गगनादिपरिमाणादिगुणे इन्द्रियव्यवस्थापकगुण ८ त्वास्यात्मगतैकत्वादौ बहिरिन्द्रियव्यवस्थापक ७ त्वमात्रस्य रूप १० त्वरसत्वेन व्यभिचारनिरासाय बहिरिन्द्रियव्यवस्थापकगुणत्वादित्युक्तम् । ननु चैतद्वनाव ११ प्यस्तीति चेत् किं तावता । यथोक्तसाध्यस्यापि तत्र सत्वात् -- तत्रेति ।। वर्णानित्यत्व इत्यर्थः । एतेनेत्युक्तं व्यनक्ति -- विपक्ष इति ।।

१.कत्वात् -ग. २.'गत' इत्यधिकम्-छ-ख-क-रा. ३.मण्युक्तेति नास्ति - ग-ख. ४.क्तमनु-छ-ख-रा. ५.क्षादि-इ. ६.विशेषेत्यधिकं-इ.

विशेष्येत्यधिकं-अ. ७.आदिपदं न -इ. ८.णस्य-अ. ९.कमा-अ. १०.त्वरसत्वादौ सत्वेन -इ.अ. ११. न्यादाव-मु.

वर्णा-त्वेऽनु-मान-भङ्गः) वर्णवादः पु - ३९७.

आद्ये हेतावुत्पत्तिमत्वस्य द्वितीये प्राभाकरं प्रति सामान्यवत्वस्य नैयायिकं प्रत्यपि क्षिणिके १ शब्दे विषयजन्येन्द्रियकरणकज्ञानविषयत्वस्य तृतीयपञ्चमयोर्मां प्रति गुणत्वस्य चतुर्थे उत्कर्षवत्वे सत्यपकर्षवत्वस्य मन्द्रतमे तारतमे चासिद्धेश्च ।

प्रातिस्विकदोषं चाह -- आद्य इत्यादिना ।। षष्ठ्यन्तानामसिद्धेश्चेत्य २ नेनान्वयः । उत्पन्नो गकार इति मण्युक्तप्रतीतिस्तु नास्त्येवेति भावः -- प्राभाकरं प्रतीति ।। तस्यापि वर्णनित्यत्ववादित्वेन तं प्रत्यपि प्रयोज्यत्वात् । नित्यत्ववादे गकारादिव्यक्तेरेकत्वेन तत्र सामान्याभावात् । गुणत्वपक्षेपि तेन गुणगतजातेरनङ्गीकारादिति भावः । तं प्रति हेत्व ३ न्तरं भविष्यतीत्यत आह -- नैयायिकं प्रतीति ।।
तन्मते कदम्बमुकलादिन्यायेन भेरीदाडनो ४ च्चारणा ५ तिदेशाच्छ्रोत्रदेशपर्यन्तं सजातीयशब्दपरंपरोत्पत्तेः । अन्त्योपान्त्यशब्दयोः सुन्दोपसुन्दन्यायेनान्यनाशस्य च स्वीकारात् । सर्वशब्दानामिवान्त्य ६ स्यापि त्रिक्षणस्य ७
त्वोपगमेनान्त्यशब्दस्थितिक्षणस्यैवोपान्त्यशब्दस्य विना ८ शक्षणत्वादन्त्यस्य तृतीयक्षणे पूर्वशब्दस्य ध्वंसेनान्त्यस्य विनाशकाभावे नित्यतापत्तेः । क्षणिकत्वे चोपान्त्यशब्दविनाशक्षणस्यैवान्त्यशब्दविनाशक्षणत्वेन नित्यत्वापत्तिदोषाभावात्क्षणिकत्वं स्वीकृतम् ।

अतस्तस्मिन्ज्ञानात्पूर्ववृत्तित्वस्याभावेन ज्ञानजनकेन्द्रियसन्निकर्षायोगात् विषयजन्यं इन्द्रियकरणकं यज्ज्ञानं ९ तद्विषयत्वस्यासिद्धेरित्यर्थः । मांप्रतीति ।। मन्मते वर्णस्य द्रव्यत्वादिति भावः -- शब्दत्वस्येति ।।

१.केन्त्यशब्दे-ग. कशब्दे-ख. क्षणिकपदं न -क. २.त्यन्वयः- इ. ३.त्वनन्तरमितिशोधितम् -अ. ४.नादिदेशा-इ. ५.णादिदे-अ. ६.शब्दस्यापि -इ. ७.वर्तित्वेन -इ. ८.नश्यत्क्षण -अ. ९.तदिन्द्रियत्वस्या -अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ३९७.

शब्दत्वरसत्वादिना सांकर्यप्रसङ्गेन शब्दे रसे चैकस्या उत्कर्षादिरूपा १ या
जातेरभावेनासिद्धिसाधनवैकल्यान्यतरापाताच्च ।।
न चोत्कर्ष २ स्य गुणत्वव्याप्यजात्या ३ सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वेन, अपकर्ष ४ स्य --

तारत्वस्य शब्दत्वपरिहारेण रसे, शब्दत्वस्यापि तारत्वपरिहारेण मन्दशब्दे, तारशब्दे च तारत्वशब्दत्वयोरुभयोर ५ पि समावेशेन
'व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः ।
रूपहानिरसंबन्धो जातिबाधकसंग्रहः ।। '
इति कारिकोक्तसांकर्यरूपजातिबाधकेन तारत्वादेर्जातित्वायोगात् । ६ एवं रसत्वादिनापि सांकर्यं ध्येयम् ।।
नच तर्हि शब्दत्वस्यैव जातित्वं त्यज्यतामिति वाच्यम् । तस्यानुगकप्रतीत्यादिना जातित्वस्य परमते सिद्धत्वादिति भावः ।।

सजातीयेति ।। पक्षे शब्दान्तरं दृष्टान्ते रसान्तरं ध्येयम् । तारशब्दश्रवणे शब्दान्तचरस्यानुपलम्भात् । यद्यपि मणौ सजातीयेत्याद्येवोक्तम् । तथापि सुखादिसाक्षात्काराप्रतिबन्धकत्वात्तव्द्यावृत्तये तदीयटीकोक्तस्यानुवादो -- गुणत्वव्याप्यजात्येति ।। प्रतिबन्धकत्वमात्रे तूक्ते फलोपधान ७ प्राप्तौ बुभुत्सावशान्मन्देपि शब्दे गृह्यमाणे तारशब्दस्याप्रतिबन्धकतया तत्साधारणानुगतधीसिद्ध्यर्थं तदवच्छेदकत्वेनेत्युक्तम् ।

१.पजा-छ. २.त्वस्य-ख. ३.स्वजा-छ. सजातियाप्रतिबध्यसाक्षात्कारविषतावच्छेदकत्वेन -ख. ४.त्वस्य-ख. ५.अपिपदं न -इ. ६.एवमित्यादि नास्ति-इ. ७.नाप्रा - इ.

वर्णा-त्वेऽनु-मान-भङ्गः) वर्णवादः पु - ३९९.

चोक्तजात्या १ सजातीयप्रतिबध्यसाक्षात्कारविषयतावच्छेदकत्वेनानानुगम इति वाच्यम् । उक्तरूपस्योत्कर्षस्य वा परिमाणेऽभावेनैकस्य २ हेतुत्वेऽपि
परममहत्परिमाणाणुपिरमाणयोर्व्यभिचाराभावेनोभयग्रहणवैयर्थ्यात् । उत्कर्षापकर्षयोः प्रत्येकं ३ हेतुत्वे च य ४ थोक्तमन्द्रतमतारतमयो ५ र्भोगासिद्ध्यपरिहारात् । ६ उक्तहेतुपञ्चकेपि श्रोत्रावृत्तित्वस्योपाधित्वाच्च ।

तथा च तत्र बुभुत्सोत्तेजिकेति भावः - उक्तेति ।। गुणत्वव्याप्यजात्येत्यर्थः । तारशब्दश्रवणे सत्यपकृष्ठशब्दानुपलम्भादिति भावः ।।
किंचायं विशिष्ट ए ७ के हेतुरुत प्रत्येकं हेतुः ? आद्ये गगनपरिमाणे चाव्यभिचाराय हि विशेष्यं चेति वाच्यम् । न च तत्र

व्यभिचारप्रसक्तिरस्ति । स्वस्य साक्षात्काराभावात् । सजातीयसाक्षात्कारप्रतिबन्धकत्वाभावाच्चेति भावेनाह -- उक्तरूपस्येति ।। परिमाणे गगनादिपरिमाणे -- अभावेनेति ।। तत्र साक्षात्काराप्रसक्तेरिति भावः ।।
अन्त्ये दोषमाह -- उत्कर्षेति ।। श्रोत्रवृत्तित्वस्येति ।। तस्य घटादौ रूपरसादौ च साध्यव्यापकत्वात्साधनवति पक्षे शब्देऽभावेन साधनाव्यापकत्वात् । यदिन्द्रियं ८ यद्गुणं गृह्णाति तदिन्द्रियं तद्गुणयुक्तमितिन्यायेन शब्दस्य श्रोत्रवृत्तित्वादिति भावः ।।

१.स्वजा -छ. २.कैकस्य -ग-छ-ख. ३.कहे-ग. ४.थाक्रमं -ग-ख. ५.भागपदं न -छ. ६.उक्तेत्यादिग्रन्थः नास्ति
-ख-क-रा. ७.एवोक्तो-इ. ८.यत्पदं नास्ति-अ.

विपक्षाच्छ्रोत्रवृत्तिपरिमाणतो व्यावृत्तत्वान्न पक्षेतरता ।।
वर्णानित्यत्वेऽनुमानभङ्गः ।। २४ ।।

न च श्रोत्रमशकसंयोगादौ साध्यव्यापकत्वम् । श्रोत्रेतरावृत्तित्वे सति श्रोत्र ३ वृत्तित्वा ४ भावस्याभिमतत्वात् । न च सिद्धान्तेऽथापि दोषः । पररीत्या परस्य दोषोक्तेरिति भावः ।।
पक्षमात्रव्यावर्तकश्रोत्राख्यविशेषणवत्वात्पर्वतेतरत्वादेरिव
नोपाधित्वमस्येत्याशङ्क्याह -- विपक्षादिति ।। श्रोत्रस्याकाशात्मकत्वेन तत्परिमाणस्याजन्यत्वादिति भावः । एतच्चोपलक्षणम् । बाधादिस्थले

पक्षेतरत्वस्याप्युपाधित्वस्वीकारात् । प्रकृते विपक्षे बाधकाभावस्येह प्राग्व्यक्तत्वेन हेतूनामप्रयोजकत्वस्य वक्ष्यमाणदिशा बाधस्य च निर्णयेन पक्षेतरत्वस्याप्युपाधित्वे दोषो नेत्यपि ध्येयम् ।।
वर्णानित्यत्वे ५ नुमानभङ्गः ।। २४ ।।

किंच स एवायं गकार इति प्रत्यभिज्ञान २ बाधः ।

'तदेवेदं वचनमिति प्रत्यभज्ञानविरोधात् । न च सादृश्यात्प्रत्यभिज्ञान भ्रान्तिरिति वाच्यम् । सोय देवदत्त इत्यादेरपि तथात्वप्राप्तेः'इति तत्वनिर्णयतट्टीकयोरुक्तं व्यक्तीकुर्वन् उक्तहेतूनां बाधितविषयत्वं चाह -- किञ्चेति ।। यद्यपि प्रत्यभिज्ञान न वर्णनित्यत्वं विषयीकरोति । तथापि पूर्वं गकारं श्रुतवतः पुनस्तच्छ्रवणे स एवायं गकार इति --------

१.त्वानु -ग-ख. २.विरोधः-क-रा. ३. त्रा - इ. ४.त्वभा-इ. ५.त्वानु-अ-इ.

वर्णानित्यत्वे प्रत्यभिज्ञाविरोधः) वर्णवादः पु - ४०१.
---------- -------- --------
न च तानेव शालीनु १ पभुञ्जमह इत्यादिवत्सोयं गकार इति व्यपदेशो गौण इति वाच्यम् । प्रत्यभिज्ञाबाध उक्ते व्यपदेशगौणत्वशङ्क्या व्यधिकरणत्वात् । प्रत्यभिज्ञायाश्च २ स्थायिपदार्थान्तर इवात्राप्यनुभवचसिद्धत्वात् । ते शालय इमे शालयो न भवन्तीतिवत् स गकारोऽयं गकारो न भावतीति भेदप्रत्ययाभावाच्च ।।

- जायमाना प्रत्यभिज्ञा प्रोक्तनस्येदानीन्तनेनैक्यं गोचरयन्ती तावत्कालस्थिरत्वमवगाहत इति --

तावत्कालं स्थिरं चैनं कः पश्चान्नाशिष्यति ।
इति न्यायेन पराभिमताशुतरविनाशस्य व्यचिरेकान्नित्वत्व एव पर्यवस्यतीति मण्युक्तदिशा वा टीकोक्तदिशा ३ पूर्वं पूर्वतरं पूर्वतममप्येवमित्यनादिनित्यतैव सिद्ध्यतीति भावेन प्रत्यभिज्ञाबाध इत्युक्तम् ।।
अत्र चत्वारः पक्षाः सम्भवन्ति । ज्ञानमेवेदं नेति वा, ज्ञनत्वेप्यभिज्ञैव न प्रत्यभिज्ञेति वा, प्रत्यभिज्ञात्वेपि जात्य ४
भेदविषयेति वा, व्यक्त्यभेदविषत्वेपि भ्रान्तिरिति वा । तत्राद्यं कुसुमाञ्जल्याद्युक्तमाशङ्क्य निराह -- नचेति ।। शालीन् सूक्ष्मव्रीहिवेशेषात् । ज्ञानमेवेदं नेत्युच्यत इत्यत आह -- प्रत्यभिज्ञाया इति ।। स्थायीति ।। सोयं देवदत्त इत्यादाविवि स एवायं गकार इति प्रत्यभिजानामीत्यनुभवसिद्धत्वादित्यर्थः । तत्राप्येवमनुभवोऽस्तीत्यतस्तत्र विपरीतदर्शनान्न प्रत्यभिज्ञानुभवस्य भावोस्ति । अस्ति चेदपि भ्रम एव । प्रकृते तु न तथेति भावेनाह ।। ते शालय इति ।।

१.न्भुञ्जत-ग. न्यभुञ्महे-छ-क. 'भ्रजाम' इति शोधितम् -छ-न्भुञ्जानः -ख. २.च इति नास्ति -ग. ३.पूर्वपूर्वतपमप्येव-इ.
पूर्व पूर्वतममप्ये -अ. ४.तिभे-इ.

न चैवं प्रत्यभिज्ञा पुरोवर्तिनि गकारे गत्वेनोपस्थितगकाराभेदविषया, सा च पुरोवृत्तिगकारस्य स्वाभेदेनाप्युपपन्ना, न तु १ तत्काला २ द्यवच्छेदेनोपस्थितगकाराभेदविषयेति वाच्यम् । प्रत्यभिज्ञान्तरवत् सोयमिति तत्तेदंताधिकरणाभेदप्रतीतेः ।।

नन्वियं गत्वादिजात्यभैदविषया । न च तथात्वे तज्जातीयोयमित्याकारः स्यादिति वाच्यम् । जात्यभेदादधिकस्य जादिगतस्य जातित्वस्य चप्रतीतावेव तदाकारादिह च जातित्वस्याप्रतीतेरिति चेन्न ।

द्वितीयं पक्षमनूद्य निराह -- न चेयमिति।। प्रतभिज्ञेति ।। तव प्रत्यभिज्ञात्वेनाभिमतेत्यर्थः -- उपपन्नेति ।। तथा चाभिज्ञैव जाता न तु प्रत्यभिज्ञेति भावः -- तत्कालेति ।। अतीतकालेत्यर्थः ।।
तृतीयं पक्षमाशङ्कते -- नन्विति ।। तथा सति तज्जातियोयमिति स्यादिति मणिग्रन्थोक्तं निराह -- न च तथात्व इति ।। तज्जातियोयमित्यस्य तन्निष्ठजातिमानयमिति ३ ह्यर्थः । स चाकारो जातित्वभान एव युक्तो नान्यथेति भावः । सामान्यनित्यतायाः प्रमामविरुद्धत्वादिति स्वमतावष्टम्भेन वास्तवमुपेत्य
टीकायां परिहारोक्तावपि पररीतिमनुसृत्य स्वयं परिहारमाह-- तारत्वादिनेति ।।

१.'तत्' इति नास्ति -छ-क-रा. २.आदिपदं न -छ-क. ३.'हि' इति नास्ति -इ-अ.

वर्णा-नित्वे-प्रज्ञा-विधः) वर्णवादः पु - ४०३.
---------- ----- -------
तारत्वादिना १ सांकर्यस्य वक्ष्यमाणत्वेन गत्वादिजातेरेवाभावात् । स एवायं घट इत्यादेरपि तथात्वापातेन व्यक्त्यभेदस्य क्वाप्यसिद्ध्यापत्तेश्च । २ क्वापि प्रत्यभिज्ञाया भ्रन्तित्वाभावापत्तेश्च । घटान्तराद्गृहीतभेदेपि घटे स एवायं घठ इति प्रत्यभिज्ञाप्रसङ्गाच्च ।।
किंच प्रत्यभिज्ञाजनके स एवायं गकार इति वाक्ये स इत्यस्य जातित्वेऽयमित्यस्य च व्यक्तिपरत्वे जात्या सह व्यक्तेरेवाभेदः प्रती ३ येत

न तु जात्या सह जातेः । तथा च निरसिष्यमाणभ्रान्तित्वपक्ष एवान्तर्भावः स्यात् ।।

क्वापीति ।। सोऽयं ४ देवदत्त इत्यादा ५ वपि जातिविषयत्वस्य वक्तुं शक्यत्वादिति भावः -- घटान्तरादिति ।। तत्राप्यनुगतजातेः सत्वादिति भावः । जात्यभिप्रायेण तादृशप्रत्यभिज्ञापादनमिष्टमिति मन्वानं प्रत्याह -- - कंचेति ।। शाब्दप्रत्यभिज्ञायां या विषयव्यवस्था सैव प्रत्यभिज्ञायामपि भविष्यति । तथा च ६ तत्र सोयमिति तदिदंशब्दाभ्यां किं जातिव्यक्त्योरुक्तिरथ जातेरेव उत व्क्तेरेवेति वाच्यम् । पक्षान्तरासंभवात् । आद्येपि ७ व्यक्तेर्जात्यभेदोपि किं साक्षादथ परंपराय ८ वा । तत्राद्यं निराह -- प्रत्यभिज्ञाजनक इति ।।

१.संकरस्य-छ-ख-क-रा. २.अद्यापि-क. ३.यते- छ-क. ४.दीप इत्या-अ. ५.देरपि-इ. ६.'किं' इत्यधिकम्-अ-इ. ७.व्यक्तिजात्योरभे-मु. ८.'वा' इति नास्ति - अ- इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४०४.

नच जात्यभेदोपि व्यक्तौ परंपरासंबन्धेनास्तीति न भ्रान्ति १ त्वमिति वाच्यम् । क्वापि व्यक्त्यमेदा २ सिद्ध्यादि पूर्वोक्तदोषात् ।।
उभयोरपि जातिपरत्वे च व्यक्तिवाचकगकार ३ सामानाधिकरण्य ४ मुक्तम् । उभयोरपि व्यक्तिपरत्वे तु शब्दजन्यप्रत्यभिज्ञा
व्यक्त्यभेदविषयेति प्रत्यक्षप्रत्यभिज्ञापि तद्विषयैव । तयोः करणकृताभ्यां परोक्षत्वापरोक्षत्वाभ्यां भेदेपि विषयकृतभेदाननुभवात् ।।
न चैवं सोयं कुन्तलकलाप इत्यादिवद्भ्रान्तिः ।

भ्रान्तित्वप्रक्ष एवेति ।। तथा च तन्निरासेनायं पक्षो निरस्तो भविष्यतीति भावः ।
अन्त्यमाशङ्क्य निराह -- न चेति ।। जातेर्जात्यभेदः साक्षात् तत्समवायसंबन्धेन व्यक्ताविति परंपरयेति ५ भावः । द्वितीयं निराह -- उभयोरपि ६ जातीति ।। तृतीयं निराह -- उभयोरपि ७ व्यक्तीति ।।
नन्वस्तेवं प्रत्यभिज्ञा गकार ८ व्यक्त्याक्यविषा । तथापि सा भ्रान्तिरस्तु । परि ९ लूनपुनर्जातकुन्तलकलापयोः सादृश्यान्निमित्तात्सोयं कुन्तलकलाप इति प्रत्यभिज्ञावदिति चतुर्थं पक्षमाशङ्क्यते -- न चेति ।। तत्र परि १० लूनकुन्तलसमूहस्य भूमौ पतितस्य दर्शनेन नायमसाविति बाधकज्ञानोदयवदिह तदभावादित्याह -- बाधकेति ।।

१.न्तिरित -ख-रा. २.दसि-ग. ३.'ग' इत्यधिकम्-ग. ४.मयुक्तं-ग-छ-रा. ५.त्यर्थः-अ-इ. ६.जातिपदं न -इ. ७.व्यक्तीति इत्येवास्ति -इ. ८.आदित्यधिकम् -अ-इ. ९.धून-अ. १०. धून-अ.

न च भेदधीर्बाधिका । स गंकारोयं गकारो न भवतीति विशे १ ष्ये भेदबुद्धेरभावात् ।।
तारो गकारो मन्द्रो न भवतीति धिस्तु विशेष्याभेद २ ज्ञानेन पाकरक्ते घटे न श्याम इतिवत्, मुण्डिते यैत्रे न शिखीतिवच्च विशिष्टभेदविषयैव । न विशेष्यभेदविषया ।।
इयांस्तु ३ भेदः ; तद्विशिष्टं मम पदार्थान्तरम्, तव तु विशेषणोपरक्तं विशेषणविशेष्यसंबन्ध एव वेति । उभयथापि न विशेष्याभेदहानिः ।।

ननु ४ बाधकदर्शनाद्बाधकाभावादित्यसिद्धमिति चेत्तत्किं भेदज्ञानमुतोत्पत्तिविनाशज्ञानमथ विरुद्धधर्मवत्वज्ञानम्, यद्वा गत्वादिव्याप्यजातिविशेषानुभवरूपज्ञानं बाधकम् । आद्यमाशङ्क्य प्रत्याह -- न चेति ।। ५ न बाधकेत्यतः सा किं विशेष्यभेदविषयाथ तारत्वादिविशिष्टभेदविषयेति ६ विकल्प्यद्यं निराह -- स इति ।। द्वितीयेत्विशिष्टापत्तिरिति भावेनाह -- तार इति ।। विशिष्टभेदधीर्बाधान्न विशेष्यभेदविषयणीति भावेनोक्तम् -- विशेष्याभेदज्ञानेनेति ।। हेतुनेति शेषः ।।

ननु, विशिष्टं न विशेष्याधितोऽतिरिक्तमिति मते अस्तु विशेष्यभेदविषयेत्यत आह -- इयांस्तु भेद इति ।। उपरक्त विशेष्यमेव न तु केवलमित्यर्थः ।

१.शिष्य-च-शेष्य-क. २.मानेन-'मात्रेण' इति शोधितम् 'विशेष्याभेदमानेन' इत्येतदुपरिरेखाभिः पराहतम्-छ. ष्यभेदभानेन -रा-ग-क. ३.विशेषः -ख. ४.बाधकाभावादित्येवास्ति -अ-इ. ५.' कुतः' इत्यधिकम् - अ. ' नबाधकेत्यत' - इति नास्ति -इ. ६.इति ' विकल्प्य' इति नास्ति -इ-अ. ७.पराह-अ-इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४०६.

नापि तारो नष्टो मन्द्र उत्पन्न इत्युत्पत्यादिधीर्बाधिका । पाकरक्ते श्यामो नष्ट इत्यादिवन्मन्मते विशिष्टनाशविषयत्वेन त्वन्मते तु विशेषणनाशिविषयत्वेन मतद्वयेपि विशेष्यनाशाविषयत्वात् ।।

१ नापि तारत्वादिविरुद्धधर्मसंसर्गधीर्बाधिका । योगकारो २ मन्द्रः स एव तार इति सामानाधिकरण्यानुभवेनैकस्मिन्नैव चैत्रे शिखित्वमुण्डित्ववद्घटे श्यामत्वरक्तत्ववत्, गगने शब्दतदभाववत्, आत्मन्यदृष्टतदभाववच्च,

गगने शब्दतदभाववत्, आत्मवियदृष्टतदभाववच्च काला ३ दिभेदेनाविरोधात् ।।
न चैकदैव चैत्रमैत्रोच्चारितयोर्गकारयोस्तारत्वमन्द्रत्वे दृश्यते इति वाच्यम् । एकदैव गगने विहगदेहसंयोगतदभाववत्, आत्मनि सुखदुःखा ४ दिवच्च
प्रदेशभेदेनाविरोधात् । स च प्रदेशभेदो मम स्वाभाविकः तव त्वौपाधिक इत्यन्यभेदेवैतत् ।।

तथा च त्वन्मते स्वर्गो ध्वस्त इत्यादाविवेहापि विशेषणभेदविषयैव स्यादिति भावः । द्वितीयं बाधकं निराह -- नापि तार इति ।।
तृतीयं निराह -- तारत्वेति ।। स किं तारत्वादिरौपाधिको धर्मः ? उत जातिरूपः ? आद्य आह-- यो गकार ।। इति कालादिभेदेनेति ।। 'एकस्यैव वर्णस्य काल ५ भेदेनोच्चारयितृपुरुषभेदेन नासिकादिस्थानभेदेन विरुद्धधर्माध्या १ सोपपत्तेरिति 'तत्वनिर्णयटीकोक्तेरिति भावः ।।

१.न च - मु-च-छ-क-रा. २.सर्वत्र 'न्द' इत्येवास्ति -छ-क-ग-ख. ३.आदिपदं नास्ति -छ-क-ग-ख. ४.आदिपदं न -छ-ग-ख. ५.आदित्यधिकम् -अ.

---------- -------- ---------
न च तारत्वादीनां जातित्वान्न कालादिभेदेनाविरोध इति वाच्यम् । त्वन्मते गत्वादिना संकरात्सावधिकत्वाच्च । न हि जातिः सावधिका । तारेप्यन्यापेक्षया मन्द्रत्वस्य मन्द्रेप्यन्यापेक्षया तारत्वस्य सत्वेन

तुल्यव्यक्तिकत्वाच्च । तारतमत्वादेरपि पाचकतमत्वादिवदतिशयविशिष्टौपाधिकधर्मत्वात् ।।
न च गत्वादिव्याप्यतारत्वादीनां नानात्वादसंकरः । सर्वत्राप्येवं सुपरिहरत्वेन तस्यादोषत्वापातात् ।।

द्वितीयमाशङ्क्य निराह -- न च तारत्वा २ दीनामिति ।। गत्वपरिहारेण तारत्वस्य वर्णान्तरे तारत्वपरिहारेण गत्वस्य मन्दगकारे, तारगकारे च गत्वतारत्वे ३ द्वे अपि स्त इति न जातित्वं तारत्वस्य । एवं मन्दत्वादेरपीति भावः -- सावधइकत्वाच्चेति ।। तारत्वस्य मन्दापेक्षात्वान्मन्दत्वस्य तारापेक्षत्वादिति भावः ।। तुल्येति ।। यान्तस्तारगकारास्तावन्तो मन्दाश्च भवन्तीति गत्वतारत्वमन्दत्वानां घटत्वकरीरत्वकलशत्वानामिव न जातित्वम् । किं तु गत्वादिरेव जातिः । न तु तारत्वादिरिति भावः ।।
ननु तारत्वादेरजातित्वे तारतमत्वादेरपि तथात्वं स्यादित्यतः स्यादेवेत्याह -- तारेति ।। ४ अतुल्यव्यक्तिकत्वात्तारतमत्वं जातिः स्यादित्यतो वाह -- तरेति ।। तस्येति ।। संकरस्य जातिबाधकत्वानापत्तेरित्यर्थः ।

१.सापत्ते-मु. २.आदिपदं नास्ति -इ-अ. ३.'द्वे' इति नास्ति -इ. ४.इयमचवतारिका नास्ति -इ.

---------- ---------- ----------
अत एव स्वर्णत्वादिव्याप्यघटत्वादिकमपि नाना । घटत्वस्यावयवसंयोगविशेषरूपसंस्थानविशेषसमानाधिकरणद्रव्यत्वरूपौपाधिकधर्मत्वादिसंभवात् । तारत्वादेर्नानात्वे
ताराकारानुगतप्रत्ययानुपपत्तेश्च ।।

न च भिन्नानामपि जातीनां तारशब्दप्रवृत्तिनिमित्तत्वेनानुगमादेकाकारप्रत्ययः । अगृहीतसमयस्य बालस्यापि ताराकारानुगतप्रत्ययात् ।।
न च सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदक १ जितित्वेनानुगमः । आवश्यकेनोक्तप्रतिबन्धकत्वेनैव शब्दप्रवृत्तिव्यवहारयोरुपपत्तौ जातिकल्पनावैयर्थ्यात् ।।

नन्वेवं नानात्वेन सांकर्यस्यापरिहचार्यत्वे स्वर्णघटे घटत्वं जातिर्न स्यात् । नानात्वेनैव तत्र जातिसांकर्यस्य परिहार्यत्वादित्यत आह -- अत एवेति ।। तत्र घटत्वं जातिरेव नेत्याह -- घटत्वस्येति । ताराकारेति ।। अयं तारोऽयं तारोऽयं तारोऽयमपि तार इत्येवं ताराकारेत्यर्थः -- अगृहीतेति ।। तारशब्दनिमित्तत्वमजानतोप्ययं तार इत्यनुगताकारप्रत्यय २ दर्शनादित्यर्थः ।।
सजातीयेति ।। गुणव्याप्यजात्या सजातीयेत्यर्थः । पूर्ववत्पदकृत्यं बोध्यम् । उक्तेति ।। सजातीयसाक्षात्कारप्रतिबन्धकत्वेनेत्यर्थः ।। शब्देति ।। तारशब्देत्यर्थः।।

१. जीतिपदं नास्ति - ख. २. याद - मु.

न च यदा मन्द्रे बुभुत्सा तदा मन्द्रग्रहरूपकार्यदर्शनेन प्रतिबन्धक १ त्वाभावात्तारव्यवहारो न स्यात् । प्रतिबन्धकातवच्छेदकविपक्षायान्तु जातिसिद्धिः, जातितोऽन्यस्यावच्छेदकस्याभावादिति वाच्यम् । त्वन्मतेपि प्रतिबन्धकतावच्छेदकावच्छिन्ने सति मन्द्रग्रहरूपकार्यायोगात् ।।

यदि च बुभुत्सोत्तेजिका तर्हि मन्मतेप्युत्तेजकस्य सत्वेन कार्यसम्भवेपि प्रतिबन्धकस्य सत्वात्तारव्यवहारो २ युक्तः । तस्मात्प्रत्यभिज्ञायास्तारत्वादिविरुद्धसंसर्गो न बाधकः ।।

उक्तविवक्षायां बाधकमाशङ्क्य निराह -- न चेति ।। तारशब्दश्रवणदशायामेव बुभुत्सावशान्मन्दशब्दग्रहेण गुणत्वव्याप्यजात्या सजातीयशब्दग्रहाप्रतिबन्धाच्छ्रयणाणे तारशब्दे तारशब्दव्यवहारो न स्यादित्यर्थः।।
मन्मतेपीति ।। तारत्वं न जातिः । तेषामनेकत्वेपि सजातीयसाक्षात्कारप्रतिबन्धकत्वेनानुगम इति वादिमतेऽपि बुभुत्सारूपोत्तेजकवशेन मन्दग्रहसम्भवेपि तारव्यवहारः स्यादेव । न ह्युत्तेजकं ३ तत्प्रतिबन्धाभावो मण्यादेः प्रतिबन्धकस्त्वमेव नेत्यस्य कल्पको भवति । तथात्वेऽतिप्रसङ्गादिति भावः । व्यवहितत्वात्तृतीयपक्षदोषमुक्तमुपसंहरति । तस्मादिति ।। तारत्वादेरविरोधादिति भावः ।।

१.काभा-ग-ख. २.रोऽयुक्तः -छ. ३.ककृतप्रतिबन्धाभावो - इ.

---------- ---------- ---------
नापि
शुकशारिकामनुष्यतद्विशेषरूपवक्तृविशेषानुमापकगत्वादिव्याप्यजातिविशेषानुभवो बाधकः । वर्णाश्रवणेपि तत्तद्ध्वनिविशेषणैव तत्तदनुमानदर्शनेन वर्णश्रवणेप्यावश्यकेन ध्वनिविशेषेणैव तदनुछमानात् । अन्यथा यो गकारः

शुकनोच्चारितः न एव मनुष्येणापीत्यादिप्रत्यभिज्ञा न स्यात् । अत एवानुव्यवसायो 'ध्वनिविशेषणैव दूरस्थः पुत्रो १ मयानुमित' इति ।।
न चैवं सति सैवेयं २ घर्घरी स एवायं ध्वनिरित्यादिप्रत्यभिज्ञया ध्वनिरपि नित्यः स्यादिति मण्युक्तं ३ युक्तम् । ध्वनिवर्णयोर्द्वयोरपि नित्यत्वे द्वयोरपि सदोपलब्धिप्रसङ्गात् । उच्चारणवैयर्थ्याच्च ।।

चतुर्थं पक्षे निराह -- नापि शुकेति ।। बाधत इति ।। स एवायं गकार इति प्रत्यभिज्ञाया इत्यर्थः । गकारव्यक्तेरेकत्वे गत्वस्याजातित्वेन तद्व्याप्यजातेरयोगादिति भावः । गकारादिव्यञ्जकध्वनिविशेषणैव वक्तृविशेषानुमानम् । न तु त्वदुक्तजातिविशेषेण । येन प्रत्यभिज्ञा भ्रान्तिर्भवेदित्याह -- वर्णाश्रवण इति ।।
एवं सतीति ।। स एवायं गकार इत्यादिप्रत्यभिज्ञाय् अभ्रान्तित्व इत्यर्थः । मण्युक्तमिति ।। शब्दानित्यत्ववादे सिद्धान्ते मण्युक्तमित्यर्थः । प्रत्यभिज्ञाद्वयस्याभ्रान्तित्वायोगादन्यतरभ्रान्तित्वेऽवश्यंभाविनि ध्वन्यश एव तद्युक्तमिति सयुक्तिमाह -- ध्वनिवर्णयोरिति ।।

१.मयेति नास्ति -क-ग-ख. २.गूर्जरी-छ. गुर्जरी-क-ग-ख. ३.निरस्तम् - छ.

न चोच्चारणस्य व्यञ्जकत्वन्नोक्तदोष इति वाच्यम् । भिन्नदेशत्वात् । उच्चारणं हि वक्तृवक्त्रे । शब्दस्तु श्रोतृश्रोत्रे । भिन्नेन्द्रियग्राह्यत्वाच्च । अत एव नोच्चारणजन्यो वायुर्व्यञ्जकः । अत एवातीन्द्रियस्य व्यञ्जकान्तरस्य कल्पनाप्ययुक्ता । घटादावपि तत्कल्पनाप्रसङ्गात् ।।

तस्माद्वयोरेको नित्यः अन्यस्तु व्यञ्जक इति वक्तव्ये नतावद्ध्वनिरेव नित्यो वर्णस्तु व्यञ्जक इति युक्तम् ।

भिन्नदेशत्वं व्यनक्ति -- उच्चारणं हीति ।। ध्वनिवर्णयोर्नित्यत्वे विभुद्रव्यतया सर्वगतयोर्निरवयोर्वक्तृनिष्ठेनाप्युच्चारणेनाभिव्यक्तयोः श्रोत्रेण ग्रहणमविरुद्धम् ।
तथाप्य १ न्वयव्यतिरकेकाभ्यां शब्दस्थले २ श्रोत्रसंबद्धेनैव व्यञ्जकेनाभिव्यक्तस्य श्रोत्रेण ग्रहणम् । अन्यथैक ३ वक्तृनिष्ठोच्चारणाभिव्यक्तशब्दस्य सर्वैरपि ग्रहणप्रसङ्गादिति भावः -- भिन्नेन्द्रियेति ।। उच्चारणस्य चाक्षुषत्वाच्छब्दस्य श्रावणप्रसङ्गादिति भावः ।।
यद्यपि गोघृतादेः कुंकुमगन्धादेश्च भिन्नेन्द्रियग्राह्यत्वेपि अस्ति ४ व्यञ्जकव्यङ्ग्यभावः । तथाप्यन्वयव्यतिरेकाभ्यां शब्दस्थले एकेन्द्रियग्राह्ययोरेव तथात्वावगतेरिति भावः । घृतादावपि प्रतिनियतव्यञ्जकव्यङ्ग्य ५ वादे वक्ष्यमाणदिशा घृतादिगतगन्धादिरेवाभिव्यञ्जक इति ६ भावः । अन्ये त्वेकेन्द्रियग्राह्यत्वं वा एकेन्द्रियग्राह्यगुणकत्वं वा व्यञ्जकत्वे तन्त्रमित्याहुः ।।
अत एवेति ।। वायोरतीन्द्रियत्वेन श्रोत्रेन्द्रियग्राह्यत्वादिति भावः -- अत एवेति।। तद्ग्राकेन्द्रियग्राह्यस्यैव तद्व्यञ्जकत्वादित्यर्थः --तदेवमिति ।।

१.अन्वयव्यतिरेकाभ्यां शब्दस्थले इति नास्ति -अ-इ. २.श्रोत्रसम्बन्धेनैव -इ. ३.वक्तृपदं नास्ति -अ. ४.व्यङ्गव्यञ्जक -इ. ५.त्वया-इ. ६.वा -अ.

---------- ---------- --------

भेर्यादौ वर्णाभावेपि ध्वनिग्रहात् । तस्मात्परिशेषाद्वर्ण एव नित्यो धन्विस्तु व्यञ्जक इति युक्तम् । ध्वन्यभावे वर्णाग्रहात् ।।
१ तदेवमुपपत्तिविरोधादापणे ध्वनिरुत्पन्नः स च शान्ति इति ध्वनित्वेनैवोत्पत्याद्यनुभवविरोधाद्वर्णप्रत्यभिज्ञाय 'यावद्ब्रह्मविष्ठितं तावतीवागि'त्यादिश्रुत्यनुगृहीतत्वाच्च सैवेयं २ घर्घरीत्यादेरेव भ्रान्तित्वादिकं युक्तम् ।।
तदेवमुक्तरीत्या बाधकाभावेपि वर्मे ३ सोयमिति व्यपदेश एव न तु प्रतीतिरिति तदपलापे वा,

तस्मादेवं ध्वनिवर्मयोरित्यादिनोक्तरीत्येर्थः । ४ तत्तस्मादित्यस्य विवरणं उपपत्तीत्यादि । तावती वागिति ।। तावत्कालिनो वर्ण इत्यर्थः ।।
वागित्यस्य टीकायां वेदरूपा वागिति व्याख्यानेपि सजातीयानुपूर्वोकत्वेनैव तावत्कालत्वस्य वाच्यत्वेन मुख्यार्थ ५ लाभाय वर्मरूपार्थान्तरमुपेत्य वा वेदरूपवाचस्तावत्कालीनत्वस्य ६ वर्णानां तावत्कालीनत्वाभावेऽयोगादर्थलब्धमुपेत्य वा श्रुत्यगृहितत्वाच्चेत्युक्तम् । अत एव टीकायां तावती वागिति वर्णानां व्यापकत्वस्याभ्युपगतत्वेनेत्यप्युक्तमित्यदोषेः ।।
एवं प्रत्यभिज्ञाया अनन्यविषयत्वं प्रसक्तबाधकनिरासेनाभ्रान्तित्वं च समर्थ्योपसंहरन् परपक्षे बाधकोक्त्याप्युक्तं समर्थ्यते -- तदेवमित्यादिना -- अन्यत्प्रमाणस्तीत्यन्तेन -- उक्तेति ।। 'न च भेदधीर्बाधिके'त्यादिनोक्तरीत्येत्यर्थः -- तदपलापे वेति ।।

१.तस्मात् -छ-क. २.गूर्जरी-छ-क-ग-गुर्जरी-ख. ३.र्णः सो-क. ४.तत्पदं नास्ति -अ - इ. ५.र्थत्व -अ. ६.त्वाभावे.

---------- -------- ----------

१ तदनपलापेपि २ तस्याः पुरोवृत्तिगकारे गत्वेनोपस्थितगकाराभेदविषयत्वेनाभिज्ञात्वे वा, प्रत्यभिज्ञात्वेपि साक्षात्परंपरया ३ जात्यभेदविषयत्वे वा, व्यक्त्यभेदविषयत्वेपि तस्याः भ्रान्तित्वे वा, तत्तद्वादिभिस्तत्तद्वस्तुनः स्थायित्वेन प्रमाणत्वेनाङ्गीकृताया अपि स एवा ४ हमित्यादिप्रत्यभिज्ञाया अपलापादिप्रसङ्गेन कस्यापि स्थायि ५ त्वं न सिद्ध्येदिति क्षणिकवादः स्यात् । न हि स्थायित्वे प्रत्यभिज्ञातोऽन्यत्प्रमाणमस्ति।।

तदेतदभिप्रेत्योक्तं भगवत्पादैः । 'न च सादृश्यात्प्रत्यभिज्ञा भ्रान्तिरिति वाच्यम् ।

'

न च तानेव शालीनि'त्यादिनोक्तरीत्या प्रतीत्यपलापे वेत्यर्थः । 'तस्या'इत्यतः पूर्वमप्युक्तरीत्येत्यनुषञ्जनीयम् । 'न चेयं प्रत्यभिज्ञे'त्यादिनोक्तरीत्येति तत्रार्थः । एवमग्रेप्युक्तरीत्येत्यनुवर्त्य यथायोगमर्थो योज्यः ।।

सप्तम्यन्तोक्तापादकचचुष्टयेप्यनिष्टयेप्यनिष्टापादनामाह -- तत्तद्वादिभिरिति ।। सर्वक्षणिकत्वं वदद्भिरपि बौद्धैः

'आकाशो द्वौ विनाशौ न नित्यं त्रयमसंस्कृतम्'

इत्युक्तत्वेनाशस्य बुद्धिपूर्वविनाशाबुद्धिपूर्वविनाशयोश्च नित्यत्वोपगमेन तेषामपीदमापादनं सममिति सूचनाय -- तत्तद्वादिभिस्तत्तद्वस्तुन इत्युक्तम् । अपलापादीत्यादपदेन प्रागुक्तापादक ६ त्रयग्रहः -- तदेतदिति ।। व्यपदेशादिपक्षचतुष्टयमपि नेत्येतत्तत्वनिर्णया उक्तमित्यर्थः ।।

१.प्रतीत्यनपला-क-ख. २.अनन्तरं 'साक्षात्परंपरे'त्याद्येवास्ति -छ. ३.राजा-क. ४.वायमि -ग. ५.अत्र सर्वत्र 'पि' इत्येवास्ति -क. ६'त्रय' इति नास्ति - अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४१४.

सोयं देवदत्त इत्यादेरपि तथात्वा १ पत्ते'रिति । अत्र प्रत्यभिज्ञा भ्रान्तिरित्यस्य समस्तपदत्वेन व्यपदेशमात्रत्व २ पक्षे तस्मिन्व्यपदेशे प्रत्यभिज्ञात्वभ्रान्तिरिति, पुरोवृत्तिनस्तदभेदविषयकाभिज्ञात्वपक्षे तस्यास्तत्का ३ लीनावच्छिन्नाभेदविषकप्रत्यभिज्ञात्वभ्रान्तिरिति, जात्यभेदविषयकप्रत्यभिज्ञात्वपक्षे तस्यां व्यक्त्यभेदविषयकप्रत्यभिज्ञात्वभ्रान्तिरिति, व्यस्तपदत्वेन व्यक्त्यभेदाविषया प्रत्यभिज्ञा भ्रान्तिरिति पक्षे व्यक्त्यभेदविषयापि प्रत्यभिज्ञा भ्रान्तिरेव न तु ४ प्रमेति, चार्थो द्रष्टव्यः ।।

टीकायां चतुर्थपक्षनिरासपरत्वेन व्याख्यानेपि बह्वर्थकत्वान्मूलग्रन्थस्य स्वोक्तपक्षचतुष्टयनिरासमपि मूलारूढं दर्शयति -- अत्रे ६ ति ।। मूलवाक्य इत्यर्थः -- समस्तेति ।। चतुर्थपक्ष एव भिन्नपदत्वात्तदन्यपक्षत्रयेपि भावप्रधाननिर्देशेन प्रत्यभिज्ञात्वेन भ्रान्तिः प्रत्यभिज्ञाभ्रान्तिरिति समासं प्राप्तपदत्वेन हेतुनाऽव्यस्तपदत्वेन हेतुनेत्यर्थो द्रष्टव्य इत्यन्वयः । 'अर्थो द्रष्टव्यः'इति पदद्वयं । पूर्वत्र प्रत्येकं इतिशब्दत्रयान्तेपि व्यपदेशमात्रपक्ष इत्यर्थो द्रष्टव्य इत्यादिरूपेणान्वेतव्यम् ।।

१.त्वापादादिति -ग. २.'मात्रम्'-ततः 'जात्यभेद' इत्यादि 'भ्रान्तिरिति' इत्यन्तं, ततः व्यपदेशे प्रत्यभिज्ञात्वभ्रान्तिरिति' इत्यारभ्य, 'तत्कालावच्छिन्नाभेदविषयकप्रत्यभिज्ञात्वभ्रान्तिरिति' इति पङ्क्तिः, ततः 'व्यस्तपदत्वेन' इत्यादि च वर्तते -ग. ३.लावच्छिन्नाभेद -छ-ख. ४.भ्रम इति -छ. ५.वा-ग. ६.'च' इत्यधिकम् - अ.

वर्णा-नित्वे-प्रज्ञा-भङ्गः) वर्णवादः पु - ४१५.

एतेन 'प्रत्यभिज्ञानन्तरमुत्पत्यादिप्रत्ययानां तदनन्तरं च प्रत्यभिज्ञाया दर्शनोभयाबाधायोत्पत्यादिधीर्व्यक्तिविषयिणी अभेदधीस्तु जातिविषया ; यद्वोत्पत्यादिप्रत्ययानामनेकत्वात्तद्विरुद्धैका प्रत्यभिज्ञा भ्रान्तिः । बहुबाधस्यान्याय्यत्वात् 'इति १ मण्युक्तं निरस्तम् । प्रत्यभिज्ञाया विशेष्यात्मकव्यक्त्यभेदविषत्वेनोत्पत्यादिप्रत्ययस्य च विशिष्टविषयत्वेनोभयप्रामाण्यस्योक्तत्वात् । प्रत्यभिज्ञा व्यक्त्यभेदविषिया, उत्पत्यादिधीस्ति ध्वनिविषयेत्यपि सुवचत्वाच्च ।।

किं चोत्पत्तिधीः संमर्देऽपगतेऽवकाशो २ जात इत्याकाशोत्पत्तिधीवदभिव्यक्तिविषास्ति । त्वन्मते बाधलागवोक्तिश्चायुक्ता । त्वदभिमतानां अयं शुकोत्पन्नो गकारः, अयं शुकोच्चारितो गकारो ---

मण्युक्तमन्यदपि निराह-- एतेनेति ।। उत्पत्यादीत्यादिपदेन विनाशतारमन्दत्वादिप्रत्ययग्रहः -- उक्तत्वादिति ।। 'न च भेदधीर्बाधिके'त्यादिग्रन्थेनोक्तत्वादित्यर्थः ।

ननूत्पन्नो गकारो नष्टो गकार इति प्रतीतेः कथं ध्वनिविषयतेत्यत आह - किं चेति ।। बहुबाधस्यान्याय्यत्वादित्युक्तिं च निराह -- त्वन्मत इति ।। त्वदभिमताना मित्यस्य ३ प्रत्ययानामिति षष्ट्यन्तेनान्वयः । सर्वलोकसिद्धानामित्यस्य वक्ष्यमाणषष्ठ्यन्ताभ्यामन्वयः ।।

१.मण्युक्तमिति नास्ति -ख. २.त्पत्तिधीवत् इत्यस्ति -ग. ३.मानानां - इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४१६.

---

१ नष्ट इत्यादीनामुत्पत्यादिसाक्षात्काररूपप्रत्ययानां ; सर्वलोकसिद्धानां २ शुकोच्चारितो गकारोऽयं वर्तते श्रोत्रे शुकगकार इत्याद्यभिज्ञनां ; यः पूर्वं गकारः श्रुतः स एवेदानीमपि, योऽन्यत्र स एवात्रापि, यश्चैत्रोच्चारितः स एव मैत्रोच्चारितः, एकोच्चारिते ४ पि यः प्राच्येन श्रुतः स एव प्रतिच्येनापि, यो निकटस्थेन श्रुतः स एव दूरस्थेनापीत्यादिप्रत्यभिज्ञानां च ; बाध ५ कत्वेन त्वन्मत एव बहुबाधात् ।।
न हि त्वत्पक्षे शुकोत्पन्नस्येदंत्वेन साक्षात्क्रियमाणत्वेन ६ वर्तमानत्वेन श्रोत्रस्थत्वेन च सामानाधिकरण्यम् । न वा एकोच्चारितेपि कदंब ७ गोलकन्यायपक्षे प्राच्यप्रतीच्ययोरेकत्वम् ।।

ननूक्तत्रिरूपप्रतीतीनां कुतो बाधो न्यायमत इत्यत आह -- न हीति ।। शब्दोत्पत्तिदेशात्कदंबगोलकन्यायेन शब्दानां दशस्वपि दिक्षु दशधा शब्दाच्छब्दान्तरोत्पत्तिक्रमेण कर्णदेशप्राप्त्युपगमेन कर्णदेशसंबद्धस्य शुकमुखोत्पन्नशब्दजातीयत्वेन साक्षात्तदुत्पन्नत्वाभावात् । एवं तत्तद्दिगवस्थितपुषैःश्रूयमाणस्यापि
दिगन्तरस्थितपुरुषान्तरश्रुतशब्दजातीयत्वेन साक्षात्तदभेदाभावादिति भावः ।।

१.न सः -ग. २.अस्य पूर्वान्यय रेखाद्वयेन सूचितः -छ. ३.'अयं' इति नास्ति -छ-क-ग-ख. ४.तः-छ-क. ५.धेन -छ-क-ग. ६.'नष्टत्वेन' इत्यधिकम् -च-क-ग-ख. 'वर्तमानत्वेन' इति नास्ति -छ. ७.मुकुल- ख.

यद्यपि वीचीतरङ्गन्यायपक्षे तयोरैक्यम् । तथापि निकट १ दूरस्थयोरैक्यं नास्त्येव । तस्माद्बहूनामबाधायोत्पत्यादिधीरेव भ्रान्तिरस्तु ।।
ननूत्पत्यादिचधीर्न तावत्स्मर्यमाणारोपः । सदृशादर्शनात् । गृह्यमाणारोपत्वे रक्तः स्फटिक इत्यादाविवोपाधिर्वाच्यः । स च न तावत्कुङ्कुमारुणा तरुणीतिवदानुभविकः । गकारो २ स्तीत्यादावुपाधेर्ध्वनेरननुभवात् । नाप्ययो दहतीतिवदौ ३ पपत्तिकः ।

ननु तटाकादिमध्ये पाषाणाद्यभिघाताद्दशदिक्सम्बन्धिन्य एकैका एव वीत्यस्तरङ्गाश्च जायन्त इति न्यायेन दशदिक्संबन्ध्येकैकशब्दपरंपरोत्पत्तिपक्षे प्राच्यदिशब्दस्यैक्यमेवेति न तत्प्रत्यभिज्ञाबाध इत्याशङ्क्य निराह -- यद्यपीति ।। वीचीनाम सूक्ष्मरूपस्स्त्रीतरङ्गः । तरङ्गस्तु स्थूलः -- निकटेति ।। शब्दोत्पत्तिदेशनिकटस्थदूरस्थयोरित्यर्थः ।।
उत्पत्यादिधियो भ्रान्तित्पमयुक्तमिति मण्युक्तरीत्या शङ्कते -- नन्विति ।। सदृशेति ।। शुक्ताविदं रूप्यमित्यारोपे शुक्तिसदृशस्य रजतस्येवेह -- वर्णसदृशस्योत्पत्यादिमतोऽभावदित्यर्थः । आनुभाविक इति ।। कुङ्कुमेनारुणा न स्वत इति कुङ्कुमस्योपाधित्वमुभूयमानमित्यानुभाविकः । कुङ्कुमरूप उपाधिः । एवं गकारो ध्वन्युत्पन्नो न ४ स्वत इत्यनुभवाभावादित्यर्थः । औपपत्तिक इति ।। उपपत्तिसिद्ध इत्यर्थः । उपाधिरित्यनुषङ्गः । वह्निधर्मस्य दग्धृत्वस्यायस्यारोपाद्वह्निरूपोपाधिनैवायो दग्धृ न तु स्वत इत्यनुभवः । तत्रायसि वह्नित्वेन वह्नेरननुभवात् । किन्तु वह्नसम्बन्धे सति

दग्धृत्वमन्यथा तु नेत्यन्वयव्यतिरेकगम्यं वह्नेरुपाधित्वमित्यौपपत्तिक इत्युक्तम् ।।

१.स्थद् -च-छ-ग-ख दूरस्थनिकटस्थयो - क. २.गकारो नास्ती -छ-क-ग. ३.पाधिकः - छ. ४.स्वरूपतः -- अ-इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४१८.

तत्रान्वयव्यतिरेकवतोग्नेरिवेह तद्वतः कस्यचिदभावादिति चेन्न । इहापि ध्वनेः सत्वात् ।।

तत्रोग्नेरग्नित्वेनाननुभवेप्यारोप्येण दग्धृत्वेनानुभवोस्तीति चेदिहापि ध्वनेर्ध्वनित्वनाननुभवेप्यारोप्येणोत्पन्नत्वादिनानुभवोस्तीति समम् ।।

न च प्रत्यभिज्ञारोप्ये ऐक्यसाक्षात्कारे सति कथं तद्विरुद्धोत्पत्यादिभ्रम इति वाच्यम् । उत्पत्यादेरैक्याभावानात्मकत्वेन साक्षादविरोधात् । ऐक्यव्यापकाभावप्रतियोगित्वरूपे विरोधे सत्यपि तदग्रहदशायामारोपसम्भवात् । तद्ग्रहदशायां चारोपाभावस्येष्टत्वात् ।।

यद्यपि मणौ 'कृपाणे मुखदीर्घत्वमौपपत्तिकं कृपाणान्वयव्यतिरेकानुविधानात्' इत्युक्तम् । तथापि तत्रानुभाविकत्वमेव कथंचिद्वक्तुं शक्यम् । कुपाणत्वेन तस्यानुभवादित्यरुचिं मन्वानः अयो दहतित्युदाहरदित्यदोषः ।।

तद्वतः अन्वयव्यतिरेकवतः । उत्पत्यादिधर्मकस्येत्यर्थः । विशेषदर्शनसत्वेनारोपाचसम्भवमाशङ्क्य निराह -- न च प्रत्यभिज्ञेति ।। किं

साक्षादारोप्याभावावगाहित्वेन प्रत्यभिज्ञा विरोधिनी उतारोप्याभावं प्रति व्याप्यविषकतया । आद्य आह -- उत्पत्यादेरिति ।। अन्त्य आह --

ऐक्यस्येति ।। प्रतियोगित्वेति ।। उत्पत्यादेरित्यनुषङ्गः -- विरोध इति।। प्रत्यभिज्ञया सहेत्यर्थः -- तदग्रहेति ।। उक्तरूपप्रतियोगित्वाग्रहेत्यर्थः --

वर्णानां नित्यत्वे अनुमानानि) वर्णवादः पु - ४१९.

तस्मात्प्रत्यभिज्ञाबाधितानि शब्दानित्यत्वानुमानानि ।।
वर्णा १ नित्यत्वे प्रत्यभिज्ञाविरोधः ।। २५ ।।

तस्मादिति ।। प्रत्यभिज्ञा यागकारादिव्यक्त्यैक्यादन्यविषयकत्वभ्रान्तित्वयोरयोगादित्यर्थः ।।
वर्णानामनित्यत्वे प्रत्यभिज्ञाविरोधः ।। २५ ।।

सत्प्रतिपक्षाणि च । तथाहि । शब्दत्वं नित्यवृत्ति द्रव्यत्वव्याप्यजातिमदसमवेताद्विष्ठवृत्तित्वात् आत्मत्वत् (१) ।

प्रत्यभिज्ञादोषयोर्बाधप्रतिपक्षयोः प्रबलं बाधकं पूर्वमुक्त्वा प्रतिपक्षदोषं चाह -- सत्प्रतिपक्षाणि चेति ।। शब्दानित्यत्वानुमानानीत्यनुषङ्गः । शब्दो नित्य इत्येव प्रतिज्ञोक्तौ द्वितीयादिकतिपयहेत्वसिद्धिः । ध्वन्यंशे बाधश्च । अतः शब्दत्वं नित्यवृत्तीति प्रतिज्ञा २ य द्वितीयादिहेत्वनुगमाय तु वर्णत्वमित्येव न कृतम् । नित्यवृत्तित्वं च जगदाधारताप्रयोजकसंबन्धभिन्नसबन्धेनेति ज्ञेयम् । स च समन्धो न्यायमते समवायः । सिद्धान्ते स्वरूपसम्बन्धः । तेन कालवृत्तित्वमादाय न सिद्धनाधनतावकाशः । ध्वन्यंशे बाधाद्वर्णवृत्तित्वेन साध्यपर्यवसा ३ नमिति
भावः -- द्रव्यत्वेति ।। द्रव्यत्वव्याप्यजातयः पृथिवीत्वजलत्वादयः ।

१.नामनि-ग. २.ज्ञा-अ. ३.नं, ध्वन्यनित्यताया ध्वनिवर्णयोरित्यादिना प्रागुपपादनादिति भावः इत्यस्ति - अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४२०.

घ्राणभिन्नबहिरिन्द्रियव्यवस्थापकतावच्छेदकत्वात् रूपत्ववत् (२) ।

तद्वत्सु पृथिव्यादिष्वसमवेतं य १ दद्विष्ठं अव्यासज्यवृत्ति तद्ववृत्तित्वादित्यर्थः । शब्दस्तु तादृशपृथिव्यप्तेजोवाय्वात्मनःस्वसमवेतोऽद्विष्ठश्चेति तद्वृत्तिशब्दत्वे हेतुसत्वमिति भावः । एते च हेतवः परीत्यैव । परसिद्धैर्दूषणमित्याचार्योक्तेः । अत एव सत्प्रतिपक्षाणीत्युपक्रमः । अन्यथा नित्यत्वे मानं त्विति ब्रूयात् । सिद्धान्तेऽनुगतजातेमदसमवेतत्वाभावात् । अत एव सुधायां प्रकृतिनये 'गगनादेश्च सत्वत्व'मित्यत्र पृथिव्यादिगुणत्वेनापि शब्दस्योत्पत्तरुक्ता । पञ्चीकरणप्रक्रियामविवक्षित्वा जातिपदस्य सदृशधर्मपरत्वमुपेत्य स्वरीत्यापि वा । तेन मन्मत इत्यग्रिमग्रन्थाविरोध इत्याहुः । विशेषणकृत्यमग्रे स्फुटम् -- आत्मत्ववदिति ।। तच्च ३ क्वाप्यसमवेताद्विष्ठात्मवृत्तित्वाद्धेतुसाध्ययोः सत्वं स्पष्ठम् । न्यायमते विभुत्वेनात्मनोऽवृत्तित्वात् ।।

घ्राणेन ।। घ्राणभिन्नं यद्बहिरिन्द्रियं श्रोत्ररूपं तदस्त्वित्वावधारक तानियामकत्वादित्यर्थः । शब्दज्ञानं हि कार्यं स्वकारणभूतं श्रोत्राख्यमिन्द्रियस्वरूपमनुमापयति । अकारणकस्यानित्यज्ञानस्यानुदयात् । अन्यस्य चक्षुरादेः शब्दज्ञाने करणत्वायोगात् । शब्दस्य तादृशेन्द्रियव्यवस्थापकतायां शब्दत्वस्यावच्छकत्वादिति भावः । चक्षुरिन्द्रियादिव्यस्थापके २ रूपत्वरसत्वादौ हेत्वनुगमाय बहिरिन्द्रियेति

समान्योक्तिः । न तु श्रोत्रेति विशिष्य -- रूपत्ववदिति ।। रूपत्वरसत्वस्पर्शत्ववदित्यर्थः।

१.यद्द्विष्ठं अव्यासज्यवृत्ति तद्वृत्तित्वाभावादित्यर्थः - अ. २.कतावच्छेदके - मु.
३.तस्य - च.

वनां-नित्वे-ऽनुनि.) वर्णवादः पु - ४२१.
---------- -------- -------
आत्मत्वमूर्तत्वसमानाधिकरणाद्विष्ठवृत्तित्वात् कालत्ववत् (३) । स्वाश्रयभिन्नविशेषगुणासमानाधिकरणप्रत्यक्षवृत्तित्वादात्मत्ववत् (४) । पृथिवीवृत्यवृत्तित्वे आत्मवृत्यवृत्तित्वे च सति सत्तासाक्षाव्याप्यसाक्षाव्याप्यत्वात् जलत्ववत् (५) ।

बहिरन्द्रियव्यवस्थापकातवच्छेदकानां रूपरसगन्धस्पर्शशब्दत्वानां एकस्य पक्षत्वेपि गन्धस्य पृथिवीमात्रगुणत्वेन
पार्थिवपरमाणुषु गुणानां पाकजत्वेनानित्यतायां १ गन्धस्य नित्यावृत्तिरूपसाध्याभावेपि जलपरमाण्वादिगतरूपसस्पर्शानामपाकजत्वेन रूपत्वादित्रयस्य नित्य २ वृत्तित्वादाधिक्यदोषनिरासाय रूपत्ववदित्ये वोक्तम् -- आत्मत्वेति ।। आत्मत्वमूर्तत्वाभ्यामसमानाधिकरणं यद ३ द्विष्ठं तन्निष्ठत्वादित्यर्थः । मूर्तत्वं नाम इयत्तावच्छिन्नपरिमाणयोगित्वम् । पृथिव्यप्तेजोवायपुमनसां धर्मः । पक्षदृष्टान्तभूतयोः शब्दत्वकालयोस्तादृशशब्दकालनिष्ठात्कालस्य नित्यत्वाच्च हेतुसाध्यानुगम इति भावः ।।
स्वेति ।। स्वस्य शब्दत्वस्याश्रयः शब्दः, तद्भिन्नविशेषगुणो रूपादिः, तदसमानाधिकरणम् प्रत्यक्षम् च तत्, शब्द एव, तद्वृत्तित्वादि ४ त्यर्थः ।

दृष्टान्ते स्वस्यात्मत्वस्य आश्रयः आत्मा । तदतिरिक्तविशेषगुणेनासमानाधिकरणं प्रत्यक्षं च अवृत्तिभूतमात्माख्यं वस्तु तद्वृत्तत्वादिति हेत्वनुगमो ध्येयः । स्वशब्दस्य समभिव्याहृतपरत्वात् । शब्दत्वमात्रपरत्वेप्यदोषात् -- पृथिवीवृत्ती रूपादिः । आत्मवृत्तिर्ज्ञानादिः । तदुछभयावृत्तित्वे सति सत्तासाक्षाद्व्याप्यं पक्षे गुणत्वम् । दृष्टान्ते च द्रव्यत्वम् । तेन साक्षाव्व्याप्यं शब्दत्वं जलत्वं चेति पक्षदृष्टान्तयोर्हेत्वनुगमः ।

१.तया-इ. २.वृत्तिपदं न -मु. ३.दि्वष्ठं - अ. ४.'ति हेत्वनुगमो ध्येयः' इत्यस्ति. 'दृष्टान्ते' इत्यादिपङि्क्तर्नास्ति -अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४२२.

व्योमेतरावृत्तिजातिमद्वृत्तित्वादात्मत्वत् । (६) स कलशब्दवृत्तित्वात्सत्तावत् (७) । श्रोत्रं नित्यवृत्तिसत्ताव्याप्यव्याप्यजातिग्रहकम् अपार्थिवेन्द्रियत्वाच्चक्षुर्वत् (८) । वर्णो नित्यो ध्वनिशब्दत्वव्याप्यभिन्नत्वे सति श्रावणत्वाच्छब्दत्ववत् (९) इत्याद्यनुमानैः प्रतिरोधात् ।।
अत्राद्ये हेतौ कालाकाशगतद्वित्वनिष्ठद्वित्वत्वेऽव्यभिचारायाद्विष्ठेत्युक्तम् ।

दृष्टान्ते साध्यानुमश्च जलपरमाणुवृत्तित्वेन ज्ञेयः । साक्षाव्व्याप्यत्वं नाम व्याप्याव्याप्यत्वे सति व्याप्यत्वम् । गुणत्वद्रव्यत्वयोः सत्ताजातेश्च मध्ये तथा गुणद्रव्यत्वयोः शब्दत्वजलत्वयोर्मध्ये च व्याप्यधर्मान्तरस्याभावात् ।।
व्योमेति ।। व्योमेतरस्मिन्नविद्यमानो यो जातिमान् शब्दः आत्मा च तद्वृत्तित्वाच्छब्दत्वस्यात्मत्वस्य चेति पक्षदृष्टान्तयोर्हेत्वनुगतिः ।।

श्रोत्रमिति पक्षः ।। नित्यवृत्तिवृत्तिर्यो सत्ताव्याप्यगुणत्वप्याप्यशब्दरूपा जातिः तद्गाहकत्वेन पक्षे, दृष्टान्ते च तादृशरूपत्वग्राहकत्वेन साध्यानुगमः । रूपत्वस्यापि नित्यं यज्जलपरमाण्वादिरूपं तद्वृत्तित्वात् -- अपार्थिवेति ।। परमते घ्राणस्यैव पार्थिवत्वेन तदन्येषामपार्थिवत्वान्नासिद्ध्यादिः ।।
ध्वनीति ।। ध्वनिश्च शब्दत्वव्याप्यं तारत्वादिकं च ताभ्यां भिन्नत्वे सतीत्यर्थः -- प्रतिरोधादिति ।। सत्प्रतिपक्षाणीत्यन्वयः -- द्वित्वत्व इति ।। अनुमानोपनीतकालाकाशाद्यनोचरमानसापेक्षाबुद्धिजन्यस्य कालाकाशोभयगकद्वित्वस्य ------

वनां-नित्वे-ऽनुनि) वर्णवादः पु - ४२३.

---------- ------- ----------

।१ गन्धत्वदुःखत्वादावव्यभिचारायासमवेतेत्युक्तम् । असमवेतवृत्तित्वस्य प्रतिवादिनं प्रत्यसिद्धि २ निरासाय द्रव्यत्वव्याप्यजातिमदित्युक्तम् ।।।
द्वितीये गन्धत्वेऽव्यभिचाराय घ्राणभिन्नेति ।

-- द्रव्यत्वव्याप्यजातिमत्सु पृथिव्यप्तेजोवाय्वात्ममनः स्वसमवेतत्वेन द्वित्वत्वे तादृशद्वित्ववृत्तित्वहेतुसत्वेपि नित्यवृत्तित्वाभावाद्व्यभिचारनिरासाया ३ द्विष्ठेत्युक्तमित्यर्थः । तर्ह्य ४ द्विष्ठवृत्तित्वादित्येवास्त्वित्यत आह -- गन्धत्वेति ।। गन्धत्वादेः पृथिव्यात्मादिसमवेतगन्धादिवृत्तित्वादव्यभिचार इत्यर्थः । रूपत्वादिकं तु नित्यवृत्तीति गन्धत्वेत्युक्तम् । पार्थिवगुणानां पाकजत्वेन गन्धो न नित्य इति भावः ।।
तर्ह्यसमवेता ५ द्विष्ठेत्येवास्त्वित्यत आह -- असमवेतेति ।। प्रतिवादिनं प्रतीति ।। तार्किकं प्रतीत्यर्थः । सत्प्रतिपक्षानुमानप्रयोक्तृदशायां सिद्धान्तिनः स्थापनावादित्वेन परस्यैव प्रतिवादित्वात् --

असिद्धिनिसायेति ।। न चासिद्धिनिरासकं व्यर्थम् । व्याप्ति ६ पक्षधर्मताया अप्यनुमित्यङ्गत्वेन तत्संपादकस्यापि सार्थक्यात् । 'यन्निष्ठा यन्निरूपिता व्याप्तिर्येन विशेषणेन विना न परिच्छद्यते तद्विशेषणमर्थवदिति'न्यायेन विशिष्टहेतुनिष्ठव्याप्तेरुक्तविशेषणेन विना गृहीतुमशक्यत्वेन व्याप्तिग्रहौपयिकत्वाच्चेति भावः ।।
गन्धत्व इति ।। पृथिवीगुणस्य पाकजत्वेन गन्धत्वे नित्यवृत्तित्वरूपसाध्याभावेपि
घ्राणरूपबहिरिन्द्रियव्यवस्थापकतावच्छेदकत्वाद्घ्राणभिन्नेत्युक्तानां न दोष इत्यर्थः -- दुखत्वेति ।।

अयं ग्रन्थः नास्ति - क. २.वारणाय-छ. ३.यद्वि-अ. ४.र्हिद्वि-अ. ५. तद्वि -अ. ६.'तत्' इत्यधिकं - इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४२४.
---------- ---------- --------
दुःखत्वादावव्यभिचाराय बहिरिति चोक्तम् ।।
तृतीयेप्यद्विष्ठपदस्थाद्यहेताविव प्रयोजनं द्रष्टव्यम् । दुःखत्वादौ १ वेगत्वादौ चाव्यभिचारायात्मत्वमूर्तत्वासमानाधिकरणेत्युक्तम् ।।
चतुर्थे गन्धत्वे दुःखत्वादौ चाव्यभिचाराय विशेषगुणासमानाधिकरणेत्युक्तम् ।
विशेषणगुणासमानाधिकरणमनोगतवेगवर्तिनि वेगत्वेऽव्यभिचाराय प्रत्यक्षेत्युक्तम् । मनोगतवे २ गस्त्वप्रत्यक्षः । तावत्युक्ते गकारस्यापि ककाररूपविशेषगुणसमानाधिकरणत्वात्परं प्रत्यसिद्धिः । तदर्थं स्वाश्रयभिन्नेत्युक्तम् ।

तस्यान्तरीन्द्रिय व्यवस्थापकतावच्छेदकत्वादिति भावः । आत्मत्वमूर्तत्वान्यतरासमानाधिकरणाद्विष्ठवृत्तित्वादित्युक्तावाह -- दुःखत्वादाविति ।। मूर्तत्वासमानाधिकरणदुःखादिनिष्ठदुःखत्वादौ नित्यवृत्तित्वाभावेन तत्रा ३ व्यभिचार आत्मत्वासमानाधिकरणेत्यद्विष्ठविशेषणम् । आत्मत्वासमानाधिकरणं यदद्विष्ठं तद्वृत्तित्वादित्येवोक्तौ पृथिव्यप्तेजोवायुमनोधर्मवेगरूपगुणस्यात्मत्वासमानाधिकरणेत्यद्विष्ठविशेषणमित्यर्थः ।।
प्रत्यक्षवृत्तित्वादित्येवोक्तौ दोषमाह -- दुःखत्वादौ चेति ।। तर्हि प्रत्यक्षेत्यस्य बाह्यप्रत्यक्षेत्यर्थं मत्वोक्तम् -- गन्धत्वेति ।। परं प्रतीति ।।

१.'वेगत्वादा' विति नास्ति -छ. वेगवत्वादौ -ग. २.वेगपदं नास्ति -छ. ३.त्र व्यभिचारवारणाय - इ. ४.वृत्तित्याधिकं - इ.

वनां-नित्वे-ऽनुनि) वर्णवादः पु - ४२५.

एवं च १ ककारस्यापि शब्दत्वाश्रयत्वेन तद्भिन्नत्वाभावान्नासिद्धिः ।।
पञ्चमे गन्धत्वादावव्यभिचाराय पृथिवीवृत्त्यवृत्तित्वेन सतीत्युक्तम् । दुःखत्वादावव्यभिचारायात्मवृत्यवृत्तित्वे सतीत्युक्तम् । प्रभात्वदिवव्यभिचाराय स २ मेत्याद्युक्तम् ।।
एवं च सत्तासाक्षाव्याप्यं ।३ द्रव्यत्वं प्रति तेजस्त्वमेव साक्षाव्याप्यम् न तु प्रभात्वादिकमिति न व्यभिचारः । शब्दत्वं तु मन्मते सत्तासाक्षाव्याप्यं ।द्रव्यत्वं प्रति परमते च गुणत्वं प्रतिसाक्षाव्याप्यमिति नासिद्धिः ।।
षष्ठे ध्वनिप्रागभावत्वेऽव्यभिचाराय जातिमदित्युक्तम् । गन्धत्वादावव्यभिचाराय व्योमेतरावृत्तीत्युक्तम ।।

तार्किकं प्रतीत्यर्थः -- नासिद्धिरिति ।। असिद्धिवारकस्यापि सार्थक्यं पूर्ववत् ।।
आत्मेत्याद्युक्तौ दोषमाह -- गन्धत्वादाविति ।। व्योमेतरा वृत्तिवस्तुवृत्तित्वादित्येवोक्तौ दोषमाह -- ध्वनिप्रागभावत्व इति ।।
ननु सप्तते सकलवृत्तित्वादित्येवोक्तौ प्रमेयत्वादौ कवलान्वयिनि नित्यवृत्ति ४ साध्यस्यापि सत्वेन व्यभिचाराभवाच्छब्देति व्यर्थम् । स्वरूपासिद्धिवारकत्वेपि व्यर्थत्वादित्यत ईश्वरवादौक्तदिशा व्याप्त्याश्रयाणामनेकत्वसंपादकत्वेन सार्थक्यादिति भावेनाह -- सप्तम इति ।।

१.गकार -छ-क. २.त्तेत्या-छ-क-ग-ख. ३.अयं ग्रन्थः नास्ति -छ-क. ४.त्वसा-अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४२६.
---------- ---------- --------
सप्तमे शब्दपदमकेवलान्वयिनो गुणत्वादेरपि संग्राहकत्वेन विकासकत्वान्न व्यर्थम् ।। ।
१ अष्टमे साध्ये नित्यवृत्तिसत्ताद्रव्यत्वयोः सत्तागुणत्वयोर्वा ग्राहकत्वेनार्थान्तरमिति शङ्कानिरासाय २ सत्ताव्याप्यव्याप्येत्युक्तम् ।। हतो घ्राणेऽव्यभिचारायापार्थिवेत्युक्तम् ।।
३ नवमे ध्वनौ शब्दत्वव्याप्ये तारत्वादौ चाव्यभिचाराय ध्वनिशब्दत्वव्याप्यभिन्नेत्युक्तम् ।

अकेवलान्वयिन इति ।। शब्दनिष्ठस्येत्यपि ग्राह्यम् । न केवलं केवलान्वयिनः प्रमेयत्वादेरपीत्यर्थः । आकाशसमवेतत्वादिरादिपदार्थः ।।

अष्टम इति ।। अपार्थिवेन्द्रियत्वादिति हेतौ यत्साध्यं नित्यवृत्तीत्यादि तस्मिन्नित्यर्थः -- नित्यवृत्तिसत्ताद्रव्यत्वयोरिति ।। नित्यवृत्तिसत्ताजातिग्राहकमित्युक्ते शब्दगतसत्ताग्राहकत्वेनार्थान्तरम् । शब्दस्यानित्यत्वेप्याकाशादिनित्यवृत्तित्वात्सत्तायाः । अतो नित्यवृत्तिसत्ताव्याप्यजातिग्राहकमिति ।। तावत्युक्ते शब्दो द्रव्यमिति मते द्रव्यत्वस्य, गुण इति मते गुणत्वस्य ग्राहकत्वेनार्थान्तरम् । अतः सत्ताव्याप्यव्याप्तेत्युक्तमित्यर्थः । सिद्धसाधनताव्यदासाय शब्दस्य नित्यत्व सिद्धये नित्यवृत्तीति जातिविशेषणमिति स्पष्टमिति भावः ।।
नवम इति ।। ध्वनिशब्दत्वव्याप्यभिन्नत्वे सति श्रावणत्वादित्यत्र ध्वनिपदस्य कृत्यं ध्वनाविति ।। ध्वनिभिन्नत्वे सति श्रावणत्वादित्येवोक्तौ दोषः शब्दत्वव्याप्यतारत्वादाविति ।।

१.अयं ग्रन्थः लुप्तः -छ. २.सत्तेत्यु-ग. ३.चरमे -छ.

अत्र विपक्षे प्रत्यभिज्ञानुपपत्ति १ गौरवादिति बाधकानि । केचित्तु श्रोत्रं नित्यद्रव्यग्राहकम् निरवयेन्द्रियत्वात् मनोवत् इत्याहुः ।।
वर्णानां नित्यत्वेनुऽमानानि ।। २६ ।।

ध्विशब्दत्वप्याप्याभ्यां भिन्नत्वे सतीत्युक्तमित्यर्थः । श्रवणत्वादिति तु घटादावव्यभिचारायेति व्यक्तमिति भावः -- कल्पनागौरवादीति ।। विवरिष्यते चैतदुत्तरभङ्गे व्यक्त्यनन्त्यादिकल्पना वीचितरङ्गादिन्यायेन पूर्वशब्दस्योत्तरशब्दान्तरजनकत्वमुत्तरशब्दस्य
पूर्वपूर्वशब्दनाशकत्वमन्त्योपान्त्योरन्योन्यनाशकत्वमित्युत्तरत्र ३
वक्ष्यमाणगौरवमित्यर्थः । आदिपदेन बहुबाधादिग्रहः-- नित्यद्रव्येति ।।

शब्दत्वादिग्राहकत्वेनार्थान्तरपरिहाराय द्रव्यपदम् । एवं च शब्दस्य द्रव्यत्वं नित्यत्वं चादाय साध्यं पर्यवस्यति । व्योमादिनित्यद्रव्यग्राहकत्वेन पर्यवसानस्य बाधितत्वात् । इन्द्रियत्वमात्रस्य चक्षुरादौ व्यभिचारान्निरवयवेत्युक्तिः -- मनोवदिति ।। तस्यात्मग्रहकत्वादिति भावः ।।

अत्रारुचिबीजं तु, आत्मनो मानसत्वे कदाचिदरमानहं वेत्यादिसन्देहापातेन सुदृढनिर्णयरूपसाक्षिवेद्यत्वादात्मनः साध्यवैकल्यं दृष्टान्तस्य वस्तुमात्रस्येश्वरवादोक्तरीत्या संयोगित्वयुक्त्या सावयवत्वेन निरवयवत्वासिद्धेरित्यादि ध्येयम् ।

वर्णानित्यत्वेऽनुमानानि ।। २६ ।।

१. कल्पनेत्यधिकं - ग - ख - रा. २. भङ्गे इत्यधिकम् - अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४२८.

ननु वर्णानां नित्यत्वे सर्वदोपलब्धिः स्यात् । न चोच्चारणजन्यस्य ध्वनिरूपव्यञ्जकस्य कादाचित्कत्वान्न दोष इति वाच्यम । तस्य हि व्यञ्जकत्वं न तावदावारणापसारणवदिन्द्रियसन्निधा १ पकत्वेन । श्रोत्रगुणत्वपक्षे विभुत्वपक्षे च वर्णानां सर्वदेन्दियसंबन्धात् । नापि चक्षुरादावञ्जनादोरिव क्षोत्रे संस्काराधायकतया । संस्कृतेन श्रोत्रेण चक्षुषेव विविध्य स्वसंबद्धसर्ववर्णसमूहालम्बनस्यैकस्य ज्ञानस्योत्पत्यापातादिति चेन्न । त्वन्मते वर्णोत्पादकानामिव मन्मते तव्यञ्जकानामपि नियतत्वात् ।।

'अत आकाशगुणे शब्दे व्यज्यमाना वर्णादय'इति तत्वनिर्णयवाक्यस्य टीकायां शङ्कितं वर्णनित्यत्वबाधकं मण्याद्युक्तमाशङ्कते -- नन्विति

।। श्रोत्रगुणत्वपक्ष इति ।। परिमाणवन्नि २ त्यशब्देन सर्वदा श्रोत्रस्य सम्बन्धादित्यर्थः । बुभुत्सायां ३ नियामकत्वमाशङ्क्योक्तं -- चक्षुषेवेति --

'सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान्प्रकाशयेन ।
घटायोन्मीलितं चक्षुः पटं न हि न बुध्यते ।। '

इति प्राचीनोक्तेरिति भावः - त्वन्मत इति ।। यथैकवर्णोत्पादके ४ नैव न सर्ववर्णोत्पत्तिः, तथैकवर्णव्यञ्जकेनैव न सर्ववर्णव्यक्तिरिति न सर्वोपलम्भ इत्यर्थः ।। वर्णानित्यत्वावादे पूर्वपक्षे मणिकृताशङ्क्य निस्तमप्यनुमानं दोषान्तरविवक्षया शङ्कते -- नन्विति ।। प्रतिनियतेति ।।

१.धयक - क-ख. २.नित्यवादं न -अ. ३.यानि- इ. ४.नेनै - अ.

वर्णानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वम्) वर्णवादः पु - ४२९.

ननु वर्णा न प्रतिनियतव्यञ्जकव्यङ्ग्याः, एकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वाद्घटगतैकत्व १ परिमाण २ वत् । ३ अत्र च साध्ये व्यञ्जकशब्देन ४ ।विषयसन्निकर्षातिरिक्तो ज्ञानहेतुर्विवक्षित इति न बाधः ।
हेतौ भिन्नेन्द्रियग्राह्यरूपरसादौ व्यभिचारनिरासाय समानेन्द्रियेति विशेषणम् ।

अत्र प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं परस्परव्यभिचारिव्यञ्जकव्यङ्ग्यत्वं दोषाभावे परस्पराविषयक साक्षात्कारविषयत्वमिति यावत् । तेनैकत्र द्वित्वभ्रमजनकेन पिरमाणग्राहिणा परिमाणभ्रमजनकेनैकत्वग्राहिणा च न व्यभिचार इति व्याचक्षते -- एकेति ।। कवर्माद्ये ५

कावच्छेदकश्रोत्ररूपसमानदेशत्वे सति श्रोत्रेन्द्रियग्राह्यत्वाद्वर्णानां पक्षे हेतुसत्वं ध्येयम् । एकावच्छेदकदेशतः कालतश्चेत्यग्रे व्यक्तम् । अन्यूनानतिरिक्तदेशकालत्वे सतीति पदद्वयतात्पर्यमित्येके -- घट गतेति ।। घटगतैकत्वपरिमाणयोरेकघटत्वावच्छेदेन समानदेशत्वं समानेन्द्रियचक्षुर्ग्राह्यत्वमिति हेत्वनुगमः । परिमाणव्यञ्जकालोकव्यङ्ग्यत्वादेकत्वस्य
प्रतिनियतव्यञ्जकव्यङ्ग्यत्वाभावरूपसाध्यानुमगम इति भावः । ननु व्यञ्जकपदेन सन्निकर्षस्यापि ग्रहणे समवायस्यैकत्वेपि तत्तद्वर्णनिरूपितश्रोत्रसमवायस्य नि ६ यतत्त्वादभावसाधने बाधो दृष्टान्ते साध्यवैकल्यं चेत्यत आह -- अत्र च साध्य इति ।। न बाध इत्युपलक्षणम् । दृष्टान्ते साध्यवैकल्यं न नेत्यपि ध्येयम् ।।
सत्यन्तमात्रं हेतुरस्त्विवत्यत आह -- हेताविति ।। रूपादेरालोकलवणादिभिन्नव्यञ्जकव्यङ्ग्यत्वादिति भावः । समानदेशत्वे सतीत्यस्य कृत्यमभिमतं मण्युक्तं व्यनक्ति -- एकेनेति ।।

१.सख्यापरि -छ. २.णादि-छ. ३.सन्निकर्षातिरिक्तत्वविवक्षया न बाधः इत्यस्ति -छ. ४.एतावन्नास्ति -ग. ५.एकपदं न -मु. ६.त्यत्वात् -इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४३०.

---------- ---------- ----------

१ एकेन श्येन २ चरणावच्छेदेन ।वर्तमानयोर्भिन्नसंयोगव्यङ्ग्योः ३ श्येनस्य स्थाणुतदवयवा ४ भ्यां
संयोगयोर्व्यभिचारनिरासाय समानदेशत्वे सतीति विशेषण् । इह च समानदेशत्वमनतिरिक्तदेशत्वं विवक्षितम् । तेनोक्तयोः

संयोगयोरकस्मिन् श्येने वृत्तावपि स्थाणुसंयोगस्यावयवसंयोगानाश्रये स्थाणावयवसंयोगस्य च स्थाणुसंयोगानाश्रयेऽवयवे वृत्यातिरिक्तदेशत्वान्न व्यभिचारः । अत एव -
'प्रदीपे व्यज्यते जातिर्न तु नीरजनीलिभे
त्युक्तत्वादुकत्पलत्वव्यञ्जकप्रदीपव्यङ्ग्ये नैल्ये न व्यभिचारः ।

साध्याभावोपपादनायोक्तं भिन्नसंयोगिव्यङ्ग्ययोरिति । कारणाकारणसंयोगात्कार्याकार्यसंयोग इति संयोगजसंयोगपक्षे स्थाणुश्येनसंयोगस्थाने स्थाण्ववयवसंयोगस्यापि सत्वात् स्थाणुतदयवाभ्यां संयोगयोरित्युक्तम् । तथाच कथं न व्यभिचार इत्यत आह -- इह चेति ।।
अन्यत्रापि व्यभिचारनिरासः फलमित्यत आह --- अत एवेति ।। समादेशत्वे सतीत्य ५ स्यैवं विवक्षाकरणादेवेत्यर्थः -- ६ प्रदीप इति ।। प्रदीपे सत्येवेत्यर्थः।
जातिरुत्पलत्वम् । न तु व्यज्यत इत्यन्वयः । नीरजनीलिमा तु तस्मिन्सत्येन व्यज्यत इत्युक्तत्वात्प्राचीनैरित्यर्थः -- अतिरिक्तेति ।।

१.एकेनेति नास्ति- छ. २.ने पादाव -छ. ३.श्येनस्येति नास्ति -छ. ४.वसं-छ. ५.त्यन्तस्यैवं -इ. ६.इत्युक्तात्वात् इतिपर्यन्तं लोपः - इ- अ.

वनां-प्रत-व्यंक-व्यंत्वम्) वर्णवादः पु - ४३१.
---------- ---------- ----------
उत्पलत्वस्यातिरिक्तदेशवृत्तित्वात् । कालरूपावच्छेदकभेदेनैकघटनिष्ठयो रूपतद्ध्वंयोर्व्यभिचारनिरासायैकावच्छेदेनेति विशेषणम् । एकावच्छेदश्च न केवलं कालतः । किं तु देशतोपि । तेनावयवद्वयवृत्योरवयवद्वयारब्धयोरवयविसंयोगयोर्व्यभिचारो निरस्तः ।

अवयविनो व्याप्यवृत्तित्वेन अवयवसंयोगस्य चाव्याप्यवृत्तित्वेन देशतोऽवच्छेदकभदात् । अत्र च हेतुमत्सु संख्यादि १ सामान्यगुणेषु द्रव्यग्रहणयोग्यतान्तर्गतयोग्यताकत्वस्य द्रव्यग्राहक २ बहिरिन्द्रियग्राह्यत्वस्य च सत्वान्न व्यभिचारशङ्का । न चोक्तहेतुनैव प्रतिनियतोत्पादकाभावोपि साध्यः ।

रक्तोत्पलेपि सत्वादिति भावः -- कालरूपेति ।। कालाख्येत्यर्थः -- अवयवीति ।। अवयवी च संयोगश्चेति द्वंद्वः । तन्तुद्वयनिष्ठस्य पटरूपावयविनः तन्तुद्वयसंयोगस्य च यथाक्रममालोकेन तन्तुद्वयेन च व्यङ्ग्यत्वात्साध्याभावेपि हेतुरिति तत्र नेत्याह -- अवयविन इति ।। अवच्छेदकेति ।। व्यक्त्यंशावच्छेदेन संयोगस्य, सर्वावयवावच्छेदेनावयविनो वृत्तेरिति भावः ।।
नन्वेवमपि वङ्ख्यापरिमाणपृथक्त्वेषु एकावच्छेदेन समादेशत्वे सति समानेन्द्रियग्राह्यत्वहेतोः सत्वाद्व्यभिचार इत्यतः साध्यस्यापि सत्वान्न दोष इत्याह -- अत्र हेतुमस्त्विति ।। भिन्नहेत्विति ।। वेगस्य कर्मजन्यत्वात्कर्मणो नोदनादिजन्यत्वादिति भावः -- तथापीति ।।

१.सामान्यपदं न - क. २.यावदिन्द्रि - ग -ख.

भिन्नहेतुजन्ययोर्वेगर्मणोर्व्यभिचारादिति चेन्मैवम् । तथापि त्वचा ग्राह्ययोर्घटगतस्पर्शपृथक्त्वयोर्व्यभिचारात् । तत्र पृथक्त्वस्य स्पर्शव्यञ्जकेना विधिना व्यङ्ग्यत्वात् ।।
न च समानेन्द्रियग्राह्यपदेन परस्पराग्राहकेन्द्रियाग्राह्यत्वं विवक्षितम्, एवं च न व्यभिचारः ; स्पर्शस्य पृथक्त्वग्राहकत्वगिन्द्रियमात्रग्राह्यत्वेन

तदग्राहकाग्राह्यत्वेपि पृथक्त्वस्य स्पर्शग्राहकचक्षुर्ग्राह्यतया तदग्राह्यत्वाभावादिति वाच्यम् । भिन्नपुरुषनिष्ठापेक्षाबुद्धिभ्यां जन्ययोर्व्यङ्ग्ययोश्चैकदेशकालयोर्द्वित्वयोर्व्यभिचारात्।

उक्तस्थलेषु व्यभिचाराभावेत्यर्थः । हेतुसत्वायोक्तं -त्वचा ग्राह्ययोरिति ।। सत्यन्ताशसत्वं तु व्यक्तम् । साध्य १ सत्वं व्यनक्ति-- तत्रेति ।। अवधिनेति ।। अयमस्मात्पृथगिति प्रतीत्या पञ्चम्यन्तनिर्दिष्यावधि २ पदार्थेनेत्यर्थः । तावता कथं न व्यभिचार इत्यत आह -- स्पर्शस्येति।। भिन्नेति ।। यत्र घटपटस्थले चैत्रनिष्ठापेत्राबुद्ध्या मैत्रानिष्ठापेत्राबुद्ध्या च द्वित्वद्वयमुपपन्नं तत्र द्वित्वद्वये एकावच्छेदेन समानदेशत्वे सति परस्पराग्राहकेन्द्रियाग्राह्यत्वरूपहेतोः सत्वात्
द्वित्वत्वावच्छिन्नद्वित्वग्राहकेन्दियस्येकत्वेन नानात्वाभावादित्यर्थः । साध्यसत्व नेति भावेनोक्तं व्यङ्ग्योश्चेति ।। उक्तरूपबुद्धिभ्यां व्यङ्ग्ययोश्चेत्यर्थः।।

१. साध्या - अ. २. शब्दा - अ.

वनां-प्रत-व्यंक-व्यंत्वम्) वर्णवादः पु - ४३३.

त्वयापेक्षाबुद्धिर्व्यञ्जिकेत्यपि स्वीकारात् ।।
न च प्रति १ नियताप्रतिप २ त्तिकत्वमपि हेतुविशेषणं विवक्षितम्, द्वित्वे तु प्रतिनियतप्रतिपत्तृके इति वाच्यम् । अवयविव्यञ्जकमात्राव्यङ्ग्येनावयवबहुत्वेनैकत्वव्यञ्जकमात्राव्यङ्ग्येन पृथक्त्वदीर्घत्वादिना च व्यभिचारात् ।।

ननु परस्पर ३ व्यभिचारिव्यञ्जकाव्यङ्ग्यत्वं साध्यम्, एवं च न व्यभिचारः । अवयव्येकत्वव्यञ्जकयोर्बहुत्वपृथक्त्वव्यञ्जकाभ्यां व्यभिचारेपि ----

तद्व्यञ्जकत्वमसिद्धमित्यत आह -- त्वयेति।। अवयवीति ।। पटावयवगतबहुत्वस्य पटेन सहैकावच्छेदेन समानदेशत्वे सति समानेन्द्रियरूपहेतुमत्वेपि साध्यवत्वं नेत्युपपादनाय अवयविव्यञ्जकमात्रव्यङ्ग्येने त्युक्तम् । अपेक्षाबुद्ध्यापि व्यङ्ग्यत्वस्वीकारादिति भावः -- एकत्वेत्यादि ।। अवधिपदर्थेनापि व्यङ्ग्येनेत्यर्थः । हेतुसत्वं तु व्यक्तमिति साध्याभाव एवोपपादितः । ४ तथा चैकत्वदिर्घत्वयोरेकत्वपृथक्त्वयोर्न व्यभिचार इत्यर्थः ।।
कथं न व्यभिचार इत्यत उक्तस्थले साध्यसत्वं व्यनक्ति - अवयवीति ।। अवयव्येकत्वयोः ये व्यञ्जके तयोरित्यर्थः -- व्यभिचारेपीति ।। बहुत्वव्यञ्जकापेक्षाबुद्धेरवयविव्यञ्जकत्वाभावात् । तथा पृथक्त्वव्यञ्जकावधेरेकत्वाव्यञ्जकत्वादिति भावः -- व्यभिचारेणेति ।।

१.सर्वत्र प्रतिनीतेत्येवास्ति -ख. २.कर्तकत्वमपि - छ-क. ३.प्रतिनीतेन्द्रियजन्यग्राह्यत्वं इत्यधिकं -ख. ४.इयं पङ्क्तिर्नास्ति -इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४३४.
---------- ---------- ----------
-- बहुत्वपृथक्त्वव्यञ्जकयोरवयव्येकत्वव्यञ्जकाभ्यामव्यभिचारेण परस्परव्यभिचारिव्यञ्जकाव्यङ्ग्यत्वरूपसाध्यस्य सत्वादिति १ मणावुक्तमिति चेन्न। तथाप्यवयवबहुत्वग्रहव्यतिरेकेणावयविग्रहवदञ्जलेऽवयविग्रहव्यतिरेकेणावयि ग्रहव्यतिरेकेणावयवबहुत्वग्रहदर्शनेनानैकान्त्यात् ।

भिन्नप्रतियोगिव्यङ्ग्ययोर्भूतलगतयोः समवायिनाशजन्ययोर्विरलावयवतया समादेशालोक ---

अववयव्यादेरग्रहे तन्निष्ठबहुत्वाद्यग्रहात् अवयव्यादिव्यञ्जकालोकाद्यव्यभिचार आवश्यक इति भावः -- मणाविति ।
वर्णानित्यत्वावादे पूर्वपक्षे -- अञ्चल इति ।। वस्त्रान्त्यभाग इत्यर्थः । तथा च परस्परव्यभिचारव्यञ्जकव्यङ्ग्यत्वमेव न तु तदभावरूपसाध्यसत्वमिति व्यभिचार इत्यर्थः ।।
ननु बहुत्वस्य पटावयवैकदेशवृत्तित्वेन पटस्य तदधिकवृत्तित्वात् । बहुत्वस्याशुविनाशिताया पटस्याधिककालत्वाच्च । एकावच्छेदेन समानदेशत्वे सति समानेन्दियग्राह्यत्वरूपहेत्वभावान्नानैकान्त्यमित्यन्यत्र व्यभिचारमाह -- भिन्नेति ।। साध्याभावोपपादनाय भिन्नेत्यादि । समानदेशतोक्त्यर्थं भूतलगतयोरिति । समवायीत्यादि । ध्वंसयोरित्यन्वयः । प्रतियोगिनोः समादेशत्वे तद्ध्वंसयोरपि तथात्वादिति भावेनाह -- विरवलावयवे २ ति ।। पाषाणादिवन्निबिडद्रव्यत्वाभावेन समानदेशे ये आलोकडले तद्ध्वंसयोरित्यर्थः । निर्म ३ लजलान्तरस्थभूतलेप्यालोकोपलम्भादिति भावः ।

१.मणावुक्तमिति नास्ति -छ. २.वतयेति - इ. ३.विमल - मु.

वनां -प्रत-व्यंक-व्यंत्वम्) वर्णवादः पु - ४३५.
---------- ------- -------
-
जलप्रतियोगिकयोरालोकजलध्वंसयोर्ब्राह्मणत्वात्यन्ताभावतव्यञ्जकात्यन्ता

भावयो-श्च व्यभिचाराच्च । देशशब्देन समवायिविवक्षायामपि वर्णानां नित्यद्रव्यत्ववादिनं १ मां प्रत्यसिद्धेः ।
घटगतयोरेकत्वैकपृक्त्वयोर्भिन्नव्यक्तिव्यङ्ग्यगोत्वाश्रायत्वादौ च व्यभिचाराच्च । जातिः सर्वगतेति पक्षस्येव प्रामाणिकत्वात् ।

ब्राह्मणत्वात्यन्ताभावतद्व्यञ्जकात्यन्ताभावयोरिति ।।
भिन्नप्रतियोगिव्यङ्ग्ययोर्भूतलगतयोरित्येतदत्राप्यन्वेति । ब्राह्मणत्वं व्यञ्जकं ब्राह्मणमातापितृकत्वादिकम् -- देशशब्देनेति ।। समानदेशत्वे सतीति हेतुशरीरप्रविष्टदेशशब्देनेत्यर्थः । तथा च हेत्वभावान्न तत्र व्यभिचार इति भावः। नन्वेकावच्छेदेन समादेशत्वे सति समानेन्द्रियग्राह्यत्वाभावादिति हेत्वर्थोस्त्वित्यत आह -- घटगतयोरिति ।। एकपृथक्त्वस्यावधिव्यङ्ग्यत्वादेकत्वस्य तदभावाद्भि न्नव्यङ्ग्यत्वेन साध्यासत्वेप्युक्तहेतुसत्वादिति भावः । अवध्यनभिव्यङ्ग्यत्वेनापि हेतुर्विशेष्यत इत्यत आह -- भिन्नेत्यादि ।।
ननु कथं गोत्वाश्वत्वादौ हेतुसत्वम् । समादेशत्वाभावादित्यत आह -- जातिः सर्वगतेतीति ।। गोत्वस्य देशादिव्यवहितानेकगोपिण्डगतत्वपक्षे मध्यगताश्वादिपिण्डैरसम्बन्धायोगादश्वादावपि सम्बन्धेन तत्रापि वृत्तेरङ्गीकारस्य युक्तिसिद्धत्वात् । अश्वादौ गोत्वाद्यनुपलम्भस्य गोव्यक्तिरूपव्यञ्जकाभावेनोपपत्तेः ।
एवमश्वत्वादिजातिर्गवादिपिण्डसम्बन्धेति जातेः सर्वगतत्वात्समानदेशत्वमिति भावः ।।

१. मां इति नास्ति - छ.

वर्णाः परस्परव्यभिचारिप्रमापकप्रमाप्याः आश्रयेण सहैकेन्द्रिय १ ग्राह्यत्वात् गन्धरसवदित्यनेन सत्प्रतिपक्षता च ।

उक्तं हि तत्वनिर्णयटीकायं 'गोत्वाश्वत्वादीनां प्रतिनियतव्यक्ति २ व्याप्यत्वस्य परैरपि स्वीकृतत्वात्, गोत्वादीनां
व्यक्तिसर्वगतत्वेन समानदेशत्वं नास्तीति चेन्न । प्रत्यासत्तेरवर्जनीयत्वात् । समवायाभावस्य वर्णष्वपि सत्वा'दित्यादि ।।
नन्वितरनिरूपणानधीननिरूपणत्वे सतीत्यपि हेतुर्विशेष्यते ।
पूर्वोक्तव्यभिचारस्थलानि सर्वाण्यप्यन्यनिरूपणाधीननिरूपणान्येव, अतो हेत्वभावान्न व्यभिचार इति ३ पूर्वपक्षे मण्युक्तमेव प्रतिपक्षदोषं चाह -- वर्णा इति ।। परस्परव्यभिचारिणः प्रमापकाः ध्वनयस्तत्प्रमा ४ प्यत्वेन साध्यसिद्धिः। आश्रये ५ णेति ।। शब्दस्येकेन्द्रियग्राह्यत्वेपि तार्किकमते वर्णाश्रये ६ ण गगनेन सहैकेन्द्रियग्राह्यत्वाद्गगनस्यातीन्द्रियत्वात् आश्रयग्राहकेन्द्रियाग्राह्यत्वादिति फलितार्थत्वान्नासिद्धिः ।।
न चैवमसिद्धिवारकत्वात्सहेत्यन्तं व्यर्थम्, तद्विनाकृतस्यैव व्याप्यत्वादिति वाच्यम् । असिद्धिवारकस्यापि
व्यभिचारवारकस्येव सार्थक्यादित्युक्तत्वात् । अखण्डाभावेऽवैयर्थ्या ७ च्च । शरीरा ९ जन्यत्ववत् ।।
न च व्यणुकादौ व्यभिचार इति वाच्यम् । प्रत्यक्षत्वे सतीति हेतुविशेषणादित्येके । आश्रयाग्राहकेन्द्रियग्रह्यत्वादित्यर्थ इत्यन्ये । गन्धेति । गन्धसरयोर्घ्राणरसनग्राह्यत्वात्तदाश्रयस्य चक्षुरादिग्राह्यत्वाद्भिन्न --

१.याग्रा -छ-क-ग-ख. २.व्यङ्ग्यत्वस्य -इ. ३.त्यतः पू -मु-इ. ४.णत्वे-अ. व्याप्यत्वे-इ. ५.ययोरि -अ. ६.यणेन-अ. ७.र्थ्य च -इ-अ. ८.रज-अ-इ.

द्रव्यग्रहणयोग्यतान्तर्गतयोग्यताकत्वं मूर्तवृत्तित्वं चोपाधिश्च ।।
किं चैवं सति वर्णाः परस्परं व्यभिचार्युत्पादकोत्पाद्या न, अपाजकत्वे सति भूतविशेषगुणत्वात्, जलगतरूपरसवदित्याद्यनुमानोत्पादकानियमोपि किं न साध्यते । जन्यजलगतरूपरसादीनां कारणगुणपूर्वकत्वे १ न तदुत्पादकानां परस्परव्यभिचाराभावात् ।

-- प्रमाकप्रमा २ प्यत्वाच्च हेतुसाध्ययोरनुगमो व्यक्तः । सत्प्रतिपक्षता चेत्युपलक्षणम् । न्यायमते वर्णानां क्रमिकोत्पादित्वेनाव्याप्यवृत्तित्वेन च तुल्यदेशकालत्वाभावात् । ३ एकावच्छेदेनेत्यादिहेतोरसिद्धिः । किंच तत्तद्वर्णमात्रविषयकसाक्षात्कारसम्भवाद्बाधश्चेत्यपि ध्येयम् ।।
एकावच्छेदेनेति हेतावुपाधी ४ चाह -- द्रव्येति ।। यत्र
घटगतैकत्वपरिमाणयोरेकव्यञ्जकव्यङ्ग्यत्वं तत्र द्रव्यग्रहणेत्याद्युपाधी स्त इति साध्यव्यापकम् । साधनवति पक्षे वर्णे द्रव्यग्रहणेत्याद्युक्तोपाधी नस्त इति साधनाव्यापकत्वं च व्यक्तमिति भावः ।।
प्रागुक्तहेतोरनैकान्त्योक्तेर्हेत्वन्तरमाह -- अपाकजत्वे सतीति ।।
गुणत्वादित्युक्तौ भिन्नो ५ त्पादकोत्पाद्ये घटादिगतसङ्ख्यापरिमाणादिसामान्यगुणे व्यभिचाराद्वि - शेषेति ।।
आत्मगुणेषु भिन्नो ६ त्पादकोत्पाद्येषु ज्ञानादिष्वव्यभिचाराय भूतेति ।।
पृथिवीगतरूपादिष्वव्यभिचाराय सत्यन्तम् ।।
दृष्टान्ते तु साध्यानुगतिं दर्शयति ।। जन्येति ।। समवायि ७ कारणसमवायिकारणमात्रप्रत्यासन्नगुणासमवायिकारणकत्वं
कारणगुणपूर्वकत्वं नाम ।

१.त्वे तदु- च-क. २.व्याप्यत्वा-अ. ३.इतः 'ध्येयं' इत्यन्तं नास्ति-इ. ४.धी-रा-अ. ५.उत्पादकपदं न -इ. ६.उत्पादकपदं न -इ. ७.अत्र सर्वत्र दीर्घ एवास्ति - इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४३८.

यदि फलबलाच्छब्दे १ उत्पादकनैयत्यं तर्हि तत एव व्यञ्जकनैयत्यमप्यस्ति ।।

किंचोत्पत्तिपक्षे कदम्बगोलकन्यायेन लाघवप्रत्यभिज्ञाभ्यामुगृहितेन वीचीतरङ्गन्यायेन २ वा प्रतिपुरुषं प्रत्युच्चारणं

क्षणमात्रस्थितिकवर्णधारायास्तत्प्रागभावानां तद्ध्वंसानामन्यत्रादृष्टस्य पूर्वपूर्ववर्णे उत्तरोत्तरवर्णोत्पादकत्वस्य, उत्तरोत्तरवर्णे च पूर्वपूर्ववर्णनाशकत्वस्य, अन्त्योपासन्त्यवर्णयोश्च सुन्दोपसुन्दन्यायेनान्योन्यं, अन्त्योपान्त्यवर्णयोश्च सुन्दोपसुन्दन्यायेनान्योन्यं बध्यघटकभावस्य, अन्त्यशब्दे तु स्वोत्पत्तिचरमकारणस्योपान्त्यशब्दस्यैव स्वनाशचरमकारणत्वेन

स्वोत्पत्यव्यवहितोत्तरक्षणवृत्तिध्वंसप्रतियोगित्वरूपबौद्धाङ्गीकृक्षणकत्वस्य ३ च कल्प ४ नमित्यतिगौरवम् ।।

तथा च जलसमवायिकारणगतरूपरसादीनां परस्परव्यभिचारे कार्ये ५ कुले

रूपादयो न स्युरिति परस्परव्यभिचार्युत्पाद्यत्वा ६ भावोस्तीति भावः ।। फलेति ।। एकवर्णोत्पादकेन ७

तन्मात्रोत्पादकत्वरूपफलबलादित्यर्थः । तत एवेति ।। एकवर्णोपलम्भरूपफलबलादेवेत्यर्थः ।।

विपक्षे कल्पनागौरवाच्च वर्णानां नित्यत्वमुपेत्य प्रतिनियतव्यञ्जकव्यङ्ग्यत्वमुपेयमिति भावेन कल्पनागौरवादिति पूर्वोक्तं व्यनक्ति ।। किंचेत्यादिनातिगौरवमित्यन्तेन ।।

१.तदु-ग. २.'वा' इति नास्ति-मु. ३.त्वं च -ख. ४.ल्प्यं-ख. ५.र्यजलरूपादयो -इ. ६.त्वान्नास्तीति भावः -इ. ७.के त -अ.

वनां-प्रत-व्यंक-व्यंत्वम्) वर्णवादः पु - ४३९.

न चेदं गौरवं फवमुखम् । फलस्याद्याप्यसिद्धेः । वर्णस्थले ध्वनिस्तु त्ययापि स्वीकार्य एव । दूरस्थस्य ध्वनिमात्रं मया श्रुतं न तु वर्ण इत्यनुभवात् । शब्दत्वं सजातीयव्यञ्जकव्यङ्ग्यवृत्तिबहिरिन्द्रियव्यवस्थापकवृत्तिजातित्वात् रूपत्ववदित्यनुमानाच्च ।

लाघवेति ।। दशसु दिक्षु दशविधशब्दोत्पत्यङ्गीकारादप्येकैकस्यैव गकारादेः दशदिक्संबन्धिनः कल्पनस्यैव लघुत्वाल्लाघवयुक्त्या प्राच्यप्रतीच्ययोरेकत्वप्रत्यभिज्ञया चानुगृहीतेनेत्यर्थः । षष्ठ्यन्तानां कल्पनमित्यनेनान्वयः । फलमुखमिति ।। वर्णोत्पत्तिलक्षणफलमेव मुखमुपस्थितिजनकं यस्य तत्फलमुखं तेनेत्यर्थः । असिद्धेरिति ।। येन गौरवं न दोषायेति स्यादिति भावः ।।
ननु वर्णनित्यत्वपक्षे व्यञ्जकध्वनि वर्णाभिन्नः कल्पनीयः,तस्योत्पत्तिस्थानात्कर्णदेशपर्यन्तं शब्दान्तरोत्पादकत्व १ माशुतरविनाशित्वमित्यादिकल्पनीयमित्यत आह ।। वर्णस्थल इति ।। 'दूराद्वर्णा २ ग्रहणेपि ।। ध्वनिग्रहणादि'ति टीकोक्तमाह ।। दूरस्थस्येति । टीकोक्तेरुपलक्षणत्वं मत्वा ध्वनिसत्वेनुमानं चाह ।। शब्दत्वमिति ।।

३ यद्वा वायुविशेषासंयोग एव वर्णव्यञ्जक इति पक्षं निरसितुमाह ।। शब्दत्वं
इति ।। सजातीयं यत्र ४ व्यञ्जकध्वनिलक्षणमेव तव्द्यङ्ग्यवृत्तीत्यर्थः । जातित्वमात्रस्य घटत्वादौ व्यभिचारादिन्द्रियेत्यादि । तावन्मात्रस्य ज्ञानेच्छात्ववादावपि सत्वाद्बहिरित्युक्तम् । प्रमेयत्वादावव्यभिचाराय जातित्वादिति ।। न च ध्वनित्ये व्यभिचारः । तारत्वादिना सांकर्येण तस्याजातित्वादित्याहुः । वर्णानामेवेन्द्रियव्यवस्थापकत्वं न ध्वनेरित्यन्ये ।।

१.दशकत्वमित्यधिकम्-इ. २.र्णग्रह- मु-अ. ३.यद्वेत्यादि नास्ति - इ. ४.यव्द्यञ्जक -मु.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४४०.

दृष्टं हि घटरूपकुंकुमगन्धादेरालोकरूपघृतगन्धादिव्यङ्ग्यत्वम् ।।
न च पूर्वपूर्ववर्णस्योत्तरोत्तरवर्णव्यञ्जकत्वेन वा वर्णस्यैव ध्वनिव्यञ्जकत्वेन वार्थान्तरमिति वाच्यम् । आदावेव श्रोत्रोत्पन्नं वर्णं प्रति १ पूर्ववर्णाभावात् । २ भेर्यादिध्वनिस्थले वर्णाननुभवाच्च ।।
तस्माव्द्यञ्जकानां प्रतिनियत्वान्न सर्वदोषलब्धिप्रसङ्गः तदुक्तं भगवत्पादैः 'अत आकाशगुणे शब्दे व्यज्यमानां वर्णो ३ दय'
इति ।।
४ वर्णानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वम् ।। २७ ।।

रूपादैरालोकादिव्यङ्ग्यत्वात्साध्यवैकल्यमाशङ्क्य रूपत्वादौ साध्यानुगतिं ५ व्यनक्ति दृष्टं हीति ।। शङ्कितद्वयमपि निराह ।। आदावेवेति ।। भेर्यादीति च ।। तदुक्तमिति ।। प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं

वर्णानामित्येतत्तत्वानिर्णया उक्तमित्यर्थः ।। अत इति ।। प्रत्यभिज्ञाबलादित्यर्थः । आदिपदेन वर्णधर्मग्रहः।।
वर्णानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वम् ।। २७ ।।

१.पूर्वपूर्वेत्यस्ति-च. २.इतः 'तदुक्तं' इति पर्यन्तं नास्ति-रा. ३.र्णा इति - छ-क-रा. ४.अत्र भङ्गविभागो न दृश्यते -छ-रा. वर्णानामिति नास्ति- ख. ५.मं व्य - इ.

वर्णानां नित्यत्वेपि क्रमोपपादनम् वर्णवादः पु - ४४१.

न च नित्यत्वे कालादिकृतक्रमाभावादुच्चारणक्रमस्य च मौनिश्लोकादावभावादभिव्यक्तिक्रमस्य च १ लिप्यादिदर्शनजनितसमूहालम्बनस्तमृतिविषयवर्णेध्वभावात् क्रमहीनवर्णमात्रस्य च राजाजारेत्यादौ भिन्नार्थबोधकत्वायोगात् घसमानकालीनप्रागभावप्रतियोगित्वं टस्य टसमानकालीध्वंसप्रतियोगित्वं २ च घस्य क्रमो वाच्य इति वर्णनित्यत्वे क्रमानुभवो बाधक इति वाच्यम् । यत्र मौनिश्लोकादौ वर्णोत्पत्तिरेव न यत्र च घटेति वक्तव्ये विपरीत एवोत्पत्तिक्रमः तत्र त्वदुक्तस्यापि क्रमस्याभावात् ।

तार्किककदेशमतं वर्णोत्पत्तिसाधनमाशङ्क्य निराह । न चेत्यादिना ।। यद्यपीदं मणावेव 'यत्तु श्रोत्रानुविधानात्पदं श्रुणोमीत्यबाधितानुव्यवसाया'दित्यादिनाशङ्क्य निरस्तम् । तथापि दोषान्तरविवक्षया शिष्यव्युत्पादनाय च पुनरत्रोपन्यास इत्यदोषः । नित्यत्वे विभुत्वे च वर्णानामिति योज्यम् । प्रतिपदादितिथ्यादिनामिव कालकृतपौर्वापर्यस्य, मालाभूतबला ३ कानामिव देशकृतपौर्वापर्यस्य

चाभावादित्यर्थः । समूहानम्बनेति ।। तत्रापि घटाद्यर्थदीदर्शनेन घटाद्यानुपूर्व्या वाच्यत्वादिति भावः ।।
मास्तु क्रमः वर्णानामेवास्तु पदत्वमित्यत आह ।। क्रमहीनेति ।। अभिव्यक्तिक्रम एव वर्णानां पदे क्रम इति भावेन तत्रोक्तदोषं प्रतिबन्द्या परिजिहीर्षुः परोक्तक्रमदषं तावदाह ।। यत्रेति ।। उत्पत्तिरेव नेति ।। वर्णानामुच्चारणजन्यत्वात्तत्र च तदभावादिति भावः ।

१.लिप्यादिक्रमस्येत्यप्यस्ति - ख. २.च इति नास्ति-छ-रा. 'वा' इत्यस्ति -ग-ख. ३.हका -मु.

---------- ---------- ---------
दृश्यते च टघेत्युक्तेः प्रामादिकत्वं जानतो व्युत्पन्नस्यार्थधीः ।।
यदि कालान्तरीयोत्पत्तिक्रमानुसन्धानात्तत्रार्थधीस्तर्हि समूहालम्बन १ स्मृतिस्थलेऽपि कालान्तरीयाभिव्यक्तिक्रमानुसन्धानादर्थधीरिति समम् ।।
न चैवं पदादिभावस्याभिव्यक्तिघटितत्वे इदमेकं पदमित्यादिप्रतीतिः श्रावणी न स्यात् । पदाद्युपाधेरभिव्यक्तेरश्रावणत्वादिति वाच्यम् । मनसोपनीतस्याभिव्यक्तिक्रमस्य श्रावणत्वोपपत्तेः ।।

तथाच तत्र प्रागभावादिप्रतियोगित्वमप्रामाणिकमिति २ क्रमः । विपरीतक्रमस्थले तु व्यक्तम् ।।
ननु विपरीतक्रमस्थले घटानुपूर्व्येव नास्ति कथमव्याप्तिरित्यस्तत्र घटार्थबोधरूपकार्यबलेन घटानुपूर्वस्तीति वाच्यमिति
भावेनाह ।। दृश्यते चेति ।। इति सममिति ।। तथा च घटाकाराभिव्यक्तिसमानकालीनप्रागभावप्रतियोग्यभिव्यक्तित्वं टस्य

टाकाराभिव्यक्तसमानकालीनध्वंसप्रतियोग्यभिव्यक्ति ३ कत्वं घकारस्येत्यादिरूपेण घटाद्यानुपूर्वी सम्भवत्येव ।।
न च समूहालम्बनस्थले घटाद्यर्थधीदर्शनेन तत्र घटाद्यानुपूर्व्यामव्याप्तिरिति वाच्यम् । तत्रापि स्मृतकालान्तर्यो ४ क्तरूपानुपूर्व्या एवार्थधीजनकत्वेनादोषत्वादिति भावः ।।
अभिव्यक्तेरित्युपलक्षणम् । कालस्येत्यपि ५ ज्ञेयम् । मनसेति ।।

१.स्मृतिपदं न -क. २.न इत्यधिकं-इ. ३.मिवक्रमः - अ. ३.पूर्व इत्यधिकं-इ. ४.रोक्ति-इ. ५.ध्ये-इ.

वनां-नित्वेपि-क्रपा-दनं) वर्णवादः पु - ४४३.

तस्माद्वर्णानां नित्यत्वेन तदनित्यत्वरूपस्य बाधकस्याभावान्नित्य एव वेदः ।।
अभ्युपेत्य चेदमु १ दितं वर्णाननित्यत्वं वेदनित्यत्वबाधकमिति । वस्तुतस्तु वर्णानामनित्यत्वेपि नियतानुपूर्वीकत्वरूपस्य नित्यत्वस्य न हानिः । २ वर्णानित्यत्वोक्तिस्तु वस्तुस्थिति प्रदर्शनार्था । उक्तं हि सुधायां, 'वस्तुतत्वविचारकं प्रति ३ वर्णानां कूटस्थनित्यत्वमुपपादित'मिति ।।
वर्णानां नित्यत्वम् ४ ।। २८ ।।

पररीत्या ध्येयम् । अभिर्व्यक्तेर्ज्ञानत्वेन तस्य परमते मानसत्वात् । कालस्यचानुमानिकत्वात् । सिद्धान्ते तु साक्षिणेति ध्येयम् । ज्ञानसामान्यसामग्रीमादायानुपनीतोपि कालो भासत इति कैश्चिदङ्गीकाराक्तालो नोक्त इत्याहुः ।।
'ननु तथापि वर्णसमुदायरूपस्य वेदस्य न नित्यत्वमित्या'दिनोक्तचोद्यनिरासमुपसंहरति ।। तस्मादिति ।। उक्तं हीति

।। 'प्रत्यक्षः कस्यचिद्धर्म' इत्येतत्पद्यव्याख्यावसाने वर्णनित्यत्वस्य वेदनित्यत्वानुपयोग मुक्त्वा तर्हि तत्वनिर्णयवर्णनित्यत्वं किमर्थ ५ मित्यतः तत्कथनस्य कृत्यमुक्तं सुधायामित्यर्थः ।।
वर्णानां नित्यत्वेपि क्रमोपपादनम् ।। २८ ।।
वर्णनित्यत्वादः ६

१.मुक्तं -ग. २.वर्णेत्यादिग्रन्थः नास्ति-क. ३.तु इत्यधिकं-ग. ४.त्वेपि क्रमोपपादनं -च-मु. ५.मुक्त मित्यधिकम् -मु. ६.समाप्त इत्यधिकं - मु.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४४४.
---------- ---------- ----------
यच्चोच्ये । आकाशात्मकश्रोत्रेणा वर्णाः समवायेन सम्बन्धेन गृह्यन्त इति तन्न । वर्णानां नित्यविभुद्रव्यत्वात्समवाये मानाभावाच्च ।।
१ ननु यद्यपि समवाये प्रत्यक्षं न प्रमाणम् ।

न 'न्वाकाशगुणे शब्दे व्यज्यमाना वर्णादय' इति ध्वनेरे वाकाशगणुत्वोक्तिरयुक्ता । वर्णानामप्याकाशगुणत्वात् । अन्यथा श्रोत्रेण सह सम्बन्धायोगेन वर्णग्रहणानुपपत्तेः । आकाशगुणत्वेत्वाकाशात्मकश्रोत्रेण तद्गु २ णस्य वर्णस्य समवायेन ग्रहणोपपत्तेरित्यतः संयोगसमबन्धेनैव तद्ग्रह इति भावेन 'समवायाभ्युपगमाच्चेति 'सूत्रदूषितं समवायं निरसितुमाह ।। यच्चेति ।। नित्यविभुद्रव्यत्वादिति ।। अन्य ३ थानुविधानाभावादिना घटादेरिव द्रव्यत्वस्य पूर्वोक्तदिशा नित्यत्वस्य. काश्यां श्रुत एव गकारोत्रापि श्रूयत इति प्रत्यभिज्ञानात्तावती वागिति श्रुतेर्विभुत्वस्य, च सिद्धेर्गुणत्वे मानाभावाच्चेत्यर्थः।।

न च शब्दो गुणः सामान्यवत्वे सत्यस्मदादिबाह्ये ४ न्दियग्राह्यत्वाद्रूपवदित्यनुमानं गुणत्वे मानमिति वाच्यम् । ध्वनिशब्देन सिद्धसाधनत्वात् । वर्णात्मक इत्युक्तावपि हेतोरप्रयोजकत्वात् । घटादीनामेकेन्द्रिया ५ ग्राह्यत्वेप्यात्मनस्तथात्ववद्द्रव्यस्यैव सतो बाह्येकेन्द्रियग्राह्यत्वेपि विरोधाभावात् । निरवयवद्रव्यत्वे बाह्येन्द्रियग्राह्यत्व ६ विरोध इति चेत् । निरवयद्रव्यत्वस्यात्मन इन्द्रियग्राह्यत्ववत् बाह्येन्द्रियग्राह्यत्वेप बाधकाभावेन व्यात्पिनिश्चयादिति सुधायामेव व्यक्तत्वादिति भावः । यद्यपीत्यस्य तथापीति वक्ष्यमाणेनान्वयो ध्येयः।।

१.'ननु' इति नास्ति - छ-मु-रा. २.द्ग्रहण- इ. ३.न्यानुवि -मु. ४.ह्येकेन्द्रि - मु-इ. ५.यग्रा -अ. ६.त्वं वि - इ.

समावाये प्रमाणभङ्गः) समवायवादः पु - ४४५.

इमौ संयुक्तावित्यादिवदीमौ समवेताविति वाऽनयोः समवाय इति वा अननुभावात् । समवायं जानामीत्यननुव्यवसायाच्च । रूपी घट इत्यादेश्चाभाववद्भूतलमित्यादिवदुपपत्तेः ।।
एतेनायं तन्तुपसम्बन्धप्रत्ययश्याक्षुषः चक्षुरन्वयव्यतिरेकानुविधायित्वात् घटप्रत्ययवदिति समवाय २ प्रत्यक्षत्वसाधनमप्यपास्तम् । उपादनोपादेयाभेदवादे आश्रयासिद्धेः।

समवायवादे पूर्वपक्षे मण्युक्तदिशा निराह ।। इमाविति ।। अननुभवोऽसिद्ध इत्यत आह ।। समवायं जानामीति ।।
यद्वा समवायो हि विशेषणत्वेन वा विशेष्यत्वेन वा अयं घटइतिवदसमवाय इति ३ समवायत्वरूपस्वरूपेण वा संसर्गविधया वा भासेत । तत्राद्यं ४ आह ।। इमाविति ।। द्वितीय ५ आह ।।

अनयोरिति ।। तृतीय ६ आह ।। समववायमिति ।। तथा च समवायत्वेन समवाय ७ प्रत्यक्षमसिद्धमिति भावः ।
चतुर्थ ८ आह।। रूपीति ।। संसर्गविधयैव प्रतीयमानसम्बन्धस्याभावभूतलसम्बन्धवत्
समवायभिन्नसम्बन्धत्वेनाप्युपपत्या समवायत्वासिद्धेरित्यर्थः । ज्ञान १० मिष्टमित्यादिप्रत्यय आदिपदार्थः । सम्बन्धप्रत्यय इति ।। तन्तुषु पट इति संसर्गविधया तन्तुपटसम्बन्धविषयकः प्रत्यय इत्यर्थः । विशेषणत्वादिना तत्प्रत्ययस्यासिद्धेरुक्तत्वाद्वक्ष्यमाणार्थान्तरानवकाशाच्च । स्व ११ रीत्याह । उपादानेति।। पररीत्याह -- तद्भेदेति ।।

१.संयोग इतिवदनयोः -ग. २.यस्य -ग-ख. ३.'अयं' इत्यादि नास्ति -इ. ४.द्यमा-अ. ५.यमा-अ. ६.यमा-अ. ७.यः प्रत्यक्षसिद्ध इति भावः इत्यस्ति-इ. ८.र्थमा-अ. ९.षयतयैव-इ. १०.तमि-मु. ननिष्ठ-इ. ११.मतरि -मु- इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४४६.

तद्भेदवादेपि घटाभावभूतलयोरिवेहापि स्वरूपसम्बन्धस्य चाक्षुषत्वेनार्थान्तरात् ।। एतेन रूपी घट इति धीर्विशेषणविशेष्यसंबन्धविषया विशिष्टधीत्वात् दंडीति धीवत् ; इह तन्तुषु पट इत्यादिरिहप्रत्ययः आधाराधेयसम्बन्धनिमित्तकः अबाधितेहप्रत्ययत्वात् । इह १ कुण्डे बदरमिति धीवत् ; जात्यादिगोचरो विशिष्टव्यवहारः सम्बन्धनियतः भावमात्रविषयाबाधितविशिष्टव्यवहारत्वात् सघटं भूतलमितिव्यवहारवत् ;

समवायसाधकप्राचीनानुमानान्याशङ्क्य मण्युक्तदोषोक्त्या निराह ।। एतेनेत्यादिना ।। भूतलेऽभावप्रत्यवदन्यथोपपत्तिकथनेनेत्यर्थः । अपास्तमित्यन्वयः । भ्रमे व्यभिचारनिरासायाबाधितेति हेतुविशेषणोक्तिः । जात्यादीति ।। ब्राह्मणोयं, शुक्लः पटः ; चलति गौः, विशिष्टः परमाणुरित्यादिजातिगुणक्रियाविशेषष्टव्यवहार इत्यर्थः । सम्बन्धनियत इति ।। स्वविषयसम्बन्धव्याप्त इत्यर्थः । तेन श्रोत्रादिसंबन्धनैयत्येन नार्थान्तरम् । जातिरित्याद्यविशिष्टव्यवहारे अव्यभिचाराय विशिष्टेति हेतुविशेषणम् । इदं रूप्यमित्यादिबाधितसम्बन्दकविशिष्टव्यवहारेऽव्यभिचारायाबाधितेति । अभाववद्भूतलमित्यादिभावाभावगोचरतादृशव्यवहारेऽव्यभिचाराय भावमात्रेति ।। सघटमिति ।। संयोगस्तत्र सम्बन्ध इति भावः ।।

१.तु इत्यधिकम् - ग.

सये-प्रम-भङ्गः) समवायवादः पु - ४४७.

एते तन्तवः एतत्पटचसंबद्धाः एतदाश्रयत्वात् भूतलवत् ; भूतलरूपादयो भूतलसम्बद्धाः भूतलविशेषणत्वात् घटवदित्याद्यनुमानम १ पास्तम् । २ अयं संयोगः एतदन्यसंयोत्वरहितसम्बन्धान्यः मेयत्वादि ३ त्यादि तु स्वव्याहतम् ।

भूतलवदिति ।। संयोगसम्बन्धेन पटाश्रयभूतलवदित्यर्थः पक्षे ४ संयोगस्य बाधात्समवाय एव सिध्यतीति भावः । रूपवद्भूतलमिति प्रतीतिमनुरुध्याह ।। भूतलविशेषणत्वादिति ।।

यद्वा भूतलिविशेषणत्वादित्यस्य भूतलाश्रितत्वादित्यर्थः अत एव घटवदित्युक्तिः । अन्यथा घटवद्भूतलमिति प्रतीयमानघटवदिति व्याख्येयम् ।।
स्वरूपसम्बन्धेनार्थान्तरादिति ।। न च स्वरूपाणामनेकत्वेन गौरवापत्तेः ईश्वरानुमाने कर्तेकत्ववल्लाघवादेकः समवाय एव सिध्यतीति वाच्यम् । तथात्वे अभाववद्भूतलं ज्ञातो घटः इष्टो घट इत्यादावपि तादृशसंबन्धाङ्गीकारापत्तेः । तत्र तादृशसम्बन्धस्य बाधात्स्वरूपाणामनेकत्वेपि क्लृप्तत्वेन गौरवस्यादोषत्वात् । स्वरूपसम्बन्धेनैव विशिष्टप्रत्ययाद्युपपत्तेर्नैकसम्बन्धकल्पनेति चेत् । समं प्रकृतेपि । विवरिष्यते चैतदग्रे नापि गुणक्रियेत्यादिमण्युक्तानुमानान्त ५ रखण्डनप्रस्ताव इति भावः । पक्षभूतसंयोगपरामर्शः । एतदन्यो यः संयोगः ६ एतदन्यसंयोगः स्तम्भ---

१.अपि इत्यधिकम्-क. २.भगवतेति नास्ति -च-ग-ख. ३.घटवत् इत्यधिकम् -ख. ४.च इति नास्ति -इ. ५.अन्तरपदं नास्ति-इ. ६.एतदन्यसंयोग इति नास्ति-मु-इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४४८.
---------- ---------- ---------
रूपादिरिन्द्रियसंबद्धः प्रत्यक्षत्वात् घटवदित्यत्र तु अभावादाविव संयुक्तविशेषणतादिरूपसम्बन्धेनार्थान्तरम् ।।

--कुम्भा १ दिसंयोगस्तस्य भावः एतदन्यसंयोगत्वम् । तद्रहितो यः सम्बन्धः पक्षीकृतसंयोगस्तदन्यः कश्चित्सम्बन्धश्च भवति । तथा च पक्षे पक्षीकृतसंयोगान्यत्वस्य बाधात् अपूर्वसम्बन्धान्तरादन्यत्वमादाय २ साध्यपर्यवसानमिति समवायसिद्धिः । दृष्टान्ते च घटादौ

पक्षभूतसंयोगरूपसंम्बन्धान्यत्वेन साध्यानुगमो बोध्य इत्यादि तु विशिष्टव्यतिरेक्य ३ नुमानमित्यर्थः ।। स्वव्याहतमिति ।। अद्या ४ पि समवायरूपसम्बन्धान्तरस्यासिद्ध्या तदादाय साध्यपर्यवसाने बाधात्स्वान्यत्वेनैव साध्यपर्यवसानं वाच्यम् । तव्द्याहतमित्यर्थः ।।
यद्वा एवमेव संयोगसमवायविशेषावपि पक्षीकृत्य एतदन्यसंयोगसमवायित्वरहित ५ सम्बन्धान्यः मेयत्वाद्घटवत्, अयं घटः एतदन्यघटत्वरहितघटान्यः मेयत्वात्पटवदित्यादिप्रयोगस्यापि संभवेन संयोगसमवायान्यसम्बन्धः अपूर्वघटादिश्च सिध्येदिति स्वव्याहतमित्यर्थः ।।
अन्ये त्वित्यादिना मण्युक्तमेवाशङ्क्य निराह ।। रूपादिरिति ।। क्रियाजात्यादिरादिशब्दार्थः । प्रत्यक्षत्वात्प्रत्यक्षविषयत्वादित्यर्थ) । अत्र संयोगबाधे इन्द्रियसम्बन्धघटकतया समवायसिद्धे ६ रिति भावः । अभावादाविति ।। यथा अभाववद्भूतलमिति गृह्यमाणे घटाभावादिः चक्षुः संयुक्तभूतलविशेषणतया त्वन्मते गृह्यते यथा च घटादौ रूपादिसमवायः चक्षुःसंयुक्तघटादिविशेषण ७ तया गृह्यते ८ अभावसमवायाभ्यां चक्षुः ९ समवायादेरभावात् । एवमेव रूपादिरप्यस्तु । तथा च समवायासिद्ध्यार्थान्तरमित्यर्थः ।।

१.भयोः सं-मु-इ. २.संसाध्य-अ. ३.कानु-इ. ४.आद्येपि-इ. ४.तः स -इ. ६.द्धिरि-अ. ७.षतया-इ. ८.त्वन्मत इत्यधिकं-मु-इ. ९.षः संयोगा -अ.

सये-प्रण-भङ्गः) समवायवादः पु - ४४९.

---------- ---------- ----------

तथापि मण्युक्तं गुण्यादिना सह गुणक्रियाजातिविशिष्टयथार्थबुद्ध्यः सम्बन्धभिन्नसम्बन्धविषयाः निर्वि १
कल्पकभावमात्रविषयकविशिष्टबुद्धित्वात्

इतरनिरूपणाऽनिरूप्यविशिष्टबुद्धित्वाद्वा दण्डीतिबुद्धिवदित्यनुमान २ मिति । तन्न । काले घटरूपमित्यादिप्रतीतौ व्यभिचारात् ।

नव्यास्त्विवत्यादिनोक्तमाह-- तथापि मण्युक्तमिति ।। गुण्यादिनेति ।। क्रियावदा ३ दिरादिपदार्थः । भ्रमबुद्धिषु बाधवारणाय यथार्थेति ।। आरोपितसम्बन्धविषयत्वेनार्थान्तरवारणाय वा यथार्थेत्युक्तिः । गुणगुण्यादिसमूहालम्बने बाधनिरासाय -- विशिष्टेति ।। विशेषण ४ त्वावगाहीत्यर्थः । स्वरूपसम्बन्धेनार्थान्तरवारणाय साध्ये सम्बन्धिभिन्नेत्युक्तिः । आद्ये हेतौ निर्विकल्पकादावव्यभिचाराय विशिष्टेति विशेषणम् । अभाववद्भूतलमिति बुद्धावव्यभिचाराया भावमात्रविषयकेति ।। ज्ञातो घट इत्यादिबुद्धावव्यभिचाराय निर्विकल्पकेति भावविशेषणम् । इतरेति ।। इतरनिरूपणेनानिरूप्यः ५ विशेष्यविशेषणविषयकबुद्धित्वादित्यर्थः । अभाववद्भूतलं ज्ञातो घट इत्यादिबुद्धावव्यभिचाराय इतरनिरूपणानिरूप्येति । निरूपणं नाम ज्ञानमभिलपनं वा ।। इत्यादीति ।। इदानीमाकाशः वीणायां शब्द इत्यादिप्रतीतिरादिपदार्थः । व्यभिचारादिति ।। द्वयोरपि हेत्वोरिति भावः ।।

१.षयकबु-ग. २.नं मानमिति इत्यस्ति -च-क-ग-रा. ३.आदिपदं न -मु. ४.षत्वा-इ. ५.प्यविशे-इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४५०.

त्वन्मते घटगतस्य रूपस्य कालेन सह सम्बन्धिभिन्नसम्बन्धाभावात् ।। तदुक्तं भगवता सूत्रकृता । 'समवायाभ्युपगमाच्च साम्यादनवस्थितेः' । रिति ।

उक्तप्रतीतौ साध्याभावं व्यनक्ति-- त्वन्मत इति ।। स्वमते कालेन सह सर्वस्य
वस्तुमात्रस्य संयोगे बाधकाभावात् त्वन्मत इत्युक्तिः । संयोगस्य सम्बन्धिना भिन्नाभिन्नत्वेन भिन्नत्वस्यापि सत्वात् ।।
ननु बुद्धित्वादित्यस्य प्रत्यक्षत्वादित्यर्थ इति चेत् तथापि तादृशोपनातप्रत्यक्षबुद्धौ व्यभिचारात् ।।
न च लौकिकप्रत्यक्षबुद्धित्वादिति तदर्थ इति वाच्यम् । सुरभिचन्दनमित्याद्यलौकिकविशिष्टबुद्धौ भागसिद्धेः । तदन्यविशिष्टबुद्धिपक्षीकारे चार्थान्तरता । विशिष्टबुद्धिमात्रस्याव तादृशसम्बन्धविषयकत्वे विवादात् । एवं सति निर्विषयकेति विशेषणवैयर्थ्यापत्तेश्च । ज्ञातो घट इत्यादिबुद्धावुपनीतज्ञानादिविशिष्टबुद्धेरलौकिकत्वादेव व्यभिचाराप्रसक्तेः ।।
न च ज्ञानसत्ववेलायामात्मा ज्ञान इति वर्तमानविशिष्टा १ त्मबुद्धौ दोषवशात्समवायसम्बन्धाभा २ नेन विषयविषयिभावमात्रभानं तत्राव्यभिचाराय निर्विषयकेत्युक्तिरिति वाच्यम् । एवमपि रूपं समवेतमित्यादि समवायविशिष्टबुद्धौ त्वन्मते व्यभिचारापरिहारात् ।।
न च समवायासिद्धिदशायां तत्प्रतिसा ३ धनं नेति वाच्यम् । आपाततः प्रतीतेः सम्बन्धे व्यभिचारं पश्यतो व्याप्तिग्रहवैमुख्येन तद्ग्रहसंभवादिति वक्ष्यमाणदोषात् । वस्तुगत्या व्यभिचारजन्यानुमितेर्भ्रमत्वावश्यंभावाच्च । विषयाबाधस्याद्याप्यसिद्ध्या विषयाबाधात् प्रमात्वमित्यस्याप्ययोगाच्चेति भावः ।। तदुक्तमिति ।।

१.आत्मपदं न - मु - इ. २.वेन - अ. ३.संधा - मु. ।२-२-१३. ब्र.सू.

---------- ---------- --------

हेतोः पक्षसपक्षयोरिव काले घटरूपमितिप्रतीतिरूपविवक्षेपि सत्वसाम्यात्साध्येनैव सम्बन्ध इति व्यवस्थित्यभावा १ दित्यर्थः ।।
किंच समवायसिद्ध्यनन्तरमपि समवायेतरसम्बन्धिभिन्नसम्बन्धविषया इत्यपि सुसाधम्, एवं तत्सिद्ध्यनन्तरं तदुभयेतरसम्बन्धिभिन्नसम्बन्धविषया इत्यपि सुसाधम् २, एवं तत्सिद्ध्यनन्तरं तन्त्रितयेतरसम्बन्धिभिन्नसम्बन्धविषया इत्यपि सुसाधमिति सम्बन्धानन्यप्रसङ्गः ।।
एतदप्युक्त'मनवस्थितेरि'ति १ साध्ये सम्बन्धिभिन्नेतिवत्सम्बन्धिसमवायाभिन्नेत्यपि विशेष्टुं शक्यत्वसाम्यात्सम्बन्धानन्त्यप्रसङ्गादित्यर्थः ।।

समवायसाधकहेतोरनेकान्त्यमित्ये ३ तत् समयपादे वैशेषिकाधिकरणे उक्तमित्यर्थः।।
ननु कथमेषोर्थः सूत्राक्षराल्लब्ध इत्यतः पूर्वभागस्य समवायाभ्युपगमाच्च वैशिषिकमतमसमञ्जसमितिव्यक्तमित्युपेत्य सुधाद्यनुक्तमुत्तरांशस्यार्थान्तरं स्वयं व्यनक्ति-- हेतोरिति ।। सूत्रस्य विश्वतोमुखत्वान्नानेकार्थत्वं दोषः, प्रत्युत गुण एवेति भावः । बुद्धिपदं लौकिकप्रत्यक्षपरमतो न दोष इत्यतो दोषान्तरं तर्कपराहतिमनुमानस्याह -- किंचेति ।। समवायसिद्ध्यसिद्भिभ्यां तर्कपराहतेपहतिरिति त्वापातत इत्यादि ग्रन्थेन निरसिष्यत इति भावः । समवायेतरेति ।। सम्बन्धविशेषणम् ।

१.वप्रसङ्गादि - क-ग. २.'ततः' इति सम्बन्धानन्त्ये' त्येवास्ति. पुनः एवमित्यादि नास्ति -च-क-रा. आदितः एवमित्याद्यपि नास्ति-ग. ३.वसम-अ.

---------- ---------- ----------

अपि च त्वदभिमते पटस्तन्तुसमवेत इति विशिष्टज्ञाने व्यभिचारः । १ तन्तुपटयोरिव समवायिसमवाययोरपि सम्बन्धान्तरङ्गीकारे त्वनवस्था । न च समवायस्य सिद्धौ व्यभिचारः किं करिष्यति असिद्धौ २ क्वानैकान्त्यमिति वाच्यम् । आपाततः प्रतीते सम्बन्धे व्यभिचारं पश्यतः व्याप्तिग्रहे वैमुख्येन तद्ग्रहासम्भवात् । अन्यथा तव ३ निर्विकल्पकसाध्यके ४ विशिष्टप्रत्ययत्वादिति हेतौ विशिष्टपदं व्यर्थं स्यात् ५ ।

समवायानन्त्येति ।। द्वित्वसमवायासिद्ध्यनन्तरमपि तद्भिन्नेत्यपि सुवचत्वादिति भावः ।।
सुधोक्तं व्यभिचारमेवाह -- अपि चेति ।। तन्तुसमवायविशेषण कपटविशेष्यकज्ञान इत्यर्थः । सुधोक्तं एव शङ्कोत्तर आह -- न चेत्यादिना ।।
समवायस्यान्यनिरूपणनिरूप्यत्वाद्धेतावन्यनिरूपणानिरूप्येत्युक्तत्वात् न व्यभिचार इति चेत् । ६ आद्यहेत्वभिप्रायेणैव ७ तद्ग्रन्तप्रवृत्तेः । अत एव सुधोक्तव्यभिचारस्य पश्चादुक्तिः । व्यर्थमिति ।। जात्यादिविशिष्टप्रत्ययो विशेषणज्ञानजन्यः विशिष्टप्रत्ययत्वादित्यत्र विशिष्टपदस्य निर्विकल्पके व्यभिचारवारणार्थत्वात् । तत्रापि विर्विकल्पकस्य सिद्धौ व्यभिचारः किं करिष्यति, असिद्धौ तु क्वानैकान्यमिति सुवचत्वादिति भावः । प्रथमपक्षवदिति । काले घटरूपमिति प्रतीतिरूपेतिपदस्थाने पटस्तन्तुसमवेत इति विशिष्टज्ञानरूपेति बोध्यम् ।

१.अनन्तरं नचेत्याद्येवास्ति-ग. २.'तु' इत्यधिकम्-क-ग. ३.वापि-च-क-ग. ४.धके-च-क-ग-रा. ५.एतदप्युक्तमनवस्थितेरिति अर्थस्तु प्रथमपक्षत्वद्रष्टव्यः किंच-च-ग-रा. ६.न। इत्यधिकम्-मु. ७.तत्-इ.

सये-प्रण-भङ्गः) समवायवादः पु - ४५३.

---------- ---------- ----------

किंचाभाववद्भूतलमित्यभाविशिष्टबुद्धिवत् ज्ञातो घट इष्टो घट इति सविषयकज्ञानादिविशिष्टबुद्धिवच्च गुणादिविशिष्टबुद्धेरपि स्वरूपसम्बन्धेनैवोपपत्या अप्रयोजकत्वम् ।।
अन्यथा हि ज्ञानेच्छाद्वेषकृतीनां स्वविषयैः सह विशिष्टसत्यबुद्धयः, ---

सुधायां तु अनवस्थितेरिति सूत्र १ मस्मिन्पक्षे कथं इत्थम् । यदि व्यभिचारपरिहाराय समवायस्यापि समवायान्तरमुपेयते तदाऽनवस्थिति'रिति योजितम् ।।
हेतुद्वयस्याप्यप्रयोजकत्वं क्रमाद्दृष्टान्तोक्तिपूर्वकमाह -- किंचेति ।। गुणादिविशिष्टबुद्धेरपीत्यापिपद २ स्य भावमात्रविषयकत्वेपि इतरनिरूपणानिरूप्यविशिष्टबुद्धित्वेपीत्यर्थः । अनुकूलतर्कादेरभावादिति भावः।।
अनुकूलतर्कादेरभावेप्यभावादि ३
विशिष्टबुद्धिव्यावर्तकविशेषणायुक्तहेतुमात्रेणोक्तरूपसाध्यसाधनं चेत्तर्हि गुणादिविशिष्टबुद्धिव्यावर्तकविशेषणयुक्तहेतुमात्रेणाप्यभावादुक्तरूपसाध्यसिद्ध्यापातेन गुणादिविशिष्टबुद्धौ स्वरूपसम्बन्धोन्यत्राभावादिविशिष्टबुद्धावतिरिक्तसम्बन्ध इति स्यादित्याह -- अन्यथेति ।।
अभावादिविशिष्टबुद्धिव्यावर्तकविशेषणयुक्तहेतुमात्रेणोक्तरूपसाध्यसिद्धावित्यर्थः । वैपरीत्यं स्यादित्यन्वयः । वैपरीत्यं व्यनक्ति -- ज्ञानेति ।। ज्ञातो

घटः, दृष्टो घटः, द्विष्टः, कृत, इति ज्ञानादिविशेषणकघटविशेष्यकयथार्थबुद्धय इत्यर्थः । आरोपितसम्बन्धविषयकत्वेनार्थान्तरवारणाय सत्येत्युक्तिः ।।
अभावविशिष्टबुद्धी ४ नामविशिष्टबुद्धिसाधारण्येनापि पक्षनिर्देशमाह -- असंयुक्तेति ।।

१.अस्मिन्पक्षे इति नास्ति - इ. २.दभा-मु. दस्वभा-अ. ३.'भावः' इत्यारभ्य एतत्पर्यन्तं नास्ति -इ. ४.अभावविशिष्टबुद्धिनामविशिष्टबुद्धिसाधार इत्यस्ति-इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४५४.

असंयुक्तयुतसिद्धानां परस्परं विशिष्टसत्यबुद्धयो वा, सम्बन्धिभिन्नसम्बन्धविषयाः युतसिद्धविषयकविशिष्टबुद्धित्वात् दण्डीति बुद्धिवदित्यनु १ मानेन युतसिद्धानां २ ज्ञानादीनां स्वविषयैः सह दण्डस्य पुरुषेणेव सम्बन्धिभिन्नसम्बन्धः ; अयुतसिद्धानां गुणादीनां तु गुण्यादिभिः सहाभावस्य भूतलेनेव स्वरूपसम्बन्ध इति विपरीतं स्यात् ।।
एवमसंयुक्तविषयकसत्यविशिष्टबुद्धयः सम्बन्धिभिन्नसम्बन्धविषयाः विशिष्टबुद्धित्वात् दण्डीति बुद्धिवदित्य ३ नुमानेन गुणादीनां गुण्यादिभिर्ज्ञानादीनां ज्ञेयादिभिरभावस्य चाधिकरणेन सह दण्डस्य पुरुषेणेव सम्बन्धिभिन्नसम्बन्धः सिद्ध्येत् ।

परस्परविशिष्टेति ।। अभाववद्भूतलं डित्थोयं ज्ञातो घट इत्यादिविशिष्टयथार्थचबुद्धयो वेत्यर्थः । ज्ञानादीनामिति ।। ज्ञानेच्छाद्वेषकृत्यभावनाम्नामित्यर्थः । स्वविषयैरिति ।। ज्ञानाद्यपेक्षयोक्तम् । अभावादेस्तु स्वविशेष्येण सहेति ज्ञेयम् ।।

एवं वैपरीत्यमापाद्य सर्वत्रैकरूपलक्षणमतिप्रसङ्गान्तरमाह -- एवमिति ।। अन्यथेत्यनुकर्षः । यथा वैपरीत्यं तथा हतौ विशेषमात्रानुपादानेन सर्वत्रैकरूप्यमपि स्यादित्येवंशब्दार्थः । हेतोरप्रयोजकत्वं निरस्य फलितमाह -- एवं चेति ४ ।।

१.त्यनेन-च-क-ग-रा. २.गुणादीनां इत्यद्येवास्ति. 'ज्ञानादीनां' इत्यादि नास्ति-क. ३.नेन-च-क-ग-रा. ४.हेतोरित्यादि नास्ति-मु.इ.

सये-प्रण-भङ्गः) समवायवादः पु - ४५५.

---------- ---------- -------

एवं च सम्बन्धिभिन्नसम्बन्धविषयत्वे विशिष्टबुद्धित्वस्यैव तन्त्रतया लाघवे १ नैकरूप्यं च भवति ।।

एतदप्युक्त 'मनस्थिते'रिति । युतसिद्धत्वसाम्येति ज्ञानादीनां स्वविषये सह स्वरूपसम्बन्धः चैत्र २ दण्डयोस्तु संयोगः ; एवमयुतसिद्धत्वसाम्येति भूतलाभावयोः स्वरूपसम्बन्धः गुणगुण्यादेः समवाय ; इत्यादित्वदुक्तव्यवस्थितिभङ्गादित्यर्थः ।।

नापि गुणक्रियाजाति विशिष्टसत्यचबुद्धयः विशेषणसम्बन्धविषयाः विशिष्टबुद्धित्वात् दण्डीति बुद्धिवत् । ज्ञातो घट इत्यादिबुद्धिरपि स्वरूपसम्बन्धविषयेति न व्यभिचारः । न चात्रापि तेनैवार्थान्तरं स्वरूपाणामनन्ततया गौरवेण लाघवादेकस्यैव सम्बन्धस्य सिद्धेरिति वाच्यम् । समवायस्वरूस्य च तद्गतसम्बन्धत्वस्य कल्पनादपि धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायेन सिद्धानां गुणादिस्वरूपाणां भूतलघटाभावादौ क्लृप्तस्य सम्बन्धत्वरूपधर्ममात्रस्य कल्पने लाघवात् ।।

उच्यत इत्यादिना मणुकृता सिद्धान्तितमनुमानान्तरं च निराह -- नापीति ।। पूर्ववदेव सत्यपदकृत्यं बोध्यम् । तदुक्तरीत्यैव परिष्करोति -- ज्ञात इत्यादिना ।। एकस्येति ।। सकर्तृत्वानुमाने एकस्य कर्तृरिवेति भावः । ४ अन्यथोपपत्तावपि लाघवतर्कानुरसणे ५ प्रतिबन्दीरूपातिप्रसङ्गं चाह - अन्यथेति ।। मात्रपदं प्रागभावादिसर्वाभावपरम् ।।

१.वमैक-च-क-ग-रा. २.विषययोस्तु -क. ३.सत्यविशिष्टबुद्धयः -- च. ४.'एकस्येति' इत्यादि नास्ति -- इ. ५.णप्र - इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४५६.

अन्यथा अभावमात्रविशिष्टसत्यबुद्धिं पक्षीकृत्य सम्बन्धविषयत्वसाधने लाघवादभावमात्रानुगत एको नित्यः संबन्धः सिध्येत् ।।
१ एवमभाववयविगुणक्रियाजातिविशिष्टसत्यबुद्धिं ज्ञातो घट इत्यादिबुद्धिं च पक्षीकृत्य सम्बन्धविषयत्वसाधने लाघवादभावे गुणगुण्यादौ ज्ञा २ नेच्छादौ चैको नित्यः सम्बन्धः सिद्ध्येत् ।।
एतदप्युक्त 'मानवस्थिते'रिति । लाधवतर्कानुग्रहस्य धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायस्य च साम्येति अभावादौ स्वरूपसंबन्धः गुणादौ तु तदन्य इति व्यवस्थित्ययोगादित्यर्थः ।

नन्वत्र विशिष्टबुद्धित्वं वा सविकल्पकबुद्धित्वं वा द्वयोरपि सम्बन्ध ३ विषयबुद्धिपर्यवसानेन साध्याविशेष इति चेन्न विशेषणधीजन्यबुद्धित्वं वा अविशिष्ट ४ बुद्धित्वमित्युपपत्तेः । अन्यथा तव प्रयोगेप्यस्य दोषः सा ५ मान्यात् । विशेषणधीजन्यत्वस्या ६ विशिष्टो व्याप्यवृत्तिधीजनकत्वस्य ७ च बुद्धेः सम्बन्ध ८ विषयकत्वज्ञानं विना दुर्ज्ञानत्वं चेत्तवाप्येव दोषः

समान एव । विशेषण ९ ताबुद्धिगोचरबुद्धित्वेन तद्ग्रहे च उपजीव्यत्वेन तस्यैव हेतुत्वमस्त्वित्येतदपि समानमिति भावः ।।

१.इतः ' एतदप्युक्तमिति पर्यन्तं नास्ति -गृ-रा. २.नज्ञेयादौ च -च-क-. ३.न्धि-इ. ४.वावृत्तिबुद्धिजनकबुद्धित्वं वा विशिष्ट इत्यधिकम्-इ. ५.साम्यात्-इ. ६त्वमपि-अ. ७.त्वं च -अ. ८.न्थापि-इ. ९.णगोचर-इ.

सये-प्रण-भङ्गः) समवायवादः पु - ४५७.

ननु तथात्वे पटाभाववति घटवति १ घटाभावधीः स्यात् । अभावमात्रे वैशिष्ट्यस्यैकत्वात् । एवं घटादेः स्वविष २ यकज्ञानादिना नित्यसम्बन्धवत्वे आत्मत्वं स्यादिति चेत् । तर्हि तवापि स्पर्शवति रूपाभाववति वायौ रूपधीः स्यात् । समवायस्यैकत्वात् । एवं घटादेरप्यात्मत्वं स्यात् । घटत्वसमवायस्यैव ज्ञानसमवायत्वादिति समम् ।।

यदि च वायौ रूपसमवायस्य सत्वेपि रूपेण सह विशेषणताविशेषरूप ३ सम्बन्धाभावात् रूपाऽप्रतीतिः । तर्हि भूतले घटसत्वकाले घटाभाववैशिष्ट्यस्य सत्वेपि घटाभावेन सह विशेषणता ----

प्रतिबन्दिरूपेणाभावादिविशिष्टबुद्धावप्येकनित्यकनित्यसम्बन्धापादनमयुक्तम्ा् । तत्र बाधकसत्वादिति भावेन मण्युक्तमेव बाधकमाश्कते -- नन्विति ।। तथात्वे ।। अभावादावेकनित्यसम्बन्धसत्वे इत्यर्थः । घटाभावसम्बन्धसत्वोपपादनायोक्तम् पटाभाववतीति ।। तादृशस्थले घटाभावबुद्धेरति ४ रिक्तेष्टत्वनिरासायोक्तं घटवतीति ।। आत्मत्वं स्यादिति ।। आत्मनीवेति भावः । अतः समवायत्याग एव युक्त इति

भावेन प्रतिबन्द्या समाधत्ते --- तर्हि तवापीति ।। गुणादावेकनित्यसम्बन्धवादिनोपीत्यर्थः ।।
'वायौ रूपसमवाये सत्यपि रूपात्यन्ताभावोस्ति । न घटे । कथमेवम् । अधिकरणस्वभावादबाधितरूपनिरूपप्रतीतेश्चेते'मण्युक्तमाशङ्क्य निराह -- ननु रूपसमवायवत्यपीति ।। अयोग्यत्वरूपाधिकरणस्वभावादित्यर्थः ।

१.भूतले इत्यधिकम् - मू. २.यैकज्ञानादिनित्यसम्बन्धित्वे इत्यस्ति -रा. ३.स्वरूपेत्यधिकम् -रा. ४. अतिरिक्तपदं नास्ति -इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४५८.
---------- ---------- --------
-- विशेषी १ भावात् २ घटाभावाप्रतीतिरिति (तु) समम् ।।
ननु रूपसमवायवत्यपि वायौ रूपाप्रतीतिरधिकरणस्वभावात् । न चात्रतादृशः स्वभावः कल्प्यः । घटापरणानन्तरं तत्रैवं घटाभावप्रतीतेः । वायौ तु न कदापि रूपप्रतीतिरिति चेत् । तर्हि घटे श्यामतादशायां भविष्यद्रक्तरूपसमवायस्य ३
सत्वेन तदा रक्तरूपधीः स्यादिति समम् । न चत्र वाया विवाधिकरणस्वभावः कल्प्यः । तत्रैव कदाचिद्रक्तरूपप्रतीतेः ।।
ननु तदा रक्तरूपाभावात्तदप्रतीतिः । लौकिकप्रत्यक्षे विषयस्यापि हेतुत्वात् । ४ तव तु घटापनयनकाले सतो घटाभावस्य घटोपनयकालेपि सत्वेन तत्प्रतीतिर्दुर्वारा ।

न चात्रेति।। घटाभावाधिकरणभूतलादावित्यर्थः । तथात्वे वायौ रूपस्येव भूतले घटाभावधीः कदापि न स्यादिति भावेनाह -- घटापरणेति ।। कदाचिद्रक्तरूपप्रतीतेरिति ।। वायाविवि

तत्रआप्ययोग्यतालक्षणाधिकरणस्वभावकल्पने च सा न स्यादिति भावः ।।
ननु आमघटे श्यामतादशायां रक्त ५ रूपधीरुपनीतप्रत्यक्षरूपापाद्यतेऽथलौकिकप्रत्यक्षरूपा । नाद्यः । इष्टापत्तेः । अन्त्ये विषयसत्वस्य तत्र हेतुत्वेन तदभावादेव तत्र रक्तरूपाप्रत्यक्षतोपपत्तेरिति भावेन पक्षधराद्युक्तमाङ्क्य निराह -- नन्वित्यादिना ।। मयाप्येवं वक्तुं शक्यमित्यत आह-- तव त्विति ।। अभावविशिष्टबुद्धावप्येकनित्यसम्बन्धवादिन इत्यर्थः । काल इति ।। कालयोरित्यर्थः ।

१.षरूपसम्बन्धा इत्यधिकम् -रा. २.इतः ' स्वाभावः कल्प्यः' इत्यन्तं नास्ति - छ. ३.तदा इत्यधिकम्-मु. ४.तावत् इत्यस्ति-छ-रा-मु. तु इति नास्ति - ग.

सये-प्रण-भङ्गः) समवायवादः पु - ४५९.

---------- ---------- ---------

न हि घटसत्वकाले घटाभावोऽन्यत्र गतः । अमूर्तत्वात् । नापि नष्टः । नित्यत्वादिति चेन्न । मया घटोपनयापनयकाले भूतले घटसंयोगाभावस्योपरयनकाले अभावात् ।।
किंच त्वद्रीत्याश्रयणेपि किमत्यन्ताभावस्य धीरापाद्यते उत्पादविनाशशीलस्य तुरीयाभावस्य वा ।

स्वीकृतत्वेनेति ।। 'एतद्गटैतद्भूतलसंसर्गाभावस्यापि यथासम्भवं प्रागभावादिष्वन्तर्भावादिति' तत्वसङ्ख्यानटीकोक्तेः । तथैव वर्धमानाद्युक्तेश्च । विवृतश्चायमर्थो न्यायामृते असतो निषेधप्रतियोगित्वसमर्थनवादे इति भावः ।।

अभावादिति ।। ननु उपनेष्यमाणघटसंयोगस्य पूर्वं सतोऽभावस्य प्रागभावत्वेन पश्चात्तदभावेपि प्राक्सतो घटस्यापयनकाले सतोऽभावस्य घटसंयोगध्वंसरूपत्वेन तस्य घटो १ पनयकालेपि सत्वात् कथमप्रतीतिरिति चेत् न । प्राचीनघटसंयोगध्वंसमादायेदानीं घटवत्यपि प्रतीत्यापादन इष्टापत्तेः । पूर्वं घटोत्रस्य एवान्यत्रापनीतः पुनरत्रोपनीत इति प्रतीत्यान्यत्र नीत इति प्रतीतेरिव तत्प्रतीतित्वादिति भावः ।।
नन्वस्त्वेवं भूतलघटो नेति धीस्तत्संयोगाभावविषयेति भवदभिमते दोषाभावः, तार्किकमते भट्टादिमते च स्यादेव दोष इत्यत आह -- किञ्चेति ।। त्वद्री २ त्येति ।। मणिकृद्री ३ त्येत्यर्थः ।।

१.घटपदं नास्ति-मु. २.त्वदीयेति -इ. ३.दीये-इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४६०.

नाद्यः । तस्य त्वत्पक्षे घटाकालेपि स्वरूपात्मकप्रत्यासत्या तत्र सत्वेन तत्प्रतीतेर्दुर्वारत्वात् । नान्त्यः । श्यामतादशायां रक्तरूपस्येव घटसत्वकाले --

ननु प्राचीनरीत्यापि इह भूतले घटो नास्तीति तत्संयोगो निषिध्यत इत्युपनोक्तेः उत्पादविनाशशीलोपि प्रागभावादित्रितयान्यश्यतुर्थः कश्चित्संसर्गाभावोस्तीति मतेनाह -- उत्पादविनाशेति ।। उक्तं च वर्धमानेन 'प्रतियोगिभेदेनेव प्रतियोगितावच्छेदकभेदनाप्यभावभेदात् संयुक्तघटाभावोयं विशिष्टान्तराभाववदुत्पादविनाशशीलोन्य एवेति' ।।
स्वरूपात्मकेति ।। एतेन तदानीन्तनयोर्विशिष्टप्रत्ययजननयोग्यत्वाभावात् न स्वरूपप्रत्यासत्तित्वमिति निरस्तम् । द्वयोः स्वरूपसत्वे प्रत्यासत्तित्वं नेत्यस्य निक्तवचनत्वात् ।।

१ यदुक्तं वर्धमानेन घटान्त्यन्ताभावस्य भूतलेन सह तत्संयोगध्वंसादिरेव सम्बन्ध इति न तदा प्रतीत्यापत्तिरिति । तन्न । अभावाधिकरणयोः सम्बन्धान्तरमन्तरेण
तदुपश्लिष्टस्वभावत्वरूपक्लृप्तसम्बन्धत्यागेनार्थसंयोगध्वंसादेः
सम्बन्धकल्पने घटस्य कपालेष्वत्यन्ताभावः स्यात् । घट २ भावे त्वाश्रयाश्रयिभावध्वंसादिरूपसम्बन्धाभावादप्रतीत्युपपत्या बाधकाभावात् । तथा च घटाद्य ३ त्यन्ताभावस्याप्याकाशाद्यत्यन्ताभावस्येव केवलान्वयित्वापत्ते ४ रिति भावः ।।
यत्तु तदा रक्तरूपाभावादप्रतीतिरिति पूर्वमुक्तं तन्न । घटे श्यामतादशायां जपाकुसुमे रक्तरूपभावात् । घटो रक्त इति धीरवर्जनीयैव ।

१.त्तूक्तं-मु. २.कपालेत्वाश्र-इ. ३.आदिपदं न - मु. ४.त्तिरि -अ.

सये-प्रण-भङ्गः) समवायवादः पु - ४६१.

तुरीयाभावस्य १ सत्वेन साम्यात् । रक्तरूपस्यापि श्यामतादशायामेव जपाकुसुमादौ सत्वाच्च । इह नास्तीति चेत् २ । विशेषणे ३ तस्य विशेष्येण संसर्गे च सति विशेष्ये विशेषणाभावस्यासंभवात् । न हि प्रतियोगिनि रूपे ४ प्रतियोगितवाच्छेदक ५ संसर्गे च सति रूपसंसर्गाभावः संभवी ।।
किंच रूपसमवायतोपि वायो रूपराहित्यस्वभाववत् प्रतियोगिमदधिकरणस्यापि प्रतियोगिकाले स्वस्मिन् तत्प्रतियोगिकाभाविशिष्टप्रमित्यजनकत्वस्वभावः कल्प्यम् ।।

समवायैकत्वेन श्यामरूपसमवायस्य घटे सत्वे तदानीमेवान्यत्र विद्यमानरक्तरूपसमवायस्यापि सत्वादिति भावेनाह -- रक्तरूपस्यापीति

।। इहेति ।। घटे रक्तरूपं नास्तीति चेदित्यर्थः । विशेषण इति ।। सतीत्यन्वयः । तस्य विशेषणस्य । प्रतियोगितावच्छेदक इति ।। रूपं न समवेतमित्यत्र संसर्गस्यावच्छेदकत्वादेवमुक्तम् ।।
पूर्वं परीतिमाश्रित्य प्रतिबन्द्या अभावप्रतीत्यापादानमयुक्तमित्युक्तम्, इदानीं भातलाभावयोर्नित्यसम्बन्धसत्वेपि घटदशायामप्रतीत्युपपादकमाह -- किंचेति ।। प्रतियोगिकाल इत्याद्युक्त्या न चात्र तादृशः स्वभावः कल्प्यः घटापरसणान्तरं घटाभावप्रतीतेरित्युक्तदोषोपास्तो ध्येयः ।।

१.स्यास-क-ग-रा. २.न इत्यधिकम्-रा. ३.णज्ञाने-क. ४.प्ये-क-रा. ५.के-च-ग-रा.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४६२.

अपि च यथा तव चत्वरीयाभावगेहस्वरूपयोर्न प्रतियोगिकाले सम्बन्धत्वं तदाऽभावाप्रतीतेः, किं तु कदातिदेव, तथा घटसत्वकाले वैशिष्ट्यस्य सत्वेपि न तदा तस्य सम्बन्धत्वमिति । न घटवति घटाभावधीप्रसङ्गः । ननु अभावस्य स्वाश्रयेण नित्यसम्बन्धश्चेत् ध्वंसस्यापि स्वाश्रयनाशेन घटोन्मज्जनं स्यात् ।

अत्यन्ताभावस्वीकारवादिना त्वया भूतले घटाभावस्य घटदशायां सतोप्यप्रतीतेरुपपादकत्वेन प्रतियोगिदेशान्यदेशत्वं वा तत्संयोगध्वंसादीरूपो वा सम्बन्धो नेत्युच्यते यथा, तथैवात्र नित्यसम्बन्धपक्षेप्यस्तु तथा च घटापसरणानन्तरमभावधीर्न स्यादितिशङ्काशोपीत्याह -- अपि चेति ।। चत्वरीयः ।। चत्वरीयः ।। चत्वरनिष्ठो योऽभावः यच्च गृहं तयोर्ये स्वरूपे तयोर्ग्रहे

पटादिलक्षणप्रतियोगिकाले सम्बन्धत्वं नास्ति यथा तथा कादाचित्कप्रतीत्यन्यथानुपपत्या प्रकृतेप्यस्तीत्यर्थः ।।
एवमभावविशिष्टबुद्धावप्येको नित्यः कश्चित्सम्बन्धः सिद्धः स्यादित्युक्तप्रतिब्द्या घटदशायामपि घटाभवाधीः १ स्यादिति मण्याद्युक्तं बाधकं निसत्येदानीं बाधकान्तरम २ प्याशङ्क्य निराह - नन्वभावस्येत्यादिना ।।
ननु -- आश्रयनाशहेतुककार्यनाशे समवायिकारणनाश एव प्रयोजकः । पटादौ तथा दर्शनात् । एवं च ध्वंसरूपकार्यनाशः स्विरूपितनित्यसम्बन्धयुक्तस्वाश्रयस्य नाशमात्रेण कथं चोद्यते । न हि विशिष्टबुद्धित्वहेतुना ३ विशिष्टभावबुद्धौ सिद्ध्यन् समवायो भवति ।

१.धीपदं न -मु-इ. २.अपिपदं न -मु-इ. ३.अभावविशिष्टबुद्धौ इत्यस्ति-इ.

--- --- ---
कार्यनाशं प्रति १ नित्यसम्बन्धत्वकारणनाशरूपं सामान्यमेव तन्त्रम् । न तु तद्विशेषसमवायिनाशः । असति बाधके सामान्यस्य त्यागायोगात् । किंच समावायत्वं न जातिः, किं तु वैशिष्ट्यन्यनित्यसम्बन्धत्वमिति कल्पनीयत्वाद्गौरवमिति चेन्न । तथा सति ध्वंसातिरिक्ताभावे वैशिष्ट्यभ्युपगमे बाधकाभावात् । न चैकस्मिन्नभावे स्वरूपसम्बन्धश्चेदभावान्तरेपि तथा । भावेपि ज्ञातो घट इत्यादौ स्वरूपस्य सम्बन्धत्वे रूपे घट इत्यादावपि तथात्वापत्तेः ।।

अयुतसिद्धत्वाभावात् । किं तु तदन्यः कश्चिदेव । तथा च कथमेवमापादनमित्यत आह -- कार्यनाशं प्रति हीति ।। न केवलं त्यागे

कारणाभावो, गौरवं चास्तीत्याह -- किंचेति ।। न जातिरिति ।। एकव्यक्तित्वादिति भावः । अभावादिविशिष्टबुद्धौ यवद्यैशिष्ट्यं तदन्यनित्यसम्बन्धत्वमित्यर्थः। न चेति ।। अभावान्तरेपि तथा च चेत्यन्वयः । कुत इत्यत आह -- भावेपीति ।। तथात्वापत्तेरित्यन्वयः । युतसिद्धत्वायुतसिद्धत्वादिना भावपदार्थेषु वैषम्यं चेदभावेष्वपि कार्यत्वाकार्यत्वादिना वैषम्यमिति समम् ।।
ननु ज्ञानादेर्घटेन नित्यसम्बन्धे सदा घटप्रकाशः स्यादिति चेत् । रूपादेर्घटादिना नित्यसम्बन्धे सदा घटे श्यामरक्तरूपादिधीप्रसङ्गः स्यादिति समम् । श्यामरूपादेः कादाचित्कत्वान्न दोष इति चेत् । ज्ञानादेरपि तथात्वमिति तल्यम्। किं च यथाकथंचिद्बाधकवशाद्भावे द्वैरूप्यं चेदभावेप्युक्तादेव बाधकाद्वैरूप्यमस्त्विति सा २ मान्यमेवेति भावः।।

१.'हि' इत्यधिकम् - क - ग. २.म्यमे - इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४६४.

किंच यदि लाघवान्नित्यसम्बन्धिकारणनाशः कार्यनाशे तन्त्रं ततोपि लाघवान्नित्यसम्बन्धिनाश एव तत्र तन्त्रं स्यात् । न चेष्टापत्तिः । घटनाशेन
पटरूपनाशापत्तेः । भवति हि पटरूपाहेतुरपिघटः पटरूपसमवायी । एवं सम्बन्धस्य नाश्यत्वे सम्बन्धत्वमेव तन्त्रम्, लाघवात् , न तु तद्विशेषः संयोगत्वमिति समवायस्यापि १ नाशः स्यात् ।।
यदि च समवायरक्षर्थं तत्र कारणत्वादिकं विशेषणं तर्हि वैशिष्ट्यरक्षार्थं वैशिष्ट्यन्यत्वविशेषणमप्यस्तु । साम्यात् ।।

नन्वयुतसिद्धभावमात्रे अस्त्वैकरूप्यं, संसर्गाभावमात्रे नास्त्यैकरूप्यं, ध्वंसातिरिक्ताभाव एव नित्यसम्बन्धोपगमादित्यतो ;
अभावमात्र एवास्तु नित्यसम्बन्धः, न चोक्तदोषः, कार्यनाशं प्रति समवायिकारणनाशस्यैव प्रयोजकत्वाद्गौरवस्य चाकिंचित्कारत्वादिति भावेन कार्यनाशं प्रति हीत्यादिनोक्तं निराह -- किंचेति ।। नित्यसम्बन्धीति ।। नित्यो यः सम्बन्धः तद्युक्त इत्यर्थः । ततोपि लाधवादिति ।। कारणपदत्यागादिति भावः ।।
कार्यनाशे समवायिनाशस्य तन्त्रत्वमनुक्त्वा नित्यसम्बन्धिनाशस्यैव लाघवेन प्रयोजकत्वस्वीकारेतिप्रसङ्गान्तरं चाह -- एवमिति ।। लाघमनुसृत्य विशेषत्यागेन सामान्यादेर ३ सति कार्यनाशे नित्यसम्बन्धिनाशवत् सम्बन्धनाशे सम्बन्धत्वमेव तन्त्रं स्यादित्यर्थः । तत्रेति ।। नाशप्रयोजकसम्बन्धत्वे कारणीभूतसम्बन्धत्वं समवायान्यसम्बन्धत्वमिति विशेषणं यदीत्यर्थः ।। वैशिष्ट्येति ।।

१.स्य वि -छ-मु. ३. दसति - अ. (दरे सति).

केचित्तु समवायिकारणनाशस्य हेतुत्वकल्पने समवायत्वं न प्रविष्टम् । येन गौरवं स्यात् । किं त्वनतिप्रसक्त १ मुण्डितसमवाय २ व्यक्तिमात्रमित्याहुः ।।
एतेनैव सत्यलौकिकप्रत्यक्षजातिगुणक्रियाविशिष्टबुद्धयः विशेषणसम्बन्धनिमित्तकाः सत्यलौकिकप्रत्यक्षविशिष्टबुद्धित्वात् ।

अभावविशिष्टबुद्धिविषयीभूतवैशिष्ट्यान्यसम्बन्धत्वमेव सम्बन्धनाशे ३ तन्त्रमित्यस्तु । एवं चाभावेपि नित्यसम्बन्धः स्यादेवेति भावः ।।
कार्यनाशे समवायनाशो हेतुरित्यत्र किंच समवायत्वमित्यादिना यद्गौरवमुक्तं

तदुद्धारं प्रकारान्तरेणाह -- केचित्विति । समवायत्वाप्रवेशेपि संबन्धत्वेनाप्रवेशे किंचिद्युक्तकारणनाशस्तन्त्रमित्यपि प्राप्त्यातिप्रसङ्गेन नित्यकारणभूतसम्बन्धवन्नाशस्तन्त्रमित्येव
वाच्यत्वात्किमनेनेत्यरुचिबीजमत्रेति ध्येयम् ।।
एवमभावविशिष्ट ४ प्रतिबन्दीदुरुद्धारेत्यभावस्थल इव ५ क्लृप्तस्वरूपसम्बन्धेनैव विशिष्टप्रतीत्युपपत्तौ न समवायकल्पनेत्युक्त्वा विशिष्टबुद्धित्वादिति हेतुरप्रयोजक इति निरस्येदानीं 'मथवा ६ सम्बन्धविशेषनिमित्तका इति साध्य'मित्यादिना मण्युक्तमनुमानान्तरं चानूद्य निराह -- एतेनेति ।। स्वरूपसम्बन्धेनैवान्यथोपपत्तिकथनेनेत्यर्थः । निरस्तमित्यन्वयः ।।

१.क्तं - च-ग. २.यं-च. ३.'त्रये' इत्यधिकम् -अ. ४.बुद्धिपदमधिकम् - अ. ५.क्लृप्तपदं न-मु. ६.विशेषसंबन्धनिमि- मु-इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४६६.

दण्डीति सत्यलौकिकप्रत्यक्षबुद्धिवत् । अत्र च क्षत्यादौ क १ र्तेव लाघवाद्विशेषणसम्बन्धोपि एक एव सिध्यति । अनुगतकार्यस्यानुगतकारणजन्यत्वात् । स्वरूपसम्बन्धानामननुगतत्वा २ च्च । अत एव नाप्रयोजकता । सम्बन्धं विनापि विशिष्टबुद्धौ गावाश्वादावपि तत्प्रसङ्गादिति निरस्तम् ।

हतौ च सत्यत्वं विशेषणमिति मण्युक्त्यैव पक्षेपि तदनुमतमितिभावेन सत्यपदम् । तत् कृत्यं पूर्ववत् । मणौ विशिष्टबुद्धय इत्येव पक्षोक्तावप्यत्र पक्षहेतुदृष्टान्तेषु विशिष्टबुद्धिपदं लौकिकप्रत्यक्षपरमिति ३ तट्टीकोक्तेर्लौकिके ४ त्याद्युक्तिः ।अलौकिकप्रत्यक्षे बाधनिरासाय

लौकिकेति ।। अनुमित्यादौ बाधनिरासाय प्रत्यक्षेति ।। निर्विकल्पके तन्निरासाय विशिष्टपदम् । भ्रमे व्यभिचारवारणाय हतौ सत्यपदम् । साध्यसाधनतावैकल्याय दृष्टान्तविशेषणानि ।।
तावता समवायसिद्धिःकुत इत्यत आह -- अत्र चेति ।। पक्षधराद्युक्तमाह -- क्षित्यदौ कर्तेवेति।। अत एवेत्युक्तं हेतूच्छेद(क)बाधकं व्यनक्ति -- सम्बन्धमिति।।
सम्बन्धनिमित्तका इत्यत्र सम्बन्धस्य निमित्तत्वं किं विषयत्वेनाथ समवायत्वेन आद्ये गुणादिस्वरूपाणामेव केन
चिद्धर्मेणानुगतानां तथा हेतुत्वमस्तु । किं समवायेन । अन्त्ये तु समवायत्वं नित्यसम्बन्धत्वं तथा च लाघवेन सम्बन्धत्वेनैव हेतुत्वमस्तु । तच्च स्वरूपसम्बन्धसाधारणमिति तेनानुगतीकृतानां गुणादीनामेव हेतुत्वमस्तु ।

१. त्रैक्यला-क. २.दनन्तत्वात् -च-क-ग-रा. ३.तत्पदं न-इ. ४.कत्वा-अ.

अभावादौ क्लृप्तेन स्वरूपसम्बन्धत्वेनानुगतीकृतानां गुणादिस्वरूपाणामेवानुगतकार्यहेतुत्वोपपत्तेः । तस्मादभावादाविव गुणादावपि धर्मिकल्पनात इति न्यायसाम्येन स्वरूपमेव सम्बन्धः ।।
यत्तु युतसिद्धसम्बन्धद्वयविषयाणां दण्डादिविशिष्टबुद्धीनामिवायुतसिद्धसम्बन्धिद्वयविषयाणां
अवयविगुणक्रियाजातिविशिष्टबुद्धीनामन्योन्यं --

अवच्छेदकलाघवे व्यक्तिगौरवस्यादोषत्वादिति भावेन निराह -- अभावादाविति ।। आदिपदेन तन्मतचसिद्धसमवायविशिष्टबुद्धिपरिग्रहः ।।

एतच्च सत्यलौकिकजात्यादिविशिष्टप्रत्यक्षत्वं कार्यतावच्छेदकमुपेत्योक्तम् । वस्तुतस्तु तादृशानुमितित्वादिकमिव तादृशप्रत्यक्षत्वमपि नावच्छेदकं मानाभावात् । स्वावच्छिन्नकार्यतानिरूपितानुगतैककारणासिद्ध्या अनित्यप्रमात्वानित्यप्रत्यक्षत्वादेरिव

बाधकोपपन्नत्वेनावच्छेदकत्वासंभवाच्च । नच नित्यैकरूपसम्बन्धरूपसमवाय एवानुगतकारणनमितियुक्तम् । अन्योन्याश्रयापत्तेः।

विषयस्य प्रत्यक्षं प्रत्यहेतुत्वस्य प्रामाण्यवादे व्युत्पादनाच्चेति ज्ञेयम् ।।

पक्षधराद्युक्तमनूद्य निराह -- यत्वित्यादिना । अन्योन्यमिति ।। अवयवावविशिष्टबुद्धेर्गुणादिविशिष्टबुद्ध्या तस्याः जातिविशिष्टबुद्ध्या जातिविशिष्टबुद्धेः गुणविशिष्टबुद्ध्येत्यादिरूपेणान्योन्यं साजात्यमित्यन्वयः ।।

-- स्फटतरविवेकप्रकाशराहित्यरूपं साजात्यमन्यविशिष्टबुद्धितो व्यावृत्तमनुभावसिक्षिकम् । तथा च दण्डादिविशिष्टप्रतीतिं प्रति संयोग इव गुणादिविशिष्टप्रत्यक्षप्रतीतिरूपमनुगतकार्यं प्रति निमित्ततया समवायः सिध्यतीति । तन्न ।।

तस्य भेदाविषयत्वेन, १ स्फटतर २ प्रकाशसामग्रीराहित्येन वा, त्वदभिमतसमवायनियामकायुतसिद्धविषयत्वेन वा,

तत्स्वरूपमाह -- स्फटतरेति ।। विवेको भेदः । तद्विषयकत्वराहित्यरूपमित्यर्थः । अवयवावयव्यादेरन्योन्यं भेदस्याङ्गुलिद्वयवदप्रतीतेरिति भावः । अन्येति ।। दण्डीकुण्डलीत्यादिविशिष्टबुद्धीनामन्योन्यं साजात्यमि ३ वेहायुतसिद्धविशिष्टबुद्धीनामन्योन्यसाजात्येपि दण्डीत्यादिबुद्धितो व्यावृत्तं तादृशबुद्धावविद्यमानं अनुभवसाक्षिकमस्तीत्यर्थः ।।

तादृशं साजात्यं अन्यतो व्यावृत्तं गुणक्रियादिविष्टबुद्धिगतमनुभवसिद्धमुक्तम् । तत्किं जातिकृतमुत स्फटतरविवेकप्रकाशराहित्यरूपमेव बाधविषयाविशेषकृतं वा। नाद्यः जातित्वे मानाभावात् । तादृशविशिष्टबुद्धित्वस्योपपत्ते ४ रप्रयोजको हेतुरिति भावेन तादृशविशिष्टबुद्धेः अन्यथासिद्धिमाह -- तस्येति ।। अवयव्यादिविशिष्टबुद्धिगतसाजात्यस्येत्यर्थः । तृतीयं प्रत्याजष्टे -- त्वदिति ।। त्वदभिमता ५ या ६ समवायनियामकायुतसिद्धि ७ रित्यर्थः ।।

१.'वा' इत्यधिकम् - च-क-ग. २.विवेकपदमधिकम्-च-क-ग-रा. ३.इवेति नास्ति -मु-इ. ४.र्न प्रयो-इ. ५.तानि-इ.
६.यानि-इ. ७.द्धानि-इ.

सये-प्रण-भङ्गः) समवायवादः पु - ४६९.

---------- ---------- ---------

भेदाऽभेदविषयत्वेन वा, सविशेषाभेदविषयत्वेन वोपपत्तेः ।।
अभावप्रतियोगिनोर्ज्ञानज्ञेयादीनां च विवेकप्रकाशस्य स्फटतया न्यायसाम्येन तत्र
संयो १ गापत्तेश्च ।।

अभावाधिकरणयोस्तन्मते सुवर्णतदुपष्टम्भकपीतद्रव्ययोश्च विवेकप्रकाशस्यास्फटत्वेन न्यायसाम्येन तत्र समवायापत्तेश्च ।।
युतसिद्धेषु संयोगस्येवायुतसिद्धेषु समवायस्यापि न्यायसाम्येन नानात्वापाताच्च ।

ननु नित्य २ सम्बन्धसम्बन्धित्वमेवायुतसिद्धि ३ रित्यतोऽयावद्रव्यभाविगुणक्रियावयव्याद्यभिप्रायेण विषयान्तरमाह -- भेदादेति ।। यावद्रव्यभाविगुणाद्याशयेनाह -- सविशेषेति ।।
यद्वाद्या विषयोक्तिर्न्योयमतरीत्या द्वितीया मीमांसकरीत्या तृतीयासिद्धान्तरीत्येति ४ ध्येयम् । तन्तुपटादिबुद्धिः कुण्डेबदरादिबुद्धेर्विवक्षणेत्यभेदविषयैवावसीयत इति सुधोक्तेरिति भावः । एवं वदता त्यया स्फटतरविवेकप्रकाशोपेतविशिष्टबुद्धौ संयोग इत्युक्तः स्यात् । तच्चायुक्तमित्याह अभावेति ।। आदिपदेनेच्छेष्यमाणादेर्ग्रहः । न्यायेति ।। स्फुटतरविवेकप्रकाशराहित्यस्थले समवाय इति वत् तादृशप्रकाशवद्विशिष्टबुद्धौ दण्डीत्यादिबुद्धाविव समयोगः स्यादित्यर्थः । नानात्वत्वेति ।।

१.गोपप-क. २.संबन्धपदं नास्ति - इ. ३.द्धत्व-मु-इ. ४.ज्ञे -मु-इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४७०.

तस्मान्न समवाये प्रमाणमस्तीति ।।
समवाये प्रमाणभङ्गः ।। २९ ।।

उक्तप्रकाशराहित्यरूपसाजात्यस्यानुगतस्य दण्डीत्यादिबुद्धौ सत्वेपि तत्र संयोगनानात्ववत् समवायस्यापि नानात्वा १ पत्तेरित्यर्थः ।।

यत्वाश्रयनाशजन्यकार्यनाशस्थले कार्यनाशं प्रति समवायिरूपाश्रयनाश एव हेतुर्वाच्यो न त्वाश्रयमात्रनाशः । तथात्वे कपालनिष्ठधटध्वंसस्य कपालनाशेनापि नाशप्रसङ्गेन घटोन्मज्जनापत्तेरतः समवायोभ्युपेत्य इति तन्न । समवायत्वं हि नित्यसम्बन्धत्वं न तु जातिरनभ्युपगमात् । तथा च लाघवात्सम्बन्धिकारणरूपाश्रयनाश एव वा कारणीभूताश्रयनाश एव वाश्रितकार्यनाशहेतुरिति स्वीकृतौ ध्वंसनाशाप्रसक्त्या समवायस्यानुपेयत्वात् ।।
वस्तुतस्तु परिमाणवादे ध्वंसस्य भूतलैदिनिष्ठत्वेन कपालनाशेपि २ तन्नाशाप्रसक्तेः । अत एव प्राग् भेदाभेदविषयत्वेनेत्याद्युक्तिरिति ।।
समवाये प्रमणभङ्गः ।। २९ ।।

१.त्वोपपत्ते - इ. २. अपिपदं न - इ.

समवाये बाधकम्) समवायवादः पु - ४७१.
---------- ---------- ---------
किञ्च कालस्य स्वगतेन सङ्ख्यापरिमाणादिना त्वयापि स्वरूपसम्बन्धः स्वीकृत इति किं तत्र समवायेन ।।
यदि च कालस्य तेन सह समवायस्य सत्वान्न स्वरूपसम्बन्धः । तर्हि का १ लस्य घटेन सह संयोगस्य सत्वात् स्वरूपसम्बन्धो न सिध्येत् । साम्यात् ।।
एवं समवायस्याप्रामाणिकत्वमुक्त्वानुव्यख्यानसुधयोरुक्तमन्यसमवायोपगमे बाधकमाह -- किंचेति ।। २ यद्वा प्रागुक्तानुमानेषु गुणादिविशिष्टबुद्धिनिमित्तसम्बन्धतया हि समवायसिद्धिरभिमता सा न युक्ता । दद्बुद्धेरन्यथोपपत्तेरिति । चतुर्थान्यथोपपत्तिमाह -- किंचेत्यादिना ।।
अथवा --

समवायश्च सम्बन्धो नित्यः स्यादेक एव सः ।
इति नित्यत्वे सति सम्बन्धत्वमिति यत्समवायलक्षणमुक्तं तत्र सम्बन्धत्वं तावदन्यथोपपत्तिचतुष्टयेन निराह -- किंचेत्यादिना ।।
तत्रादौ तावत्साम्यादनवस्थितेरिति सूत्रखण्डस्य स्वगतसंख्यादिगुणेन कालस्य पदार्थान्तरेणेव स्वरूपसम्बन्धस्वीकारसाम्यात्समवायस्यानवस्थितेरसत्वापातादित्यर्थमुपेत्याह -- कालस्येति ।। कालपिरमाणं सदास्तीतिकालस्यैकत्वसंख्या सदास्तीत्यादिप्रतीत्या कालस्य जगदाधारताप्रयोजकत्वेन स्वगतधर्मैरन्यैश्चसर्वैः स्वरूपसम्बन्धः स्वीकृत इति तेनैव सम्बन्धेनैकः कालो परिच्छिन्नपरिमाणः काल इति विशिष्टबुद्ध्युपपत्तौ तत्र समवायस्यावस्थित्यभावः स्यादित्यर्थः ।।
स्वगतसङ्ख्यादिना समवायिसत्वस्येव घटादिद्रव्येण संयोगसत्वस्यापि साम्यादिदानीं घट इत्यादिधीबलेन घटादिना स्वीकृतस्वरूपसम्बन्धस्यावस्थित्यभावापत्तेरित्यर्थान्तरं चोपेत्याह -- यदि चेति।।
तेन स्वगतसङ्ख्यादिना ।।

१.लेन सह घटस्य - च-छ-रा. २.'यद्वा, अथवा' इत्याद्यवतारिकाद्वयं नास्ति-इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु -४७२.

---------- ---------- --------

अपि च गुणादेरपि त्वन्मते स्वाभावस्वज्ञानस्वकालैः सह स्वरूपसम्बन्धत्वं तावदस्ति । तत्र गुणादेरभावज्ञानादीन्प्रति स्वरूपसम्बन्धत्वं न प्रतियोगि १ विषयत्वादिना । अननुगमात् । गौरवाच्च । किन्तु विशेषणत्वेनानुगमाल्लाघवाच्च । विशेषणत्वं च

गुणादेर्गुण्यादावपि २ सममिति गुण्यादावपि गुणादेः स्वरूपसम्बन्धत्वं क्लृप्तमेवेति क्व समवायस्यावकाशः ।।
अपि च घटरूपसमावाया इति समूहालम्बनज्ञानात् रूपी घट इत्यादिबुद्धेर्वैलक्षण्यायावश्यमङ्गीकार्येण रूपस्य घटेन सह विशेषणताविशेषणैव विशिष्टबुद्ध्युपपत्तौ किं समवायेन । एवं रसादावपीति न समवायस्यावकाशः ।।

नन्वस्त्वेवं तथापीदानीं घटरूपमित्यादिधीबलाद्घटे रूपादिनैव स्वरूपसम्बन्धः कालस्य नान्येनेत्यत आह -- अपि चेति ।। ३ यद्वा काले गुणविशिष्टबुद्ध्युपपादकसम्बन्धत्वेन समवायसिद्धावप्यन्यत्र तथात्वेन सिद्धिरस्त्वित्यत आह - अपि चेति ।। तच्च स्वरूपसम्बन्धत्वमित्यन्वयः । विषयत्वादिनेत्यादिपदेन विशेषणविशेष्यभावग्रहः । अननुगमादिति ।। स्वभावेन प्रतियोगित्वरूपः, ज्ञानादिना विषयत्वरूपः, कालेन विशेषणत्वादिरित्यननुगमात् अनेककल्पने गौरवाच्चेत्यर्थः ।।
सममिति ४ ।। एतेन गुणादेर्विशेषणत्वसाम्यात्चसमवायस्यावस्थित्यभावात् इत्यर्थ उक्तो भवति ।। वैलक्षण्यायेति ।।

१.त्वावि-ग-रा. २.'सममिति गुण्यादावपि' इति नास्ति - ग-मु. ३.यद्वे त्याद्यवतारिका नास्ति -इ. ४.तीति-मु.

समवाये-बाधकम्) समवायवादः पु - ४७३.

किञ्च समवायस्यापि स्वसम्बन्धिना सह सम्बन्धाङ्गीकारे अनवस्था । तत्र स्वरूपसम्बन्धाङ्गीकारे च गुणादेरेव गुण्यादिना स्वरूपसम्बन्धीस्ति

। साम्यात् । किं दूरगमनेन । कालस्य स्वगतसङ्ख्यादिना समवायानुपपत्तिः,

समूहालम्बनेपि घटतद्रूपतत्समावायानां प्रतीतिवद्रूपी घट इति प्रतीतावपि रूपादित्रयस्यैव भानेऽनुभवसिद्धस्य ततो वैलक्षण्यस्यायोगेन रूपादौ विशेषणत्वादिरेव समूहालम्बने १ प्रतीतोत्र प्रतीयत इति वाच्यमिति तेनैवोपपत्तौ किं समवायेनेत्यर्थः । एतेनाभावविशिष्टबुद्धिसाम्याद्रूपी घट इत्यादिबुद्धावपि समवायस्यावस्थित्यभाव इत्यर्थः सूत्रांशस्य सूचितः --
'भिन्नत्वसाम्यतस्तस्य ताभ्यां योगो भवेद्भ्रुव '
मित्यनुव्याख्यानसुधयोरुक्तमाह -- किञ्चेति ।। सम्बन्धिना २ गुणगुण्यादिरूपेणेत्यर्थः । ३ समवायस्यावस्थित्यभाव इत्यर्थः । समवायविशिष्टबुद्धिसाम्यात्समवायस्याव ४ स्थित्यभावो गुणादावपीत्यर्थमुपेत्याह -- तत्रेति ।। समवेतः पट इत्यादिसमवायविशिष्टबुद्धौ प्रतीतसमवायसमवायिनोरित्यर्थः । ५. दूरेति ।। गुणादिविशिष्टबुद्धौ समवायः, समवायविशिष्टबुद्धौ स्वरूपसम्बन्ध, इत्यभ्युपेत्य किमित्यर्थः । उपपादितबाधकानि बुद्ध्यारोहाय संगृह्याह -- कालस्येति ।।

१.नेऽप्र इत्यस्ति -इ. २.गुणपदं नास्ति -इ. ३.'भाव इत्यर्थः. इत्यन्तं नास्ति-इ -मु. ४.वगत्य-इ. ५.स्वरूपेति -मु, रूपेति -इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४७४.
---------- ---------- ----------
गुणादेः स्वाभावादिनेव गुण्यादिनापि स्वरूपसम्बन्धेनैवोपपत्तिः, समूहालम्बनाद्वैलक्षण्यानुपपत्तिः, अनवस्था चेति बाधकचतुष्यं दुष्परिहरम् ।।

किंच समवायस्यैकत्वयुक्तम् । तथाहि । धूमाद्यनुमानेन हि धर्मिमात्रं धर्ममात्रं वा न १ साध्यम् । तयोः प्रागेव सिद्धत्वात् । अन्यथा आश्रयासिद्ध्यप्रसिद्धविशेषणत्वे स्याताम् । किंतु तयोः सम्बन्धः । स च क्वचित्संयोगः यथा पर्वताग्र्योः । क्वचित्समवायः यथा रसाद्रूपानुमाने । अग्निसंयोगोपि माहानसादौ सिद्ध इति नानुमासाध्यः । २ किंतु पर्वतस्याग्निसंयोगः । तत्र च षष्ठ्यर्थः समवाय एव । न च एक एवेत्यनुमानमात्रं सिद्धसाधनं स्यात् । एवं शब्दमात्रमपि ज्ञानतज्ञापकं स्यात् । तत्रापि पदार्थानां संसर्गाणां च ३ सिद्धत्वात् ।

एवमन्यथोपपत्या समवा ४ यस्य स्वरूपमेव (स्य संबन्धत्वेन सिद्धिं) निरस्येदानीमस्तु नाम गुणगुण्यादौ कश्चनातिरिक्तः सम्बन्धः, तस्यैकत्वं तु न, तथात्वेनुमानशब्दप्रमाणमात्रोच्छेद इति भावेन सुधोक्तं विवृण्वन्नाह -- कंचेति ।। धर्मीति ।। पर्वतादिमात्रं वह्न्यादिमात्रमित्यर्थः । षष्ठ्यर्थः ।। पर्वतस्येति षष्ठ्यर्थ इत्यर्थः । स च एक एवेति ।। रूपी घट इत्यादिप्रतीतौ सिद्धश्चेत्यापि ध्येयम् ।

१.बो-छ-क-ग-रा. २.न तु -ग-मु. ३.विशकलितानां इत्यधिकं-च-क-ग-रा. ४'वा यस्य सम्बन्धत्वेऽनुमाने' त्यादिरीत्या पङ्क्तिरस्ति-अ.

तदुक्तमनुव्याख्याने ।।
'भूधरस्याग्निसंयोगो यदि षष्ठ्यर्थ एव कः । समवायो यदि ह्यस्य चैकत्वात्सिद्धसाधन'मिति ।।

सिद्धसाधनं ज्ञातज्ञापनम् । एव सुखस्यात्मान्तरे सिद्धत्वात्स्वसम्बन्ध एव कृतिसाध्य इति वक्तव्यम् । तच्चाशक्यम् समवायस्यानादित्वेनासाध्यत्वात् । एतदप्युक्तं 'समवाय'इत्यादिना । सिद्धसाधनं निष्पन्ननिष्पादनम् ।।

विशकलितानामिति ।। न च विशिष्टं नान्यत्र सिद्धमिति वाच्यम् । विशिष्टस्य
त्वन्मते पदार्थान्तरत्वाभावाद्घटोस्तीत्यादिवाक्यबोध्यस्य घटतत्सत्तयोः समवायस्यैकत्वेनात्र तस्य ज्ञानतत्वाच्चेति भावः । तदुक्तमिति ।। वैशेषिकाधिकरणानुव्याख्यान इत्यर्थः ।।
शब्दसाधारण्यलाभार्थमाह -- ज्ञानज्ञापनमिति।। धूमाद्यनुमामिति शेषः । इति सुदोक्तिरूपलक्षणम् । पर्वते वह्निरस्तीत्यादिशब्दजातमित्यपि ध्येयम् । १ अत एव सुधायां समवायैकत्वनिरास २ प्रकरणावसाने आगमापह्नवश्च समवायैक्ये स्यात्पदार्थानां तत्संसर्गाणां ३ सिकतावद्विशकलितानां सिद्धत्वादित्युक्तमिति भावः ।।
समवायो यद्युपेयते तर्ह्यस्यैकत्वात्सिद्धस्यैव साधनमुत्पादनमिति प्राप्तमित्यर्थान्तरं चोत्तरार्धस्योपेत्य समवायस्यैकत्वे बाधकान्तरं चाह -- एवमिति ।। स्वेति ।। स्वस्य सुखेन यः समवायस्तस्येत्यर्थः ।

१.ततः 'इति भावः' इत्येवास्ति 'अत एवे' त्यादि नास्ति -इ. २.प्रपदं नास्ति -मु. ३.'सिकतावद्विशकलितानां इति नास्ति -मु.

न्यायदीपयुततर्कताण्वडवम् (प्र.परिच्छेदः पु - ४७६.
---------- ---------- -------
एवं दुःखास्या १ त्मान्तरे सत्वेन निवर्तयितुमशक्यत्वात्स्वसम्बन्ध एव निवर्त्य इति वाच्यम् । तच्चाशक्यम् । समवायस्याऽविनाशित्वात् ।।

अपि चात्माकाशकालादौ रूपरसादिसमवायस्य २ चलनादिसमवायस्य, घटपटादौ ज्ञानेच्छादिसमवायस्य, पटादौ घटत्वादिसमवायस्य, सुखादौ दुःखा ३ दिसमवायस्य च, सत्वेन सर्वपदार्थेषु सर्वधर्मसम्बन्धस्य साम्यात् सर्वसङ्करारूपाव्यवस्थास्यात् । नन्वात्मादौ रूपादिसमवायस्य सत्वेपि घटादाविव रूपादिना सह विशेषणतावशेषाभावाद्वा ---

सिद्धसाधनमित्युपलक्षणम् । ४ सिद्धस्यैव नित्यस्यैव दुःखादिसम्बन्धस्यावसानमित्यपि ध्येयमिति -- एवं दुःखस्येति ।। इष्टानिष्टप्राप्तिपरिहारार्थं प्रयत्नाभावापत्तिः समवायैक्ये बाधिकेत्युक्तं भवति ।।
समवायैक ५ त्वदूषणं सूत्रारूढं दर्शयितुं साम्यादानवस्थितेरिति सूत्रांशस्यार्थान्तरमुपेत्यातिप्रसङ्गान्तरमाह -- अपि चात्मेति ।। षष्ट्यन्तानां पूर्वपूर्वेणैव सप्तम्यन्तेनान्वयः ।। सत्वेनेति ।। सर्वषष्टन्तेन सम्बन्धः । समवायस्यैकत्वपक्ष इतियोज्यम् ।।
यत्तु मणौ 'ननु समवायस्यैकत्वे कथं रूपिनिरूपिव्यवस्थे'त्यादिनैतदेन सांकर्यमाशङ्क्याधिकरणस्वाभावादिना समाहितं, तदनूद्य निराह -- नन्वात्मादाविति ।। समवायस्यैकत्वपक्षेमण्याद्युक्तसमाधावतिप्रसङ्गमाह -- किञ्चेवमिति ।।

१.प्या-क. २.वल-छ-मु. ३.खत्वादि-च-क-ग. ४.'सिद्धसाधनं सिद्धस्यैव सुखादेरवसादनमित्यपि' इत्यस्ति -मु-इ. ५.क्यदू- इ.

अधिकरणस्वभावाद्वा आधेयस्वभावा १ द्वा न शङ्कर इति चेत् । एवं हि तैरेव सर्वव्यवस्थोपपत्तौ किं व्यवस्थित्यहेतुना समवायेन ।।

किंचैव सर्वेषामपि वस्तूनां सर्वैः सह एक एव सम्बन्ध इति वा २ कस्यापि केनापि सह न सम्बन्ध इति वा स्यात् । आद्ये आधारस्य वा आधेयस्य वा सम्बन्धस्य वा स्वभावात् कुत्र चिदसम्बन्धव्यवहार इत द्वितीये आधारस्य वा आधेयस्य वा स्वभावात्कुत्रचित्सम्बन्धव्यवहार इति च सुवचत्वात् ।।
किंच ३ संयोगोप्येक एव लाघवात् । व्यवस्था तु स्वाभाववैचित्र्यादिति स्यात् । नाशाद्यनुभवस्तु उभयत्रापि समः । पाकेन श्यामरूपमिव तत्सम्बन्धोपि नाष्टः, रक्तरूपमिव तत्सम्बन्धोप्युत्पन्न इत्यनुभावात् ।।

पक्षद्वयेप्युपपत्तिप्रकारं परोक्तन्यायेनाह -- आद्य इत्यादिना ।। ननु संयोगस्यैक्ये घटसंयोगो नष्टः पटसंयोग उप्तन्न इति धीः कथमित्यत आह -- नाशादीति ।। सम इत्युक्तसाम्यं समवायेन व्यनक्ति - पाकेनेति ।।

१.वबलाद्वा - क. २. एक - क. ३.चैवं - च-मु.

न हि सम्बन्धनाशेपि सम्बन्धिनः स्थितिवत् सम्बन्धिनाशेपि सम्बन्धस्थितिः कृत्रचिद्दृष्टा ।।
एतेनात्मादिनिष्ठे समवाये रूपादिप्रतिसम्बन्धिकत्वस्याभावान्न सङ्कर इति निरस्तम् । आत्मनिष्ठस्य समवायस्य घटादिनिष्ठाद्भेदे अपसिद्धान्तात् । अभेदे घटानिष्ठेपि रूपादिप्रतिसम्बन्धिकत्वाभावापातात् ।।
एतेनैव समवायस्य स्वाभावतः एकत्वेपि औपाधिको भेदोस्ति । रूपसुखाद्युपाधीनां भिन्नत्वादिति निरस्तम् । एवं हि रूपादिः संयोगातिश्चैक एव भेदस्त्वौपाधिक इति स्यात् ।।

अयमनुभवो भ्रमोस्त्विवत्यतो बाधकाभावादिति भावेनाह -- न हीति ।। रूपादिप्रतिसम्बन्धिकत्वस्येति ।। रूपादिनिरूपितत्वस्येत्यर्थः। रूपादिरिति ।। रचसगन्धादिरादिपदार्थः । तत्रोपाधइः पटादिराश्रय एव । तथा च घटपटादिगतरूपमेकमेव । भेदार्थं तु घटाद्याश्रयलक्षणोपाधिभेदसत्वाद्युक्तमित्यस्तु इत्यर्थः । संयोगादिरि त्यादिपदेन विभागस्य वा विशेषणविशेष्यभावादिसम्बन्धस्य वा ग्रहः । औपाधिक इति ।। घटादिस्वरूपनिरूपकभेदनिमित्तक इत्यर्थः । उपाधिशब्दात् तृतीयासमर्थाज्जन्यगम्यार्थे १ शैषिकेठकि कृते औपाधिकशब्दो २ निष्पन्नः ।।
औपाधिकमित्युपाधिगम्यमुतोपाधिजन्यमिति कल्पद्वयलाभं हृदि कृत्वा आद्येपि ज्ञानं प्रमा भ्रमो वेति भावेन क्रमेण निराह -- किञ्जौपाधिकत्वमिति ।।

१.वैशे -अ. २.शब्दनिष्पत्तेः -मु.

समवाये-बाधकम्) समवायवादः पु - ४७९.

किञ्चौपाधिकत्वं उपाधिज्ञेयत्वं चेत् । ज्ञानस्य प्रमात्वे भेदा १ सिद्धिः । भ्रमत्वे तु पदार्थानां सङ्करतादवस्थ्यम् ।
उपाधिजन्यत्वं चेत् । सिद्धः समवायस्य सत्यो भेदः । अपसिद्धान्तश्च ।।
तदुक्तमनुव्याख्याने ।।
‘उपाधिजन्यं तद्गम्यमिति चौपाधिकमं भवेत् ।
उभयत्राप्यनन्ताः स्युः समवाया इतस्तत ‘ इति ।।

एतेन लाघवतर्कसहकृतेन धर्मिग्राहकानुमानेन समवायस्यैकत्वं नित्यत्वं च सिद्धमितिनिरस्तम् ।।

तदुक्तमिति ।। वैशेषिकनये । उभयत्रेति ।। उपाधिना २ जन्यत्वपक्षे प्रतीयमाणत्वपक्षे चेत्यर्थः । कथमानन्त्यमित्यत उक्तम् -- इतस्त इति ।। अत्र तत्रेत्यर्थः । नानादेशकालेषु स्थितानामवयवावयव्याद्युपाधीनामनन्तत्वमिति शेषः।
ज्ञनस्य भ्रमत्वपक्षे साङ्कर्यदोषोक्तिस्तु ।।
अविद्यमान एवान्यः समवायोवगम्यते ।
उपाधिना तद्गमकमनुमानं न मा भवेत् ।।
इत्यनुव्याख्यानोक्तमुपलक्षणमिति भावेनेति ज्ञेयम् । अत एव तत्र सुधायां 'इत्यादि द्रष्टव्य 'मित्युक्तम् ।।
धर्मिग्राहकमानबाधं समवायानन्त्यापादनमित्याश ४ ङ्क्य निराह -- एतेनेति ।। धर्मीति ।। सत्यलौकिकप्रत्य ५ क्षजातिगुणक्रियाविशिष्ट ६ बुद्धयोविशेषणसंबन्धनिमित्तकाः, इति प्रागुक्तानुमानेनेत्यर्थः ।

१.दसि-क-ग-रा. २.धिज-मु. ३.धितम्-मु. ४.ङ्कां नि -इ. ५.क्षे-इ. ६.बुद्धित्वादित्याद्यनुमानैरित्यर्थः । तत्सहकृतेन (यः) विशेषणसंबन्धनिमित्तका इति प्रा -गुक्तानुमानेनेत्यर्थः । उक्तत्वेनेति । इत्यस्ति - अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४८०.

एकत्वादौ प्रत्यक्षविरोधस्योक्तत्वेनानुमानस्य तदविरुद्धनानासम्बन्धसानेनं कृतार्थत्वात् ।।

अन्यथा संयोगोपि लाघवतर्कसहकृतेन प्रत्यक्षेण, अभावाधिकरणयोर्ज्ञानज्ञेयादीनां सम्बन्धोपि तत्सहकृतैरुक्तानुमानैरेको नित्यश्च सिध्येत् । द्व्यणुकादीनां सोपादानकत्वसाधने कार्यत्वहेतुनापि तत्सहकृतेन नित्यमेकं उपादानं सिध्येत् ।
लाघवतर्कस्य साम्यात् । ईश्वरानुमानेपि कर्त्रेकत्वसिद्धिर्नेत्युक्तम् ।।
तस्मात्समवायस्य नित्यत्वमेकत्वे २ वाऽयुक्तम् ।।

उक्तत्वे नेति ।। नाशाद्यनुभवस्तूभयत्र सम इत्यादिग्रन्थेनेत्यर्थः । उक्तानुमानैरिति । पूर्वत्र समवायानुमानभङ्गे उक्तैर्विशिष्टबुद्धित्वात् ४ तद्विशिष्टविषयकविशिष्टबुद्धित्वादित्याद्यनुमानैरित्यर्थः । तत्सहकृतेन लाधलतर्कसहकृतेनेत्यर्थः ।।
नन्वेवमीश्वरानुमानेपि लाघवतर्केण कर्त्रैक्यसिद्धिर्न स्यादित्यत आह -- ईश्वरेति ।। उक्तमीश्वरानुमानभङ्ग इत्यर्थः ।।
समवायाभावे मानाभावेदेव समवायसिद्धिरस्त्वित्यत आह -- समवायाभावे त्विति ।। इत्याद्यनुमानानि प्रमाणानीत्यनेनान्वयः।

१.केन -च-क-ग. २.चा-च-क-ग. ३.भाव इत्यधिकं -च-'भावयोरन्योन्यं संबं' इति शोधितमस्ति -क-ग-रा. ४.युतसिद्धविषयविशिष्टबुद्धि -इ.

समवायाभावे तु अयुतसिद्ध ३ योराधाराधेयभावनिमित्तकसम्बन्धः न सम्बन्धभिन्नः अयुतसिद्धयोरेवान्योन्यं सम्बन्धत्वात् । भूतलघटाभाव सम्बन्धवत्,

अयुतसिद्धौ यौ भावौ अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेत्येवं द्वंद्वीभूतौ द्वौद्वौ पदार्थौ तयोरित्यर्थः । अत्र सम्बन्ध इत्यस्यैव पक्षत्वे स्वरूपसम्बन्धेन सिद्धसाधनं अतोन्योन्यमित्यन्तम् । कालसम्बन्धेन तद्वारणाय वान्योन्यमित्युक्तिः । न्यायमते जगदाधारताप्रयोजकतया कालस्य सर्वेणापि स्वरूपसम्बन्धोपगमात् । अयुतसिद्धभावयोरपि प्रत्येकं स्वस्वनिष्ठाभावादिना स्वरूपसम्बन्धस्योपगमेन तेन सिद्धसाधनवारणाय वा अवयवावयविनोः प्रत्येकमन्येन संयोगे बाधनिरासाय वान्योन्यमित्युक्तिः । भतलघटाभावयोरन्यसम्बन्धेनार्थान्तरवारणाय भावयोरिति ।। अपृथक् गृह्यमाणत्वरूपत्वादयुतसिद्धत्वस्य घटपटसंयोगे बाधनिरासायायुतसिद्धेत्युक्तिः । संयोगस्य परमते सम्बन्धिनात्यन्तं भिन्नत्वम् । सिद्धान्तेपि भिन्नभिन्नत्वात् । अत एव संयोगे व्यभिचारवारणाय हेतावयुतसिद्धयोरित्युक्तिः । अत एवावयवावयविनोः प्रत्येकमन्येन सह संयोगे व्यिभिचारवारणायान्योन्यमित्युक्तिः । पक्षे भावपदस्याधिकस्योपादानान्न हेतु १ तावच्छेदकैक्यनिमित्तसिद्धसाधनत्वं शङ्क्यम् । अभावभूतलयोरयुतसिद्धत्वमसिद्धमिति चेत् न । तस्यापृथग्गृह्यमाणत्वमात्ररूपत्वादन्यस्यानिरूपणात् । नित्यसम्बन्धत्वादेः समवायसिद्ध्युत्तरकालीनत्वात् ।।
अभावव्यावृत्तमन्यदेन किञ्चिदयुकसिद्धत्वमिति वादिनं प्रति प्रयोगान्तरमाह -- संयेगेति ।।

१.पक्षत्यधिकम् - इ.

न्यायदीपयुततर्कताण्डवम् समवायवादः पु - ४८२.

---------- ---------- ----------

संयोगभिन्नः साक्षात्सम्बन्धः न संयोगविशेषणतोभयभिन्नः साक्षात्सम्बन्धत्वात् संयोगवत्, सक्षात्सम्बन्धत्वं संयोगविशेषणतान्यान्यत्वव्याप्यम् साक्षात्सम्बन्धमात्रवृत्तित्वात् संयोगत्ववत्,

सम्बन्ध इत्येवोक्तौ रक्तः स्फटिकः कृष्णं वस्त्रमित्यादौ स्फटिकवस्त्रसंयुक्तजपाकुसुमकर्दमसम्बन्धरक्तिमकालिमादिसम्बन्धे बाधवारणाय साक्षादित्युक्तिः । संयोगनार्थान्तरवारणाय संयोगभिन्न इति १ । केचिद्विशेषणतारूपसम्बन्धेनार्थान्तरनिरासाय साक्षादित्युक्तिरित्याहुः । न संयोगेति ।। संयोगविशेषणतान्यतररूप एवेत्यर्थः । तथैवोक्तौ वक्ष्यमाणसाध्यां २ शेऽविशेषापत्या नञ्द्वयेनोक्तिः । तत्र सं ३ योगभिन्नत्वाभावेन साध्यपर्यवसाने बाधात् । विशेषणताभिन्नत्वाभावेनैव साध्यपर्यवसानात्संयोगान्यसाक्षात्सम्बन्धस्य विशेषणतारूपत्वस्यैव सिद्धिरिति भावः । हेतौ प्रागुक्तपरम्परासम्बन्धेऽव्यभिचाराय साक्षादित्युक्तिः ।।
साक्षादिति ।। प्रागुक्तपरम्परासम्बन्धे बाधनिरासाय साक्षादित्युक्तिः । संयोगेति।।
संयोगविशेषणतान्यतरत्वव्याप्यमित्यस्यार्थनिर्देशः
संयोगविशेषणताभ्यामन्यज्जगत् तदन्यत्वं संयोगविशेषणतयोरेव तद्व्याप्यत्वमिति । तथा च संयोगविशेषणतारूपौ द्वावेव सक्षात्सम्बन्धौ सिध्यतो न त्वतिरिक्तः कश्चित्समवाय इति भावः । हतौ साक्षात्पदकृत्यं प्राग्वत् । प्रमेयत्वादावव्यभिचाराय मात्रेत्युक्तिः ।।

१.चेद्विशे-इ. २.अंशपदं न - मु. ३.संभिन्नत्वा-इ.

---------- ---------- ----------
सम्बन्धत्वं न सम्बन्धिध्वंससमानकालीनसम्बन्धवृत्ति न सम्बन्धि १ द्वयप्रागभावसमानकालीनसम्बन्धवृत्ति वा सम्बन्धमात्रवृत्तित्वात् संयोगत्ववदित्याद्यनुमानानि प्रमाणानि ।।
समवाये प्रमाणभङ्गः ।। ३० ।।

एवं सम्बन्धैकत्वविरोध्यनुमानान्युक्त्वा नित्यत्वविरोध्यनुमानमाह -- सम्बन्धत्वमिति ।। सम्बन्धद्वयमवयवावयव्यादि ।
अनादित्यविरोधिसाध्यान्तरमाह -- न सम्बन्धिद्वयप्रागभावेति ।। मात्रपदं कृत्यं प्राग्वत् ।।
समवाये बाधकम् ।।
समवायवादः समाप्तः ।। ३० ।।

यच्चोच्यते -- समवायसम्बन्धेन पूर्वं गत्वादि जातिविषयकं निर्विकल्पकं अनन्तरं जातिविशिष्टगकारविषयकं सविकल्पकमिति । तन्न । निर्विकल्पके मानाभावात्।।

ननु समवायाभावे निर्विकल्पकादिभेदेन प्रत्यक्षप्रमाद्वैविध्यानुपपत्तिः । तस्य समवायरूपवैशिष्ट्य ३ वगाहित्वानवगाहित्वाभ्युपगमेनैव ४ द्वैविध्यस्य वाच्यत्वादित्यतः द्रव्यादिविकल्पानां प्रथममेवोत्पत्तौ बाधकाभावेन निर्विकल्पकानुपपत्तेरिति पद्धतिवाक्यं विवृण्वानो नास्त्येव निर्विकल्पकं ५
विशिष्टज्ञानं च स्वरूपसम्बन्धावगाहीति भावेनाह -- यच्चेति ।। समवायेति । वस्तुगत्या समवायसम्बन्धेन स्थिता या
गत्वादिजातिः तद्विषयमित्यर्थः ।

१.द्वयेति नास्ति-च-छ-मु. २.समवायभङ्गः इत्यधिकम्-क. ३.विषयकत्वे तद्विषयकत्वाभ्यु-अ. ४.एवकारो नास्ति-मु-इ. ५.क- अ.

न्यायदीपयुततर्कताणडवम् (प्र.परिच्छेदः पु - ४८४.

ननु यद्यपि निर्विकल्पके न प्रत्यक्षं प्रमाणम् । तस्यातीन्द्रियत्वाभ्युपगमात् । नापि व्यवहारः । तस्य च सविकल्पकसाध्यत्वात् । नापीदं पूर्वं मया १ संमुग्धेन ज्ञानमित्यनुभवः । तस्याल्पविशेषण २ ज्ञानेनैवोपपत्तेः । नापि ज्ञानत्वं निष्प्रकारकत्वसमानाधिकरणम् सकलज्ञानवृत्तित्वात् सत्तावत्, चक्षुः चाक्षुषसविकल्पकातिरिक्तज्ञानकरणं ज्ञानकारणत्वाद्घ्राणवत्यनुमानम् । अप्रयोजकत्वात् ।

३ यद्वा श्रोत्रसन्निकर्षरूपेण समवायसम्बन्धेन जायमानं गत्वादिजातिविषयकं वैशिष्ट्याविषकं ज्ञाननिर्विकल्पकं, तेनैव सन्निकर्षेण पश्चाज्जायमानं जातिविशिष्टज्ञानं सविकल्पकमित्यर्थः ।।
सम्भाविकपक्षान्मण्युक्तखण्डनरीत्या निराकुर्वन्नेव पूर्वपक्षयति -- यद्यपीत्यादिना ।। तथापीति वक्ष्यमाणेनान्वयः । व्यवहारो गौरित्याद्यभिलप ४ नरूपः ।। तस्येति ।। तादृशानुव्यवसायस्येत्यर्थः । सविकल्पकज्ञानत्वे अव्यभिचाराय सकलेति हेतुविशेषणम् । निष्प्रकारकघटादिवृत्तित्वे बाधात्तादृशज्ञानवृत्तित्वेनैव साध्यपर्यवसानमिति भावः ५ ।

१.सांमुग्धे -च-क-ग-रा. २.णक-ग-रा. ३.यद्वेत्यादिसम्भावितेति पर्यन्तो ग्रन्थः नास्ति-इ. ४. लापादिः -मु-इ. ५.निष्प्रकारकेत्यारभ्य नास्ति-इ.

निर्विकल्पके प्रमाणभङ्गः) निर्विकल्पकवादः पु - ४८५.

---------- ---------- ---------

अतिप्रससङ्गाच्च । नापि जागराद्यं गौरिति ज्ञानं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वात् दण्डी पुरुष इति ज्ञानवदित्यनुमानम् । दृष्टान्तस्य साध्यवैकल्यात् । दण्डपुरुषयो १ रुभयोर्युगपदिन्द्रियसन्निकर्षे असंसर्गाग्रहे च सति विनैव दण्डज्ञानं दण्डीति ज्ञानोत्पादानुभवात् ।।
तथापि 'एतज्जन्मनि प्राथमिकं गौरिति प्रत्यक्षं जन्यविशेषणज्ञानजन्यं अन्यविशिष्टज्ञानत्वादनुमितिवत्'इति मण्युक्तमनुमानं मानम् । न च तत्र विशेषणज्ञानं स्मृतिरूपम् । एतज्जन्मनि तेन गोत्वस्याननुभवात् । न चाद्यस्त २ नपाना---

अतिप्रसङ्गाच्चेति ।। ज्ञानत्वं घटत्वसमानाधिकरणमिति, तथा चक्षुः चाक्षुषनिर्विकल्पकसविकल्पकातिरिक्तं ज्ञानजनकमित्यपि त्वदुक्तप्रयोगाभ्यां साधयितुं शक्यत्वादिति भावः । गौरिति ।। ज्ञानमात्रपक्षत्वे द्वितीयादिसविकल्पके प्राथमिकसविकल्पकजन्यत्वेनार्थान्तरनिरासाय जागराद्यमित्युक्तिः । साध्ये ईश्वरज्ञान ३ जन्यत्वेनार्थान्तरवारणाय जन्येति ज्ञानविशेषणम् ।।
मणुकृता सिद्धान्तमुनुमानमाह -- तथाप्येतज्जन्मनीति ।। एतज्जन्मनीत्यस्य कृत्यग्रे व्यक्तम् । द्वितीयादिज्ञाने प्राथमिकसविकल्पकजन्यत्वेनार्थान्तरनिरासाय प्राथमिकमित्युक्तिः । साध्ये जन्येति सविशेषणमीश्वरज्ञानेनार्थान्तरनिरासाय । हेतौ चाव्यभिचारायेति भावः ।।
मण्युक्तदिशैव परिष्करोति -- न च तत्रेति ।।

१.उभयपदं न - च-क-ग-रा. २.न्यपा - रा. ३.नाजनकत्वेनार्था - इ.

---------- ---------- ----------

दाविवात्रा १ दृष्टमेव जन्मान्तरीयसंस्कारोद्बोधकम् । तद्वदनन्यगतिकत्वाभावात् । अन्यथातिप्रसङ्गात् । तद्वदेव २ सन्निकर्षेपि प्रथमं गोत्वस्मृत्यापाताच्च । गोत्वसन्निकर्षस्याप्यपेक्षायां तु सन्निकर्षाद्गोत्वानुभव एवोचितः । तस्यानुभव एव हेतुत्वस्य क्लृप्तत्वात् । अन्यथा जन्मान्तरानुभूतानां एतज्जन्मनि
इन्द्रियसन्निकृष्टानां नित्यानां वैदिकानां चार्थानां स्मृतिरेव स्यान्न त्वनुभवः । न च गोत्वरूपविशेषणानुभवः सविकल्पकः । तथात्वे तस्यापि विशेषणज्ञानजन्यत्वाविश्यंभावेनानवस्थानात् ।।
तस्मादर्थान्निर्विकल्पकसिद्धिः । न चाप्रयोजको हेतुः । अनुमितिशाब्दज्ञानादौ हि साध्यप्रसिद्धिपदार्थोपस्थित्यादिर्हेतुः ।

तद्विदिति ।। इह निर्विकल्पकेनाप्युपपत्या जन्मान्तरीयसंस्कारोद्बोधका ३ दृष्टकल्पनानुपपत्तेरिति भावः । अतिप्रसङ्गादिति ।। सविकल्पकप्रत्यक्षादेरप्येवमपलापप्रसङ्गादि ४ त्यर्थः । तद्वदेवेति ।। स्तनपानादिवदवेत्यर्थः ।।
नन्वस्तु सन्निकर्षाद्गोत्वानुभवः । स च विशिष्टज्ञानरूप एव सविकल्प ५ कहेतुरस्त्वित्याशङ्क्याह -- न च गोत्वरूपेति ।। पूर्वपक्षदशायां मण्युक्तमेवानुकूलतर्कमत्राह -- अनुमितीति ।। आदिपदद्वयेन क्रमादुपमितिवाचकज्ञानयोर्ग्रहः ।

१.त्राप्य -रा. २.वा-च-क-ग-रा. ३.केऽह -अ. ४.ति भावः -मु-इ. ५.एतादृशस्थले -'क' कारो नास्ति -- इ.

निर्वि-कके-प्रण-भङ्गः) निर्विकल्पकवादः पु - ४८७.
---------- ---------- ----------

साध्यादीनि च विशेषणानि । एवं च यद्विशेषयोः कार्यकारणभावः असति बाधके तत्सामान्ययोरपि स इति न्यायेन साध्यप्रसिद्ध्यादेर्जन्यविशिष्टज्ञानसामान्ये जन्यविशेषणज्ञानत्वेन हेतुत्वसिद्धिरिति । १ तन्न ।।
अनुमित्यादौ साध्यप्रसिद्ध्यादेरेवाहेतुत्वेन यद्विशेषयोरि २ तिन्यायानवकाशात् । न हि व्याप्त्यादिज्ञाने सति तद्विलम्बेनानुमित्यादिविलम्बः ।।

यद्विशेष(ण) योरिति ।। साध्यपसिद्ध्यनुमित्योः पदार्थोपस्थितिशाब्दज्ञानयोः वाचकज्ञानोपमित्योरित्यर्थः ।।
नन्वेवं दण्डघटयोः कार्यकारणभावे यत्सामान्ययोर्द्रव्यमात्र ३ पृथिवीमात्रयोः
कार्यकारणभावः स्यादित्यत आह-- असतिबाधक इति ।। तत्र व्यभिचारस्यैव बाधकत्वादिह च तदभावादिति भावः । साध्यप्रसिद्ध्यादेरहेतुत्वेनेति ।। ४ तदहेतुत्वं च द्वितीयतृतीयपरिच्छेदयोर्विवरीष्यत इति भावः ।।
असिद्धसाधने दोषः को व्याप्तिर्यदि विद्यते ।
इत्यनुव्याख्यानोक्तं हृदिकृत्वाह -- न हीति ।। आदिपदेन शब्दज्ञानसंकेतस्मरणयोः सत्वे इति ग्रहः ।। तद्विलम्बेन
साध्यप्रसिद्धिपदार्थस्मृतिविवम्बेनेत्यर्थः ।

१.चेन्न-न -मु-द्धेरिति । मैवम् -ग. २.त्यादि-च-ग. ३.पार्थिव -अ. ४.प्रसिद्धिपदार्थोपस्थित्योरहेतुत्वं च इत्यस्ति - अ.

---------- ---------- ----------

न च व्याप्त्यादिधीरे तेन विना नेति वाच्यम् । एवं हि तस्य हेतुहेतुत्वेनान्यथासिद्धत्वान्नानुमित्यादिहेतुना ।।
अस्तु वा साध्यप्रसिद्ध्यादिरनुमित्यादिहेतुः । तथाप वह्निमानित्यादिज्ञानं प्रति वह्न्यादिज्ञानस्य न विशेषणज्ञानत्वेनैव कारणता । द्रव्यत्वादिना वह्निज्ञानेपि तदभावात् । नापि विशेषणतावच्छेदकप्रकारकविशेषणज्ञानत्वेन । तेन निर्विकल्पकासिद्धेः । गौरवाच्च। किं तु विशेषणतावच्छेदकप्रकारकज्ञानत्वेन । तथा च न निर्विकल्पकसिद्धिः ।।
ननु -- तत्र विशेषणज्ञानत्वमप्यस्ति । एवं च विशिष्टवैशिष्ट्यावगाहिज्ञानं प्रति विशेषणतावच्छेदक----

ननु सम्बन्धिनो १ रज्ञाने तन्निरूपितव्याप्तिशक्त्योर्धीरेव नेत्याशङ्क्य निराह - न चेति ।।
परप्रक्रियामुपेत्यापि निर्विकल्पकासिद्धिमाह -- अस्तु वेति ।। अस्त्वेवं को दोष इत्यत आह -- तथा च न निर्विकल्पकेति ।। तस्य निष्प्रकारकत्वेन यद्विशेषन्यायेनापि विशेषणतावच्छेदकप्रकारणज्ञानस्यैव सिद्धिरिति भावः ।।
एवमपि निर्विकल्पकसिद्धिरिति भावेन मण्युक्तमाशङ्क्यते -- ननु तत्रेति ।।
वह्निज्ञानादावित्यर्थः । विशिष्टवैशिष्ट्येति ।।
वह्निमानित्यादिज्ञानमित्यर्थः ।

१. नोज्ञा - इ.

---------- ---------- ----------

--प्रकारकविशेषणज्ञानत्वेन हतु १ ता सेत्स्त्यति । यद्विशेषयोरिति न्यायादिति चेत् । २ एवं ह्यनुमितौ करणविशेषलिङ्गज्ञानस्य हेतुत्वाद्यद्विशेषयोरिति न्यायेन जन्यज्ञानमात्रे करणमात्रज्ञानं हेतुः स्यात् । तथा च प्रत्यक्षेपि चक्षुरादिविषयकमतीन्द्रियं निर्विकल्पक ३ कल्प्यं स्यात् ।।
अपि चैवं प्रत्यक्षविशिष्टज्ञानं प्रति विशेष्यज्ञानस्यापि हेतुना स्यात् । संशयादौ धर्म्यादि ज्ञानस्यानुमित्यदौ पक्षादिज्ञानस्य हेतुत्वेन क्लृप्तत्वात् ।

तत्र वह्नित्वविशिष्टवैशिष्ट्यस्य पर्वते भानाद्गोरित्यादि ४ तु विशिष्टज्ञानमात्रमित्यर्थः ।।
अतिप्रसङ्गेन न्यायस्याभासत्वमाह -- एवं ५ हीति ।। अनुभवबाधपरिहारायाह-- अतीन्द्रियनिर्विकल्पकमिति ।।
अतिप्रसङ्गान्तरोक्त्या यद्विशेषयोरितिन्यायस्याभासतामाह - ६ अपि चैवमिति ।। यद्विशेषयोरिति न्यायेन विशिष्टज्ञानमात्रं प्रति विशेषणज्ञानत्वेन हेतुत्व इत्यर्थः । कुत इत्यत आह -- संशयादाविति ।। संशयरूपविशिष्टप्रत्यक्षविशेषं प्रति, तथा इदं रजतमित्यादिविपरीतविशिष्टप्रत्यक्षविशेषं प्रति च धर्मिज्ञानस्याधिष्ठानज्ञानस्य च हेतुत्वमस्ति । अन्यथा कोटिस्मरणस्योत्कटकोटिकसंशयादेश्चानुपपत्तेः । तथा अनुमितौ पक्षज्ञानस्य शाब्दे ७ बोधे च पदार्थज्ञानस्य च हेतुत्वमस्ति । एवं च यद्विशेषयोरिति न्यायेन धर्म्यादिज्ञानसंशयप्रत्यक्षादिरूपज्ञानयोः कार्यकारणभावे तत्सामान्ययोः प्रत्यक्षविशिष्टज्ञानविशेष्यज्ञानयोरपि कार्यकारणभावापत्तिः स्यादित्यर्थः ।।

१.त्वे विशिष्टज्ञानमात्रं प्रति विशेषणज्ञानत्वेन हेतु इत्यधिकम् - च-क-ग-रा. २.न इत्यधिकं-ग. ३.कं क-ग-रा. ४.दौतु-इ. ५.सतीति-च-छ-ग-रा.

६.एवमित्यारभ्य नास्ति-इ. ७.न्वयेत्यधिकम् - अ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४९०.

न च इष्टापत्तिः दण्डत्वविषयके निर्विकल्पके सामग्रीसत्वेन दण्डस्यापि स्वरूपेण भानादिति वाच्यम् । त्वदनङ्गीकृत १ विशेष्यज्ञानत्वेन हेतुत्वस्यापादनात् ।।
किं च सामान्यप्रत्यासत्तिर्नेति पक्षे व्याप्तिग्रहकाले अनुभूतो वह्निः पर्वतं प्रति न विशेषणम् । अन्यविशेषणज्ञानस्य हेतुत्वे चातिप्रसङ्गः ।।

इष्टापत्तिं व्यनक्ति--दण्डत्वेति ।। सामग्रीति ।। दण्डेन्द्रियसम्प्रयोगादिरूपेत्यर्थः । विशेषणज्ञान २ स्येव विशेषणज्ञानत्वेन दण्डत्वविशिष्टसविकल्पके दण्डरूपविशेष्यज्ञानस्य हेतुत्वं नानिष्टमिति भावः । विशेष्यज्ञानत्वेनेति ।। विशेषणज्ञानस्य सत्वेन यथा हेतुत्वं तथेति भावः ।।
यद्विशेषन्यायेनापि न विशेषणज्ञानत्वेन हेतुत्वं कल्पियितुं शक्यम् । येन तद्बलान्निर्विकल्पकत्वसिद्धिरिति भावेनाह -- किंचेति ।। सामान्यप्रत्या ३ सत्तिरस्तीति न्यायमते ४ यो धूमवानसौ वह्निमानिति व्याप्तिग्रहदशायां पर्वतीयवह्नेरपि पर्वतविशेषणतया भानेनोक्तदोषासंभावात् । सामान्यप्रत्यसत्तिर्नेति पक्ष इत्युक्तम् । एतन्मतेनुमानप्रवृत्तेस्तृतीयपरिच्छेदे उपपादयिष्यमाणत्वादिति भावः ।।

१.स्य -क-ग-रा. २.इव विशेष्यज्ञानत्वेन -इ. स्यैव विशेष्यज्ञानत्वैन -अ. ३.सत्या इत्यधिकम् -अ. ४.योयो-अ.

निर्वि-कके-प्रण-भङ्गः) निर्विकल्पकवादः पु - ४९१.

---------- ---------- ----------

अपि च त्वयापि घटाभाववद्भूतलमिति ज्ञाने अभावरूपविशेषणस्य संयोक्ताविमौ समवेताविमावित्यादिज्ञाने च संयोगसमवायादिरूपस्य विशेषणस्य, अनुव्यवसाये व्यवसायगतस्य रजतत्वप्रकारकत्व १ रूपस्य विशेषणस्य, अभावज्ञाने
प्रतियोगित्वा २ दिरूपस्य विशेषणस्य च, पूर्वमज्ञातस्यैव भानमिति स्वीकृतत्वात्तत्र व्यभिचारः ।।
भूतले अभाव इत्यभावादिविशेष्यकज्ञानानन्तरमेव भूतलमभाववदित्यभाव ३ विशेषणकज्ञानमिति कल्पेन त्वन्योन्याश्रयः । एतत्कल्पनस्य विशिष्टज्ञानविशेषणज्ञानयोः कार्यकारणभावसिद्ध्यधीनत्वात् ।।
एतेनानुगस्य विशेषणज्ञानस्याहेतुत्वे अनुगतं विशिष्टज्ञानरूपं कार्यमाकस्मिकं स्यात् । अन्यस्य तदनुगतस्य हेतोरभावादिति निरस्तम् ।

व्यभिचाररूपबाधकसत्वादसति बाधके यत्सामान्ययोरिति न्यायावतारोप्ययुक्तः । यद्बलाद्विशेषणज्ञानहेतुतासिद्ध्या निर्विकल्पकसिद्धिरिति भावेनानेकस्थलेषु व्यभिचारमाह -- अपि चेति ।। यत्तु मणावेतदेवाशङ्क्य प्रथमं भूतले घटोनास्तीति बुद्धिरित्यादिना समाधानमुक्तं तदनूद्य निराह -- भूतलेभाव इत्यादिना ।। अन्योन्याश्रय इत्युक्तं व्यनक्तिः -- एतदिति ।। प्रथमं विशेष्यत्वेन ज्ञानमिति कल्पनस्येत्यर्थः । विशिष्टज्ञानविशेषणज्ञानयोः कार्यकारणभावे सिद्धे हि व्यभिचारस्य गत्यन्तरकल्पनं सिद्धे च तस्य गत्यन्तरे तयोः कार्यकारणभावसिद्धिरिति भावः।।

१.रूपपदं न -क-ग. २.भावत्वा-क-ग-रा. ३.वादि-च-ग.

---------- ---------- ---------

व्यभिचारस्योक्तत्वात् ।
उभयसम्मतादिच्छादिव्यावृत्तादात्ममनोयोगादिरूपज्ञानसामान्यहेतुत एव विशिष्टज्ञानसंभवाच्च ।।
यदि ह्याननुमित्यनुमितिरूपज्ञानद्वयवन्निर्विकल्पकसविकल्पकरूपज्ञानद्वयं प्रामाणिकं स्यात् । तदा ज्ञानसामान्यसामग्रीत एव विशिष्टज्ञानोत्पत्तौ सर्वमपि ज्ञानं सविकल्पकं स्यादिति भयेन विशेषसामग्री कल्प्येत । न च तदस्ति । निर्विकल्पकस्याद्याप्यसिद्ध्या सर्वस्यापि ज्ञानस्य सविकल्पकत्वात् । इदमित्थमिति हि सर्वापि धीः ।

व्यभिचारस्योक्तत्वादिति ।। तथा चानुगतकारणाभावाद्विशिष्टज्ञानत्वं कार्यतावच्छेदकमेव नेति भावः ।।
तस्य कार्यतावच्छेदकत्वमुपेत्याप्यन्यदेवानुगतकारणमाह -- उभयेति ।।
ननु कथमेतत् निर्विकल्पकसाधारणकारणस्य विशिष्टज्ञानहेतुत्वात् । अन्यथा तदपि विशिष्टज्ञानमापद्येतेत्यत आह ।। यदि हीति ।। विशेषेति ।। विशेषणज्ञानरूपविशेषसामग्रीत्यर्थः । इति हीति ।। हिशब्देन सर्वानभवसिद्धत्वं सूचयति ।।
ननु निर्वकल्पकस्यातीन्द्रियत्वादेव नानुभव इत्यत आह -- अन्यथेति ।।
निर्वि-कके-प्रण-भङ्गः) निर्विकल्पकवादः पु - ४९३.
---------- ---------- ---------

अन्यथा निष्प्रकारकधीवन्निर्विषयापि धीः स्यात्। इच्छापि काचिन्निष्प्रकारिकातीन्द्रिया च स्यात् । एवं द्वेषोपि ।।
एतेनैव व्यभिचारेण रूप्यादिस्मृतेर्भ्रमे विशेषणज्ञानत्वेन कारणत्वं क्लृप्तमतोन्यत्रापि विशिष्टज्ञाने तत्करणमिति निरस्तम् । आवश्यक विशेषणसन्निकर्षत्वेनैव तस्य तत्र हेतुत्वात् । भ्रमं प्रति

विशेष्यज्ञानस्यापिहेतुतायाः क्लृप्तत्वेन अन्यत्रापि विशिष्टज्ञाने तस्यापि हेतुत्वापत्तेश्च ।।
ननु -- विशेषँज्ञानस्याजनकत्वे कथं विशेषणस्यैव प्रकारत्वमिति नियमः । सन्निकर्षस्य विशेष्येपि स १ त्वादिति चेत् । निर्विकल्पकाङ्गीकारेपि कथम् ।

एवं द्वेषोपीति ।। निष्प्रकरको अतीन्द्रियश्च स्यादित्यर्थः । एतेनैवेति ।। अव्यभिचारविशिष्टज्ञानान्यथासिद्ध्यतिप्रसङ्गानां कथनेनैवेत्यर्थः । रूप्यादिस्मृतेर्व्यभिचारेणेत्यन्वयः । गृह्यमाणारोपस्थले स्मृतेरभावान्न स्मृतित्वेनारोप्यभूतरूप्यादिज्ञानस्य हेतुता । किं तु विशेषणज्ञानत्वेनेत्यर्थः । कथं तर्हि हेतुतेत्यत आह -- आवश्यकेति ।। हेतुत्वापत्तेश्चेति ।। इष्टापत्तिस्तु प्रागेव निरस्तेति भावः ।।
यदपि गोत्वादेः प्रकारत्वनियमान्यथानुपपत्या विशेषणज्ञानहेतुत्व २ सिद्धिः ।
विशिष्टधीहेतुताविषयत्वस्यैव प्रकारत्वादिति तदप्याशङ्क्य निराह -- नन्विति ।। सन्निकर्षो नियामक इत्यत आह -- सन्निकर्षस्येति ।।

१.मत्वा -च-छ. २.सिद्धिविशिष्टहेतुधीविषयत्वस्यैव इत्यस्ति -इ.

त्वन्मते विशेष्येपीन्द्रियसंयोगादिनिर्विकल्पकसामग्र्याः सत्वेन निर्विकल्पकस्य विशेष्येपि सत्वात् । कथं चाभावादिज्ञाने अभावत्वादेः प्रकारत्वम् ।।
किं च फलीभूतज्ञाने यद्विशेषणज्ञाने यद्विशेषणत्वेन भासते तद्विषयकज्ञानेन जन्यं यज्ज्ञानं १ तत्तत्प्रकारकमिति वा नियमः,

यज्ज्ञानजन्यं यज्ज्ञानं २ तत्तत्प्रकारकमिति वा । नाद्यः । आत्माश्रयात् । नान्त्यः । अनुमित्यादौ व्याप्त्यादेः प्रकारत्वापातात् । तस्मात्वयापि प्रकारत्वनियमो भोजकदृष्टादिभिरेव वाच्यः ।

कथमिति ।। विशेषण्स्यैव प्रकारत्वनियम इत्यनुषङ्गः । कुत इत्यत आह -- त्वन्मत इति ।। अभावादिज्ञान इत्यादिपदेन प्राग्व्यवहारस्थलोक्तसंयोगसमवायादिग्रहः । त्वदुक्तरीत्या भूतलं घटाभाव इत्यभावविशेष्यकज्ञानस्य प्राथमिकत्वेष्यभावत्वस्य तत्राज्ञाततस्यैव प्रकारत्वात् । भावस्थल एवायं नियम इत्युक्तावपीमौ संयुक्तौ इत्यादावभावादिति भावः ।।
ननु तर्हि गोत्वादेरिव प्रकारत्वनियमो किं बीजमित्यतस्तत्परमुखेनैव वाचयितुं परोक्तं विशिष्टधीहेतुधीविषयत्वरूपं प्रकारत्वं विकल्प्य निराह -- किंचेति ।। फलभूतज्ञाने विशिष्टज्ञान इत्यर्थः । विशेषणत्वेन प्रकारत्वेनेत्यर्थः । आत्माश्रयादिति ।। विशेषणत्वेनेत्यस्य प्रकारत्वेनेत्यर्थतया प्रकरत्वज्ञाने प्रकारत्वज्ञानस्यापेक्षितत्वादिति भावः । तस्मादिति ।। जनकज्ञानविषयत्वस्य प्रकारत्वरूपत्वासंभवादित्यर्थः ।

१.तत् इति नास्ति-च-छ. २.तदिति नास्ति-च-छ.

निर्वि-कके-प्रण-भङ्गः) निर्विकल्पकवादः पु - ४९५.

उक्तेन १ व्यभिचारेणैव विशिष्टज्ञानं सम्बन्धविषयकं सम्बन्धज्ञाने च सम्बन्धिज्ञानं हेतुः सम्बन्धि च विशेषणमिति निरस्तम् । सम्बन्धिनोर्युगपदिन्द्रियसन्निकर्षे तयोरसंसर्गाग्रहे च ताभ्यां सहैवेन्द्रियसन्निकृष्टसम्बन्धस्यापि धीरित्युक्तत्वाच्च ।।

इयांस्तु भेदः ; सम्बन्धः सम्बन्धिनौ विना न भाति तौ तु तेन विनापि भात इति ।। किंच विशेष्यस्यापि सम्बन्धित्वेन तज्ज्ञानस्यापि हेतुता स्यात् । न च विशेष्यस्य सम्बन्धित्वेपि न २ प्रतियोगित्वं किं तु विशेषणस्यैवेति तज्ज्ञानमेव हेतुरिति वाच्यम् ।

उक्तेनैवेति ।। अपि च त्वयापि इत्यादिग्रन्थेनोक्तनेत्यर्थः । अभाववद्भीतलमित्यादौ सम्बन्धिनोऽभावादेरज्ञानेपि विशिष्टज्ञानोदयेन न तस्य हेतुत्वमिति भावः ।।
दोषान्तरं चाह -- सम्बन्धिनोरिति ।। उक्तत्वाच्चेति ।। त्वन्मते विशेष्यीत्यादिना ग्रन्थेनोक्तप्रायत्वादित्यर्थः । ३ यद्वा दण्डपुरषयोर्युगपदिन्द्रियसन्निकर्षेत्यादिना ग्रन्थेनोक्त ४ त्वादित्यर्थः । नन्वेवं सम्बन्धिवत्सम्बन्धस्यापिनिरपेक्षधीः स्यादित्यत आह -- इयांस्त्विति ।। अयं भदौ वस्तुस्वभाव कृत इति भावः ।।
विशेषणस्य प्रतियोगित्वात्तन्निमित्तं विशेषणज्ञानस्य विशिष्टज्ञानहेतुत्वं चेत्तदा दोषमाह -- अभावादिबुद्धाविवेति ।।

१.नैव. २.तदित्यधिकम् -च-मु. ३.यद्वेत्यादि नास्ति -इ. ४.प्राय -मु.

अभावादिबुद्धाविव प्रतियोगितावच्छेदकप्रकारकज्ञानस्यैव हेतुताया वक्तव्यत्वेन निर्विकल्पकासिद्धेः ।।
किंचास्तु विशेषणज्ञानं १ तथापि न निर्विकल्पकसिद्धिः । तथा हि । न तावज्जन्यतावच्छेदकम् । स्मृतावतिप्रसक्तेः । न च तत्रापि पूर्वानुभवो विशेषणज्ञानतया संस्कारद्वारा हेतुरिति वाच्यम् । विशेषणज्ञानत्वेन जनकतायां संस्कारस्य द्वारत्वायोगात् । यज्जातीयस्य यं ३ जनयित्वेव

यज्जनातीयजनकत्वं स एव हि तत्र ४ व्यापारः । अन्यथा दण्डादिरपि कुलालप्यापारः स्यात् ।

इमौ संयोक्ताावित्यादिबुद्धिरादिपदार्थः । व्यवहितेऽनुभवनाशादाह -- संस्कारद्वारा हेतुरिति ।। यज्जातीयस्येति । चक्षुरादीन्द्रियजातीयस्य सन्निकर्षं जनयत्वैव चाक्षुषादिसाक्षात्कारजातीयजनकत्वं दृष्टमिति सन्निकर्ष एवेन्द्रियस्य व्यापारः । तथा दण्डजातीयस्य चक्रभ्रमं जनयित्वैव घटजातीयजनकत्वमिति भ्रमिः दण्डस्य व्यापारो दृष्ट इत्यर्थः । कदापि फलोपधानरहितनवस्थदण्डादेर्व्यापारवत्वाय यज्जातीयस्येत्युक्तिः । अन्यथेति ।। सापेक्षत्वमात्रेण व्यापारत्व इत्यर्थः ।।
नन्वस्त्वेवं व्यापारत्वं तादृशमपि संस्कारस्यास्त्वित्यत आह -- न चात्रेति ।।

१.कारणपदं अधिकम् -च-क-ग-रा. २.कार्यताव-मु. ३.यज्ज-च. ४.तस्य इत्यधिकम् -च-क-ग-रा.

ननु विशिष्टज्ञानस्योक्तविधया कार्यतावच्छेदकत्वेपि निर्विकल्पकासिद्धिः कुत इत्यत आह -- तथाचेति ।। जन्यविशिष्टज्ञानत्वस्यानवच्छेदकत्वे सतीत्यर्थः । तत्रेति ।। स्मरण इत्यर्थः । अननुभूतगोव्यक्तेः प्रथमतो गोत्वविशिष्टज्ञानमपि प्राग्भवीयसंस्कारजन्यस्मरणमस्तु । स्तनपानादाविवेति भावः ।।
ननु स्मरणस्य विशेषणज्ञान १ जन्यत्वादनवस्थेत्यत आह -- जन्येति ।। उक्तमिति ।। स्मृतिवतिप्रसक्तेरित्या २ दिपूर्वग्रन्थे उक्तमित्यर्थः ।।
स्मृतिव्यावृत्तमेव कार्यतावच्छेदकं स्वयमुपपाद्य स्मृतिसाधारणमेव कार्यतावच्चेदकमस्त्विति मतान्तरमाह -- केचि ३ दिति ।। इत्याहुरित्यन्वयः ।

१.जन्यपदं न -इ. २.आदिपदं न -मु-इ. ३.त्त्विति -इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ४९८.

अस्तु वा स्मृतिसाधारणं जन्यज्ञानत्वमेव कार्यतावच्छेदकम् । तथापि वैशिष्ट्य १ प्रवेशे गौरवमेव । न चैवमनवस्था । बीजाङ्कुरवत् प्रामाणिकत्वेन वस्त्वनवस्थाया अदोषत्वात् । प्रथमप्रवृत्तेन प्रमाणेन लाघवसहकारिणा जन्यज्ञानपरम्परायामेव विशेषणज्ञानस्य कारणत्वावधारणात् । अन्यथा सामग्री २ सामग्र्यन्तरसापेक्षेत्यनवस्थापि दोषः स्यात् ।।

न च जन्यस्य सर्वस्यापि ज्ञानस्य विशेषणज्ञान्यत्वे पूर्वपूर्वज्ञानधाराया अविच्छेदे प्रायणाद्यनुपपत्या ज्ञानानवस्थादोषः । एतज्जन्मनि प्राथमिकानुभवे स्मरणं हेतुः।

तत्र च संस्कारद्वारा जन्मान्तरीयानुभवः । तत्रापि ३ पूर्वजन्मान्तररीयानुभव इति स्वीकारे ४ णाविरललग्रज्ञानधाराया अभावेन प्रायणाद्युपपत्तेः ।।

न च पुरुष ५ प्रयोज्यशब्दवृत्तिजातिविशिष्टप्रत्यक्षे विशेषणज्ञानं न स्मृतिरूपं, तस्या जातेः पूर्वमननुभवादिति वाच्यम् ।

नचैवमिति ।। स्मरणस्यापि जन्यविशेषणज्ञानजन्यत्व इत्यर्थः । प्रामाणिकत्वं व्यनक्ति --प्रथमेति ।। लाघवेति ।। वैशिष्ट्यप्रवेशापेक्षाया जन्यज्ञानत्वस्य लाघवादिति भावः ।। सामग्र्यन्तरेति ।। स्वजनकसामग्र्यन्तरेत्यर्थः । प्रायणादीति ।। मरणमूर्च्छादिरित्यर्थः ।

१.ष्ट्याप्र-क-च-छ. २.ग्र्याः - च. ३.तदित्यधिकम्-ग-मु. ४.रेऽवि-मु. ५.विशेषेत्यधिकम्-क-ग-रा.

निर्वि-कके-भङ्गः) निर्विकल्पकवादः पु - ४९९.

शब्दस्य शब्दत्वादिना स्मरणानन्तरं शब्दविशेषणकजातिविशेष्यकज्ञाने जाते पश्चाज्जातिविशेषणकशब्दविशेष्यकज्ञानसम्भवात् । त्वत्पक्षे अभावविशेष्यकज्ञानानन्तरं तद्विशेषणकज्ञानवत् ।।
एवं प्रत्यग्रोत्पन्नरूपादिविशिष्टप्रत्यक्षेपि द्रष्टव्यम् । अन्यथा त्वत्पक्षेपि निर्विकल्पकस्यादृष्टद्वारा जन्यज्ञानजन्यत्वादनवस्था स्थादित्याहुः ।।
निर्विकल्पके प्रमाणभङ्गः ।। ३१ ।।

अदृष्टद्वारा जन्यज्ञानेति ।। हविरादिगोचरजन्यज्ञानेत्यर्थः ।।
३ आहुरित्यरुचिबीजं तु स्मृतावतिप्रसक्तेरित्यादिना पूर्वोक्तमेव ज्ञेयम् ।।
निर्विकल्पके प्रमाणभङ्गः ।। ३१ ।।

किञ्चातीन्द्रिय २ ज्ञानोपगमे योग्यानुपलब्धेरभावेन ज्ञानाभावस्य निश्चेतुमशक्यतया अनुपलब्धिलिङ्गजन्या घटाद्यभावधीर्न
स्यात् ।।

निर्विकल्पेके साधकाभावमात्रं न बाधकं चास्तीत्याह -- किञ्चेति ।। योग्येति ।। यद्यत्र मयि ज्ञानं स्यादुपलभ्येतेति प्रतियोगिसत्वप्रसञ्जितप्रतियोगित्वरूपमण्युक्योग्यानुपलब्धेरित्यर्थः ।। लिङ्गजन्यति ।।

१.'शब्दविशेष्यकज्ञानान्तरं' इत्यिधिकम् -क. २.प्रमाणो-छ. ३.प्राहु -इ.

न च सविकल्पकाभाव एव निर्विकल्पकाभावे लिङ्गम् । निर्विकल्पके सति सविकल्पकावश्यंभावाभावेन निर्विकल्पकं प्रति सविकल्पकस्या व्यापकत्वात् ।।

अपि च निर्विकल्पकजन्यसविकल्पकोत्पत्तिदशाया १ मती २ न्द्रियनिर्वकल्पकसामग्रीसत्वेन सत्प्रतिपक्षवत्सामग्रीद्वयस्य परस्परप्रतिबन्धकमपि ज्ञानं नोत्पद्यत ।।

यद्यपि घटाद्यभावो योग्यानुपलब्धिसहकृतप्रत्यक्षवेद्यस्तथापि क्वचिदन्धकाराद्यावृतस्थले परामर्शेन गृह्यमाणो घटाद्यभावोत्र घटो नास्ति योग्यत्वे सत्यनुपलभ्यमानत्वादिति लिङ्गम्य इत्यभ्युपगमात् । ज्ञानाभावज्ञनस्यावश्यकत्वाद्योतनाय लिङ्गजन्या घटाद्यभावधीरित्युक्तम् ।।

न च सविकल्पकाभाव एव घटाद्यभावबुद्धौ लिङ्गमस्तु सविकल्पकस्य योग्यतया तदभावज्ञानसंभवादिति वाच्यम् । उपलब्धिसामान्याभावस्यैवार्थाभावे
लिङ्गत्वादन्यथातिप्रसङ्गादिति भावः ।।

ननु निर्विकल्पकस्यातीन्द्रियत्वेन तदभावस्याप्रत्यक्षत्वेपि तज्ज्ञानमनुमितिरूपमस्तु । सविकल्पकस्य निर्विकल्पव्यापकतया सविकल्पकाभावस्यैव तत्र लिङ्गत्वात्तचस्य च प्रतयक्षादित्याशङ्क्य निराह -- न चेति ।। सविकल्पकावश्यंभावावेनेति ।। निर्विकल्पकमात्रं सविकल्पकं प्रत्यक्षसामग्रीत्वात्कारणान्तराभावादिना तदभावसंभवादिति भावः ।।

बाधकान्तरमाह -- अपि चेति ।। सविकल्पकदशायां निर्विकल्पकसामग्र्येव नास्ति निर्विकल्पकाभावसहकृतेन्द्रियसंयोगादेरेव निर्विकल्पकसामग्रीत्वादेवं च नोक्तदोष इति भावेनाशङ्क्य निराह -- न च पूर्वेति ।।

१.इतः ' न च पूर्व' इत्यन्तं नास्ति. अत्र 'मपि इन्द्रिय सन्निकर्षरूप' इत्यस्ति -छ-ग. २.मपीन्द्रियसन्निकर्षरूपनिर्वि -क-मु-रा.

निर्विकल्पके बाधकम्) निर्विकल्पकवादः पु - ५०१.

न त पूर्वनिर्विकल्पकमेवोत्तरनिर्विकल्पकप्रतिबन्धकम् । धारावाहिकसाक्षात्कारदर्शनेन त्वत्पक्षेपि प्रत्यक्षस्थले सिद्धेः सिद्ध्यन्तराप्रतिबन्धकत्वात् ।।
न च समूहालम्बन १ वत् सामग्र्या २ दार्थसमाजादेकं ज्ञानमस्तीति वाच्यम् । तद्विदिह फलाविरोधाभावात् । न हि संभवत्येवमेव ज्ञानमेकस्मिन्नेव घटे घटत्वप्रकारकं तद ३ प्रकारकं चेति ।।
अपि च दण्डपुरु ४ षोभयसन्निकर्षे सति दण्डदण्डत्वोभयनिर्विकल्पकानन्तरं दण्डे दण्डत्ववैशिष्ट्यज्ञानात्पूर्वं मुण्डितदण्डविशिष्ट ५ पुरुषधीः स्यात् ।

सामग्रीद्वयसत्वेप्यविरोधमाशङ्क्य निराह -- न च समूहेति ।। तत्तन्द्रियसन्निकर्षरूपानेकसामग्रीसत्वेपि अनेकगोचरमेकं ज्ञानं जायते न तु प्रतिबन्ध एवमस्त्विवत्यर्थः । विरोधं व्यनक्ति -- न हीति ।।
ननु स्मृतिसामग्रीतोनुभवसामग्र्या इवानुमितिसामग्रीतः प्रत्यक्षसमामग्र्या इव च निर्विकल्पकस्यैवोत्पत्तिरित्यस्त्विवत्यतो दोषान्तरमाह -- अपि चेति ।। मुत्पिण्डेति

।। दण्डत्वानुल्लेखिदण्डविशिष्टपुरुषधीरित्यर्थः ।

१.द्वय इत्यधिकम् -- क. २.दर्थ-च-छ. ३.दाकारकं चेति--च-छ. ४.षयोरिन्द्रियसन्नि-च-ग-मु. ५.पुरुषपदं न - च-ग-मु.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ५०२.

सामग्र्याः सत्वात् । न चेष्टापत्तिः । तादृशज्ञाननुभवात् ।।
न हि दण्डपुरुषसन्निकर्षानन्तरं दण्डे दण्डत्ववैशिष्ट्यज्ञानात्पूर्वं मुण्डितदण्डविशिष्टपुरुषज्ञानमनुभूयते । न चेदमपि
ज्ञानमतीन्द्रियम् । सविकल्पकत्वात् । मम तु इन्द्रियसन्निकर्षादादावेव विशिष्टवैशिष्ट्यज्ञानोत्पत्तेर्नायं प्रसङ्गः ।।
किञ्च दण्डपुरुषसन्निकर्षे १ तदुभयस्वरूपमात्रविषयकनिर्विकल्पकवत् सम्बन्धस्यापि सन्निकर्षे २ तत्स्वरूपमात्रविषयकं निर्विकल्पकमपि कस्मान्न स्यात्।

सामग्र्या इति ।।
विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहरुपविशिष्टज्ञानसामग्र्या इत्यर्थः।।
ननु मुण्डितदण्डज्ञानसामग्रीसम्पत्तिवद्दण्डे दण्डत्व ३ वैशिष्ट्यज्ञानसामग्र्यामपि सत्वात् । मुण्डितदण्डविशिष्टज्ञानोत्पत्तिवेलायां दण्डत्ववैशिष्ट्यमपि दण्डे भात्येवेतित्वन्मत ४ वन्न्यायमते ५ विशिष्टवैशिष्ट्यधीरस्त्वित्यत आह -- किञ्च दण्डपुरुषेति ।। सन्निकर्षेणेति ।। संयुक्तविशेषणतादिरूपेणेत्यर्थः ।।
ननु सम्बन्धभाने सन्निकर्षमात्रं न हेतुः । किं तु सम्बन्धिज्ञानमपीति चेत् न । सम्बन्धत्वेन सम्बन्धज्ञानस्य तथात्वेपि सम्बन्धस्वरूपज्ञाने

तदनपेक्षणात् । अन्यथा सम्बन्धितावच्छेदकसम्बन्धिज्ञानेनैव सम्बन्धज्ञानदर्शनात् । विशिष्टज्ञानेपि सम्बन्धस्याभानापातात् ।।

१.र्षेण-ग-मु. २.र्षेण-ग-मु. ३.विशिष्टज्ञानसामग्र्या -इ. ४.तं न्या-इ. ५.पि-इ.

निर्वि-कके-बाधकम्) निर्विकल्पकवादः पु - ५०३.

अपि चास्य निर्विकल्पकजतीयस्य ज्ञानकार्यं व्यावहारं संस्कारं इच्छादिकं च कदाप्यजनयतो न ज्ञानत्वं युक्तम् । नतरां चास्य स्वषये कदापि संशयाद्यविरोधिनो निश्चयत्वम् । नतमां चास्य स्वविषयसिद्धिमकुर्वतः प्रमात्वम्। न च निर्विकल्पकेन कस्यचिदपि वस्तुतः कदापि सिद्धिर्दृष्टा । न च १ प्रमाभ्रमविजातीयं ज्ञानमस्ति ।।
अपि चैवं निर्विकल्पकज्ञानं प्रत्यक्षविशेषवत् अनुमितिविशेषोपि स्यात् ।

अभ्युपेत्य वा दोषान्तरमाह -- अपि चास्येति ।। क्वचित्कार्याजननेपि निर्विकल्पकान्तरे ज्ञानकार्यबलात् निर्विकल्पकमात्रे ज्ञानत्वादिकमविरुद्धमित्यतोऽस्येत्यस्य विवरणं निर्विकल्पकजातीयस्येति ।। नतरांनतमां इति चाव्ययमतिशयार्थकम् ।।
सिद्धिमकुर्वत इत्येतद्व्यनक्ति -- न चेति ।। नन्वीश्वरज्ञानमिव निर्विकल्पकमपि प्रमाभ्रमविजातीयज्ञानमनित्य २ मित्यत आह -- न चेति ।। तथात्वे घटादिरपि कुतो न ज्ञानं स्यादिति भावः ।।
यदपि 'प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकं चे'ति मण्यादौ प्रत्यक्ष ३ त्वकथनं तदप्ययुक्तमित्याह -- अपि चैवमिति ।।
साक्षात्कारकार्यमकुर्वतोपि
प्रत्यक्षज्ञानविशेषत्वेनुमितिकार्यमकुर्वतोप्यनुमितिविशेषत्वं स्यादित्यर्थः ।।

१.भ्र-च -ग. २.मस्त्वित्य-मु. अनित्यपदमपि नास्ति. ३.द्वैविध्य- इ.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ५०४.

निर्विकल्पकाभावे तु ज्ञानत्वाश्रयो न सविकल्पकत्वावच्छिन्नभिन्नः ज्ञानत्वात् दण्डीति ज्ञानवत्, सविकल्पकत्वं १ ज्ञाननिष्ठात्यन्ताभावा २ प्रतियोगी सविकल्पकवृत्तित्वात् ज्ञानत्ववत्, ३ ज्ञानत्वात् अनुमितिवत्, अपरोक्षत्वं विशिष्टज्ञानत्वव्याप्यं ज्ञानविभाजकधर्मत्वात् परोक्षत्ववदित्यादिद्रष्टव्यम् ।।
एतदेवाभिप्रेत्योक्तं पद्धतौ 'द्रव्यादिविकल्पानां प्रथममेवोत्पत्तौ बाधकाभावेन ४ निर्विकल्पका ५ नुपपत्तेः'इति ।

प्रमाणविरुद्धं च निर्विकल्पकमिति भावेनाह -- निर्विकल्पकाभावे त्विति ।। इत्यादिद्रष्टव्यमित्युत्तरेणान्वयः । एतेन निर्विकल्पकाभावे मानाभावादेव निर्विकल्पसिद्धिरिति निरस्तम् । सविकल्पकस्यापि सविकल्पकान्तरभिन्नत्वाद्बाधनिरासाय सविकल्पकत्वावच्छिन्नभिन्नेति साध्योक्तिः ।यत्किंचित्सविकल्पकत्वे ६ व्यभिचारनिरासाय सकलेति सविकल्पकविशेषणम्।।
उक्तप्रमेयस्य बाधकाभावेनेत्येतदारूढतां व्यनक्ति-- यद्विशेषेत्यादिना ।।

१.न इत्यधिकम्-मु-रा. २.व-मु-रा. ३.'ज्ञानत्वाश्रयो' इत्यारभ्य नास्ति-छ-ग. ४.'न' इत्यधिकम्-च-ग-मु. ५.कोप-च-मु. ६.अव्यभिचाराय -मु-इ.

निर्वि-कके-बाधकम्) निर्विकल्पकवादः पु - ५०५.

यद्विशेषयोरित्यादिन्यायरूपस्या १ नुगकारणं विनानुगतकार्यानुत्पत्तिरूपस्य विशेषणस्य पूर्वमभाने विशिष्टज्ञाने प्रकारत्वानुपपत्तिरूपस्य सम्बन्धिज्ञानं विना सम्बन्धज्ञानानुपपत्यादिरूपस्य च विपक्षे बाधकस्योक्तरीत्याऽभावेनेत्यर्थः ।।
उपलक्षणं चैतत् । प्रत्युत निर्विकल्पकाङ्गीकार एवानुपलब्धिलिङ्गकघटाभावज्ञानानुपपत्तिरूपस्य,
निर्विकल्पकत्वप्रसङ्गरूपस्य,
मुण्डितदण्डविशिष्टपुरुषज्ञानप्रसङ्गरूपस्य, सम्बन्धांशेपि निर्विकल्पकप्रसङ्गादिरूपस्य, बाधकस्य च सद्भावेनेत्यपि २ ग्राह्यम् ।।
तस्मात्सर्वमपि ज्ञानं सविकल्पकमेव ।
तदेवं वर्णस्य गुणत्वे उक्तरीत्या ग्रहणासम्भवात् --

उपलक्षणं चैतदिति ।।
बाधकाभावेनेत्येतद्भाधकभावेनेत्यस्याप्युपलक्षणमित्यर्थः । तदेवं व्यनक्ति-- प्रत्युतेति ।। भङ्गद्वयार्थमुपसंहरति -- तस्मादिति ।।
प्रसक्तानुप्रसक्तप्रमेयोपपादनस्यादिवर्जितैरित्युक्तविशेषणसमर्थनं फलमिति दर्शयन् परिच्छेदार्थमुपसंहरति -- तदेवमिति ।। उक्तेति ।।

१.अनुगतेत्यारभ्य 'संबन्धि' इति पर्यन्यो ग्रन्थः नास्ति -ग. २.द्रष्टव्यम् - च-मु.

न्यायदीपयुततर्कताण्डवम् (प्र.परिच्छेदः पु - ५०६.

---

१ नित्यविभुद्रव्यात्मकवर्णसमुदायात्मकस्य वेदस्यापौरुषेयत्वं युक्तमिति ।।
निर्विकल्पके २ बाधकम् ।। ३२ ।।
इति श्रीमद्ब्रह्मण्यतीर्थ पूज्यपादानां शिष्येण

व्यासयतिना विरचिते तर्कताण्डवे
प्रथमः परिच्छेदः

समवायरूपप्रत्यासत्तिर्नेत्युक्तरीत्येत्यर्थः । ३ युक्तमिति । तथाचाम्नायैरादिवर्जितैरित्युक्तं साध्विति भावः ।।
निर्विकल्पकवादः ।। ३२ ।।
इति श्रीमत्सुधीन्द्रतीर्थपूज्यपादशिष्यराघवेन्द्रयतिकृते
तर्कताण्डवविवरणे न्यायदीपे प्रथमः परिच्छेदः
श्रीकृष्णार्पणमस्तु.

१.विभुद्रव्यरूप इत्यधिकम् - रा. २.प्रमाणभङ्गः - च. कबा - क ; निर्विकल्पकभङ्ग इत्यप्यस्ति - क. ३. उक्त - इ.

छ्छुद्धत्ड्ढण्ड्ढड्डुठ्ठ२
श्रीव्यासतीर्थरचितम्
तर्कताण्डवम्
श्रीराघवेन्द्रतीर्थकृतन्यायदीपाख्यव्याख्यासमलङ्कृतम्
द्वितीयं सम्पुटम्

प्रकरणसूचीपत्रम्

प्र. संख्या प्रकरणनाम पु. संख्या
१ आकाङ्क्षा १
२ आसत्तिः २४
३ योग्यता ३३

शक्तिवादः

४ लीलावत्याद्युक्तशक्त्यपलापप्रकारभङ्गः ४७
५ शक्तौ श्रुत्यादिनिरूपणम् ५२
६ शक्तावर्थापत्तिपञ्चकम् ५७
७ प्रतिबन्धकाभावस्य हेतुत्वे प्रकारचदुष्टयभङ्गः ७१
८ तृणारणिमणीनामेकशक्तिमत्वसाधनम् ८३
९ सहजशक्तिः ९०
१० आधेयशक्तिः ९७
११ तमसो द्रव्यत्वसमर्थनम् १०८
१२ पराभिमतेसुवर्णस्य योग्यानुपलब्धिबाधः १२६
१३ सुवर्णस्योदयनाद्यक्तार्थापत्तेः पञ्चधान्यथोप-
पत्तिसमर्थनम् १३२
१४ सुवर्णस्य तैजसत्वे मण्याद्युक्तप्रकारद्वयभङ्गः १४६
१५ सुवर्णस्य पार्थिवत्वसमर्थनम् १५६
१६ अन्विताभिधाने उदयनाद्युक्तबाधकदशकोद्धारः १७१
१७ अन्विताभिधाने युक्तिदशकम् १८६
प्र. संख्या प्रकरणनाम पु. संख्या
१९ व्यक्तिप्रतिबन्द्या दुष्परिहरत्वम् १९३
२० मण्याद्यभिमतगुब्जशक्तिभङ्गः २००
२१ भट्टाभिमताभिहितान्वयभङ्गः २०६
२२ अन्वयस्य लक्ष्यत्वभङ्गः २१६
२३ प्रभाकरोक्तपदशक्तभङ्गः २१८
२४ भट्टोक्तव्यक्तिलक्षणभङ्गः २२९
२५ भट्टोक्तव्यक्त्यापेक्षभङ्गः २३३
२६ नैयायिकोक्तपदशिक्तभङ्गः २३८
२७ स्वमते पदशक्तिनिर्णयः २४७

२८ संकेतसंबन्धभङ्गः २५५
जातिवादः
२९ अनुगतजात्यभावेपि शक्तिव्याप्त्यादिग्रहणसमर्थनम् २५९
३० स्वर्णघटत्वादिप्रतिबन्दी २९०
३१ अनुगतजातौ बाधकम् २९५
विधिवादः
३२ आप्ताभिप्रायस्य लिङ्गाद्यर्थत्वे बाधकम् ३०३
३३ उदयनोक्तवक्तृभिप्रायविधित्वभङ्गः ३१३
३४ बलवदनिष्टाननुबन्धित्वादिविशिष्टेष्टसाधनत्वस्य विधित्वभङ्गः ३२३
३५ कृतिसाध्यत्वादिविशिष्टेष्टसाधनत्वस्य विधित्वभङ्गः ३३९
३६ कार्यताज्ञानस्य प्रवर्तकत्वभङ्गः ३५०
३७ स्वमते श्येनाग्नीषोमीयवैषम्यम् ३७६
३८ नैयायिकोक्तश्येनाग्नीषोमीयवैषम्यभङ्गः ३८०
३९ सांख्याद्युक्तश्येनाग्नीषोमीयवैषम्यभङ्गः ३८७
४० प्राभाकरभट्टोक्तश्येनाग्नीषोमीयवैषम्यभङ्गः ३८९
विधिवादसमाप्तिः
तर्कताण्डवम्
--- ० -----
द्वितीयः परिच्छेदः

।।
श्रीमद्धनुमद्भीममध्वान्तरर्गतराणकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः।
।

।। ॐ ।।

अथाकाङ्क्षानिरूपणम् ।। १ ।।

यच्चेदमुच्यते वेदस्यापौरुषेयत्वे आप्तवाक्यत्वादिरूपस्य प्रमाणशब्दलक्षणस्याभावात् प्रामाण्यं न स्यादिति ।

-

न्यायदीपाख्या व्याख्या

अथाकाङ्क्षानिरूपणम् ।। १ ।।

यस्मिन्वेदस्य सर्वस्याप्याकाङ्क्षायोग्यतादयः ।
तं वन्दे परमानन्दमिन्दिरामन्दिरोरसम् ।।

ननु --- वेदापौरुषेयत्वसमर्थनं पूर्वपिरच्छेदे कृतमयुक्तम् । तथात्वे शब्दप्रमाणलक्षणाभावेन प्रमाणशब्दत्वानापत्तेः । एवं च 'आदिवर्जितैः, आदरेणाख्यात १ इत्युक्ते हरौ शक्तितात्पर्ये न युक्ते इति चोद्यमनूद्य निराह -- यच्चेति ।। आदिपदेन आप्तिपूर्वकशब्दत्वयथार्थवाक्यार्थज्ञानजन्यत्ववाक्यत्वादिग्रहः ।

१. तानन्तकल्यागुणयुक्ते - उ.

न्यायदीपयुततर्कताण्डवम् (द्वितीयपरिच्छेदः पु - २.

तन्न । पद्धतौ निर्दोषशब्दत्वं निर्दोषवाक्यत्वं वा आगमलक्षणमित्युक्तत्वात् ।।

अत्राद्यं निर्दोषः शब्द आगम इति प्रमाणलक्षणानुसारि । निष्प्रयोजनत्वादिदोषनिरासार्थमावश्यकेन निर्दोषत्वविशेषणेनैव निरभिधेये अनन्विते चाप्यतिव्याप्तिनिरासेन वाक्यग्रहणस्यानपेक्षितत्वात् ।।

प्रमाणभूतशब्दस्य यल्लक्षणं तस्येत्यर्थः । प्रामाण्यमिति ।। प्रभाजनकत्वमित्यर्थः । पूर्वं १ दूरे तस्य स्वतस्त्वसाधनमिति भावः ।। पद्धताविति ।। 'निर्दोषः शब्द आगम, निर्दोषं वाक्यमतिति वा २ 'पद्धतावित्यर्थः । द्वयोरप्युक्तिः तद्द्यतात्पर्यव्यक्त्यार्था । तथा च लक्षणान्तरसम्भवात् प्रामाण्यं वेदस्य युक्तमिति भावः । एतेन एवमागमलक्षणोक्तेरभिप्रायः स्फुटीकृतो भवति । द्वयोक्तेर्मूलम्भावं च व्यनक्ति - अत्रेति ।।
ननु -- कथं तर्हि अबोधकविपरीतबोधकरूपवाक्याभासेऽतिव्याप्तिनिरासः । पद्धतावेव 'आकाङ्क्षायोग्यतासन्निधिमन्तिपदानि वाक्यं'इत्युक्त्वा 'पदत्वेनानभिधेयत्वस्य आकाङ्क्षासन्निधिभ्यामन्वयाभावस्य निरास'इत्याद्युक्तेरित्यस्तद्द्वितीयलक्षणाभिप्रायमित्युपेत्य
'निरभिधेयत्वेनान्वयाभावेन वा अबोधकत्व'मित्यादि निर्दोषपदकृत्योक्तिपरपद्धत्युक्तिं हृदि कृत्वा तात्पर्यमाह -- निष्प्रयोजनत्वेति ।।

१.'दूरे' इति नास्ति - ऊ. २. वेतिप - उ.

आकां-नि-पणम्) आकाङ्क्षावादः पु - ३.
---------- ---------- ------
द्वितीयं तु 'आगमोऽदुष्टवाक्यं च'इति ब्रह्मतर्कानुसारि । १ अत्र वाक्यग्रहणं शिष्याणां पदवाक्यादिस्वरूपज्ञापनार्थम् ।।
अत एव पद्धतौ 'द्वितीयपक्षे विभक्त्यन्ता वर्णाः पदं, आकाङ्क्षायोग्ययासन्निधिमन्ति पदानि वा वाक्य'मित्यादिना पदादीनां लक्षणमुक्तम्।

ब्रह्मतर्केति ।। तत्वनिर्णयोक्तब्रह्मतर्केत्यर्थः । नन्वेवमुक्तदिशा शब्द इत्येव पूर्तौ वाक्यमिति व्यर्थमत आह -- अत्र वाक्येति । अस्मिन्पक्षे निर्दोषपदं पद्धत्युक्तवाक्यपदव्यावर्त्यान्यदोषव्यावृत्यर्थमिति भावः ।।
विभक्त्यन्ता इति ।। सुप्तिङ्रूपविभक्त्यन्ता इत्यर्थः । 'विभक्तश्च'इति सूत्रे सुप्तिङोरुभयोरपि विभक्तिसंज्ञोक्तेः । 'सुप्तिङन्तं पदं'इति पाणिनीय २ सूत्रादिति भावः । अत्र बहुत्वं प्रायिकत्वाभुप्रायम् । विभक्त्यन्तो वर्णः तादृशौ वर्णौ वा तादृशा वर्णा वेत्यर्थः । विभक्त्यन्तवर्णत्वं पदत्वमिति यावत् । विभक्त्यन्तत्वस्य वर्णत्वाव्यभिचारेऽपि ३ वर्णा इत्या ४ द्युक्तिः स्पष्टार्था । राजपुरुष इत्यादौ अनेकपदसमुदायस्य विभक्त्यन्तस्य पदत्वनिवृत्यर्थः वर्णा इत्युक्तिः । तदर्थस्तु विभक्तिः अन्त एव येषां ते विभक्त्यन्ता इति । राजपुरुष इत्यादौ तु मध्येऽपि विभक्तिर्लुप्ताऽस्तीत्येके । अन्ये तु तस्यापि पदत्वलाभायैव मुक्तिः । पदद्वयावयवविभक्तिद्वयात् समुदाय उत्पन्नविभक्तेरन्यत्वेन पदद्वयस्थ वर्णसमुदायस्यापि विभक्त्यन्तवर्णत्वादित्याहुः । वर्णान्यस्फोटनिरासाय वर्णोक्तिरित्यपरे ५ ।।
आकाङ्क्षेति ।। प्रयुज्यमानपदेष्वेवान्योन्याकाङ्क्षावन्ति पदानीत्यर्थः ।

१.तत्र - ज-क. २.निसू -उ. ३.वर्णान्यपदस्फोटनिरासाय - उ. ४.त्युक्तिः । राज - उ. ५.वर्णा इत्यादि नास्ति -उ.

न्यायदीपयुततर्कताण्डवम् (द्वि. परिच्छेदः पु - ४.
---------- ---------- -------
अत एव प्रमाणलक्षणटीकायां 'मूलस्थं शब्दपदं वाक्यपर'मित्युक्तम् ।।
ननु -- केयमाकाङ्क्षा ?
न तावदविनाभावः । घटमानयेत्यादावभावात् । न हि घट आनयनाविनाभूतः ।

तेन निराकाङ्क्षपदानि वाक्यमिति भाष्यटीका न विरोधः । स्वस्मिन्नेव पूर्णाकाङ्क्षावत्त्वेनान्यत्र निराकाङ्गक्षपदसंदर्भो वाक्यमिति चन्द्रिकायां तस्यार्थोक्तेः। पदानीति बहुत्वं प्रायिकाभिप्रायम् । अत्रापि पदशब्दप्रयोगकुत्यं पूर्वं १ वर्णपदकृत्यवत् पदान्यवाक्यस्फोटनिरासायेति बोध्यम् । २
प्रकृतिप्रत्ययसमभिव्याहारपदेऽतिव्याप्तिनिरासाय पदानीत्युक्तिः । पदादीनामित्यादिपदेन वाक्यस्याकङ्क्षासन्निध्यादेर्ग्रहः। अत एवेति ।। पदादिस्वरूपव्युत्पादनार्थत्वादेवेति ३ ब्रह्मतर्कसंवादार्थत्वादेवे ४ त्यर्थः । मूलेति ।। 'निर्दोषः शब्द आगमः'इति मूलस्थमित्यर्थः।
तत्र पद्धतौ ५ वाक्यलक्षणे प्रथमोद्दिष्टाकाङ्क्षास्वरूपं निरूपयितुं पूर्वपक्षमाह -- नन्विति ।। पदानां या आकङ्क्षा सेयं केत्यर्थः । अभावादिति ६ ।। कुतः परस्परव्यभिचारादिति भावेनाह -- न हीति ।। आनयनं वा घटाऽविनाभूतमित्यप्युपलक्ष्यते । एतेन कारकस्य क्रियाऽविनाभावः क्रियायाः कारकाऽविनाभावोस्तीति निरस्तम् । क्रियाविशेषकारकविशेषयोः तदाभावेन घटमानयेत्यनयोः निराकाङ्क्षताऽपत्तेरिति । मणौ ७ नीलं सरोजमित्यादौ व्यभिचारोक्तिस्त्वयुक्ता । तत्र तात्पर्यविषयोः नीलसरोजयोरविनाभावसत्वादिति भावः ।।

१.र्वत्र -उ. २.इयं-पङ्क्तिर्नास्ति-उ. ३.'वा'-उ. ४.ति वा-उ. ५.लक्षणवाक्ये-उ. ६. प्रतीकवन्नास्ति-ऊ. ७.सरोजं नीलं -उ.

आकां-नि-रूपणम्) आकाङ्क्षावादः पु - ५.
---------- ---------- --------

अहो विमलं जलं नद्याः कच्छे महिषश्चरतीत्यत्र जले साकाङ्क्षस्य नदीपदस्य नद्यविनाभूते कच्छे साकाङ्क्षत्वप्रसङ्गाच्च ।।
नाप्युदयनाद्युक्तरीत्या श्रोतरि तदुच्चारणजन्यसंसर्गावगमप्रागभाव आकङ्क्षा । अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र पुत्रे १ साकाङ्क्षस्य राजपदस्य तात्पर्यभ्रमेण पुरुषान्वयबोधे ततः प्राक्तदन्वयावगमप्रागभावस्य सत्वेनातिव्याप्तिः २ ।।

ननु -- पदार्थतावच्छेदकरूपेण क्रियाकारकभावेन विवक्षितोऽविनाभावः प्रकृतेप्यस्तीत्यत आह -- अहो विमलमिति ।। पूर्वत्रोक्तातिव्याप्तेर्निरासकं पक्षमाशङ्क्य निराह-- नापीति ।। श्रोतरि विद्यमान उक्तरूपप्रागभाव आकाङ्क्षेत्यर्थः । अत्र घटः कर्मत्वं आनयनं कृतिरिति वाक्याभासे घटमानयेत्येतत्समानार्थकेऽतिव्याप्तिनीरासाय
तदुच्चारणजन्येत्यवगमविशेषणम् । ३ वक्त्रपेक्षयाऽसंभववारणाय श्रोतरीत्येके । स्वरूपकथनं तदित्यन्ये ।।
अहो विवलमिति पूर्वोक्तवाक्ये च तात्पर्यवशात् कदाचित् ४ कच्छनद्योः संसर्गावकमेन तत्प्रागभावसत्वेऽपि तदुच्चारणे तात्पर्यवशात् जलान्वितनद्याः कच्छसंसर्गावगमो नेति न तत्प्रागभाव इति नातिव्याप्तिरिति भावः। इत्यत्रेत्युपलक्षणम् । पूर्ववाक्ये चेत्यपि ज्ञेयम् ।

१.ण सा -च. २. प्रसङ्गादित्यधिकं -ग. ३.प्तेः -ज-क-घ. ३.'अन्यत्र साकाङ्क्षत्ववारणाय' इत्यस्ति-उ. ४. जलान्वित नाद्याः सं-उ.

न्यायदीपयुततर्कताण्वम् (द्वि. परिच्छेदः पु - ६.
---------- ---------- ------
नापि तात्पर्यविषयीभूतसंसर्गावगमप्रागभाव आकाङ्क्षा । प्रागभावस्य कार्यमात्रहेतुत्वेन १ शाब्दासाधारण्यायोगात् । वक्ष्यते चैतत् ।।

यत्तु मणावुक्तम् -- '२ अभिधानपर्यवसानमाकाङ्क्षा । यस्य येन विना ३ स्वार्थान्वयान ४ नुभावकत्वं तस्य तदेवापर्यवसानम् । अन्याननुभावकत्वं च अन्वयानुभवप्रागभावः । अत एव जनितान्वयबोधं पदम ५ नाकाङ्क्षं तदा प्रागभावाभावात् ।

कस्य चित् तात्पर्यवशात् जलान्वयावगमेन नद्याः कच्छान्वयानवगमेऽपि प्रयोगान्तरे पुनरस्य कच्छान्वयतात्पर्यभ्रमेण तदन्वयानवगमसंभवात् ।।
तात्पर्यविषयेति ।। पुरुषान्वयबोधस्तु न तात्पर्यविषय इति न पूर्वोक्तदोष इति भावः । शब्दासाधारण्यायोगादित्युपलक्षणम् । संसर्गावगमान्तरप्रागभावस्य सत्वात् । जनितान्वयबोधस्यापरि वाक्यस्य साकाङ्क्षात्वापत्तिरित्यपि बोध्यम् ६ । वक्ष्यत इति ।। मण्युक्ताकाङ्क्षा ७ स्वरूपखण्डनप्रस्तावे 'किञ्च प्रागभावस्य'इत्यादिग्रन्थे ।। यत्तु मणाविति ।। शब्दखण्डे आकाङ्क्षावादसिद्धान्त इत्यर्थः ।।
ननु -- अभिधानमन्वयानुभवः तस्यार्थवसाननिष्पत्तिः इत्यर्थश्चेत्, कर्मत्वमित्यादावस्त्येवेत्यतोऽन्यमेवापर्यवसानशब्दार्थं मण्युक्तमाह -- यस्येति ।।
यस्य पदस्योपस्थितस्य यद्व्यतिरेकप्रयुक्तस्वार्थान्वयाननुभावकत्वं तस्य पदस्य तदननुभावकत्वमेवापर्यवसानं तेन च सह तदेवाकाङ्क्षेत्यर्थः ।।

१.शब्दा-ग-ज-घ. २.अन्वयेत्यधिकम्-ग. ३.'न' इत्यधिकम्-ग-ज-क. ४.नुभा -ग-ज-क. ५.मसा-च. ६.ध्येयम्-उ. ७.स्वरूपेति नास्ति-ऊ.

आकां-नि-पणम्) आकाङ्क्षावादः पु - ७.

अत एव स्वरूपयोग्यतात इयं भिन्ना । सा हि जनितफवेप्यस्ति । इयं तु फजननात् प्रागेव । न चाभावे तारतम्याभावेन

आकाङ्क्षायामुत्कटत्वानुत्कत्कटत्वरूपतारतम्यायोगः ।
ससंबन्धिकासंबन्धिकपदत्वादिनैव तदुपपत्तेः । ज्ञाता चेयं हेतुः । अन्यथा निराकाङ्क्षे तद्भ्रमादन्वयधीर्न स्यात् । न तु समभिव्याहृतपदार्थजिज्ञासा आकाङ्क्षा ।

१.च. इति नास्ति-उ. २.ससंबन्धिकेति । इत्यधिकम् -उ. ३.आकाङ्क्षा-भ्र-उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ८.

ज्ञाने इष्टसाधनत्वाज्ञानेन ज्ञानेच्छारहितस्यापि पुंसः शाब्दबोधदर्शनात् । किञ्च - अस्मिन् पक्षे आकाङ्क्षाज्ञानं हेतुर्न स्यात् । जिज्ञासाया अज्ञानेऽपि शाब्दबोध दर्शनात्'इति ।।
तदपि न । गौणलाक्षणिकयोरव्याप्तेः । न हि त्वत्पक्षे तयोरितरविरहप्रयुक्तमननुभावकत्वम् । किंतु स्वत एव । किञ्च घोषपदमेव गङ्गापदे २ न साकाङ्क्षं, गङ्गा ३ पदं तु न घोषपदे ४ नेति संभवति ।।
न चाननुभावकपदस्थानेऽज्ञापक ५ पदप्रक्षेपेऽव्याप्तिर्नेति युक्तम् ।

ज्ञानेच्छा हि जिज्ञासा । सा च ज्ञानविषयिणी ६ जायमानज्ञानस्य इष्टसाधनत्वे ७ सति भवति नान्यथा । तथा
च कदाचिच्छब्दज्ञाने
तदिष्टसाधनतावबोधबहीनस्यापि शाब्दबोधदर्शनेन व्यतिरेकव्यभिचात् नेयमाकाङ्क्षा शाब्दबोधहेतुरित्यर्थः ।।
गौणेति ।। सिंहश्चैत्रः गङ्गायां घोषः इत्यनयोरित्यर्थः । तत्र मणुकृन्मते सिंहगङ्गापदयोरननुभावकत्वं ८ व्यनक्ति -- नहि त्वत्पक्ष इति ।। यस्य

येनेत्यादिनोक्तार्थनिष्कर्षानुवाद इतरविरहेत्यादि । स्वत एवेति ।। स्वरूपेणायोग्यत्वप्रयुक्तत्वादेवेत्यर्थः । घटः कर्मत्वमित्यादौ यथा स्वरूपायोग्यत्वप्रयुक्तमेवाननुभावकत्वं, न पदान्तरविरहप्रयुक्तं तथेति ९ भावः । अलक्ष्यत्वान्नाव्याप्तिर्दोषायेत्याशङ्क्य निराह -- न चेति ।। अनुभवविरोधादिति भावः । अज्ञापकपदेति विच्छेदः ।।

१.धत् - ग. २.देसा-ग-ज. दसा-क. ३.दितु-ज. ४.दे इति-ग-ज-ग. ५.'पद' इति नास्ति-ग. ६.ज्ञा-ऊ. ७.त्वज्ञाने सति - उ. ८.त्वोपगमाद्येन विना यस्याननुभावकत्वमित्येतदस्त्येवेत्यतो व्यनक्ति इत्यस्ति - उ. ९. त्यर्थः - उ.

आकां-नि-पणम्) आकाङ्क्षावादः पु - ९.

इतरपदविरहेऽपि पदस्य स्मारकत्वेनाज्ञापकत्वस्येतरपदविरहाप्रयुक्तत्वात् । किंच प्रागभावस्य सर्वकार्यहेतुत्वेन १ शाब्दासाधारण्यं न स्यात् ।.
न च शाब्दनुभवेऽन्वयानुभवप्रागभावस्योत्तरपदविरहप्रयुक्तत्वेन हेतुत्वादशाधारण्यं , अत एव येन विनेति विशेषितमिति वाच्यम् । इतरपदानां सहकारित्वेन शाब्दबोधप्रागभावस्य तद्विरहप्रयुक्तत्वेऽपि घटादाविवि शाब्दानुभवेऽपि प्रागभावत्वेनैव हेतुत्वात् । अन्यथा घटप्रागभावोऽप घटे दण्डादिविरहप्रयुक्तत्वेन हेतुः स्यात् ।

न च पदस्य पदार्थस्मारकत्वेऽप्यन्वयाज्ञापकत्वमस्त्येव । तस्यैव लक्षणेऽभिमतत्वादिति युक्तम् । वक्ष्यमाणदिशाऽन्विताभिधानवादेऽन्वितस्वार्थस्मारकत्वस्यापि सत्वात् । परमतेऽपि २ जात्याकृत्यन्वितव्यक्तेरेव पदार्थत्वेन जात्याद्यन्वयस्मारकत्वाच्चेति तात्पर्यात् ।

ननु - यदुपस्थापितस्यार्थस्य यत्पदव्यतिरेकेण नानुभवविषयत्वं तस्य तत्साकाङ्क्षत्वमिति लक्षणार्थः । एवं च तीरादेरनुभविषयत्वं न घोषादिपदं विनेति लाक्षणिकदेरपि साकाङ्क्षत्वमिति पक्षधाद्युक्तेर्नाव्याप्तिरित्यतो दोषान्तरमाह -- किञ्चेति ।। तट्टीकाकारैरुक्तमाशङ्क्य निराह -- न च ३ शब्देत्यादिना ।। सहकारिकत्वेनेति ।। शाब्दबोधसहकारित्वेनेत्यर्थः ।।

१.श-ग-ज. २.अपि इति न -उ. ३.शा - उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १०.

न च शाब्दज्ञाने प्रागभावज्ञानं कारणमित्य १ साधारण्यम् । तज्ज्ञानस्य कारणत्वे
मानाभावात् । न हि शाब्दबोधात् प्राक् ममात्रान्वये ज्ञानं नेति ज्ञानमनुभवसिद्धम् । अन्यथा घटेऽपि प्रागभावो ज्ञातो हेतुः स्यात् ।।
अथ प्रागभावः प्रागभावत्वेन नाकाङ्क्षा, किंतु प्रागभावात्यन्ताभावसाधारण्येनेतरविरहप्रयुक्तान्वयानुभवाभावत्वेनेति असाधारण्यम् । घटादौ प्रागभावत्वेनैव हेतुत्वात् ।

प्रकारान्तरेण शब्दासाधारण्यं संसर्गावगमप्रागभावस्य शङ्कते -- अथेति ।। प्रागभावात्यन्ताभावेत्युपलक्षणम् । ध्वंसेत्यपि ध्येयम् । अत एवेतरविरहप्रयुक्तान्वयानुभवत्वेनेति हेतुतावच्छेदोक्तिः ।
अन्यथाऽन्वयानुभवानाद्यभावत्वेनेत्येव हेतुतावच्छेदकमुक्त्वा इतरविरहप्रयुक्तेत् न ब्रूयात् । तस्य ध्वंसदशायामतिव्याप्तिवारकत्वात् । अन्वयानुभवसंसर्गाभावत्वेन हेतुत्वविवक्षायामेवेतरविरहप्रयुक्तेति २ सार्थक्यात् । ध्वंसस्याहेतुत्वान्न ३ तत्साधारण्यं ४

चेदत्यन्ताभावसाधारण्यमपि न स्यात् । अत एव नाप्यन्वयबोधध्वंसदशायामित्यादि वक्ष्यतीति ध्येयम् ।.
यद्वोक्तोभयसाधारण ५ मेवास्तु अन्वयानुभवाभावत्वेनैव हेतुता ध्वंसेतिप्रसक्तेति तद्वारणायैवेतरेत्यादिविशेषणोक्तिः । घटादौ तु नैवमित्याह -- घटादाविति ।। तत्प्रागभावस्येति योज्यम् । अत एवेत्युक्तं व्यनक्ति-- तदेति ।।

१.स्यासा- ज. २.'पद' इत्यधिकम् -उ. ३.त्वेन त - उ. ४.'न' इत्यधिकम्
-उ. ५.ण्य- उ.

आकां-नि-पणम्) आकाङ्क्षावादः पु - ११.
---------- ---------- ----------
अत एवान्ययबोधदशायां नातिव्याप्तिः । तदा प्रागभावात्यन्ताभावयोरभावात् । नाप्यन्वयबोधध्वंसदशायाम् । तदा ध्वंसस्य सत्वेऽपि तस्येतरविरहाप्रयुक्तत्वादिति चेन्न ।
अत्यन्ताभावसाधारणेन रूपेम हेतुत्वे स्वात्यन्ताभावस्य स्वं प्रत्यहेतुत्वात् । शाब्दानुभवान्तराभावः शाब्दानुभावं प्रति, त्वन्मतेऽनुमित्यन्तराभावोऽनुमितिं प्रतीव प्रतिबन्धकाभावतया हेतुः स्यात् । प्रतिबन्धकाभावश्चाज्ञान एव हेतुः कार्यमात्रसाधारणश्चेति त्वदङ्गीकृतमाकाङ्क्षाज्ञानस्य हेतुत्वमसाधारण्यं च न स्यात् ।

ध्वंसदशायामिति ।। अतिव्याप्तिरित्यनुषङ्गः । अत्यन्ताभावसाधारण्येन हेतुत्वं किं स्वात्यन्ताभावसाधारण्येन विवक्षितं, उत शाब्दा १ नुभवान्तरात्यन्ताभावसाधारण्येनेति । आद्ये आह -- स्वात्यन्ताभावस्येति ।। अन्त्य आह -- शाब्दान्तरानुभवेति ।।

प्रतिबन्धकाभावतयेति ।। सिद्धसाधनता अनुमाने दोष इति सिद्धेरनुमितिप्रतिबन्धकत्वात्सिद्ध्यन्तराभावोऽनुमितौ यथा प्रतिबन्धकाभावतया हेतुः शाब्दानुभवस्यानपेक्षितत्वेनानुदयादनुभावान्तरमन्वयानुभवे प्रतिबन्धकमिति तदभावोऽपि प्रतिबन्धकाभावत्वेनैव हेतुः स्यादित्यर्थः । ततश्च किमित्यत आह -- प्रतिबन्धकाभावश्चेति ।। पूर्वमिति ।। सङ्केतस्मरणपदार्थोपस्थितिदशायां पदानामुपस्थित्यन्तरमित्यर्थः ।।

-

१. अनुभवपदं न - उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि. परिच्छेदः पु - १२.

---------- ---------- -------

किंच सकलपदोपस्थितिदशायां शाब्दबोधात्पूर्वं प्रागभावस्येतरविरहाप्रयुक्तत्वादव्याप्तिः । तस्मादाकाङ्क्षा दुर्निरूपेति । उच्येते ---

यस्य पदस्य यदन्वयाननुभावकत्वं समभिव्याहृतयत्पदगतयद्रूपविरहप्रयुक्तं तस्य पदस्य तस्मिन्नन्वये तेन पदेन सह तद्रूपमाकाङ्क्षा ।

-

पद्धतौ 'आकाङ्क्षा जिज्ञासा चेतनधर्मः । तद्विषयत्वात्पदार्थाः साकाङ्क्षाः १ । तत्प्रतिपादकत्वात्पदान्यपि 'इति ग्रन्थेन जिज्ञासाविषययीभूतपदार्थविषयप्रतिपत्तिजनकत्वं पदानां साकाङ्क्षत्वमिति यदुक्तं तत्र जनकत्वं न फलोपधानं, किंतु स्वरूपयोग्यतैवाभिमतेति भावेन तत्रोक्तं निष्कृष्याग्रे स्वाभिमताकाङ्क्षालक्षणं विवक्षुरादौ तावत्पौढ्या पद्धत्युक्तलक्षणाविनाभूतं लक्षणान्तरमाह -- यस्य पदस्येत्यादिना ।। पद्धतौ पदानीत्युक्तत्वात्पदस्येति बाहुल्याभिप्रायेणोक्तम् । यस्य शब्दस्येत्यर्थः । तेन प्रातिपदिकप्रत्ययोर्महावाक्यावान्तरवाक्यस्य च ग्रहः

। तदपि तदुपस्थितिपरम् । यत्पदेत्यत्रापि यच्छब्देत्यर्थः । यद्रूपेत्यत्र यद्रूपोपस्थितीत्यग्रे व्यक्तम् । तथाच च यस्य शब्दस्योपस्थितस्य यदन्वयाननुभवाकत्वं यश्चासावन्वयश्चेति विग्रहः । तस्मिन्नन्वये इत्यग्रे कथनात् । तादृशान्वयानभावकत्वाभावः । स च प्रागभावः उच्चारणतो वा अभिप्रायतो वा सहस्थितयत्पदस्थितयद्रूपोपस्थितिविरहप्रयुक्तो वा भवति तद्रूपं क्रियापदत्वकारकपदत्वैकविभक्तिकत्वादि २ कं तद्वत्वमित्यर्थः ।

-

१. क्षा इत्युच्यन्ते - उ. २.आदिपदं न - उ.

-

आकां-नि-पणम्) आकाङ्क्षावादः पु - १३.

--- --- ---

उपस्थितरशब्दस्याभिमतान्वयाननुभावकत्वप्रयोजकविरहप्रतियोगि १ ज्ञानविषयीभूतरूप २ वत्पदान्तरसमभिव्याहृतत्वं साकाङ्क्षत्वमिति यावत् । उपस्थितिशब्दस्याभिमतान्वयानुभावकत्वप्रयोजकत्वप्रयोजकरूपव ३ दुपस्थितशाब्दान्तरसमभिव्याहृतत्वं तेन साकाङ्क्षमित्यन्वयार्थः । तद्यथा घटमानयेत्यत्र यस्य घटशब्दस्य यदन्वलयाननुभावकत्वं समभिव्याहृतानयेति पदगतक्रियापदत्वविरहप्रयुक्तं घट ४ मानयनमित्यादौ तथा दर्शनात्, तथा च तस्य घटपदस्य तस्मिन्नानयानान्वये तेनानयनपदेन सह तद्रूपं क्रियापदत्वरूपमाकाङ्क्षा । तथाऽऽनयेति पदस्य घटान्वयाननुभावकत्वं घटपदगतकर्मकारकत्वविरहप्रयुक्तम् । घटः आन ५ येत्यादौ दर्शनात् । एवं च तस्यानयनपदस्य घटान्वये तेन घटपदेन सह कर्मकारकपदत्वमेवाकाङ्क्षेति ६ ध्येयम् । अत्र यस्य शब्दस्य समभिव्याहृतयच्छब्दविरहप्रयुक्तमननुभावकत्वमित्येवोक्तौ ७ असंभवः स्यात् । घटमानयनमित्यादौ सत्यपि पदान्तरे त्वयाऽननुभावकत्वसत्वेन तस्य पदान्तरविरहाप्रयुक्तत्वत् । यत्पदगतयद्रूपेत्युक्तम् । घटो

भवतीत्यत्रानुच्चारितेनापि समानविभक्तिकेन रक्त इति पदेन घटपदस्य निराकाङ्क्षतैवेति पक्षे घटे रागान्वयाननुभावकताप्रयोजकविरहप्रतियोगितावच्छेदकरूपस्य समानविभक्तिकत्वस्य सत्वादतिव्याप्तिनिरासाय समभिव्याहृतेत्युक्तिः । साकाङ्७ता तयोरप्यस्तीति मते तु यत्पदगतेत्याद्येव । समभिव्याहृतपदमनादेयमित्यग्रे व्यक्तम् । यदन्वय इत्युक्तिस्तु घटः कर्मत्वं आनयनं कृतिरिति वाक्ये क्रियाकर्मभावान्वये निराकाङ्क्षे भेदान्वये च साकाङ्क्षेऽतिव्याप्त्यव्याप्त्योर्निरासायेत्यग्रे व्यक्तम् ।।

-

१.तावच्छेदकान्वयविषयीभूत (कान्वयविषयीभूत) रूप - उ. २.दुपस्थित शब्दान्तर -उ. ३.उपस्थितेति नास्ति-उ. ४.टान-उ. ५.नेय-उ. ६.त्यादि - उ. ७.'किंचेत्यादिना मण्यभिहितपक्षोक्तदोषप्रसरात्' इति, ततः 'यत्पद' इत्यादि चास्ति -उ-नं.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १४.

---------- ---------- --------

तच्च रूपं क्रियाकारभावान्वये क्रियापदत्वादिकम् । संबन्धरूपान्वये षष्ठ्यन्तत्वादिकम् । अभेदान्वये समानविभक्तिकत्वम् । प्रकृतिप्रत्ययार्थयोरन्वये प्रकृतित्वादिकम् ।।

अत एव घटसमानयेत्यत्रानयेति क्रियापदं विना घटमिति द्वितीयान्तं कारकपदं क्रियाकर्मभावान्वयाननुभावकमिति क्रतियाकारकभावान्वये तेन साकाङ्क्षम् ।

-

कुत्र किंरूपमित्यतः तद्दर्शयति -- तच्चेति ।। आदिपदेन कारकपदत्वग्रहः । राज्ञः पुरुष इत्यादावाह --

संबन्धेति ।। प्रथमान्तत्वमादिपदार्थः । रक्तो घट इत्यादावाह -- अभेदेति ।। लक्षणवाक्ये तदग्रहणं शब्दपरमित्युपेत्याह - प्रकृतीति ।। घटमित्यादौ घटरूपप्रातिपदिकार्थद्वितीयाविभक्त्यर्थयोरन्वय इत्यर्थः । आदिपदेन द्वितीयत्वादिग्रहः । क्रियापदत्वादिकं तद्रूपमित्युक्तं तत्कथमित्यतः क्वचिद्व्यनक्ति -- अत एवेति ।। क्रियापदत्वादेरितरपद १ विरहप्रयुक्तान्वयाननुभावकताप्रयोजकत्वादेवेत्यर्थः । क्रियापदं विनेति ।। क्रियापदत्वाश्रयशब्दं विना आनयनमित्यादिपदप्रयोगेपीत्यर्थः । क्रियाकारकपभावेति ।। अभेदान्वये तु निराकाङ्क्षत्वात्तदनुभावकताप्रयोजकसमानविभक्तित्वाभावेऽपि नाव्याप्तिशङ्का । अत एव लक्षणे यदन्वयेत्युक्तमिति भावः ।।

-

१. विरहेति नास्ति -- उ.

-

आकां-नि-पणम्) आकाङ्क्षावादः पु - १५.

---------- ---------- ---------

।१ घटः कर्मत्वमानयनं कृतिरिष्टसाधनत्वमित्यादौ २ घटसमानयेत्यनेन सहैकार्थ्ये सत्यपि क्रियाकारकपदत्वाभावान्न तदन्वये घट इत्यादिपदं साकाङ्क्षम्

।। अभेदान्वये तु समानविभक्तिकत्वात्साकाङ्क्षम् । गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यत्र ३ भुक्तमित्यस्य क्रियापदस्यासन्नेनाप्यकारक ४ गिरिपदेन नाकाङ्क्षा । किंत्वानासन्नेनापि कार ५ केण देवदत्तेनेति पदेनैवाकाङ्क्षा ।।

-

नन्वथाप्युक्तवाक्यसमानार्थकवाक्यान्तरेऽव्याप्तिरेव । तत्रोक्तान्वयानुभवप्रयोजकक्रियापदत्वादेरभावादित्यत आह -- घट इति ।। आनयेत्यत्र लुप्तविधिप्रत्ययस्याख्यातत्वेन वाच्यार्थोक्तिः कृतिरिति

विधित्वेन वाच्यार्थोक्तिरि ६ष्टसाधनत्वमितीष्टसाधनत्वमेव विध्यर्थ इति विधिवादे लक्ष्यमाणत्वात् । न तदन्वय इति ।। तथा च ७ लक्ष्यत्वान्न दोष इति भावः ।।

यद्वा क्रियापदत्वादिकमभिमतान्वया ८

नुभावकताप्रयोजकमित्यन्वययेनोपपाद्य व्यतिरेकमुखेनोपपादयति -- घट इति ।। अन्वयान्तरे तु लक्ष्यत्वेऽपि प्रयोजकमप्यस्तीति नाव्याप्तिरित्याह -- अभेदेति ।। एतेन यदन्वय इत्युक्तेः कृत्यं विवृतं ध्येयम् । वाक्यान्तरेप्यतिव्याप्त्यव्याप्ती आशङ्क्य यत्रोक्तरूपप्रयोजकं तत्राकाङ्क्षासत्वेन लक्ष्यत्वम्, यत्र तन्नास्ति तत्राकाङ्क्षाऽपि नेत्यलक्ष्यत्वमतो न दोष इत्याह -- गिरिरिति ।। क्रियापदस्येति ।। क्रियावाचिसुबन्तपदस्येत्यर्थः ।

-

।१. अयं ग्रन्थो नास्ति - ग. २.'तु' इत्यधिकम्-क. ३.'तु' इत्यधिकम्-ग-ज-क. ४.णेन गिरि-ग. केण -ज-क. ५.णेन-ग. ६. 'इष्टसाधनत्वमिति' इति नास्ति -उ. ७.चा- उ. ८. ननु - उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १६.

---------- ---------- -------

अत्र च पदशब्देन शब्दमात्रं विपक्षतम् । तेन प्रकृतिप्रत्ययोरन्योन्यं वाक्ययोश्चान्योन्यमाकाङ्क्षायां नाव्याप्तिः । एवं पदशब्देन तदुपस्थितिरेव

विवक्षिता । तेन पदमात्रस्य स्वत एवान्वयाननुभावकत्वे १ नानुभावकत्वस्येतरविरहप्रयुक्तत्वादसंभव इति शङ्कानवाकाशः । द्वारमित्यत्र द्वारशब्दस्य पिधेहिशब्देन सह, विश्वजिता यजेतेत्यत्र यजेतेत्यस्य स्वर्गकामशब्देन सोच्चारणनिबन्धनसमभिव्याहाराभावेऽपि मौनिश्लोकादाविवाभिप्रायिकः समभिव्याहारोऽस्तीति नाव्याप्तिः । घटो

भवतीत्यत्र तु घटपदेन सह रक्त इति पदस्य समान विभक्तिकत्वेऽपि आभिप्रायकोऽपि समभिव्याहारो नास्तीति ना २ तिव्याप्तिः ।।

-

अत्र चेति । लक्षणवाक्य इत्यर्थः । अन्योन्यं वाक्ययोरिति ।। महावाक्यस्थयोरित्यर्थः । एतेन यत्पदेति पदशब्दोऽपि शब्दपरः । यद्रूपेत्यपि यद्रूपोपास्थितिपरमिति सूचितम् ।।
लौकिकवैदिकवाक्यान्तरेषु पदान्तरसमभिव्याहाररहितेषु साकाङ्क्षेष्वव्यप्तिमाशङ्क्य निराह -- द्वारमित्यत्रेति ।। स्वर्गकामेति ।। सः स्वर्गः सर्वान्प्रत्यविशिष्टत्वादिति चतुर्थाध्यायतृतीयपादीयसप्तमाधिकरणे विश्वजितेत्यादौ स्वर्गकामपदाध्याहारस्य सिद्धत्वादिति भावः । एवं ह्यतिव्याप्तित्याशङ्क्य निराह -- घट इति ।। समानेति ।। अभेदान्वयानुभावकताप्रयोजकरूपवत्वेऽपीत्यर्थः ।

-

१.त्वस्येतर -ग. २.नाव्याप्तिः -- ग.

-

आकां-नु-पणम्) आकाङ्क्षावादः पु - १७.

--- --- ---

यद्वा तत्र रक्तपदे १ नाकाङ्क्षाऽस्त्येव । नहि समभिव्याहारादाकाङ्क्षा । किं तु साकाङ्क्षाणां समभिव्याहारः । तत्रानाकाङ्क्षत्वव्यवहारस्तु रक्तान्वये तात्पर्याभावात् । भवनक्रियान्वयेन घटपद२ स्य रक्तपदे ३ इत्थिताकाङ्क्षा ४
ऽभावाच्च । घटस्य रक्ताभेदाप्रतीतिस्तु रक्तपदानुपस्थितेः । अस्मिंश्च पक्षे आकाङ्क्षालक्षणे समभिव्याहृतविशेषणमनपेक्षितमेव ।।
नन्वेवमितरपदविरहप्रयुक्ताननुभावकताप्रयोजकरूपवत्वात्मिका स्वरूपयोग्यता आकाङ्क्षेति पर्यवसितम् ।

-

एतेन समभिव्याहृतेति पदकृत्यं विवृतं ध्येयम् । समभिव्याहाराभावे कथमाकाङ्क्षेत्यत आह -- न हीति ।। तथात्वे द्वारमित्यादावाकाङ्क्षाऽभावप्रसङ्गादिति भावः । साकाङ्क्षाणामिति ।। अत एव द्वारमित्यादावध्याहार इति भावः । तत्रेति ।। रक्तपद इत्यर्थः । अन्वयेन अन्वितत्वेन । उत्थितेति ।। स्वारसिकेत्यर्थः । आकाङ्क्षारूपहेतौ सति कुतो नान्वयधीरत्यत आह -- पटस्येति ।। अस्मिंश्च पक्ष इति ।। रक्तपदेऽस्त्याकाङ्क्षेति पक्ष इत्यर्थः । तस्यापि लक्ष्यत्वेनातिव्याप्तेरभावात् । एवं द्वारमित्यादावव्याप्तिशङ्का नास्तीति भावः ।।

इतरपदविरहप्रयुक्तानुभवप्रागभाव आकाङ्क्षेति मण्युक्तलक्षणाभिमानी शङ्कते ।। नन्वेवमिति ।। पदान्तरस्य पदान्तरविरहप्रयुक्तानुभावकतायाः पदान्तरे क्रियापदत्वादिलक्षणप्रयोजकरूपं यत्तद्वत्वात्मिकेत्यर्थः ।

-

१.दे आ -ग. २.देप्या-ज-क. ३.दस्य -ज. ४.या अभा - ग-ज-क.

-

---------- ---------- -------

सा च जनितफलेऽप्यस्तीति तत्रातिव्याप्तिः स्यात् । प्रागभावपक्षे तु नायं दोष इति चेन्न । इष्टापत्तेः । जनितफलेऽनाकाङ्क्षत्वव्यवहारस्तु विरक्तं प्रति वाणिज्योपदेश इव श्रोतुरन्वयबोधान्तरस्यानपेक्षिकतत्वात् । न तु पदस्य निराकाङ्क्षत्वात् । न च लाक्षणिकादावव्याप्तिः । मन्मते लाक्षणिकगौणयोरप्यनुभावकत्वात् ।।

नन्वथापि स्वरूपयोग्यता कारणतैव, न तु कारणम् । तथाचाकाङ्क्षायाः शाब्दबोधहेतुत्वं न स्यादिति चेन्न । उक्ताकाङ्क्षाज्ञानस्यैव हेतुत्वेनेष्टापत्तेः

। अत एवोक्तयोग्यताज्ञानस्य शाब्दबोध एव हेतुत्वादेवासाधरण्यम् । न हि घटादौ कारणताज्ञानं हेतुः ।

-

जनितान्वयानुभवेऽपि वाक्येऽस्तिक्रियापदत्वादेस्तदाऽप्यनपायादिति भावः । अनपेक्षितत्वादिति ।। एतेन जनितान्वयबोधेनापि द्वितीयान्वयबोधजननापत्तेरिति रुचिदत्ताद्युक्तं निरस्तम् । अनपेक्षाया एव प्रतिबन्धकत्वात्,
अपेक्षायां त्विष्टापत्तरिति ।।
मणिकृन्मतेऽभिहितदोषो नात्रास्तीत्याह -- नचेति ।। मन्मत इति ।। तत्रोक्तदोषस्तु गौणलक्षणवृत्तिविचारो निरसिष्यत इति भावः । नन्वथापीति ।। जनितफलेतिव्याप्तेरदोषत्वेपीत्यर्थः । अत एवेत्येतव्व्यनक्ति-- उक्तयोग्यतेत्यादि ।। नहीति ।। येनासाधारण्यं न स्यादिति भावः ।।
यत्वाकाङ्क्षाज्ञानस्य हेतुत्वे जनितफलेऽपि वाक्ये परेणेतरविरहप्रयुक्ताननुभावकताप्रयोजकरूपवदिति शब्द उद्भावितेऽन्वयबोधापत्तिरिति । तन्न । प्राचीनान्वयबोधस्यैव प्रतिबन्धकत्वाच्छ्रोतुरनपेक्षितत्वाच्चेति ।।

-

आकां-नि-पणम्) आकाङ्क्षावादः पु - १९.

---------- ---------- --------

न च शाब्दबोधेपि १ तज्ज्ञानस्य हेतुत्वे मानाभावः । पदशक्तिग्रहरूपपव्युत्पत्तौ सत्यामपि क्रियापदं विना कारकपदं नान्वयबोधकमिति सानान्यज्ञानरूपवाक्यव्युत्पत्तिं विना वाक्यार्थ २ बोधाभावात् । अन्यथा वाक्यं वाक्यव्युत्पन्नस्याप्यन्वयबोधकं स्यात् ।।

नन्वेवं चेदयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र राजपदे पुत्रपुरुषपदगतरुपविरहप्रयुक्ततत्तन्वययाननुभावकत्वरूपाकाङ्क्षायाः सत्वादुभयान्वधीः स्यादिति चेन्न ।

-

मानाभाव इति ।। शक्तिस्मरणे सति तज्ज्ञानाभावेनान्वयबोधविलम्बाभावादिति शङ्कितुर्भावः । तदभावेऽस्यान्वयबोधविलम्ब इत्याह --- पदशक्तीति ।। उक्तं च जयदेवेनापि 'आकाङ्क्षाहेतुत्वेमानाभावेन तज्ज्ञानं कारण'मिति ।। एतेन 'न हि तस्यापि ज्ञानं हेतुरिति शक्यते वक्तुम् । तत्र मानाभावादिति'रुचिदत्तोक्तं निरस्तं ध्येयम् । वाक्याव्युत्पन्नस्येति ।। उक्तरूपवाक्यव्युत्पत्तिहीनस्यापीत्यर्थः।।

उक्तवक्षणस्य वाक्यान्तरेऽतिव्याप्तिमाशङ्क्यते -- नन्वेवमिति ।। इतरपदविरहप्रयुक्ताननुभावकताप्रयोजकरूपवत्वमाकाङ्क्षा चेदित्यर्थः। पुत्रपुरुषपदगतेति ।। प्रथमाविभक्त्यन्तत्वलक्षणधर्मेत्यर्थः । रूपशब्दो धर्मपर्यायः । उभयेति ।। नास्ति च पुरुषपदेनाकाङ्क्षा । अतस्तत्रोक्तलक्षणमतिव्याप्तमनिति भावः ।

-

१. तस्य -ज. २.ज्ञाना -ज.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - २०.

उभयत्रकाङ्क्षायाः सत्वेऽपि पुत्रान्वय एव तात्पर्यग्रहे १ पुरुषान्वयबोधाभावसंभवात् । उभयत्र तात्पर्यग्रहे चेष्टापत्तेः ।

अत एव तत्रावृत्तिः कल्प्यते । अहो विमलं जलं नद्याः कच्छे महिषाश्चरन्तीत्यत्र येन पुंसा नद्या इत्यादिकमेव श्रुतं तं प्रति नदीपदं जलपदाश्रवणेन कच्छ एव साकाङ्क्षम् ।।

नन्वेवमुदयनादिमते त्वदुक्तरूपग्रहविरहप्रयुक्तः शाब्दानुभवप्रागभाव आकाङ्क्षा । २ तन्मते तु प्रागभावप्रयोजकविरचहप्रतियोगिग्रहविषयीभूतं रूपमाकाङ्क्षा ।

-

लक्ष्यत्वमुपेत्य समाधिमाह -- उभयत्रेति ।। तात्पर्यग्रहस्य शाब्दबोधे हेतुत्वादन्यत्र तदभावादेवान्वयबोधाभावो न त्वाकाङ्क्षाविरहात् । येनातिव्याप्तिः स्यादिति भावः । आवृत्तिरिति ।। राजपदस्येत्यर्थः । कच्छ एवेति ।। एवं च जलस्याश्रयणेनानुपस्थितेस्तत्र षष्ठ्यन्तान्वयप्रयोजकोपस्थितिविषयरूपवत्वाभावात् । प्रथमान्तेनापि जलपदेन निराकाङ्क्षतैवेति न तत्राव्याप्तिर्दोषाय । उपस्थितौ तु तत्राकाङ्क्षासत्वेऽपि तात्पर्याग्रहादन्वयबोधाभावः । तत्रापि तात्पर्यग्रहे तूभय ३ त्रान्वयबोधो नदीपदावृत्तिश्च पूर्ववदिष्टैवेति भावः ।।
एवं सर्वत्र लक्ष्येऽलक्ष्ये च स्वोक्ताकाङ्क्षालक्षणस्य भावाभावानुपपद्येदानीं परोक्तलक्षणात्स्वोक्तलक्षणस्यातिशयं शङ्कापूर्वं व्यनक्ति -- नन्विति ।। प्रागभावेति ।। अन्वयानुभवप्रागभावे प्रयोजकूभूतो यो विरहः तत्प्रतियोगी यो ग्रहः ज्ञानं तद्विषयीभूतं रूपमित्यर्थः ।

-

१.हेण -ग-ज-क. २.त्व -ग-ज-क. ३.यान्व -उ.

-

आकां-नि-पणम्) आकाङ्क्षावादः पु - २१.

--- --- ---

ततः कोत्र विशेष इति चेदियानेव विशेषः । त्वन्मते आकाङ्क्षा क्षोतृगता स्यात्, प्रागभावज्ञानं शाब्दबोधजनकमित्यस्योक्तरीत्यादुर्घचत्वाच्छाब्दबोधं प्रत्याकाङ्क्षाज्ञानस्य हेतुत्वं न स्यात्, जनितफलवाक्यस्थपदे विरक्तं वाणिज्योपदेश इव साकाङ्क्षत्वे सत्यपि पुरुषस्यानपेक्षामात्रेण शब्दस्याकाङ्क्षाऽपलापश्च

स्यादिति दोषत्रयम् । मन्मते तु आकाङ्क्षा आसत्तिवच्छब्दगतैव, इदं चाकाङ्क्षालक्षणं टीकोक्तजिज्ञासाविषयप्रतिपादकत्वरूपलक्षणाविनाभूतम् ।।

-

यद्रूपविरहेति लक्षणवाक्ये यद्रूपविरहशब्देन यद्रूपोपस्थितिविरहस्याभिमतत्वादिति
भावः । श्रोत्रगतेति ।। अत एवोदयनलक्षणे श्रोत्ररीत्युक्तिरिति भावः । उक्तरीत्येति ।। तज्ज्ञानस्य कारणत्वे मानाभावादित्यादिनोक्तरीत्येत्यर्थः । आकाङ्क्षेति ।। शब्दगतैवेत्यन्वयः । सुघटमिति ।। प्रागुक्तवाक्यव्युत्पत्तिरूपप्रमाणाभावादिति भावः ।।
नन्विदं मूलग्रन्थे नोपलभ्यत इत्यत आह -- इदं चेति ।। टीकोक्तेति ।। टीकाकृता पद्धतावुक्तेत्यर्थः । प्रमाणलक्षणटीकायामुक्तेति वार्थः । तदुक्तेरपि पद्धत्युक्त्यै १ कार्थत्वात् ।।

-

१. क्तैकार्थ्यात् - नं.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - २२.

---------- ---------- -------

वस्तुतस्तु
यत्पदप्रयोज्यजिज्ञासाविषयत्वयोग्यज्ञानजनकत्वावच्छेदकरूपवत्वं यस्य सह तस्य तद्रूपमे १ वाकाङ्क्षा । भवति हि घटमानयेत्यत्र घटमिति कारकपदप्रयोज्या या जिज्ञासा तस्य विषयत्वयोग्यं यत्क्रियाज्ञानं तज्जनकं यदानयेति २ क्रियापदं तन्निष्ठजनकतावच्छेदकं क्रियापदत्वमाकाङ्क्षा ३ । इयं च जिज्ञानायोग्यताऽजिज्ञासितेप्यस्तीति नाव्याप्तिः ।।

-

ननु ४ लक्षणे यस्याननुभावकत्वं यद्रूपविरहप्रयुक्तमिति नञ्द्वयप्रवेशाद्गौरवम् । यस्यानुभावकत्वं यत्पदकयद्रूपप्रयुक्तमित्येवोक्तौ लाघवम् । किंचान्वयानुभवप्रागभावस्य विरहप्रयुक्तत्वं च दुर्वचम् । अनादेर्जन्यत्वायोगात् । तद्व्याप्यत्वस्यापि भिन्नाधिकरमतया दैशिकस्यायोगात् । कालिकस्य च संकेतास्मृतिदशायां सत्यपीतरपदेऽनुभवप्रागभावसंभवेन व्यभिचारात् । किंचैवं सति टीकाकृदुक्तलक्षणमसमञ्जसमित्यपि धीर्मन्दानां प्राप्नोतीत्यत आह -- वस्तुतस्त्विति । यत्पदप्रयोज्येति ।। यच्छब्दोपस्थितिजन्येत्यर्थः । पदेति शब्दपरं सत्तदुपस्थितिपरमिति प्रागेवोक्तत्वात् । अन्यथा ५ पूर्वोक्तदोषापत्तिः ।
जिज्ञासाज्ञानविषयकेच्छा । तद्विषयत्वयोग्यं ज्ञानं तज्जनकतावच्छेदं रूपं क्रियापदत्वादिकं पूर्वोक्तमेव ध्येयम् ।।
लक्षणार्थं विवृण्वन्नेव लक्ष्यनिष्ठतया दर्शयति -- भवति हीति ।। इयं चेति ।। इयं च जिज्ञासां प्रति योग्यता अजिज्ञासिते जनितफले जिज्ञासापूर्वभाविन्यपि वाक्य इत्यर्थः ।

-

१.एवकारो नास्ति-रा. २.आदि इत्यधिकम् -रा. ३. प्रसङ्गात् इत्यधिकम् - ग. ४.उक्त इत्यधिकम् - उ. ५. प्रागुक्त - उ.

-

आकां-नि-पणम्) आकाङ्क्षावादः पु - २३.

---------- ---------- --------

तस्मात्स्वरूपयोग्यतैवाकाङ्क्षा । अत एव पद्धता ‘वाकाङ्क्षा जिज्ञासा चेतनधर्मः । तद्विषयत्वात्पदार्थः साकाङ्क्षाः । तत्प्रतिपादकत्वात्पदानीत्यपीत्यत्र प्रतिपादकशब्देन जिज्ञानाविषय १ ज्ञानजनकतावच्छेदकरूपवत्वात्मिका

जिज्ञासितार्थप्रतिपादनयोग्यतैवाकाङ्क्षेत्युक्तम् । न तु फलोपाधानम् । अन्वयबोधात्प्रागाकाङ्क्षाभावप्रसङ्गात् ।।
प्रमाणलक्षणटीकायामपि पूर्वपदजनिताकाङ्क्षापूरक २ त्वमित्यत्र पूरकशब्देनास्मदुक्ता ३
जिज्ञासाविषयत्वयोग्यज्ञानजनकतावच्छेदकरूपवत्वात्मिका जिज्ञासा ४ पूरकतैवाकाङ्क्षेत्युक्तम् । भवति हि ५ जिज्ञासाविषय ६ ज्ञानजनको जिज्ञासापूरकः । इच्छाविषसाधकस्यैव लोके इच्छापूरकत्वेन व्यवहारात् ।।
यत्तु टीकायां विरक्तं प्रति वाणिज्योपदेशे नैराकाङ्क्ष्यमुक्तं,
-
तस्मा ७ दव्याप्तिशून्यत्वादित्यर्थः । न च स्वरूपयोग्यताया ८ आकाङ्क्षात्वे शाब्दबोधसाधारण्यं न स्यादिति शङ्क्यम् । उक्तरूपाकाङ्क्षाज्ञानस्यैव हेतुत्वादित्युपपादितत्वादिति भावः । अत एवेति ।। उक्तरूपस्वरूपयोग्यताया
आकाङ्क्षात्वादेवेत्यर्थः -- जिज्ञासाविषयज्ञानेति ।। इच्छाविषज्ञानेत्यर्थः । इच्छाविषयेति ।। इच्छाविषयोत्पादकस्यैवेत्यर्थः । टीकायामिति ।।
-
१.त्वयोग्यज्ञा-रा. २.कमि-नं. ३.क्तजि -रा.न. ४.पूरकपदं न -रा. ५.हि इति नास्ति -नं. ६.त्वज्ञा -रा. ७.तस्मादिति। व्याप्तिशू -नं. ८.याः नाकां - नं.
-
न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - २४.
---------- ---------- -------
तदन्वयबोधोपयोगि १ साकाङ्क्षत्वे सत्यपि श्रोतृरनपेक्षितत्वमात्रेण ।।
अत एव टीकायामन्वयबोधोपयोग्याकाङ्क्षाभावे गौरश्वः पुरुषो हस्तीत्यादिकमेवोदाहृतम् ।।

इत्याकाङ्क्षानि २ रूपणम् ।।

-

प्रमाणलक्षणटीकायामित्यर्थः ।।

इत्याकाङ्क्षानिरूपणम् ।।

-

अथासत्तिनिरूपणम् ।। २ ।।

ननु -- सन्निधानापरपर्यायासत्तिर्न तावन्मण्युक्तरीत्याऽव्यवधानेन पदार्थस्मृतिः ।

-

अथासत्तिनिरूपणम् ।। २ ।।

प्रमाणपद्धता 'वाकाङ्क्षायोग्यतासन्निधिमन्ति पदानि वाक्य'मित्युक्तेः सन्निधिनिरूपणमं विनासत्तिनिरूपणमयुक्तमित्यत आह -- सन्निधानापरर्यायेति ।। यद्यपि ३ साक्षादाकाङ्क्षायोग्यतेति निर्देशक्रमेण योग्यतैवाकाङ्क्षोक्त्यन्तरं निरूपणीया । तथाप्यासत्तिनिरूपणस्याल्पत्वात्सूचीकताहन्यायेनासत्तेः पूर्वमुक्तिरित्येके ।।

वस्तुतस्तु शाब्दप्रमाया ४ माकाङ्क्षासत्ती एव हेतू न पुनर्योग्यतापीति तयोरेव पूर्वमुक्तिर्युक्ता । अत एव पद्धतावासत्ति स्वरूपोक्त्यनन्तरमेव योग्यता ५ ।

-

१.गिनि सा -च.क. २.निरूपणपदं न -नं-ज-ग. ३.साक्षादिति नास्ति -उ. ४.णं- नं. ५.तोक्तिः -उ.

-

---------- ---------- --------

वाक्ये पदार्थस्मृतिरेव नेति वक्ष्यमाणत्वात् । अनासन्ने आसत्तिभ्रमेणान्वयबोधस्थले त्वत्पक्षे पदार्थोपस्थितेर्विशेषणज्ञानत्वेन शाब्दबोधहेतुत्वात् हेतोश्चाव्यवहितत्वनियमेनासत्तेरेव सत्वेनासत्तिभ्रमानुपपत्तेश्च ।

-

अतस्तत्क्रममनुसृत्यात्र निरूपणमिति । क्वचिदा २ काङ्क्षासन्निधियोग्यतावतां पदानां समूहो वाक्यमिति पद्धत्यनुरोधे पूर्वनिर्देशात्तथैवास्त्विति यथान्यस एव क्रमः।।

आसत्तिश्चाव्यवधानेनान्वयप्रतियोग्युपस्थितिः । सा च स्मृतिर्नानुभव इति मण्युक्तं निष्कृष्यानुवदति -- अव्यवधानेन पदार्थस्मृतिरिति ।। अन्वयविरोधिव्यवधानाभावेनेत्यर्थः । पदार्थेति ।। संकेतस्मरणवाक्यार्थबोधयोर्मध्ये पदार्थस्मृतिरेव नास्ति, कुतोऽव्यवाधानत्वं तस्या इत्यर्थः । वक्ष्यमाणत्वात् ।। अन्विताभिधा ३ नोक्तिवाद इत्यर्थः ।।

पक्षधराद्यूहितदोषमाह -- अनासन्नेति ।। सप्तम्यन्तानामासत्तेरेव सत्वेनेत्यन्वयः । आसत्तिभ्रमेणेति ।। अन्वयविरोधिव्यवधानेपि तदभावभ्रममेणेत्यर्थः ।

गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादौ व्यवहितपदोपेततया आसत्तिहीनवाक्ये पदानामव्यवहितत्वभ्रान्त्या पदार्थानामुपस्थितौ गिरिरग्निमान्देवदत्तेन भुक्तमित्यन्ववयबोधदर्शनात्तत्र स्थले पदार्थे स्मृतेर्व्यवहितत्वस्यावश्यकत्वात्तत्रातिव्याप्तिरिति भावः ।।

विशेषणज्ञानत्वेनेत्युपलक्षणम् । पदार्थस्मृतित्वेन हेतुत्वेप्येष दोषः सम एव ।

-

१.तोक्तिः -उ. २.त्तु आ -उ. ३.वादोक्तवाद - उ.

-

---------- ---------- --------

पदार्थस्मृतौ सत्यां स्मृति १ विषयकज्ञानविलम्बेन शाब्दबोधविलम्बादर्शनेनासत्तिज्ञानस्य हेतुत्वानुपपत्तेश्च । न चेयं स्वरूपसत्येव हेतुः । तद्भ्रमेण शाब्दभ्रमायोगात् ।।

किं च नानाविशेषणकैकविशेष्यकबोधस्थले विशेषणानामन्योन्यमन्वयायोग्यतया २ न्वितान्वयासंभवेन समूहालम्बना एकैव पदार्थस्मृतिर्वक्तव्या । तथाच तत्र वाक्ये किंचित्केनचिदासन्नमनासन्नं च केनचिदिति कथं विभागः ।।

-

असंभवं चास्य (स्ति) ३ लक्षणस्याह -- पदार्थस्मृताविति ।। न चे ४ यमिति ।। आसत्तिरित्यर्थः । अपसिद्धान्ते सत्यपि दोषान्तरमाह -- तद्भ्रमेणेति ।।

यत्वन्वयप्रतियोग्युपस्थितिरासत्तिरन्वयबोधाङ्गं, सा च स्वरूपसर्ता ५ भानाभावात् । अनुमितौ

पक्षसाध्यप्रत्यवत्तद्भ्रमेण शाब्दभ्रमोऽसिद्ध एव । तात्पर्यभ्रमेण योग्यताभ्रमेण वा तदुपपत्तेरिति तन्न । विशेषणज्ञानत्वेन हेतुत्वोक्तौ शाब्द ६ साधारण्याभावात्पदार्थस्मृतित्वेन हेतुत्वे च वाक्ये पदार्थस्मृतिरेव नेत्यसंभवदोषात् अतिव्याप्त्यसंभवावुक्त्वाऽव्याप्तिं चाह -- किंचेति ।। नानाविशेषणकेति ।। दण्डी कुण्डली चैत्र इत्यादौ चैत्रपदेन कुण्डली ७ पदमासन्न ८ दण्डीपदमनासन्नमिति विभागोस्ति । स न स्यात् ।

पदार्थस्मृतेरेवासत्तित्वे तावत्पदार्थगोचरैकस्मृतेरेव तत्र वाच्यत्वात्क्रमेणोपस्थितौ

हि पूर्वस्मृतिविशेषेणान्वयानन्तरं --

-

१.तेर्ज्ञा -रा. २.अन्वितपदं न -रा. ३.सत्ति-उ. ४.चैव -उ. ५. न तु ज्ञाता -उ. ६.ब्दासा -उ. ७.लिप -उ. ८. न्नमिति विभागोस्ति -उ.

-

आस-नि-पणम्) आसत्तिवादः पु - २७.

---------- --------- --------

किंच पद्ये कुलकादौ चातिव्यवहितत्वात्कथमासत्तिः । नाप्यव्यवहितपदोपस्थितिरासत्तिः । व्यवहितपदोपस्थितिकपद्यादावव्याप्तेः । उक्तरीत्यासत्तिज्ञानस्य हेतुत्वानुपपत्तेश्च ।।

नापि पदाव्यवधानमासत्तिः । अव्यवधानं हि पदे लिप्युच्चारणादिनिबन्धनमेव वाच्यम् ।

-

-- चरमं १ स्मृतिविशेषणान्वयः स्यात् । न चैवं युक्तम् । विशेषणविशिष्टे विशेषणान्तरान्वये विशेषणयोरप्यन्वयापत्या तदसंभवात् । विशेष्येणासन्नं स्वासन्नेन विशेषणेन स्वयमन्वितं सत्पश्चाद्विशेषे २ णान्वेतीत्यस्यापि विशेषणयोर ३ प्यन्वयायोगेनासंभवादित्यर्थः ।।

स्थलान्तरेप्यव्याप्तिमाह -- किंच पद्य इति --

'श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।
वसन्ददर्शा ४ वतरन्तमम्बरात्'..... ।।

इत्यादिश्लोके क्रियाकारकपदानामतिव्यवहितत्वात्तत्र त्वदुक्ताव्यवहितपदार्थस्मृतेरयोगात् ।।

'ततः सपत्नापनयस्मरणानुशय(नुदय)स्फरा । '

इत्यादि माघस्थेष्वष्टसु श्लोकेष्वतिव्यावहितत्वात्तत्रा ५ व्याप्तिरिति भावः

--

पक्षान्तराण्यपि निराह -- नाप्यव्यवहितेति ।। अव्यवहितपदानामुपस्थितिरित्यर्थः । सा किं स्वरूपसती हेतुरुत ज्ञाता ।

आद्य आह -- व्यवहितेति ।। अन्त्य आह -- उक्तरीत्येत ।। पदार्थस्मृतावित्यादिनोक्तरीत्येत्यर्थः ।

-

१.मस्मृ- उ. २.ष्येणान्वे -उ. ३.न्योन्यान्वय -उ. ४.र्शेत्यादिश्लेके -उ. ५.त्रातिव्या - नं.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - २८.

---------- ---------- -------

तथाच व्यवहितोच्चारिते लिखिते योजनयाप्यन्वयबोधो न स्यात् । व्यवधानस्य दृष्टत्वेन योजनयाप्यव्यवधानबोधानाभावाच्च ।।
नाप्यव्यवहितत्वेन पदतात्पर्यमासत्तिः । अतात्पर्यकशुकादिवाक्याव्याप्तेः । अव्यवहित २ तात्पर्यकं व्यवहितमुच्चारयतो वादिनोऽनासन्नाभिधानरूपार्थकनिग्रहानुपपत्तेच्च।

-

पदार्थस्मृतिपदस्थाने पदोपस्थितौ सत्यामिति ज्ञेयम् । लिप्युच्चारणादीत्यादिपदेन विरोधिपदानुच्चारणग्रहः । व्यवहितेति ।। गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादिपदावत्यर्थः -- लिप्यनुमितेति ।। यत्र लिपिगदृष्ट्या पदस्यानुमानं तादृशस्थल इत्यर्थः । तथाच तत्रा ३ व्याप्तिरिति भावः ।।
वस्तुतोऽव्यवहितत्वेन पदतात्पर्यमासत्तिरिति पर्यवसितेति पक्षधरनिर्धानितपक्षं निराह -- नाप्यव्यवहितत्वेनेति ।। व्यवहितपद्ये कुलकादौ च पदानां व्यवधानेनोच्चारणे लखनेपि चाव्यवहितत्वेन वक्तृतात्पर्यगोचरत्वात्तेषां तत्र नाति ४ व्याप्तिरिति भावः। शुकादीति ।। न च तत्राप्यस्तीश्वरतात्पर्यमिति वाच्यम् । तथासत्यासत्तिभ्रमस्थले तदादायासत्तिसत्वसंभवे तद्भ्रमानुपपत्तेः । दोषान्तरं चाह -- अव्यवहितेति ।। अपार्थक ५ मिति ।।

अनान्वितवाचकपदादिप्रयोगोऽपार्थकमित्यपार्थकनिग्रहस्थानलक्षणादिति भावः ।।

-

१.तत्रेति नास्ति -रा. अग्रे अभावपदं न - ग. २.पदेत्यधिकम् -रा. ३.त्रातिव्या -नं. ४.नाव्या -उ. ५. केति -उ.

-

आस-नि-पणम्) आसत्तिवादः पु- २९.

---------- ---------- ------

गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यनासन्नोदाहरणेऽतिव्याप्तेश्च । तत्राप्यव्यवहिततात्पर्यकत्वसंभवात् । तस्मादासत्तिर्दुर्निरूपेति ।।

उच्यते --

पदोपस्थित्यनुकूलवक्तृव्यापारे निष्फलस्यान्वयबोधविरोधिव्यवधानस्याभाव आसत्तिः ।

-

ननु - सर्वथैवानन्विता १ वाचक २ पदप्रयोगोऽपार्थकम् । कुण्डमजाजिनं दशदाडिमानि षडपूपा इत्यादौ योजनयाप्यन्वयहिनस्थले एव तत् । न तु योजनयाप्यन्वयस्थलेपीति चेत् । तत्राप्यस्तीत्यादिपदान्तरतात्पर्यकत्वसंभवात् । दोषान्तरं चाह -- गिरिरिति ।।

यदप्यव्यवहितपदार्थोपस्थित्यनुकूलो व्यापार आसत्तिः, स चैकपदानन्तरमपर ३ पदे तात्पर्यमुच्चारणं वेति पक्षधनाभिमतं पक्षान्तरं तदप्यनेनैव निरस्तम् । शुकादिवाक्यादावव्यप्तेः । गिरिरित्यादिवाक्येऽतिव्याप्तेः । वाक्ये पदार्थोपस्थितेरेवाभावस्य वक्ष्यमाणत्वादिति भावेनोपसंहरति -- तस्मादिति ।।

सन्निधिरविलम्बेनोच्चारितमिति पद्धत्याद्युक्तं हृदि कृत्वाह -- पदेति ।। पदग्रहणं शब्दमात्रपरम् । तेन प्रकृतिप्रत्यययोरवान्तरवाक्ययोश्चासत्तौ

नाव्याप्तिः । पदयोः पदानां ४ चोपस्थितेरनुकूलो यो व्यापारः लिपिः उच्चारणं तात्पर्यं वा तस्मिन्नित्यर्थः । निष्फलान्वयबोधविरोधव्यावधानशून्यः
शब्दोपस्थित्यनुकूलवक्तृव्यापारविषयतासत्तिरित्यर्थः। उच्चारणमात्रं वक्तृव्यापारश्चेन्मौनिश्लोकादावव्याप्तिरित्यत आह - वक्तृति ।।

-

तवाक -उ. २.पदेति नास्ति- उ. ३. अपरपदं न -नं. ४. वोप -उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ३०.

---------- ---------- -------

वक्तृव्यापारत्वं च लिप्युच्चारणाभिप्रायसाधारणमिति न मौनिश्लोकादाव्याप्तिः ।।
न च गिरिर्भुक्त १ मित्यनयोर्मध्ये विरोध्युपस्थित्यभावादे २ तयोरासत्तिः स्यादिति वाच्यम् । इष्टापत्तेः । अन्वयबोधस्त्वाकाङ्क्षाविरहात् ।।
नापि पद्यकुलकादावव्याप्तिः । तत्रापि मया छन्दोनुरोधायालङ्काररसविशेषयोराधानाय च व्यवधाने कृतेपि श्रोत्रैवं योजयिष्यतीत्यभिप्रायस्य सत्वात् । अपौरुषेयेपि वेदेऽस्माकमुक्त ३ ईश्वराभिप्रायोस्त्येव ।

-

लिपिसने ४ विशिष्टस्यापि लक्षणस्यातिव्याप्तिमाशङ्क्य लक्ष्यत्वोपगमेन समाधिमाह -- न च गिरिरिति ।। तथात्वे स्यादन्वयबोध इत्यत आह -- अन्वयाबोधस्त्विति ।। निष्फलस्येति विशेषणमप्याप्तिनिरासायेति भावेनाह

-- नापि पद्येति ।। छन्द इति ।। वागर्थामिव संपृक्तौ पार्वतीपरमेश्वरौ वन्द इत्युक्ते ५ नुष्टप्ससंज्ञकछन्दोभ ६ ज्येतातो व्यवधानम् ।

एवमन्यत्रापि ।। अलङ्कारेति ।। कुलकालङ्कारेत्यर्थः । रसेति ।। श्रुङ्गारविरकरुणादिरसेषु मध्ये श्रुङ्गारादिरसविशेषलाभायेत्यर्थः । तथाच तत्र निष्फलव्यवधानाभावा ७ न्नाव्याप्तिरिति भावः ।।
वेदवाक्येऽव्याप्तिस्तर्हि स्यादिति आह -- अपौरुषेयेति ।। उक्त इति ।। श्रोतैवं योजयिष्यतीत्येवंरूपाभिप्रायोऽस्माकं मते अस्त्येवेत्यर्थः । सेश्वरवादित्वादिति भावः ।।

-

१.अग्निमनित्यधिकम् -रा. २.वत- रा. ३.रीत्येत्यधिकम् -ज. ४.नवि - उ. ५.नपुंसकछं -नं. ६.ङ्गेना -नं. ७. वसत्वान्ना -उ.

-

आस-नि-पणम्) आसत्तिवादः पु - ३१.

---------- ---------- ----------

मीमांसकानामप्यनादौ संसारेऽर्थाभिज्ञाध्यापकस्योक्ता १ भिप्रायोस्त्वेव । व्यवधानस्य त्वदृष्टविशेषः फलम् ।।
नाप्यनासन्नोदाहरणेऽतिव्याप्तिः । तत्र व्यवधानस्य निष्फलत्वात् । अत एवा २ व्यवहिततात्पर्यके वादिवाक्ये नातिव्याप्तिः । श्रुतस्य व्यवहितत्वात् । आभिप्रायकस्य च वादिनोऽनाप्तत्वेनाभिप्रायकल्पनाविरहादेवानुपस्थितेः ।।
केचित्तु -- श्लोककुलकादावासत्यभावान्न श्लोकादिकं बोधकम् । किंतु तदुन्नीतं वाक्या ३ दिकमेवेत्याहुः ।।

-

ननु वेदेऽलङ्कारविशेषसविशेषयोरा ४ धानाभावात् --
'सप्तार्घगर्भाभुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि'।
इत्यादौ निष्फलमेव व्यवधानमि ५ ति तत्राव्याप्तिरित्यत आह -- व्यवधानस्य त्विति ।। अनादितो व्यवधानेनैव सन्निविशितपा ६ दावल्या

तथैवाध्यापनजपाद्यनुष्ठानेऽदृष्टमन्यथा नार्थ इति शुभाशुभप्राप्तिपरिहाररूपादृष्टमेव फलमित्यर्थः । निष्फलस्येत्युक्त्या गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादावतिव्याप्तिश्च निरस्तेत्यत आह -- नाप्यनासन्नेति ।। अव्यवहिततात्पर्यकमित्यादिनोक्तदोषः स्वपक्षे नेत्याह -- अत एवेति ।। तमेव हेतुं व्यनक्ति -- श्रुतस्येति ।। केचित्विति ।। कल्पनागौरवममस्मिन्पक्षे ७ अस्वारस्य बीजं ध्येयम् ।

-

१.क्तोभि -ग. २.वव्य -रा-क. ३.न्तरमेवे -रा.ज-क. ४.राभा-नं. ५. मस्ती-उ. ६. पदा -उ. ७. क्षे बीजं बोध्यम् -नं.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ३२.

---------- ---------- -------

इयं चासत्तिर्ज्ञातैव शाब्दधीहेतुः । आसत्तिभ्रमेण शाब्द १ भ्रमात् । नीलो घटोस्तीत्यादौ
नीलघटपदयोर्मध्येऽनुषङ्गपदान्तरोच्चारणावृत्यध्याहारादिसंदेहे निश्चये वा वाक्यार्थाबोधाच्च ।।
पद्धतौ प्रमाणलक्षणटीकायां च सन्निधिरविलम्बेनोच्चारितत्वमित्यत्राविलम्बशब्देनास्मदुक्तव्यवधानाभावः उच्चारणशब्देन च वक्तृव्यापारमात्रं विवक्षितमिति ज्ञेयम् ।।
इत्यासत्ति २ निरूपणम् .

-

आसत्तिभ्रमेण ३ शब्दभ्रमे विप्रतिपन्नं प्रत्याह -- नील इति ।। अनुषङ्गश्च पदान्तरोच्चारणं
चावृत्तिश्चाध्याहारश्चेत्येवमादिसन्देहे नीलघटपदार्थान्वयबोधाभावेन स्वरूपसदासत्या न हेतुत्वं किंतु ज्ञाताया एव । अन्यथा

तादृशस्थलेप्यन्वयबोधः स्यादेव । स्वरूपसत्यास्तस्यास्तत्र सत्वादित्यर्थः।।
एतेनासत्तिः स्वरूपसती हेतुः । न तु ज्ञाता । मानाभावादिति रुचिदत्ते ४ नोक्तं निरस्तम् । आवृत्तिरस्तिपदस्य । नीलोस्ति घटोस्तीति नीलो भवति घटोस्ती ५ ति क्रियान्तराध्याहार इत्यादि ध्येयम् ।।
उक्तलक्षणं मूलरूढं दर्शयति -- पद्धताविति ।। अस्मदुक्तेति ।। निष्फलस्येत्यादिनास्मदुक्तेत्यर्थः -- वक्तृव्यापारमात्रमिति ।। लिप्युच्चारणाभिप्रायसाधारणमित्यर्थः ।।
इति आसत्तिनिरूपणम्.

-
१. धी इत्यधिकम् -नं. २.निरूपणमिति नास्ति - च.ज-का.रा. ३.शा -उ. ४.त्तोक्तम् -उ. ५.भवती -उ.
-
योग्य-नि-पणम्) योग्यतावादः पु - ३३.
---------- ---------- -------
अथ योग्यतानिरूणम् ।। ३ ।।

अथ का योग्यता --
न तावत्सजातीयेऽन्वयदर्शनं १ योग्यता । पयसा सिञ्चतीत्यनाप्तवाक्येऽतिव्याप्तिः । किंच यथाकथंचित्साजात्यमयोग्यसाधारणम् । पदार्थतावच्छेदकधर्मेण वा तात्पर्यविषयीभूतान्वयप्रतियोगितावच्छेदकधर्मेण वा साजात्यं तु अद्य जातः पयः पिबतीत्यादावव्याप्तम् ।।
नापि समभिव्याहृतपदार्थसंसर्गाभावव्याप्यधर्मशून्यत्वं योग्यता ।

-

अथ योग्यतानिरूपणम् ।। ३ ।।

'प्रतियोगान्वयस्य प्रमाणविरोधाभावो योग्यते'ति प्रमाणपद्धत्युक्तिं समर्थयमानः प्रसक्तपक्षान्पूर्ववादिमुखेन प्रत्याख्याति -- अथेत्यादिना ।। सजातीय इति ।। दृष्टान्वयसजातीयत्वं योग्यतेत्यर्थः । मण्युक्तमपि दोषमाह -- किंचेति ।। अयोग्यतेति ।। अग्निना सिञ्चेदित्यादावपि शब्दार्थत्वादिना साजात्य २ स्य सत्वादिति भावः । मणिव्याख्यातृभिरुक्तमाह -- तात्पर्यविषयेति ।। अद्य जात इति ।। अद्य जातत्वेन रूपेण तदन्वयस्येतः पूर्वं क्वाप्यदर्शनादिति भावः । समभिव्याहृतेति ।। समभिव्याहृतेति ।। समभिव्याहृतं यत्पदं तदर्थनिरूपितसंसर्गस्य योऽभावस्तव्द्याप्यधर्मशून्यत्वम् । यथा जलेन सिञ्चतीत्यादौ समभिव्याहृसेकरूपपपदार्थसंसर्गाभावव्याप्यो धर्मोऽग्नित्वादिः, --

-१.योग्यतापदं न -रा.ग. २.त्यस - उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ३४.

प्रमेयमभिधेयमित्यादौ संसर्गाभावस्याप्रसिद्ध्य न्याय १ मते तत्राव्याप्तेः । समभिव्याहृतपदार्थसंसर्गो योग्यतेत्येतावतैव पूर्णत्वेन शेषवैयर्थ्याच्च । अनाप्तवाक्येऽतिव्याप्तेश्च ।।

एतेनैव समभिव्याहृतपदार्थसंसर्गव्याप्यधर्मवत्वं वा, अन्वयप्रतियोगितावच्छेदक २ धर्मवत्वं वा योग्यतेति ३ निरस्तम् । उक्तरीत्या शेषवैयर्थ्यात् । अनाप्तवाक्येऽतिव्याप्तेश्च ।।

-

तथा समभिव्याहृतजलपदार्थसंसर्गाभावव्याप्यो दाहृत्वादिस्तादृशधर्मशून्यत्वमस्ति । अग्निना सिञ्चतीति जलेन दहतीत्यादौ तु तादृशधर्मवत्वादयोग्यतेत्यर्थः ।।

सिद्धान्ते धर्ममात्रस्य व्यतिरेकित्वाद्घटनिष्ठप्रमेयत्वादेः । पटे तन्निष्ठप्रमेयत्वादेर्घटेऽसत्वेन प्रमेयत्वादिसंसर्गाभावस्यापि प्रसिद्धत्वा ४ दाह -- न्यायमत इति ।। तन्मते तस्य केवलान्वययित्वादिति भावः । सिद्धान्ते तु कथमित्यतो दोषान्तरमाह -- समभिव्याहृतेति ।। अनाप्तेति ।। पयसा सिञ्चतीत्याद्यनाप्तवाक्य इत्यर्थः । क्रमेण पक्षद्वये दोषमाह -- उक्तरीत्येति ।। समभिव्याहृतपदार्थसंसर्ग इत्येव पूर्तेरिति भावः ।।

एकेति पदस्य वा पदार्थस्य वा विशेषणम् । अपरेत्यप्येवं बोध्यम् । तन्निरूपितसंसर्गेऽपरपदार्थनिष्ठात्यान्ताभावं प्रति यत्प्रतियोगित्वं तत्प्रकारिका या प्रमा तद्विशेष्यत्वाभाव इत्यर्थः । अग्निना सिञ्चतीत्यादावग्निकरणा ५ न्वयः सेके नास्तीति वा, अग्निकरणा ६ न्वयः सेकनिष्ठात्यान्ताभावप्रतियोगीति वाऽनुभवेन तद्वाक्यं त्वयोग्यम् ।

-

१.नये -ज-क. २. रूपवत्वं वा -रा-ग. ३. अपि इत्यधिकम् -रा. ४. दित्यत

-नं. ५ णका -उ. ६.णका -उ.

-

योग्य-नि-पणम्) योग्यतावादः पु - ३५.

--- --- ---

नापि मण्युक्तरीत्या एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यान्ताभावप्रतियोगित्वुप्रमाविशेष्यत्वाभावो वा, --

-

पयसा सिञ्चतीत्यादौ तु पयःकरणत्वं सेके नास्तीत्यादिप्रतीतेः कदाप्यभावेन तत्र पयःपदार्थसंसर्गे सेकनिष्ठाभावप्रतियोगि १ त्वप्रकारप्रमाविशेष्यत्वं नेति तद्योग्यमित्युच्यते । अत्र शब्दत्ववदाकाशस्य शब्दनिष्ठात्यन्ताभावप्रतियोगित्वात्तत्राव्याप्तिनिरासाय संसर्गेति ।। तादृशप्रमाविषयकत्वाभाव इत्येवोक्तौ घटसंसर्गत्वं गेहनिष्ठात्यन्ताभावप्रतियोगीति प्रमाविषयो घटसंसर्गोपि भवतीति तत्राव्याप्तिः स्यात् । तन्निरासाय तादृशप्रमाविशेष्यत्वाभाव इत्युक्तिरिति पक्षधरः ।।

रुचिदत्तस्तु यत्पदार्थसंसर्गो बोध्यः तदंशे तादृशप्रमावि २ शेष्यत्वाभावो विवक्षितः । तेन सेकसंसर्ग आकाशश्च जलनिष्ठात्यान्ताभावप्रतियोगीति समूहालम्बनकृतप्रमविशेष्यत्वकृतदोषोऽपास्तः । एवं चांशभेदप्रप्तये विशेष्यतोक्तिः ३ । विषयमात्रे तात्पर्यमित्यवोचत् ।।

यन्मते तादृशप्रमात्वपरिग्रहः प्रतिबन्धकस्तन्मतेनैतल्लक्षणकरणात्तादृशाभावप्रतियोगिताभाव इत्येवानुक्त्वा तादृशप्रमाविशेष्यत्वाभाव इत्युक्तमिति रुचिदत्तः ।।

नरहरिस्तु प्रमेत्याद्यनुक्त्वा तादृशप्रतियोगित्वाभावो योग्यतेत्येवोक्तौ योग्यताया वाक्यार्थमात्रपर्यवसन्नतया तद्बोधकवाक्यार्थबोधात्पूर्वं न ४ भवतीति शाब्दबोधे योग्यताज्ञानस्याहेतुत्वापत्तेः तादृशप्रमाविशेष्यत्वाभाव इत्युक्तमित्याह ।।

-

१.कत्व- उ. २.षयत्वा -उ. ३.क्तेर्विष- उ. ४.र्वं संभवतीति - उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि. परिच्छेदः पु - ३६.

एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं वा योग्यता । एकत्वापरत्वयोः पदार्थविशेषणत्वे १ प्रमेयत्वे

प्रमेयत्वमित्यादावव्याप्तेः । तत्र पदार्थभेदाभावात् । पदविशेषणत्वे च प्रत्ययार्थान्वितस्वार्थबोधकं गामित्यादिकमयोग्यं स्यात् । तत्र पदर्यैकत्वात् । २ पदशब्दस्य शब्दमात्रपरत्वेपि ३ स्वार्थीभूतवर्तमानत्वान्वितकृत्यादिबोधको --

-

यन्मतेऽप्रमाण्यशङ्काशून्यविपरीतनिश्चयस्य प्रतिबन्धकत्वं तन्मतेनोक्तं लक्षणान्तरं चानुवदति -- एकपदार्थेति ।। तादृशं हि अग्निना सिञ्चतीत्यत्राग्निसंसर्गत्वमतस्तदयोग्यम् । जलेन सिञ्चतीत्यादौ जलसंसर्गा ४ दिकं तथा न भवतीति तद्योग्यमित्युच्यत इत्येतदपि नेत्यर्थः ।।

लक्षणद्वयेप्येकपदार्थापरपदार्थेत्यत्रैकत्वापरत्वे पदार्थविशेषणे ? ५ पदविशेषणे ६ वा ? इति विकल्पो हृदि कृत्वा क्रमेण पक्षधराद्युक्तदोषानेवाह -- एकत्वेति ।। पदविशेषणपक्षोक्तदोषो नास्ति तस्य शब्दमात्रपरत्वादित्यत आह -- पदशब्दस्येति ।। गच्छति चैत्र इत्यत्राख्यातस्य कृतिर्वर्तमानत्वं च द्वयमर्थः । 'वर्तमाने लट्'इत्युक्तेः । 'लः कर्मणि च भावे चाकर्मकेभ्य 'इत्यत्र चकारेण कर्तरि लकारविधानेऽपि न्यायमते लाघवेन कृतिरेव लकारार्थ इति स्वीकृत्य तयोरन्योन्यान्वयस्य च स्वीकारात् । तथाच लडर्थभूतवर्तमानत्वान्वितकृत्यादिबोधको लडादिप्रत्ययो योग्यो न स्यादित्यर्थः ।

-

१.प्रमेयत्वे इति नास्ति -रा-ग. २.पदशब्दस्येति नास्ति -नं. ३.अपि इति नास्ति -रा. ४.र्गत्वा -उ. ५.अथ इत्यधिकम् -उ. ६.वा इति नास्ति -उ.

-

--- --- ---

-- लडादिप्रत्ययो योग्यो न स्यात् । तत्र शब्द १ भेदस्याप्यभावात् । तत्रापि २ तिङ्गत्वलट्त्वादिना भेदकल्पनेऽपि द्रव्यं संयोगीति वाक्यमयोग्यं स्यात् । संयोगस्य द्रव्यनिष्ठात्यन्ताभावप्रतियोगित्वात् ।।

-

कृत्यादीत्यादिपदेन रतो गच्छतीत्यादि ३ जडसाधारणव्यापारग्रहः । चिरन्तनमते व्यापारमात्रस्याख्यातार्थत्वात् । तिङ्गत्वेति ।। तिङ्गत्वेन कृतिरर्थो लट्त्वेन वर्तमानत्वमर्थ इत्याकारभेदाद्भेद इत्यर्थः । यद्यपि लकारत्वेनैव कृतिरर्थः । तथापि तिङ्गो लकारादेशत्वात्तिङ्गत्वेनेत्युक्तम् । संयोगस्येति ।। द्रव्यं संयोगीति विशिष्टवैशिष्ट्यं हि वाक्यार्थः। तथाच संयोगरूपैकपदार्थनिरूपितसंसर्गेऽपरपदार्थद्रव्यनिष्ठात्यान्ताभावप्रतियोगित्व स्यैव सत्वेन तत्प्रमाविशेष्यत्वस्य तत्प्रतियोगितावच्छेदकधर्मस्य च सत्वेनोक्तलक्षणाभावादव्याप्तिरिति भावः । संयोगसंसर्गश्च ४ निरूपितत्वविशिष्टसमवायो वा, विशेषमतारूपस्वरूपसबन्धो वा ध्येयः । तत्रोक्तलक्षण ५ सत्वेपि संयोगस्याव्याप्यवृत्तित्वमिति संयोगस्येत्येवोक्तम् ।।

-

यत्तूक्तं रुचिदत्तेन -- एकत्वापरत्वे पदार्थविशेषणे एव । न चैवं प्रमेयत्वे प्रमेयत्वमित्यत्राव्याप्तिः । एकपदार्थसंसर्गे स्वाश्रयनिष्ठात्यान्ताभावप्रतियोगित्वप्रमाविशेष्यत्वाभावस्य तदर्थत्वदिति । तदेते ६ नैव निरस्तम् । द्रव्यं संयोगीत्यत्र तथाप्यव्याप्तेरपिरहारात् ।.

-

१.ब्देभे - ज. २.ङ्लट्त्वा -ज. - ङ्लडा -ग-क. ३.जडपद न -उ. ४.संयोगेत्याधिकम् - उ. ५.णत्वं संयो-उ. ६.नेनै -उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ३८.

---------- ---------- -------

अत्यन्ताभावस्य प्रतियोगिविरोधित्वेन व्याप्यवृत्तित्वेन वा विशेषणेऽपि गन्धप्रागभावसमानकालीनो घटो गन्धवानिति वाक्यमपि योग्यं स्यात् । गन्धवति गन्धप्रागभावस्य सत्वेऽपि गन्धात्यन्ताभावस्यासत्वात् ।।
एकपदार्थसंसर्गेऽपरपदार्थनिष्टसंसर्गान्योन्याभावप्रतियोगितावच्छेदकत्व १ प्रमाविशेष्यत्वाभावरूपायामन्योन्याभावगर्भायां योग्यतायामव्याप्तेश्च ।

-

उक्ताव्याप्तिपरिहारविशेषणदानेऽतिव्याप्तिरायातीत्याह --
अत्यन्ताभावस्येति।। योग्यं स्यादित्येतद्व्यनक्ति -- गन्धवतीति ।। घटो हि गन्धवान्गन्धप्रागभाववांश्च भवति । उत्पन्नं द्रव्यं क्षणमगुणं तिष्ठतीति तैरङ्गीकारात् । कालभेदेन गन्धतत्प्रागभावसत्वेपि तदत्यन्ताभावो नेति गन्धरूपैकपदार्थनिरूपितसंसर्गे
घटरूपापरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वाभावस्य
सत्वेनोक्तप्रमाविशेष्यत्वाभावस्योक्तरूपप्रतियोगितावच्छदेकधर्मशून्यत्वास्यापि सत्वादतिव्याप्तिरित्यर्थः ।।
यत्वत्यन्ताभावपदं विरोध्यभावपरम् । एवं चोक्तस्थले गन्धवानिति निशिष्टवैशिष्ट्यसंसर्गे प्रागभावोऽपि विरोधीति तत्प्रतियोगत्वस्यैव सत्वान्नाव्याप्तिरिति त्वग्रे नन्वित्यादिना शङ्कितपक्षधरमतनिरासेन निरसिष्यते।।
यद्वैतदनुशयादाह -- २ पदार्थेति ।। अपरेति ।। अपरपदार्थनिष्ठो यः पदार्थान्तरनिरूपितसंसर्गवदन्योन्याभावस्ततत्प्रतियोगितावच्छेदको ३ वेत्यर्थः । जलेन सिञ्चतीत्यत्र सेको वह्निसंसर्गवान्नेति धीवत्, जलसंसर्गनान्नेति --

-

१.कप्र- रा. २.'एक' इत्यधिकम् - उ. ३.कत्वेत्यर्थः - उ.

-

---------- ---------- -------

न च सा न योग्यता । त्वयै १ व लाघवेन व्याप्तेरिव योग्यताया अपि अन्योन्याभावगर्भाया एव ग्राह्यत्वात् ।।

न चै २ वमन्योन्याभावगर्भैव योगताऽस्तु । न त्वत्यन्ताभागर्भेति वाच्यम् । एकपदार्थसंसर्गो ३ ऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगी ४ त्यत्यन्ताभावगर्भायोग्यत्वज्ञानेऽपि शाब्दप्रसङ्गात् ।.

-

-- बुद्धेरभावात्सेकनिष्ठान्योन्याभावप्रतियोगी वह्निसंसर्गाद्दा ५ हादिरेव न तु ६ संसर्गीति सह्निसंयोगस्यैव सेकनिष्ठान्योन्याभावगर्भप्रतियोगितावच्छेदकत्वं न तु जसंसर्गस्येति वह्निना सिञ्चतीति वाक्यमयोग्यं जलेनेति योग्यमित्येतादृशयोग्यतायामत्यन्ताभावगर्भयोग्यतालक्षमस्याभावादव्याप्तिरि ७ त्यर्थः ।।

रुचिदत्तस्तु एकपदार्थसंसर्गत्वे अपरपदार्थसंसर्गनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वप्रमाविशेष्यत्वाभा८ा इत्यवदत् ।।

व्याप्तेरिवेति ८ ।।

प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगि यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिरित्यत्यान्ताभावगर्भव्याप्त्यपेक्षणा यत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिरिति त्वया व्याप्तिवादेऽन्योन्याभावस्य व्याप्यवृत्तित्वेन प्रतियोग्यसमानाधिकरणेति विशेषणनैरपेक्ष्यात् लाघवेनान्योन्याभावगरभैव व्याप्तिरङ्गमिति ९ यथैवान्योन्याभावगर्भयोग्यतायां प्रतियोगिव्यधिकरणेति विशेषणनैरपेक्ष्येण लाघवात्तस्या एव शाब्दबोधाङ्गत्वादिति भावः ।।

-

१.एवकारा नास्ति -रा-ज. त्वयैवेति नास्ति -नं - ज. २.'एव' मिति नास्ति -नं. ३.र्गे -नं-ज. ४.गित्वात्यन्ता -नं. ५.र्गीदा -उ. ६.जलेत्यधिकम् -उ. ७.प्तेरित्यर्थः - उ. ८. इवेति नास्ति -उ. ९. यथोच्यते तथैवा -उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ४०.

---------- ---------- ---------

ननु तर्ह्युभयधीर्न प्रत्येकं शाब्द १ बोधहेतुः । न चाननुगमः । ग्राह्यसंसर्गविरोधिविषयकप्रमाविरहज्ञानत्वेनानुगमात् । तथाच न कोपि दोषः । संसर्ग्य २ न्योन्याभावस्यापि संसर्गविरोधित्वात् । द्रव्ये संयोगात्यान्ताभावस्य संयोगाविरोधित्वात् ।

-

पक्षधरेणात्र ब्रूम इत्यादिना सिद्धान्तमाशङ्कते -- नन्विति ।। द्विरूपयोग्यताज्ञानस्याप्यनुगतधर्मानाह -- ग्राह्येति ।। ग्राह्यो यः संसर्गः जलसेकसंसर्गः, तद्विरोधि यदपरपदार्थनिष्ठात्यान्भावप्रतियोगित्वं, अपरपदार्थनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वम्, विरोधित्वस्य तज्ज्ञानप्रतिबन्धकज्ञानविषयकत्वरूपत्वस्यात्राभिमतत्वात्, तद्विषयकप्रमाविरहज्ञानत्वं द्विरूपस्यापि योग्यताज्ञानस्यास्तीत्यानुगामादित्यर्थः ।।

न कोपि दोष इत्युक्तं व्यञ्जयन्नत्यान्ताभावस्य संसर्गविरोधित्वं व्यक्तमिति तत्राव्यप्त्यभावमप्रदर्श्य

अन्योन्याभावगर्भयोग्यतायामव्याप्तिदोषस्तावन्नेत्याह -- संसर्गेति ३ । वह्निसंसर्गान्योन्याभाववति वह्निसंसर्गस्यादर्शनादिति भावः । द्रव्यं संयोगीत्यत्राव्याप्तिदोषो नेत्याह -- द्रव्य इति ।। संयोगाविरोधित्वादिति ।। संयोगसंसर्गाविरोधित्वादित्यर्थः । एवं च तत्र संयोगस्याव्याप्यवृत्तितया स्वाधिकरणद्रव्यनिष्ठात्यान्ताभावप्रतियोगित्वेऽपि तस्य

ग्राह्यसंयोगसंसर्गाविरोधित्वेन
विरोध्यभावप्रतियोगित्वप्रमाविशेष्यत्वाभावादेः सत्वान्नाव्याप्तिरित्यर्थः ।।
यदपि गन्धप्रागभावसमानकालीन इत्यादिनातिव्याप्तिकथनं तदपि नेत्याह -- गन्धेति ।।
-
१.धीहे - रा-नं-ज. २.र्गान्यो -नं-ग. संयोगेन -क. ३.र्गीति -उ.
-
योग्य-नि-पणम्) योग्यतावादः पु - ४१.
---------- ---------- -------
गन्धप्रागभावस्यापि भिन्नकालीनगन्धेन सहाविरोधेपि तात्पर्यविषयेण समानकाली १ न गन्धेन विरोधादिति
चेन् मैवम् २ ।।
अत्र ह्याद्यपक्षे तात्पर्यविषयीभूतान्वयविरोधिप्रमाविरहो योग्यता । द्वितीये तात्पर्यविषयभूतान्वयविरोधिधर्मशून्यत्वं योग्यतेति फलितोर्थः । तथाच समभिव्याहृतशब्दतात्पर्यविषस्यान्वयस्य सत्वं वा तदिनिनाभूत ३ प्रमाणविरोधो वा योग्यतेत्ये ४ वास्तु । किमनया कुसृष्ट्या । तावतैव ५ निश्चिताप्रामाण्यकेऽग्निना सि ६ ञ्चेदित्यादावनिश्चिताऽप्रमाण्यके जलेन सिञ्चतीत्यादौ चा---
-
विरोधित्वादिति ।। तथाच तत्र गन्धस्य ग्राह्यसंसर्गविरोध्यभावप्रतियोगित्वमेवेति नातिव्याप्तिरित्यर्थः । अत्र हीति ।। एकपदार्थोत्यादि मण्युक्तलक्षणद्वय इत्यर्थः । फलितार्थ इति ।। त्वदुक्तविवक्षारीत्येति भावः ।। तदिति ।। उक्तरूपान्वयसत्वाविनाभूत इत्यर्थः । इत्येवास्त्विति ।।
अन्यथान्योन्याभावगर्भयोग्यतासत्वेऽत्यन्ताभावगर्भायोग्यताज्ञानादन्वयबोधापत्तेः । कारणतावच्छेदकावच्छिन्न यत्किंचित्कारणसत्वे एव कार्योत्पत्तेः ।

न चेष्टापत्तिः । ग्राह्यसंसर्गविरोध्यवगाहित्वेनावश्यं तस्य तत्प्रतिबन्धकत्वादिति भावः । अनिश्चितेति ।। तत्र वि ७ वादस्यानिश्चयादनिश्चितेत्युक्तम् ।

-

१.लेन -ग. अग्रेप्येवमस्ति. २.चेन्न -रा. ३.तःप्र-रा-ग. ४.एवकारः नास्ति -रा. ५.एवकारो नास्ति -रा. ६.ञ्चये -नं. ७.विसंवा -उ.

-

न्यादीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ४२.

---------- ---------- --------

--नाप्तवाक्ये १ ऽनतिव्याप्तेः । त्वदीयलक्षणस्य जलेन सिञ्चतीत्यनाप्तवाक्येऽतिव्याप्तेश्च ।.

इयं हि विषयसत्वरूपा योग्यता स्वरूपसत्येवानाप्तवाक्ये लक्षणस्यानतिव्याप्त्यर्थमुक्ता । न तु सत्तया ज्ञाततया वा शाब्दप्रमाकारणत्वेनोक्ता । शाब्दप्रमायां तस्या वा २ तद्विषयज्ञानस्य वा हेतुत्वायोगात् ।।

उक्तं चैतत्प्रमाण्यस्वतस्त्वे । भ्रमसाधारणे ३ ---

-

अनतिव्याप्तेरिति ।। अनाप्तोक्तत्वादेव तद्वाक्येऽन्वयस्यास ४ त्यत्वादिति भावः । त्वदीयेति ।। त्वदीयेत्यादिनोक्ते इत्यर्थः । जलेनेत्यादौ सेकान्वयविरोधिवह्नित्वरूपधर्मशून्यत्वसत्वादिति भावः ।।

नन्वेवं शाब्दप्रमाहेतोर्योग्यताया विषय ५ सत्वरूपत्वे शाब्दप्रमाया गुणजन्यत्वेन ६ प्रमायाः परतस्त्वापत्तिरित्यत आह -- इयं हीति ।। स्वरूपसत्येवेत्युक्तैवकारव्यावर्त्य ७ व्यनक्ति -- न त्विति ।। तस्या वेति ।। योग्यताया वेत्यर्थः । कथं न हेतुत्वमित्यत आह -- उक्तं चैतदिति ।। शाब्दप्रमायां ८ योग्यता तज्ज्ञानं वा न

हेतुरित्येतत्प्रत्यक्षप्रमादावनुगदगुणभङ्गे शाब्दप्रमानुगगगुणखण्डनप्रस्तावे उपपादितं चेत्यर्थः ।।
नन्वेवं शाब्दज्ञानमात्रेऽपि योग्यता न हेतुः स्यात् । तथाच निश्चितायोग्यताकवाक्यादपि धीप्रसङ्गः । न चायोग्यतानिश्चयविरहो हेतुः । गु ९ रुत्वेन योग्यतायां एव हेतुत्वौचित्यादित्यत आह -- भ्रमेत्यादि ।।
-
१.नातिव्याप्त्या -रा. प्यनति -ज. २.'वा' इति नास्ति -रा. ३.णशा -रा-नं-क. ४.सत्वा-उ. ५.यत्वरू -उ. ६.प्रमायां इति नास्ति -उ. ७.वृत्यर्थं व्य -उ. ८.या यो -उ. ९. णत्वे -उ.
-
योग्य-नि-पणम्) योग्यतावादः पु - ४३.
---------- ---------- ---------
शाब्दज्ञाने त्वाकाङ्क्षासत्तौ अयोग्यतानिश्चयविरहश्च हेतव १ इत्यस्ति । न तु योग्यता । न वा तज्ज्ञानम् ।।
यद्यपि योग्यताज्ञानादयोग्यतानिश्चयविरहो गुरुः । तथाप्य २ सावसंसर्गाग्रहरूपत्वात्प्रत्यक्षादिविशिष्टज्ञाने क्लृप्त आवश्यकश्च ।.
किंच योग्यतायाः संसर्गात्मकत्वेन तज्ज्ञानस्य शाब्द ३ संसर्गज्ञानहेतुत्व आत्माश्रयः स्यात् ।।
वस्तुतस्तु अयोग्यतानिश्चयविरहो ४ पि न शाब्दधीहेतुः । किं त्वाकाङ्क्षासत्ती एव । तथात्वे हि --
-
असावति ।। अयोग्यतानिश्चयविरह इत्यर्थः ।। क्लृप्त इति ।। हेतुत्वेनेति योज्यम् । आवश्यक इति ।। तदभावे शाब्दज्ञानानुदयादिति भावः ।।

योग्यताज्ञानहेतुत्वे विपक्षे बाधकं चाह -- किञ्चेति ।। ननु असंसर्गाग्रहरूपतया यद्ययोग्यतानिश्चयविरहः शाब्दधीहेतुः स्यात्तर्हि यत्सामान्यविशेषन्यायेनाविद्यमानासंसर्गाग्रहः, प्रमामात्रेऽविद्यमानायोग्यता ५ निश्चयविरहश्च शाब्दप्रमायामनुगतो गुणो हेतुः प्राप्नोतीति प्रामाण्यस्य परपस्त्वापत्तिः । शाब्दसाधारण्या ६ नापत्तिः । प्रतिवाद्यादिवाक्यादितोऽर्थज्ञानाभावापत्तिश्चेत्यत आह -- वस्तुतस्त्विति ।।

कुत इत्यतो विपक्षे बाधकमाह -- तथात्वे हीति ।। अयोग्यतानिश्चयविरहस्य शाब्दधीहेतुत्व इत्यर्थः ।

-

१.'इत्यस्तु' इति नास्त -रा. नं-ग. २.'असौ' इति नास्ति -रा.नं. ३.ब्दधीहे -नं. संसर्गधी -ज. ४.'अपि' इति नास्ति-रा. ५.निश्चयपदं न -उ. ६.ण्याप-उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ४४.

---------- ---------- -------

अयोग्यत्वेन निश्चतस्य प्रतिवादिवाक्यस्याबोधकतया कथाबधिरकलहः स्यात् । अग्निना सिञ्चतीत्यदि १ वाक्यादपि सामग्रीसत्वादप्रमात्वेन निश्चितं प्रवृत्त्यजनकं ज्ञानं जायत एव । कथमन्यथा तन्निराकणम् । उक्तं च सुधायाम् 'मेरुः सर्षप इत्या २ दिवाक्यान्मेरो ३ रपि सर्षपत्वेन प्रतिभासा'दिति ।।

एतेन संशयसाधारणं योग्यताज्ञानं शाब्दधीहेतुरिति, योग्यताभ्रमः शाब्दभ्रमहेतुरिति च निरस्तम् ।

-

कथेत्यनुवादः । बधिरकलह इति विधिः । प्रतिवादिवाक्यात्पदार्थोपस्थितौ ३ मानसः संसर्गबोध इति तु शाब्दकरणतकत्वानुभवविरुद्धम् । अन्यथा

आप्तवाक्यस्थलेप्येवं सुवचत्वेन शब्दप्रामाण्यं दत्तजलाञ्जलि स्यादिति भावः । तर्हि अग्निनेत्यादिवाक्यादप्यर्थधीः स्यात्ततश्च प्रवर्तेतापि पुरुष इत्यत आह -- अग्निनेति ।। सामग्रीति ।। आकाङ्क्षासत्तिरूपसामग्रीसत्वाज्ज्ञानं जायत इत्यन्वयः । अप्रामाण्या ४ निश्चयकबाधावतारूपसामग्रीसत्वान्निश्चिता । प्रामाण्यमिति नान्वयः । अत एव प्रवृत्यजनकमित्यर्थः । उक्तं चेति ।। ५ जिज्ञासाधिरणे --
'विज्ञातस्यान्यथा सम्यग्विज्ञानं ह्येव तन्मतम् ।'
इत्येतद्व्याख्यायामख्यातिपक्षखण्डनावसरे उक्तमित्यर्थः ।
योग्यताज्ञानस्य शाब्दज्ञानव्यतिरेकव्यभिचारमाह -- अयोग्यत्वेति ।।

-

१.दावपि -ज. २.आदिपदं न - रा-ग. ३.तौ नसंस-उ. ४.ण्यनि -उ. ५.जिज्ञासाधिरकण इति नास्ति -उ.

-

योग्य -नि-पणम्) योग्यतावादः पु - ४५.

---------- ---------- --------

अयोग्यत्वनिश्चयेऽपि शाब्दधीदर्शनात् । दृश्यते च परोक्तयोग्यतासंदेराभावेपि गेहे घट इति वाक्याज्झडिति १ संसर्गधीः । परोक्तयोग्यता वा तत्प्रमा वा शाब्दप्रमायां हेतुरिति तु प्रामाण्यस्वतस्त्वे निरस्तम् ।।
ननु -- प्रकृतप्रमाणविरोधरूपप्रतियोगिनोऽप्रमाणिकत्वात्तदभावः कथं प्रामाणिकः स्यादिति चेत्काऽत्र २ कथं ता। प्रतियोग्यप्रमाणिकत्वस्याभावप्रामाणिकत्वं प्रत्येव प्रयोजकतायाः शुक्तिरूप्यतादात्म्यादौ दर्शनात् ।।

-

योग्यतासंदेहस्यापि व्यतिरेकव्याभिचारमाह -- दृश्यते चेति ।। परोक्तेति ।। एकपदार्थसंसर्ग इत्यादिना परोक्तेत्यर्थः ।।

यद्वा भवदुक्तान्वयसत्वादिरूपयोग्यताज्ञानस्या ३ हेतुत्वेऽपि परोक्तयोग्यताज्ञानस्य तत्प्रमायाश्च शाब्दभ्रमज्ञाने ४ तत्प्रमयोः स्यादित्यत आह -- दृश्यते चेत्यादिना ।। प्रमाणस्वतस्त्व इति ।। प्रत्यक्षादिप्रमा ५ स्वनुगतहेतुत्वभङ्ग इत्यर्थः ।।

नन्वस्त्वेवमन्वयसत्वं योग्यतेति पक्षः । प्रमाणाविरोधो योग्यतेति पक्षो न युक्तः । यत्किञ्चित्प्रमाणाविरोधस्यातिप्रसङ्गितया प्रकृतग्राह्यसंसर्गाभावावगाहितप्रमाणविरोध एव योग्यतेति वाच्यम् । स च न योक्त इत्याशङ्क्य समाधत्ते -- नन्वित्यादिना ।। जलेन सिञ्चतीत्यादौ प्रकृतजलसंसर्गाभावावगाहि प्रमाणेत्यर्थः । तादात्म्यस्यासत एव सदुपरागेण भ्रान्तौ भानस्य स्वीकारात् शुक्तिरूप्यतादात्म्यादावित्युक्तम् ।।

-

१.'झडति' इति नास्ति -नं-ज सहजेत्यधिकम् -क. २.तत्र -नं. ३.स्यहे -उ. ४.नतत्प्रम -उ. ५.णस्या -उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ४६.

---------- ---------- -------

प्रपञ्चितं चैतन्न्यायामृते । एतदेवाभिप्रेत्योक्तं पद्धतौ 'प्रतीतार्थस्य प्रमाणविरोधाभावो योग्यता । तत्प्रतिपादकत्वात्पदान्यपि योग्यतावन्ती ' ति ।।

यत्तु -- प्रमाणलक्षणटीकायामन्योन्याभावययोग्यतावदर्थाभिधायकत्वं योग्यत्वमित्युक्तम् । तन्निश्चिताप्रामाण्यकादग्निना सिञ्चतीत्यादिवाक्याव्द्यावृत्तयोग्यतानिरूपणपरम् । न तु जलेन सिञ्चतीत्य १ -

-

ननु कथमसयो निःस्वरूपस्यात्यन्ताभावप्रतियोगित्वं नाम धर्म उपपद्यतामित्यत आह -- प्रपञ्चितं चैतदिति ।

धर्मिसत्तानरपेक्षधर्मत्वादिना
प्रपञ्चितमाद्यपरिच्छेदेऽसतोत्यन्ताभावप्रतियोगित्वसमर्थनवाद इत्यर्थः ।
ग्रन्थान्तरोक्तयोग्यतालक्षणस्यासदर्थके जलेन सिञ्चतीत्याद्यनाप्तवाक्येऽतिव्याप्तिमाशङ्क्य तत्साधारण्यमेवाभिप्रेतमतो न दोष इत्याह -- यत्वित्यादिना ।। एवं तर्हि तद्वाक्यस्यापि प्रमाणशब्दत्वापत्तिरित्यतो 'निर्दोषवाक्य २ मागम'इति निर्दोषत्वविशेषणेनैव तन्निवारणादन्यथा निर्दोषेति व्यर्थमापद्यत इति भावः । एवं वेदस्यापोरुषेयत्वे आप्तवाक्यत्वरूपलक्षणाभावे ३ ऽप्रामाण्यमिति शङ्कितेनिर्दोषवाक्यरूपलक्षणेनैव प्रामाण्यम् । वाक्यत्वं चाकाङ्क्षायोग्यताऽऽसत्तिमत्पदकदम्बत्वमित्यभिप्रेत्याकाङ्क्षादिस्वरूपं चोपपाद्योत्तरप्रसङ्गमुपक्षितन्नुसंहरति -- तस्मादिति ।.

-

१.त्याद्यनु -ग. २.'क्यमाह आगमइति' इत्यस्ति-उ. ३.वादप्रा - उ.

-

लीला-वक्त-शक्त्यप-भङ्गः) शक्तिवादः पु - ४७.

---------- --------- -------

नाप्तवाक्यवृत्तयोग्यतानिरूपणम् । तव्द्यावृत्तेर्निदोषत्वविशेषणेनैव सिद्धेरिति ज्ञेयम् ।। तस्माद्वेदस्यापौरुषेयत्वेपि प्रामाण्यसंभवात्तस्य विष्णावेव शक्तितात्पर्ये युक्ते इति ।।
इति योग्यता १ ।। ३ ।।

-

उक्तरीत्या निर्दोषवाक्यत्वादिरूपलक्षणासंभवादित्यर्थः । शक्तीति ।। पदानां शक्तिरेव तत्समुदायवेदस्यापि शक्तिरिति भावः । तात्पर्यं तत्प्रमितिशेषत्वं प्राग्वेदापौरुषेयत्ववादे व्यक्तम् ।।
एवं चादिवर्जितैराम्नायैरा २ ख्यातेत्युक्तं युक्तमिति भावः ।।
इति योग्यतावादः ३ ।। ३ ।।

-

अथ शक्तिवादः ।। ४ ।।

ननु -- स्वरूपसहकार्यातिरिक्तौ मानं नेति चेन्न ।

-

४ अथ शक्तिवादः ।। ४ ।।

विष्णावेवि शक्तितात्पर्ये इत्यु ५ क्तम् । अतीन्द्रियशक्तावेव मानाभावादिति भावेन लिङ्गपादे ‘
अत्ताचराचरग्रहणा’ दित्यधिकरणसुधायां ‘स्वरूपसहकारिसमवधानातिरिक्तशक्तरेव नास्तीति केचिदि‘त्यादिना ‘आस्तां प्रपञ्च‘इत्यन्तेन संक्षेपेण शक्तिसमर्थनं कृतं, तस्पष्टं विवृण्वानः शक्तिमाक्षिप्य समाधत्ते -- स्वरूपेत्यादिना ।। शब्दादिस्वरूपतत्सहकारिभ्यामन्यशक्तावित्यर्थः।।

-

१.निरूपणमित्यधिकम्-रा. ’वाद’ इत्यधिकम् -नं २.रादरेणाख्या -उ. ३. ३५. इत्यस्ति -उ. ४.इदं नास्ति- उ. ५. इत्ययुक्तम् - उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ४८.

यादृशात्कारतलानलसंयोगाद्दहो जायते तादृशादेव मण्यादिसमवधाने न जायत
इति मण्यादिविघटनीयशक्तिसिद्धेः । तत्र दृष्टसामग्र्याः सत्वेन तद्विलम्बेन वा तत्संपादकादृष्टविलम्बेन वा दाहविपम्बायोगात् ।।

-

क्विचिदे १ व शक्तिसिद्धौ शब्दे २ सा सेत्स्यतीति भावेनोपपादनसौकर्याय प्रसिद्धवह्नौ तावत्साधयति -- यादृशेति ।। दाहाभावस्य कारणवैकल्यनिमित्तकत्वशङ्काव्युदासायोक्तं यादृशात्तादृशादेवेति ।। न जायत इति ।। दाह इत्यनुषङ्गः । एतेन मण्यादेर्दाहादिप्रतिबन्धकत्वं प्राप्तं, ततः । किमित्यत आह -- इति मण्यादीति ।। इतिशब्दो हेत्वर्थः । मण्यादेः प्रतिबन्धकत्वान्यथानुपपत्तिरेव वह्न्यादिगतातीन्द्रिय शक्तौ मानम् । कार्यानुकूलकिञ्चिद्धर्मविघटकत्वरूपत्वात्प्रतिबन्धकत्वस्य कार्यानुकूलकिञ्चिद्धर्मश्च शक्तेरन्यो न युक्त इति भावः। एतच्चोपलक्षणम् । वक्ष्यमाणार्थ ३ पञ्चतेनापीत्यपि ध्येयम् ।।
ननु -- मण्यादेः प्रतिबन्धकत्वमेवासिद्धम् । मण्यादिसन्निधिस्थले दाहाभावस्य दाहसामग्र्यभावेन वा दाह ४ सामग्रीसम्पादकादृष्टाभावेन वोपपत्तेरित्यातस्तताद्दशादेवेत्युक्तिकृत्यं व्यञ्चयन्प्रतिबन्धककत्वं तावद्दृढयति -- तत्रेति ।। मण्यादिसन्निधिस्थल इत्यर्थः ।।
नन्वस्त्वेवं मण्यादेः प्रतिबन्धकत्वं तथापि साक्षाद्दाहजनकादृष्टनाशकत्वेन वा दाहप्रतिकूलदुरदृष्टजनकत्वेन वा स्वाभावरूपदाहकारणविघटकत्वेन वा --

-

१.दतीन्द्रयशक्तिः - उ. २.तत्से-उ. ३.र्थापत्तिपं -उ. ४.सामग्रीपदं न -उ.

-

लीला-वक्त-शक्त्यप-भङ्गः) शक्तिवादः पु - ४९.

---------- ---------- -------

न च दृष्टसामग्र्याः सत्वेपि मणिरेव साक्षाद्दाहजनकमदृष्टं नाशयतीति वाच्यम् । तादृशादृष्टे मानाभावात् । अन्यथा १ न्त्यतन्तुसंयोगादौ सत्यपि
कदाचित्पटानुत्पत्तिः स्यात् । वन्ध्यपुंसं २ प्रयोगादावपि साक्षाज्जनकादृष्टविलम्बान्न विलम्बः । किं तु नापुत्रस्य लोकोस्तीति

श्रुत्याऽपुत्रस्य नरकोक्त्या तज्जनकस्य दुरुतस्यावश्यकत्वेन दाहं प्रति मणेरिव दुरुतस्यैव पुत्रोत्पत्ति ३ प्रतिबन्धकत्वात् ।।
न चैवमदृष्टस्य कुत्रचिदपि साक्षाज्जनकत्वाभावे परंपरया जनकत्वमपि न स्यादिति वाच्यम् ।
-
-- मण्यादेः प्रतिबन्धकत्वोपपत्तौ न तदन्यथानुपपत्त्याऽस्तीन्द्रियशक्तिसिद्धिरित्यतः आद्यं तावदशङ्क्य निराह -- न च दृष्टेति ।। तादृशेति ।।साक्षाज्जनक ४ प्रतिबन्धकनाश्यादृष्ट इत्यर्थः । पदादीति ।।
तत्रापि ५ कदाचित्वदुक्तादृष्टाभावसंभवादिति भावः । एतच्चोपलक्षणम् । मणिकृदुक्तदिशा मण्यपसरणानन्तरं दाहा ६ भावप्रसङ्गादन्वयव्यतिरेकाभ्यां क्लृप्तत्वेन मण्याद्यभावरूपपदाहकारणाभावेनैव दाहाभावोपपत्तेश्चेत्यापि ध्येयम्।।
ननु बन्ध्यासंप्रयोगादौ दृष्टाव्यभिचारादृष्ट ७ विलम्बो वाच्य इत्यत आह -- वन्ध्येति ।। नन्वदृष्टं क्वचित्साक्षाज्जनकम् । अन्यथा दृष्टसामग्रीरहितस्थले साक्षादहेतुत्वे दृष्टसामग्र्यामप्यहेतुत्वापत्त्या परंपरया हेतुरपि न स्यादतः कथं तादृशादृष्टं नेत्युच्यत इत्यत आह -- न चैवमिति ।।
-
१.अन्त्यपदं न -नं.ज. २.सं यो -रा.क. ३.त्तिं प्रति प्रतिबन्धकत्वात्-रा.नं.ग. ४.के-उ. ५.कदाचिदिति नास्ति -उ. ६.हप्रभ -उ. ७.विलम्बादेवेत्यधिकम्-उ.
-
न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ५०.
---------- ---------- -------

दृष्टसामग्ररहिते सर्गाद्यकालीने कार्येऽदृष्टस्य साक्षाज्जनकत्वस्वीकारात् ।।
अस्तु वा दाहादावपि साक्षाज्जनकमदृष्टं, तथापि न तन्मण्यादि १ विनाश्यम् ।
अदृष्टश्टस्यादृष्टनाशकत्वेन विहितेतरफलमात्रनाश्यत्वात् । अन्यथा मण्यादिनाऽदृष्टनाशशङ्क्या वैदिके कर्मणि निष्कम्पप्रवृत्तिर्न स्यात् ।।
नापि -- मणिना दाहप्रतिपक्षादृष्टजननाद्दाहविलम्बः, प्रतिपक्षादृष्टजनने शौचाद्यनपेक्षादिति वाच्यम् ।
-
न तन्मण्या २ विनाश्यमिति । येन मण्यादेः प्रतिबन्धकत्वे शक्तिं विनाप्युपपन्नं स्यादिति दोषः कुतो नेत्यत आह -- अदृष्टस्येति ।। प्रबलदुरितादृष्टस्य पुण्यादृष्टनाशकत्वेन प्रबलपुण्यादृष्टस्य दुरितादृष्टनाशकत्वेन मण्यादेरनाशकत्वादित्यर्थः । अदृष्टस्य विहितादिजन्यत्वाद्विहिते ३ तरनाश्यत्वेपि फलमात्रनाश्यत्वेन मण्यादिरूपेण विरितेतरेणानाश्यत्वादित्यर्थः । कीर्तनादेरप्युपलक्षणम् । 'धर्मः क्षरति कीर्तनात्'इत्यादेः । यद्वाऽदृष्टस्य नाश्यत्वादित्यन्वयः । अदृष्टनाशकत्वेन यद्विहितं प्रायश्चित्तादि तदितरेण फलमात्रेण नाश्यत्वादित्यर्थः । मण्यादि त्वदृष्टनाशकतया विहितेतरदपि न फलरूपमिति न तन्नाशकमिति भावः ।।
द्वितीयं निराह -- नापीति ।। प्रतिपक्षेति ।। प्रतिकूलेत्यर्थः ।। शौचाचमनादेरभावे कथमदृष्टजन्मेत्यत आह -- प्रतिपक्षेति ।।
-
१.दिना दृष्टिं विनाश्यं इत्यस्ति -रा. २.ण्यादिवि -उ. ३.तैर -उ.
-
लाला-वक्त-शक्त्यप-भङ्गः) शक्तिवादः पु - ५१.
---------- ---------- ---------

१ प्रतिपक्षादृष्टस्यापि मणितुल्यतया तद्विधटनीयत्वेनैव शक्तिसिद्धेः ।।
नापि -- मण्याद्यभावरूपदृष्टकारणाभावादेव दाहविलम्बः ; अभावस्यापि २ भाववद्ग्राहकतौल्येन कारणत्वात् ; त्वयापि विशेषदर्शनेन भ्रमस्य, विहिताकरणेन प्रत्यवायस्य, निर्दोषत्वादिना वेदप्रामाण्यादेश्च स्वीकृतत्वादिति वाच्यम् । उत्तेजकसमये मणिसत्वेपि दाहदर्शनेन मण्याद्यभावस्याहेतुत्वात् ।।
तस्मान्मण्यादिना प्रतिबनधदशायां दाहजनकादृष्टस्य --
-
ननु -- प्रतिकूवलादृष्टस्य मण्यादिजन्यस्य न शक्तिविघटकत्वेन दाहप्रतिबन्धकता, किं तु प्रतिकूलादृष्टान्तरजनकत्वेनेति चेत्तर्ह्यनवस्थापत्तिः । एवं तर्हि स्वाभावरूपदाहकारणविघटनरूपत्वेन प्रतिपक्षादृष्टस्य दाहप्रतिबन्धकतास्त्विति चेन्न । एवं हि मण्यादेरेव तथात्वोपपत्तौ किं प्रतिपक्षादृष्टजन्मकल्पनया ।।
नन्वस्तु तर्हि तथैवेत्यतस्तृतीयं पक्षं सयुक्तिकमाशङ्क्य निराह -- नापीति ।। वाच्यमित्यन्वयः । भाववत् भावस्य कारणत्ववत् । अभावस्य हेतुता न केवलं युक्तिसिद्धा प्रतिवादिसिद्धा चेत्याह -- त्वयापीति ।। अदर्शनाकरणनिर्दोषपदैरभावस्यैव प्रतीतेरिति भावः ।
-
१.प्रतिपक्षेत्यारभ्य नास्ति -रा. २.स्याभा - रा.
-
लीला-वक्त-शक्त्यप-भङ्गः) शक्तिवादः पु - ५२.
---------- ---------- --------
-- मण्यादिना नाशाद्वा मण्यादिना दाहप्रतिकूलादृष्टजननाद्वा मण्याद्यभावरूपदृष्टकारणविरहाद्वा दाहानुत्पत्तिरिति लीलावलत्याद्युक्तं वक्षत्रयमप्ययुक्तम् ।।
लीलावत्या १ द्युक्तशक्त्यपलापप्रकारभङ्गः।। ४ ।।

-

आदिपदेन कुड्यसंयोगाभावस्य गतावनुपलब्धेश्चाभावज्ञाने हेतुत्वदृष्टेति गृह्यते । तस्मादित्युक्तमेव हेतुत्रयं
व्यनक्ति -- मण्यादिनेति ।।
लीलावत्यु ५ क्तशक्त्यपलापभङ्गः ।। ।४ ।।

-

अथ शक्तौ श्रुत्यादिनिरूपणम् ।। ५ ।।

अत्र नैयायिकाः २ --
उत्तेजकाभावविशिष्टमण्याद्य ३ भावरूपदृष्टकारण ४ विरहादेव दाहानुत्पत्युपपत्तेर्न शक्तिसिद्धिः ।।
-
अथ शक्तौ श्रुत्यादिनिरूपणम् ।। ५ ।।

यत्वनुमानखण्डे मणावीश्वरवादानन्तरं लीलावत्याद्यभिमतशक्त्यपलापप्रकारं निरस्य स्वयं प्रकारान्तरेणापलापप्रदर्शनं कृतं तदप्युच्यत इत्यादिना न युक्तमिति वक्तुमनुवदति -- 'अत्र नैय्यायिका'इत्यादिना -- 'तस्मान्न शक्ति'रित्यन्तेन । उत्तेजकं प्रतिबन्धकप्रतिबन्धकं, --
-
१.आदिपदं न -नं. २.कः -ज. ३.एतादृशस्थले आदिपदं न -रा. ४.णाभावादे -नं-ज-ग. ५.त्याद्यु -उ. ।. ३ ६ - उ.
-
शक्तौ-श्रुदि-निरूपणम्) शक्तिवादः पु - ५३.

ननु मण्याद्यभावानां न तावन्मण्याद्यभावत्वेन कारणत्वम् । अननुगमात् । नापि प्रतिबन्धकत्वा १ भावत्वेन अन्योन्याश्रयात् । कारणीभूताभावप्रतियोगिन एव प्रतिबन्धकत्वात् । मन्त्रसत्वेपि मण्य २ भावमात्रेण दाहापत्तेश्च । तस्यापि प्रतिबन्धकाभावत्वात् । न हि यावत्कारण ३ समवधान एव कार्यम् । एकदण्डसमवधानेपि घटोत्पत्तेरिति चेन्मैवम् । दण्डचक्रादिकूटवत्सकलानां मण्यादी ४ नां संसर्गाभावकूटस्य दाहजनकत्वेनाननुगमान्योन्याश्रययोरभावात्।।
एतेन -- दाहकाले सकलानां मण्यादिसंसर्गाभावानां कूटोऽसम्भ ५ वी, ६
मणिध्वंसकाले तत्प्रागभावस्यासम्भवादिति निरस्तम् ।
-
-- तदभावविशिष्टो यो मण्यादिस्तदभावेत्यर्थः । मण्याद्युक्तं मणिमन्त्रौषधाद्यभावानां कूटस्थ ७ कारणत्वं शङ्कोत्तराभ्यां व्यनक्ति -- नन्वित्यादिना ।।
-
अन्योन्याभावव्यावृत्यर्थं प्रागभावादिसाधारणाभावलाभं ८ चाह -- संसर्गाभावकूटस्येति ।। सकलपदस्य मण्यादेर्विशेषणत्वेनोक्तौ कृत्यं व्यनक्ति -- एतेनेति ।। एतच्छब्दार्थं स्फुटीकरोति -- साकल्यस्येति ।। अभावविशिषेणत्वे हि स्यात् त्वदुक्तदोषः । न चैवमित्यर्थः । प्रतिबन्धकाभावेनोक्तौ कृत्यं व्यनक्ति -- एतेनेति ।। ९ प्रतिबन्धकाभावत्वेन कारणत्वेपि न पागुक्तदोष इति भावेन 'यद्वा प३तिबन्धकत्वावच्छिन्नप्रतियोगिकोऽभावः कारण'मित्यादिना मण्युक्तमेवाह--किञ्चेति ।।
-

१.काभा- नं-ज-ग-क. २.'ण्याद्य' रा-नं. ३.'जातीय' इत्यधिकम्- रा-नं-ज-ग. ४.दिना सं -रा. ५.भावी -नं. ६.मणिपदं न -रा. ७.टस्य -उ. ८.भायाह -- उ. ९.प्रतिबन्धकेत्यादि नास्ति - उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ५४.

---------- ---------- -------

साकल्यस्य प्रतियोगिविशेषणत्वेनोक्ततया सर्वेषां मण्यादीनामेकैकस्य संसर्गाभावस्य दाहकाले सत्वेन तादृशाभावेकूटस्यापि तत्काले सत्वात् ।।

किं च कार्यानुत्पत्तिव्याप्यत्वं प्रतिबन्धकत्वमिति पक्षे प्रतिबन्धकत्वावच्छिन्नाभावः कारणम् । स च यत्किंचित्प्रतिबन्धकत्वसत्वदशायां नास्तीति न तदा दाहप्रसङ्गः । नाप्यन्योन्याश्रयाननुगमौ । प्रहं मा दहेति सावधिमन्त्रपाठे

मन्त्रस्य झडिति नाशेपि मन्त्रप्रयोक्तृपुरुषाभिप्रायविषयः कालविशेष एव प्रतिबन्धक इति न कोपि दोषः ।।

-

कार्यानुत्पत्तिः काया १ प्रागभावो व्याप्तिश्च कालिकीति भावः । प्रतिबन्धकत्वेपि ।।

मणिमन्त्राद्यनुगतप्रतिबन्धकत्वावच्छिन्नप्रतियोगिताकाभावत्वेन २ न मण्याद्यभावस्य कारणत्वमित्यर्थः ।।

मन्त्रसत्वेपि मण्याद्यभावमात्रेण दाहापत्तिरूपप्रागुक्तदोषो नेत्याह -- न चेति ।। मन्त्रसत्वस्थले मणित्वाद्यवच्छन्नाभावसत्वेपि एकप्रतिबन्धकसत्वे प्रतिबन्धकत्वावच्छिन्नाभावो नेति न दाहप्रसङ्गदोष इति भावः ।। नाप्यन्योन्याश्रयेति ।। कारणीभूताभावप्रतियोगित्वपक्ष एवास्य दोषस्योक्तेरिति भावः ।।

ननु -- व्यभिचारात्कथं मन्त्राद्यभावः कारणमित्यतो व्यभिचारं निराह -- प्रहरमिति ।। निषेधाक्छतमाशब्दोयम् । न माङ् । तेन 'माङि लुङिति'लुङा भाव्यमिति न शङ्क्यम् ।

-

१.र्यप्राग- उ. २.'न' इति नास्ति -उ.

-

शक्तौ-श्रुदि-निपणम्) शक्तिवादः पु - ५५.

---------- --------- --------

तस्मान्न शक्ति १ सिद्धिरिति । उच्यते --
'परास्य शक्तिर्विविधैव श्रूयते । स्वाभाविकी' २
'विचित्रशक्तिः पुरुषः पुराणो,'
'न चान्येषां शक्तयस्तादृशाः स्युः'
'सर्वैर्युक्ता शक्तिभिर्देवता सा'

-

मण्यादेः प्रतिबन्धकत्वान्यथानुपपत्तिरूपार्थापत्तेर्नैयायिकोक्तान्यथोपपत्तिमग्रे निरसिष्यन्, एकत्र शक्तिसिद्धौ ३ अन्यत्र शब्दादावपि तदनुमानमिति भावेन, परमेश्वरे शक्तिसत्वे तावत् --
'ज्ञानं नित्यं क्रिया नित्या बलं शक्तिः परात्मनः ।
नित्यानन्दोव्ययः पूर्णो भगवान्विष्णुरुच्यते ।।
इति पैङ्गिश्रुतिश्चाह शक्तिसद्भाव एव तु '
इत्य ४ त्राधिकरणानुव्याख्यानाद्युक्तदिशा श्रुत्यादिरूपमनोक्त्या शक्तौ मानं नेत्ये ५ तावत्तावन्निराकरोति -- परस्येति ।। अस्य भगवत इत्यर्थः । ज्ञानबलाभ्यां सहिता क्रिया ज्ञानबलक्रिया चेति विग्रहः । विचित्रेति वाक्यान्तरम् । तादृशास्तादृश्यः । सर्वैर्युक्तेति वाक्यान्तरम् । सर्वैः सर्वाभिः । लिङ्गव्यत्ययात्।।
' परेति यां प्राहुरजस्रशक्तिम् '।

इति वाक्यदोषः । 'एता आत्मनि चैवं विचित्राश्च हि'इत्यादि सूत्रभाष्योक्ताः । तावता न सर्ववस्तुषु शक्तिलाभ इत्यतो रामानुजभाष्योक्तविष्णुपुराणस्मृतिमाह -- शक्तय इति ।।

-

१.सिद्धिपदं न -रा-नं. २.'ज्ञानबलक्रिया च' इत्यधिकम् -रा.नं-ज-ग-क. ३.द्वावपि तदनु-उ. ४.त्तृत्वाधिक
-उ. ५.तत्तावन्निराह --उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ५६.

---------- ---------- -------

'परेति यां प्राहु'इत्यादि श्रुत्या
'शक्त्यः सर्वभावानामचिन्त्य १ ज्ञानगोचराः ।
यतोऽतौ ब्राह्मणस्तास्तु सर्गाद्या भावशक्तयः' ।।
इत्यादिस्मृत्या च शक्तिसिद्धेः २ ।।
न चेयं स्वरूपमात्रपरा । अस्येतिषष्ठ्या विचित्रशक्तिरिति बहुव्रीहिणा शक्तिभिर्युक्तेति युक्तशब्देन सम्बन्धत्वेन विविधैवेति विचित्रेति चबुहुविधत्वेन
शक्तिभिः शक्तय इति बहुत्वेन चोक्तेः ।।
नाप्यगन्तुकसहकारिपरा ।.
नापि प्रतिबन्धकाभावपरा । भावत्वोक्तेः । 'अतिन्त्य ४ ज्ञानगोचरा 'इति बीजादिनिष्ठशक्तेरप्यतीन्द्रियत्वोक्तेश्च ।।

-

सर्गाद्याः सृष्ट्यादिविषया भावशक्तयः भावरूप ५ शक्तय इति वा स्वभावशक्तय इति वाऽर्थः । श्रुत्यादेरन्यथोपपत्तिं निराह -- न चेय ६ मित्यादिना ।। वाक्यदोष इति ।। परास्य शक्तिरित्यस्य पूर्ववाक्ये न तस्य कार्यं ७ कारणजन्यकारणं न विद्यत इत्युक्तेरित्यर्थः ।

-

१.न्त्या -रा. २.द्विः -नं-ज-ग-क. ३.उभयत्र 'त्व' इति नास्ति-रा. नं. आदो नास्ति -नं. अन्ते नास्ति - ग. ४.न्त्या - रा. ५. पाः श-उ. ६.चैव -उ. ७.कारणं च - उ.

-

शक्ता-यत्ति-पकम्) शक्तिवादः पु - ५७.

---------- --------- ---------

'अन्योन्यानन्तरबलाः क्रमादेव १ प्रकीर्तिताः' ।।
इत्यादस्मृत्या इदमह शक्तं, इदं शक्ततरं, इदं तु शक्ततममिति लोकव्यवहारेण गुरुत्वादाविव शक्तौ तारतम्यप्रतीतेश्च ।।
इति शक्तौ श्रुत्यादिनिरूपणम् २ ।। ५ ।।

-

इत्यादि ५ स्मृत्येति ।.
'भीमश्च बलभद्रश्च मद्रराजश्च वीर्यवान् ।।
चतुर्थः कीचक ६ स्तस्मात्पञ्चमं नानुशुश्रुम'इति ।।
अन्योन्यानन्तरेति ।। विराटपर्वगतस्मृत्येत्यर्थः । तारतम्यप्रतीतेश्चेयं नाभावपरेत्यन्वयः । अभावे तारतम्याभावादिति भावः ।।
इति शक्तौ श्रुत्यादिनिरूपणम् ।। ।५ ।।

-

अथ शक्तावर्थापत्तिपञ्चकम् ।। ६ ।।

किंच दण्डादेरन्वयव्यातिरेकाभ्यां ३ घटादिकारणत्वं तावदनुमीयते । तत्र न तावत्पूर्व ४ वृत्तित्वमात्रं लिङ्गम् । रासभादावपि सत्वात् ।।

-

अथ शक्तावर्थापत्तिपञ्चकम् ।। ६ ।।

श्रुत्याद्यनुग्राहकार्थापत्तिरपि शक्तौ मानत्वेन विवक्षुरादौ कारणत्वस्यान्वयव्यतिरेकगम्यत्वा ७ न्यथानुपपत्तिरूपार्थापत्तिं सुधोक्तां तावद्व्यनक्ति -- किंच दंडादेरिति ।। अनुमीयत इति ।। तस्य प्रत्यक्षत्वे घटादिप्रत्यस्येवान्वयाद्यपेक्षा न स्यात् ।

-

१.वं-रा. २.नात्र प्रकरणविभागः - नं.ज.क. ३.घटपदं न -रा. ४.वर्तित्व-नं-ज -ग. ५.श्रुत्ये-उ. ६.स्तेषां षं- उ. ।३ ७ -उ. ७.नुपपत्ति-उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ५८.

---------- ---------- --------

नापि नियमविशेषितम् । अन्यथासिद्धेऽपि सत्वात् । तस्मात्प्रत्यक्षसिद्धं कारणता १ त्वेन त्वदभिमतमनन्यथासिद्धनियतपूर्ववृत्तित्वमेव लिङ्गं वाच्यम् । न च तदेव २ तेनानुमेयमिति तदनुमेयातीन्द्रियशक्तिसिद्धिः । न च तत्र स्वरूपयोग्यतारूपं दण्डत्वमनुमेयम् । तस्य प्रत्यक्षत्वात् ।।

-

कारणत्वमेव शक्तिपदार्थ इति कारणता ३ वादे मणि कृदुक्त्यातीन्द्रियत्वावगतेश्चेति भावः । अन्वयव्यतिरेकौ ४ नाम अनन्यथासिद्धनियतपूर्ववृत्तित्वरूपो यस्मिन् सति यन्नियतं यदभावे च यदभावो नियत इत्येवंरूपत्वादन्वयव्यतिरेकयोः । एवं च तत्र कारणत्वानुमापकं किं विशेष्यमात्रं नियमिविशेषितं विशेष्यं वा कृत्स्नं विशिष्टं वा । आद्ययोः साध्याविशिष्टत्वदोषाभावेपि व्यभिचारान्न लिङ्गत्वमित्याह -- तत्र न तावदिति ।। अन्यथासिद्धेपीति ।। घटाकारणे तद्गतरूपकारणे मृत्पिण्डरूप इत्यर्थः । कारण ५ त्वेनेति ।। कारणत्वरूपत्वेनेत्यर्थः ।।

कारणत्वस्योक्तरूपविङ्गानुमेयान्यथानुपपत्तिरूपार्थापत्तेरन्यथोपपत्तिं त्रेधाऽऽशङ्क्य निराह -- न चेत्यादिना ।। कारणतावच्छेदकस्यैव

स्वरूपयोग्यतारूपत्वाद्दण्डत्वमित्युक्तम् । तस्येति ।। उक्तरूपावच्छदेकत्वस्येत्यर्थः ।

१.णत्वेन-रा. नं.ज.क. २.तत्रा-नं-क-ज. ३.णवा-उ. ४.कोना-उ. ५.तात्वे-उ.

-

शक्ता-वत्ति-पकम्) शक्तिवादः पु - ५९.

---------- --------- ----------

नापि -- सहकारिसमवधानरूपं फलोपधानमनुमेयम् । दण्डे सहकार्यसमवधानेऽपि १ तव्यवहारात् । शिलादौ तत्समवधानेऽपि २ कारणत्वाव्यवहाराच्च ।।

नापि -- दण्डत्वस्यानन्यथासिद्धिविशिष्टनियमाविच्छेदकत्वमनुमेयम् । तस्य हेतुशरीर एव प्रवेशात् । एतदेवाभिप्रेत्योक्तं सुधायाम् -- 'ततोन्वयव्यतिरेकसमधिगम्यमतीन्द्रियमेव किञ्चिन्मृदातीनां घटादिकारणत्वमभ्युपगमनीयम् । तदेव च शक्ति'रिति ।।

व्याप्तिग्राहकप्रत्यक्षेण तु नियमरूपा रसरूपादिसाधारणी व्याप्तिरेव गृह्यते । न तु शक्तिरूपाकारणता । तस्या नित्यातीन्द्रियत्वात् ।।

-

अनन्यथासिद्धनियतपूर्ववृत्तित्वान्यूनानधिकवृत्तित्वस्य हेतुत्वेन वाच्यत्वात्तस्यैवोक्तरूपावच्छेदकत्वादिति भावः । सुधायामिति ।।

'अत्ताचराचरग्रहणा'दित्यधिकरणे --

'इति पैङ्गिश्रुतिश्चाह शक्तिसद्भाव एव तु'।

इत्यादिश्लोकव्याख्यानावसर इति ध्येयम् ।।

ननु -- वह्न्यादौ सति दाहादिस्तदभावे तदभाव इति दाहादेर्वह्न्यादिना व्याप्तिग्राहकप्रत्यक्षेणाव दाहकारणत्वं वह्न्यादेर्गृह्यते । यद्वा यत्र धूमस्तत्राग्निरित्यादिव्याप्तिग्राहकप्रत्यक्षेण ३ कारणता गृह्यत इति

कथमनुमेयतोक्तिः । ४ एतदन्यथाऽनुपपत्या शक्तिसिद्धिरित्यत आह -- व्याप्तीति ।।

१.कारणत्वव्य -रा. नं.ज.ग. २.तदव्य -रा. - तदव्यवधानेपि तदव्य -ग. ३. 'कारणत्वं' -इत्यारभ्य नास्ति- उ. ४.येन त -उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ६०.

न च १ व्यभिचारितं सहचारदर्शनं नियमरूपव्याप्तेरपि कथं ग्राहकम्, ग्राहककोटौ नियमप्रवेशे चात्माश्रय इति वाच्यम् । तस्याञ्जनादिवद्व्याप्तिग्राहकप्रत्यक्षसहकारित्वेनाव्यभिचारानपेक्ष २ णात् ।।

किञ्च जलस्य जलत्वेन पिपासोपशामकत्वं तावदनुमीयते । तत्र च न तावत्फलोपधानमनुमेयम् । बाधाद्व्यभिचाराच्च । किं तु पिपासोपशमनकाणत्वमात्रम् । तच्च न तावदन्यथासिद्धनियतपूर्ववृत्तित्वरूपम् । तस्य पूर्वमेवज्ञातत्वात् । कथमन्यथा जलत्वस्य व्याप्तिग्रहः ।।

-

ननु व्याप्तिरेव गृह्यत इत्ययुक्तम् । सहचारदर्शनस्य वा ३ नियतसहचारदर्शनस्य वा तदनिर्णायकत्वादित्याशङ्क्य समाधत्ते -- न चेति ।। तस्य सहचारदर्शनस्येत्यर्थः ।।

जलस्य पिपासोपशाकत्वानुमित्यन्यथानुपपत्तिश्च शक्तौ मानमिति भावेनाह -- किञ्चेति ।। अर्थापत्तेरन्यथोपपत्तिं निराह -- तत्र चेति ।। किं त्वित्यादिना वक्ष्यमाणपक्षापेक्षया तावच्छब्दः । बाधादिति ।। तत्रानुमित्यन्तरं प्रवृत्तस्य जलपानानान्तरमेवोदन्यानिवृत्तिरूपफलोपलम्भात्क्वचिदप्रवृत्तिपानाभावयोर

पि संभवाच्चेति भावः । व्यभिचारादिति ।। जलत्वोपेतस्य सर्वस्याप्युक्तफलोपधाने मानाभावात्प्रत्यग्रोत्पन्नविनष्टजले फलोपधानाभावाच्च व्यभिचार इति भावः।।

-

१.चाव्य -रा. २.क्षत्वा-नं. ३.नियतेत्यादि वा इत्यन्तं नास्ति - उ.

-

शक्ता -वत्ति-पकम्) शक्तिवादः पु - ६१.

---------- ---------- ---------

नापि सहकारिविरहप्रयुक्तकार्याभाववत्वरूपम् । सहकारिशब्देन स्वेतरकारणस्यैव विवक्षणीयत्वेनात्माऽश्रयात् १ । भाविसहकारिविरहशङ्क्या फलार्थिनो निष्कम्पप्रवृत्त्ययोगात् । तावता २ त्वदुक्तनिर्वचनस्य सहकारिविरहः ३ कार्यप्रागभावस्योत्तरकालसंबन्ध ४ कारणमित्येतदर्थकतया कारणत्वमज्ञात्वा कार्याभावस्य सहकारिविरहप्रयुक्तत्वस्य ज्ञातुमशक्यतयाऽ ६ ल्यसमवधानदशायां दण्डादेरहेतुत्वापाताच्च ७ । तस्मादतीन्द्रियं शक्तिरूपं कारणत्व--

-

८ प्रकारान्तरेण पिपासोपशमकारणत्वस्यरूपमाशङ्क्य निराह -- नापीति ।। सहकारिविरहप्रयुक्तः सहकारिविरहेणोत्तरसमयसंबन्धविशिष्टतया जन्यो यस्तृप्तिरूपकार्यस्य प्रागभावस्तद्वत्वं पिपासोपशमनकारणत्यमित्यर्थः । तावता त्वदुक्तनिर्वचन ९ । भूतप्रागभावस्य प्रागभावान्तरभावात्तत्र
सहकारिविरहप्रयुक्तघटप्रागभावरूपकार्याभाववत्वरूपत्वदुक्तकारणत्वाभावा द्घटादिप्रागभावेऽतिव्याप्तिरित्यर्थः । दण्डादेरहेतुत्वेति ।। तदा प्रागभावसत्वेपि तस्य सहकारिविरहप्रयुक्तत्वाभावात् । न चेष्टापत्तिः । सर्वदै तत्र

हेतुत्व १० व्यवहारादिति भावः । तस्मादिति ।। पिपासोपशमनकारणत्वस्य शक्तितोऽन्यस्यायोगादित्यर्थः ।।

-

१.सहकारिशब्देनेत्यादि नास्ति-नं.ग. २.'तावता' इति नास्ति-नं.ज.क. ३.हप्रयुक्तका -नं. ४.न्धःकारणमित्यज्ञात्वा -नं. न्धकारममित्यज्ञात्वा - ज.क. ५.कारणत्वमज्ञात्वेत्यादि नास्ति-ग. ६.ल्येतरस -रा. इतरसमव - ज. समवधानेति नास्ति-ग. ७.प्रागभावेत्यादि नास्ति- नं. ८.आका-उ. ९.'स्येति' । इत्येतदर्थकतयेत्यन्वयः । आत्माश्रयेति । कारणत्वरूपनिर्वचने कारणपदप्रवेशादित्यर्थः । प्रागभाव इति । घटादिकारणी' इत्यधिकम्- उ. १०.तुल्य - उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ६२.

---------- ---------- -------

--मे १ वानुमेयमिति शक्तिसिद्धिः।।

किंचानन्यथासिद्धनियतपूर्ववृत्तित्वमेव कारणत्वं चेद्रासभादौ तदभावो न तावदन्यथासिद्ध्या । नियतपदवैयर्थ्यात् ।।

नापि -- पूर्ववृत्तित्वस्यानियतत्वेन । व्यक्त्यपेक्षया नियमस्य दण्डादावप्यभावात् । जात्यपेक्षयानियमस्य च रासभेऽपि प्रसङ्गात् । संभवति २ ह्यनादौ संसारे घटाजातीयाद्रासभजातीयस्य ३ कदाचिदपि व्यवहितपूर्ववृत्तित्वानियमः ।।

नाप्यव्यवहितपूर्ववृत्तित्वस्यानियतत्वेन ।

-रासभादेरकारणत्वान्यथाऽनुपपत्या च शक्तिसिद्धिरिति भावेनाह -- किंचान ४ न्यथेति ।। चेदित्यनन्तरं राशभादेर्घटादिकं प्रति कारणत्वाभावो न स्यादि ५ ति शेषः । कुतो न व्यादित्यत आह -- रासभादावित्यादि ।।

पूर्ववृत्तित्वस्यानियतत्वेनेति ।। रासभादौ तदभाव इत्यनुषङ्गः । किं व्यावहितपूर्ववृत्तित्वस्यानैयत्येन रासभादौ कारणत्वाभावोऽन ६ भिमत उताव्यवहितपूर्ववृत्तित्वस्यानैयत्वेनेति ।। आद्ये रासभादावतिप्रसङ्गं व्यानक्ति -- संभवति हीति ।। अन्त्यं निराह -- नापीति ।। अनियतत्वेनेत्यनन्तरं पूर्ववदनुषङ्गः ।

-

१.'एव' इति नास्ति -रा. णत्वेनानु -ज. २.'नह्यनौदौ' इत्यस्ति -नं.ज. ३.कदाचिदपि' नास्ति- रा. ४.चान्यथा-उ. ५.त्यर्थः-उ. ६.वोऽभि -उ.

-

शक्ता-वत्ति-पकम्) शक्तिवादः पु - ६३.

---------- -------- -------

व्यवहित १ नियपूर्ववर्तिनो यागादेः स्वर्गाद्यहेतुत्वापातात् । सापूर्वस्य यागस्याव्यवहितत्वमस्तीति चेन्न । पूर्वं प्रतीतेन यागस्य स्वर्गहेतुत्वेन पश्चादपूर्वस्य कल्पनीयतया तदव्यवहितत्वस्य कारणत्वशरीते प्रवेशायोगात् । अन्यथाऽपूर्वं वाच्यं स्यात् ।।

तस्यादतीन्द्रियशक्तिरेव कारणत्वम् । तां च प्रति स्वाश्रयजातीयस्य फलाव्यवधानं व्यापकम् । यागस्य च भोजनादेस्तृप्तिं प्रतीव स्वर्गं प्रति स्वरूपेणाव्यवधानं न सम्भवती २ त्यनुभवस्य स्मृतिं प्रतीव व्यापार ३ द्वाराऽव्यवधानं वक्तव्यमित्यपूर्वकल्पना युक्ता ।।

-

सापूर्वस्येति ।। अपूर्वसहितस्येत्यर्थः । तदिति ।। अपूर्वव्यवहित ४ स्येत्यर्थः । वाच्यं ५ स्यादिति ।। त्वन्मत इष्टसाधनत्वस्यैव लिङ्गादिवाच्यातया गुरुमत इवापूर्वस्य लिङ्गादिवाच्यत्वाभावात् । सापूर्वस्य स्वर्गाव्यावहितपूर्ववृत्तित्वरूपकारण ६ त्वस्य यागनिष्ठस्य विध्यर्थत्वेऽपूर्वमपि लिङ्गादिवाच्यम् स्यात् न

त्वर्थापत्तिकल्प्यमित्यपसिद्धान्त इति भावः । शक्तिरेवेति ।। तथा च रासभादौ तदभावादेव कारणत्वाभाव इति
नातिप्रसङ्ग
इति भावः । नापि यागादावव्याप्तिप्रसङ्गादित्यत आह -- तां चेति ।। शक्तिं चेत्यर्थः। स्वाश्रय--
-
१.नियतपदं न -नं. ज. २.ति । अतो- रा. ३.द्वारपदं न -नं. ४.तत्वस्ये -उ. ५.च्यत्वं स्या -उ. ६.णस्य -उ.
-
न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ६४.
---------- ---------- ---------
एतदप्युक्तं सूधायाम्-- अतीन्द्रियमेवेत्यादिना ।।
नन्वेवं शक्तिः कारणत्वं चेत्सा कारणं न स्यात् । तथाच शक्तिर्दाहानुकूला न स्यादिति चेन्न १ । कारणत्वस्यापि कारणत्वस्येव कार्यप्रागभावव्याप्यप्रागभावप्रतियोगित्वरूपानुकूलत्वाश्रयत्वात् ।।
केचित्तु -- प्रतिबन्धकाभावत्वेन कारणत्वेऽन्योन्याश्रयान्मण्याद्यभावकूटस्य कारणता त्वयोक्ता । तथाचाननुगतानां तावदभावानां कारणता --
-
--स्येत्येवोक्ता २ वरण्यस्थदण्डे व्यभिचारः स्यादतः स्वाश्रयजातीयस्येत्युक्तुः । एतदपीति ।। रासभादेश्चा ३ कारणत्वान्यथानुपपत्याऽप्यतीन्द्रियशक्ति ४ सिद्धिरित्येतदपीत्यर्थः ।।
शक्तेः कारणत्वरूपत्वे बाधकमाशङ्क्य निराह -- नन्वेवमपि ।। व्याप्ये ५ ति ।। व्याप्तिः कालिकी ध्येया । दण्डादेः कारणस्येव तच्छक्तेरपि तादृशप्रागभावप्रतियोगित्वादिति भावः । प्रकारान्तरेण शक्तिसिद्धिमन्यापदेशेनाह -- ६ केचित्विति ।। अन्योन्येति ।।

मण्याद्यभावानां प्रतिबन्धकाभावत्वे ७ ज्ञाते तदभावानां कारणत्वज्ञानं कारणत्वज्ञाने च सति कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वज्ञानं सति च तस्मिन् प्रतिबन्धकाभावत्वेन तदभावानां कारणत्वज्ञानमित्यन्योन्याश्रयाद्धेतोरभावकूटस्य कारणता त्वयोक्तेत्यर्थः ।।

ततश्च किमित्यतः स्वाभिमतसाध्यमाह -- तथाचेति ।।

-

१.'न' इति नास्ति-रा. २.क्तौ वनस्थ -उ. ३.श्चका -उ. ४.क्तिरि -उ. ५.प्त्येति -उ. ६.'केचित्त्विति' इति नास्ति -उ. ७.त्वज्ञानं कार -उ.

-

शक्ता-वत्ति-पकम्) शक्तिवादः पु - ६५.

---------- -------- ----------

तत्तदनन्तनिष्ठान १ न्तधर्माणां कारणतावच्छेदकत्वमिति कल्पनाद्वारं शक्तिकल्पनम् । अन्यथा तवापि समवायो न सिध्येति। क्लृप्तैरनन्तैः स्वरूपसम्बन्धैरेव विशिष्टप्रतीत्युपपत्तेरित्याहुः ।।

किञ्चैवमुत्तेजकाभावविशिष्ट २ मण्यभावस्य हेतुत्वं स्वीकृत्य शक्त्यपलापे प्रायश्चित्ताभावसहकृतसन्ध्यावन्दनाद्यकरणस्य नरकहेतुत्वसंभवात्त ३ न्निवत्येमपि दूरितापूर्वं न सिध्येत् ।।

एवं ज्योतिष्टोमादि ४ जन्यमपूर्वमपि न सिध्येत् । अन्वयव्यतिरेकाभ्यां साङ्गयागप्रगभाव ५ विशिष्टात्माभावस्यैव स्वर्गादिफलहेतुत्वोपपत्तेः ।

-

अभावकूटस्य कारणत्वे सतीत्यर्थः । अन्यथा कल्पनागौरवानादर इत्यर्थः । तवापीति ।। जातिगुणक्रियाविशिष्टप्रतीयतयो विशेषण ६ संबन्धनिमित्तका इत्यादिरूपेण समवायमनुमिमानस्य तवेत्यर्थः । अत्र पक्षेऽरुचिबीजं तु प्रतिबन्धकाभावानां वक्ष्यमाणदिशा विशिष्टविधित्वादिनाऽनुगतिपक्षेऽस्य दोषस्याभावात् अन्यथानुपपत्या

शक्तिकल्पनानवकाश इति बोध्यम् । तथाऽपि तत्पररीत्या परस्यापादनसंभवादेतत्पक्षावतार इत्यदोषः ।।
अपूर्वप्रतिबन्द्याऽपि शक्तिं साधयति -- किञ्चैवमिति ।। पूर्वत्र श्रुत्यादिनिरूपणवादे अत्र नैयायिका इत्यादिनोक्तरीत्ये ७ वशब्दार्थः । अपूर्वमपीति ।। यागजन्यापूर्वमपीत्यर्थः । कथं तर्हि चिर ८ ध्वस्तयागादेः स्वर्गादिहेतुतेत्यत आह -- अन्वयेति ।। उपपत्तेरित्येतद्व्यनक्ति-- आत्मन इति।।

-

१.नां तद्धर्म- रा. २.प्रतिबन्धकाभावहे -रा. नं. वस्य हे-ज. ग. ३.त् प्रायश्चित्तेन निव -रा. प्रायश्चित्तनिवर्त्य -ज. ग. ४. साध्यम -ग. ५.इतः । संभवात्' पर्यन्तं नास्ति -ग. ६.षण -उ. ७.त्येत्येवं -उ. ८. न्तनया -उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ६६.

---------- ---------- -------

आत्मनः स्थायित्वेन विशेष्याभावाभावेपि प्रागभावरूपविशेषणाभावेन विशिष्टाभावसंभवात् ।।
नचास्य १ विशिष्टाभास्यानन्तत्वेन फलानन्त्यं २ स्यादिति शङ्क्यम् । सावधिकफलबोधकश्रुतिबलादपूर्वस्येवोक्तस्य विशिष्टाभावस्यापि सावधिकफलजनकत्वस्वभावकल्पनात् ।।
अपि च यत्र देवदत्तादिशरीरं प्रत्यक्षेण गृहीतं प्रत्यक्षान्तरेणानुमानादिना वा पुनर्नानुभूतं तत्रापि तच्छरीरस्मृतिस्तावदुत्पद्यते ।
-इष्टापूर्तादिकारिणो यजमानात्मनः स्थायित्वेऽपि तस्य कृतयागादित्वेन तत्र तत्प्रागभावाद्विशेषणाभावप्रयुक्तो विशिष्टभावः सुलभ एव, मण्यादिसत्वदशायामुत्तेजके
सत्युत्तेजकाभावविशिष्टमण्याद्यभावसत्ववदिति भावः।।

ननु यागस्यैव प्रागभा ३ वविरोधितयाऽऽशुतरविनाशियागनाशे प्रागभावोन्मज्जनात्र विशेषणाभावसंभव इति चेन्न । यागस्येव तद्ध्वंसस्यापि तत्प्रागभावविरोधित्वात् ।।
प्रतिबन्धकाभाववैषम्यमाशङ्क्य निराह -- न चेति ।। सावधिकेति ।। 'अमृतो वा व सोमपो भवति यावदिन्द्रो यावन्मनुर्यावदादित्य' इत्यादिश्रुतीत्यर्थः । यथा फलानन्त्यशङ्का नास्ति तथा प्रतिबन्ध्यन्तरमाह -- अपि चेति ।। अनुभव ४ प्रसङ्गाभावरूपविशेषणस्याभावोपपादनायोक्तं प्रत्यक्षान्तरेणानुमानादिना वा
पुनर्नानुभूतमिति ।
-
१.स्यापि -नं. २.'स्यादिति' इति नास्ति- रा. ३.वाभावताय - उ. ४.प्रागभा-उ.
-
शक्ता-वत्ति-पकम्) शक्तिवादः पु - ६७.
---------- ------- ---------
तां च स्मृतिं प्रत्यन्वयव्यतिरेकाभ्यां तदनुभवप्रागभावविशिष्टात्म १ विरहः स्मृतिपर्यन्तस्थायी कारणमस्तु । कृतमनुभवस्य स्मृतिहेतुत्वमङ्गीकृत्य तन्निर्वाहाय संस्कारकल्पनया ।।
न चात्र स्मृतिरूपफलसा २ तत्यशङ्काऽवकाशोप्यस्ति ।। संस्कारकल्पनापक्ष इव सदृशादृष्टचिन्तासहकारिवैकल्प्यादेव फलोभावोपपत्तेः ।।
यदि च ३ तत्र स्वर्गस्मरणादो कल्पृप्तकारणभावस्य यागानुभवादेरेव लघवेन भावरूपापूर्वसंस्कार ४ द्वारा कारणत्वं व्यवस्थाप्य तदभावात्कार्याभावोपपादनं ; तर्हिहापि ५ दाहे क्लृप्तकारणा ६ भावस्य वह्नेरेव लाघवाद्भावरूपशक्त्या कारणत्वं निर्वाह्य तदभावात्कार्याभाव

उपपाद्यताम् । कुतमुत्त ७ म्भकाभावविशिष्टप्रतिबन्धकाभावस्य हेतुत्वकल्पनया ।।
तस्मात्प्रतिबन्धकाभावो न हेतुरिति प्रतिबन्धकसमये शक्त्यभावादेव दाहाभावो वक्तव्य इति शक्ति सिद्धिः ।।
-
कुतमिति ।। अवमित्यर्थः । प्रागुक्तदोषोऽत्र नेत्याह -- न चात्रेति ।। प्रतिबन्दीद्वये परमुखेनैव समाधिं वाचयित्वाऽत्रापि तथेत्याह -- यदि चेति ।।
-
१.त्माभावः- रा. २.सांत -रा.ग. ३.तत्रेति नास्ति -रा. ४.रादि -रा.नं.ग. ५.दाह इति नास्ति -रा. ६.णभा -रा, णस्या भा -नं. ७. त्तेजका -रा.

-
न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ६८.
---------- ---------- -------
ननु -- शक्तिपक्षे पूर्वस्याः शक्तेर्नाशात्प्रतिबन्धकापनये वोत्तेजकसमवधाने वा कथं पुनर्दाहः । यदि च ताभ्यां शक्त्यन्तरोत्पादस्तताऽननुगतस्यापि प्रतिबन्धकाभावस्य हेतुत्वं तवापिसमानमिति चेन्न ।। सत्ये २ व कुठारे ३ कदाचित्कुण्ठत्ववत्सामग्र्यां संशयोत्तरप्रत्यक्षस्थलेऽनुमित्यभाववत्ससत्येवापूर्वे कदाचितविपाकवच्च सत्यमेव शक्तौ तस्याः ४ कदाचित्कण्ठीभाववलक्षणावस्थाविशेषस्य कल्पनात् ।।
उक्तं हि सुधायां 'व्यक्तिशब्देन शक्तेरेवावस्थाविशेषस्य विवक्षितत्वा'दिति ।।
किंचास्तु त्वया वक्ष्यमाणे ५ पक्षचतुष्टये त्वदनभिमते --
-

शक्तिपक्षे बाधकमाशङ्क्यानेकदृष्टान्तपूर्वं निराह -- नन्वित्यादिना ।। उक्तं हीति ।। अत्ता चराचरेत्याधिकरणसुधायाम् शक्तेरवस्था विशेष एव न तु शक्त्यन्तरित्येतदुक्तमित्यर्थः । शक्तिर्वव्यक्त्यात्मनाऽस्तीत्युक्तौ कानामव्यक्तिरिति पृष्टस्योत्तरं वक्ति -- शब्देनेत्यादिना ।।
मण्यादेः प्रतिबन्धकत्वान्यथाऽनुपपत्या च शक्तिसिद्धिरित्याह -- किंचेति ।। वक्ष्यमाण इति ।। विशेषणविशेष्यतत्संबन्धानामभावत्रयं वा --
-
१.क्षेपि -रा.न.ज.क. २.त एव -रा. ज. ३.स्वत एव -नं. क. अत ए-ग. ३.रस्य -रा.न.ज.ग.क. ४.स्यां -ग. ५.णप -ज.
-
शक्ता-वत्ति-पकम्) शक्तिवादः पु - ६९.
---------- -------- --------
-विशिष्टं पदार्थान्तरमिति पक्षे च कथंचिद्विशिष्टाभावस्यानुगमः कारणता च । तथाऽपि मण्यादे र्लोकसिद्धं कार्यानुकूलकिंचिद्धर्मविघटकत्वरूपं प्रतिबन्धकत्वं
न स्यादिति मण्यादेः प्रतिबन्धकत्वान्यथाऽनुपपत्या शक्तिसिद्धिः ।।
न च मणिः कार्यानुकूलविघटनरूपः प्रतिबन्ध एव, न तु प्रतिबन्धकः, तत्प्रयोक्ता पुरुष एव तु प्रतिबन्धकः, मणौ प्रतिबन्धकव्यवहारस्तु उपचाराद्वा स्यार्थे कप्रत्ययाश्रयणाद्वेति वाच्यम् । मुख्ये बाधकाभावात् । मणिना प्रतिबद्ध इति व्यवहारानुसारेण प्रतिबन्धक इत्यत्रापि कर्तर्था २ क प्रत्यस्यैवौचित्याच्च ।
-
विद्यमानस्यापि प्रतिबन्धकरूपविशेष्यस्यैव प्रतियोगितावच्छेदकभेदेनाभावो वा देशान्तरस्थानुमुत्तम्भकाभावविशिष्टानां मण्यादीनामत्रत्याभावो वा विशेषणविशेष्ययोर्यः संबन्धस्तदभावो वा कारणमित्युत्तरभङ्गेः वक्ष्यमाण इत्यर्थः । कर्त्रेर्थकप्रत्ययस्येति ।।

'ण्वल्तृचाविति' कर्तरि विहितण्वुल्प्रत्ययस्येत्यर्थः ।।
ननु -- कारणीभूतस्वाभावप्रतियोगित्वरूपप्रतिबन्धकत्वमेव मण्यादेरिति मते शक्तिसिद्धिर्नेत्यतः शक्तिं विना तदेवायुक्तमित्याह --किंचेति ।।
-
१.पुनः 'मण्यादे' रित्यन्तं नास्ति - रा. २.र्थक - नं-र्थेऽक -ज.
-
न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ७०.
---------- ---------- -------
किंच मण्याद्यभावस्य कारणत्वे मणेः प्रतिबन्धकत्वमपि न स्यात् । लोके कारणाभावरूपे दण्डाभावादौ प्रत्यवायकारणीभूतविहितकारणस्याभावरूपे विहितकरणे च प्रतिबन्धकव्यवहाराभावात् ।।
तस्माद्दु १ ष्टान्वयव्यतिरेकाभ्यां कारणत्वानुमित्यन्यथाऽनुपपत्या रासभादेरकारणत्वान्यथाऽनुपपत्याऽपूर्वादिप्रतिबन्ध्या
मण्यादेर्लोकसिद्धप्रतिबन्धकत्वान्यथाऽनुपपत्या
त्वदभिमतप्रतिबन्धकत्वान्यथाऽनुपपत्या २ च शक्तिसिद्धिः ।।
इति शक्तावर्थापत्तिपञ्चकम् ।। ६ ।।

-
तथा च कारणीभूतशक्तिविघटनरूपत्वादिनैव प्रतिबन्धकत्वं त्वयाऽपि वाच्य ३ म्। प्रागुक्तं सर्वं निष्कृष्यानुवदन्नुपसंहरति -- तस्मादिति ।। अपूर्वादीत्यादिपदेन सं ४ ग्रहः ।
केचितित्यानोक्तकल्पनालाघवस्यारुचिग्रस्तत्वान्न तस्य संग्रहः कृतः।।
शक्तावर्थापत्तिपञ्चकम् ।। । ६ ।।
-
१.स्मादन्वय -रा.नं.ग. २.त्वदभिमतेत्यादि नास्ति - ज. ३.'इति भाव' इत्यधिकम् - उ. ४.स्कारग्र-उ. ।'३ ८ ' -उ.

-

प्रभास्य-हेत्वे-प्रचङ्गः) शक्तिवादः पु - ७१.

---------- ---------- --------

अथ प्रतिबन्धकाभावस्य हेतुत्वे प्रकारचतुष्टयभङ्गः ।। ७ ।।

किंच -- त्वन्मते विशिष्टं विशेषणविशेष्यतत्सम्बन्धातिरिक्तं नास्तीत्युत्तम्भकाभावविशिष्टप्रतिबन्धकाभावोऽपि क्वचिद्विशेषणाभावरूपः क्वचिद्विशेष्याभावरूपः १ क्वचित्सम्बन्धाभावरूप इत्यननुगमान्न हेतुः । अभावत्रयस्यैकशक्तिमत्वेनानुगमे च शक्तिसिद्धिः ।।

-

अथ प्रतिबन्धकाभावस्य हेतुत्वभङ्गः ।। ७ ।।

एवमुत्तेजकाभावविशिष्टमण्याद्यभावरूपदृष्टकारणाभावादेव दाहानुत्पत्युपपत्तेर्न शक्तिसिद्धिरित्यादिना कृतचोद्यस्य श्रुत्यादिविरोधार्थापत्तिपञ्चकविरोधाभ्यां दूषणमुक्त्वाऽधुना तादृशाभावस्य कारणत्वमेव न युक्तं येन शक्त्यपलापो धटेतेति भावेनाह -- किं चेति ।। मणौ हि उत्तेजकाभावसहकृतस्याभावो हेतुरिति प्राञ्च इत्युक्त्वा विशिष्टं २ नार्थान्तरं ३ एतदभावोऽनुगतः स्यादित्यादिना तद्दूषयित्वा स्वयं तत्सर्वं निष्कृष्य वदन् दूषणमाह -- त्वन्मत इत्यादिना ।। एकशक्तिमत्वेनेति ।। एककार्यानुकूलशक्तिमत्वेनेत्यर्थः ।।

-

१. उभयत्र रूपपदं न -रा. २. वार्था -उ. ३.येन तद - उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ७२.

---------- ---------- ---------

न च विशेषणविशेष्यतत्सबन्धाभावाः विशिष्टविरोधित्वेनानुगताः, तत्र विशेषणं वा विशेष्यं वा तत्ससम्बन्धो वा

नास्ति तत्र विशिष्टं नास्तीति प्रतीतेरिति वाच्यम् । विशिष्टविरोधित्वं हि विशिष्टविरहात्मकत्वं वा तव्याप्यत्वं वा वाच्यम् । तदुभयमपि प्रतियोगिनो विशिष्टस्याननुगमे तदभावस्याप्यननुगमादननुगतमेव । विशिष्टस्येवानुगमे तु तदभावोऽपि स्वत एवानुगत इति किमनया कृसृष्ट्या ।।

ननु - तर्हि स्वरूपेण विद्यमानस्यैव मणेरुत्तेजकसमये उत्तेजकाभावावच्छिन्नत्वेनाभावोऽस्ति । प्रतियोगिभेदेनेव प्रतियोगितावच्छेदकभेदेनाप्यभावभेदात् ।

-

शशधोक्तमेवानुगमकमाशङ्क्य निराह -- न चेति ।। त्रयाणां विशिष्टविरोधित्वं व्यनक्ति -- यत्रेति ।। अनुगत इति ।। विशेषणविशेष्यतत्सम्बन्धरूपत्रितयात्मकत्वे तदभावस्यापि त्रित्वापत्याऽननुगमात् । तद्विरहात्मकत्वं वा तद्विरहव्या १ प्यत्वं वाऽननुगतेत्यर्थः । अनुगमे त्विति ।। विशेषणादित्रितयानुगतं विशिष्टं पदार्थान्तरमित्युपगमे त्वित्यर्थः । कृसृष्ट्येति ।। विशिष्टविरोधित्वेनानुगमः विरोधित्वं विरहात्मत्वा २ दिति कल्पनयेत्यर्थः ।।

एवं शशधराभिमतमभावत्रयपक्षं मण्याद्युक्तदिशा निरस्येदानीमुदयनाद्यभिमतमतिरिक्ताभावपक्षमाशङ्कते -- ननु तर्हिति ।। प्रतियोगिभेदे ३ नैवेति ।। यद्यपि प्रतियोगिभेदस्थले प्रतियोगितावच्छेदकभेदस्यावश्यकत्वात्तद्भेदादेव भेदस्तथाऽपि यथा प्रतियोगिभेदोऽभावभेदव्याप्तस्तथा प्रतियोगितावच्छेदकभेदोऽपीत्यर्थः ।

-

१.प्तत्वं -उ. २.त्वादिरि -उ. ३.न वे - उ.

-

प्रभास्य-हेत्वे-प्रचङ्गः) शक्तिवादः पु - ७३.

कथमन्यथा दण्डिनि पुरुषे सत्येव केवल १ पुरुषो नास्तीति कैवल्यावच्छिन्नत्वेन पुरुषाभावप्रमा । तथाचोत्त २ म्भके सत्यसति च मण्यभावकाले उत्तम्भकयुक्तमणिकाले चानुगतो मण्यभाव एव हेतुरिति चेन्न । मन्मते पदार्थान्तरस्य विशिष्टस्यैवावच्छिन्नाभावप्रतियोगित्वेन मणेस्तदप्रतियोगित्वात् । त्वन्मते च विशिष्ये सति विशिष्टाभावबुद्धेः सविशेषणे हीति न्यायेन विशेषणाभावविष ३ त्वेनाननुगतमतादवस्थ्यात् ।

-

स च प्रतियोगिनि सत्यपि वर्तमानोऽभावः प्रागभावादित्रितयान्य एव ध्वंस एव वा क्लृप्तात्यन्ताभाव एव वा मण्युक्तदिशा ४ ध्येय इति भावः ।। अस्त्वेवं ततश्च किमत्यत आह -- तथा चेति ।। उत्तम्भकदशायां मणिर्न चे ५ त्तदोत्तम्भकाभावरूपावच्छेदकस्य तदवच्छेद्यविशेष्यस्य चोभयस्याभावात्तत्प्रयुक्तो मण्यभावः, उत्तम्भके सति मणिर्न चेत्तदा तु विशेष्याभाव उत्तम्भकयुक्तमणिदशायां चोत्तम्भकाभावरूपावच्छेदकाभावप्रयुक्तो विशेष्याभावोऽनुगत इत्यर्थः। मणेस्तदप्रतियोगित्वादिति ।। तथा च त्वदभिमताभाव एवालीक इति कस्य कारणतया शक्त्यपलापः स्यादिति भावः। मण्युक्तमेव दोषमाह -- त्वन्मते ६ चेति ।।

-

१.लः-रा.ग. २.त्तेजके - रा. ३.त्वेननु -रा. ४.ज्ञे -उ. ५.'नचेत्यन्तं नास्ति -उ. ६. वेति -- उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ७४.

कथमन्यथा १ शिखैव नष्टा न २ तु पुरुष इत्यवाधितधीः । कथं च विशेष्यसत्वाविरोधिनस्तदभावत्वम् ।
विशेषणसत्वमात्रविरोधिनस्तदभावत्वाभावश्च।।
किञ्चास्यैव मणेरुत्तेजकात्पूर्वमुत्तेजककाभावविशिष्टतया तदवच्छेदेनाप्यभावोऽसम्भवी । न च मण्यादेः पूर्वमुत्तेजकाभावविशिष्टत्वेपीदानीमुत्तेजका ३
भावाभावेनेदानीमुत्तेजतकाभावविशिष्टत्वेनाभावोस्तीति वाच्यम् । एवं ही ४ दानींतनोत्तम्भकाभाववैशिष्ट्यं प्रतियोगितावच्छेदकं वाच्यम् । तच्चायुक्तम् । तस्योत्तेजकसमवहितमणौ कदाचिदप्यभावेन --

-

उदयनमत इत्यर्थः । कथमन्यथेति ।।
विशिष्टाभाववबुद्धेर्विशेष्याभावपरत्व इत्यर्थः । विशेषणाभावविषयत्वं विशिष्टाभाववबुद्धेर्व्यनक्ति -- कथं चेति ।। विशेषणसत्त्वेति ।। कथं चेत्यनुषङ्गः ।।
एतादृशाभाववकल्पनं न्यायसिद्धान्तविरुद्धं चेत्याह -- किञ्चास्यैवेति ।। यस्याभाव उच्यते तस्यैव मणेरित्यर्थः । कुमुत्तेजकात्पूर्वं तदभावः प्रतियोगितावच्छेदकोऽथोत्तेजकदशायाम् । आद्य आह -- उत्तेजकादिति ।। द्वितीयमाशङ्क्य निराह -- न चेति ।. इदानीमिति ।। उत्तेजकदशायामित्यर्थः । इदानींतनेति ।। उत्तेजकालीनेत्यर्थः ।

-

१.था विशिष्टस्यैव नष्टा - क. २.तु शब्दो नास्ति -नं ३.कभावेने -नं. काभावेनो -ग. ४.ह्युत्तेजकाभाव -नं.

-

प्रभास्य-हेत्वे-प्रचङ्गः) शक्तिवादः पु - ७५.

---------- ---------- --------

--व्यधिकरणधर्मावच्छन्नाभावापत्याऽपसिद्धान्तात् । तस्य केवलान्वयितयोत्तेजकात्पूर्वमपि सत्वेन तदाऽपि दाहापत्तेश्च ।।
किञ्च विद्यमानस्याप्यविद्यमानधर्मावच्छेदेनाभावे व्यासज्यप्रतियोगि १ कोप्यभावः स्यात् । स च नेष्टः ।।
-
व्यधिकरणेति ।। प्रतियोगिता २ व्यधिकरणेत्यर्थः । अपसिद्धान्तादिति ।। यथा श्रुङ्गे शशीयत्वस्य कदाऽप्यभावेन शशीयत्वावच्छिन्नश्रुङ्गाभावो नोपेयते तथात्वे पटत्वावच्छिन्ने भूतले घटो नेति प्रतीत्या व्यधिकरणधर्मावच्छिन्नाधिकरणताकाभावस्यातिरिक्तस्याङ्गीकर्तव्यताप्रसङ्गभयात् व्यक्तमेतदनुमितिलक्षणे तट्टीकासु ; तथेहाऽप्युत्तेजकसहकृतमणावभावप्रतियोगितावतीदानींतनोत्तेज ३ काभावरूपावच्छेदकस्यान्यत्रैव सत्वेनेह तदा कदाऽप्यभावेन प्रतियोगिताव्यधिकरणत्वावच्छिन्नाभावाङ्गीकारेऽप्रसिद्धान्तादित्यर्थः ।।
यदि कश्चित्ब्रूयादस्तु तादृशोप्यभाव इति तदाऽपि दोषमाह -- तस्येति ।। उत्तेजककलीनोत्तेजकाभावरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावरूपे ४ त्यर्थः ।।
अतिप्रसङ्गं चाह -- किञ्चेति ।। व्यावज्येति ।. घटसत्वस्थले घटपटौ न स्त इतिधीबलाद्द्वित्वावच्छिन्नप्रतियोगिताको विद्यमानघठपटोभयप्रतियोगिको ५ क्तातिरिक्ताभावोऽपि स्यात् । अन्यतराभावस्यैव प्रतीत्युपपत्तावप्रामाणिकोऽभावो न तत्र नैयायिकैः स्वीकृत इत्यर्थः ।।
अस्तु तादृशोऽप्यभाव इति वदन्तं प्रति दोषान्तरमाह --अपि चैवमिति ।।
-
१.ताको -क.ग.ज. २.ना व्य-उ. ३.त्तम्भका-उ. ४.रूपपदं न-उ. ५.अतिरिक्तोऽभावोपि -उ.

-

---------- --------- -------

अपि चैवं रक्तादशायां घटस्य श्यामरूपावच्छिन्नत्वेनाभावा १ पत्या प्रत्यभिज्ञाविरोधः स्यात् ।.

न च घटस्य श्यामत्वेनास २ त्वेऽपि घटत्वेन सत्वान्न तद्विरोध इति वाच्यम् । तथात्वे ३ प्रत्यभिज्ञाया घटत्वावच्छिन्नाभेदविषत्वेनोपपत्या श्याम ४ त्वावच्छिन्नत्वेन भेदापत्या त्व ५ दनभिमतभेदाभेदप्रसङ्गात् ।। एवं तत्तक्षणावच्छेदेनापि भेदापत्या क्षणभङ्गः ६ स्यात्। एवमेकस्मिन्नपि क्षणे संयोगतदभावावच्छेदेन भेदाभेदौ स्याताम् ।।

-

अपि चैवमिति ।। विद्यमानस्यैव वस्तुनोऽवच्छेदकाभा ७ वनिमित्ताभावस्वीकार इत्यर्थः ।। प्रत्यभिज्ञेति ।। यः श्यामः स एवायं रक्त इति प्रत्यभिज्ञेत्यर्थः । भेदाभेदेति ।। घटत्वेनाभेदः श्यामत्वेन भेद इति भेदाभेदेत्यर्थः । तत्क्षणेति ।। एतत्क्षणावच्छन्नो नेति प्रतीत्या प्रतिक्षणमविद्यमानपूर्वोत्तरक्षणावच्छेदे ८ न भेदसंभवात् क्षणिकता स्यादित्यर्थः । भेदाभेदाविति ।। वृक्षे शाखायां ९ कपिसंयोगस्य मूले तु तदभावस्य सत्वेन वृक्षो मूले कपिसंयोगवान्न भवति अग्रे कपिसंयोगाभाववान्नेति वा प्रतीत्या संयोगवदभेदः संयोगाभाववद्भेदश्च वृक्षे संयोग १० तदभावावच्छेदेन स्याताम् । तथा संयोगाभावस्थले संयोगाभाववदभेदः संयोगवद्भेदश्च स्यादित्यर्थः ।।

-

१.वत्वाप- नं.ग. २.त्त्वाप तद्वि-नं. ३.प्रत्यभिज्ञा इति नास्ति -रा. ४.माव -नं.क.ज. ५.त्वन-रा. ६.ङ्ग प्रसङ्गात् -रा. ७.भावस्वी -उ. ८.दभेदसंभवेन -उ. ९.सर्वत्र 'पिक' इत्यस्ति -उ. १०. गावच्छेदेन -उ.

-

प्रभास्य-हेत्वे-प्रचङ्गः) शक्तिवादः पु - ७७.

किंच प्रतियोगिसत्वकालेऽ१ पि सन्नयमभावो न तावद्ध्वंसः प्रागभावो वा । तयोः
प्रतियोग्यसमानकालीनत्वात् । ध्वंसस्यानन्तत्वेनोत्तेजकापन २ यनकालेऽपि सत्वेन मणिसत्वेपि दाहापत्तेश्च । अत एव नात्यन्ताभावः । तस्यानाद्यनन्तत्वेन प्रतिबन्धककालेऽपि सत्वेन तदाऽपि दाहापत्तेः ।।
ननु - विशिष्टात्यन्ताभावं प्रति विशेषणस्य विशेष्यस्य वा प्रागभावो ३ ध्वंसो वा प्रत्यासत्तिः । तथाच विशेषणादिदशायामत्यन्ताभास्याप्रत्यसन्नत्वान्न दाहोत्पादकत्वं न वा प्रतीतिरित चेन्न । तेषु प्रत्यासत्तित्वावच्छेदकैकरूप ४ स्याभावात् । अननुगताना ५ मपि प्रत्यासत्तित्वे ६ वाऽपश्यकानां तेषामेव दाहहेतुताऽस्तु । किं विशिष्टा ७ भावकल्पनया ।।

-

ननु विशेष्यसत्वस्थलेऽवच्छेदकभेदेनाङ्गीक्रियमाणोऽभावः संसर्गाभाव एव न त्वन्योन्याभावः । येनोक्तदोषः स्यादित्यत आह -- किंचेति ।। दाहापत्तेरित्युपक्षणम् । तदाऽप्यभावधीप्रसङ्गाच्चेत्यपि ध्येयम् ।।
अत्यन्ताभावपक्षमुपेत्य तत्रोक्तदोषोद्धारमाशङ्कते -- नन्विति ।। तेष्विति ।। यद्यपि ध्वंसप्रागभावौ द्वावेव शङ्कितौ । तथाऽपि विशेषणविशेष्यरूपप्रतियोगिभेदाच्चतुष्ट्वमुपेत्य तेष्वित्युक्तम् ।

-

१.'अपि' इति नास्ति-नं.रा. २.यनयन-नं. ३.प्रध्वं-रा.ग. ४.पाभा-नं.ग. ५.नां तेषां प्र- रा. नामपि तेषां -ग. ६.चाव -रा. त्वेनाव -क.ग. ७.ष्टात्यन्ताभा-नं.रा.ग.ज.

---------- ---------- --------

एतेन कालविशेष एव प्रत्यासत्तिरिति निरस्तम् । अननुगमात् । सर्वत्रापि तत्तत्कावलविशेषस्यैव हेतुत्वापत्या कारणान्तरापलापापत्तेश्च ।।

नाप्ययमुत्पादविनाशशीलस्तुरीयोऽभावः । ३ उत्तम्भकोपनये उत्तम्भकाभावविशिष्टमण्यभावस्योत्पत्तेरपनये च विनाशादिति वाच्यम् । उक्तरीत्याऽवश्यकेन विशेषणाभावनैव तव्यवहारोपपत्तौ तुरीयाभावकल्पकाभावात्

।। न चायं कालविशेषावच्छेदेनात्यन्ताभाव २ एवेति वाच्यम् । तथात्वे प्रागभावादेरपि तथात्वापातात् । ३ इह ४ घटो नेत्यत्रापि घटभूतलसंबन्ध एव प्रतियोगी न तु घटः । वक्ष्यते चैतदभावप्रस्तावे ।।

-

यद्वा ध्वंसादिव्यक्तिबाहुल्यापेक्षया तेष्वित्युक्तिः । एवं चाननुगम एव क्वचित्कस्यचिदेव प्रत्यासत्तित्वस्वीकारादिति भावः। अननुगमादिति ।। क्वचित्प्रागभावकालः क्वचित्प्रध्वंसकाल इत्यननुगमादित्यर्थः । तुरीय इति ।। प्रागभावप्रध्वंसात्यन्ताभावरूपे ५ संसर्गाभावमध्ये सामयिकोपि ६ क्वचिदत्यन्ताभावोस्त्वित्यर्थः । कालविशेषेति ।।

उत्तम्भक७ कालविशेषेत्यर्थः।।

नन्वेवं -- विशेषणाभावादिना विशिष्टाभावापलापे घटा ८ द्यभावोऽपि न सिध्येत् । इह भूतले घटो नेत्यत्रापि घटभूतलसंबन्धाभावानैव तव्यवहारोपपत्तेरित्यत इष्टापत्तिमाह -- इह घटेति ।। व्यक्तमे ९ तन्न्यायमृते असतोऽभावप्रतियोगित्ववादे प्रथमपरिच्छेदे ।। वक्ष्यते इति।। अभावस्य स्वरूपादन्यत्र प्रत्यासत्तिरित्येतदाश्रयासिद्धेर्दोषत्वभङ्गे वक्ष्यत इत्यर्थः ।।

-

१.उभयत्र 'उत्तेजक' इत्यस्ति-रा. आदावस्ति-ग. २.वोस्त्विति -नं. ३.न चेत्यादि नास्ति -ज. ४.'भूतल' इत्यधिकम् -नं. ५.पसं-उ. ६.कश्चिद-उ. ७.'सत्व' इत्यधिकम् -उ. ८.टाभा-उ. ९.वन्या-उ.

-

प्रभास्य-हेत्वे-प्रचङ्गः) शक्तिवादः पु - ७८.

---------- --------- -------

ननु-- तर्हि मण्युत्तम्भकोभयसत्वकाले तदानीमुत्तम्भकाभावविशिष्टानां देशान्तरस्थानामन्येषां मण्यादीनामत्रत्या १ भावः कारणं ; न त्वत्र विद्यमानस्यैव मण्यादेरभावः । अत एवोदयनो 'न २ हि दण्डिनि सत्यदण्डानामन्येषां नाभाव'इत्याह । अन्यथाऽन्येषामिति व्यर्थं स्यादिति चेन्न । एवं हि उत्तम्भककालीनं दाहं प्रति विद्यमान ३ मणेरभावः कारणं न स्यात् । तथा चोत्तेजकागमनात्

प्राक् मणिकालेऽपि दाहः स्यात् । एतन्मण्यभावस्य तदानीमसत्वेऽपि तस्याहेतुत्वेन तद्विलम्बेन दाहविलम्बानुपपत्तेः । हेतुभूतस्य च तत्राविद्यमानानामन्येषां मणीनामभावस्योत्तेजकागमनात्प्रागपि सत्वात् ।।

-

उदयनोक्तं पक्षान्तरमाशङ्क्य निराह -- ननु तर्हित्यादिना ।। अभावस्य विद्यमानमण्यादिप्रतियोगिकत्वासंभव इत्यर्थः । अद ४ ण्डिनामपि न बहुव्रीहिः किंतु दण्डिनामेवेति योज्यम् ।।

-

१.त्योभा -रा.ग. २.तर्हि -ग. ३. नं म -क. ४.ण्डानामिति न ब -उ.

-

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ८०.

---------- ---------- --------

अथं मतं -- विशेषणविशेष्ययोः सम्बन्ध एव विशिष्टं, तथाच मण्युत्तम्भकाभावरूपोभयसंबन्धाभावो विशेषणाद्यभावव्यापकोऽनुगतो १

हेतुरिति चेत् । मैवम् । अयमप्यभावो हि मण्युत्तम्भकाभावारूबपसंबन्ध्या २ त्मकविशेषणद्वयविशिष्ट ३ संबन्धरूपविशेष्यस्याभावः । न तु संबन्धमात्रस्याभावोऽतिप्रसङ्गात् । तथा चायं विशिष्टाभावोऽहि यदि संबन्धझिरूपिविशेषणद्वयेन सह संबन्धरूपविशेष्यस्य यत्संबन्धान्तरं तदभावात्मकः तदाऽनवस्था । यदि तु तत्परिहाराय विशेषणाभावाद्यात्मकस्तदा पूर्ववदनगमतादवस्थ्यम् ।।

-

'अत्रोच्यते' इत्यादिना म ४ ण्युक्तं पक्षमाशङ्कते -- अथ मतमितित ।। अतिप्रसङ्गादिति ।। घठपटसम्बन्धाभावस्यापि दाहहेतुत्वप्रसङ्गादित्यर्थः । अयमिति ।। विशेषणविशेष्ययोः संबन्धरूपविशिष्टस्याभावोऽपीत्यर्थः । विशेषणद्वयेनेति ।। विशेषणविशेष्यरूपविशेषणद्वयेनेत्यर्थः । दण्डीत्यत्र दण्डचैत्रसंबन्धस्य विशिष्टशब्दार्थत्वे सति तुल्यन्यायतया संबन्धस्य तत्सं ५ बन्धीभूतविशेषणाभ्यां दण्डचैत्राभ्यां सह कश्चन सम्बन्ध एव विशिष्टशब्दार्थो वाच्यः । तत्रापि सम्बन्धस्य तत्संबन्धिभूतसंबन्धतत्संब्धिभ्यामन्य एव संबन्धो विशिष्टपदार्थ इति विशिष्टाभाववपक्षे ६ प्राचीनसंबन्धस्य संबन्धान्ताराभाव एव विशिष्टाभावो वाच्यः । ७ तत्राप्येवं तत्राप्येवमित्यनवस्थेत्यर्थः । तत्परिहारायेति।। अनवस्थापरिहाराय विशेष्यतत्सम्बन्धाभावात्मक इत्यर्थः ।।

-

१.'अपि' इत्यधिकम् -रा. २.न्धात्म-नं. ३.ष्टस्य सं- नं.ग.ज. ४.णिकृदु -उ. ५.बन्दिभ्यामन्य एव सम्बन्धो विशि-उ. ६.क्षेपि -उ. ७.एकं 'तत्राप्येव' मिति नास्ति -उ.

-

प्रभास्य -हेत्व-प्रचङ्गः) शक्तिवादः पु - ८१.

---------- ---------- --------

ननु - भवेदिदं यद्युत्तम्भकसहितमण्यादिकाले मण्यादिरूपविशेष्यस्य सत्वेऽप्यनुत्तम्भकाभाव १ विशेषणाभाववत्सम्बन्धरूपविशेष्यस्य सत्वेऽपि कदाचित्सम्बन्धिरूपविशेणाभावः स्यात् । न चैवं प्रकृते। सम्बन्धिनोरभावे सम्बन्धाभावस्यावश्यकत्वात् । तथा च सम्बन्धरूविशेष्याभाव एवानुगत इति चेत् । मैवम् . अनुगमाय तदनपेक्षायामपि सम्बन्धाभावमात्रस्य हेतुत्वेऽतिप्रसङ्गेनानतिप्रसक्तस्य कारणत्वाय तदपेक्षणात् । मण्युत्तम्भकाभावसम्बन्धस्य तदुभयमात्रवर्तित्वेन दाह्ये करतले दाहके वह्नौ च तत्सम्बन्धाभावस्य सदा सत्वेन केवलमणिकालेऽपि दाहप्रसङ्गाच्च ।।
-उक्तानवस्थादिदोष २ निरासाय वै ३ षम्यामाशङ्कते -- नन्विति ।। इदमिति ।। सम्बन्धान्तरमादायानवस्थोद्भवनमित्यर्थः । प्रकृत इति ।। सम्बन्धसम्बन्धिनोः सम्बन्धी विषय इत्यर्थः । सम्बन्धाभावस्येति ।। विशेष्यभूतसम्बन्धाभावस्येत्यर्थः ।। तदनपेक्षायामिति ।। सम्बन्धिभूतविशेषणानपेक्षायामित्यर्थः । तदुपेक्षणादिति ।। तथा च विशेष्यसम्बन्धाभावात्मकत्वेऽननुगमता ४ स्यादेवेति भावः ।।
ननु तदपेक्षाऽयामपि परिचायकत्वेनैव तदपेक्षाऽस्तु तावताऽतिप्रसङ्गाभावादित्यतो दोषान्तरमाह -- मणीति ।। मणेरुत्तम्भककाभावेन यः सम्बन्धस्तस्येत्यर्थः ।।
-
१.रूपेत्यधिकम् -क. रा.ग.ज. २.परिहाराय -उ. ३.शेष्य -उ. ४.दवस्थ्य -उ.

---------- ---------- --------

केचुत्तु -- संशयोत्तरप्रत्यक्षं विशेषदर्शनमिव प्रतिबन्धककालीनदाहं प्रत्युत्तेजकं हेतुरिति कल्पनेनैव सर्वसमामञ्जस्ये किं विशिष्टाभावस्य हेतुत्वकल्पने १ नेत्याहुः ।।
तस्माच्छुशधररीत्या विशेषणविशेष्यतत्सम्बन्धाभावत्रयं वोदयनादिरीत्या विद्यमानस्यपि प्रतिबन्धकरूपविशेष्यस्यैव प्रतियोगितावच्छेदकभेदेनाभावो वा देशान्तरस्थानामुपत्तम्भकाभावविशिष्टानां मण्यादीनाम २ त्यान्ताभावो वा मणिकृद्रीत्या विशेषणविशेष्ययोर्यः सम्बन्धस्तदभावो वा कारणमिति विद्यमानमणेः कारणीभूताभावप्रतियोगित्वरूपं प्रतिबन्धत्वमयुक्तमिति कार्यानुकूलविघटकत्वरूपं प्रतिबन्धत्वमेव वाच्यमिति मण्यादिविघटनीयशक्तिसिद्धिः ।।
इति प्रतिबन्धकाभावस्य हेतुत्वे ३ प्रकारचतुष्टयभङ्गः ।। ७ ।।

केचि ४ त्विति ।। अस्मिन् पक्षे शक्तिसिद्धेरभावोऽरूचिबीजं ध्येयम् ।।
देशान्तरस्थानामिति ।। उदयनादिरीत्येत्यनुकर्षः ।।
प्रतिबन्धकाभावस्य हेतुत्वभङ्गः ।। । ७ ।।
१.नयेत्या- रा.ग.ज. २. त्रत्याभा - रा.ग. ३.त्वप्र-क.ग. ४.दिति -उ. ५.न्धाभ-उ. ।३ ९ -उ.

तृणि-र्णाना-मेश-त्वसा-नम्) शक्तिवादः पु - ८३.
---------- --------- --------
अथ तृणारणिमणीनामेकशक्तिमत्वसाधनम् ।। ८ ।।
किञ्च -शक्त्यभावे तृणारणिमणीनां वह्निजातीय रूपकार्येऽननुगमेन १ हेतुत्वं न युक्तमिति तेषामेकशक्तिमत्वेनानुगमा २ र्थं शक्तिः स्वीकार्या ।।

अथ तृणारणिमणीनामेकशक्तिमत्वसाधनम् ।। ८ ।।

यद्यप्यनुमानखण्डे मणौ तृणारणिमणीनां वह्नौ कारणत्वेनैकशक्तिमत्वमुपेयमित्यादिना शक्तिसिद्धिं पूर्वपक्षयित्वा तन्निराकरणं सिद्धान्तितम् । तदपि निराकृत्य शक्तिं साधयति -- किं चेति ।। एवं ३ क्विचच्छक्तिसिद्धौ पदेऽपि तदनुमानं भविष्यतीति पूर्ववदभिप्राय ऊह्यः ।। एकशक्तिमत्वेनेति ।। एकजातीयकार्यानुकूलशक्तिमत्वेनेत्यर्थः । अन्यस्याभावादनुकूलत्वं च कार्याभावप्रयोजकाभावप्रतियोगित्वं कारणतदवच्छेदकोभवसाधारण् । तेन शक्तेरवच्छेदकत्वेऽपि नानुकूलत्वहानिः । एवं च शक्तीनां प्रतिव्यक्ति नानात्वेन तन्निष्ठानुगतजात्यैवैकजातीयशक्तिमत्वेनानुगतेतारवश्यकत्वाच्छक्तौ जातेश्च तव्व्यञ्चकसंस्थानविशोषादेरभावेनायोग इत्यादिदूषणानवकाशः। सिद्धान्ते जातेरभावाच्च ।।
यद्वा संसर्गानुगतैकैवैऽस्तु ४ । न चैवमेकतृणव्यक्तिनाशे ५ आश्रयनाशप्रयुक्तशक्तिनाशातृणान्तरादितः कार्याभावदोष इति वाच्यम् । आधेयशक्तिवादे वक्ष्यमाणदिशा समाधानसम्भवादित्याशयादित्याहुः ।।

१.'तृणारणिमणीणा' मित्यधिकम् -ग. २.माय-नं.रा.ग. ३.'च' इत्यधिकम् -उ. ४.शक्तिरित्यधिकम् -उ. ५.प्याश्र.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ९४.

न चाचाक्षुषद्रव्यत्वमुपाधिः । तैजसे १ त्र्यणके चाक्षुषे २ दाहानुकू ३ लातीन्द्रियोष्णस्पर्शवति साध्याव्यापकत्वात् । पक्षमात्रव्यावर्तकविशेषमवत्वेन
साध्यव्यापकताग्राहकतर्काभावेन प्रतिबन्धकसत्वे ऐन्द्रियकस्यापि तादृशधर्मं विना कार्यजनकत्व---

न चाचाक्षुषेति ।। आत्मनि तादृशादृष्टादिमत्वमादाय साध्यव्यापकत्वात्पक्षे साधनाव्यापकत्वादिति भावः । त्र्यणुकगतोष्णस्पर्शेऽतीन्दियत्वविवादिनं प्रत्याह -- पक्षेति ।। तृतीयान्तानामुपाधेरेवेत्यादिसाध्ये ४ नान्वयः । अनुकूलतर्कसध्रीचीनस्य तादृशस्याप्युपाधित्वे दोषाभावादाह-- साध्यव्यापकताग्राहकेति ।। निरुपाधिसहचार एव तादृशतर्क इत्यतो निरूपाधित्वमसिद्धमिति भावेनाह -- प्रतिबन्धकेत्यादि ।। प्रकृतहेतोरेवोक्ततर्कानुगृहीतत्वेन चेति ५ दाहस्यैतादृशधर्मान्यैन्द्रियिकत्वप्रयोज्यत्वं ६ प्रतिबन्धकालेऽपि दाहः स्यात् । न चैवमतः प्रतन्धकदशायां तादृशातीन्द्रियधर्मवत्वशून्यत्वबाद्वह्नेर्दाहरूपकार्याजनकत्वं दृष्टम् । ऐन्द्रियकत्वे तु सत्यपि दाहजनकत्वं न दृष्टमित्यप्रतिबन्धदशायामपि तादृशधर्मवत्वाभावे चाक्षुषद्रव्यादपि वह्निनतो दाहकार्यानुदयः स्यात् । तथा च हेतूच्छित्तिरूपविपक्षबाधकतर्कसहितत्वाद्धेतोः --

'अनुकूलेति तर्केण सनाथे सति बाधने ।
साध्यव्यापकताभङ्गात्पक्षे नोपाधिसंग्रहः। ७ ।।

१.सत्र्य -न.रा.ग. २.तादृशादीन्द्रिययोष्णस्य साध्यव्यापकत्वात्. इत्यस्ति-- रा. तादृशातीन्द्रियोष्ण-गा. ३. लस्थू -नं. ४.ध्येन्व-उ. ५.पाठस्यै -उ. ६.त्वे प्र-उ. ७.भवः-उ.

लक्षणविपक्षबाधकेनोक्तश्रुत्यादिबाधकप्रसङ्गेन १ २ प्रत्युत हेतोरे ३ वोक्ततर्कानुगृहीतत्वेन चोपाधेरेव साध्याव्यापकत्वात् । अव एव नाप्रयोजकत्वम्।।

न च तृतीये आत्मत्वं द्रव्यत्वं ४ चोपाधिः । अदृष्टादौ साध्याव्यापकत्वात् । न च घटादौ व्यभिचारः । पक्षसमत्वात् ।।

इति न्यायेनोपाधेरेव साध्याव्यापकत्वादित्यर्थः । ५ केचित्तु प्रत्युत हेतोरेवोक्ततर्कानुग्रहः।। उक्तेति । 'परास्य शक्ति'रित्यादिश्रुतिस्मृतिबाधितत्वप्रसङ्गेनेत्यर्थः । अत एवेति ।। विपक्षे बाधकाद्युपेतत्वादेवेत्यर्थः । तथा च मणिकृदुक्तमप्रयोजकत्वदूषणमज्ञानमूलमिति भावः । अदृष्टादावित्यादिपदेन तादृशदण्डत्वादिधर्मवद्दण्डादिपरिग्रहः । अदृष्टस्यापि पूर्वोक्तरीत्या कार्यानुलूलादृष्टधर्मवत्वादिति भावः ।। घटादाविति ।। तस्यापि स्वगतरूपादिकं ६ प्रति परमते कारणत्वाज्ज्ञेयत्वाच्च हेतोः सत्वेऽपि साध्याभावादिति भावः । पक्षेति ।। शक्तयः सर्वभावाना'मिति स्मृत्या सर्ववस्तुष्वपि शक्तेरङ्गीकारादिति भावः ।।
मण्युक्तमनवस्थारूपप्रतिकूलतर्कपराहतिलक्षणबाधकमाशङ्क्य निराह-- नन्वित्यादिना ।।

१.'साध्यव्यापकताग्राह' इत्यादेःस्थाने. 'उपाधेरनुग्राहकतर्काभावेन' इत्यस्ति-नं.ज. २.प्रत्युतेत्यपि नास्ति- ज.क. 'उपाधेरनुग्राहकतर्काभावे' नेत्यधिकम् -क. इतः चोपाधेरित्यत्र ' उपाधे' रिति पर्यन्तं नास्ति - रा. ३.एवकारो नास्ति -ग. ४.वोपा -ग.ज. ५.क्वचि -उ. दिप्र -उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ९६.
---------- ---------- ---------
१ ननु - तथा।ऽपि बीजादावङ्कुरानुकूलशक्तिवच्छक्त्यनुकूला शक्तिरपि स्वीकार्या । बीजनिष्ठामङ्कुरजननशक्तिं प्रति बीजस्य

समावायिकारणत्वात् । एवं तदनकूला तत्पूर्वकालीना बाजादावनादिशक्तिपरंपराङ्गीरकार्येति बीजादेरनादित्वं स्यादिति चेन्न । मन्मतेऽङ्कुरे शक्तियुक्तस्य २ बीजस्य ३ बीजे शक्तात्स्वकारणादेवोपपत्या बीजगतशक्तिपरंपराऽनपेक्षणात् ।.
किंच -- यथा प्रतबन्धके सत्यङ्कुरानुत्पत्तिः प्रामाणिकी तथा प्रतिबन्धाभिमतकिञ्चित्सत्वे यदि शक्त्यनुत्पत्तिः प्रामाणिकी स्यात्तदा शक्त्यनुकूलाऽपि शक्तिर्बी ४ जादौ स्वीकार्या स्यात् । न च तदस्ति।

स्वीकार्येति ।। अन्यथा प्रागुक्तहेतोस्तत्र व्यभिचारापत्तेरिति भावेनाह -- बीजनिष्ठामिति ।। तदनुकूलेति ।। अङ्कुरजननशक्तिजननशक्त्यनुकूलेत्यर्थः।।
अनवस्थाऽऽपादनमेवायुक्तं वैषम्यमिति भावेनाह -- किंचेति ।।
नन्वेवमपि -- यथाकारणं बीजादिकं स्वकार्यजनने शक्तिमपेक्षते । तथा शक्तरपि स्वकार्यजनने शक्त्यन्तरमपेक्षेत । साऽपि तथेत्यनवस्थादि --

१. इतः ' निर्वाहकत्वादिति ' इत्यन्तोभागः, 'तस्मात्' इत्यादेः 'प्रमाणानि इत्यन्तस्यानन्तरमस्ति -नं.रा.क.ज. २. क्तबी -नं. ३.बीजशक्तेः स्व - नं.ज. ४.'बीजादौ इति नास्ति- रा.

आधेयशक्तिः) शक्तिवादः पु - ९७.
---------- --------- ---------
नापि शक्तावपि १ स्वाकार्यानुगुणशक्तिः स्वीकार्येत्यनवस्था । समवायविशेषादिवत्स्वनिर्वाहकत्वादिति ।।
२ तस्मादुक्तरीत्या ३ श्रुत्यिस्मृती अर्थापत्तिपञ्चकं परोक्तस्य विशिष्टाभावकारणत्वस्यानुपपत्तिस्तृणादेर्वाह्निजातीयकारणत्वानुपपत्तिरनुमानानानि च प्रमाणानि ।।

इति सहजशक्तिः ४ ।। ९ ।।

स्यादित्यत आह-- ५ नाऽपीति ।। विशेषेति ।। नित्यद्रव्येषु व्यावर्तकतया तार्किकाभ्युपगतविशेषस्येवेत्यर्थः ।।
सहजशक्तिवादः ।। ९ । ।।

अथाधेयशक्तिः ।। १० ।।
एवमाधेयशक्तरपि स्वीकार्या । अन्यथा --

अथाधेयशक्तिः ।। १० ।।
एवमाधेयेति ।। सहजशक्तिवत्कारणविशेषो ६ त्पाद्याप्युपेयेत्यर्थः । यद्यपि सहजशक्तेरभावे विष्णावेव वेदस्य शक्तितात्पर्यरूपसमन्वयायोगवदाधेयशक्त्यभावे
काचिदपि हानिर्नास्ति;

१.स्व-नं.ग.ज. २.' तस्मात्' इत्यादिग्रन्थो नास्ति - ग. ३.'शक्तौ' इत्यधिकम् -नं. ४.वाद इत्यधिकम् -रा. ५.सापी -उ. ।४ १ -उ. ६.क्त्याद्याप्यु -उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ९८.
---------- ---------- ---------
व्रीहीन् प्रोक्षतीत्यादौ प्रोक्षणजन्यस्य व्रीहीनिष्ठस्यातीन्द्रियस्ये १ प्सितस्यातिशयस्याभावेन व्रीहिनितीप्सितकर्मणि द्वितीया न स्यात् ।।

-- पदानि पदान्तरसन्निधानाहितशक्त्यन्तराणि विशेषतोऽप्यन्वितान् स्वार्थानभिदधतीति पद्धतिवाक्यस्यान्वताभिधानवादेऽग्रे गतेर्वक्ष्यमाणत्वेन

विशेषान्वयतोऽप्याधेयशक्तेरनपेक्षितत्वात् । तथाऽपि कारणानां प्रमाजननस्वभावानामपि दोषेणाहितशक्तिकानामप्रमाजनकत्वस्वीकारात्तथा प्रामाण्यग्रहणस्वभावस्यापि साक्षिणो विसंवादादिरूपपरीक्षा २ हितशक्तिकस्याप्रामाण्यग्राहकत्वस्वाकारात्संस्काराहितशक्तिकस्य चक्षुरादेः प्रत्यभिज्ञा ३ जनकत्वस्वीकारात्तदुपयोगितया ४ तत्साधनमित्यवधेयम् ।।
व्रीहीनिति ।। यदि हि 'चतुरो मुष्टीर्निर्वपति'इति पुरोडाशार्थतया निरुप्तानां व्रीहीनां प्रोक्षणं विधीयते 'व्रीहीन् प्रोक्षति'इति । आदिपदेन 'अपः प्रणयति'इत्यादिग्रहः।। ईप्सितस्येति ।। आप्तुमिष्टस्येत्यर्थः । आपलृव्याप्तवित्यस्य सन्प्रत्यये 'आप्ज्ञप्यृधामीत्'इतीकारा ५ देशे सति निष्ठायामीप्सितमिति रूपसंपत्तेः ।।
ईप्सितकर्मणीति ।। कर्मकारकं तावद्विविधम् । ईप्सितमनीप्सितं च । 'कर्तुरीप्सिततमं कर्म, तथायुक्तं चानीप्सितम्
'इति पाणिन्युक्तेः । तत्राद्यं ग्रामं गच्छति व्रीहीन् प्रोक्षतीत्यादि । द्वीतीयं तु विषं भूङ्क्त इत्यादि। अतस्तद्व्यावृत्यर्थमीप्सतकर्मणीत्युक्तम् । द्वितीयेति ।। 'कर्मणि द्वितीया 'इति सूत्रोक्ता द्वितीयाविभक्तिरित्यर्थः ।।

१.ईप्सितपदं नास्ति- ग. स्य तस्य- ज. २.क्षासहि- उ. नादिज-उ. ४. या एव -उ. ५. दीप्सितेति सं-उ.

आधोयशक्तिः) शक्तिवादः पु - ९९.

न च प्रोक्षणजन्यलसंयोग एव व्रीहिनिष्ठोऽतिशयः। क्षणिकस्य तस्य भाविकारणोत्पा १ द्यापूर्वानुपयोगित्वेनानीप्सितत्वात् । संयोगावच्छिन्नक्रियायाः प्रोक्षणपदार्थत्वेन स्वस्यैव २ स्वजन्यत्वविरोधाच्च ।।

न च धात्वर्थे संयोगादिरूपलक्षणमात्रमिति वाच्यम् । त्यजातिगच्छत्योः पर्यायत्वापत्तेः । ग्रामसंयोगविभागयोर्धात्वर्थाप्रवेशात् । क्रिया ३ त्वमात्रस्य चोभयत्र साम्यात् ।।

शशधरे मणौ चोक्तमाशङ्क्य निराह -- न चेति ।। भाविकरणेति।। करणं यागः च तत्कारणोत्पत्यपूर्वं च तदनुपयोगित्वेनेत्यर्थः । प्रोक्षितव्रीहयोः हि अवघतादिद्वारा पुरोडाशं निर्वर्त्य तत्साधकयागक्रियाजन्योत्पत्यपूर्वे उपयुज्यन्ते । सन्निपात्यङ्गत्वात्तच्च व्यवहितो ४ तत्कालभवीति कथं तदुपयोगः। तदुपयोगाभावे ईप्सितं न स्यादिति भावः । धात्वर्थ इति ।। प्रोक्षणादिरूपधात्वर्थ इत्यर्थः । संयोगादिरेवेति ।। विभाग आदिपदार्थः । ग्रामं त्यजतीत्यत्र ग्रामविभागस्त्यजधात्वर्थे उपलक्षणमित्यर्थः । त्यजतीति।। त्यज विसर्गे गम्लृ गताविति धात्वोरित्यर्थः । अवच्छेदकीभूतसंयोगविभागयोरुपलक्षणत्वे क्रिया ५ मात्रस्योभयत्र धात्वर्थे सत्वादिति भावेनाह -- ग्रामेति।। एवमित्यस्य व्याख्या व्रीहीणामित्यादि। ग्रामस्य यथा तथेति भावः।।

१.त्पत्य -नं.रा.क.ग.ज. २.स्वपदं न -ज. ३. यामा-नं.रा.क.ग.ज. ४.त्तरकाल-उ. ५.त्वमा-उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १००.

किञ्चैवं व्रीहिणामपि प्राप्यकर्मत्वे संस्कार्यकर्मत्वाभावेन--
'उत्पाद्यं च विकार्यं च प्राप्यं संस्कार्यमेव चे'
ति लोक १ सिद्धं कर्मणश्चातुर्विध्यं न स्यात् ।।

यदि च स्थायी २ संयोगध्वंसोऽपूर्वोपयौगी तर्हि यागध्वंस एव स्वर्गोपयोगी स्यात्।

उत्पाद्यमिति ।। कुलाला घटमुत्पादयतीत्यादावुत्पाद्यकर्म, काष्ठं ३ तक्ष्या करोति सुवर्णं कुण्डलं करोतीत्यादौ विकार्यकर्म, ग्रामं गच्छतीत्यादौ ४ व्रीहीन् प्रोक्षतीत्यादौ संस्कार्यं कर्मेति चातुर्विध्यं न स्यादित्यर्थः। यद्यपि प्रथमे कर्तुरीप्सिततमं कर्मेत्यत्र मञ्जार्याम् ---
'निवर्त्यं न विकार्यं न प्राप्यं चेति त्रिधा मतम् ।'
इत्युक्त्वा --
यदसंजायते यद्वा जन्मना यत्प्रकाश्यते।
तन्निवर्त्यं विकार्यं तु कर्म द्वेधा व्यवस्थितम् ।
प्रकृत्युच्छेदसंभूतं किञ्चित्काष्ठादि भस्मवत्।
किञ्चिद्गुणान्तरोत्पत्या सुवर्णकटकादिवत्।
इत्यादिना तत्स्वरूपं चोक्तम् । तथाऽपि ५ प्रभाकरैराघाराग्निहोत्राद्यधिकरणेषु तत्र चातुर्विध्यस्योक्तत्वात् । पिष्टं सं ६ यौति, आज्यं विलापयति गां गोग्धि, व्रीहीन् प्रोक्षतीत्यादेरुदाहृतत्वाच्चैवमुक्तमिति बोध्यम् ।।
ननु प्रोक्षिता व्रीहयोऽवघताय कल्प्यत इति वाक्यबलेनोत्तरोपयोगित्वेनावगतप्रोक्षणस्योपक्षणतया
संयोगध्वंसद्वारोत्तरोपयोगोऽस्त्वित्यत आह -- यदि चेति ।। अपूर्वेति ।। योगोत्पत्यपूर्वेत्यर्थः।।

१. प्रसि-रा.ग. २.'सन्' इत्यधिकम्-नं. यिस -रा. ३.भस्मक -उ. ४.प्राप्यं व्रीहीन् -उ. ५.तथापि इति नास्ति -उ. ६.संयोजयति -उ.

---------- ---------- ----------

किंचैवं परमतेऽपि प्रोक्षणजन्यमात्मनिष्ठमपूर्वं १ कल्प्यं स्यात् । न चात्मनिष्ठमेवादृष्टं व्रीहिसंयुक्तात्मद्वारा व्रीहिसंबद्ध २ मतिशयः।
साक्षात्संबन्धस्यौत्सर्गिकत्वात् ।
प्रोक्षणजन्यादृष्टवदात्मसंयोगस्याप्रोक्षितव्रीहीष्वपि सत्वाच्च ।।
न चात्मनिष्ठदृष्टं स्वरूपसंन्धेन साक्षाद्व्रीहिसंबद्धमिति वाच्यम् । अदृष्टस्यात्मना समवायो व्रीहिभिः स्वरूपसंबन्ध इति संबन्धद्वय कल्पने गौरवात्।।

नन्वेवं यागध्वंसस्यानन्तत्वा ३ त्कालानन्त्यं स्यादित्यतो दोषान्तरमाह-- किञ्चैवमिति।।
नन्वस्त्वेवं व्रीहीणां द्वितीयान्तानामीप्सितकर्मत्वान्यथाऽनुपपत्या विहितक्रियारूपप्रोक्षणजन्यातिशयवत्वं ४ परंपरैवान्यगतेन साक्षात्स्वरूपसंबन्धेन वोपपन्नमिति किमर्थमप्रामाणिकानेकापूर्वं व्रीहिषु कल्पनीयमित्याशङ्क्याह-- न चेति।। ५ तच्चात्मनीति च स्वरूपसंबन्धेन । साक्षादिति।। आत्मनिष्ठज्ञानादेर्बाह्यघटादिनेवेति भावः।। गौरवादिति।। ज्ञानादेस्त्वनन्यगता ६ त्मनिष्ठत्वानुभवबलेन च संबन्धद्वयकल्पनम् । न चैवं प्रकृते। व्रीहिगतत्वेनैव कल्पने बाधकाभावादिति भावः।।

१.र्वमक-नं. र्वंस्या -रा. र्वं क -ग. २.द्धोति- नं.क.ज. ३.त्फला-उ. ४.तच्च इत्यधिकम् -उ. ५.नचात्मनी-उ. ६.त्याआत्म -उ. ७.ल्प्येत- उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १०२.

---------- ---------- ----------

न च -- ग्रामं गच्छामि, घटं जानामि, अतीतं जानामीत्यादौ व्यभिचारः, ग्रामं संयोगादेरनीप्सितत्वात् अन्यस्ये १ प्सितस्याभावात्, घटादौ २ च त्वन्मते ज्ञानताया अभावादिति वाच्यम् । ग्रामादौ शयनासनादेर्घटादौ च व्यवसायजन्यानुव्यवसायस्मरणादिविषयत्वस्य व्यवहारयोग्य ३ त्वस्य च क्रियाजन्योप्सितस्य सत्वत्वात् ।।
न च शत्रुवधमुद्दिश्च विहिते श्योनादौ देवतोद्देशेन विहिते यागादौ च व्यभिचारः। तत्रापि शुत्रुनिष्ठस्य ज्वरस्फोटादेर्देवताप्रतीतेश्च सत्वात् ।।
तस्मात् प्रोक्षणादिकं व्रीहिनिष्ठेप्सितजनकं तदुद्देशेन विहितत्वात्। पित्राद्युद्देशेन
क्रियमाणगयाश्राद्धादिवत् ।।

एवं द्वितीयाऽवगतेप्सितकर्मत्वान्यथाऽनुपपत्या व्रीहिष्वेवातिशयः कल्प्यो ७ न त्वात्मनि परंपरासंबन्धादिना गौरवप्रसङ्गादित्युक्तम् । तदयुक्तम् । ग्रामं गच्छतीत्यादौ का गतिरित्यादिना मणावेव व्यभिचारोक्तेरित्यतस्तदाशङ्क्य निराह -- नचेत्यादिना । व्यभिचार इति ।। द्वितीयाऽवगतेप्सितकर्मत्वबलेन कर्मकारक एवातिशयः कल्प्य इत्यस्य व्यभिचार इत्यर्थः। सर्वत्राप्युक्तकर्मकारकेऽतिशयरूपसाध्य ४ सत्वात्तत्र व्यभिचारमुद्धरति-- ग्रामादाविति ।। षङ्ग्वाद्यधिकारिभदापेक्षयोक्तं शयनासनादेरिति ।।
वक्ष्यमाणप्रयोगे व्यभिचारमुद्धरति -- न च शत्रुवधमिति ।। तस्मादिति।। अन्यथोपपत्तिव्यभिचारयोरभावादित्यर्थः। तदुद्देशेन व्रीह्याद्युद्देशेनेत्यर्थः

१.स्य ये -नं.रा.क.ज. २.टे च -नं. ३.ग्यस्य -नं. ४.वत्वोक्त्या व्यभि-उ.

---------- -------- ---------

न च संस्काराणां प्रतिव्रीहि नानात्वे गौरवम्। प्रोक्षितसर्वव्रीहिष्वेकत्वे तदश्रयत्रिचतुरादि १ व्रीहिनाशनामननुगतत्वेन संस्कारनाशं प्रत्य २ नाश्यत्वेनैव प्रयोजकत्वे एकव्रीहिनाशेऽपि संस्कारनाशाद्भाविकार्यं न स्यादिति वाच्यम्। उक्तरीत्या संस्कारस्य व्रीह्याश्रितत्वेन प्रमितेऽनन्तरं प्रतिसन्धीयमानस्य नानात्वस्य फलमुखत्वेनादोषत्वात्। त्वन्मतेऽप्यनेकयजमानकसत्रयागादावपूर्वनानात्वस्यावश्यकत्वाच्च।।

विहितत्वमात्रस्य व्यभिचाराद्विशेषणोक्तिः। न च विशेषणासिद्धिः शङ्क्या। द्वितीयावगतकर्मत्वेनैव तत्सिद्धेरुक्तत्वादिति भावः।।
उक्तानुमानस्य मण्याद्युक्ततर्कपराहतिमाशङ्क्य निराह -- न च संस्काराणामिति।।
सर्वव्रीहिष्वेकत्वमित्यापादकस्यैकव्रीहिनाशेऽपीत्यादिनाऽऽपाद्येऽन्वयः।
नन्वेकव्रीहिनाशान्न सर्वव्रीह्यनुगतैकसंस्कारनाशः। किं तु द्वयोस्त्रयाणां चतुर्णां
पञ्चादीनां वा नाश एवेत्यत उक्तं तदाश्रयेत्यादि।। प्रयोजक ३ इति ।। वक्तव्ये सतीति शेषः।।
आत्मनिष्ठापूर्वकल्पनेऽपि क्वचिद्गौरवमस्त्येवेत्याह ----त्वन्मत इति।।
ये यजमानस्त ऋत्विज इति यजामानानामेव सत्रयागे ऋत्विक्त्वेन --

१. आदिपदं न -नं.ज. २. त्याश्रयनाशकत्वे -नं.ग.ज. ३.त्व इ -उ.

---------- ---------- ---------
यद्वा एकैव शक्तिरस्तु प्रतिव्यक्ति वृक्षाणां सिह्यनाश्रयत्वेऽपि वनत्वावच्छिन्नस्य तदाश्रयत्ववत्प्रत्येकं व्रीहीणां तदनाश्रयत्वेऽपि

कार्योपयोगित्वरूपधर्मावच्छिन्नस्य तदाश्रयत्वोपपत्यैकव्रीहिनाशे तदवच्छिन्नानाशेन संस्कारानाशात् ।।
यद्वा यत्किञ्चिदाश्रायनाशेऽपि क्षिप्यमाणवालुपिण्डादौ वेगाख्यसंस्कारानाशवादिहाप्यनाशोऽस्तु ।।
यत्तु -- प्रोक्षणमपूर्वजनकं दृष्टद्वाराभावे सति --

-- सर्वेषामपि याग १ भाक्त्वादिति भावः ।।
एक २
पक्षेऽप्यधिकरणतावच्छेदकद्वित्रनाशेऽप्यधिकरणतावच्छेदकावच्छिन्नसत्वन ३ वाऽश्रितसंस्कारानाश इति भावेन दृष्टान्त पूर्वमाह -- प्रतिव्यक्तीति ।। व्रीहित्वादेरधिकरणतावच्छेदकत्वेऽपि न दोष इत्याह -- यद्वेति।। ननु प्रोक्षितव्रीहिष्ववघातादिनैकैकावयवागमे सिति पीलुपाकप्रक्रियया द्रव्यान्तरोत्पत्या तत्र संस्काराभावस्याभावेनोत्तरकार्यानुपयोगापत्याऽऽत्मनिष्ठतैवापूर्वस्य वाच्येत्यतो वाह -- यद्वेति ।।
इदं च रीतित्रयं तृणारणिमणीनामेकशक्तिमत्वमित्यत्रा ४ नुसन्धेयमिति वदन्ति।। अपूर्वजनकमिति ।। धर्मजनकमित्यर्थः।

१.फलेत्यधिकम् -उ. २.शक्तीत्यधिकम् -उ. ३.नाश्रि -उ. ४.'अपि' इत्यधिकम् -उ.

---------- --------- ---------
कालान्तरभाविफलजनकेत्वन विहितत्वात् यागवदिति मण्युक्तमनुमानं, तत्र साध्येऽपूर्वपदं मानान्तरा १ गम्यातिशयमात्रपरं चेद्व्रीहिनिष्ठस्यापि

तथात्वेन सिद्धसाधनम् । आत्मनिष्ठत्वेन विशेषित २ परं चेदुक्तहेतोर्विशेष्यमात्रेणोपपत्या विशिष्टं प्रत्यप्रयोजकत्वम् ३ ।।
किंच त्वन्मते जीवन्मुक्तावनुष्ठितप्रोक्षणादिनाऽदृष्टाजननात्कथं तस्य भाव्युपयोगः।।
अपि च --द्वितीयाश्रुत्या किंचित्कालगर्भिते ४ न शेषित्वेन श्रुते ह्यादौ न किंचित्कारः शेषित्वेनाश्रुते आत्मनि च किंचित्कार इति श्रुतहा ५ न्यश्रुतकल्पने स्याताम् ।

तथा च निषिद्धकर्मण्यव्यभिचाराय हेतौ विहितत्वादित्युक्तम्। प्रायश्चित्ते व्यभिचरानिरासाय कालान्तरेत्यादि।।
'कृषिवाणिज्यगोरक्षा वैश्यम्यैव विधीयते' ।।
इत्यदिप्रत्येकं वर्णोपायविधिविहितकृष्यादावव्यभिचाराय दृष्टेत्यादिसत्यन्तम् ।।
हेतोर्व्यभिचार चाह -- किंचेति ।। आत्मनिष्ठत्वेनापूर्वस्य विशेषितत्वपक्षे तर्कपराहतिं चाह -- अपि चेति ।। द्वितीयश्रुत्येत्यस्य श्रुत इत्यनेनान्वयः।

१.रग-नं-रा. २.मात्रेत्यधिकम्-नं. ३.हेतौ च द्वारपदं अदृष्टेतरद्वारपरम्। अलौकिकातिशयेतरद्वारपरं वा । आद्ये शक्तिवादिनं प्रत्यसिद्धिः। मन्मते शक्तेरेवादृष्टभिन्नत्वात् । नान्त्यः। अप्रयोजकत्वात् । अपूर्वाभावावेऽपि शक्त्याख्यालौकिकव्यापारेणैव हेतोरुपपत्तेः-- ग. ४.तत्वेन-नं.क. ५.नाश्रु-रा.ग.

---------- ---------- ----------
अन्यथा सक्तून् जुहोतीत्यादाविव विभक्तिविपरिणामः स्यात् ।।

किंचैवं यागादिजन्यसंस्काराणामेव हरिराद्यारम्भकपरमाणुनिष्ठत्वं किं न स्यात्।।
किञ्च -- प्रोक्षणादेरपूर्वजनकत्वे दर्शादिवत्प्रधानकर्मत्वं वा प्रयाजादिवदारादुपकारकत्वं वा स्यान्न तु सन्निपत्योपकारकत्वम् ।।

किंचित्कारो नामोपकार्यत्व १ विशेषः। अन्यथेति ।। व्रीहिषु कस्यचिदाशयस्याभावः किंत्वात्मन्येवेति पक्षः इत्यर्थः। इत्यादाविवेत्युपलक्षणम् । 'व्रीहिभइर्यजेते'त्यादौ द्वितीया च स्यात् । प्रोक्षतीत्यादाविव तत्राप्यदृष्टवदात्मसंबन्धादेस्त्वदुक्तदितीयाविभक्तिहेतोः सुवचत्वादित्यपि ध्येयम्।।
साध्यविकलो दृष्टान्त इति भावेनाह -- किंचै २ वमिति।। द्वितीयावगतस्य व्रीहिगतकिंचित्कारस्यात्मगतत्वे सति यागदानहोमादिजन्यापूर्वशब्दितसंस्काराणामेव परमाणुगतत्वं स्यात्, आत्मनस्तज्जन्यसुखभोगश्चादृष्ट ८ वत्परजन्यसंस्कारस्यावगमादित्यपि सुवचत्वाच्च ।।
प्रागुक्तानुमानस्य तर्कपराहत्यन्तराण्याह -- किञ्च प्रोक्षणादेरिरित्यादिना ।। फलापूर्वे व्याप्रियमाणमातारादुपकारकं यागस्वरूपनिष्पत्तावुपयुज्यमानं सन्निपत्योपकारकमिति ज्ञेयम्।

१.त्वेति -उ. २.चेति--उ. ३.ष्टपर. ४.द्यताम्। ननु यजेतेत्यात्मानेपदबलात्संस्कारः कर्तृनिष्ठ उपगम्यत इति चेन्न। तज्जन्यसुखभोगरूपफलाभिप्रायेणात्मपदोपपत्तेः। शेषित्वबोधक -उ.

---------- -------- ---------

अपि चातिशयस्यात्मनिष्ठत्वे व्रीहीणां चण्डाला १ दिस्पर्शेन तन्नाशे न स्यात् व्यधिकरणत्वात्। पुत्रानृतभाषणादिना पित्रादेर्नरकादिकं तु --
'स विष्ठायां कृमिमाम्ले २ न शुध्यतीत्यादिस्मृतिविरोधः। तया ३ शुद्धिरूपस्य तन्निवर्त्या ४ शुद्धिरूपस्य चातीन्द्रियातिशयस्य ताम्रादिगतत्वोक्तेः। एवं देवताप्रतिमादावपि प्रतिष्ठादि ५ जन्याधेय ६ शक्तिः स्वीकार्या ।।
७ आधेयशक्तिः ।। १० ।।

पुत्रानृतवचनेन पितुः कथं दोष इत्यत आह -- पुत्रेति ।। अतिशयस्य वस्तुनिष्ठत्वानङ्गीकारे बाधकान्तरं चाह -- किञ्चेति --
रजसा शु ८न्धते नारी वेगेन शुध्यति।
भस्मना शध्यते कांस्यं ताम्रमाम्रेण शुध्यति।।
इति स्मृतिविरोधं स्पष्टयति ९ -- एवमिति ।। एवं च मण्याद्युक्तदिशा प्रतिमागतप्रतिष्ठाध्वंसादिर्वा प्रतिष्ठाजन्यदृष्टवदात्मसंयोगादिर्वा पूज्यत्वप्रयोजकः प्रतिमागत इत्याद्यप्रामाणाकिं न कल्पनीयमिति भावः ।।
आधेयशक्तिः ।। १० ।।

१.आदिपदं न -नं. रा.क.ग. २.म्रण-नं.रा. ३.तथाशु -ज. ४.स्यातीन्द्रियाति-रा. ५.आदिपदं न -नं.क.ज. ६.या श -नं. ७.इत्याधेयशक्तिवादः -रा. इत्याधेयशक्तिस्थानम् -क. ८.ध्यते -उ. ९.'तथेति' इत्यधिकम् - उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १०७.
---------- ---------- ----------
अथ तमसो द्रव्यत्वसाधनम् ।। ११ ।।

यथा शुक्तिः पदार्थान्तरमेवं तमो द्रव्यान्तरम् । तमो द्रव्यं रूपि १ त्वात् क्रियाऽऽश्रयत्वात् परिमाणा २ दियुक्तत्वाच्च घटवदित्य ३ नुमानात्।।

अथ तमसो द्रव्यत्वसाधनम् ।। ११ ।।
प्रसङ्गादाह -- यथेति ।। पदार्थान्तरमिति ।। ४ द्रव्यगुणकर्मसामान्यसमवायरूपपदार्थादन्यः पदार्थस्तथा ५ तदन्योऽपि पृथिव्यादिद्रव्यनवकादन्यद्द्रव्यमित्यर्थः।।
एतेन तमसो द्रव्यत्वे पृथिव्यादिनवकान्तर्भावो वाच्यः। न च न युक्तः। गन्धरसभास्वररूपस्पर्शशब्दहीनत्वेन भूतपञ्चकान्तर्भावायोगात् । अनित्यत्वेन नित्यवस्त्वन्तर्भावायोगादिति निरस्तम् । अतिरिक्तद्रव्यत्वोपपत्तेः।।
अन्तर्भावः शक्यश्चेदित्याद्यग्रेतनवाक्यं त्वनास्थेयमिति ध्येयम् । इत्यनुवादमहिम्नैव शक्तेरपि षट्पदा ६ न्तर्भावानुपपत्ति ७ बाधकं प्रत्युक्तं ध्येयम्। मणौ तमसो द्रव्यत्वाभावस्याचिन्त्यत्वेऽपि शशधरादौ चिन्तित्वात् । तत्खण्डनेन
नविलश्रणत्वाधिकरणे ८ प्राकृतेन्द्रियमनोभेदादित्येतद्व्याख्यानसुधायां मनो नित्यं स्पर्शरहितद्रव्यत्वादित्यत्र तमसास्माकमनैकान्त्यादित्युक्तहेतुसमर्थनार्थोयं प्रयत्नः।।

१. पवत्वात् -रा.ग. २.णवत्वाच्च-नं. ३.त्याद्य-नं.क.ज.ग. ४.यथा इति पूरितम् -उ. ५.तमोपि -उ. ६.दार्था-उ. ७.त्तिः बाधकं-च इत्यस्ति-उ. ८.पञ्चेन्द्रिय -उ.

--- --- ---

न चासिद्धिः। नीलं तमः छाया गच्छतीत्य १ बाधितप्रत्ययात्। रामायणे 'हनूमच्छाया २ यां वायुपुत्रानुगामिनी'त्यनेन क्रियायाः, 'दशयोजनविस्तीर्णे'त्यादिना परिमाणस्य 'छायायां संगृहीतायां'इत्यादिना ग्रहणस्य चोक्तेश्च।।

क्रियाऽश्रयत्वादि ८ त्ययं च हेतुद्रव्यत्वसाधकः पररीत्यैव बोध्यः। तेन मिथ्यात्वानुमानटीकाभावप्रकाशिकायां
'गुणाद्वा लोकवत्'इत्यत्र चन्द्रिकायां च गुणादावपि क्रियावत्वसाधनान्न व्यभिचारः शङ्क्यः। ४ पूत्यादीत्यादिपदेन गृह्यमाणत्वपङ्कभूतत्वपाठ्यमानत्वादिग्रहः।।
छायेति ।। तस्यास्तमस्त्वस्य सर्वसंमतेः तत्र क्रिया प्रत्यक्षसिद्धा। छायाहस्तचतुष्टपरिमितेत्यादिपरिमाणप्रतीतिरादिपदार्थः -- अबाधितेति।। कदाऽपि न नीलं तम इत्यादिविपरीतप्रत्याभावाद्यौक्तिकबाधस्य ५ प्रत्यक्षप्रतीतितो दुर्बलत्वान्निरसिष्यमाणत्वाच्चेति भावः।।
वचनेनापि क्रियावत्वादिकं व्यनक्ति-- रामायण इति ।। वायुपुत्रपदेन भीमभ्रान्तिनिरासायोक्तं हनुमच्छायामिति। सुन्दरकाण्डे प्रथमसर्गे --
श्वेताभ्रघनराजीव वायुपुत्रानुगामिनी ।
तस्य सा शुशुभे छाया विततालवणाम्भसि।। इति ।।
तथा --
छायायां संगृहीतायां चिन्तयामास मारुतिः।
इति वाल्मीक्युक्तेश्चेत्यर्थः। संगृहीतायां छायाग्रहेणेति योज्यम् ।.

१.त्याद्य -रा.क.ज.ग. २.यैषा -क. ३.प्रतीकवदिदं धृतम्-उ. ४.परिमाणादीत्यादि -उ. ५.'चा' इत्यधिकम् -उ.

---------- ---------- ----------

त्वन्मते आलोकाभावत्वमेव तमस्त्वमिति तमस्त्वेन प्रतीते १ नैल्या २ रोपायोगाच्च। दोषाभावेनारोपायोगाच्च ।।
किञ्चान्धकारो नालोकाभावः। नात्रालोकः किंतु तम ३ इति पृथग्व्यवरहारात्। आप्नोक्तेन तजोऽभावेनान्धकारानुमानाच्च । प्रतियोगित्वेनाभिमतालोकाप्रतीतावपि प्रतीतेश्च। विरलनिबिडनिबिडतरत्वादिनोत्कर्षापाकर्षादिप्रतीते ४ रबाधाच्च।।
तमःसुघोरं गगनच्छदे महद्विदारयद्भरितरेण रोचिषा ।

न केवलं नैल्यादिधियो ५ ऽबाधादेव प्रमात्वं विशेषदर्शनेन कारणाभावेन च भ्रमत्वायोगाच्चेत्याशयेनाह -- त्वन्मत इति ।। न हि शुक्तित्वेन ज्ञाने रजतारोपो युक्त इति भावः।।
ननु तमस आलोकाभावा ६ न्यथानुपपत्या भ्रमत्वादिकं कथं चित्कल्पनीयमित्यतस्तदेवासिद्धमित्याह -- किञ्चेति ।। अनुमानाच्चेति ।। लिङ्गलिङ्गिभावस्य ७ भेदाभावेऽसम्भवादिति भावः।।
प्रतियोगित्वेति ।। न च दोषवशात् प्रतियोगिनो ८ भानाभावेऽपि तमसो भानं युक्तमिति वाच्यम् । तादृशक्लृप्तदोषस्य कस्यचिदाभावात् । तमसः स्वरूपमेव दोष इति कल्पनं ९ तस्याभावत्वसिध्युत्तरकालीनत्वेनान्योश्रयादिति भावः-- विरलेति ।। अभावे च नोत्कर्षादिधीरित भावः।

१.तेर्नै-नं. तौनै-क.ज. २.ल्याद्या-रा.क.ग. ३.'एव' इत्यधिकम्-रा. ४.तेश्च-नं. ५.धिया-उ. ६.वत्वान्य-उ. ७.वासम्भ-उ. ८.नोभानेपि-उ. ९.'तु' इत्यधिकम्-उ.

तसो-द्रत्व-सानम्) शक्तिवादः पु - १११.

मनोजवं निर्विविशे सुदर्शनं गुणच्युतो रामशरो यथाचमूम् ।।
इति भागवते,
ततः कदाचिद्दुःखेन रथमूहुस्तरङ्गमाः।
पङ्कभूतं हि तिमिर १ मश्वानां जायतेऽनध।।
अथ पर्वतभूतं २ तत्तिमिरं समाजायत।
तदासाद्य ३ हया राजन् निष्प्रयत्नास्ततः तत्तमः।।
ततश्चक्रेण गोविन्दः पाटयामास तत्तमः ।।
इति हरिवंशे च तमसश्चक्रविदार्यत्वपङ्कत्वपर्वतत्वाद्युक्त्या काठिण्यादिप्रतीतेश्च। तजोऽभाव ४ बहुत्वादिनोत्कर्षादिधीश्चेत्सुखादावपि दुःखाभावादिबाहुल्यादिनोत्कर्षादिधीः स्यादिति दुःखाभाव ५ एव सुखं ६ संयोगाभाव एव विभागोऽन्धकाराभाव एव चा ७ लोक इति स्यात् ।।

निर्विविशे प्रविवेश-- भागवत इति ।। दशमस्कन्धेऽश्वमेधप्रकरणे -- काठिण्या ८
दिप्रतीतेश्चेति ।। अन्धकारो नालोकाभाव इत्यन्वयः ।।
प्रागुक्तोत्कर्षादिप्रतीतिरूपहेतोरन्यथा ९ ऽनुपपत्याऽप्रयोजकत्वमाशङ्क्य निराह -- तेज इति ।। एतेनेत्युक्तं व्यनक्ति -- आलोक इति ।।

१.संस्पर्शेन ज्ञाय -ज. २.तु तिमिरं समपद्यत -ज. ३.माहाराच निष्प्रयत्ना हयाः स्थिताः - ज. ४.बाहुल्यादिनो -नं.रा.क.ज.ग. ५.एव इति नास्ति-- नं. एवालो -क. ६ स्यात् इत्यधिकम् -रा. ७. च सति नास्ति -रा. नं. ८.ण्यप्र - उ. ९. थोपपत्या -उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ११२.
---------- ---------- ---------

एतेन तमो द्रव्यान्तरमिति मतेऽप्यालोकाभावस्यावश्यकत्वात्स एव तम इति निरस्तम् । आलोको द्रव्यान्तरमिति मतेऽप्यन्धकाराभावस्यावश्यकत्वात्।।
ननु -- तमसो १ रूपित्वे आलोकनिरपेक्षचक्षुर्गाह्यत्वं न स्यात् । तस्मात् प्रौढप्रकाशकयावत्तेजःसंसर्गाभावो वा, उद्भूतरूपयोग्ययावत्तेजः संसर्गाभावो वा,

न चावलोकस्य द्रव्यत्वमनन्यथासिद्ध २ त्वरूपवत्वादिप्रमाणसिद्धमिति वाच्यम्। तमोद्रव्यत्वस्यापि प्रागुक्तरूपवत्वादिप्रमाणसिद्धत्वादिति भावः।।
ननु तानि प्रमाणानि तर्कपराहतानि न द्रव्यत्वसाधकानीति भावेन शशधराद्युक्तं तर्कविरोधरूपवत्वं हेतौ तावदाशङ्क्य निराह -- नन्वित्यादिना नवच्छायायां गतेरित्येतत्पर्यन्तेन ग्रन्थेन ।।
तस्मादिति ।। आलोकनिरपेक्षचक्षुर्ग्राह्यत्वेन द्रव्यत्वायोगादित्यर्थः। तारादितेजसि सत्यपि तमो व्यवहराद्यु ४ क्तं प्रौढेति । रूपित्वादिना विविच्य प्रकाशनसामर्थ्यं प्रौढत्वम् । विद्यमानेऽपि प्रौढतेजसि तेजोन्यतराभावमादाय तमोव्यवहारापत्तेरुक्तं संसर्गेति । संसर्गारोपपूर्वकोऽभाव इत्यर्थः। तेन संसर्गान्योन्याभाववति न तमोव्यवहारापत्तस्तत्र संसर्गतादात्म्यस्यैवायोगात् । उद्भूतेति ५ ।। उद्भूत ६ रूपयोग्यं यावत्तेजः तत्ससंर्गाभाव इत्यर्थः।

१.सो निरू -क. २.द्वरू- उ. ३.चच्छा -उ. ४. दुक्तं-उ. ५.अत्र प्रतीको न धृतः - उ. ६.'तं रूपं यावद्यत्तेजः' इत्याद्यस्ति-उ.

तसो-द्रत्व-सानम्) शक्तिवादः पु - ११३.
---------- -------- ----------

तमस्तेजोविरोधि द्रव्यमिति मते यत्तेजःसंसर्गा १ विरोधि २ तदभवो वा, तम इति चेन्न ३ । रात्रिंचराणामुलूकादीनां ज्ञातृणामिवान्धकारस्य ज्ञेयस्याप्यालोकनिरपेक्षचाक्षुसाक्षात्कारसंभवात्। आलोके
व्यभिचाराच्च।

यावदादिपदकृत्यं पूर्ववत्। परमाण्वादितेजसि सत्यपि तमोव्यावहारा ४ द्योग्यमित्युक्तम् । ग्रीष्मोष्मादौ सत्यपि तमो व्यावहरादुद्भूतेत्युक्तम् ।। विरोधीति।। तमो विरोधीत्यर्थः।।
ज्ञातृणामिति ।। रात्रौ रूपवत्पदार्थद्रष्टृभिरालोकनिरपेक्षयैव घटादिपदार्था उपलम्भन्त वा चक्षू ६ रहिता ७ इति कल्प्यते । किंतूलूकागिप्राणिचक्षुषामेव तादृशस्वभाव इत्युच्यते । एवं केंषाचिद्रूपवद्वस्तूनामालोकसमापक्षचक्षुर्ग्राह्यत्वेऽपि तमोरूपवस्तुनोऽपि तन्निरपेक्षचर्ग्राह्यत्वमस्त्वित्यर्थः।।
यत्तु रात्रिंचरादीनामपि ८ बाह्यालोकनिरपेक्ष ९ चक्षुर्ग्राहकमित्यसिद्धमेव। तत्रापि
तेजोन्तरस्य सत्वादिति शशधरोक्तम् । तन्न। तादृशतेजोन्तरसत्वे मानाभावात् । तथैव तमसोऽपि तादृशतेजःसापेक्षग्र्राह्यत्वसंभवाच्चेति भावः।।
प्रागुक्ततर्कस्याप्रयोजकत्वमुक्त्वा व्यभिचारं चाह - आलोक इति ।। आलोकान्यत्वे सतीत्यापादकविशेषणे च तमोन्यत्वे सतीत्यपि विशेष्यताम्। अद्याप्यालोक एव द्रव्यं तमस्तु नेत्यस्यासिद्धेरिति भावः। आपाद्याभिप्रायव्यक्तीकरणेन व्यभिचारं व्यनक्ति--तत्रेति ।। आलोकसाक्षात्कार इत्यर्थः ।।

१.र्गवि-नं. र्गोवि-वा.क.ग.ज. २.धी- रा.ग.ज. ३.न इति नास्ति-नं. ४.उद्भूतरूपेत्युक्तम् -उ. ५.ते -उ. ६.रादिर -उ. ७.'न' इत्यधिकम्-उ. ८.पेचकादीनामपि -- उ. ९.क्षं च -उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ११४.

तत्र विषयीभूतस्यालोकस्य सत्वेऽ १ पि विषसंस्कारकस्यालोकान्तरस्याभावात्।।
ननु तत्राभ्यां २ लोकावयवग्रहे महत आलोकावयविनस्तद्ग्रहे तु सौरालोक एवास्तीति चेत् ४ । न तावदालोकसंबन्धस्य साक्षात्परम्परासाधारणसंबन्धत्वेन हेतुत्वम् । अतिप्रसङ्गात् ।।
नापि संयोगसमवायसाधारणसाक्षात्संब्धत्वेना । तदपेक्षया संयोगत्वजातेर्लघुत्वात्। अवयवावयविनोश्च संयोगाभावात् ।।

किं महालोके व्यभिचारस्त्र्यणुकरूपालोके वा। आद्येप्यवयविन्युत अवयव इति विकल्प ५ क्रमेण व्यभिचारोद्धारमाशङ्क्य निराह -- नन्वित्यादिना। त्र्यसरेण्ववयवस्याप्रत्यक्षादाह -- सौरालोक एवेति ।।
आलोकस्य विषयसंस्कारकत्वं संयोगसंबन्धेनैव वाच्यम् । एवं च रूपित्वे संयोगसंबन्धेन विषयसंस्कारकालोकनिरपेक्षचक्षुर्ग्राह्यत्वं न स्यादित्यापाद्यार्थः स्यात्। तथा च त्र्यसरेणौ व्यभिचाराभावेऽपि महालोके व्यभाचारस्तदवस्थ एवेति भावेन प्रसक्तपक्षप्रतिषेधपूर्वमाह -- न तावदित्यादिना ।। अतिप्रसङ्गादिति।। आलोकसंबन्धकुड्यसंबन्ध ६ न्धकारस्य
साक्षात्कारोदयप्रसङ्गादित्यर्थः।।
संयोगाभावादिति ।। तथा च तत्राव्यभिचारालोकान्यत्वे सति --

१.'अपि' इति नास्ति-नं. २.आलोकपदं न- रा. ३.तैजसत्र्यसरे -इत्यस्ति-नं.क. जालस्य तेजस्त्र्यस-रा.ग. जलस्थपदं न -ज. ४.न्न न -ज.. ५.प्ल्य क्रमेण व्यभिचा - उ. ६.द्वे अन्धकारस्थे -उ.

तसो-द्रत्व-सानम्) शक्तिवादः पु - ११५.

किञ्च - तमस आलोकाभावत्वेऽपि नीलं तम इति धीर्न स्यादिति बाधकं सममेव । रूपसाक्षात्कारस्यालोक १
सापेक्षचक्षुर्नजन्यत्वनियमात् । न च प्रमारूपविशेष एवायं नियमः। सामान्ये बाधकाभावात् । शुक्ल २ पटादौ चाक्षुषस्य नील इति भ्रमस्याप्यालोकं विनाऽनुत्पत्तेश्च।।
यत्तु -- ३ वर्धमानोक्तं वस्तुतो रूपवतो विशेष्यस्य चाक्षुषत्वे आलोकापेक्षा, --

-- रूपित्वमेव तादृशालोकसापेक्षचक्षुर्ग्राह्यत्वे प्रयोजकमित्येत्योक्तापादकस्यालोकेऽभावान्नोक्तकर्कस्तत्र व्यभिचारीति वाच्यम् । एवं सति तमोन्यत्वे सति रूपित्वमेवालोकापेक्षचक्षुर्ग्राह्यत्वे प्रयोजकमित्युपेयताम्। एवं ४ तमसो रूपित्वेऽपि नोक्ततर्काभावः। आलोकस्येव तमसोप्यन्यनन्यथासिद्धोक्तप्रमाणसिद्धद्रव्यत्ववत्वादिति भावः।।
अस्त्वेवं कथं चिदुक्तन्यायेनालोके व्यभिचाराभावस्तथाऽपि तमोन्यरूपित्वमेवालोकसापेक्षचुक्षुर्ग्राह्यत्वप्रयोजकमिति त्वयाऽपि वाच्यम् । अन्यथा तव मते तमसि रूपधीर्न स्यादिति भावेन परपक्षेऽपि बाधखमुपपादयति -- किंचेत्यादिनैवं न त्वयापीत्यन्तेन ग्रन्थेन ।। नियमादिति ।। आलोकरूपसाक्षात्कारे ५ त्वदुक्तदिशा व्यभिचारा ६ दितिभावः।।

रूपभ्रमेऽपि रूपप्रमायामिव न सर्वत्रालोकापेक्षा, येन शुक्लपटादौ नीलरूपभ्रमे तदपेक्षायां तमसि रूपभ्रमेऽपि तदपेक्षा स्यात् । धर्मिणो रूपित्वारूपित्वाभ्यां तन्नियमोपपत्तेरिति भावेनोक्तमनूद्य निराचष्टे -- यत्वित्यादिना ।।

१.कापेक्षेत शोधितम् -नं. २.क्लेप -न.क.ज. २.क्लेघ-रा.ग. ३.बद्धमा नो-रा. धर्ममानो-ग. ४.'च' इत्यधिकम्-उ. ५.र इव-उ. ६.राभावादिति -उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - ११६.

भ्रमाधिष्ठानभूतः पटादिश्च वस्तुतो रूपीति त १ त्र विशेष्य २ स्य ग्रहार्थमेवालोकापेक्षा न तु रूपग्रहणार्थं, मन्मते चालोकाभावरूपं तमो वस्तुतो ३ नीरूपमिति नीलं तम इति साक्षात्कारे नालोकापेक्षा, त्वन्मते ४ तु तमो वस्तुतो रूपीति तत्रालोकापेक्षा स्यादेवेति। तन्न । दधि धवलमाकाशं नील ५ माकाशमित्यादौ नी ६ रूपाकाशविशेष्यकभ्रमे, आकाशे ७ धवलिमा आकाशे नीलिमेत्यादौ रूपविशेष्यकभ्रमे चालोकापेक्षादर्शनात् ।।
नन्वाकाशे धावल्यादि ८ धीर्गृह्यमाणारोपरूपा, ग्रहणात्मकं चारोप्यज्ञानं रूपवद्द्रव्यविषयकमित्यरोपकारणस्य रूपवद्द्रव्यज्ञानस्यैवालोकापेक्षा,

नीरूपे वस्तुनि रूपभ्रमे आलोकापेक्षा नेति किं ९ निरूपवस्तुविशेष्यकरूपविषेषणकभ्रमे वा रूपविशेष्यवस्तुविशेषणकभ्रमे वा । १० उभयमप्ययुक्तम् व्यभिचारादित्याह -- दधि धवलमिति ।। शुभ्राभावदशापन्नोऽयं भ्रमः। दर्शनादिति ।। तथा च तमस्यापि रूपभ्रमे तदपेक्षा स्यादेवेति भावः।।

आकाशरूपभ्रम ११ तमोरूपभ्रमस्य गृह्यमाणत्वस्मर्यमाणत्वकृतवैषम्यमाशङ्क्य निराह -- नन्विति ।।

१.तद्वि-रा. २.ष्यग्र-न. ३.न रूपीति -नं.रा.ग.क.ज. ४.'तु तमो' इति नास्ति-न. ५.आकाशपदं न -ज. ६.नील -- रा. ७.धावल्य-रा. ८.आदि इति नास्ति-रा. ९.नी-उ. १०. नोभयमपि युक्तम् -उ. ११.मात्तमो-उ.

तसो-द्रत्व-सानम्) शक्तिवादः पु -- ११७.

न तु साक्षा १ दारोपस्येति चेन्न । तत्रानुभूयमानारोपोऽन्धकारे तु स्मर्यमाणारोप इत्यत्र नियामकाभावात् ।।
किञ्च गृह्यमाणरूपस्य संसर्गापार्थमेव रूपग्रहस्यापेक्षितत्वात् रूपग्रहे आलोकापेक्षेति मदिष्टसिद्धिः। न च तत्र रूपवदभेदस्यैवारोपः न तु रूपसंसर्गस्येत्यत्र मानमस्ति ।।
न च रूपग्रहो तदाश्रयग्रहं विनेत्याश्रयग्रहार्थमेवालोकापेक्षेति ।

यद्वा नीरूपे रूपभ्रमे नालोकापेक्षेत्यत्राकाशरूपारोपे व्यभिचारोक्तिरयुक्ता, तत्राप्यालोकापेक्षायां रूपारोपकारणं यद्रूपवद्द्रव्यान्तरज्ञानं तत्रोपयोगादिति भावेनाशङ्क्य तमोरूपारोपोषऽपि तथैव तदपेक्षा दुर्वारेत्याह -- नन्वित्यादिना।। न तु साक्षादिति ।। द्रव्यं विना कृतकेवकरूपारोपलक्षणे स्मर्यमाणारोपेत्यर्थः। तमो रूपारोपश्च स्मर्यमाणारोप इति भावः।।
अङ्गीकृत्यापि स्मर्यमाणारोपत्वमालोकसापेक्षत्वमावश्यकमित्याह -- किंचेति।। मदिष्टेति ।। तमोरूपारोपेप्यालोकापेक्षया स्यादित्यापादनसिद्धिरित्यर्थः। इष्टासिद्धिमाशङ्क्य २ परिहरति -- न च तत्रे ८ ति ।। गृह्यमाणारोपस्थल इत्यर्थः। अभ्युपेत्यापि

रूपसंर्गारोपमालोकापेक्षया अन्यथासिद्धिमाशङ्क्य निराह -- न च रूपेति ।।

१. द्रूपेस्येति -रा. २.निराह -उ. ३.इतः 'निराह' इति पर्यन्तं नास्ति -उ.

न्यायदीपुयतर्कताण्डवम् (द्वि.परिच्छेदः पु - ११८.

त्वन्मते नयनगतपित्तपीतिमादाश्रयग्रहं विनाऽपि ग्रहात् । तस्माद्द्रूपज्ञानस्य रूवद्विशेष्यकत्वे १ रूपविशेष्यकत्वे भ्रमत्वे प्रमात्वे २ च रूप ३ भानप्रयुक्तैवालोकापेक्षेति तमसोऽभावत्वेऽपि नीलं तम इति तमसि नैल्यमिति वा ज्ञाने आलोकापेक्षा दुष्परिहरा ।।

एवं च त्वयाऽपि तमोनिष्ठत्वेन रूपसाक्षात्कारभिन्नरूपसाक्षाकत्कारे तेजोपेक्षेति वाच्यम् । ततो वरं तमोभिन्नरूपवत्साक्षात्कारे तदपेक्षेति तमो द्रव्यमेवास्तु ।।

किञ्च रूपिणो घटादेरिव रूपिघटाद्यभावस्य ग्रहोऽप्यालोकसापेक्षो द्रष्ट इत्यभाववत्पक्षेऽ ४ पि तदपेक्षाऽऽवश्यकी ।।

ननु -- तजोऽभावग्रहे न तेजोऽपेक्षा । अन्यथा घटाभावग्रहेऽपि घटापेक्षा स्यादिति चेत् ।

तमोऽन्यरूपित्वमेवालोकसापेक्षचक्षुर्ग्राह्यत्वप्रयोजकमित्युपपाद्य तमसो द्रव्यत्वे प्रागुक्ततर्कबाधो ५ निरस्तः। अधुना तेजोविरोधिप्रत्यक्षत्वमेवालोकनिरपेक्षत्वे प्रयोजकं, तच्चास्ति तमःप्रत्यक्षत्वेपीत्युपपादयंस्तर्कबाधं प्रकारन्तरेणोद्धरति--किञ्चेत्यादिना ।। एतेनेत्यन्तेन ।। अभावत्वे ६ ति ।। तम ७ स्तेजोभाववत्वपक्षेऽपीत्यर्थः।।

१.रूपविशेष्यकत्वे इति नास्ति -- रा. २.त्वेवा-नं ३.पभ्रम -क. पाभाव-ग. ४.'अपि' इति नास्ति -रा. ५.धे निरस्ते-उ. ६.पीति -उ. ७.सस्ते-उ.

तसो-द्रत्व-सानम्) शक्तिवादः पु - ११९.

तेजोऽनपेक्षा हि न तेजोऽभावप्रत्यक्षत्वेन । तजोऽभावव्यापकभास्वररूपविरहप्रत्यक्षस्यापि तेजोऽनपेक्षत्वदर्शनात् । नापि तेजोविरोध्यभावप्रत्यक्षत्वेन । गौरवात् । किं तु तेजोविरोधिप्रत्यक्षत्वेनैव। तथा च तमस्तेजोविरोधि द्रव्यमेवास्तु । तेजोऽपेक्षाप्रसङ्गस्य विरोधेनैव सामाधानात् । एवं च रूपित्वादिप्रतीतिरप्यनुकूलिता भवति।।

एतेन -- तमोग्राहकं तेजोऽनपेक्षं चक्षुर्भिन्नमिन्द्रियान्तरमेवास्तु, अधिष्ठानं तु तस्यापि नयनगोलकमेव, सर्पाणां चक्षुःश्रोत्रयोरिवैकाधिष्ठानत्वसंभवादिति निरस्तम् । उक्तरीत्या चक्षुर्ग्राह्यत्वेनैवोपपत्ताविन्द्रियान्तरल्पकाभावात् । धर्मिग्राहकमानेन चक्षुष एव रूपग्राहकत्वेन सिद्धेश्च।।

एतेनेति ।। तमोभिन्नरूपवत्साक्षात्कार एवालोकापेक्षेति कथनेन। तथा तेजोविरोधिप्रत्यक्षत्वेनैव तेजोनपेक्षेति कथनेनेत्यर्थः। तदेव व्यनक्ति -- उक्तरीत्येति।। रूपग्रहणान्यथानुपपत्तिरेव कल्पिकेत्यत आह-- धर्मीति ।। रूपज्ञानं करणसाध्यं कार्यत्वादिति मानेनेत्यर्थः।।

एवं तर्कपराहत्यादिदोषनिरासेन रूपवत्वादित्युक्तहेतुं समर्थ्येदानीं क्रियाश्रयत्वादित्युक्तहेतुमपि शशधराद्युक्तबाधकोक्तिमुखेनासिद्धिमाशङ्क्य साधयति --- न च छायामिति ।।

१.नपे - नं.

---------- ---------- ----------

न च छाया १ यां गतेः स्वभावावकत्वे आवरकछत्रादिद्रव्यानुविधानानुपपत्तिः। स्थाणावचलेऽपि २ तच्छायायां गतिदर्शनात् । मण्याद्यनुविधायिमण्यादिप्रभावदुपपत्तेश्च। रूपादिधीस्ति प्रभायामिव तमस्यप्यबाधिता ।।

न च तमसः क्रियावत्वे क्रियावतः प्रत्यक्षस्य स्पर्शवत्वनियमात्स्पर्शवत्वं स्यादिति वाच्यम् । विपक्षे बाधकाभावेन स्पर्शवतोऽपि वायोर्नीरूपत्ववत्क्रियावतोऽ ४ प्यस्य निःस्पर्शत्वोपपत्तेः । आलोकादाविव स्पर्शस्यानुद्भूतत्वेनानुपलम्भसम्भवेनेष्टापत्तेश्च।।

गतिदर्शनादिति ।। सूर्यादिगत्यनुरोधेनेति भावः। ५ प्रामाण्यादिभावादिति ।। प्रभाव ६ त्तन्मते द्रव्यमेवेति भावः।।

ननु शशधरादौ कुड्याद्यपसरणावशादन्यत्रापि प्रभाचलनोपलम्भात्तदनुविधायित्वं तत्रासिद्धमुत्युक्तमिति चेन्न । छायायामपि तदनुविधानाभावस्योक्तत्वादिति भावः।।

ननु -- प्रभायामन्यानुविधायिगतित्वेऽपि तत्र रूपत्वाद्यन्यथासिद्धमानावगगतं द्रव्यत्वमित्यत आह -- रूपादिति ।। अबाधितेति ।। न नीलं ७ तम इति कदाऽप्यप्रतीतेर्यौक्तिबाधकस्य च निरस्य ८ त्वादिति भावः। बाधकान्तरगमाशङ्क्य द्वेधा निराह -- न च तम ९ इत्यादिना।।

१.याग -- नं. वाया ग -क. २.तत् इति नास्ति-नं. ३.क्षस्पर्श-नं.क.ज. ४.प्यस्पर्शवत्वो क. प्यस्यास्पर्श-ज. ५.'मण्यादिप्रभावदिति' इत्यस्ति -उ.

६.च त्वन्म -उ. ७.'ननु' इत्यारभ्य एतावन्नास्ति-उ. ८.स्तत्वा-उ. ९.मस-इ-उ.

तसो-द्रत्व-सानम्) शक्तिवादः पु - १२१.

--- --- ---

न च स्पर्शसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातेरुद्भूदस्पर्शसामानाधिकरण्यन्यायमान्नैवमिति वाच्यम् । विपक्षे बाधकाभावात् ।।

भोगविशेषसंपादनार्थं हि स्पर्शोद्भवः, न चास्मदादिभिः प्रकृते भोगाविशेषसंपादन १ प्रयोजनकत्वं निर्णीतुं शक्ययम् । पुराणेषु तमसः काठिन्योक्त्योद्भूतस्पर्शस्यापीष्टत्वाच्च।।

यत्तु छायायाः तेजोविरोधिद्रव्यत्वे प्रभाऽऽश्रये रत्नविशेषे २ छाया नोपलभ्येतेति चोद्यं, तदालोकाभावत्वेऽपि समम् । तत्रालोक ३ स्य विरलत्वाद्वाऽऽवरणीयतेजोऽन्यतराभावस्य छायात्वाद्वा छाया ४ त्वोपपत्तिरिति समाधानं च भाववत्वेऽपि समम्।।

इष्टापत्तेश्चेत्ययुक्तमित्याशङ्क्य द्वेधा समाधिमाह -- न च स्पर्शेत्यादिना ।। नियमादिति ।।

पृथिवीत्वजलत्वादिजातेस्तथादर्शनात्तमसो द्रव्यत्वपक्षे तमस्त्वस्य पृथिवीत्वादेरिव

द्रव्यत्वसाक्षाव्द्याप्यजातित्वापत्योद्भूतस्पर्शसामानाधिकरण्यं स्यादेवेत्यर्थः। प्रभादावव्यभिचाराय साक्षाव्द्याप्याप्यजातेरित्युक्तम् । प्रभात्वादेर्द्रत्वव्याप्यतेजस्त्वव्याप्यत्वात् । विपक्ष इति ।। उक्तरूपजातेरपि तादृशस्पर्शसामानाधिकरण्याभाव इत्यर्थः।।

तमेव व्यनक्ति -- भोगेति ।। स्पर्शोद्भवः स्पर्शस्योद्भूतत्वमित्यर्थः। प्रयोजकत्वमिति ।। तमःस्पर्शस्येत्यर्थः। पुराषेष्विति ।। तमस्सुघोरमित्यादिप्रागुक्तवचनेष्वित्यर्थः।।
तमः तेजोविरोधिद्रव्यमेवास्तु इति पक्षे बाधकमाशङ्क्य निराह-- यत्विति ।।

१. नेन प्रयोजनवत्वं -रा. २.षच्छाया-नं. ३.स्यावि-नं. ४.योप-रा.क.ग.ज.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १२२.
---------- ---------- ----------
यत्तु - १ वर्धमानादिभिरुक्तं प्रौढालोकमध्ये सर्वतो घनतरावरणे छाया न स्यात्,
तेजोविरोधेन तत्र तमोऽवयवानां पूर्वमनवस्थानात् । सर्वत २ स्तेजःसंकुलेऽन्यतोऽपि तदागमना ३ संभवादिति । तन्न। पिहित ४ प्रदीपपागमनान्तरं प्रासादव्याप्यालोकमण्डलदारणानन्तरं छाया दीपनाशानन्तरमन्धकारस्य चारम्भसंभवात् ।।
ननु -- तम आलोकाभावो न चेदालोकाभावाविषयबुद्ध्यविषयो न स्यादिति चेन्न। आलोकाभावग्रहे प्रतियोगिस्मरणादेरधिकस्यापेक्षितित्वेनेष्टापत्तेः।।
एतेन -- तमो द्रव्यं चेत्तदवयवानां तमोऽवयव्यारम्भकत्वं वाच्यम् । न च तद्युक्तम्। आरम्भकत्वे स्पर्शवत्वस्य प्रयोजकत्वेन निःस्पर्शस्य तमसोऽनारम्भकत्वात्। न च मूर्तत्वमेवारम्भकत्वेतन्त्रम्। मनसोऽप्यारम्भकत्वा ५ पातादिति शशधराद्युक्तं निरस्तम् । निःस्पर्शत्वमसिद्धमित्युक्तत्वात् ।।

यत्विति।। तमसस्तेजोविरोधिद्रव्यत्वे बाधकान्तरमनूद्य निराह-- यत्तु वर्धमानादिभिरिति।।
शशधराद्युक्तबाधकमाशङ्क्य निराह -- नन्वित्यादिना ।। अपेक्षितत्वेनेति ।। तमसो ग्रहे तदनपेक्षितत्वेनेत्यपि ज्ञेयम् ।।
बाधकान्तरं च निराह -- एतेनेति ।। स्पर्शकथनेनेत्यर्थः।

१.बद्धमान-रा. वर्धमान--ग. इत्यस्ति २.र्वतेजः-नं. ३.भावादिति -नं. ४.'प्र' इति नास्ति-नं. ५.त्वप्रसङ्गात् -- रा.

तसो-द्रत्व-सानम्) शक्तिवादः पु - १२३.
---------- -------- ---------
तम आरम्भकं अन्त्यावयविभिन्नत्वे सति रूपवत्वादित्यनेन सत्प्रतिपक्षत्वाच्च। अस्पर्शत्वरूपसाधनावच्छिन्नसाध्यव्यापकस्य नीरूप १ त्वस्योपाधित्वाच्च । अस्पर्शस्यापि पुरुषार्थसाध २ कत्वे नारम्भकत्वसंभवेनाप्रयोजकत्वाच्च ।।
मानस्तु नारम्भकं प्रयोजनाभावात् । अनारम्भ ३ एव च प्रयोजनाभावे प्रमाणम्। अन्यथाऽऽरम्भकत्वे रूपवत्वमेव तन्त्रम्,

तदेव व्यनक्ति-- निःस्पर्शत्वमिति ।। सत्प्रतिपक्षत्वाच्चेति ।। अवयवाख्यं तमोऽवयवरूपतमोनारम्भकं निःस्पर्शत्वादिति परोक्तस्यानुमानस्येति भावः। अन्त्यावयविनि घटादावव्यभिचाराय
हेतौ सत्यन्तम् ।।
न च तस्यापि स्वगतगुणकर्मारम्भकत्वान्न व्यभिचार इति शङ्क्यम् । आरम्भका ४ नानेकपदाभ्यां द्रव्योपादानत्वतदभावयोरभिमतत्वात् । अत एव पटादावन्त्यावयविनि साध्य ५ व्यापकत्ववारणाया साधनावच्छिन्ने साध्यव्यापकस्य नीरूपत्वस्योपाधित्वाच्चेत्युज्यते । अस्पर्शत्वात्

तमोरूपद्रव्यान्तरानारम्भकं तम इत्यस्य दोषान्तरमाह -- अस्पर्शस्यापीति ।। पुरुषार्थेति ।। छायायाः सुखहेतुत्वेन पुरुषार्थसाधनत्वं ध्येयम् ।।
मनसो द्रव्यारम्भकत्वम स्यादित्यत आह -- मनस्त्विति ।। हेतोरसिद्धिमाशङ्क्याह -- अनारम्भ इति ।। कुत एषा कल्पनेत्यत आह -- अन्यथेति ।। ६ स्पर्शवत्वादिमानसिद्धा ७ न्ततो रूपवत्वमात्रं न ----

१.परस्यो-रा. २.नत्वेनारम्भकत्वासंभवेन -न. ३.म्भक-न. ४.नारम्भक-उ. ५.ध्याव्या -उ. ६.'स्पर्शवत्वस्यैवारम्भकत्वे प्रयोजकत्वमुपेत्य तमसोऽनारम्भकत्वस्य द्रव्यत्वाभावस्य वा आपादान इत्यर्थः। वायोः पृथिग्द्रव्यत्वादिकम् इत्यधिकम् -उ. ७.द्धम् ततो-उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १२४.

वायुस्त्वनुद्भूत १ रूपा पृथिवी वा स्यादनारम्भको वा स्यात्, अद्रव्यं वा स्यात्।।
एतेनालोक २ ज्ञानाभाव एव तमः। तत्काले तद्देशे आलोकसाक्षात्काराभावस्य सर्वसम्मतत्वात् । आलोकवद्गर्भगृहं प्रविशतः प्रथममालोकाज्ञाने तमःप्रत्ययाच्च। आलोकविरोधिद्रव्यान्तरस्यालोकभावस्य वा तमस्त्वे ३ तदानीं द्वयोरप्यभावात्तमः प्रत्ययो भ्रमः स्यादित्यपास्तम् । नीलं ४ तम इत्यबाधितप्रतीतिविरोधात् । तमः ५ साक्षात्कारस्य चक्षुरन्वयव्यतिरेकानुविधान ६ विरोधाच्च । न हि ज्ञानाभावो नीलः । न वा चाक्षुषः । प्रदीपादिमत्यपि गर्भगृहे तमोधीर्भ्रान्तिर्बाधितत्वात् ।।
किंच -- रूपाज्ञाना ७ द्गौणं व्यवहारमात्रं वा।

-- प्रयोजकं चेत्तमसोऽपि तथात्वं सिद्धमिति न स्पर्शवत्वमारम्भकत्वे प्रयोजकं किंतु प्रयोजनवत्वमेवेति सममिति भावः।।
कस्य चिन्मतमपाकरोति -- एतेनेति ।। आलोकस्मृतिमतः तमः प्रत्ययदर्शनात्कथमेतदित्यतो ज्ञानं साक्षात्कार इति भावेनाह -- तत्काल इति ।। असिद्धं निरस्य युक्तिं चाह -- आलोकवदिति ।। सूक्ष्मप्रदीपालोकयुक्तेत्यर्थः। पक्षान्तरे बाधकं चाह-- आलोकेति ।। विरोधद्वयं व्यनक्ति-- न हीति ।। परोक्तयुक्तिं निराह -- प्रदीपेति।।

१.रूपपदं न-नं. २.काज्ञा-नं. ३.इदा-रा. ४.लीनं-रा. ५.सासा-रा. ६.पुनः 'विधाने' त्यधिकम् -रा. ७.नवद्गौ -नं.रा.ज.

तसो-द्रत्व-सानम्) शक्तिवादः पु - १२५.

एतेनैवारोपितं नीलरूपमेव तम इति निरस्तम् । नीलं १ रूपं तम इत्यननुभवात्। २ नीलरूपवदित्येवानुभवाच्च । आलोकमध्यस्थे श्वुक्ले वस्तुनि नैल्यारोपे तमोव्यवहारापाताच्च ।।
किंचारोपस्योपलक्षणत्वेऽनारोपदशायामपि तमोव्यवहारःस्यात् । विशेष ३ णत्वे आरोपस्यापि तमःशरीरप्रविष्टाना ४ चाक्षुषत्वं ५ स्यात् ।।
तस्मात्तम आलोकाभाव इति, ६ आलोकाज्ञानमात्रमिति, आरोपितं नीलरूपमेवेति च पक्षत्रयमप्ययुक्तम् ।।
एवं च तमसो द्रव्यत्वे सिद्धे प्रसिद्धद्रव्यान्तर्भावश्शक्यश्चेत्तथैवास्तु न चेद्द्रव्यान्तरमस्तु । न तत्रास्माकमाग्रह इति ।।
इति तमसो द्रव्यत्व ७ साधनम् ।। ११ ।।

एतेनैवेत्येतव्द्यनक्ति -- नीलरूपमिति।। अनुभवविवादिनं प्रत्याह-- आलोकेति।।

तादृशभ्रमेऽपि विप्रतिपन्नं प्रत्याह -- किञ्चेति।। एवं तर्हि नवैव द्रव्याणीति नियमात् क्कान्तर्भाव इत्यत आह-- एवं चेति ।। न तत्रेति ।। ८ न चैवं भानाभावादिति भावः।।
इति तमसो द्रव्यत्वसमर्थनम् ।। ११ ।।

१.लरू-रा.क.ज. २.अयं हेतुर्नास्ति-ग. ३.षत्वे-रा. ४.न-रा. ५.'न' इत्यधिकम्-रा. ६.'रूपज्ञान' इत्यस्ति-नं. 'रूपाज्ञा' -रा.क.ग.ज. ७.समर्थनम्-रा.ग.ज. ८.'इति' इत्यधिकमपि -क. ८.नवैवेत्यत्र मानाभा-उ.

न्यायदीपयुतर्कताण्डवम् (द्वि.परिच्छेदः पु - १२६.
---------- ---------- ----------
अत परमते सुवर्णस्य योग्यानुपलब्धिबाधः ।। १२ ।।
सुवर्णस्य तु न द्रव्यान्तरं, नापि तैजसं, किंतु पार्थिवमेव । पीतत्वात्। अजलत्वे १ सति गुरुत्वात् । नैमित्तिकद्रवत्वाधिकरणत्वाच्च। २ घृतादिवदित्या ३ द्युनुमानात्। 'दिव्यं पार्थिवं वस्त्वि ४' इत्यादि ५ श्रुतेश्च।।
जम्बूनदीरोधसो ६ मृत्तिका जम्बूफरसानु--

अथ परमते सुवर्णस्य योग्यानुपलब्धिबाधः।। १२ ।।
तमोवत्सुवर्णमपि नवभ्यो द्रव्यान्तरं किमित्यत आह -- सुवर्णं त्विति।। न्यायमत इव तेजस्यन्तर्भावः किन्नेत्याह -- नापीति।। ७ तैजसमिति।। पयस्यव्यभिचारायैव जलान्यत्वे सतीति नैमित्तिकेति चोक्तिः। अनुमानानुग्राहकश्रुत्याद्याह -- दिव्यमिति।।
यत्सोमचित्रमुक्थ्यं दिव्यं पार्थिवं वसु।
तन्नः पुनान आभरेति--

बहुशाखायां श्रवणादित्यर्थः ।।
पञ्जमस्कन्धवाक्यान्याह -- जाम्बूनदीति ।। मेरुसमीपस्था काचिन्नदी ८ तीरयोर्मृतिकेत्यर्थः। पूर्ववाक्योक्तस्या ६ नुवादो जाम्बूनदीति।

१.जलान्यत्वे-रा.ग. २.घटादि-न.रा.क. ३.त्यनु-नं.ग. ४.वस्वि-नं.क.ग.ज. ५.देश्च-नं. ६.सोर्या-नं. सोर्म्य-ग. ७.तैजसमिति इति नास्ति-उ. ८.तत्ती -उ. ९.स्थानु-उ.

पते-सु-योनुब्धि-बाधः) शक्तिवादः पु - १२७.
---------- --------- ----------
१ विध्यमाना वाय्वर्कसंयोगविपाकेन जाम्बूनदं नाम सुवर्णं भवतीति, तावती भूमिः काञ्चन्यादर्शनलोपमेत्यादिभागवतादिवचनाच्च ।।
'अग्नेः २ प्रजातं प्रथमं ३ हिरण्यं 'मिति श्रुतिस्त्वग्नेराप इत्यादिश्रुतिवदग्नेर्हिरण्यमित्तत्वमाह। न तु हिरण्यस्याग्न्यात्मकताम्।।
ननु -- पीतरूपगुरुत्वाश्रया ४ विनिर्भागवर्ति तैजसं ५ भागान्तरमेव सुवर्णम्। तत्रच पीतत्वादिकमसिद्धमि ६ ति चेन्न । तादृशभागान्तरस्याननुभवात्। तत्कल्पकस्य चाभावात् ।

अन्य७ समं द्यावन्मानसोत्तरमेवेर्वोरन्तरं तावतीति षण्णवतिलक्षयोजनपरिमिता काञ्चनी सुवर्णमयी दर्पणतलवदतिश्लक्ष्णतमेति स्वादूदकसमुद्रात्परतो लोकालोकपर्वतादर्वाग्भागभूमिरित्यर्थः। परोक्तश्रुतिगतिमाह -- अग्नेरिति।।
सुवर्ण ९ द्विभागम्। तत्र पार्थिवभागपक्षूकारे सिद्धसाधनम् । भागान्तरपक्षीकारे हेतूनामसिद्धिरिति भावेन शङ्क्यते --

नन्विति।।नैमित्तिकद्रव्यत्वाश्रयेत्यपि ज्ञेयम्। अवनि १० भागवर्तीति ।। संश्लिष्टतया वर्तमानेत्यर्थः।।
शुक्लभास्वरेष्णस्पर्शवद्द्रव्याननुभवेऽप्यनुमीयत इत्यत आह-- तत्कल्प ११ कस्येति ।। तथाचैक एव भाग इति तस्यैव च पक्षत्वान्नासिद्धिः। अन्यथा घटादावपि भागान्तरकल्पनेन तैजसत्वादिकल्पनं तत्रापि स्यादिति भावः।।

१.षिच्यमाना-नं. २.रपत्यंजातं -ग. ३.'परियत्' इत्यधिकम्-ज. ४.वनिभाग-नं.ग. वनिभावगर्भित -रा. ५.सभा-रा. ६.इत्थं' इत्यधिकम्-रा. ७.न्यत्स -उ. ८.या-उ. र्णं द्वि-उ. १०.र्भागवतीति-उ. ११.नस्य-उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १२८.

न चानुद्भूत १ स्पर्श २ वत्वान्नानुभवः। त्वन्मते सुवर्णरूपस्योद्भूतत्वेनापसिद्धान्तात् ।।
न च -- सोपि भागश्रुषा सुवर्णत्वेनानुभूयते, तस्य शुक्लभास्वरूपं तूपष्टम्भकपीतरूपाभिभूतत्वान्नानुभूयत इति वाच्यम् । पार्थिवरूपेण तेजोरूपाभिवे घटादिरूपेण तत्प्रकाशकालोकरूपाभिभवापातात्।।
न च -- पार्थिवं रूपं स्वाश्रया ३ विनिर्भागवर्तिन एव तेजसो रूपाभिभावकमिति वाच्यम् । मण्यादिमध्यवृत्तितेजोरूपस्य मणिरूपेणाभिभवात् । तथा च सुवर्णमुपष्टम्भकपीतद्रव्यसंयुक्तमप्यनाभि-
-

अननुभवस्यान्यथासिद्धिमाशङ्क्य निराह-- नचेति ।। किं रूपानुभवो नेत्युच्यते अथ द्रव्यानुभवः। आद्य आह-- त्वन्मत इति।। रूपं ४

सुवर्णस्योद्भूतमेवेति मण्युक्तेरिति भावः। द्वितीयमाशङ्क्यते -- न चेति ।।
मण्यादिमध्य इति ।। तत्रापि तेजोभागस्य तव संमतत्वात्तत्राप्यभिभवे ५ परप्र काशकत्वाभावप्रसङ्गादिति भावः। संयुक्तमपीत्यपिपदेनाभ्युगमं सूचयति।।

१.'रूप' इत्यधिकम्-रा.ग. अपिच 'स्पर्श' इति नास्ति-क.रूप-स्पर्श-ज. २.र्शत्वा-रा.नं. ३.वनिभाग-नं. याविभाग-रा. वनिर्भा- ग. ४.तुतस्येद्भू - उ. ५.'स्व' इत्यधिकम् -उ.

पत-सु-योनुब्धि-बाधः) शक्तिवादः पु - १२९.

--भूतोद्भूतरूपवत्तेजस्त्वादङ्गारवह्निरिवान्धकारे स्वपरप्रकाशकं स्यात्। न चाङ्गारादावनभिभूतरूपं प्रभाऽन्तरमनुभूयते येन तदेव प्रकाशकं न त्वङ्गारवह्निरवह्निरिति स्यात्।।
अत्रोक्तं मणौ-- मणिप्रभायामङ्गारवह्नौ च रूपगत १ शुक्लत्वमेवाभिभूतं, न तु रूपं, न वा तद्गतं भास्वरत्वं, अत एवाङ्गारवह्न्यादिकं नीलारुणादिरूपव २ त्वेनैव भासते, एवं च स्वपरप्रकाश ३ कत्वोपयुक्तभास्वरत्वस्यानभिभवादङ्गारवह्निः स्वपरप्रकाशकः, सुवर्णे तु रूपमुद्भूतं, तद्गते शुक्लभास्वरत्वे चाभूभूते इति न तत्स्वपरप्रकाशकमिति ।तन्न । रत्नात्प्रभाया इव काष्ठाद्वह्नेरिवि सुवर्णस्य कदाऽप्यननुभवेन कल्पकाभावात् । अन्यथा -- अभिभवकल्पनेनानुपलब्धिविरोधे परिहृते तेजोभागासिद्धिः ---
सर्वस्यापि पार्थिवत्वस्यैवाभिमतत्वादत्रोक्तमिति च तथाचेत्यादिनोक्तप्रमेये समाधानं प्रत्यक्षखण्डे सुवर्णतैजसत्व ५ वादे उक्तमित्यर्थः। अन्यथेति।। कल्पकाभावेप्येवं कल्पन इत्यर्थः।

१.तं शु-नं.रा.क.ज. २.पत्वे-नं.ग. ३.'शयुक्तभास्वरस्यानभि' इत्यस्ति-नं. ४.न्नत्वस्य-नं. ५.स वा -उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १३०.

- सिद्धे च तस्मिन् फलबलादभिभवकल्पनमित्यन्योन्याश्रयः स्यात् ।।
किं चास्तु सुवर्णरूपमभिभूतं तथाऽपि महत्वे सत्युद्भूतरूप १ वत्तेजस्त्वस्यैव व्यञ्जकत्वे तन्त्रत्वेन सुवर्णमपि व्यञ्जकं स्यात्। यदि ह्युद्भूतरूपमप्यभिभूतरूपत्वेनानभिव्यञ्जकं किंचित्तेज उभयसिद्धं स्यात् । तदा तत्रानतिप्रसङ्गायानभिभूतत्वविशेषणमर्थवद्भवेत्। न च तदस्ति। अनभिव्यञ्जकानां ग्रीष्मोष्मादीनामनुद्भूतरूपवत्वात्।।
किंचैव सुवर्ण(अनु)उष्णस्पर्शोप्युद्भूत एवाभिभूतः कल्प्यताम्।

तस्मिन्निति।। तेजौभाग इत्यर्थः। फलेति।। अनुपलब्धिरूपकार्य बलेनेत्यर्थः।।
अस्तु वा रूपमभि २ मतं तथाऽपि दीपादिवत्परप्रकाशकं स्यादेव प्रयोजकस्य ३ समत्वादिति भावेनाह -- किंचेति।। ननु महत्वे सत्यनभिभूतोद्भूतरूपवत्तेजस्त्वमेव प्रयोजकमतः सुवर्णे तादृशतेजस्त्वाभावान्न दोष इत्यत आह-- यदि हीति।। ग्रीष्म ऊष्माद्येव तादृशं तेज इत्यत आह-- अनभिव्यञ्जकानामिति।।
अस्तु वाऽनभिभूतोद्भूतरूपवत्तेजस्त्वमेव व्यञ्जकत्वे प्रयोजकं, अथापि सुवर्णं तेजश्चेदुपेयते तर्हि स्यादेव तत्परप्रकाशकं तद्रूपाभिभभ्यायुक्तादित भावेन स्पर्शप्रतिबन्दीमाह- किंचेति।। यद्वा तेजः स्पर्शवत्तेजोरूपस्याप्यभिभवायोगात्प्रागुक्तप्रयोजकेनाभिभूतत्वा ४ विशेषणमसंभवदुक्तिकम्।

१.पते-नं.रा.ग.ज. २.भूत--उ. ३.सत्वादि-उ. ४.त्वावि-उ.

पत-सु-योनुलब्धि-बाधः) शक्तिवादः पु - १३१.

न चैवं स्पर्शोद्भवे सुवर्णमन्धकारे त्वचा गृह्येत, तथा च सुवर्णं न वेति संशयो न स्यादिति वाच्यम् । तव १ सुवर्णत्वजातेरुपष्टम्भका २ भिमतरूपविशेषग्रहव्यङ्ग्यत्वेन ब्राह्मणव्यक्तिग्रहेऽपि ब्राह्मणत्वजातिसंदेहवदुपपत्तेरिति ३ सुवचत्वात् । तेजःस्पर्शोनभिभाव्य इति तु रूपेऽपि तुल्यम्। तस्मात्वचा चक्षुषा वा पीतगुरुद्रव्यादिरिक्तस्य ४ भागान्तरस्याग्रहे ५ ण धर्मिण एव बुद्ध्यनारोहान्न तद्रूपेऽभिभवादिकल्पनं युक्तम्।।

पराभि ६ सुवर्णस्य योग्यानुपलब्धिबाधः।। १२ ।।

संभवव्यभिचाराभ्यामेव विशेषणस्यार्थवत्वादिति भावेनाह-- किंचेति।। नैव कल्पना युक्तेत्याशङ्क्य निराह-- नचैवमिति।। तवेति।। उपष्टम्भकमस्तीति वदत इत्यर्थः। तेजःस्पर्श एव सर्वाभिभावको न स्वयमन्येनाभिभवितुं शक्य इत्यत आह -- तेज इति।। तस्मादित्यस्य विवरणं त्वचेत्यादिपञ्चम्यन्तपर्यन्तम्।।

पराभिप्रेतसुवर्णस्यानुपलब्धिबाधः।। १२।।

१.नवेति नास्ति-नं.रा.ग.ज. २.कत्वाभि-रा.ग. ३.'तव' इत्यधिकम्-ग. ४.भागन्तरस्येति नास्ति-रा. ५.हणे-नं.क.ज. हणात्-रा. ६.प्रेतसुवर्णस्यानुपलब्धि -रा.ग.

---------- ---------- ---------

अथ सुवर्णस्योदयनाद्युक्तार्थापत्तेः पञ्चधाऽन्यथोपपत्तिसमर्थनम् ।। १३ ।।
अत्र मणावुदयनोक्तं तममुक्तं--
अवश्यं भागान्तरं स्वीकार्यम् । अत्यन्तानलसंयोगि १ रूपाधिकरणं पार्थिवं
पूर्वरूपविजातीयरूपप्रतिबन्धक २ द्रवद्रव्यसंयुक्तं अत्यन्तानलसंयुक्तत्वे सति पूर्वरूविजातीयरूपानधिकरणपार्थिवत्वात्।

अथ सुवर्णस्योदयनाद्युक्तार्थापत्तेः पञ्चधाऽन्यथोपपत्तिसमर्थनम् ।। १३।।
एवं सुवर्णस्य पार्थिवत्वे प्रयुक्तहेतूनामसिद्धिसिद्धसाधनतयोर्निरासाय तत्र पराभिमतभागान्तरेऽनुपलब्धिबाधमुक्त्वा तत्साधकतया पराभिमतानुमानमप्यनूद्य निराह-- अत्रेत्यादिना।। मणावुदयनोक्तमतमुक्तमिति।। प्रत्यक्षखण्डे सुवर्णतैजसवादे एतत्प्रयोगोक्त्यनन्तरमित्याचार्यो ३ क्तेरिति मणावुक्तेरिति भावः। भागान्तरमिति।। सुवर्णं ४ पार्थिवभागसंपृक्तं भागान्तरमित्यर्थः। तथा च तत्र प्रागुक्तहेतवोऽसिद्धा इति भावः। अत्यन्तेति।। पार्थिवमित्यन्तं ५ पक्षः। पार्थिवमित्येवोक्ते घटादौ बाधः। तन्निरासायात्यन्तेत्यादिविशेषणम्। तादृशा ६ घटादौ बाधासिद्ध्योर्निरासाय पीतरूपाधिकरणमिति।

१.गे पी-रा.सु. गिपार्थिवं-ग. २.द्रवपदं नास्ति-का.ग.ज.नं. ३.र्या इति माणा-उ. ४.र्णेपा -उ. ५.न्तः प-उ. ६. शस्या- उ.

सुस्यो-दद्यु-क्तातेः-पधा-थोत्ति-सनम्) शक्तिवादः पु - १३३.
---------- ------- -------

१ क्वाथ्यमानजलमध्य २ स्थपटवदित्यनुमानात् । न चाप्रयोजकम्। द्रवद्रव्यसंबन्धं विना पार्थिवेऽत्यन्तानलसंयोगस्य

पूर्वरूपविजातीयरूपजनकत्वनियमात्। तच्च द्रवद्रव्यं न जलम् नैमित्तिकद्रवत्ववत्वात् स्नेहशून्यत्वाच्च, स्नेहवत्वे तदधीनसङ्ग्रहप्रसङ्गात्, नापि पार्थिवम् दाहविरोधित्वात्,

आपादकदशायामबाधायात्यन्तालसंयोगीति। पार्थिवमिति स्वरूपोक्तिः। जलपरमाण्वादिसंयुक्तत्वेनार्थान्तरनिरासाय साध्ये प्रतिबन्धकान्तरोक्तिः। स्वावयवावयव एव पूर्वरूपपरावृत्तिप्रतिबन्धकोस्तु । तथा च तत्संयुक्तत्वेनार्थान्तरवारणाय द्रवद्रव्येत्युक्तिः। स्वावयवावयवस्तु न द्रवद्रव्यमित्याहुः। स्तंभादावव्यभिचाराय हेतौ सत्यन्तम् ।
पच्यमानघटादावव्यभिचाराय पूर्वरूपविजातीयरूपानधिकरणेति विशेषणम्। जले व्यभिचारवारणाय पार्थिवत्वादित्युक्तिः। दृष्टान्तेऽत्यन्तनलेत्यादिहेत्वंशोपपादनाय कथ्यमानेत्युक्तिः। साध्योपपादनाय जलमध्यस्थेत्युक्तिः। जलमध्यस्थेत्युक्त्यैव पूर्वरूपविजातीयरूपानधिकरणस्य स्फटत्वात्पार्थिवत्वलाभाया घटवदित्युक्तिः। अप्रयोजकमिति ।। अनुमानमित्यन्वयः।।
नन्वेतावता ३ द्रवद्रव्यं तैजसमिति कुत इत्यतः परिशेषादिति भावेनाह- तच्चेति।। सङ्ग्रहेति।। यथा जलं पार्थिवरजांसि पिण्डीभूततया सङ्ग्रह्णाति, एवं द्रवीभूतं सुवर्णं न संगृह्णाति किंचिदिति ४ न स्नेहरूपचिक्कणतालक्षणजलासाधारणधर्माभावान्न जलमित्यर्थः। नापीति।। तच्च द्रव ५ द्रव्यं पार्थिवं न भवति।

१.क्वस्य-रा.क.ग.ज.नं.सु. २.'स्थ' इति नास्ति-सु. ३.तद्द्रव-उ. ४.न इति नास्ति-उ. ५.प्रायः 'वद्द्र' इत्येवास्ति- उ.

न्यायदीपयुततर्कताण्डवम् (शक्तिवादः पु - १३४.

तद्द्रव्यं रूपवच्च द्रवत्ववत्वादेव, तैजसं च पृथिवीजनान्यत्वे सति रूपवत्वादिति धर्मिग्रहकमानसिद्धं १
तेजस्त्वमिति ।।
तन्न । त्वदुक्तं रूपापरावृत्तिरूपं लिङ्गं हि २ रूपपारवृत्ति प्रतिबन्धककिञ्चिद्वत्वेनैवोपपन्नं ३ सन्न प्रतिबन्धकस्य द्रवत्वपर्यन्तं धावति। येन द्रवत्ववतोरूपित्वमित्यादित्वदुक्तरीत्या देजस्त्वं सिध्येत्। संभवति चेह क्लृप्तं प्रतिबन्धकान्तरम् ।

पार्थिवस्य स्वसंयुक्तोपष्टम्भकभागे यो भस्मीभावलक्षणो दाहस्तदविरोधित्वादस्य च द्रवद्रव्यस्य तद्विरोधित्वादित्यर्थः।।
तर्हि तद्द्रव्यं वाय्वादिरूपं कुतो नेत्यत आह -- रूपवच्चेति।। तत्र हेतुमाह-- द्रवत्ववत्वादिति।। जलवदिति भावः। तैजसं चेति।। द्रव्यमित्यनुषङ्गः।।
ननु -- तेजोन्तरे नैमित्तिकद्रवत्वविजातीयरूपे ४ प्रतिबन्धकत्वयोरदृष्टेरत्र कथं तदधिकरणस्य तैजसत्वकल्पनमित्यत आह-- इति धर्मिग्राहकेति।। दाहविरोधित्वनैमित्तिकद्रवत्वरूपत्वहेतुभिः सहकृतप्राचीनेन द्रवद्रव्यसंयुक्तत्वसाधकेनानुमानेन सिद्धमित्यर्थः।।
आद्यानुमाने हेतोरुक्तसाध्येन विनाऽन्यथोपपत्याऽप्रयोजकत्वेन धर्मिग्राहकमानं निराह-- त्वदुक्तमित्यादिना ।। ननु-- द्रवत्वहीनमन्यत्तादृशप्रतिबन्धकं वस्तु नास्त्येवेत्यत आह-- संभवति चेति।। किं तददृष्टं चेतक्थं च प्रतिबन्धकता क्वाप्यदृष्टेरित्यतो दृष्टान्तपूर्वं व्यनक्ति-- करकेति।।

१.तस्येत्यधिकम् -रा.ग.नं.सु. तत्ते-क.ज. २.हि शब्दो नास्ति-रा.सु. ३.न्नप्रति-रा.सु. ४.पप्र -उ.

करकादौ सांसिद्धिकद्रवत्वस्येवात्यन्तानलसंयुक्ते पार्थिवे वज्रे पूर्वरूपविजातीयरूपस्येव १ सुवर्णेऽपि विजातीयरूपस्य भोजकादृष्टविशेषादेव प्रतिबन्धोपपत्तेः।।
अन्यथा करकादौ द्रवत्वप्रतिबन्धकं कठिनं भागान्तरं वज्रेऽपि रूपपपरावृत्तिप्रतिबन्धकं द्रुतं भागान्तरं कल्प्यं स्यात्। तत्र वज्राद्यतिरिक्तं भागन्तरमनुपलब्धिबाधितं चेदिहापि पीतिमाश्रयातिरिक्तं द्रुतमनुपलब्धिबाधितं चेदिहापि पीतिमाश्रयातिरिक्तं द्रुतमनुपलब्धिबाधितमिति समम्। स्वीकृतं च त्वयाऽपि तेजोऽन्तरेऽदृष्टमप्यग्निसंयोगाद्द्रवत्वमदृष्टविशेषोपबन्धात्तेजोरूपे सुवर्णे।।
किं चास्तु द्रवत्वमेव प्रतिबन्धकम्। तत्तु द्रवत्वं पीतपार्थिवद्रवास्तु। क्लृप्तत्वात्। समानाधिकरणत्वाच्च।

नन्वदृष्टं दृष्टसामग्रीसंपत्तावेवोपयुक्तमुपलब्धम् न तु किंचित्करमित्यत आह-- स्वीकृतं चेति।। द्रवत्वद्वारैव ३ दृष्टस्य रूपपरावृत्तिप्रतिबन्धकता ४ न साक्षात्क्कथ्यमानजलान्तरस्थघटादौ तथैव दृष्टेः। अन्यथादृष्टकल्पनाऽऽपत्तेः। करकादावनन्यगत्यैव तथाऽऽश्रयाणमित्यत आह-- किं चास्त्विति ५ ।। पीतपार्थिवेति।। त्वयोपष्टम्भकत्वेनोपात्तपार्थिवेत्यर्थः। क्लृप्तत्वादिति।। धर्मिणो धर्मस्य चोभयोरपि प्रमितत्वात्प्रतिबद्ध्यरूपेण सह प्रतिबन्धकत्वाभिमद्रवत्वस्यैकाधिकणत्वाच्चेत्यर्थः।

१.च इत्यधिकम्-क.ज.नं. २.व्यगतमेवास्तु-रा.ग.सु. वभागान्तरमेवास्तु-क.ज. ३.वाद-उ. ४.न स्यात् क्कथ्य-उ. ५.स्त्वपाति-उ.

---------- ---------- ----------

न तूपष्ट १ भ्यगतं धर्मिणा सह कल्प्यत्वाव्द्यधिकरणत्वाच्च । अन्यथा क्वा २ थ्यमानजले ३ रूपा ४ परावृत्यर्थं
द्रवद्रव्यान्तरसंयोगः कप्ल्यः स्यात् ।।
ननु -- पार्थिवद्रवत्वस्य स्वसमानाधिकरणरूपपरावृत्तिप्रतिबन्धकत्वे ला ५ क्षादिद्रवत्वमपि तथा स्यादिति चेन्न ६ । त्वदभिमतद्रुततेजसः स्वसंयुक्ते पीतद्रव्ये रूपपरावृत्तिप्रतिबन्धकत्वे स्वसंयुक्ते पटादावपि तथा स्यादिति ७ साम्यात् । स्वभावविशेषकल्पनेन समाधानं तु प्रकृतेऽपि समम् ।।

न तूपष्टभ्येति ।। त्वदभिमततेजो ८ मतमित्यर्थः। धर्मिणेति।। तदनुपलम्भस्य प्रागुपपादितत्वादिति भावः। व्यधिकरणत्वाच्चेति।। प्रतिबन्धेन पार्थिवरूपेण ९ भिन्नाधिकरणमेव द्रवत्वं द्रव्यान्तरगतरूपपरावृत्तिप्रतिबन्धिकश्चेदिहापि तथैवानुपलब्धेरुक्तत्वात् । क्लृप्तेनैवोपपत्तौ नाक्लृप्तकल्पनेत्यस्यापि साम्यादिति भावः। कुसुमाञ्जल्याद्यभिमतमाशङ्कते-- नन्विति ।। क्वचिव्द्यभइचारदृष्टमात्रेणाप्रतिबन्धकत्वे त्वदभिमतोपष्ट १० म्भकस्यापि तथात्वमस्त्विति भावेनाह -- त्वदिति।।
ननु तस्योपष्टम्भक एव प्रतिबन्धकत्वं स्वभाव इत्यत आह-- स्वभावेति।। एवं द्रवद्रव्यसंयुक्तमिति साध्ये द्रवत्वं वा तादृशद्रव्यसंयुक्तत्वं --

१.ष्टम्भ-रा. म्भक-क.ज.नं.सु. २.क्वथ्य-रा.ग.ज.नं.सु. ३.पटेत्यधिकम्-क. ४.पप-रा.सु. ५.लाला-क. ६.न इति नास्ति-रा. सु. ७.स्यात्-

क.ज.नं. ८.गत-उ. ९.'भिन्नाधिकरणवृत्तित्वाच्चेत्यर्थः। ननु--'इत्यधिकम्-उ. १०ष्टम्भस्या-उ.

सुस्य-दद्यु-क्तात्तेः-पदा-थोत्ति-सनम्) शक्तिवादः पु - १३७.

किं चास्तु द्रुतं द्रव्यान्तरमेव प्रतिबन्धकम् । तथाऽपि कथं तस्य तेजस्त्वम् । पृथिव्यन्यत्वसाधकेन दाहविरोधित्वेनैव तेजोन्यत्वस्य सुतरां सिद्धेः। न हि द्रवद्रव्यसाधकं धर्मिग्राहकं मानं तस्य १ द्रवत्वसमानाधिकरणं पार्थिवत्वं विहाय नियमेव २ द्रवत्वव्यधिकरणं तेजस्त्वं स्पृशति। येन दाहविरोधित्वेन तेजोन्यत्वसाधनं धर्मिसिद्ध्यसिद्धिभ्यां व्याहतं स्यात्। द्रुततेजसोप्रसिद्ध्या व्याप्त्यग्रहात् ।

-- ३ विना वा हेतुरुपपन्न इत्या ४ दिना हेतुरप्रयोजक इत्युक्तमिदानीं तदुपेत्यपि परिशेषतस्तेजस्त्वोक्तिरयुक्तेत्याह-- किंचेति।। प्रतिबन्धकमिति।। पूर्वरूपविजातीयरूपप्रतिबन्धकमित्यर्थः। तेजोन्यत्वस्येति ।। उपष्टम्भतया त्वदभिमतं द्रव ५ द्रव्यान्तरं न तेजो भवितुमर्हति दाहविरोधित्वात् जलवदिति प्रयोगसंभवात्तेजसश्च दाहानुकूलत्वेन तद्विरोधित्वाभावादिति भावः।।
नन्वेवं प्रागुक्तद्रवद्रव्यसंयुक्त ६ साधकधर्मिग्राहकमानबाध इत्यत आह-- न हीति।। स्पृशति-- अनुमापयतीत्यर्थः। सिद्ध्यसिद्धिभ्यां ७ तादृशद्रव्यसिद्धौ तेजस्त्वेनैव सिद्ध्या तदभावसाधनं व्याहतम्। तदसिद्धौ चाश्रयस्यैवासिद्ध्या तस्य तेजोन्यत्वसाधनं व्याहतमित्यर्थः। कुतो न स्पृशतीत्यत आह-- द्रुतेति।। दारविरोधित्वेनैवोपष्टम्भद्रुतभागस्य --

१.द्रवद्रव्यत्व-क.ज. २.द्रवेत्यधिकं-क. ३.वा विना-उ. ४.इति। अत्यन्तेत्यादिना इत्याद्यस्ति -उ. ६.क्तत्वसा-उ. ७.भ्यामिति। इत्यस्ति-उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १३८.

अन्यथा पृथिव्यात्मक एव स भागोस्तु । धर्मिग्राहमान १ मादाय विरोधशङ्कासमाधानस्योभयत्र साम्यात् ।।

-- तेजोन्यत्वानङ्गीकारे बाधः २ । अन्यथेति ।। विरोधेति ।। द्रुतभागस्य दाहविरोधित्वात्कथं पृथिवीत्वमिति शङ्कायां तत्समाधानस्य यथा तेजस्त्वं कथमिति शङ्का धर्मिग्राहकमानेन तथैव सिद्धेरिति ३ तथैव समाधीयते तथैव धर्मग्राहकमादायैवैवनित्वं सिद्धमित्यपि कर्तुं शक्यत्वादित्यर्थः। उभयत्रेति ।। अवनित्वे तेजस्त्वे चेत्यर्थः।।
अयं भावः। दाहविरोधित्वेन कल्पितद्रुतभागस्य धर्मिग्राहकमानसिद्धत्वेन तेजस्त्वा ४ वगमश्चेत्तर्हि स भागः पृथिव्यात्मक एवास्तु । न च पृथिव्याः दाहाविरोधित्वादस्य च उपष्टम्भकद्रव्यविरोधत्वात्कथं पृथिवीत्वं तस्येति वाच्यम् । एवं सति तेजसोपि दाहप्रतिबन्धकत्वादस्य च भागस्य दाहप्रतिबन्धकत्वात्कथं तेजस्त्वमिति साम्यात् ।।
ननु -- अत्यन्तानलेत्यादिप्रागुक्तानुमानरूपधर्मिग्राहकभानेनैव द्रुतभागस्य तेजस्त्वं सिद्धमिति तेजोन्तरेनुपलब्धमपि दाहविरोधि ५ त्वमत्रैवोपेयत इति चेत्। तर्हि तेनैव धर्मिमानेनावनित्वं सिद्धमिति पृथिव्यन्तरेऽदृष्टमपि दाहविरोधित्वमत्रैवोपेयत इति साम्यात् । तेनै ६ वावनित्वं न सिद्धं चेत्तेजस्त्वं न सिद्धमिति।।
द्रुतभागस्य पृथिवीत्वसाधनं तेजोन्यत्वसाधनं वा धर्मिग्राहकमानबाधितमिति भावेनाशङ्कते -- नन्विति।।

१.मानमिति द्विरस्ति-रा.सु. २.कमाह-- उ. ३.तथैव इति नास्ति- उ. ४.स्त्वोप -उ. ५.धि अ-उ. ६.एवकारोनास्ति -उ.

सुस्यो-दद्यु-क्तात्तेः-पधा-थोत्ति-सनम्) शक्तिवादः पु - १३९.

ननु-- धर्मिग्राहकमाने १ नैव तैजसत्वसिद्धिः। उक्तरीत्या द्रुतभागे सिद्धे स भागः पृथिवी तेजोवेति सन्देहे पृथिवीद्रवत्वत्वस्य लाक्षाद्रवत्वादावतिप्रसक्तत्वेन सुवर्णरजतताम्राद्युपष्टम्भकावनि २ भागवर्ति तत्तत्पृथिवीद्रवत्व ३ त्वं दाहप्रतिबन्धकतावच्छेदकं कल्प्यमिति गौरवम् । तेजोद्रवत्व ४ त्वमात्रं तु लघ्विति लाघवतर्कसहकारेण धर्मिग्राहकस्यैव तैजसत्वपर्यन्तं व्यापारादिति चेन्न। तेजोद्रवत्वस्य प्रकृतप्रमाणप्रवृत्तेः प्रागसिद्धत्वेन लाघवानुपस्थितेः।।
किं च सुवर्णस्य तैजसत्वे स्मृतिषु --

१.नेन न तेजसत्व-रा.सु. २.विनिर्भाग-रा.क.ग.ज.सु. ३.वत्वं-रा.क.सु. ४.वत्वमा- क. ५.हाप्र-उ. ६.त्वस्यानु-उ. ७.न्तव्या-उ. ८.णेने-उ. ९.त्वसहस्रपलपरिमित -उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १४०.

'कृष्णलंस्रपये'दि १ ति, श्रुतिषु च तुलापुरुषादिदानेषु शरीरपरिमितत्वसहस्रपलपरिमितत्वाद्युक्तिः श्रवणाद्युक्तिश्च न स्यात् ।

श्रवणाद्युक्तिरित्यन्वयः ।।
सुवर्णं रजतं वाथ वस्त्रं वान्यदभीप्सितम् ।
यावत्साम्यं भवेद्राजन्नात्मनोभ्यधिकं तु वा।।

तावत्तुलायामारोप्य सर्वं तद्याद्विजातये।।
इति स्कान्दे ।।
तत्रैकत्र तुलाभागे सुस्त्राते धौतवाससि।
ततोपरं ३ तुलाभागे न्यसेयुर्द्विजपुङ्गवाः।
सममभ्यधिकं यावत्काञ्चनं चाभिनिर्मलम् ।।
इति मात्स्ये स्मरणात् ।।
तथा मात्स्य एव स्वर्णकामधेन्वादिदानप्रस्तावे --
काञ्जनस्यापि ४ शुद्धस्य धेनुं वत्सं च कारयेत् ।
उत्तमा पलसाहस्त्रैस्तदर्धेन तु मध्यमा ।।
कनीयसी तदर्धेन कामधेनुः प्रकीर्तिता ।।
इति स्मरणादिति भावः। कृष्णलमिति ।। स्वर्णमासिः। प्रजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्काम इति श्रुतेरर्थात्प्राप्तस्य वा चोदनकप्राप्तश्रवणस्य वाऽनुवादः। 'कृष्णलंश्रये 'दिति शाखान्तरवाक्यं वा। अत एव दशमे द्वितीये पादे 'कृष्णलेष्वर्थलोपादपाक'--

१.त्यादिश्रु-रा.ग.ज.नं.सु. त्यादषुचक-क. २.क्लृड्गखेटधरे भूपे -उ. ३.रे-उ. ४.तिशु - उ.

सुस्यो-दद्यु-क्तात्तेः-पधा-थोत्तिः-सनम्) शक्तिवादः पु - १४१.
---------- --------- ---------
न च तत्रोपष्टम्भकपरमेव सुवर्णपदम् । अशक्यपरत्वे लक्षणाऽऽपत्तेः। तस्यापि शक्यत्वे नानार्थकत्वात् ।।
एतेन --
पीतिमा च गुरुत्वं च दाहे यत्र च रक्तता ।
तस्य लोकप्रसिद्धस्य स्वर्णत्वं केन वार्यते ।।
अविच्छिन्नद्रवत्वं च वस्तु १ यत्विह भासते ।

सुवर्णव्यवहारोऽयं २ यत्र शास्त्रे प्रवर्तते ।।

-- इत्यधिकरणे कृष्णलेष्ववयवनिक्लृप्तादिकार्याभावादपाक इति प्राप्ते श्रवणवचना ४ पथानुपपत्या ऊष्मीकरणमात्ररूपः पाकोऽवश्यं कर्तत्व इति सिद्धान्तितमिति भावः। तत्रेति ।। शरीरपरिमितत्वाद्युक्तिस्थल इत्यर्थः। उपष्टम्भकेऽपि सुवर्णपदस्य शक्तिर्नास्ति उतास्ति । आद्य आह- अशक्यपरत्व इति ।। अन्त्य आह -- तस्यापि शक्यत्वेति ।। नानार्थत्वेति ।। तस्य ५ न्यायश्यानेकार्थत्वमितिन्यायेनान्याय्यत्वादिति भावः। एतेनेति ।। सुवर्णे द्रव्यान्तराभावत्वकथनेनेत्यर्थः। निरस्तमित्यन्वयः। अत्र वस्तुनि पीतिमा गुरुत्वं च दाहनिमित्तरक्तता चोपलभ्यते तस्येत्यर्थः। तस्मिन् पीतिमाद्यधिकरणे कस्य सुवर्णत्वव्यवहारो मुख्यः कस्यामुख्य इत्यत आह-- अविच्छिन्नेति ।। अवच्छिन्नद्रवत्वमिति बहुव्रीहिः। वस्तुविशेषणं दाह इत्यनुषङ्गः। शब्दसाम्यं सुवर्णशब्दसाम्यमुष्टम्भकेऽपि प्रवर्तते। मधुरशब्दः रसे मुख्योऽपि वीणाध्वनिर्मधुरः वेणुध्वनिर्मधुर इति यथा तथेत्यर्थः।। दर्शितत्वादिति।।

१.वत्विह-रा.सु. २.त-ज.नं.सु. ३.त्याद्य-उ. ४.न्यथा-उ. ५.वा न्यायैश्चा-उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १४२.

वस्तुभेदे प्रसिद्धेऽपि शब्दसाम्यं प्रवर्तते ।
रसस्वभावो मधुरो ध्वनिश्च मधुरो यथा ।।
इति लीलावत्युक्तं निरस्तम् । वस्तुभेदस्यैवासिद्धेः। पार्थिव एव शास्त्रीयव्यवहारस्य दर्शितत्वाच्च । संभवत्येकार्थत्वे नानार्थत्वायोगाच्च।।

किं च सिध्यतु दाहप्रतिबन्धकस्य द्रुतभागस्य तैजसत्वम् । तथाऽपि स भाग आवश्यकवह्निगत एवास्तु । न तु १ स्वर्णरजतताम्रादिरूपोपष्टम्भकभागगतः। गौरवात् ।।
यद्यपि द्रुततेजोऽधिकरणीभूतव्यक्तिबहुत्वमधिकरणतावच्छेदकधर्मैक्यं चोभयत्र समम् ।

शरीरपरिमितत्वादितकथनेनेत्यर्थः। नानार्थत्वेति ।। उपष्टम्भकस्याशक्यत्वेन लक्षणापत्य २ शक्यत्वेऽवश्यम्भाविनि नानार्थत्वापात इति भावः। आवश्यकेति।। द्रवत्वार्थं वह्निसंयोगस्यापेक्षितत्वादित भावः। वह्निगत इति ।। उपष्टम्भकपार्थिवसंबद्धो यो वह्निस्तद्गत इत्यर्थः। व्यक्तिमादाय गौरव ३ दवच्छेदकैक्येन लाघवस्यापि साम्यात् कोऽत्र पक्षे विशेष इत्याक्षिपति-- यत्यपीत्यादिना ।। द्रुततेजोलक्षणभागस्याधिकरणीभूतव्यक्तयो यास्तासां बहुत्वमित्यर्थः। अधिकरणतेति ।। द्रुततेजोभागाधिकरणेत्यर्थः। उभयत्रेति।। द्रुतभागः वह्निगत इत पक्षे उपष्टम्भकगतपक्षे चेत्यर्थः। सममित्युक्तं व्यनक्ति-- उपष्टम्भकेति ।। उपष्टम्भकसुवर्णरजतताम्रादिव्यक्तीनामिवेत्यर्थः।

१. स्वर्णपदं नास्ति- ज. २. त्याश- उ. ३.ववद -उ.

उपष्टम्भकसुवर्णादिव्यक्तीनामिव वह्निव्यक्तीनामपि बहुत्वात् । बहुषु १ वह्निषु वह्नत्वस्यैवोपष्टम्भकेषु सुवर्णादिष्वप्यधथिकरणतावच्छेदकस्य पूर्वरूपविजातीयरूपानधिकरणपार्थिवत्वस्यैकत्वात् । तथाप्युपष्टम्भके २

ष्वधिकरणतावच्छेदक ३ मौपाधिकधर्मत्वाद्गुरु वह्नत्वं तु जातित्वाल्लघु। वह्निगतस्यापि तस्योपष्टम्भकसंयुक्तत्वात्तत्र रूप ४ परावृत्ति ५ प्रतिबन्धकता च युक्ता । न चाविनि ६ र्भागवर्तिन ७ एव संयोग प्रतिबन्धकः।

तज्जन्यतया ८ रजतादावपि रजतादिपदवाच्यतया द्रुतभागस्य तेजस्त्वोपकगमात् रजतादोरप्युपादानम् । अन्यथा तत्रेवात्राप्युपष्टभ्यभागान्तरं विनोपष्टम्भकद्रवत्वादिनैव पूर्वोक्तदिशोपपत्तौ तत्संयुक्तद्रव्यान्तरकल्पनाभावप्रसङ्गादिति भावः।। वह्नीति ।। उपष्टम्भकसंबद्धसुवर्णादिपदवाच्यवह्निव्यक्तीनामित्यर्थः।। वह्निष्विति ।। उपष्टम्भकसंबद्धद्रुततेजोधिकरणवह्निव्यक्तिष्वित्यर्थः। अवच्छेदकलाघवेविशेष इतिसमाधत्ते-- तथापीति ।। उपष्टम्भकेष्विति ।। उपष्टम्भकत्वेनत्वदङ्गीकृतेषु सुवर्णादिपतवाच्यद्रुततेजोभागाधिकरणेष्वित्यर्थः।।

१.बहुष्विति नास्ति-रा.क.ग.ज.नं.सु. २. षु सुवर्णादिष्वपि अधि-रा.सु. ३.कं सोपा-नं. ४.पाप- क.ग.नं. ५.हेतुता च युक्ता- रा.ग.नं.सु. ६.निभाग -ग.नं. ७.नैव- सु. ८.तुल्यन्यायतया -उ.

जलसं १ बन्धेन जलमध्यस्थपटादौ रूप २ परावृत्तिप्रतिबन्धकदर्शनात् । वह्नौ तादृशभागस्यानुपलब्धिबाधस्तूपष्टम्भकेऽपि समः। वह्निगतत्वे तत्संब ३ द्धपटादिरूपस्यापि प्रतिबन्धः स्यादिति चोद्यं स्वभावादुपष्टम्भकस्यैव रूपं प्रतिबध्नातीति समाधानं चोपष्टम्भकगतत्वे च समम् ।।

किंचास्तूपष्टम्भकाविनि ४ र्भावगवर्त्येव स भागः। तथाऽपि तस्य सुवर्णत्वादिजातिमत्वे न मानम् । लोकसिद्धझसुवर्णरजतादौ विजातीयरूप ५ प्रतिबन्धकत्वेन लिध्यतस्तस्य नानाजातीयत्वे गौरवादेकजातीयत्वेनैव सिद्धेः।

तत्र हेतूनाह-- जलेति ।। ६ उपष्टम्भकेति।। उपष्टम्भकगत एव तादृशो द्रुतभाग इत्यत्रापि
पूर्वोक्तदिशाऽनुपलम्भबाध एवेत्यर्थः ।।
नन्वस्त्वे ७ तावता न सुवर्णस्य पार्थिवत्वं भवदजभिमतं प्राप्तमिति चेन्न। परमतासिद्धेरेवेभालषितत्वादिति भावः ।।
ननु द्रुतत्वमुपष्टम्भकस्थमेवोपलभ्यत इति तद्द्रुत एव कश्चिद्भागः कल्प्यत इत्यत आह -- किं चास्त्विति।। न मानमिति पदविभागः। नानेति ।। सुवर्णरजतताम्रादिजीतीयत्व इत्यर्थः।।
प्रागुक्तं सर्वं बुद्ध्यारोहायोपसंहारव्याजेन दर्शयति -- तस्मादिति ।।

१.योगेन-ग. २. परावृत्तीतिनास्ति-रा.क.ग.ज.नं.सु. ३.न्धघटा-रा. द्वध-सु. ४.निभाग-ग.नं. ५.तस्येत्यारभ्य एतदन्तंनास्ति-रा.सु. ६.तर्हि प्रागुक्तानुपलब्धिबाधः कुतो नेत्यत आह-- वह्नाविति।। तादृशेति ।। पूर्वरूपपरावृत्तिहेतुभूतभागस्येत्यर्थः। इत्यधिकम् -उ. ७. वं ता -उ.

तस्माल्लोकसिद्धसुवर्ण १ रूपपरावृत्तिप्रतिबन्धस्य क्लृप्तेनावश्यकेन भोजकादृष्टेनैव वा द्रवत्वस्य प्रतिबन्धकत्वेऽपि क्लृप्तेन समानाधिकरणद्रवत्वेनैव वा व्यधिकरणस्य २ द्रवत्वस्य प्रतिबन्धकत्वेपि द्रवत्वाधिकरणान्तरस्य क्लृप्तेन पार्थिवत्वेनैव वा तैजसत्वेऽपि

लाघवात्तस्य दाहकवह्निगतत्वेनैव वोपष्टम्भकसुवर्णाद्यवि ३ निर्भागवर्तित्वेऽपि तस्यासुवर्णत्वेनैव वोपपत्तेर्न सुवर्णस्य तैजसत्वसिद्धिः ।।

सुवर्णस्योदयनाद्युक्तार्थापत्तेः पञ्चधाऽन्यथो १ पपत्तिसमर्थनम्।। १३ ।।

तस्य विवरणं लोकेत्यादिनोपपत्तेरित्यन्तेन । किं चास्तु ५ द्रवद्रव्यत्वमित्यादिनोक्त ६ माह-- द्रवत्वस्येति ।। किंचास्तु द्रुतमित्यादिनोक्तमाह-- व्यधिकरणस्येति ।। ७ किं चास्त्वित्यादिनोक्तमाह-- उपष्टम्भकेति।। सुवर्णस्योदयनाद्युक्तार्थपत्तेः पञ्चधा ८ न्यथोपपत्तिसमर्थनम् ।। १३ ।।

१.नवेति नास्ति--नं.रा.ग.ज. २.कत्वाभि-रा.ग. ३.'तव' इत्यधिकम्-ग. ४.भागन्तरस्येति नास्ति--रा. ५.हणे--नं.क.ज. हणात्-रा. ६.प्रेतसुवर्णस्यानुपलब्धि -रा.ग.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १३२.

अथ सुवर्णस्योदयनाद्युक्तार्थापत्तेः पञ्चधाऽन्यथोपपत्तिसमर्थनम्।। १४।।

यदपि मणौ लीलावत्यु १ क्तं २ मतमुक्तमत्यन्ताग्निसंयोगे ३ नानुविच्छमानद्रवत्वाधिकरणं रूपवत् बहिरिन्द्रियप्रत्यक्षद्रव्यत्वात्, पृथिव्यादित्रयान्तर्गतं च रूपत्वात्, तत्रापि न जलम् पूर्वोक्तहेतुद्वयात्, नापि पार्थिवम् असति द्रवद्रव्यसंबन्धेऽत्यन्ताग्निसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात्,

अथ सुवर्णस्य तैजसत्वे मण्याद्युक्तप्रकारद्वयभङ्गः।। १४।।

मतमुक्तमिति।। नवीनास्त्वित्यादिनोक्तमित्यर्थः। तदर्थं निष्कृष्यानुवदति -- अत्यन्तेति।। अधिकरणमित्यन्तं पक्षः । सुवर्णरजतताम्रादिकं विशेष्यं

ध्येयम्। रूपवदिति साध्यम्। आश्रयासिद्धिनिरासाय सत्यन्तम् । जीवात्मनि गगने रूपादौ चाव्यभिचाराय --बहिरिन्द्रेयति प्रत्येक्षेति द्रव्यत्वादिति च हेतावुक्तिः।। अस्मिन्नेव पक्षनिर्देशे साध्यहेत्वन्तरे आह-- पृथिव्यादीति ।। रूपित्वहेतोरसिद्धिनिरासाय पूर्वप्रयोगः। तत्रापीति।। पृथिव्यादित्रयान्तर्गतत्वेपीत्यर्थः। पूर्वोक्तेति।। नैमित्तिकद्रवत्ववत्वात्, स्नेहशून्यत्वाच्च, स्नेहवत्वे तदधीनसंग्रहप्रसङ्गादिति पूर्वभङ्गोक्तहेतुद्वयादित्यर्थः। लाक्षावदिति भावः। नापि पार्थिवमिति।।
उक्तरूपद्रवत्वाधिकरणं वस्त्वित्यनुषङ्गः। अत्रा ४ सति द्रवद्रव्यसंबन्ध इति पक्षो
विशेषणीयः। तेन ५ कथ्यमानजलमध्य--

१.त्याद्युक्तं-रा. २.मतमुक्तमिति नास्ति-क.ज. ३.गे सत्य-ग. ४.त्रसति-नं. ५.क्वथ्यमाजनजलमध्यस्थघृतादौ न बाधः इत्यधिकम् -मु.

सुस्य-तैत्वे-मक्त-प्रद्व-यङ्गः) शक्तिवादः पु - १४७.
जलवदिति परिशेषात्तेजस्त्वसिद्धिरिति।। तन्न। सुवर्णे द्रुतद्रुततरत्वादेः क्रमशः प्रतीत्या द्रवत्वानुच्छेदस्यासिद्धेः।।
न च द्रवत्वप्रागभावासमानाधिकरणध्वंसाप्रतियोगिद्रवत्वाधिकरणत्वं हेतुः, स च नासिद्ध इति वाच्यम् । प्रबलान १ लसंयोगेन द्रव्यस्य नष्टतया द्रवत्वध्वंसस्य द्रवत्वप्रागभावसमानाधिकरणत्वेन २ हेत्वसिद्धेः।।
अथ सुवर्णद्रवत्वमाश्रयनाशान्नश्यति न त्वग्निसंयोगात् ।

-स्थ ३ घटादावव्यभिचाराय हेतावसति द्रवद्रव्यसम्बन्ध इत्युक्तिः। असिद्धिनिरासायात्यन्ताग्निसंयोगेऽपीत्युक्तिः।
अप्रयोजकत्वनिरासायानुच्छिद्यमानेति। यद्वा लाक्षा ४ घृतादावव्यभिचारायानुच्छिद्यमानेत्युक्तिः।।

असिद्ध्युद्धारं मण्युक्तमाशङ्क्य निराह -- न च द्रवत्वेति ।। एकस्य द्रवत्वस्य नाशे पूर्वपूर्वस्मादुत्कृष्टोत्कृष्टतरोत्कृष्टतमद्रवत्वप्रागभावसमानाधिकरणत्वेन तदसमानाधिकरण ५ ध्वंसप्रतियोगित्वाद्द्रवत्वानां तादृशद्रवत्वाधिकरणत्वं नासिद्धमित्यर्थः। नष्टतयेति ।। पीलुपाकप्रक्रियावयवक्रियया तत्संयोगनाशेन परमाणुद्रव्यनाशे सति पुनर्भोजकादृष्टेन परमाणुक्रियया तत्संयोगद्वारा द्रव्यान्तराणामुत्पत्तेस्तत्रोपगमादिति भावः।।
मण्युक्तमेवासिद्धिशून्यहेत्वन्तरमाशङ्कते -- अथेत्यादिना ।।

१.लाग्निसं-सु. २.त्वासिद्ध्या हे-रा.सु. ३.घृता-मु. ४.क्षाद्य-जादौ -उ. ५.घटादि इत्यधिकम् -मु.

तथात्वे घृत १ इव द्रवत्वान्तरं नोत्पद्येत । एवं चाग्निसंयोगे सत्यपि तद्धेतुकनाशाप्रतियोगिद्रवत्वाधिकरणत्वं हेतुः स च नासिद्ध इति चेन्न २ । तथाप्युपष्टम्भके पीते पार्थिवे उक्तरूपस्य द्रवत्वानुच्छेदस्य दर्शनेन ३ व्यभिचारात्।।
ननु -- पार्थिवद्र ४ वत्व ५ त्वमेवा ६ ग्निसंयोगनाश्यत्वे तन्त्रम् । न तु जन्यद्रवत्व ७ त्वम् । सुवर्णादिद्रवत्वेतिप्रसक्तेः। नापि घृतलाक्षादिद्रवत्व ८ म्। अननुगमात् । एवं च पीते पार्थिवे द्रवत्वाङ्गीकारे तस्योच्छदापत्या पीतं ९
द्रुतमिति प्रतीतिर्भ्रान्तिरिति चेन्न।

अग्निसंयोग इति ।। आश्रयानाशाद्यत्र घृते द्रवत्वा १० नाशस्तत्राव्यभिचाराय सत्यन्तम् । तथापीति।। असिद्ध्यभावेऽपीत्यर्थः। पार्थिवत्वोपपादनाय ११ पीतेत्युक्तिः। साध्याभावोपपादनाय पार्थिव

इत्युक्तिः। तत्रोक्तरूपहेतोरेवाभावान्न व्यभिचार इति भावेन बाधोक्तिपूर्वं पीतं द्रुतमिति बुद्धेर्भ्रमत्वमाशङ्कते-- नन्विति।। द्रवत्वस्याग्निसंयोगसाश्यत्वेन द्रवत्वमात्रं तन्त्रम् । जलगतद्रवत्वे व्यभिचारात् । किं तु पार्थिवद्रव १२ वा लाक्षाद्रवत्वं घृतद्रवत्वमित्यादिकं वाच्यम् । तत्राद्यमेव युक्तं न त्वन्यदिति निराह-- पार्थिवेति।। अस्तु किं तत इत्यत आह-- एवं चेति ।।

१.घट इव-क.ज.नं. २.न इति नास्ति-रा.सु. ३.तत्रेत्यधिकम्-रा.ग.नं.सु. ४.वत्वमवाग्नि-क. ५.त्वमे-रा.ज.नं.सु. ६.त्यन्ता-रा.सु. ७.वत्वं-रा.क.ज.सु. जन्यपदमपि नास्ति-नं. ८.त्ववम्-ग. ९.वद्द्रुत-नं.
१० घृतत्वाना-उ. ११.'पार्थिवेत्युक्तिः' इत्यन्तं नास्ति- उ. १२. वत्ववत्वं वा - उ.

सुस्य-तौत्वे-मक्त-प्रद्व-यङ्गः) शक्तिवादः पु - १४९.
--- --- ---
अनुभवसिद्धं १ पीते द्रवत्वमपलप्य तदसिद्ध २ स्य त्वदभिमततेजसि द्रवत्वस्य स्वीकारे दृष्टहान्यदृष्टकल्पनाप्रसङ्गात् ।।
अन्यथा -- पार्थिवद्रवत्वस्याग्निसंयोगनाश्यतायां तन्त्रत्वे सिद्धे पीते पार्थिवेऽनुच्छिद्यमानद्रवत्वा ३ भावसिद्धिः तत्सिद्धौ चातिव्याप्त्यभावेन पार्थिवद्रवत्व ४ त्वस्याग्निसंयोगनाश्यत्वे तन्त्रत्वसिद्धिरित्यन्योन्याश्रयः स्यात् । दृष्टानुसारिणी हि कल्पना ।।
किंच पीतभागो न द्रुतेश्चेत्तत्र काठिन्यधीः स्यात् ।।

त्वदभिमत इति।। उपष्टम्भत्वेनाङ्गीकृत इत्यर्थः। अन्यथेति।। अनुभवसिद्धस्यापि पार्थिवद्रवत्वस्य बाधकेनापलाप पाधकेनापलाप इत्यर्थः।।

ननु लाक्षादिद्रवत्वं तन्त्रमित्युक्तावननुगमः प्राप्नोतीत्यतः प्रामाणिकत्वान्न दोष इति
भावेनाह-- दृष्टेति।। पीतपार्थिवभागे द्रुतत्वस्य दृष्टत्वेन तदनुसारेण पार्थिवद्रव ५ त्वादन्यदेव किं चिदग्निसंयोगनाश्यतायां प्रयोजकं कल्प्यमित्यर्थः।।
ननु दृष्टिर्भ्रान्तिरित्युक्तमिति चेन्न। तस्या भ्रमत्वे तद्विपरीत प्रत्ययरूपबाधावतारः स्यादिति भावेनाह-- किं चेति।। यदा ६ द्रवत्वा ७ नुच्छेदरूपहेतोरभावान्नोपष्टम्भकपार्थिवभागे व्यभिचारस्तदा न केवलं दृष्टहान्याद्यापात ८ इति भावेनाह-- किं चेति।। काठिण्यबुद्ध्यभावोऽन्यनिमित्तक एव न तु तदभावहेतुक इति भावेन मण्युक्तमेवाङ्क्य निराह -- न चेति।

१.द्धे-नं. २.द्धे-नं. ३.त्वाधिकरणत्वासि-रा.सु. ४.त्वाधिकरणत्वाभाव-नं. ४.त्वस्या-रा.क.ज.नं.सु. ५.वत्वात्वाद-उ. ६.यद्वाद्र-नं. ७.द्रवत्वेति नास्ति-उ. ८.किंत्वनिष्टान्तरंचापद्यत इति भा -- मु.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १५०.
---------- ---------- --------
न च जलस्थमषीक्षोदादाविव प्रशिथिलावयवसंयोग १ वत्वान्न तद्धीरिति वाच्यम् । एवं हि घृतादावपि द्रवत्वं न सिध्येत् । त्व २ न्मते घृते स्नेहप्रतीत्यर्थघ ३ मावश्यकाप्यद्रव्यसंयोगकृतावयवसमयोगाशैथिल्येनैव काठिण्याप्रतीतिरिति सुवचत्वात्। एवं जलेऽपि सांसिद्धिकद्रवत्वं न सिध्येत्। आवश्यकेनावयवसंयोगशैथिल्यवशेषणैव द्रवत्वधीरिति सुवचत्वात्।।
अन्यथा पार्थिवान्तरे द्रवत्वानुच्छेदादर्शनात् सुवर्णमपार्थिवं चेत्तेजोन्तरे द्रवत्वादर्शनात्सुवर्णं ४ तैजसं न स्यात्। तेजो विशेषस्वभावात् तदुपपत्तौ

च पार्थिवविशेषस्वभावादिदमप्युपपद्यताम्। कृतं पीतिमगुरुत्वाश्रयातिरिक्तभागान्तरं कल्पयित्वा तत्र स्वभावविशेषकल्पनेन पीतत्वप्रतीतेर्भ्रमत्वकल्पनेन च।।

५ अपां नेत्राञ्जनन्यायमते घृतस्य पार्थिवत्वेन स्वतः स्नेहाभावादाह -- ६ त्वन्मत इति।।
ननु काठिण्यबुद्धेरभावेऽपि लाक्षादौ पार्थिवान्तरेऽत्यन्ताग्निसंयोगे द्रवत्वानुच्छेदादर्शनादिह च तद्दर्शनात्स्वर्णादौ प्रतीतद्रवत्वं नोपष्टम्भकपार्थिवगतं
किं तु तदुपष्टभ्यभागान्तरगतमिति कल्पनीयः। अव एव मणौ घृतादौ द्रवत्वे बाधकाभावादित्युक्तमित्यत आह-- अन्यथेति।। तस्यैव विवरणं चेदित्यन्तम्।। इदमपीति।। द्रवत्वानुच्छेददर्शनमपीत्यर्थः।

१.गत्वा-रा.ग.सु. गवत्वनैव-नं. २.तन्म -रा.सु. ३.र्थे आ-रा.सु. ४.अतैजसं किं न स्यात् -रा.ग.सु. ५.मषीनेत्राञ्जनम्। न्या-उ. ६.तन्म -नं.उ.

सुस्व-तैत्वे-मक्त-प्रद्व-यङ्गः) शक्तिवादः पु - १५१.
---------- ---------- ----------
अन्ये तु-- अत्यन्ताग्निसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणं पीतं पार्थिवं द्रवत्वोच्छेदप्रतिबन्धकद्रवद्रव्यसंयुक्तं
अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणपार्थिवत्वात्क्वा १ थ्यमानजलमध्यस्थ २ घृतवदित्यनुमानेन ३ द्रवद्रव्यं सिध्यज्जलत्वे पृथिवीत्वे चोक्ततर्कबाधात्तैजसं सिध्यति।।

कृतं अलमित्यर्थः। कल्पनेन कल्पनेन चेत्याभ्यामन्वयः। कल्पनाद्वयं व्यर्थमिति फलितोऽर्थः।।
एवं मणावुक्तं लीलावत्यभिमतमुपष्टम्भकभागे द्रवत्वं नास्त्येवेत्युपेत्य प्रवृत्तं सुवर्णस्यापार्थिवत्वसाधकहेतुमसिद्धिव्यभिचराभ्यां निरस्योपष्टम्भके द्रवत्वमुपेत्य प्रवृत्तमन्येत्वित्यादिना मण्युक्तमेवान्यदपि मतत्रयं तावदनूद्य निराह-- अन्यत्वित्यादिना ।। एतदपि ४ निरस्तमित्यनेन।। अन्येत्वित्यस्याहुरित्यनेनान्वयः। एतन्मतं ५ पार्थिवगतं भवत्येव पीत ६ द्रुतमिति प्रतीतेर्दुरपह्ववत्वात्, प्रागुक्तबाधस्य चोक्ततदिशाऽप्रयोजकत्वेन काठिण्यप्रतीत्यापातेन च
द्रवत्वप्रतीतेर्भ्रमत्वायोगाच्चानुच्छिद्यमानद्रवत्वाधिकरणं पीतं पार्थिवमिति पक्षनिर्देशः। उपष्टम्भकत्वेनोपगतमित्यरथः। जले बाधनिरासाय पार्थिमित्युक्तिः। तावत्युक्ते ७ बाधः। अतः पीतमिति।। घटादावबाधाय द्रवत्वाधिकरणमिति।। लाक्षादावबाधायानुच्छिद्यमानेति।

१.क्वथ-क. क्कथ्य-ग.ज.नं.सु. २.घटवत्-क.ज. ३.द्रुतेत्यधिकम्-रा.क.सु.
द्रुतद्रव्यं-ग.ज. ४.प्रागेवेत्यधिकम्-मु, ५.ते द्रवत्वं -उ.मु. ६.तं-उ. ७.घृतादावित्यधिकम् - उ.मु.

यद्वा प्रतिबन्धकतया सिद्धं द्रुतद्रव्यं तैजसं असति द्रवद्रव्यसंबन्धेऽत्यन्ताग्निसंयोगेनानुच्छिद्यमानानित्यद्रवत्वाधिकरणत्वात् यन्नैवं यथा घृतमिति व्यतिरेक्यन्तरात्तैजसत्वसिद्धिः।।
न चा १ त्रासाधारण्यम् । तस्य विपक्षे बाधकादर्शनदशायामेव दोषत्वात्। प्रकते च पृथिवीत्वादौ बाधकस्योक्तत्वात् ।।

आश्रयसिद्धनिरासायात्यन्ताग्निसंयो २ गेति। अप्रतिबं ३ न्धाग्नीत्यर्थः। जलपरमाणुसंयोगेनार्थान्तर वारणाय साध्ये प्रतिबन्धकान्तं विशेषणम् । ४ स्वावयवावयवसंयोगेनार्थान्तरवारणाय प्रतिबन्धकान्तम् । हेता ५ वव्यभिचाराय पार्थिवत्वादित्युक्तिः। घटादावव्यभिचाराय द्रवत्वाधिकरणेति। लाक्षादावव्यभिचारायानुच्छिद्यमानेति। असिद्धिनिरासायात्यन्तेत्यादि। ६ उक्ततर्केति।। जलत्वे नैमित्तकद्रवत्वं न स्यात्। स्नेहवत्वं न स्यात्। पृथिवीत्वे च लाक्षादाविव द्रवत्वोच्छेदः स्यात् इति तर्केत्यर्थः।।

पर्यवसानगत्या तैजसत्वं प्रसाध्य साक्षादेव तैजसत्वपथवेत्यादिना मण्युक्तप्रकारेणान्वाह-- यद्वेति।। जलपरमाण्वादावव्यभिचाराय हेतावनित्येति द्रवत्वविशेषणम्। लाक्षादावव्यभिचारायानुच्छिद्यमानेति। असिद्धिनिरासायात्यन्तेत्याति। क्कथ्यमानजलस्थघृतादावव्यभिचाराय ७ सतीत्यादि ।। असाधारण्यमिति।। तेजोन्तरे सत्यपि तैजसत्वे हेतोरभावादिति भावः। असाधारण्यस्य दोषत्वे संशय सत्प्रतिपक्षो ८ वा द्वारम्। स च विशेषादर्शनस्थले संभवति न त्विहेत्याह-- तस्येति।।

१.अत्रेति नास्ति-क.नं. च तत्रा-ग. २.गे पीति-उ.मु. ३.द्धा-उ. ४.'यद्वा' इत्यधिकं-उ.मु. ५.तौ पयस्यव्य-उ. ६.स्वरूपोक्ति र्वा । इत्यधिकम्- मु. ७.'यास' इति शोधितं-उ.मु. ८.क्षवद्वाच्यः - उ.

यद्वा द्रुततेजस्त्वमेव साध्यम् । इदं च साध्यं विशिष्टं १ क्वापि न प्रसिद्धमिति नासाधारण्यम् । न चैवमप्रसिद्धविशेषणत्वम्। तेजस्त्वं नाद्रवरूपवन्मात्रवृत्ति द्रव्यत्वसाक्षाव्याप्यजातित्वात् द्रुतवृत्ति वा

रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात् जलत्ववदिति सामान्यतो द्रुततेजस्मिद्धिरित्याहुः।।

बाधकस्येति।। साक्षादाविव द्रवत्वोच्छेदः स्यादिकत्यादिबाधकस्येत्यर्थः।। ननु द्रुततेजस्त्वमेव साध्यम्। तथा च २ पक्षाभावान्न ३ साधारण्यमपि। किं तद्दोषतानिरासाय विपक्षे बाधकतर्कानुसारणायासेनेत्यतोऽन्यत्वेतिमण्युक्तमेव प्रकारान्तरमाह-- यद्वेति।। प्रतिबन्धकतया सिद्धद्रुतद्रव्यस्येत्यनुषङ्गः। नाद्रवेति।। अद्रवं यद्रूपवत्तन्मात्रावृत्ति रूपवद्वृतवृत्तीति फलितोर्थः। घटत्वादावव्यभिचाराय हेतौ साक्षाव्द्याप्येत्युक्तिः। तस्य द्रव्य ४ त्वव्याप्यपृथिवीत्वव्याप्यत्वात्। अत्म ५ नोऽन्यतरत्वादावव्यभिचाराय जातिपदम् । मणौ रूप ६ वृत्तिद्रव्यत्वसाक्षाद्व्याप्याप्येत्युक्तावप्येति ७ हेत्वनुबादस्यु रूपवद्वृतवृत्तीतिपर्यवसितसाध्ये मनस्त्वे व्यभिचारेण तन्निरासाय रूपवत्पदसार्थक्येऽपि यथाश्रुतसाध्ये व्यभिचाराभावेन व्यर्थत्वमभिप्रेत्येति।। ध्येयम्। रूपवदित्यंशस्य साध्ये गुरुत्वादाह -- द्रुतवृत्तित्वेति।। मनस्त्वादावव्यभिचाराय हेतौ ८ रूपवृत्तीति द्रव्यविशेषणम् । घट ९ सोरालोकान्यतरत्वादावव्यभिचाराय जातिपदम्। प्रागेव पूर्वभङ्गः एवेत्यर्थः।

१ष्यक्वा-रा.नं.सु. २.सप-उ. ३.नासा-उ. ४.वत्व-उ. ५.त्म मनो-उ. ६.वद्वृ-उ. ७.प्येहं हे-उ. ८.'वद्वृत्तीति द्रव्यत्वविशे इत्यस्ति-मु. ९.तेजोन्य-मु.

एतदपि प्रागेव निरस्तम् । करकादाविवादृष्टविशेषस्यैव प्रतिबन्धकत्वोपपत्तेरनुपलब्धिबाधितभागान्तरकल्पनायोगात्।
तैजसत्वसाधकव्यतिरेकिणि तु पक्ष एवासिद्धः। अव एव तर्कोऽपि निरालम्बनः। यच्चाप्रसिद्धविशेषणत्वनिरासायानुमानद्वयमुक्तम् । तदपि १ न । तेजस्त्वं नागुरुरूपवन्मात्रवृत्ति द्रव्यत्वसाक्षाव्द्याप्यजातित्वात् गुरुवृत्ति वा रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात् जलत्ववदित्यादिना तेजस्त्वस्य गुरुवृत्तित्वस्या २ प्यापत्याप्रयोजकत्वात्।।

तद्व्यनक्ति-- ३ कारणादाविति।। एतदपि यग्यानुपलब्धिबाधेनान्यथैवोपपत्तिपञ्चकेन च प्रागेव निरस्तमिति क्वचित्पाठः। एक्ष एवासिद्ध इति।।सुवर्णे द्रुतद्रुततरत्वादेः क्रमशः प्रतीत्या द्रवत्वानुच्छदस्यासिद्धेरित्युक्तदिशाऽनुच्छिद्यमान ४ द्रवत्वाधिकरणस्यासिद्ध्या पक्ष एवासिद्धः। किं दोषान्तरेणेत्यर्थःष। अत एवा५ नुच्छिद्यमानद्रवत्वाधिकरणत्वासिद्ध्या पक्षासिद्धेरेव। द्रुतद्रव्यसंयुक्तत्वरूपसाध्यस्यासिद्धत्वात् यदि तादृशद्रुतद्रव्यं पार्थिवं स्याद्वृतत्वोच्छेदः स्यात् इति तर्को निरालम्बन इत्यर्थः। नागुरुरूपवन्मात्रवृत्तीति।। गुरुत्वहीनरूपवन्मात्रवृत्ति नेत्यर्थः।।
अथ वा घटे ६ द्रुतत्वोच्छदसमय ७ समानाधिकरणद्रवत्व ८ सामग्रीसमवधानं नास्ति --

१.न इति नास्ति-क.रा.ज.नं.सु. २.प्युपपत्या-रा.सु. ३.करकादा-उ. ४.'सुवर्णे' इत्यादि नास्ति-मु. ५.अनुच्छिद्यमानेति नास्ति-मु. ६.टद्रु-उ. घृते-मु. ७.ये स -उ. ८.त्वे सा-उ.

एतेन सुवर्णं तैजसं समानाधिकरमद्रवत्वसामग्र्यसमवहिताग्निसंयोगजन्यध्वंसप्रतियोग्यवृत्तिद्रव १ त्वत्वव्याप्यजातिमद्द्रवत्ववत्वात् व्यतिरेकेण घृतवत्। सवुर्णारम्भकाः परमाणवो न पार्थिवाः अत्यन्ताग्नि संयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात्। जलपरमाणुवत्। तैजसा वा उक्तहेतोः। व्यतिरेणेण घृतपरमाणुवदित्यादीन्यपि
निरस्तानि ।

-- सुवर्णं २ त्वमस्तीत्यादिना मण्युक्तान्येव प्रयोगान्तराण्यनूद्य निराह-- एतेनेति।। सुवर्णमित्या ३ दिनोपष्टम्भद्भुत भागो गृह्यते --समानेति।। समानाधिकरणं यद्द्रवत्वं तत्सामग्र्यसमवहितो तदवृत्तिर्जातिः सुवर्णद्रवत्व एवेति नासिद्धिः। अत्र नञ्द्वयाप्रवेशेन तादृशसमामग्रीसमवहिताग्निसंयोगजन्यध्वंसप्रतियोगिवृत्तीत्युक्तावग्निसंयोगप्र ायोज्यनैमित्तिकद्रवत्वमात्रनिष्ठजातिविशेषमादाय घृते व्यभिचारापातात्। इत्यादीनीत्यादिपदेन सुवर्णमपार्थिवारब्धं तैजसारब्धं वा अपार्थिवं तैसजं वा अत्यन्ताग्नसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणपरमाण्वारब्धत्वादित्यादिसंग्रहः। पीत इति।। उपष्टम्भकपार्थिवभाग इत्यर्थः। तत्रापि द्रवत्वस्योपपादितत्वादिति भावः। तेजस्त्वेन विनाऽपि हेतूनामुपपत्तेः प्रागुक्तरीत्यासंभवादाह-- अप्रयोजकत्वाच्चेति।।

१.व्यत्वव्या-क.ज.सु. वत्वव्या--ग.नं. २.र्णे त्वस्ती-उ. ३.त्यने-नो-उ. ४.यो ध्वंसः तत्प्रतियोग्यवृत्तिर्या द्रव्यत्वव्याप्यजातिस्तद्युक्तद्रवत्ववत्वादित्यर्थः। सुवर्णे अग्निसंयोगेन द्रवत्वव्यक्तिपरंपराया जायमानत्वेन तत्राग्निसंयोगस्य

समानाधिकरणद्रवत्वसामग्रीसमवहितत्वात्तादृशसामग्र्यसमवहिताग्निसंयोग जन्य -इत्यधिकम् -मु.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १५६.

पीते व्यभिचारादप्रयोजकत्वाच्च १ ।।
सुवर्णस्य तैजसत्वे मण्या २ द्युक्तप्रकारद्वयभङ्गः।। १४।।

प्रकारद्वयेति।। उपष्टम्भके ६ द्रवत्ववनास्तित्वास्तित्वप्रकारद्वयभङ्ग इत्यर्थः।।
सुवर्णस्य मण्याद्युक्तप्रकारद्वयभङ्गः।। १४ ।।

अथ सुवर्णस्य पार्थिवत्वसमर्थनम् ।। १५ ।।
अन्यस्त्वाह--
सुवर्णं ३ द्रव्यान्तरमेव । तथा हि द्रवत्वाधिकरणं न तेजः पीतत्वात्। न च पीतत्वात्पार्थिवमेवास्त्विति वाच्यम्। पृथिव्यां ४ शुक्लरूपवत्वेऽपि शुक्लरूपस्य जलस्य ५ सांसिद्धिकद्रवत्वादिनेव सुवर्णस्य पीतत्वेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वेन पृथिवी--

अथ सुवर्णस्य पार्थिवत्वसमर्थनम् ।। १५ ।।
द्रव्यान्तरमेवेति।। नवद्रव्यातिरिक्तमित्यर्थः। पृथिव्या इत्यादेरयमर्थः। ७ यथा पृथिवीजलयोर्द्वयोः शुक्लरूपत्वे ८ नाविशेषेपि --

१.'सुवर्णस्य द्रव्यान्तरत्वमेव निराकरणम्' इत्यधिकम्-रा.सु. २.ण्युक्त-क. ३.तु इत्यधिकम् -मु.रा.नं.ग. ५.संसि-सुरा. ६.प्रकराद्वयं नास्तीत्येतत्प्रकार -उ. ७.यथा इति नास्ति-उ.नं. ८.त्वे यथा नैमि-उ.नं.

सुस्ये-पात्व-सनम्) शक्तवादः पु - १५७.

---------- ------ ----------

तो १ वैलक्षण्यसंभावत् । न च पृथिवीजलान्यत्वे सति रूपवत्वात्तेजः। अप्रयोजकत्वात् । अन्यथा जलतेजोन्यत्वे सति स्पर्शवत्वेन वायुरिति पृथिवी स्यात्। न च पृथिव्येवास्तु धर्मिकल्पनातो धर्मकल्पना २ या लघुत्वादिति वाच्यम् । द्रव्यान्तरत्वपक्षेऽपि धर्मिणः सुवर्णस्य सिद्धत्वेनातिरिक्तत्वमात्रस्य कल्पनादिति।।

एतदपि प्रागेव निरस्तम् । द्रवत्वोच्छेदप्रतिबन्ध ३ कस्य करकादाविवादृष्टविशेषा ४ देवोपपत्यापीतस्य पृथिवीभेदायोगात् । अन्यथा करको ५ ऽपि द्रव्यान्तरं स्यात्।।

यदि च जलत्वव्याप्यधर्मदर्शनात्करको ६ जलं, तर्हि स्वर्णमपि पृथिवी ७ त्वव्याप्यपीतत्वदर्शनात्पृथिव्येवास्तु ।

-- नैमित्तिकसांसिद्धिकद्रवत्ववत्वभेदेन वैलक्षण्यं यथा पीतत्वाविशेषोऽपि द्रवत्वोच्छित्यनुच्छित्तिभेदाद्वैलक्षण्य ।मिति प्रागुक्तमण्यादिमतं निराह-- नचेति।।

तेज इति ।। सुवर्णमित्यनुकर्षः। एवं पृथिव्येवास्तु इत्यत्रापि । धर्मीति।। द्रव्यान्तररूपधर्मिकल्पनापेक्षया क्लृप्तपृथिवीत्वमेवोपादाया तस्यैव द्रवत्वानुच्छेदरूपधर्मकल्पनाया लघुत्वादित्यर्थः। इतिपदस्याहेति पूर्वेणान्वयः।। प्रागेवेति।। उदयनाद्युक्तभङ्गः एवेत्यर्थः।। पृथिवीभेदेति।। पृथिवीतो भेदेत्यर्थः। जलत्वव्याप्येति।। शुक्लरूपवद्द्रवत्वादिकमित्यर्थः।

१.वीवै-सु.रा.ग. २.नाल-सु.रा. ३.न्धस्य-सु.रा.ग.ज. ४.षोपपत्या-सु.रा. ५.काद्यपि-सु.रा.ग.ग.ज. ६.का ज-ग.ज.क. ७.वी व्या-सु.रा.

अन्यथा पीतत्वान्न तेज इत्यपि न युक्तम् । पीतत्वस्य तेजोत्वस्य तेजोन्यत्वेनेव पृथिवीत्वेनापि व्याप्तिग्रहात्।।
तस्मादुपष्टम्भकद्रव्यगतपीतरूपपरावृत्तिप्रतिबन्धकत्वेन द्रुततेजः सिद्धिरिति वा, उपष्टम्भके द्रवत्वानङ्गीकारेणानुच्छिद्यमानद्र १ वत्वाधिकरणस्य द्रव्यान्तरस्यानुच्छिद्यमानद्रवत्वाधिकरणत्वादेव तै२ जसत्वसिद्धिरित वा, उपष्टम्भके द्रवत्वाङ्गीकारेण तदुच्छेदप्रतिबन्धकत्वेन द्रुततेजस्सिद्धरिति वेति सुवर्णस्य तेजसत्वे पक्षत्रयं सुवर्णं द्रव्यान्तरमिति ३ चतुर्थपक्षश्चायुक्त ४ इति सुवर्णं पार्थिवमेव ।।

अन्यथेति।। पीतत्वस्य पृथिवीत्वाप्याप्यत्व इत्यर्थः ६ ।।।
अत्र मणावुदयनोक्तं मतमित्यादिनोक्तभङ्गत्रयार्थं संक्षेपेण ७ दर्शयन्नुपसंहरति-- तस्मादिति।। सर्वेष्वप्यपार्थिवत्वपक्षेषु दोषसद्भावात्साधकाभावाच्चेत्यर्थः। उदयनादिमतमाह-- उपष्टम्भक इति ।। अन्ये त्वित्यादिनोक्तमतान्तरमाह-- उपष्टम्भके द्रवत्वेति।। अन्यस्त्वाहेत्यादिनोक्तमाह-- सुवर्णमिति।।
प्रासङ्गिकमुपसंहृत्य पूर्वप्रकृतप्रमेयमुत्तरप्रसङ्गो ८ पक्षेपायोपसंहरति-- तस्माच्छक्तेरिति।।

१.'वत्वादेव तेजसत्वसिद्धिरितिवा' इत्यस्ति-सु. २.तेजसत्वसि-नं.ज. ३.चतुर्थपदं नास्ति-सु.रा. ४.क्तम्-सु.रा. ।एतावान्प्रन्थः। प्रलुपः प्रतीयते-नं. मित्यर्थः। प्रागु-उ. ६.'अन्यथेति' इत्यादि नास्ति-उ. ७.णानुवदन्नु-नं. ८.ङ्गाक्षेपा-नं. ङ्गापेक्षयो- उ.

तस्माच्छक्तिः पदार्थान्तरं चेत्सुवर्णमपि द्रव्यान्तरं स्यादिति प्रतिबन्द्या १ असंभवादनन्तगुणान्विते विष्णौ वेदानां शक्तितात्पर्ये युक्ते इति।।
सुवर्णस्य पार्थिवत्वसमर्थनम् ।। १५ ।।

वैदिकपदानां विष्णौ शक्तत्वाद्वेदानां शक्तितात्पर्येत्युक्तम् । यद्यपि तमोद्रव्यं सुवर्णं पार्थिवमिति च न मूलग्रन्थादौ कण्ठतः क्वाप्युक्तमथापि वास्तवनिरूपणमेतदितिध्येयम् ।।
सुवर्णपार्थिवत्व २ समर्थनम् ।। १५ ।।

अथ अन्विताभिधाने साधनषट्कम् ।। १६ ।।
ननु कथमन्विते शक्तिः। पौनरूक्त्यादिदौषात्।

अथ अन्विताभिधाने साधनषट्कम् ।। १६ ।।
एवं ननु स्वरूपसहकार्यतिरिक्तशक्तौ मानं नेत्युपक्रम्य प्रकरणसप्तकेन शक्तिरस्तीति समर्थ्य प्रसङ्गातं तमसो द्रव्यत्वं सुवर्णस्य पार्थिवत्वं च प्रकरणपञ्चकेन समर्थ्येदानीमन्वये शक्तिरित्यर्थः प्रकरणसप्तकेन साधयितुकाम आक्षिपति-- नन्विति।। शक्तिरिति।। पदानामिति शेषः। पौनरुक्त्येति।। गामानायेत्यादौ गोपदेन बोधितस्य गवानयनान्वय ३ यस्यानयपदेनापि बोधनात् पुनरुक्तत्वम्। आदिपेदनोत्तरभङ्गे शङ्किष्यमाणदशविधबाधकानां ग्रहः। सामान्यान्वये शक्तिर्न तु विशेष्यान्वय इति सिद्धान्त्याभिमतत्वात्तद्दृष्टान्तेनालभ्यत्वाच्छक्तकल्पनामयुक्तं चेति भावेन

१.न्द्याद्य -ज. न्धाद्य -क. २.वादः-नं. वत्ववादः-उ. ३. न्वितस्या-उ.

पदार्थेषु शक्तैरेव पदैः पदार्थस्मृत्यवान्तरव्यापारैराकाङ्क्षादिसहकारिवशादन्वयविशेषवदन्वसामान्यस्यापि लाभेन तत्र शक्तिकल्पनायोगाच्च । अत एव न प्रमाणान्तरापत्तिः। शब्दस्यैवान्वये प्रमाणत्वात्। एतेन १ तदन्वबोधजनकं २ तत्राशक्तं चेति व्या ३ हतमिति निरस्तम्। न ह्यत्राशक्ततशब्देनाजनकत्वं विवक्षितम्। किंत्वभिधारूपवृत्तिराहित्य ४ मात्रमिति चेत्।।

उच्यते। न तावदन्ये शक्तिवरेव नास्तीति युक्तम् । प्राथमिकव्युत्पत्तिहेतुनान्वितविषयके ५ ण --

- पदं करणं पदार्थस्मरणं व्यापारः आकाङ्क्षादिसहकारिवशात् स्मारितार्थान्वयानुभवः फलं इति मण्युक्तमाह-- पदार्थेष्विति।। नन्वन्यत्र शक्तानां कथमशक्यान्वयबोधकत्वमित्यत उक्तं पदार्थे ६ त्यादि। बहुव्रीहिः। अन्वयविशेषवदन्वयविशेषस्यैव। लाभेन बोधसम्भवेत्यर्थः। तत्र सामान्यान्वये। अन्यथाऽन्वयविशेषेऽपि शक्तिकल्पनाप्रसङ्ग ७ इति भावः।।

नन्वयस्य पदशक्त्यविषयत्वे तद्बोधकं शब्दादन्यत्प्रमाणं स्यादित्यत आह-- अत एवेति।। पदार्थमात्रशक्तपदप्रमाणकत्वादेवान्वयस्येत्यर्थः। तदेवाब-- शब्दस्यैवेति।। दोषोस्तीत्येतन्निरसिष्यत इति भावेनाह-

न तावदिति ।। प्राथमिकेति।। प्रथमं तावद्वृद्धव्यवहार एव शक्तिग्रहहेतुः।

१.यद-सु.रा.नं. पदमन्व-ग. २.तत्तत्रा-सु.रा. ३.घात इ-नं. ४.भान्नमिति नास्ति-सु.रा.ग. ५.कव्य-सु.रा. ६.ति बहुव्रीहिः-नं. ७.'इति भाव इति नास्ति-उ.

व्यवहारेण सामान्यतो योग्येतरान्वित एव शक्तिग्रहात्। अनन्तरभाविनश्च व्याकरणोपमानकोशाप्तवाक्यवाक्यशेषविवरणप्रसिद्धपदसमभिव्याहाररूप १ -

स च व्यावहारो न पदार्थमात्रे, किंत्वन्वित एवेति तेनान्वित एव शक्तिग्रहादित्यर्थः। आनयनाद्यन्वयानां व्यभिचारात्कथमन्वये शक्तिरित्यत उक्तं सामान्यतो योग्येतरान्वित इति । आनयनबन्धनादिविशेषमपहाय क्रियान्वितं कारकं कारकान्विता क्रियेत्वेव रूपेण गवादिपदानां शक्तिवग्रह इत्यर्थः।। व्याकरणेति।। 'श्रोत्रियं श्छन्दोऽधीत'इत्यादिसूत्रैः श्रोत्रियादिशब्दानां छन्दोधअययनकर्त्राद्यर्थे शक्तिग्राहकं व्याकरणम् अतिदेशवाक्यार्थस्मरणसहकृत २ गोसादृश्यादिविशिष्टपिण्डज्ञान ३ मुपमानं गवयादिपदशक्तिग्राहकम् । कोशोऽमरादिनिघण्टुः प्रसिद्धः। इयं गौरित्याद्याप्तवाक्यं गवादिपदशक्तिग्राहकम्।।

'यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम्।।'

इति वाक्यशेषः स्वर्गपदस्य सु ४ खविशेषे शक्तिग्राहकः। तथा यवमयश्चरुर्भवतीत्यादौ यवशब्दस्य --

'वसन्ते सर्वसस्यानां जायते पत्र ५ शातनम्।
मोदमानाश्च दृश्यन्ते यवाः कणिशशालिनः।।'

इति वाक्यशेषो दीर्घशूके शक्तिग्राहकः। 'उक्तं वचोऽपावधीं स्वाहेति'---

१.पाव्यु-सु.रा.नं.ग.ज.क. २.गोपदं नास्ति-उ. ३.रूपमित्यधिकं-उ. ४.दुःख -उ. ५.त्रिशा-उ.नं.

---------- ---------- ----------

- प्युत्पत्तिहेतवस्तदनुसारितया क्लृप्तेऽन्वित एव शक्तिग्राहकाः। अन्यथाकल्पने गौरवात्। तदुक्तं भगवत्पादैः --

शक्तिश्चैवान्विते स्वार्थे
शब्दानामनुभूयते ।
अतोऽन्विताभिधायित्वं
गौरवं कल्पनेऽन्यथे'इति।।

श्रुतस्योग्रं वच इति शब्दस्या 'शनाया पिपासे ह वा उग्रं वच'इत्यादिविवरणमशनापिपासयोः शक्तिग्राहकम्। 'सहकारतरौ मधुरं रौतिपिक'इत्यादौ पिकपदस्य कोकिले सहकारादिप्रसिद्धपदसमभिव्याहारः शक्तिग्राहकः।।

यद्यप्यसाधारणधर्मरूपलक्षणज्ञानमपि शक्तिग्राहकम्। तथापि तस्यापि तस्य धर्ममात्रोपमानरूपमानरूपत्वादुपमानपदेनैव तस्य ग्रहणं प्राप्तमिति न पृथग्लक्षणस्य ग्रहः।।

'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।'

इति प्राचीनोक्तिरिति भावः।। व्युत्पत्तीति।। वाच्यवाचकभावसम्बन्धज्ञानहेतव इत्यर्थः। अन्यथेति।।

क्लृप्तत्यागोनाक्लृप्तस्य पदार्थमात्रशक्तिग्राहकत्व १ स्य कल्पन इत्यर्थः। तदुक्तमिति।। जिज्ञानासाधिकरणानुव्याख्याने इत्यर्थः। शक्तिश्चेति।। उपलक्षणमेतत्। तच्च नाभिहितान्वय इत्यादि शब्दा २ अन्वितवाचकाः इत्यन्तः भक्तिपादीयानुव्याख्यानसुधयोरुक्तम्।

१.त्वक-नं.उ. २.ह्यन्वि-नं.द्यन्वि-उ.

अन्वि-सा-षट्कम्) शक्तिवादः पु - १६३.

किं चेश्वरसङ्केतरूपायाः १ स्वाभाविकसम्बन्धरूपाया वा शक्तेरभावेन वृत्यन्तराविषय २ स्यान्वयस्य शाब्दधीविषयत्वं न स्यात् ।।

तद्विवरणमग्रे यथायोगं ध्येयम्। व्यवहारादिना शब्दशक्तिमवधारयता पुरुषेण शब्दानां शक्तिश्चान्वित एव स्यार्थेऽनुभूयते । अतोऽनुभवबलाच्छब्दानामन्वितस्वार्थाभिधायित्वमभ्युपेयम्।
शक्तिग्रहानुसारित्वादभिधान्सयानुभवानादरेण स्वार्थमात्रशक्तिकल्पने गौरवमित्यर्थः। न केवलं पदानां किंतु प्रकृतिप्रत्ययानामपीति द्योतनाय शब्दानामित्युक्तिः।।
नन्वन्यलभ्येप्यन्वयशक्तिकल्पन एव गौरवमित्यतो 'न चाशक्याभिधायित्व 'मित्यनुव्याख्यानांशस्य शब्दानामशक्यान्वयबोधजनकत्वं न चेत्यर्थमुपेत्याह -- किञ्चेत्यादिना । परमतेनाह-- ईश्वरसङ्केतेति।। स्वमतेनाह-- स्वाभाविकेति।। शक्तेरभाव इति।। वाक्यार्थरूपान्वय इति योज्यम्। वृत्तिमात्रमन्वये नास्तीति म ३ तेनोक्तं वृत्यन्तरीविषयस्यतेति । लक्षणाऽवृत्तिरन्वयेऽस्तीति पक्षस्याग्रेऽन्वय ४ लक्ष्यत्वभङ्गे निरसिष्यमाणत्वाच्च । तथा च ना ५ न्यलभ्यत्वमिति भावः।।
यद्वाऽन्विते शक्तिरित्यत्र प्राथमिकव्युत्पत्तिरूपमेकं मानमुक्त्वाऽन्वयः शब्दशक्तिविषयः वृत्यन्तराविषयत्वे सति शाब्दधीवषयत्वात् शक्तिविषयपदार्थवत् इत्यनुमानं च मानमुपेत्य तस्याप्रयोजकत्वनिरासाय विपक्षे हेतूच्छित्तिरूपबाधकतर्कमाह -- किं चेश्वरेत्यादिना।। अर्थस्तु प्राग्वत्। एतेन पदं करणं, पदार्थस्मरणं व्यापारः, अन्वयानुभवः फलं,

इति मण्युक्तं निरस्तं ध्येयम्। वृत्तेरभावे पदजन्यानुभव ६ विषयत्वादिति ।।

१.या वा -सु.रा. २.स्य शाब्द-सु.रा. ३.तोक्तं-उ. ४.स्य ल -नं. ५.नानन्य-उ. ६.वविषयत्वायोग -नं.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १६४.

किं तु शब्दस्यापि करणत्वेन चक्षुरादेरिव विषयप्रत्यासन्नस्यैव क्रियाजनकत्वेन पदार्थेनेवान्वयेनापि शक्तिरूपप्रत्यासत्ति १ रङ्गीकार्या। अन्यथाकल्पने गौरवात्।।
न च चक्षुषो रूपेण संयुक्तसमवाय इव शब्दस्या २ न्वयेन शक्यपदार्थसंबन्ध एव प्रत्यासत्तिरिति वाच्यम्।

शब्दोऽर्थप्रत्यासन्नो भवितुमर्हति बोधरूपक्रियाजनकत्वात्, जनकत्वं च करणत्वाच्चक्षुरादिवदिति सामान्यतोऽ ३ र्थेन शब्दस्य संबन्धस्य सिद्धावन्यस्यायोगाच्छक्तिरेव प्रत्यासत्तिः सामान्यपरिशेषाभ्यां सिध्यतीति भावेन--
‘
प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य‘
४ चेत्यत्र ‘स्वत एव स्वाभाविकसंबन्धेनैव‘इत्यादिसुधोक्तदिशाऽऽह-- किं च
शब्दस्येति।। हेतोरप्रयोजकत्वं निराह-- अन्यथेति।। संबद्धस्यैव क्रियाजनकत्वमिति क्लृप्तत्याग इत्यर्थः। यद्वा शब्दार्थयोः संयोगसमवायतादात्म्यरूप संबन्धान्तरकल्पन इत्यर्थः।

द्रव्यत्वायुतसिद्धत्वादेरपि शब्दार्थयोरङ्गीकारप्रसङ्गाद्गरवमिति भावः। क्रियाजनकत्वहेतो ५ रशक्यान्वयस्य स्वरूपसतो नियामकत्वादित्यादिमण्युक्तान्यथोपपत्तिमाशङ्क्य निराह-- न चेत्यादिना।। शक्येति।। शक्तिविषयेत्यर्थः।

१.रिति वाच्यम्-इत्यस्ति मध्ये लोपः-ग. रिति वाच्यम्-च.क. ३.'अपि' इत्यधिकम् -सु.रा. ३.तोन्वयेन-नं. ४.स्येत्यत्र-नं.उ. ५.तोः शक्या-उ.नं.

साक्षात्संबन्धसंभवेऽपि १ परम्परया सबन्धाश्रयणे गौरवात्। अन्यथा चक्षुःसंयुक्तकपालसमवेते घटे संयोगः पत्यासत्तिर्न स्यात्।।
किंचैवं शक्य २ घटसम्बन्धिगुरुत्वादेरपि घटपदात्प्रतीतिप्रसङ्गः। न च गुरुत्वादिकं प्रत्यक्षस्येव शब्दस्याप्ययोगात्। नापि शक्यसंबन्ध्यन्वयत्वं प्रत्यासत्तिः। अन्वयत्वविशेषणस्यान्वयाशक्यत्वनिश्चयोत्तरकालं कल्प्यत्वेन ३ तत्कल्पने गौरवात्। शक्यसंबन्धेन ४ च प्रतीतावन्वयस्य लाक्षणिकत्वप्रसङ्गाच्च। व्यक्तेरपि शक्यजातिसंबन्धेनैव प्रतीत्युपपत्या जातिविशिष्टव्यक्तावपि शक्त्यसिद्धिप्रसङ्गाच्च ।।

पादर्थसंबन्धः पदार्थकर्मत्वादिरित्यर्थः। अन्यथेति।। परम्परासंबन्धेन साक्षात्संबन्धापला इत्यर्थः ।। संयोग इति।। चक्षुष इति शेषः। तत्रापि घटोपलम्भरूपकार्यस्यैव परम्परासंबन्धेनोपपत्तेः सुवचत्वादिति भावः। शक्यसंबन्धस्य शाब्दबोधहेतुत्वेऽतिप्रसङ्गं चाह--किंचैवमिति।। अयोग्यमिति।। तथा ५ त्वे शब्दादतीन्द्रियधीर्नस्यादिति भावः। शक्यसंबन्ध्यन्वयत्वमिति।। तथा च गुरुत्वे प्रागुक्तदोषो नेति भावः। न चाक्षुष इत्यादिनोक्तर्थे दोषान्तर ६ माह -- शक्येति।। व्यक्तेरपीति च।।

लाक्षणिकत्वेति।। ग ७ ङ्गापदशक्यप्रवाहसंबन्धेन पदात्प्रतीतिरस्त्येवेति भावः।

१.अपि पदं नास्ति-सु.रा. २.घटपदं नास्ति-सु.रा. ३.त्वेन गोर-सु.रा. तत्पदं नास्ति-ग.क. ४.न्धात्प्रती-सु.रा. ५.थासति-नं. ६.रं चाह-नं. ७.ङ्गापदात्प्रती-नं.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १६६.

एतेन प्रथमं गृहीताऽप्य १ न्वये शक्तिः कार्यान्विते शक्तिरिव २ पश्चाद्बाधकात्यज्यताम् । बाधकं चात्रान्यलभ्यमेवेति निरस्तम्। अन्यलभ्यत्वेन्वयस्य शाब्दत्वं न स्यादित्युक्तत्वात् ।।
न च वृत्यविषयस्याप्यन्वयस्याकाङ्क्षादिसहकारिशाच्छब्दजन्यधीविषय ३ त्वेन शाब्दत्वमिति वाच्यम् । इन्द्रियासन्निकृष्टस्यापि वह्नेर्धूमज्ञानादि सहकारिवशादिन्द्रियजन्यधीविषयत्वेनैन्द्रियकत्वापातात् । तत्रेन्द्रियसन्निकर्ष एवैन्द्रियकत्वमर्यादाहेतुरित्यसन्निकृष्टो वह्निर्नैन्द्रियक इति चेत्तर्हि शब्दवृत्तिरेव शाब्दत्वमर्यादाहेतुरितिवृत्यविषयोन्वयो न शाब्द इति समम् ।।

कार्यान्वते शक्तिरित्येत्परमतेन ध्येयम्। स्वमते च सिद्धार्थ एव प्रथमं व्युत्पत्तेरुपगमात् । अन्यलभ्यत्वमेवेति।। पदार्थेष्वित्यादिना प्रागुक्तदिशेति भावः। उक्तत्वादिति ।। किं चेश्वरेत्यादिनेत्यर्थः। प्रागुक्तमयुक्तमित्याशाङ्क्य प्रतिबन्द्या ४ निराह-- न च वृत्तीति।। परमुखेन समाधिं वाचयति--- तत्रेन्दियेति।।
'गौरवं कल्पनेऽन्यथे'त्येतदन्वयमुखेनानुवदन्मूलारूढमेवैतदिति दर्शयति-- अन्यथा कल्पन इति।। मर्यादामुल्लङ्घ्य कप्लन इत्यर्थः।

१.न्विते-नं. २.क्तिरिति बाध-ग. ३.यत्वमिति वाच्यम्-ग. ४.न्द्याह -नं.

अन्वि-सा-षट्कम्) शक्तिवादः पु - १६७.

अन्यथाकल्पने गौरवात् ।।
किं चैवं जातावेव शक्तिः व्यक्तेस्त्वकाङ्क्षादिवशाद्धीरिति स्यात् ।।
किं च घटमित्यनेन क्रियासामान्यान्वितस्वार्थानभिधाने सामान्यज्ञानसाध्या क्रियाविशेष १ जिज्ञासा न स्यात् ।।
न च जम्बीरादौ रूपविशेषाक्षिप्ते २ रससामान्ये ३ रसविशेषस्येव घट ४ निष्ठकर्मत्वाक्षिप्ते क्रियासामान्ये तद्विशेषे ५ स्य जिज्ञसा युक्तेति ६ वाच्यम्। व्यभिचारादर्शनसहचारदर्शना ७ दिरूपभिन्नसामग्रीवेद्याया व्याप्तेर्घटमिति पदोच्चारणकाले उपस्थितिनियमाभावेनाक्षेपसम्भवात् ।।

अन्वयस्यान्वयलभ्यत्वे व्यक्तेरपि तथात्ववापत्या शब्दशक्यता न स्यादित्याह-- किं चेति।। विवहिष्यते चैतत् षट्का ८ न्तर्गतव्यक्तिप्रतिबन्दी न युक्तेत्यादिना। क्रियाविशेषजिज्ञासान्यथाऽनुपपत्तिं चान्विते शक्तौ मान ९ मित्याह-- किंचेति।। क्रियाविशेषेति।। दर्शनस्पर्शना १० दिक्रियाविशेषेत्यर्थः । सामान्यान्वयस्य शब्दशक्त्यविषयत्वेऽपि तज्ज्ञानसंभवाद्विशेषजिज्ञासा युक्तेति भावेन दृष्टफलादौ रसविशेष ११ जिज्ञासावदित्यादिना मण्युक्तमाशङ्क्याह -- न चेत्यादिना ।। तेजोव्यावृत्ततादिरूपस्य रसव्याप्तत्वाद्रूपविशेषाक्षिप्तेत्युक्तम्।।

१.षेजि-सु.रा.नं.ज.क. २.प्तर-सु.रा. ३.न्येन-सु.रा. ४.टादि- सु.रा. ५.षजि -ज.क. ६.वाच्यमिति नास्ति-सु.रा. ७.आदिपदं नास्ति-सु.रा. ८.ष्ठ-उ.नं. ९.न माह-नं. १०. आदिपदं न -उ.नं. ११.षे. जि -नं.

अननुभूतस्या १ प्युपस्थितिनियमस्य कल्पने गौरवात्।।
किं च त्वायाऽपि घटमिति द्वितीया २ विभक्त्यर्थकर्मत्वान्वितस्यैव प्रातिपदिकार्थस्य क्रियान्वये प्रतियोगिता खण्डवाक्यार्थभूतस्यान्वितस्य च महावाक्या ३ र्थभूतान्वये प्रतियोगिता वाच्या। वृत्त्यविषयश्च नान्वयप्रतियोगी ४ कर्मत्वान्विते प्रातिपदिकार्थे --

एतदपि मूलारूढं दर्शयति --अन ५ भूतस्यापीति ।। एकत्ररान्विते शक्तेः क्लृप्तत्वात्सर्वत्रापि तथेत्यह -- किं चेति।। द्वितीयेति।। 'कर्मणि द्वितीयेति'
पाणिन्युक्तेर्द्वितीयाविभक्त्यर्थकर्मत्वेत्युक्तम्। प्रतियोगितेति।। घटमानयेत्यादाविति योज्यम्। वाच्येत्यन्वयः। अन्यथाऽऽनयनादिक्रियानन्वयापातादिति भावः। क्रियान्वय इति।। पदार्थान्तरेणान्वितपदार्थस्यैव वाक्यार्थत्वादिति भावः। ६ खण्डेति।। पर्वतोऽग्निमानित्यादिहेत्वादिरूपावान्वरवान्तरवाक्यार्थभूतस्यान्योन्यपदार्थेन ान्वितस्येत्यर्थः। ७ माहावाक्यार्थेति।। वह्न्यादिनिरूपितव्याप्तिपक्षधर्मतयोर्लिङ्गनिष्ठतारूपमहावाक्यार्थभूतान्वय इत्यर्थः। तावता शब्दवृत्तिविषयत्वमन्व ८ यस्य कुतः, तथात्वे वा शक्तिविषयत्वं कुत इत्यत आह-- वृत्तीति।। कुमार्यादिप्रदर्शितकलमबीजातरेन्व ९ याप्रतियोगित्वादिति भावः।

१.अपिपदं नास्ति-सु.रा. २.यवि-सु.रा. ३.भूत इत्यारभ्य एतत्पर्यन्तं नास्ति-सु.रा. ४.गि- सु.रा. ५.अनुभूत-नं. ६.क्रियान्वय इति इत्यारभ्य नास्ति -उ.नं. ७.पदार्थान्तरेणेत्यादि, दिति भावः इत्यन्तं अत्रास्ति -नं. भाव इति नास्ति -उ. ८.न्यस्य -उ.नं. ९.य -उ.नं.

अन्वि-सा-षट्कम्) शक्तिवादः पु - १६९.

---------- --------- ----------

खण्डवाक्यार्थरूपेऽन्विते च न लक्षणेत्यन्विते शक्तिः क्लृप्तेत्यन्यत्रा १ न्विते शक्तिसिद्धिः। अन्यथा कल्पने गौरवात्।।

न च खण्डवाक्यार्थस्य न महावाक्यार्थेऽन्वयः, किं तु महावाक्यस्थसर्वपदगोचरसमूहालम्बनस्मृतिरूपं करणं शुद्धतावत्प्रदार्थगोचरसमूहालम्बनस्मृतिरूपान्तरव्यापारसहितमे २ कदैव महावाक्यस्थान् सर्वान् पदार्थान्विततया बोधयतीति वाच्यम् । अनुभवविरुद्धस्या ३ प्रकारस्य कल्पने गौरवात्। तथात्वे हि दिनेदिने श्रुतेन शास्त्ररूपमहावाक्यैकदेशरूपखण्डवाक्येन तत्तदर्थबोधोदयो न स्यात् । कुलकादावित्युवाचेत्यादौ खण्डवाक्यार्थकर्म ४ क्रियाऽन्वयबोधश्च न स्यात्।

न लक्षणेति।। तत्पक्षस्याग्रे निरसिष्यमाणत्वादिति भावः। अन्यत्रेति।। क्रियाकारकभावादिस्थलेऽपीत्यर्थः। अन्वये शक्तिं विनैव महावाक्यार्थबोधप्रकारमाशङ्क्य निराह-- न चेति।। शुद्धेति।। अन्वय ५ विनाकृतेत्यर्थः। दिने दिन इति।। एकस्मिन्नेव दिने सर्वशास्त्तश्रवणायोगेन प्रत्यहं यावदवधारणं ६ शक्यं तावत एव शिष्यैः श्रूयमाणत्वात्तावन्मात्रश्रवणस्यार्थाबोधकत्वे शास्त्रमेव व्यर्थमापद्येतेति भावः। इत्युवाचेत्यादाविति। माघे चतुर्थे सर्गे -- 'उत्कारं दारुक

इत्युवाचे'त्यत्रत्यस्य 'इत्युवाचे'त्यस्य आसर्गसमाप्ति प्रतिश्लोकमन्वयेन तत्तच्छलोकार्थविषक्रियान्वयबोधश्च न स्यादित्यर्थः।।

१.अपि इत्यधिकम्-सु.रा.नं.ग. २.मेकमेक-सु.रा. ३.प्यस्य- सु.रा. ४.क शाब्दबो-सु.रा. कक्रिया-नं.ग.ज. ५.यं वि-उ.नं. ६.णश-उ.नं.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १७०.

प्रतिज्ञावाक्येन विशिष्टस्वार्थबोधने कुत इत्याकाङ्क्षाऽनुदयेन हेतुवाक्यस्यान्वयश्च १ न स्यात्।।
तस्मादन्विते प्राथमिकी व्युत्पत्तिः, अन्वयस्यानभिधाने तस्य शाब्दत्वानुपपत्तिः, अन्वयांश शक्त्यभावेऽन्वयस्य शब्देन सह प्रत्यासत्यनुपपत्तिः, व्यक्तिप्रतिबन्दी, अन्वयसामान्ये शक्त्यभावे विशेषे जिज्ञासाऽनुपपत्तिः, अन्यत्रान्विते शक्तेः क्लृप्तत्वमिति युक्तिषट्केनान्विताभिधानं सिद्धम् ।।
अन्विताभिधाने साधनषट्कम् ।। १६ ।।

२ विशिष्टेति।। धर्मविशिष्टा धर्मिरूपस्वार्थेत्यर्थः।।
प्रागुक्तं सर्वं बुद्ध्यारोहाय संग्रहेणानुवदन्नुपसंहरति -- तस्मादिति।। तस्यार्थोन्वित इत्यादिना युक्तिषट्केनेत्यन्तेन ३ विवृतः। प्राथमिक इत्यादिनोक्तार्थोक्तिरन्वित इत्यादि । किं चेश्वरेत्यादिनोक्तार्थोक्तिः अन्वयस्येत्यादि। किं च शब्दस्योत्यादिनोक्तार्थोक्तिः व्यक्तीति। किं च घटमित्यादिनोक्तार्थोक्तिरन्वयेति। किं च त्वयाऽपीत्यादिनोक्तर्थोक्तिरन्यत्रेति । अन्वताभिधानं पदानामिति शेषः।।
अन्विताभिधाने साधक ४ षट्कम् ।। १६ ।।

१.न इति नास्ति-सु.रा. २.माघे इत्यारभ्य नास्ति-नं.उ. ३.विवृत इति नास्ति- नं. उ. ४. न -उ.नं.

अन्वि-धाने-उनाक्त-बा-दकोरः) शक्तिवादः पु - १७१.

अथ अन्विताभिधाने उदयनाद्युक्तबाधक दशकोद्धारः ।। १७ ।।
नन्वन्विताभिधाने घटमानयतीत्यादौ कारकपदे १ नान्वयप्रतियोगितया क्रियायाः क्रियापदेनापि तत्प्रतियोगिता
कारकस्याभिधानात्पर्यायता स्यादिति चेन्न २ । कारकपदे क्रियान्वितकारकत्वस्य क्रियापदे च ३ कारकान्वितक्रियात्वस्य प्रवृत्तिनिमित्तस्य भेदेन पुत्रपितृशब्दयोरिवापर्यायत्वात्।

अथ अन्विताभिधाने उदयनाद्युक्तबाधकदशकोद्धारः ।। १७ ।।
एवं साधखान्युक्त्वाऽन्विताभिधानं बाधका ४ न्याप्याशङ्क्य निराह-- नन्वित्यादिना ।। विशिष्यान्विताभिधानं भ्रा ५ न्त्याह-- कारकपदेनापीति।। पर्यायता क्रियाकारकपदयोरिति शेषः। स्यादयं दोषो ६ यदि घटः करीर इत्यादाविवि पदप्रवृत्तिनिमित्तैक्यं ७ भवेत्। न चैवमस्तीत्याह -- कारकपद इति।। पुत्रेति।। पुत्रादिशब्दस्य संबन्धिशब्दत्वेन पित्राद्युपस्थापकत्वेऽपि पुत्रत्वादिनिमित्तभेदाद्यथा न पर्यायत्वं तथेत्यर्थः।।
ननु क्रियात्वकारकत्वादेः परस्परविनाभावात्तद्वाचिनोरपि पर्यायत्वमित्याह आह-- न हीति ।।

१.नाप्यन्वय-रा.सु.ग. ३.'न' इति नास्ति -सु.रा.नं. ३.'च' इति नास्ति-सु.रा. ४.न्याश-नं.उ. ५.न्त्या-नं.उ. धानमाह-ए. ६.यदि इति नास्ति-नं.उ.ए. ७.क्येभ-ए.

न हि प्रवृत्तिनिमित्तयोर्भेदेऽपि तयोस्सम् १ नियततामात्रेण पर्ययत्वम् ।। नन्वेवमपि पदान्तरवैयर्थ्यात् । एकेनैवेतरान्वितस्वार्थोपस्थापनाद्विशेषणविशेषणविशेष्यविपरिवृत्तिमात्रेणावै यर्थ्ये दण्डी पुरुषः पुरुषस्य दण्ड इत्यत्राप्येकस्य वैयर्थ्यं न स्यादिति चेन्न २ । मीमांसकमते धवखदिराविति द्वन्द्वे धवशब्दलक्षितसाहित्यनिरूपकद्वितीयस्य ३ विशेषसमर्पणेन खदिरशब्दस्येवेहापि -

पुत्रादिशब्देऽपि तथात्वापत्तेरिति भावः। एवमपीति।। अपर्यायत्वेऽपीत्यर्थः। कारकान्विता ४ क्रिया क्रियान्वितं कारकमिति क्रियाकारकयो ५ र्भानार्थं पदद्वयमर्थवदित्यत आह-- विशेषणेति।। विपरिवृत्तिर्व्यत्यासः । एकस्येति ।। वा ६ स्येत्यर्थः। विशेषान्वयप्रतिपत्य ७ ङ्गतयोपयोगाच्चेति दृष्टान्तोक्तिपूर्वक ८ माह -- मीमांसकमत इति।। तन्मते हि धवखदिराविति‌द्वन्द्वे धवादा वैवैककस्मिन्विभक्त्यर्थद्वित्वस्यान १० न्वयेन हि सहितयोर्द्वयोरेव तदन्वयेन द्वित्वान्वयार्थं धवपदमेव सहितो ११ भयलक्षकमित्यभ्युपगमात्तदा खदिरपदावैयर्थ्याय धवपदलक्षितधवसाहित्याश्रयसामान्यस्य खदिरत्वरूपविशेषसमर्पकत्वस्वीकारादित्यस्याग्रे द्वन्द्वसमानप्रस्तावे वक्ष्यमाणत्वादिति भावः। सुधोक्तमाह-- तत्तद्विशेषेति।।

१.यममात्रे-सु.रा.ग.क. २.न इतिनास्ति-सु.रा. ३.य वि-सु.रा. यावि-क. ४.तमानयनमानयनान्वितकारमिति. इत्यस्ति-नं.उ. ५.त्तिर्नानार्थपद -नं.उ. ६.तस्येत्य -नं. ७.र्थं पदान्तरसमभिव्याहारोपयोग इति इष्टा-ए. ८.र्वमा-

नं. ९.एवकारो नास्ति-नं.उ.ए. १०. स्यानन्वये सहितयो-नं.ए. ये सति तयो-उ. ११. तोपल -नं.उ.

अन्वि-धाने-उनाक्त-बा-दकोरः) शक्तिवादः पु - १७३.

पदापे १ क्ष्यत २ त्तद्विशेषोपस्थापनेन सार्थक्यात्। जनान्तरेण सार्थकेऽपि ३ पदे सामग्रीव ४ शागतार्थिकपुनुरुक्तेरदोषत्वात्।।
न चैवमपि क्रियापदेनानयनरूपे क्रियावेशेषेऽभिहिते घटपदेन तदन्वितघटाभिधानं, एवं घटपदेन घटरूपे कारकविशेषेऽभिहिते क्रियापदेन तदन्वितक्रियाभिधानमित्यन्योन्याश्रय इति वाच्यम् ।

नन्वेवमपि पुनरुक्तिरूपवाधकमपरिहार्यमित्यतः 'आर्थिकी तु पुनरुक्तिरदूषणम्। यश्चार्थादर्थो न स चोदनार्थ'इति न्यायादिति सुधोक्तमेव व्यञ्जयन्नाह -- प्रयोजनेति।। ५ समभिव्याहाररूपसामग्रीवशादित्यर्थः। बाधकान्तरमाशङ्कते-- नचैवमिति।। अन्योन्येति।। यावत्पूर्वपदं स्वार्थं नाभिधत्ते तावदुत्तरपदस्य पूर्वपदार्थान्वितस्यार्थाभिधानं नास्ति। यावच्चोत्तरपदं स्वार्थं नाभिधत्ते तावत्पूर्वपदस्योत्तरपदार्थान्वितस्वार्थप्रतिपादनं न भवतीति स्वस्वार्थाभिधानेऽन्योन्या ६ भिधानापेक्षाऽवश्यंभावेनान्योन्याश्रयान्न किमपि पदं कमप्यर्थमभिदध्यादित्यर्थः। 'वयं तु ब्रूमः स्यादिदं विशेषान्विताभिधानवादिनां, दूषण'मित्यादिना--

१.न्तरोपि तत्त-सु.रा. न्तरे च -क. २.मीमांसकेत्यारभ्य नास्ति-नं.ज. ३.के च -सु.रा.नं. क्येपि-क. ४.शादार्थि-सु.रा. ५.सामग्रीति इत्यधिकम्-ए. ६.न्यापे-नं. न्यार्थाभिधाना-उ.

विशेषान्विताभिधानमते १ ऽस्यान्योन्याश्रयस्य २ संभवेऽपि सामान्य ३ तोऽन्विताभिधानमिति मन्मते पदानां प्रत्येकमेव योग्येतरसामान्यान्वितस्वार्थाभिधाने सामर्थ्येन पदा ४ न्तरनिरपेक्षतयाऽन्योन्याश्रयाऽभावात्।।

अन्योन्याश्रयार्थमननभूय ५ मानविशेषान्विताभिधानकल्पने गौरवात्।।
न चैवमपि कारकपदजन्या क्रियासामान्यान्वितरूपविशिष्टधीः क्रियासामान्यान्वयरूपविशेषणधीसाध्या इह ६ तद्धीहेतुरन्यो नास्तीति -

सुधोक्त ७ माह-- विशेषेति।। ८ योग्यं यदितरत्सामान्यं तदन्वितेत्यर्थः। पदान्तरेति।। तस्य विशेषोपस्थितावेवोपयोगोक्तेरिति भावः ।।
'गौरवं कल्पनेऽन्यथा'इति प्रागुक्तमूलारूढमेतदिति दर्शयितुमाह-- अन्योन्येति।। अन्योन्याश्रयमस्मान्प्रतिवक्तुमभिहितान्वयवादिना नैयायिकेन विशेषान्विताभिधानकल्पन इत्यर्थः। गौरवादित्युपलक्षणम् । छलोत्तरत्वापातादित्यपि ध्येयम्।
सामान्यान्वितस्वार्थाभिधानपक्षेऽप्युदयनाद्युक्तमन्योन्याक्षयमाशङ्कते-- न चैवमपीति।। कारकपदजन्येति धीरित्यस्य विशेषणम्। विशिष्टेति।। अन्वयविशेषणक ९ कारकविशेष्य १० कधीरित्यर्थः। ततः किमित्यत आह-- इह चेति।। क्रियाकारकादिप्रयोगस्थल इत्यर्थः। तद्धीति।। विशेषणधीहेतुरित्यर्थः।

१.अस्येति नास्ति-सु.रा.ग. २.यस-सु.रा. ३.न्यन्विता-सु.रा.नं.ग. ४.दार्थान्त- रा. ५.य विशे-सु.रा. ६.च इत्यधिकम्-ग. ७.क्तमेवा-ए. ८.योग्येतरसामान्येति - इत्यधिकम्-ए. ९.ण कार-नं. १०. ष्यधी-नं.

पदेन १ तद्धीः, एवं क्रियापदजन्या कारकसामान्यान्वितरूपविशिष्टधीरपि कारकसामान्यान्वयरूपविशेषणधीसाध्या तद्धीश्च कारकपदेनैवेति पुनरप्यन्योन्याश्रय इति वाच्यम्। मन्मते २ प्रत्यक्षाया अपि विशिष्टधियो विशेषणज्ञानासाध्यत्वात्। त्वन्मतेऽपि।।

त्रिशुक्लः कृशवृत्तिश्च घृणालुस्सकलेन्द्रियः ।।
वियुक्तो योनिदोषेभ्यो ३ ब्राह्मणः पात्रमुच्यते ।।

इत्यादिवचनैर्विशिष्टाभिधायक ४ पात्रश्रोत्रियस्वर्गकारणादिपदैरिव जात्याकृतिविशिष्टाभिधायि--

अन्योन्याश्रयेति।। क्रियाकारकपदयोः स्वस्वार्थबोधनेऽन्योन्यार्थाभिधानसापेक्षत्वादन्योन्याश्रय इत्यर्थः। प्रत्यक्षाया अपीति।। किमुत ५ शाब्दादिस्थले इत्यपेरर्थः। यथा चैतत्तथोक्तं निर्विकल्पकभङ्ग इति भावः। त्रिशुक्ल इति।। याज ६ नाध्यापनाविशिष्टप्रतिग्रहरूपशुक्लत्रयवानित्यर्थः। सकलेन्द्रिय इति।। न त्वन्धपङ्ग्वादिरित्यर्थः। योनिदोषेभ्यो विमुक्त इत्यनेन बीजक्षेत्रशुद्धिरुच्यते । इत्यादीत्यादिपदेन 'श्रोत्रियं छन्दोऽधी(य)'इति,

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम्'७ ।

इति, अनन्यथासिद्धनियतपूर्ववृत्तिकारणामित्यादिवचनग्रहः। विशिष्टेति।। त्रिशुक्लत्वादिविशिष्टाभिधायि पात्रपदं , छन्दोध्ययनकर्तृत्वविशिष्टाभिधायि श्रोत्रियपदं,

१.एवेत्यधिकम्-ग. २.अपि इत्यधिकम्-नं. ३.भ्यां -नं. ४.यिपा-नं.ग.क. यिभिः- ज. ५.श-नं. ६.काध्ययनवि-नं.उ. ७.न चेत्यारभ्यनास्ति-नं.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १७६.

घटादिपदैरिव च विशेषणोपस्थितिं विनै कारकादिपदैः क्रियासामान्याद्यन्विताभिधानानुभवात्।।

अनुभवविरिद्धस्य १ कल्पने गौरवात्। २ अन्वयविशेषसिद्धिस्तु पदान्तरसमभिव्याहारात्।।

नन्वेवं चेत्किमनया सामान्यान्विते शक्त्या, स्वार्थमात्रे ३ शक्तैः पदैराकाङ्क्षादिमत्पदान्तरसमभिव्याहारादेव विशेषान्वयसिद्धेरिति चेन्न ४ ।

दुःखासंभिन्नत्वादिविशिष्टसुखाभिधायि

स्वर्गपदमन्यथासिद्धत्वादिविशिष्टाभिधायि कारणपदमित्यावं ध्येयम्। तत्र हि विशेषणोपस्थापक ५ पदान्तरस्याभावात्पदस्मारितस्यैव पदार्थैऽन्वयप्रतियोगित्वात्तत्र विशेषोपस्थितेरभावेऽपि यथा विशिष्ट ६ बोधस्तथेहापीत्यर्थः। व्यक्त्याकृतिजातयः पदार्थ ७ इत न्यायमतत्वाज्जात्याकृतिविशिष्टेत्युक्तिः।।

'गौरवं कल्पनेऽन्यथे'ति मूलारूढतां दर्शयति-- अनुभवेति।। 'सामान्यान्विते शक्तावुपेतायां विशेषान्वयबोधायोग ८ इत्यतो विशेषान्वयप्रतिपत्यर्थं च पदान्तरसमभिव्याहारोपयोग'इति सुधोक्तमाह-- अन्वयविशेषेति।। एतेन विशेषप्रतिपत्तिरिति शशिधराद्युक्तं प्रत्युक्तम्।. मण्याद्युक्तमाशङ्कते -- नन्विति।।

१.'च' इत्यधिकम्-नं.ग. २.'न चैवमपि इत्यारभ्य इत्यत्पर्यन्तं नास्ति-सु.रा. ३.मात्रपदं नास्ति-सु.रा. ४.न इति नास्ति-सु.रा. ५.क पदार्थान्तराभावा-नं. पदार्थान्तरस्या-उ. ६.ष्टस्त-नं. ७.'इति' इति नास्ति-नं. ८.गादित्यतो-नं.

अन्वि-धाने-उनाक्त-या-दकोरः) शक्तिवादः पु - १७७.

--- --- ---

सङ्गतिग्रहणकाले सामान्यान्विते श १ क्तेर्गृहीतत्वेन गोव्यक्ति २ वत्वन्मते जात्याकृतिविशिष्टगोव्यक्तिवच्च सामान्यान्वित ३ स्यापि पदान्तरसमभिव्याहराकाङ्क्षादिनिरपेक्षेणैव गोप्रातिपदिकेनोक्तया सामान्यान्विते शक्तेरस्त्यागायोगात्। अन्यथा जातावेव शक्तिर्व्यक्ते ४ स्त्वाकाङ्क्षा ५ दिवशाद्धीरिति स्यात्। प्रत्युत पदान्तरार्थे क्रियाविशेषे आकाङ्क्षार्थमेव कारकपदस्य क्रियासामान्यान्विते शक्तिरावश्यकी। अत एव विशेषान्वये शक्त्यभावात्तस्य शाब्दत्वं न स्यादिति निरस्तम्। या शक्तिः पदान्तरसमभिव्याहाराकाङ्क्षादिनिरपेक्षा--

अन्वयन्यान्वयतः प्राप्तेरन्यथाऽनुपपत्तितः।
अनन्यलभ्यमात्रार्थे शक्तान्येव पदानि नः।।
इति प्राचीनोक्तेरिति भावः। अन्विते शक्तेर्गृहीतत्वेनेति।। एतच्च पूर्वत्रैवोपपादितमिति भावः। व्यक्तौ शक्तिरित मतेनाह-- ६ शक्तिवदिति।। व्यक्तेरित्यर्थः। जात्यादिविशिष्टव्यक्तौ ७ सेति मतेनाह-- जात्याकृतीति।। समभिव्याहारश्चाकाङ्क्षादि च तन्निरपेक्षेणेत्यर्थः। तत्सापेक्षत्वे सत्येवान्वयस्या ८ स्यान्नचैवमित्यर्थः। न केवलं ९ प्रतिबन्दीमात्रमित्याह-- प्रत्युतेति।। एतदपि पूर्वभङ्ग एव 'किंच घटमित्यनेने'त्यादिनोपपादितमिति भावः। अत एवेति।।

१.क्ते गृही-सु.रा. २.क्तित्ववव-क. ३.न्वयस्या-सु.रा. ४.क्त्यादे-सु.रा.नं.ग. ५. आदिपदं न -सु.रा. ६.व्यक्तिवदिति--उ.ए. ७.शक्तिरितिमते-ए. ८.स्याल-नं. ९.व्यक्तरित्यधिकम् -उ.ए.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १७८.

--- --- ---

--न्यान्वयबो १ धिका तस्या एवान्य २ सापेक्षाया विशेषान्वयबोधकत्वात्।।

एतदेवाभिप्रेत्योक्तं पद्धतौ 'प्रत्येकं सामान्यतो योग्येतरान्वितस्वार्थाभिधानशक्ती ३ नि पदानि पदान्तरसन्निधानाहितशक्त्यन्तराणि विशेषतोऽप्यन्वितान् स्वार्थानभिदधती'ति। पदान्तरसन्निधानमेवाहितशक्त्यन्तरं लब्धसहकार्यन्तरं येषामित्यर्थः। न तु पदान्तरसन्निधानेनाहितशक्त्यन्तरमाधेय ४ शक्तिर्येषामित्यर्थः। शक्तिद्वयाङ्गीकारे गौरवात्। पदान्तरसमभिव्याहारो हि सामान्यस्य विशेषपर्यवसान एव हेतुः। न पुनरविद्यमानशक्त्या ५ धान इति सुधाविरोधाच्च।।

सामान्यान्वये शक्तिस्वीकारादेवेत्यर्थः। एतदेवेति।। सामान्यान्वयशक्तिरेवान्वयवशेषबोधकेत्येतदेवेत्यर्थः।

कथमिदमुक्तार्थसंवादीत्यतोर्थमाह-- पदान्तरेति।। कुत एवमर्थान्तरकल्पनेत्यत आह --शक्तिद्वयेत्यादि।।

यद्यपि सुधायां जिज्ञासाधिकरणे 'शक्तिश्चैवान्वित'इति श्लोकव्याख्यावसरे पदानामौत्सर्गिकी सामान्यान्वये शक्तिः, पदा ६ न्तरसन्निधानाच्चागन्तुकी विशेषविषया शक्तिः, पदान्तरे च पदाधानशक्तिरिति शक्तित्रयं कल्प्यमित्युक्तम्। तथाऽपि सहजशक्त्याधेयशक्त्यपेक्षया

शक्तिद्वयेत्युक्तमित्यदोषः। प्रामाणिकत्वाद्गौरवं न दोषायेत्यत आह-- पदान्तरेति।। सुधेति।। 'शक्तिश्चैवान्विते'इति श्लोकव्याख्यानसुधेत्यर्थः।

१.धजनिका-रा.सु. २.अन्यपदं नास्ति-सु.रा. ३.क्तानि पदानि-नं.सु.रा. ४.याशक्ति-सु.रा ५.क्त्यधीन -सु.रा. ६.दार्थान्त-नं.ए.

अन्वि-धाने-उनाक्त-बा-दकोरः) शक्तिवादः पु - १७९.

--- --- ---

१ केचित्तु-- 'न पुनरविद्यमानशक्त्या २ धान'इति सुधैव पदान्तर ३ समभिव्याहारात्पूर्वमन्वयसामान्ये ४ शक्तिर्नेत्येतन्निषेधपरेति न विरोध इत्याहुः।।

नन्वेवमप्यानयनान्वितो घटो घटान्वितमानयनमित्यन्वयरूपस्य विशेष्यरूपस्यार्थस्य च भेदेन तद्भेदनिबन्धनो वाक्यभेदः स्यादिति चे ५ न्न। ६ तथाऽपि चैत्रो घटमानयतीत्यत्र घटप्रातिपदिकस्य जात्यादिविशिष्टव्यक्तिवाचित्वाज्जात्याकृत्यन्वितो घटः प्रकृतिप्रत्ययार्थयोः पूर्वमन्वयाद्घटान्वितं कर्मत्वं, कर्मान्वितं चानयनं, आनयनान्विता च वर्तमाना कृतिः, कृत्यन्वितश्चैत्र इत्यन्वयरूप विशेष्यरूपस्य चार्थस्य भेदेन वाक्यभेदः स्यात् ।।

बाधकान्तरमाशङ्कते-- नन्वेवमपीति।। तद्भेदेति।। अर्थभेदनिबन्धनः। अर्थैकत्वादेकं वाक्यमिति जैमिन्युक्तेरिति भावः। परमुखेन समाधिं वाचयितुं प्रतिबन्दीमाह-- तवापीति।। जात्याकृत्यन्वितो घट इत्यादि प्रथमान्तस्य इत्यन्वयरूपस्येत्यनेनान्वयः। पूर्वमिति।। क्रियान्वयात्पूर्वमित्यर्थः। पूर्वमन्वय सिद्धमर्थमाह-- घटान्वितं कर्मत्वमिति।। आनयतीत्यत्र प्रकृतिप्रत्ययोरन्वयाह-- आनयनान्विताचेति।। प्रत्ययस्यैव लट्त्वाख्यातत्वरूपेण

प्रतिपाद्यार्थयोरन्वयमाह-- वर्तमानेति।। कृतिरिति।। चैत्रपदसमभिव्याहारलब्धार्थमाह-- कृतीति।।

१.केचित्विति नास्ति-सु.रा. २.क्तत्यधीन-सु.रा. ३.रात्पूर्वमन्व-सु.रा. ४.अपीत्यधिकम्-सु.रा. ५.न इति नास्ति-नं.सु.रा.ज.ग. ६. तवापि-नं.सु.रा.ज.ग.

इयांस्तु भेदः। मन्मते प्रकृतिप्रत्ययार्थयोरन्वयः। शक्यः, तव त्वशक्त्यो १ ऽपि माहावाक्यार्थ २ भूतान्वयवत्सहकारिवशाच्छाब्द इति।।
ननु पदार्थस्थानीयानामुक्तानामन्वयानां भेदेऽपि तद्बोधमात्रेण नैराकाङ्क्ष्याभावेन घटकर्मकानयनानुकूल ८ वर्तमानयत्नवांश्चैत्र इति ४ वाक्यार्थभूतान्वस्याभेदेनैकवाक्यत्वमिति चेत्समं ममापि ।।

ननु न्यायमते अन्वयस्याशक्यत्वाद्वाक्यभेदो न दोषेस्तव तु श ५ क्यत्वाद्दोष इत्यत एतद्वैषम्यमप्रयोजकम्। शाब्दत्वस्य त्वयाऽप्यङ्गीकारादित्याह-- इयांस्त्विति ।। परेणैव समाधिं वाचयति-- नन्विति।। समं ममापीति।। वाक्यार्थीभूतस्य पटानयनान्वयस्यैकत्वेनैकवाक्यत्वसंभवादित्यर्थः।।
एतेन क्रियाकारपदयोः प्रत्येकमितरान्वितस्वार्थबोधकत्वे वाक्यार्थद्वयधीप्रसङ्गादिति मण्युक्तं, कारकान्विता क्रिया क्रियाऽन्वितं च कारकमिति धीप्रसङ्गेत वाक्यभेदः स्यादिति शशधरोक्तं च प्रत्युक्तम्। क्रियाकारकान्वयरूपवाक्यार्थघस्यैकत्वेनैकवाक्यत्वोपपत्तेः। क्रियान्वितो घटो घटान्विता क्रियेति बोधस्य सर्वसाक्षित्वेनादोषापत्तेरिति।।

१.क्तोपि-सु.रा. २.र्थभूत-नं.ग.क. ३.वर्तमानपदं नास्ति-रा. ४.महा इत्यधिकम् -सु.रा. ५.वाक्य-नं.ए.

अन्वि-धाने-उनाक्त-वा-दकोरः) शक्तिवादः पु- १८१.

नन्वन्वितस्य घटस्य घटपदार्थत्वे घटमानयेत्युक्तेऽन्वितस्यैव घटस्य पुनरानयनाद्यन्वयधीः स्यादिति चेन्न। तव जात्याकृतिभ्यामिव मम योग्येन १ कर्मत्वादिना धर्मेणान्वितस्यैव घटस्यानयनाद्यन्वयप्रतीता २ विष्टापत्तेः। घटप्रातिपदिकार्थस्य प्रत्ययार्थीभूतकर्मत्वान्वयात्पूर्वं क्रियासामान्यान्वययोग्यत्वे पूर्वं क्रियासामान्यान्वयधी ३ रिष्टैव, अयोग्यत्वे तु तत एव न पूर्व ४ मान्वयधीः। अन्वयांशे अनयनाद्य ५ नन्वयस्तु तव जात्याकृत्यंश इव एकपदोपात्तत्वे ६ न प्रथमान्वितकर्मत्वांश इव चाकाङ्क्षाद्यभावाद्युक्तः।।

अन्विताभिधानवादे घटमानयेत्यादौ अन्वितान्वयापत्तिरूपबाधकमाशङ्कते -- नन्विति।। किमत्र कर्मत्वादिरूपयत्किंचिद्योग्येतरान्वितस्य क्रियाऽन्वयश्चोद्यतेऽथ कर्मत्वाद्यन्वयात्पूर्वमेव क्रियासामान्यान्वयः, कर्मत्वान्वयात्पश्चादानयनादिक्रियाविशेषा ७ न्वित इति। आद्य आह-- तवेति।। जत्याद्यन्वितस्य यथा क्रियाऽन्वयः एकपदोपात्तत्वात, जात्यादिव्यक्तीनां तथा कर्मत्वान्वितस्यैव क्रियाऽन्वय इत्यर्थः। द्वितीयं आह-- घटेति।।

नन्वन्वितान्वय ८ इत्यस्य लम्बकर्णमानयेत्यादाविव विशेषणीभूतान्वयरूपविशेषणे ९ प्यानयनान्वयः स्यादित्यर्थः। विशेषणान्वयिनोऽन्वितरूपविशिष्टान्वययोगात्। विशिष्टस्य च पदार्थत्वादित्यत आह-- अन्वयांश इति ।। यथा जात्याकृतिविशिष्टव्यक्तिरूपे पदार्थे आनयनादिक्रियान्वयेऽपि न

जात्याद्यंशे तदन्वयः, यथा व कर्मत्वविशिष्टस्यानयनान्वयेऽपि न कर्मत्वांशेऽन्वयस्तथैवेत्यर्थः।

१.घटत्वादिनाध-नं.ज. दिध-सु.रा. २.त्येष्टापत्तेः-नं.सु.रा.ग. ३.रपीष्टैव-नं.ज.ग.क. ४.र्वंतदन्वय-सु.रा.ग. ५.द्यन्वय-सु.रा.ग. ६.त्वे च -नं. त्वेनैव-सु.रा. ७.षान्वय इति-उ.ए. ८.इति इति नास्ति-नं.ए. ९.णस्याप्या-उ.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १८२.

ननु नथाऽपि घटपदजनिते जनक ज्ञाने आनयनान्वितो घट इति घटं प्रत्युपसर्जनतया भातस्यानयनस्य कथं जन्यज्ञाने घटकर्मकानयनमिति प्राधान्येन घटं प्रति भानम्। गुणप्रधानभावविपरिवृत्तौ २ विरोधेन जन्यजनकभावस्यैवायोगात्। मम तु घटः कर्मत्वमानयनं कृतिरिति जनकज्ञानेऽपि घटस्यानयनं प्रति प्राधान्येनाभानान्न विपरिवृत्तिरिति चेन्न।

जन्यजनकज्ञानयोर्गुणप्रधानविपरिवृत्तिरूपबाधकमाशङ्कते--ननु तथाऽपीति।। आनयनान्वि ३ तो घट इति ज्ञाने सत्येव घटान्वितमानयनमिति ज्ञानं ४ (घट)मानयेत्यादिवाक्ये जायत इति वाच्यम्। घटपदस्य पूर्वं ५ अयोगात्। तत्र च पूर्वज्ञान जनकमुत्तरज्ञानं जन्यमित्यपि वाच्यम्। ६ उत्तरज्ञानेऽस्य विशेषणत्वेन तज्ज्ञानस्य विशेषणज्ञानत्वात्। एवं च जनकज्ञानेऽन्वयप्रतियोगितया विशेषणत्वेन भादमानयनं घटश्च विशेष्यत्वेन भातः तत्कथमुत्तरज्ञाने घटोऽन्वयप्रतियोगितया विशेषणत्वेनानयनं विशेष्यत्वेन भायादित्यर्थः। विपरिवृत्तौ विनियमे सतीत्यर्थः।। मम त्विति।।

अभिहितान्वयवादिनस्त्विवत्यर्थः। गुणप्रधानविपरिवृत्तौ जन्यजनकभावो नेत्येतत्परामर्शवादान्ते मण्युक्तरीत्या व्यभिचारीत्याह -- पुरुषस्येति।।
१.के ज्ञाने -नं.ज.क. २.विरोधेनेति नास्ति-सु.रा. ३. न्वितघ-नं.उ.ए. ४.घटपदं न -नं. ५.प्रयो -नं.उ.ए. ६.घटस्य विशेषणत्वेन ज्ञातस्य विशेषणे ज्ञानत्वात्-नं. ज्ञानस्य विशेषणे ज्ञानत्वात्-उ.ए. इत्यस्ति.

अन्वि-धाने-उनाक्त-वा-दकोरः) शक्तिवादः पु - १८३.

पुरुषस्य दण्ड इति ज्ञानस्य विशेषणज्ञानतया जनकत्वेऽपि तज्जन्ये दण्डी पुरुष इति ज्ञानेऽपि विपरिवृत्तिदर्शनात्।।
ननु ज्ञानस्य यद्विषयत्वेन जनकत्वं तन्मध्ये यद्यस्य विशेषणं १ तत्तत्र फलीभूते ज्ञाने तस्य विशेष्यं नेति नियमः, पुरुषस्य दण्ड इति ज्ञानं २ च न पुरुषविषयतया जनकं, किं तु दण्डविषयतया, तत्र च दण्डं प्रति दण्डत्वं विशेषणं, तस्य च न विपरिवृत्तिरिति चेन्न ३ । भूतले घटाभाव इति ज्ञानेन घटाभाववद्भूतलमिति ज्ञानदर्शनात्।

व्यभिचारोद्धारं विवक्षामुखेनाशङ्कते --नन्विति।। तस्य च न परिवृत्तिरिति।। दण्डीत्यत्र पुरुषं प्रति दण्डस्य विशेषणत्वेऽपि द ४ ण्डापेक्षया दण्डत्वस्य विशेषणत्वा ५ नपायादिति भावः। अयमिप नियमो नेत्याह-- भूतल इति।।
अभावनिर्विकल्पकानभ्युपगमेनाभाववद्भूतकमिति विशिष्टज्ञानं प्रत्यभावरूपविशेषणज्ञानस्य हेत्वुत्वात्तदर्थं भूतलेऽभाव इति विशेष्यतयाभावज्ञानानन्तरमेवाभावविशिष्टज्ञानमिति प्रामाण्यवादादौ तत्र तत्र मण्यादावुक्तत्वादिति भावः। अस्त्वेवं तावतोक्तस्य कथं व्यभिचार इत्यत आह--तत्रेति।।

१.तत्फलीभू-सु.रा.ग. २.ने च -सु.रा. ३.न इति नास्ति-सु.रा. ४.पिण्डापे-उ. ५.त्वस्यान-उ.नं.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १८४.

तत्राधिकरणज्ञानसाध्याभावज्ञाने भूतलज्ञानस्यापि हेतुत्वात्। न च परोक्षज्ञाने अयं नियमः। अप्रयोजकत्वात्। पर्वते वह्निव्याप्यो १ धूम इति परामर्शेनापि पर्वतो वह्निमानित्यनुमितिदर्शनाच्च ।।

तस्यैव विवरणमधिकरणेत्यादि।। अभावज्ञान इति।। पटाभाववद्भूतलमित्येवंरूपेऽभावविशिष्टज्ञान इत्यर्थः। अधिकरणज्ञानसाध्येति विशेषणं प्रागुक्तनियमभङ्गोपपादनायोक्तम्। भूतले घटाभावज्ञानं जनकं तच्च भूतलघटाभावोभयविषयकत्वेनैवाभाववद्भूतलमिति ज्ञाने हेतुरिति वाच्यम्। विशेषणज्ञानत्वेन हेतुत्वार्थमभावविषयकत्वस्याधिकरणज्ञानत्वेन हेतुत्वार्थं भूतलविषयकत्वस्यावश्यकत्वात्। एवं च जनकज्ञानस्य यद्विषयत्वेन हेतुत्वं तन्मध्ये एव विशेषणविशेष्यतया प्रतीतयोर्भूतलाभावर्योर्जन्यज्ञाने विशेष्यविशेषणभावदर्शनमस्तीति भावः कथं न नियभङ्ग इति।। न च परोक्षेति।। इदं चापरोक्षज्ञानमिति भावः। अप्रयोजकत्वादिति।। एतेन अभाववबुद्ध्यन्यबुद्धावेवायं नियम इत्यपि प्रत्युक्तम्। परोक्षादाविव सर्वत्रोपपत्तौ गुणप्रधानभावविपरिवृत्तौ न जन्यजनकभाव इति नियमग्राहकप्रमाणाभावादिति भावः। अत एव शाब्दबोध एवायं नियम इत्यपि प्रत्युक्तम्। अप्रयोजकत्वादिति।। पर्वत इति।। जनकज्ञाने विशेषणत्वेन भातस्यापि पर्वतस्य जन्यानुमितौ विशेष्यत्वदर्शनेन परोक्षज्ञानेऽयं नियम इत्यपि नेत्यर्थः।।

उपपादितं सर्वं बुद्ध्यारोहाय संग्रहेणानुवदन्नुपसंहरति-- तस्मादिति।। बाधकानां समाहितत्वादित्यर्थः।

१. व्याप्तो धू - नं.क.

अन्वि-धाने-उनाक्त-बा-दकोरः) शक्तिवादः पु - १८५.

तस्मात् पर्यायत्वापत्तिः, वैयर्थापत्तिः, पुनरुक्त्यापत्तिः, अन्योन्याश्रयद्वयापत्तिः, विशेषान्वयप्रतिबन्दी, वाक्यभेदापत्तिः, अन्वितस्यैव पुनरन्वयापातः, अन्वयांशस्याप्यानयनाद्यन्वयापत्तिः, जन्यजनकज्ञानयोर्गुणप्रधानभावस्य विपरिवृत्तिरिति बाधकदशकमपि न युक्तमिति ।।
तस्मात्पदान्यन्विते शक्तान्येव ।।
अन्विताभिधाने उदयनाद्युक्तबाधकदशकोद्धारः ।। १७ ।।

नन्वेवमपीत्यादिनोक्तमाह-- वैयर्थ्येति।। आर्थिकपुनरुक्तेरदोषत्वपादित्युक्तमाह-- पुनरिति।। न चैवमपि क्रियापदेनेति, न चैवमपि कारकपदेति चोक्तमाह-- अन्योन्याश्रयद्वयेति।। नन्वेवं चेत्यादिनोक्तमाह-- विशेषान्वयेति।। नन्वेमपीत्यादिनोक्तमाह-- वाक्यभेदेति।। नन्वन्वितस्येत्यादिनोक्तमाह-- अन्वितस्यैवेति।। अन्वयांश इत्यादिनोक्तमाह-- अन्वयांशस्येति।। ननु तथाऽपीत्यादिनोक्तमाह-- जन्येति।।
भङ्गद्वयार्थमुपसंहरति -- तस्मादिति।। साधकाभावाद्बाधकाभावाच्चेत्यर्थः।।
अन्विताभिधाने बाधकदशकोद्धारः।। १७ ।।
वि

वि
न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १८६.
---------- ---------- ----------
अथ अन्विताभिधाने युक्तिदशकम् ।। १८।।
अथ मतम्--
अस्त्येवान्वये शक्तिः, किं तु सा स्वरूपसत्येव हेतुः, न तु ज्ञाता। पदार्थे शक्तिज्ञानादेवान्वय बोधोपपत्तेः। न च वैपरीत्यं शङ्क्यम्। अन्वयस्य पदार्थनिरूप्यत्वेन नागृहीतविशेषणान्यायेन तत्रैव शक्तिग्रहस्य हुतुत्वात्। व्यवहरेण लिङ्गे १ नान्विते -

अथ अन्विताभिधाने युक्तिदशकम् ।। १८ ।।
यत्तु मणौ पदशक्तिवादपूर्वपक्षे प्राभाकरमतानुवादप्रस्तावे जातिव्यक्तिज्ञानजनकत्वादुभयत्रापि हेतुः लाघवमिति कुब्जशक्तिवादस्त्वयानैयायिकेनाप्यन्वये कुब्जशक्तिस्वीकारादिति दृष्टान्तमुखेनान्वये कुब्जशक्तिरुपक्षिप्ता तां तन्मताभिमतोपपादनपूर्वमनुवदति -- अथ मतमित्यादिना।। कुत इत्यतोऽयतो २ लभ्यत्वान्न तत्र ज्ञातोपयुज्यत इत्याह -- पदार्थ इति।। वैपरीत्यमिति।। अन्वये ज्ञाता पदार्थे स्वरूपसतीति वैपरीत्यमित्यर्थः। नागृहीतेति।। 'नागृहीतविशेषणा विशेष्य बुद्धरुत्पद्यते'इति न्यायेन प्रथमोपस्थितपदार्थरूपविशेषणांश एव शक्तिग्रहस्य हेतुत्वादित्यर्थः। व्यवहारलिङ्गकान्वितशक्तिग्रहविरोध इत्यत आह-- व्यवहारेणेति।।

१.लिङ्गेति नास्ति- सु.रा. २.न्यलभ्य-नं.उ.

अन्वि-धाने-युदकम्) शक्तिवादः पु - १८७.
---------- ---------- ----------

शक्तिग्रहेऽपि गौरवान्यलभ्यत्वाभ्यामन्वयांशमपहाय पदार्थमात्रविषयत्वेनैव शक्तिग्रहस्य शाब्दबोध १ हेतुत्वकल्पनात्।।
न चैवं पदर्थे ज्ञाता शक्तिरुपयोगिन्यन्वये त्वज्ञातेति शक्तिद्वित्वे गौरवमिति वाच्यम्। गुरुमते जातिविशिष्टव्यक्तिविषयायाः शक्तेरेकत्वेऽपि जात्यंशमात्रे ज्ञातोपयोगित्ववदिहाप्यन्वितविशषयायाः शक्तेरेकत्वेऽपि पदार्थांशमात्रे २
ज्ञानतोपयोगित्वस्योपपत्तेः। अत एव कुब्जशक्तिवाद इति।।
उच्यते ।।
अस्मिन्नपि पक्षेऽन्विते प्राथमिकी व्युत्पत्तिरित्यादि सिद्धान्तसाधकं युक्तिषट्कं सुस्थिरमेव ।।

ननूभयत्र शक्तेरेकत्वे ज्ञातत्वाज्ञातत्वयोर्विरोधेन शक्तिभेदे गौरवमिति शङ्कते -- न चेति।। शक्त्यैक्येऽप्यवच्छेदक भेदादाविरोध इति सदृष्टान्तमाह-- गुरमत ३ इति।। जात्यंश इति।। नागृहीतविशेषणान्यायेनेति भावः। ज्ञातोपयोगित्ववदिति ।। जातिविशिष्टव्यक्तिज्ञानहेतुत्वं यथातथेत्यर्थः। ज्ञाताया उयोगित्वं ज्ञातोपयोगित्वं तद्वत्, 'तदशिष्य ४ प्रमाणत्वा'दितिवदयं निर्देशः साधुः। एवमग्रेऽपि । अत एवेति।। अंशभेदेनाज्ञानत्वादेवेत्यर्थः। सिद्धान्तसाधकमिति।। प्रागन्विते शक्तिरित्यत्रोक्तसाधकषट्कमेवान्वयेऽपि शक्तिग्रहो हेतुरिति पक्षेऽपि समानमित्यर्थः।।

१.धेहे-- सु.रा. २.चेत् इत्यधिकम्-रा.सु. 'उच्यते' इति पर्यन्तं नास्ति-सु.रा. ३.तमिति-नं.ए. ४.संज्ञा इत्यधिकम्-ए.

---------- ---------- ---------

न चान्वये शक्तेः सत्वमात्रेण तस्य शाब्दत्वं तस्याः प्रत्यासत्तित्वं च युक्तमिति वाच्यम्। शक्तिभ्रमेणाऽपि शाब्दयोर्भ्रमप्रमयोर्दर्शनेन शक्तिज्ञानस्यैव शाब्दत्वे तन्त्रत्वात्। प्रत्यासत्तित्वात्।।
किं च धूमोस्तीति १ वाक्ये धूमशशब्दस्य वह्नौ लक्षणारूपवृत्तिज्ञाने सत्येव शाब्दधीरन्यथानुमितिरित्यन्वयांशे वत्यज्ञाने कथमन्वयस्य शाब्दत्वम् ।।

ननु २ तत् प्रागन्वयस्याशक्यत्वे तद्धियोशाब्दत्वमुक्तं, यच्च शब्दरूपकरणस्यान्वयांशे प्रत्यासन्नत्वं स्यादित्युक्तं तद्द्वयमप्यन्वयांशे शक्तिग्रहस्य न हेतुत्वसाधकं, अन्यथैव तत्सिद्धेरिते शङ्कते-- न चान्वय इति।। ३ भ्रमेणापीति।। स्वरूपसत्या एव शक्तेः शाब्दधीहेतुत्वे प्रत्यासत्तित्वे च
तद्भ्रमेण श ४ ब्दभ्रमो न स्यात्। दृश्यते चायमतः तज्ज्ञानमेव तत्र हेतुः। ज्ञातैव च सा तत्र प्रत्यासत्तिरित्यर्थः। क्वचिच्छाब्दप्रमाभ्रमयोर्दर्शनेनेति पाठः, स तु गाव्याद्यसाधुशब्दशक्तिग्रहे प्रमाया अपि दृष्टेस्तदभिप्रायः। केचित्तु। यादृच्छिकप्रमाग्रह इत्याहुः।।
एवं प्रागुक्तसाधकषट्कमध्ये ५ युक्तत्वेन ६ भ्रान्तं साधकद्वयमुपपाद्येदानीं युक्तिं च चतुष्टयमधिकं विवक्षुः अन्यत्र क्लृप्तत्वाच्छक्तिस्थलेऽपि तज्ज्ञान ७ मन्वयांशेप्यावश्यकमित्याह -- किंचेति।। शाब्दधीविषयः स्वविषयशक्तिज्ञानविषयः तज्जन्यज्ञानविषयत्वात्। न चासिद्धिः। पदार्थांशे शक्तिज्ञानस्य परेणापि हेतुत्वोपगमात्। न च दृष्टान्ताभावः। ८ परोक्षानुमानस्थले जन्यज्ञानविषयसंबन्धस्य जनकज्ञानेपि विषयत्वनियमादिति युक्त्यन्तरमाह -- अपि चेति।।

१.त्यादि -सु.रा. २.यत् इति नास्ति-नं.उ.ए. ३.शक्ति इत्यधिकम्-उ.ए. ४.शाब्द-नं.उ.ए. ५.ध्येप्युक्त-नं.उ. ६.भातं-नं.उ. 'भ्रान्तं' इत्येतत् रेखयाताडितम्-ए. ७.द्भानं-नं. ८.न चेत्यादि नास्ति-नं.उ.ए.

अपि च १ परोक्षज्ञाने फलीभूतज्ञानविषयस्य संबन्धस्य जनकीभूतज्ञानविषयत्वनियमेव शाब्दफलीभूतज्ञानविषयस्यान्वयस्य तज्ज २ नकशक्तिज्ञानविषयत्वमावश्यकम्। भवति हि पक्षतदितरसाधारण्येन प्रवृत्तस्य वह्निधूमसामानाधिकरण्यविशेषरूपव्याप्तिज्ञानस्य पर्वतवह्निसंबन्धोऽऽषि सामान्येन विषयः ।।

किं च यद्यन्वयांशे शक्तिज्ञानं न हेतुस्तर्हि घटमानयतीत्यादिपदजातादिव, घटः कर्मत्वमानयनं कृतिरित्यादिपदजातादपि कथं नान्वयधीः। पदस्य पदार्थे शक्तेस्तत्स्मृतेस्तत्साध्याया अनन्वितपदार्थस्मृतेः पदार्थेषु योग्यतादेश्च सत्वात्।।

सविकल्पकविषयसंबन्धस्य निर्विकल्पकाविषयत्वात्परोक्षेत्युक्तम्। नियमेनेत्येतदसिद्धमित्यतो व्यनक्ति-- भवति हीति।। सामानाधिकरण्यविशेषेति।।

अव्यभिचरितसामानाधिकरण्येत्यर्थः। सामान्येन विषय इति।। अन्यथा पर्वतीयधूमदर्शनात्पर्वतीयवह्निज्ञानानुदयापत्तेरिति भावः। घटः कर्मत्वमित्यादावन्ययाप्रतीतिरप्यन्वयांशेऽपि शक्तिज्ञानस्य हेतुत्वे मानमित्याह-- किं च यदीति।। सामग्र्यभावान्नान्वयधीरित्यत आह-- पदस्येति।। तत्साध्यायाः शक्तिस्मृतिसाध्याया इत्यर्थः। अनन्वितेति।। अन्वयाविषयकपदार्थस्मृतेरित्यर्थः।

१.चाप -नं. २.तदज्ञात शक्ति-नं.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १९०.

न च तत्राकाङ्क्षा नास्तीति वाच्यम् । अन्वयविशेषाकाङ्क्षादावहेतुभूतं सामान्याज्ञानं प्रत्यन्वयसामान्यशक्त्यज्ञानस्यैव तन्त्रत्वात् ।।

१ न च तादृशं पदजातं शिलाशकलमङ्कुर इव क्रियाकारकभावेनान्वयबोधे स्वरूपायोग्यं, तेन कदाऽप्यन्वयबोधादर्शनादिति वाच्यम्। एवं हि घटः कर्मत्वमित्यादिवाक्यं श्रुतवतोऽभिज्ञस्य नाम विभक्तिधात्वाख्यातस्मरणादुत्पन्नान्वयबोधस्य प्रयोज्यवृद्धस्य व्यवहारं पश्यतो बालस्य घटः कर्मत्वमित्यादावेव व्युत्पन्नस्य ततोऽन्वयबोधो न स्यात् ।।

योग्यतादेरित्यादिपदेनाकाङ्क्षाऽसत्योह्यग्रहः। सामान्याज्ञानं अन्वयसामान्यज्ञानं प्रतीत्यर्थः। शक्त्यज्ञानस्येति । तथा च शक्तिज्ञानमाकाङ्क्षासद्भावार्थमवश्यमुपेत्यमिति भावः। योग्यता नेति शङ्कते -- न चेति।। शिलेति।। शिलाशकलमङ्कुरे यथा न योग्यं तथेत्यर्थः। एवं हिति।। स्वरूपायोग्यत्व इत्यर्थः। नामेति।। घटेति नाम, द्वितीया विभक्तिः, आनयेत्यानयनधातुः, लुप्ताख्याताख्यतिङ्प्रत्ययरूपहि शब्दः एतेषां स्मरणादित्यर्थः। अन्वयेति।। घटकर्मकानयनरूपान्वयबोधस्येत्यर्थः। इत्यादावेवेति।। स्मारितनामविभक्त्या २ व्यवहारहेतुत्वमजानतो घटः कर्मत्वमित्येतद्घटकर्मेत्यर्थे, आनयनं कृतिरित्येतदायनं कुर्वित्यर्थः, शक्तमिति ज्ञानवत इत्यर्थः। ततः घटः कर्मत्वमित्यादिवाक्यादित्यर्थः। एतेनैवाकाङ्क्षाभावोऽपि प्रत्युक्तः।

न च शक्तिभ्रमरूपसहकारिवशादन्वयधीः। स्वरूपयोग्यस्य सहकारिशतसमवधानेऽपि कार्याजनकत्वात्। तस्मात्स्वरूपयोग्यमेव तत् बालं प्रत्यन्वयांशे शक्तिज्ञानरूपसहकारिसहितत्वादन्वयबोधकम्। अन्यं तु प्रति तद्रहितत्वान्नेत्यन्वयांशे शक्तिज्ञान १ सहकारिता सिद्धा।।
किं च पदार्थांशे शक्तिज्ञानमपि पदार्थस्मृतिद्वारा शक्ति २ धीहेतुरिति ते मतम्। न च तत्स्मृतौ शक्तिरूपसंबन्धस्य शक्तित्वेन ज्ञानमपेक्षितं, तदभावेऽपि हस्तिरूपसंबन्धिदर्शनजन्यं हस्तिपकस्मरणं प्रति संबन्धांशे ज्ञानस्य संबन्धत्वप्रकारकस्यैव हेतुत्वदर्शनात् । किं तु संबन्धत्वेनैव ज्ञानमपेक्षितम्। एवं चाकाशमस्तीतिवाक्यादाकाश ३ शब्दसमावायित्वेनाकाशस्मृतिमत आकाशशब्दे--

४ अयोग्येपि वाक्येऽन्वयधीरन्यहेतुकेत्याशङ्क्याह-- न चेति।। तदिति।। घटः कर्मत्वमित्यादिवाक्यमित्यर्थः। ततश्च किं प्रकृत इत्यत आह-- बालं प्रतीति।। शक्तित्वेन शक्तिज्ञानस्या ५ नन्यथासिद्धत्वं चान्वयधीहेतुत्वे मानामित्याहु -- किं चेति।। ते मतमिति।। सिद्धान्ते शक्तिज्ञानवाक्यार्थज्ञानयोर्मध्ये पदार्थस्मृतेरनभ्युपगमादिति भावः। अस्त्वेवं ततः किमित्यत आह-- एवं चेति।। सम्बन्धत्वेन शक्तिज्ञानस्य पदार्थस्मृतिहेतुत्वे सतीत्यर्थः।

१.नस्य सह-नं.सु.रा.ग. २.शब्दधी-नं.सु.रा.ग.क. ३.शस्य-सु.रा. ४.अयोग्येति । इत्यस्ति-नं.उ. ५.स्यान्यथा-नं.उ.

-व्युत्पत्तिहीनस्यापि पुंस आकाशास्तित्वबोधः स्यात्। न चात्र नामविभक्त्याख्यातयुक्ते स्वरूपायोग्यत्वं शङ्कार्हम्।।
अथ संबन्धत्वप्रकारकज्ञानेनैवाकाशस्य स्मरणे सिद्धेऽनुभवार्थं शक्तित्वेन ज्ञानमपेक्ष्यत १ इति चेत्तर्ह्यन्वयानुभवार्थं तत्रैव शक्तिज्ञानापेक्षेति मदिष्टसिद्धिः।।
एवं चान्विताभिधाने न केवलं पूर्वोक्तं षट्कम्। किं तु वृत्तिज्ञाने सत्येव शाब्दधीः, परोक्षज्ञाने फलीभूतज्ञानविषयस्य संबन्धस्य जनकीभूतज्ञानविषयत्वनियमो घटः कर्मत्वमित्यादावन्वयाप्रतीतिः, पदार्थस्मृतेरन्यथाऽपि सिद्ध्याऽन्वयानु--

आकाशास्तित्वबोधः स्यादिति।। शक्तित्वेन शक्तिज्ञानरूपकारणं विना २ न्यस्य पदार्थस्मृत्यादिरूपकारणस्य सर्वस्य सत्वादिति भावः। योग्यताविरहदन्वययबुद्ध्यभाव इत्यत आह-- नचात्रेति।। आकाशमस्तीति वाक्य ३ मित्यर्थः। तर्हीति।। अनुभवा ४ र्थकत्वपक्षे केवलपदार्थे तदयोगेनान्वयसहित एवानुभवस्य वाच्यत्वेन तदर्थमेवान्वये शक्तिज्ञानमपेक्षितमित्युक्तं भवतीत्यर्थः। एवमुपपादितं सङ्ग्रहेणानुवदन्नुपसंहरति -- एवं चेति।। अन्वितेति।।

१.इति चेत् इति नास्ति-सु.रा.ज.ग. २.नास्यपदा-नं.उ. ३.क्य इत्य-ए. ४.र्थत्वप -नं.उ.ए.

व्यक्ति-प्रन्द्या-दुरि-हत्वम्) शक्तिवादः पु - १९३.
---------- ---------- --------
भवार्थं तत्रैव शक्तिज्ञानापेक्षेति युक्तिचतुष्टयमपि ।।
अन्विताभिधाने युक्तिदशकम् ।। १८ ।।

अंशद्वयेऽपि शक्तिज्ञानेनैव पदार्थतदन्वयाभिधान इत्यर्थः। स्पष्टोऽयं ग्रन्थः।।
अन्विताभिधाने १ प्रागुक्तेन सह युक्तिदशकम्।। १८ ।।

अथ व्यक्तिप्रतिबन्द्या दुष्परिहरत्वम् ।। १९ ।।
ननु -- षट्कान्तर्गता व्यक्तिप्रतिबन्दी न युक्ता। व्यक्तौ शक्तिज्ञानस्याहेतुत्वे जाताविव व्यक्तावपि --

अथ व्यक्तिप्रतिबन्दी दुष्परिहरत्वात् ।। १९ ।।
ननु -- यदुक्तं शक्तिः पदार्थे ज्ञातोपयुज्यते, अन्वये तु स्वरूपसतीति कुब्जशक्तिपक्षे साधकष्टकं स्थिरमेवेति तत्रान्वयस्य शाब्दत्वं कारणरूपशब्दस्य
प्रत्यासन्नत्वं च शक्तिज्ञानं विना न युक्तमिति साधकद्वयस्योपपादनेऽपि शक्तिर्जाताविव व्यक्तावपि तद्विशिष्टव्यक्तिबोधे ज्ञातोपयुज्यते न तु व्यक्त्यंशे अज्ञातेति यथोच्यते तथाऽन्वयांशेऽपीति यत्साधकमभिहितं तदयुक्तम्। येन जातिव्यक्तिप्रतिबन्द्याऽन्वयांशेऽपि शक्तिर्ज्ञातोपयुक्ता शाब्दबोधे स्यादिति भावेन शङ्कते -- नन्विति।। पदशक्तिवादसिद्धान्ते मण्युक्तमाह-- व्यक्ताविति।। व्यक्त्यंशे या --

१. शक्तिज्ञानपूर्वकमेवान्विताभिधानमित्यत्र प्रागु -नं.उ.ए.

न्यायदीपयुततर्कताण्डवम् (द्वि.परिच्छेदः पु - १९४.
---------- ---------- --------
शक्तत्वेन ज्ञातस्यैव प्रयोजकत्वसम्भवे शक्यत्वेन ज्ञातजातिसंबन्धिव्यक्तित्वरूपप्रयोजकान्तरकल्पने गौरवमिति चेत् समन्वयेऽपि प्रोजकान्तरल्पनेऽनुव्याख्यानोक्तं गौरवम्।।

ननु गोत्वे गौपदं शक्तमिति ज्ञातं प्रति विषतया जातेरवच्छेदकत्वं नागृहीतविशेषणान्यायेन विशेषणीभूतव्यक्तिमादायैव युक्तम्। व्यक्तिं विना जातेरनुपस्थितेः।

छ्छुद्धत्च्छ्ण्च्छ्ण्ड्ढड्ढुठ्ठ३

।। श्रीः।। ८-६-२००१.

तर्कताण्डवम्

तृतीयपरिच्छेदः

व्याप्तिवादः।। १ ।।

अथ स्वमते व्याप्तिनिरूपणम् ।। १ ।।

अथ १ 'तन्मुख्यं ज्ञानशब्दयो 'रित्यनुप्रमाणेषु-

-

न्यादीपाख्या व्यख्या

व्याप्तिवादः ।। १ ।।

अथ स्वमते व्याप्तिनिरूपणम् ।। १ ।।

सत्तर्कसहिता वेदाः प्राहुर्यं पूर्णसद्गुणम्।
धर्माराध्यं देवतेड्यं वन्दे तं कमलापतिम्।।

पूर्वेण सङ्गतिं दर्शयन्नुत्तरार्थमाह-- अथेति।। सपरिकर २ शब्दप्रमाणस्वरूपनिरूपणानन्तरमनुमानप्रमाणं सपरिकरं अस्मिन्परिच्छेदे कथ्यते।

-

१.एवमित्यधिकम् - क. २.रं श-ट.ठ.ड.

-

पु-२ न्यायदीपयुततर्कताण्डवम् (तृतीयपरिच्छेदः

-

वेदरूप १ शब्दः प्रधानमित्युक्तत्वात्तदनुग्राहकमनुमानमुच्यते।।
निर्दोषोपपत्तिरनुमानम् । उपपत्तिर्व्याप्यम्।

-

किं कारणम्। तदनुग्राहकम्- हेतुगर्भमिदम्। शब्दप्रमाणानुमानुग्राहकत्वादुच्यत
इत्यर्थः। तदनन्तरम् कुतः। वेदरूपः शब्दः २ प्रमाणमित्युक्तत्वात्। प्रधानोक्त्यनन्तरमेवानुग्राहकोक्तेरवसरादित्यर्थः। यद्वा प्रमाणान्तरानुग्राहक ३ मनुक्त्वा वेदानुग्राहकोक्तिः कुत इत्यतो वेदरूपः शब्दः प्रधानमित्युक्तत्वादिति। 'याथार्थमेव मानत्वं तन्मुख्यं ज्ञानशब्दयोः'इति युक्तिपादीयानुव्याख्याने 'याथार्थ्यमेव प्रामाण्यं तन्मुख्यं ज्ञानशब्दयोः'इति ब्रह्मतर्के च। तद्यायार्थ्यं ज्ञाने केवलप्रमाणे वेदरूपप्रमाणे च मुख्यमित्यस्य तात्पर्यं - प्रधानमित्युक्तत्वादिति ।। वेदानुग्राहकत्वं च-- वेदे आरोपितानि यानि अप्रामाण्यकारणानि अनृतव्याघातपुनरुक्त्यशक्यार्थाभिधायित्वगुरूपायबोधकत्वार्थबोधोपायशून्य त्वादीनि तत्सर्वनिरासेन प्रामाण्यस्थिरीकरणं, तथा वेदबोध्येऽर्थे आरोपितान्यथाकारशङ्कानिरीसेन
तद्बाध्यधर्मदेवब्रह्मस्वरूपस्थिरूकरणम्।।
अनुमानसामान्यलक्षणं प्रमाणलक्षणे भगवत्पादोक्तमेवाहः-- निर्दोषेति।। अनुमेत्यनुमानमुच्यते। निष्क्रान्ता दोषेभ्यः निर्दोषा सा च सा उपपत्तिश्च निर्दोषोपपत्तिः। उपपत्तिदोषाश्च स्वमते अनुमानदोषोक्तिवादे व्यक्ताः। अत्रोपपत्तिपदं अर्थवादोपपत्ती चेत्यादाविव हेत्वाभासविविक्तयुक्तिपरं चेत् निर्दोषेति व्यर्थमित्यत आह --

उपपत्तिर्व्याप्यमिति।।

-

१.पः श-क.ग.ट.रा. २.प्रधनमि-ठ.ड. ३.'त्व' इति पूरितम्-ड.

-

स्वते-व्यानि-रूणम्) व्याप्तिवादः पु - ३.

-

निर्दोषत्वेन विशेषणान्नासिद्धादावतिव्याप्तिः। उक्तिं हि पद्धतौ 'उपपत्तिर्युक्तिर्लिङ्गव्याप्यमिति पर्याय१ 'इति। अत्रोपपत्तिर्व्याप्यमित्येतावतैव पूर्तावपि युक्तिलिङ्गग्रहणं भगवत्पादैः'रनुमा युक्तिरेवोक्ते'ति 'लिङ्गं हेतुरि'ति चोक्तत्वेन २ तद्विरोध इति शङ्कानिरासाय। प्रमाणलक्षणटीकायान्तु -- साहचर्येणार्थगमकं लिङ्गमिति साहचर्यनियमरूपव्याप्तौ नियमांशत्यागेन साहचर्यमात्रमुक्तम्। तदावश्यकनिर्दोषग्रहणादेव साधारणादौ नातिव्याप्तिरित्यभिप्रेत्य।।

-

ननु -- लक्षणटीकायामुपपत्तिर्लिङ्गमित्युक्तम्। अत्रतूच्यते व्याप्तमिति। तत्कथमित्यतः पर्यायत्वान्न दोष इति भावेनाह-- उक्तं हीति।। चतुर्णां शब्दानामुक्तेः कृत्यमाह- अत्रेति।। पूर्ताविति।। तावतैव निर्दोषपतसार्थक्यस्य ३ लक्षणोक्तेर्वा संभवादिति भावः। 'अनुमायुक्तिरेवेति'युक्तिपादीयानुव्याख्याने,'लिङ्गं हेतुरिति'मिथ्यात्वानुमानखण्डने चोक्तत्वादित्यर्थः।।

ननु -- व्याप्यं नाम व्याप्तेः कर्म। व्याप्तिश्चसाहचर्यनियम इति वाच्यम्। तथा च लक्षणटीकाविरोध एव। तत्रोपपत्तिर्लिङ्गमित्युक्त्वा साहचर्येणार्थगमकं लिङ्गमित्येवोक्तेरित्यतो नियमांशोभिप्रेत एव तत्फलस्य विशेषणान्तरलभ्यत्वात्तदनुक्तिरितिभावेन विरोधं निराह-- प्रमाणलक्षणटीकायां त्विति।। साधारणेति।। साधारणानैकान्तिकहेत्वाभासादावित्यर्थः।।

-

१. या इ- क.ट. २.त्वात्त -ग.ट.रा. ३.क्यसंभवा-ट.ठ.ड.

-

पु -४ न्यायदीपयुतर्कताण्डवम् (तृ.परिच्छेदः

-

अविनाभावो व्याप्तिः।।

नन्वविनाभावः- साध्येन विना साधनस्याभावो वा; साध्येनाविना साध्यसाहित्येन साधनस्य भावो वा। नाद्यः। केवलान्वयिनि साध्या १ भावाप्रसिद्ध्याव्याप्तेः। अस्य व्यतिरेकव्याप्तित्वेन त्वन्मतेनुमानानङ्गत्वाच्च। न द्वितीयः। साध्यसाहित्यस्य व्यभिचारिण्यपि सत्वात्। साध्यसाहित्यनियमोभिप्रेतश्चेत् नियमस्य निरूच्यमानव्याप्तिरूपत्वेनात्माश्रयात्।

-

ननु व्याप्तेः कर्म व्याप्यमिति व्याप्यस्वरूपं व्याप्तिज्ञानाधीनज्ञानमिति का व्याप्तिरिति जिज्ञासायां पद्धत्युक्तलक्षणमाह -- अविनाभाव इति।। तत्परिष्कर्तुं व्याप्तिवादपूर्वपक्षे मण्याद्युक्ति२ दिशाक्षिपति-- नन्विति। नञो व्यत्यासेनान्वयमुपेत्याद्यः कल्पः। यथाश्रुतान्वयमुपेत्य द्वितीयः। फलितार्थमाह-- साध्यसाहित्येनेति।। केवलान्वयिनीति।। शब्दोभिधेयः ज्ञेयत्वात् गुणत्वात् इत्यदिकेलान्वयिसाध्यकहेतावित्यर्थः।। साध्यादीति।। साध्यसाधनाभावेत्यर्थः।।

सिद्धान्तिनो मते सर्वस्य व्यतिरेकित्वादभावाप्रसिद्धिर्नेत्यरूचेराह -- अस्येति।।

साध्येन विनाभाव इत्यस्य साध्याभावे साधनाभावे इत्यर्थकतया अस्य व्यतिरेकव्याप्तित्वात्। सिद्धान्ते ३ च व्यतिरेकवादे वक्ष्यमाणदिशानुमानानङ्गत्वाच्चेत्यर्थः। त्वन्मते - सिद्धान्तिनो मते।

'अविनाभावो व्याप्तिः साहचर्यनियम इति यावदि' ति पद्धत्युक्तेराह--साध्यसाहित्येति।। आत्माश्रयात्--
ज्ञप्ताविति भावः।
-
१.ध्याद्य- ग. २. क्तदि-ट.ड. ३.न्तिनाप्य -ठ.
-
स्वते-व्यानि-रूणम्) व्याप्तिवादः पु - ५.
-
अधोदेशनदीपूरोर्ध्वदेशवृष्ट्योर्देशतः कालतो वा साहित्यासंभवाच्च। एतेन साहचर्यनियमो वाऽनोपाधिक १ संबन्धो वा स्वाभाविकसंबन्धो वा साध्याभाववदवृत्तित्वं वा व्याप्तिरिति निरस्तम्। व्यधिकरणयोः पूरवृष्ट्योर्देशतः कालतो वा साहचर्यस्य संबन्धस्य २ चाभवात्। नदीपूरस्य वृष्टिरूपसाध्याभाववदधोदेशवृत्तित्वाच्चेति।।
उच्यते। यद्देशकालसंबद्धस्य यस्य यद्देशकालसंबद्धे येन विनानुपपत्तिस्तस्य तेन सा व्याप्तिः।
-
अधोदेशनदीपूरोर्ध्वदेशवृष्ट्योरिति।। तयोरपि लिङ्गलिङ्गिभावदर्शनात् भिन्नदेशत्वाद्भिन्नकालत्वाच्चेति भावः। एतेनेति।। भिन्नदेशकालव्याप्यव्यापकभावापन्नपूरवृष्टिस्थलीयव्याप्ताव्याप्तत्वेनेत्यर्थः।
। साहचर्यनियम इति।। पूर्वमविनाभाव इत्यस्याभिप्रेतत्वमुपेत्य साहित्यनियमो दूषितोऽत्र तु पृथग्व्या ३ प्तिलक्षणत्वेन साक्षादुक्त ४ त्वमुपेत्य पुनरुपन्यास इति न पुनरुक्तिदोषः।।
एतेनेत्युक्तं व्यनक्ति -- व्यधिकरणयोरिति।। समानदेशकालभिन्नदेशकालसर्वव्याप्तनिष्ठव्याप्तिं निरूपयति।। यद्देशेति। येन विनेति।। केवलान्वयिन्यव्याप्तिस्तूद्धरिष्यत इति भावः। इयं च

सर्वसाधारणीति स्वयमेवोपपादियिष्यति। अनुपपत्तिस्वरूपं चानुपपत्तिश्चासंभव इत्यादिना स्वयमेव वक्ष्यति।।

-

१.कः स-क. २.वासं-क. चासंभ-ग.ट.रा. ३.प्तल-ठ. ४.द्वष्टत्वमभिप्रेत्यपु-ठ.

-

पु-६. न्यायदिपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

अनुपपत्तेर्व्याप्तित्वं च - प्रमाणलक्षणे परिशेषोर्थापत्तिरनुमानमित्यविशेष इत्य १ र्थापत्तिरिवानुमानमप्यावश्यकानुपपत्त्यै गमकमित्युक्तत्वात्; उपमानेपि न हि स्वसदृषेनादृशं क्व २ च्चिद्वृष्टमित्यनेन गवयनिष्ठगोसादृश्यस्य गोनिष्ठगवयसादृश्यं विनानुपपत्तेरेवोक्तत्वात्; पद्धतौ च निर्दोषोपपत्तिरनुमेति प्रमाणलक्षणस्थो ३ पपत्तिशब्दो न पर्यायान्तरमात्रम् किं तु साध्ये सत्युपपद्यते अन्यथा तु ने ४ त्युपपत्तिरिति भावेनोपपत्तिर्व्याप्यमति व्याख्यातत्वात्; प्रमाणलक्षणटीकायामपि जीवनवत्वे सति गृहे असत्वरूपे व्याप्ये अनुपपद्यमानार्थप्रमितिरर्थापत्तिरित्यनुपपद्यमानपदयोगात्
परिशेषादेरनुमानत्वानङ्गीकारे धूमोप्यनुपपत्या गमयन्नानुमानं स्या ५ दिति चोक्तत्वात्; --

-

अनुपपत्तेर्व्याप्तित्वं चेति।। भाष्यकाराद्यभिप्रेतमेवेत्यन्वयः। अविशेषशब्दार्थं टीकोक्तरीत्याह -- अर्थापत्तिरिवेत्यादि।। उपमानेपीति।। शबरोपमानस्यानुमानान्तरभावोक्तिप्रस्तावेपीत्यर्थः।।
पद्धतावुपपत्तिर्युक्तिर्लिङ्गव्याप्तमिति शब्दाः। पर्याया इत्युक्तेर्ग्रन्थान्तराविरोध एकोभिप्रापय उक्तः। अभिप्रायान्तरमपि

प्रकृतोपयोगायाह-- पद्धतो ६ चेति।। प्रमाणलक्षणाख्यन्थगतस्य नर्दोषोपपत्तिरनुपेत्येतदेव ---

-

१.त्यनेनार्था -ग.ट.रा. २.किंचिद्व -ग.क.रा.ट. ३.स्थ उ -ग. स्धं उ -रा. ४.नेति भावेन -ग.रा. ५.दित्युक्त-ग.रा.ट. ६.तैवे-- ठ.ड.

-

स्वते-व्यानि-रूणम्) व्याप्तिवादः पु - ७.

-

सुधायां च 'अनुमायुक्तिरेवोक्ते'त्यनुव्याख्यानस्थयुक्तिशब्दस्य युज्यत एवेति युक्तिरिति व्याख्यातत्वाच्च; भाष्यकाराद्यभिप्रेतमेव।।

यत्तु -- विमतो गौर्गवयसदृशः गवयगतसादृश्यप्रतियोगित्वादिति प्रमाणलक्षणटीकायां हेतुसाध्ययोः सामानाधिकरण्यसंपादनं तत्परमतमाश्रित्य। अत एव तत्रैव इति प्रयोगसंभवादित्युक्तम्। अत एव १ पद्धतौ च असौ गौरेतद्गवयसदृशः अस्य गवयस्य २ तद्गोसदृशत्वादिति वैयिधिकरण्येनैव प्रयुक्तम्। अत एव ३ सुधायां -- 'रोहिण्युदय आसन्नः कृत्तिकाभ्युदितायत'इत्यनुव्याख्यानोक्ते व्यधिकरणप्रयोगे कालादिपक्षीकारेणैकाधिकरण्यमाशङ्क्यैवं प्रयोगविपरिणाम ४ प्रमाणं नेत्युक्तम्।।

-

-- पद्धतावपन्यस्य ५ व्याप्यमिति व्याख्यानात्प्रमाणलक्षणस्थेत्युक्तम्। एतच्च मूलाकारसम्मतमेतदिति ज्ञापनार्थम्। नन्वेवं शाबरोक्त ६ प्रमाणान्तर्भावप्रस्तावे गौर्गवयसदृशी गवयस्य गोसदृशत्वादिति प्रयोगे वैयधिकरण्यमाशङ्क्य सामानाधइकरण्येन प्रयोगोक्तिः कथम् तया व्यधिकरणस्य गमकता नेति प्रतीतेरित्यत आह-- यत्त्विति।। इत्यनुव्याख्याने ७ ति।। भक्तपादीयानुव्यख्यानोक्तेः ८ ।।

-

१.वहिप- ग.रा. २.स्यैत-ग.रा. ३.वचसु-क.रा. ४.मेप्र-ग.ट.रा. ५.तत्रस्थोपपपत्तिशब्दस्य इत्यधिकम्-ठ. ६.शाबरोपमानान्तर्भा--ठ. ७. नोक्त इति --ट.ठ. ८.क्ते-ठ.ड.

-

पु -- ८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

अनुपपत्तिश्चा १ घटनं प्रमाणविरोध इति यावत्। उक्तं हि प्रमाणलक्षणटीकायां अनुपपत्तिश्चासंभव इति।।

या तु -- परेण व्याप्त्या गमकमनुमानम् अनुपपत्या गमिकार्थापत्तिरित्यनुमानार्थापत्योर्भेदे शङ्किते तं प्रति टीकाकारीया, केन चिद्विना कस्य चिदनुपपत्तिर्हि तयोर्व्याप्तिं विना नोपपद्यत इत्यनुपपत्तिव्याप्त्योर्भेदोक्तिः

सानुपपत्तिनियामकोर्ध्वाधरीभावकार्यकारणभावाद्यभिप्राया,

नियतसामानाधिकरण्यानौपाधिकसंबन्धादिरूपपराभिमतव्याप्त्यभिप्राया वेति न टीकाविरोधः।।

इयमेव च व्याप्तिः साध्येन विना साधनस्याभावोऽनुपपत्तिरिति भावेनाविनाभाव इति साहचर्यनियम इति चोच्यते।

-

एवमनुपपत्तेर्व्याप्तित्वे संमतमुक्त्वा तत्स्वरूपमिदानीमाह-- अनुपपत्तिश्चेति।। येन विना यस्य सत्ता प्रमाणविरुद्धा सा तेन तस्य व्याप्तिरित्यर्थः। उपपत्तेश्च व्याप्त्यपेक्षा २ सर्वथाङ्गीकार्येति प्रमाणलक्षणवाक्यटीकोक्तिविरोधं निराह -- यात्विति।। पराभिमतेति।। न त्वनुपपत्तिरूपव्याप्त्यभिप्रायेत्यर्थः। नन्वेवमविनाभावो व्याप्तिः। साहचर्यनियम इति यावत् इति पद्धत्युक्तिविरोध इत्यत आह-- इयमेवेति।।

नन्वनुपपत्तिर्व्याप्तिरिति पक्षे व्याप्यव्यापकवस्थेत्यत आह -- यस्येति।।

-

१.श्चासंभवः-ग.रा. २.क्षेति प्रभा -ठ.ड.

-

स्वते-व्यानि-रूपणम्) व्याप्तिवादः पु - ९.

-

यस्यानुपपत्तिः स व्याप्यः। येन विनानुपपत्तिः स व्यापकः।।
इयं च व्याप्तिः प्रसिद्धेषु धूमाद्यनुमानेषु अधोदेशे १ न दीपूराद्यनुमानेष्वर्थापत्यादिरूपानुमानेषु
आत्माश्रयान्योन्याश्रयचक्रकानवस्थाव्याघाता २ पादकेषु तर्केषु केवलव्यतिरेकिषु केवलान्वयिषु च सर्वत्रानुगता आवश्यकी च । अन्यथाप्रयोजकत्वापातात्। हेतुरस्तु साध्यं मास्त्वि ३ त्येवाव्याप्तेः शङ्क्यमानत्वात् ४ । न चात्माश्रय ५ त्वादिकमापाद्यं अपादकसमानाधिकरणत्वेन क्वचित्प्रमितम्। तथात्वेऽनिष्टत्वायोगात्। उक्तं च टीकाकारैः। न हि कुत्राप्यात्माश्रयादि ६ कं प्रमाणसिद्धमिति।।

-

अनोपाधिकसंबन्धादिरूपव्याप्तिं हित्वैतदुपादाने को विशेष इत्यत आह-- इयं चेति।। केवलान्वयिषु चेति पररीत्या। सिद्धान्ते सर्वस्य व्यतिरेकित्वात्। यद्वा
देशकालरूपकेवलान्वयिसाध्य ७ कहेत्वपेक्षयैतदुक्तिः। एकसादृश्यसंबन्धिधर्महेत्वभिप्राया वैतदुक्तिः। आवश्यकी चेत्युक्तं व्यनक्ति-- अन्यथेति।। अप्रयोजकतेति।। व्याप्यत्वेनाभिमतस्येति योज्यम् । इयमेव व्याप्तिर्युक्तेत्येतद्व्यतिरेकमुखेनाप्युपपादयति -- हेतुरिति।।
नन्वात्माश्रयादौ मण्याद्युक्तसामानाधिकरण्यघटितव्याप्तिरेवास्तु किमनयेत्यत आह-- न वेति।। उक्तं चेति।। प्रमाणलक्षणटीकायामात्माश्रयान्योन्याश्रयेत्यादिवाक्यव्याख्यानावसरे ।

-

१.शनदी-ट.रा. २.ताद्यापादकतर्के-ग.ट.रा. ३.भूदित्ये-ग.रा. ४.त्वाच्च-ग.रा. ५.यादिक-क.ग.रा. ६.दिप्र-क.ग.रा. ७.ध्यहे -- ठ.ड.

-

पु -- १० न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

ननु -- धूमस्यानुपपत्तिः किं वह्निसामान्यं विना किं वा पर्वतीयवन्हिं विना। नाद्यः। तया पर्वतीयवह्न्यसिद्धेः। नान्त्यः। पर्वतीयवह्न्यसिद्धौ तेन विनानुपपत्तेर्दुर्ज्ञानत्वात्। सिद्धौ च तस्या एवानुमितिरूपफलत्वेन तत्कारणत्वायोगात् इति१ । उक्तं हि खण्डने -- यतोऽन्यत्वं तत्सिद्धेरग्रे तदसिद्धेरित २ इति चेत्। ३ धूमस्य सामानाधिकरण्यमपि किं वह्निसामान्येन किं वा पर्वतीयवह्निनेति विकल्प्य तद्दूषणयोः साम्यात्।। ननु -- धूमसामान्यस्य वह्निसामान्येन सामानाधिकरण्यज्ञानं करणम्। वस्तुगत्या पर्वतीयस्य वह्नेर्वह्नित्वेन ज्ञानं ४ फलम्। वह्नेः पर्वतीयत्वसिद्धिस्तु पक्षधर्मताबलादिति चेत्सममनुपपत्तावपि।।

-

अस्यां व्याप्तौ बाधकमाशङ्कते -- नन्विति।। असिद्धौ अज्ञाने सतीत्यर्थः। एवं सिद्धावित्यपि ।। तत्सिद्धेरग्रे तदसिद्धेरिति।। पर्वतीयवह्निसिद्धेः पूर्वं तद्वह्न्यसिद्धेः। न च सामान्यसिद्ध्या तत्सिद्धिः यतोऽन्यत्वं सामान्यविशेषयो ५ रित्यर्थः। तन्मुखेन समाधिं वाचयितुं प्रतिबन्द्योत्तरमाह-- धूमस्येति।। यत्तु -- अस्य व्यतिरेकव्याप्तित्वेन त्वन्मतेऽनुमानानङ्गत्वाच्चेति तदाशङ्क्य निराह--

-

१. इति पदं न -ट.रा. २.तीति चे-ग.रा. ३.चेन्न-क.ग.रा. ४.-तत्फ-ग.ट.रा. ५.न चेत्यादि नास्ति -ट.ड.

-

स्वते-व्यानि-रूणम्) व्याप्तिवादः पु - ११.

-

न चेयं व्यतिरेकव्याप्तिः। केवलान्वयिन्यपि साध्यं विनानुपपत्तेः सद्भावात्। वृष्टिरूपसाध्याभाववत्यधोदेशे पूररूपसाधनाभावस्याभावेन व्यतिरेकव्याप्त्यभावेऽपि पूरे वृष्टिं विनापपत्ति १ दर्शनात् २ । किं च वह्निं विनानुपपत्तिर्धूमगता। व्यतिरेकव्याप्तिश्च वन्ह्यभावगतेति कथं तयोरभेदः। वह्न्यभावस्य धूमाभावेन व्याप्तिरपि धूमाभावं विनानुपपत्तिरेव। सा च वह्न्यभावेन धूमाभावे साध्ये व्याप्यगतत्वादन्वयव्याप्तित्वेनैवाङ्गम्। धूमानैव वह्नौ साध्ये तु धूमानिष्टत्वान्न साक्षादङ्गम्।

-

-- न चेय ३ मिति ।। सामानाधिकरण्यगर्भा ४ व्यतिरेकव्याप्तिरियं भविष्यतीति वादिनं प्रत्याहं -- किं चेति।। नन्वस्त्वियं सर्वान्वय्यनुमानेषु वह्न्यभावादिना धूमाभावाद्यनुमानुमानस्थलेन्यैव व्याप्तिर्वाच्येति तदनुगतेयं न भवतीत्यत आह-- वह्न्यभावस्येति।। इयमेव ५ धूमानुमानेऽप्यङ्गं कथं न व्यतिरेकव्याप्तिरित्यत आह -- धूमेनेति।। न साक्षादिति।। किं तु व्यभिचारनिरासद्वारैवाङ्गमति भावः। केवलान्वयिनि साध्या ६ भावाप्रसिद्ध्याव्याप्तिरित्युक्तदोषं निराह--न च केवलान्वयिनीति।।

-

१.तेर्द -ग.ट.रा. २.नाच्च-ग.ट.रा. ३.चैवमिति-ठ. ४.र्भव्य-ठ.ड. ५.चेद्धू-ठ.ट.ड. ६.ध्याप्र-ठ.ड.

-

-

न च केवलान्वयिन्यव्याप्तिः। तत्र साध्याभावा १ सत्वेनैव साध्याभावे सति साधनस्य योपपत्तिः तदभावरूपानुपपत्तेः सत्वात्। मन्मते अप्रामाणिकस्यापि निषेधप्रतियोगित्वात्।।

तथा च -- रसस्य समानदेशकालेन रूपेण विनेव, पाकजरूपादेः समानदेशेन भिन्नकालेन पाकेन विनेव २ च, कृत्तिकोदय ३ स्याभिन्नकालया ४ भिन्नदेशया रोहिण्युदयासत्या विना, अधोदेशनदीपूरस्य भिन्नदेश ५ कालेर्ध्वदेशवृष्ट्या विनानुपपत्तिरस्तीति, सामानाधिकरण्य इव वैयधिकरण्येप्युक्तरूपा व्याप्तिर्युक्ता। प्रत्युत नदीपूरादौ सामानाधिकरण्य एवोक्तरूपा व्याप्तिरयुक्ता । न ह्यूर्ध्वदेशगतो नदीपूरः ६ ऊर्ध्वदेशगतां वृष्टिं विनानुपपन्नः। किं तु ततोप्यूर्ध्वदेशघताम्।।

-

अप्रामाणिकस्यापीति।। यथा चैतत्तथोपपादितं न्यायामृते प्रथमपरिच्छेदे। सर्वत्रानुगतेति प्रागुक्तमुदाहरणनिष्ठतया व्यनक्ति-- तथा चेत्यादिना।। सामानाधिकरण्य इवेति।। यथा तत्र न्यायमते कथंचित्सामानाधिकरण्यं संपाद्य व्याप्तिरुपपाद्यते तथा क्लेशेन विनैव यथास्थितलिङ्गलिङ्गनोर्वैयधिकरण्ये सत्यपीत्यर्थः।।
ननु त्वन्मतेपि तत्र सामानाधिकरण्यमादायैव व्याप्तिरुच्यतामित्यत आह-- प्रत्युतेति ७ ।। यथास्थितलिङलिङ्गिनोर्व्यधिकरणयोर्व्याप्यव्यापकभावेन बाधकमाशङ्क्य प्रतिबन्द्योत्तरमाह-- नन्वित्यादिना।।

-

१.सत्वादेन -क.ग. वस्यासत्वादेव -ट.रा. २.च इति नास्ति-ग.ट.रा. ३.यस्य समानका -ग.ट.रा. ४.यारो-ग.रा. ५.कालयो-ग.ट.रा. ६.स्वदे-ग.ट.रा. ७.ततः 'व्यधिकरण' इत्याद्येवास्ति-ट.ड.

-

स्वते-व्यानि-रूणम्) व्याप्तिवादः पु - १३.

-

ननु साध्याभावेनैव संबन्धस्य नदीपूरस्य वृष्टिरूपसाध्येन कथं व्याप्तिरितिचेत् साध्याभावेन नियमेन संबन्द्धस्य द्रव्यत्वस्य संयोगरूपसाध्येन कथं व्याप्तिः। यदितु तत्र फलबलेन व्याप्तिलक्षणे

प्रतियोग्यसमानाधिकरणेति विशेषणाव्व्याप्तिसिद्धिः। तर्ह्यत्रापि फलबलेनैव व्याप्तेर्लक्षणान्तरस्योक्तत्वात्तत्सिद्धिरिति समम्।।
ननु वैयधिकरण्ये साध्यस्य देशनियमः कथमिति चेत्। सामानाधिकरण्येपि -- धूमेन तदधोभाग एव वह्नेः, तुलोन्नमनेन भागान्तर एवावनमनस्य, व्याप्यवृत्तिना
द्रव्यत्वेनाव्याप्यवृत्तेः संयोगस्याव्याप्यवृत्तिना संयोगेन व्याप्यवृत्तिद्रव्यत्वस्य, सिद्धिरिति कथं पक्ष एव प्रदेशनियमः।
-
साध्याभावेनेत्यादि।। परमते संयोगस्याव्याप्यवृत्तित्वेन वृक्षः संयोगीद्रव्यत्वादित्यत्र द्रव्यत्वस्य
साध्याभावसंबन्धस्येत्युक्तम्। फलेति।। अनुमितिलक्षणफलबलेनेत्यर्थः।। प्रतियोगीति।। प्रतियोग्यसामानाधिकरणसाध्यप्रतियोगिको योऽभावः तदसंबद्धत्वे सति साध्यसामानाधिकरण्यं व्याप्तिरिति विशेषणादित्यर्थः। तथाच संयोगाभावस्य प्रतियोगिसामानाधिकरण्यान्न दोष इति भावः। व्यधिकरणयोर्लिङ्गलिङ्गिभावे बाधकान्तरमाशङ्क्य प्रतिबन्द्या निराह-- नन्विति।। सामानाधिकरण्येपि पक्ष एव प्रदेशनियम इत्यन्वयः। कुत इत्यतोऽन्यत्रान्यथादर्शनादिति भावेनाह-- धूमेनेत्यादिना।। वह्नेरित्यादिष्ठ्यन्तानां सिद्धिरितीत्यनेनान्वयः। इति शब्दो हेतौ। अत एव पद्धतौ तुलोन्नमनादीनामनेकेषामपि लिङ्गलिङ्गिभावो दर्शितः।
-
पु- १४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः
-
कथं च समानकालत्वेपि कादाचित्केन पतनेन स्थायिगुरुत्वस्य, स्थायिना शरीरत्वेन कादाचित्कनाशस्य च, सिद्धिरिति कालनियमः।।
व्याप्तिस्वभावादिति चेत्सम्। यत्र यदा रसस्तत्र तदा रूपमिति समानदेशकालत्वेनेव, यत्र पाकजं १ तत्र पाक इति समानदेशत्वसात्रेणेव,

यदाकृत्तिकोयस्तदा रोहिण्युदयासत्तिरिति समानकालत्वमात्रेणेव २ च, यदायत्र नदीपूरस्तत्पूर्वकाले तदूर्ध्वदेशे वृष्टिरिति भिन्नदेशकालत्वेनैव व्याप्तिग्रहात्।।

ननु -- देशथः कालतश्च वैयिधिकरण्ये कथं व्याप्तिगहः। यत्रेदं तत्रेदमिति वा यदैवं ३ तदैवमिति वा देशतः कालतो वा सामानाधिकरण्येनैव व्याप्तेर्ग्राह्यत्वादिति चेन्न ४ । यदीदं तर्हीदमित्येवानुपपत्तिरूपव्याप्तिग्रहस्य सर्वानुगतत्वात्।।

-

'व्याप्तिप्रकारमपेक्ष्यलिङ्गस्य लिङ्ज्ञानजनकत्वनियमादि'ति पद्धत्युक्तदिशा परेण समाधानं वाचयित्वा सममित्याह -- व्याप्तीति।। व्याप्तिस्वभासादित्युक्तं

व्यनक्ति-- यत्र यदेति।। व्याप्तिग्रहप्रकारानुपपत्तिमाशङ्क्य समाधत्ते-- नन्वित्यादिना।।

ननु वैयिधिकरण्येपि व्याप्यव्यापकभावे हेतुतदाभासव्यवस्था न स्यादित्यत आह-- अत्रचेति।।

-

१.जरू --ग.रा. २.च इति नास्ति-ट.रा. ३.यदेदं तदेदमिति-ट.रा. ४.त्। य-ग.रा.

-

स्वते-व्यानि-रूणम्) व्याप्तिवादः पु - १५.

-

अत्र च यद्देशकालसंबद्धस्य हेतोरनुपपत्तिः तद्देशकाले हेतोरभाव एवासिद्धिः। न तु पक्षेऽभावः। एवं यद्देशकालसंबद्धस्य हेतोरनुपपत्तिः तद्देशकालयोरन्यत्रापि भावो व्यभिचारः। न तु साध्याभाववति वृत्तिः। एवमुक्तयोर्देशकालयोरन्यत्रैव वर्तमानो विरुद्धः। न तु नियमेन साध्याभाववति वर्तमान इति न कश्चित्क्षुद्रोपद्रवः।।

तस्माद्वैयधिकरण्येपि व्याप्तिरस्त्येव। १ तदुक्तं भगवत्पादैः।। 'असत्यपि व्यापिरस्त्येवेति'। सामानाधिकरण्ये असत्यप्यनुपपत्तिरूपा व्याप्तिरस्त्येवेत्यर्थः। २ अत एव व्यधिकरणासिद्धिर्न दोष इति वक्ष्यते।।
इति स्वमते व्याप्तिनिरूपणम्।। १ ।।

-

भिन्नदेशकालयोरपि व्याप्यव्यापकभावपक्षे इत्यर्थः। न तु पक्ष इति।। येन नदीपूरादिरसिद्धः स्यादिति भावः। नत्विति।। येन नदीपूरादिर्व्यभिचारी स्यादिति ध्येयम्। तद्देशकालयोरन्यत्रेति। संबन्धसामान्ये षष्ठी। ताभ्यामन्यत्रेत्यर्थः। एवमग्रेपि।। एवमिति समुच्चये। उक्तयोर्यद्देशे यत्कालेनुपपत्तिर्हेतोः साध्येन विना तयोरन्यत्र
ताभ्यामन्यत्रेत्यर्थः। तदुक्तमिति।। प्रमाणलक्षणे । प्रकृतोपयोगाय तस्यार्थमाह-- सामानाधिकरण्य इति।।
इति स्वमते व्याप्तिनिरूपणम्।। १ ।।

-

१.प्रपञ्चयिष्यते चैतद्व्यधिकरणासिद्धेरदोषत्वप्रस्तावे इत्यधिकम्-- ग.रा.ट. २.अत एवेत्यादि नास्ति-ग.रा.

-

पु-१६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

अथ परोक्तवक्रव्याप्तिलक्षणभङ्गः।। २।।

एतेन ---
मण्युक्तानि-अव्यभिचरितः १ संबन्ध इत्यस्य विवरणरूपाणि तत्राप्यत्यन्ताभआवगर्भाणि तत्रापि धूमजातीयस्य वह्निजातीयेन व्याप्तिरिति मताश्रितानि

प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकान्
ावच्छिन्नं यत्तेन समं ---

-

अथ परोक्तवक्रव्याप्तिलक्षणभङ्गः।। २।।

मण्युक्तानीति।। वक्राणि व्याप्तिलक्षणानि निरस्तानीति वक्ष्यमाणेनान्वयः। तानि
चाव्यभिचारितसंबन्धानौपाधिकसंबन्धस्वाभाविकसंबन्धविवरणरूपतया
त्रैराश्येन निष्कृष्यावान्तरभेदपूर्वमनुवदति।। अव्यभिचरितः संबन्ध इत्यस्येत्यादिना।। तत्रापि वद्विवरणरूपेष्वपि। तत्राप्यत्यन्ताभावगर्भष्वपीत्यर्थः।। धूमजातीयस्य वह्निजातीयेनेति।। पर्वतीयवह्निननेव महानसादिस्थवह्निनापीत्येवं समानाधइकरणव्यधिकरणसर्वधूमवह्निव्यक्तिसाधारणव्याप्तिलक्षणानीत्यर्थ :।।
प्रतियोगीति।। प्रतियोग्यसमानाधिकरणः यच्छब्दनिर्दिष्टसाधनधूमादिरूपसमानाधइकरणो योत्यन्ताभावः घटाद्यत्यन्ताभावः तत्प्रतियोगितामवच्छेदकं घटत्वादिकं तदनवच्छिन्नं तेनाव्यावर्तितं यद्वह्न्यादि तेन येन केनापि सह तस्य धूमादेः सामानाधिकरण्यं संयोगसंबन्धेनैकाधिकणवृत्तित्वं धूमादेर्वह्न्यादिना व्याप्तिरित्यर्थः।

-

१.तसं -क.ग.रा.

-

पक्त-वव्याप्ति-लभङ्गः) व्याप्तिवादः पु - १७.

-

-- सामानाधिकरण्यं व्याप्तिरित्यादीनि, तथा अत्यन्ताभावगर्भेष्वेव --

-

महानसादिवह्नेः पर्वतीयधूमसमानाधिकरणात्यन्ताभावप्रतियोगित्वेपि तत्प्रतियोगिता च वह्नित्वेनावच्छिद्यते। धूमवति वह्निर्नास्तीत्यप्रतीतेः। अनवच्छेदकवह्नित्वेना १ वच्छिन्नमहानसीयवह्निसामानाधिकरण्यस्य पर्वतीयधूमे अभावेपि पर्वतीयवह्निरपि महानसीयवह्निरिव वह्नित्वेनावच्छिन्न इति तत्सामानाधिकरण्यमादाय व्यधिकरणधूमवह्न्योरपि व्याप्तिरित भावः। अत्र यद्यपि पर्वतीयधूमसमानाधिकरणात्यन्ताभावप्रतियोगिता महानसीयवह्निनिष्ठा महानसवह्नित्वेनावच्छिद्यते। पर्वते महानसवह्निर्नास्तीति प्रतीतेः। तथा च न सर्वधूमस्य सर्वेण वह्निना व्याप्तिः सिध्यति। तथापि प्रतियोगितानवच्छेदकावच्छिन्नं यदिति नञ्व्यत्यासेन पक्षधराद्युक्तदिशा व्याख्येयम्। एवं यत्समानाधिकरणेत्यत्रापि यदवच्छिन्नेत्यपि ध्येयम्। तेनायं धूमवान् वह्निमत्वादिति व्याभिचारिणि यत्किंचिन्महानसादिनिष्ठसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधूमत्वावच्छिन्नसामानाधिकरण्यस्य
सत्वाव्द्याप्यतापत्तिर्नेति ध्येयम्। धूमत्वस्य चायोगोलकीयवह्निसमानाधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वात्। एवं तेनेत्यत्र तदवच्छिन्नेन समं तदवच्छिन्नस्येत्यपि व्याख्येयम् । अत एवादिपदप्रयोगः एवंरूपाणां टीकाकृदाद्युत्प्रेक्षितानां परिग्रहाय कृतः। अत्रावच्छेदकत्वं प्रतियोगितानधिकदेशवृत्तित्वं विशेषणताविशेषो वा। न त्ववच्छित्तिप्रत्ययजनकत्वम्। जनकत्वस्य नियमगर्भतया आत्माश्रयापत्तेरिति।

-

१. नानव - ट. ठ.

-

-

समानाधिकणयोरेव धूमाग्निव्यक्तिविशेषयोर्व्याप्तिरिति मताश्रितानि प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगि यन्न भवति तेन समं
समानाधिकरण्यं व्याप्तिरित्यादीनि, तथा प्रतियोग्यसमानाधिकरणेति --

-

अत्र संयोगादिसाध्यकद्रव्यत्वादिनिष्ठव्याप्तावव्याप्तिवारणाय प्रतियोगिसमानाधिकरणेत्यभावविशेषणमिति रुचिदत्तादिः। अयं कपिसंयोगी एतद्वृक्षत्वादित्यस्योपसंग्रायेत्याहतुः पक्षधरशिरोमणी।। समानाधिकरणयोरिति।। पर्वतीधूमस्य पर्वतीयवह्निना महानसादिनिष्ठधूमस्य तत्तनिष्ठवह्निननेवेत्येवंरूपेणेत्यर्थः।। प्रतियोगीति।। प्रतियोग्यसमानाधिकरणपर्वतीयधूमादिसमानाधिकरणो योत्यन्ताभआवः घटाद्यत्यन्ताभावः तत्प्रतियोगि यन्न भवति पर्वतीयवह्न्यादिर्न भवति तेन समं सामानाधिकरण्यं पर्वतीधूमस्य व्याप्तिः। एवं महानसादिधूमस्यापि ध्येयम्। घटो गन्धवान्पृथिवीत्वादित्यादिनिष्ठव्याप्तावव्या १ प्तेः गन्धव्यक्तीनां प्रत्याश्रयं २ भिन्नत्वेन सर्वस्यापि गन्धस्य पृथिवीत्वसमिनाधिकरणात्यन्ताभावप्रतियोगित्वादित्यत आदिपदप्रयोगः। तेन
प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकं यन्न भवति तदवच्छन्नसामानाधिकरण्यमित्यादिटीकाकाराद्युत्प्रेक्षितग्रहः। एवमग्रेपि। अत्यन्ताभावस्याव्याप्यवृत्तित्वेप्यन्योन्याभावस्य व्याव्यवृत्तित्वेन संयोगसाध्यकद्रव्यत्वादिनिष्ठव्याप्तावव्याप्त्यनापत्तेरिति
विशेषणत्यागाल्लघूनीत्युक्तम्।

-

१. प्तिः - ठ.ड. २.यभि-ट.ठ.

-

पक्त-वव्याप्ति-लभङ्गः) व्याप्तिवादः पु - १९.

-

-- विशेषणा १ दानाल्लधून्यन्योन्याभावगर्भाणि यत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यन्न भवति तेन समं तस्य २ सामानाधिकरण्यं व्याप्तिरित्यादीनि, तथा यत्समानाधिकरणान्योन्याभावप्रतियोगि यद्वन्न भवति तेन समं तस्य ३ सामानाधिकरण्यं व्याप्तिरित्यादीनि;

-

समानाधिकरणयोरेव व्याप्तिरिति मताश्रितानीत्यप्यनुकृष्यते। यत्समानाधिकरणेत्यादि।। यदिति साधनं धूमादि। तत्समानाधिकरणो योन्योन्याभावः घटाद्यन्योन्याभावः, न तु वह्निमदन्योन्याभावः, धूमवान्घटादिर्नेतिवद्वह्निमान्नेत्यप्रतीतेः। तत्प्रतियोगितावच्छेदकं यन्न भवति, वह्निर्न भवति। किं तु घटत्वादिकमेव। तेन वह्निना समं धूमस्य सामानाधिकरण्यं व्याप्तिरित्यर्थः। अस्य लक्षणस्य मणावनक्तत्वेपि अत्यन्ताभावगर्भलक्षणे अवच्छेदकघटितस्योक्त्या अन्योन्याभावगर्भलक्षणेप्युक्तप्रायतया तदभिप्रेतत्वादुपन्यासः।।
मणौ कण्ठोक्तमाह--- तथा यदिति।। यद्वा यत्समानाधिकरणान्योन्याभावप्रतियोगि यद्वन्न भवति तेन समं
तस्य सामानाधिकरण्यं वा स्वसमानाधिकरान्योन्याभावप्रतियोगि यद्वन्न भवति तत्कत्वं वेत मण्युक्तलक्षणद्वयस्यापौनरुक्त्याय परिष्कारपूर्वं एवं द्वेधानुवादो बोध्यः। आदिपदेन यत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यदवच्छिन्नं न भवति तदवच्छिन्नेन येन यस्य सामानाधिकरण्यं तयोर्व्याप्तिरित्येवं रूपाणां संभावितानां ग्रहः ।। अनौपाधिकेति।।

-

१.णत्यागाल्ल-क.ट.ग.रा. २.तस्येति नास्ति-ग.रा. ३.तस्येति नास्ति-क.ग.रा.

-

पु - २०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

१ अनौपाधिकसंबन्ध इत्यस्य विवरणरूपाणि तत्रापि साध्यव्यापकेषु साधनाव्यापुकत्वनिषेधपर्यवसितानि यावन्तः साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगिनः
तत्प्रतियोगिकात्यन्ताभावासामानाधिकरण्यं व्याप्तिरित्यादीनि, तथा साधनाव्यापकेषु साध्यव्यापकत्वनिषेधपर्यवसितानि यावन्तः साधनसमानाधिकरणात्यन्ताभावप्रतियोगिनः
तत्प्रतियोगिकात्यन्ताभावसमानाधिकरणसाध्यसामानाधिकरण्यं
व्याप्तिरित्यादीनि;

-

धूमवह्न्यादिसंबन्धस्यानौपाधिकत्वं हि उपाधेस्तत्राभावे भवति साध्यव्यापकसाधनाव्यापकरूपोपाध्यभावश्च साध्यव्यापकानां साधनां २ व्यापकत्वेन वा साधनाव्यापकानां साध्याव्यापकत्वेन वेति द्वेधेति हृदि कृत्वा पक्षधराद्युक्तरीत्याह-- तत्रापीति।। अप्रतियोगिन इत्यन्तस्य साध्यव्यापका इत्यर्थः। प्रमेयत्वाभिधेयत्वादय इति भावः। तत्प्रतियोगिकतेत्यादेस्तव्याप्यत्वमित्यर्थः। धूमादिहेतोरिति योज्यम्। साध्यव्यापकव्याप्यत्वमनौपाधिकत्वमित्येवोक्तावात्माश्रयापत्तेरेवमुक्तिः। एवमग्रेऽपि। व्यभिचारिणि हेतावतिव्याप्तिनिरासाय यावदित्यत्रोत्तरत्र चेति ज्ञेयम्। यावन्त इति। अत्रापि प्रतियोगिन इत्यन्तस्य साधनाव्यापका इत्यर्थः। तत्प्रतियोगिकेत्यादेस्तदव्यापकं यत्साध्यमित्यर्थः।

-

१.तथा इत्यधिकम्-क.ट.ग.रा. २.नव्या-ट.ठ.ड.

-

पक्त-वव्याप्ति-लभङ्गः) व्याप्तिवादः पु - २१.

-

तथा स्वाभाविक १ सम्बन्धो व्याप्तिरित्यस्य विवरणरूपाणि यत्सामानाधिकरण्यावच्छेदकरूपवत्वं यस्य तस्य सा व्याप्तिरित्यादीनि च; साध्यसाधनसामानाधिकरण्यशिरस्कानि वक्राणि व्याप्तिलक्षणानि --- निरस्तानि ।।

उक्तासु वक्ष्यमाणासु च सकललोकसिद्धासु ----

-

मणौ पश्चादुक्तस्य पूर्वमनुवादः पूर्वमुक्तस्य पश्चादनुवादस्तु साध्यव्यापकत्वस्य भावरूपतया पूर्वभावित्वाच्च पश्चात्तनसाधनाव्यापकत्वाभाव एव पूर्वं वाच्यमित्यभिप्राय इत्येके। बोधसौकर्यायेत्यपरे। पश्चात्तनस्य तत्प्रतियोगिताकात्यन्ताभावसमानाधिकरणसाध्यसामानाधिकरण्यपर्यन्तं वक्तव्यत्वादिति।। यत्सामानाधिकरण्येति।। यत्संबन्धितावच्छेदकरूपवत्वं यस्येत्येव मणिपाठस्तथापि यथाश्रुतघटकारणतालक्षणतत्संबन्धितावच्छेदकदण्डत्वावच्छिन्ने दण्डे घटव्याप्यतापत्तिदोषात् तव्याख्यात्रुक्तदिशा यत्सामानाधिकरण्येत्युक्तम्। धूमे वह्निसामानाधिकरण्यावच्छेदकं रूपं धूमत्वं तद्वत्वं धूमस्य व्याप्तिरित्यर्थः।

यत्सामानाधिकरण्यं यस्य तस्य साव्याप्तिरित्युक्तौ व्यभिचारिणोऽपि व्याप्यतापत्तेरवच्छेदकेत्युक्तम्।

चर्चितमेतल्लक्षणमीश्वरस्यानुमानिकत्वभङ्गे कार्यहेतोः प्रतिपक्षोक्तिप्रस्तावे।।

अव्याप्त्यतिव्याप्त्यसंभवैः सर्वलक्षणानि निराह-- उक्तास्विति।। ऊर्ध्वदेशवृष्ट्यधोदेशनदीपूरादिनिष्ठव्याप्तिषु।। वक्ष्यमाणास्विति।।

-

१. कः सं - ग.ट.रा.

-

पु- २२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

व्यधिकरणसाध्यसाधनव्याप्तिषु
आत्माश्रयान्योन्याश्रयचक्रकाश्रयानवस्थाव्याघाताद्यापादकतर्काङ्गभूतासु सामानाधिकरण्यरहितापाद्यापादकव्याप्तिषु व्यातिरेकव्याप्तिषु चाव्याप्तेः। त्वयापि १ व्याप्तित्वेनास्वीकृते नीलधूमस्य वह्निसामानाधिकरण्ये अतिव्याप्तेश्च। न हि नीलधूमवति वह्न्यत्यन्ताभावः।।

-

व्यधिकरणासिद्धेरदोषत्वोक्तिप्रस्तावे वक्ष्यमाणास्वित्यर्थः।। अतिव्याप्तेश्चेति।। नीलधूमादिनिष्ठवह्निसामानाधिकरण्ये त्वदभिमताव्यभिचरितसंबन्धत्वानौपाधिकसंबन्धत्वस्वाभाविकसंबन्धत्वानां सत्वादिति भावः। तदेव व्यनक्ति -- न हीति।। अत्यन्ताभाव इत्युपलक्षणम्। वह्निमदन्योन्याभावो न हित्यपि २ ध्येयम्। नीलधूमनिष्ठवह्निसामानाधिकरण्ये न्यूनवृत्तित्वेन गुरुत्वेन च नीलधूमत्वास्यानवच्छेदकत्वेऽपि धूमत्वस्यावच्छेदकत्वेन वह्निसामानाधिकरण्यावच्छेदकरूपवत्वस्यापि तत्र सत्वात्। ननु धूमत्वावच्छिन्नवह्निसामानाधिकरण्यं नीलधूमनिष्ठमपि व्याप्तित्वेनोपेयते। नीलधूमत्वावच्छिन्ने सामानाधिकरण्यमेव व्याप्तित्वेन नोपेयते। अवच्छेदकान्तरोपपन्नव्याप्यताश्रयवृत्तित्वेन
नीलधूमत्वस्यानवच्छेदकत्वादिति चेत्। अस्त्वेवं तथापि लक्षणान्तरे अतिव्याप्तेरनिवारणात्।।
ननु यथाश्रुते प्रतियोग्यसमानाधिकरणेत्यादिलक्षणेपि नीलधूमसमानाधिकरणात्यन्ताभावप्रतियोगितायां

तुषजन्यादिवह्निविशेषत्वेनावच्छिन्नत्वान्नातिव्याप्तिरिति मन्वानं प्रत्याह--किंचेति।।

-

१.अपि इत्यधिकम्-ग.रा. २.द्रष्टव्यम्-ट.ठ.

-

पक्त-वव्याप्ति-लभङ्गः) व्याप्तिवादः पु - २३.

-

किंच महानसीयवह्नेः पर्वतीयधूमसमानाधिकरणात्यन्ताभावप्रतयोगितावच्छेदकेन महानसीयवह्नित्वेनावच्छिन्नत्वादसंभवः। प्रतियोगितानवच्छेदकावच्छिन्नेति नञ्व्यत्यासे च धूमरूपसाध्यस्यापि वह्निसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकेन प्रमेयत्वेनावच्छिन्नत्वात् तत्समानाधिकरणवह्निरपि धूमव्याप्यः स्यात्।।

-

अवच्छिन्नत्वादिति।। तथाच तादृशाभावप्रतियोगितावच्छेदकानवच्छिन्नेन सामानाधिकरण्यं नास्ति। किं तु अवच्छिन्नेनैव तदस्तीति भावः। ननु महानसीयवह्नेस्तादृशधर्मावच्छन्नत्वेपि पर्वतीयवह्नेर्महनसीयवह्नित्वेनानवच्छिन्नत्वात्। तत्सामानाधिकरण्यमादाय पर्वतीयधूमस्य व्याप्यता स्यादेवेति चेन्न। पर्वतीयधूममासमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नवह्निस्ाामानाधिकरण्यमेव महानसीयधूमस्य, तथा महानसीयधूमसामानाधिकररणाभावप्रतियोगितावच्छेदकं पर्वतीयवह्नित्वमिति तदवच्छिन्नसामानाधिकरण्यमेव पर्वतीयधूमस्येत्येवं सर्वधूमेष्विति, न क्वाप्युक्तरूपाभावप्रतियोगितावच्छेदकानवच्छिन्नसामानाधिकरण्यं धूमस्य लभ्यत इत्यसंभव इति तात्पर्यात्। नव्यञ्त्यासेन

प्रतियोगितानवच्छएदकावच्छिन्नत्वमर्थ इति पक्षधरोक्तमनूद्य निराह-- प्रतियोगितेति।। धूमरूप १ साध्यस्येति।। धूमाख्यसाध्यस्येत्यर्थः। अयं धूमवान् वह्निमत्वादिति व्यभिचारिप्रयोगे हेतुभूतवह्निसमानाधिकरणात्यन्ताभावप्रतियोगितायां न प्रमेयत्वमवच्छेदकं वह्निमतिप्रमेयं नास्तीत्यप्रतीतेः। तथाच तदवच्छिन्नधूमरूपसाध्यसामानाधिकरण्यं वह्नेरप्यस्तीति सोपि व्याप्यः स्यादित्यर्थः।।

-

१.साध्यपदं न -ट.ठ.ड.

-

पु -२४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

किंच यस्य यदत्यन्ताभावासमानाधिकरणत्वे सति येन सामानाधिकरण्यं तेन तस्य सा व्याप्तिरित्येवास्तु। लाघवात्। न च केवलान्वयिनि साध्यात्यन्ताभाव २ स्याप्रसिद्ध्याव्याप्तिः।

-

ननु प्रमेयत्वेन रूपेण धूमादिसाध्यव्याप्यता वह्नेरस्त्येव। अयं प्रमेयवान् वह्निमत्वादित्येवंरूपत्वात्तस्य प्रमेयत्वपदेन प्रमेयधूमत्वविवक्षायामवच्छेदकत्वस्येहानतिप्रसक्तवृत्तित्वरूपत्वेन प्रमेयधूमत्वस्यापि उक्तरूपाभावप्रतियोगितावच्छेदकत्वात्। महानसीयवह्निविशेषमादाय प्रमेयधूमत्वस्योक्तरूपाभावप्रतियोगितानवच्छेदकत्वेपि यदीत्यत्र यदवच्छिन्नेति विवक्षायामयोगोलकीयवह्निमादाय वह्नित्वावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगिप्रतियोगितावच्छेदकत्वं प्रमेयधूमत्वेप्यस्तीत्युक्तप्रतियोगितानवच्छेदकावच्छिन्नसामानाधिकरण्यं व्यभिचारिणि वह्नौ नास्तीति वक्तारं प्रत्याह-- किं च यस्येति।। यस्य

धूमादेः। यदत्यन्तेति।। वह्न्याद्यत्यन्ताभावेत्यर्थः। येन -- वह्न्यादिना। सामानाधिकरण्यं यस्येत्यनुकर्षः। तस्य धूमादेः। तेन वह्न्यादिना। व्याप्तिरित्यर्थः। लाघवादिति।। अनवच्छेदकावच्छिन्नेत्यादिविशेषणा ३ दानात् अव्यभिचरितसामानाधिकरण्यरूपत्वादस्येति भावः। न च प्रतियोग्यसमानाधिकरणेत्यनुक्तौ संयोगसाध्यकहेतुनिष्ठव्याप्तावव्याप्तिः। संयोगस्य व्याप्यवृत्तित्वेन तदभावस्याप्यैकाधिकरण्याभावादिति भावः।।

-

१.'तस्य तेन व्याप्ति' इत्यस्ति-ट.ग.रा. २.वाप-ट.ग.रा. ३.णानुपादानात्-ठ.

-

पक्त-वव्याप्ति-लभङ्गः) व्याप्तिवादः पु- २५,

-

अत्यन्ताभावस्याभावादेव तत्सामानाधिकरण्याभावस्य शुक्तिरूप्यतादात्म्याभावस्येव
सुतरां सिद्धेः। उक्तं चैतद्योग्ताप्रस्तावे।।
किंचात्राधिकरणं देश एव वा काल एव वा उभयं वा उभयानुगतमधिकरणसामान्यं वा। नाद्यः। कालिक्यां गोत्वाश्वत्वव्याप्तावव्याप्तेः। अस्ति हि तयोरपि यदा गोत्वं तदाश्वत्वमिति व्याप्तिः। न द्वितीयः। दैशिक्यां पाकपाकजरूपादिव्याप्तावव्याप्तेः। अस्ति हि तयोरपि १ यत्रपाकजं रूपं तत्र पाक इति व्याप्तिः। न तृतीयः। अस्य रूपरसादिव्याप्तितोऽन्यत्र सर्वत्राव्याप्तेः। न चतुर्थः। गोत्वरूपहेतुं प्रति देशरूपाधिकरणे गव्यश्वत्वाभावेन तद्व्याप्तावव्याप्तेः। द्वैशिक्यां व्याप्तौ देशोधिकरणं कालिक्यां काल इति चेत् न। अननुगमात्।

-

सदुपरागेणासदेव तादात्म्यं भातीति मतावष्टम्भेनाह-- शुक्तिरूप्यतादात्म्येति।। एतदिति।। अप्रामाणिकस्याप्यभावप्रतियोगित्वम्।

रूपरसादिव्याप्तितोन्यत्रेति।। कृत्तिकोदयरोहिण्युदय २ नदीपूरवृष्ट्यादिगोत्वाश्वत्व(पाक)पाकजरूपादिस्थले च सर्वत्रेत्यर्थः।। गोत्वरूपेति।। अयमश्वत्ववान् गोत्ववत्वात् इत्यादिहेतावत्यर्थः। गत्यन्तराभावादेव --

-

१.तयोरपीति नास्ति -क.ट. २.यासत्ति-ठ.

-

पु -२६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

व्याप्तेरिदानीमेव निरुच्यमानत्वेनात्माश्रयाच्च। कृत्तिकोदयरोहिण्युदयासत्त्योरपि कालतः सामानाधिकण्यसत्वेन तत्र वैयधिकरण्योक्त्ययोगाच्च। मदुक्तरीत्यानुगमसंभवाच्च।।

किंच त्वन्मतेपि नित्यद्रव्याणां निरधिकरणत्वात्तेषां यदाकाशः तदा १ नित्यद्रव्यमिति व्याप्तिर्न स्यात्।।

ननु काल आकाशादेरधिकरणं आकाशः सदा २ स्तीत्यबाधितप्रतीतेरपि चेत्। तर्हि गगनात्यन्ताभावः केवलान्वयी न स्यात्। किं च सर्वत्राकाश इत्यपि प्रततीतेर्देशोप्याकाशाधिकरणं स्यात्।।

ननु -- स्वरूपसंबन्धेनाकाशः सदा सर्वत्रास्ति समवायवृत्त्या तु नास्तीति तया वृत्या ३ रूपादेः प्रमेयत्वादेश्चात्यन्ताभावोपि केवलान्वयी स्यात्।

-

-- मा ४ श्रयते इत्यत आह-- मदुक्तेति।। यद्देशकालसंबन्धस्य यस्येत्यादिना पूर्ववादे मदुक्तरीत्येर्थः।।

सामानाधिकरण्यघटितव्याप्तिलक्षणेषु स्थलान्तरेऽव्याप्तिमाह-- किंचेति।। केवलान्वय्यभाप्रतियोगित्वं सदा सर्वत्र सत्वं च संबन्धभेदेन युक्तिमित्याशङ्क्य प्रतिबन्द्या निराह-- नन्वित्यादिना।।

-

१.कालीदिरिति व्या-ट. दिगिति व्या-ग.रा. २.अपि पदं मधिकम्-ग.ट. ३.त्या गगनात्यन्ताभावः केवलान्वयीति चेत्। तर्हि रूपादिकं प्रमेयत्वादिकं च संयोगवृत्या कुत्रापि नेति तया वृत्या रूपादेः प्रमेयत्वादेश्चात्यन्ताभावोपि केवलान्वयी स्यात्। गगनात्यन्ताभावोपि स्वरूपसंबन्धेनैव सर्वत्रास्ति। न तु संयोगादिवृत्त्येति गगनात्य- क.ट.ग. ४.श्रीय-ठ.ड.

-

पक्त-वव्याप्ति-लभङ्गः) व्याप्तिवादः पु- २७.

-

गगनात्यन्ताभावोपि स्वरूपसंबन्धेनैव सर्वत्रास्ति न तु संयोगादिवृत्त्येति गगनात्यन्ताभावात्यन्ताभावरूपं गगनमपि केवलान्वयि स्यात्।।

अपि च प्रतियोगिसमानाधिकरणेति विशेषणं व्यार्थम्। संयोगतदत्यन्ताभावयोर्भिन्नावयववृत्तित्वस्यान्यत्रोक्तत्वात्।।

किञ्च प्रतियोगित्वस्य त्वन्मते स्वरूपसंबन्धरूपत्वात्तस्य च व्याप्तिरूपनियमगर्भितविशिष्टप्रतीतिजनकत्वगर्भितत्वात्माश्रयः।।

अपि चैवं समानाधिकरणसाधअयसाधनव्यक्तिविशेषयोरेव व्याप्तिरिति मते पृथिवीत्वस्य गन्धं प्रति व्याप्यत्वं न स्यात्। सर्वस्यापि गन्धस्य प्रत्येकं पृथिवीत्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वात्। नहि पृथिवीत्वमिवैकैव गन्धव्यक्तिः सर्वपृथिवी निष्ठाः।।

-

अन्यत्रेति।। चन्द्रिकायां तत्वविवेकादिप्रकरणे वैशेषिकाधिकणसुधायां चेत्यर्थः। व्याप्तिरूपनियमगर्भितेति जनकत्वविशेषणम्। नियमपूर्ववृत्तित्वरूपत्वात् जनकत्वस्येति भावः।।

प्रथमलक्षणं निरस्य द्वितीयलक्षं च निराह-- अपिचैवमिति।। ननु तादृशात्यन्ताभावप्रतियोगितावच्छेदकं यन्न भवति तदवच्छिन्नसामानाधिकरण्यं लक्षणार्थः। भवति च गन्धत्वमनवच्छेदकं

पृथिवीगन्धवती नेत्यप्रतीतेरितिचेत्तर्हि पूर्वलक्षणाभेद एव।। कथंचिद्भेदभिमाने तु तुष्यतु दुर्जन इति न्यायेन दोषान्तरमाह-- अपि च गोत्वस्येति।।

-

पु- २८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

अपि च गोत्वस्य गोव्यक्तिं प्रति कालिकी व्याप्तिः स्यात्। गोत्ववति प्रलयकाले गोव्यक्तिध्वंसस्य सत्वेपि गोव्यक्त्यन्ताभावाभावात्। एवं पृथिवीत्वस्य गन्धेन सह कालिकी व्याप्तिः स्यात्। गन्धोत्पत्तेः प्राग्गन्धाभावस्य १ सत्वेपि गन्धात्यन्ताभावाभावात्।।
न चात्यन्ताभावपदेन विरोध्यभावमात्रं विवक्षितम्, ध्वंसप्रागभावौ च कालतः प्रतियोगिविरुद्धाविति वाच्यम्। तथात्वे प्रतियोग्यसमानाधिकरणपदवैयर्थ्यात्। नच गोव्यक्तेः क्विचिदत्यन्ताभावस्तावदस्ति। तथात्वे हि गोत्वस्याश्वत्वं प्रत्यपि कालिकी व्याप्तिर्न स्यात्।

-

पक्षधराद्युक्तानूद्य निराह-- न चात्यन्ताभावेति।। कालत ३ इति।। एककाले। वैयर्थादिति।। संयोगात्यन्ताभावस्य संयोगाविरुद्धत्वेन यत्समानाधिकरणप्रतियोगिविरोध्यभावप्रतियोगितानवच्छेदकेत्याद्युक्तौ संयोगसाध्यकद्रव्यत्वादिनिष्ठव्याप्तावव्याप्त्यनापत्तेरिति भावः। यदुक्तं गोत्वस्य गोव्यक्तिं प्रतीत्यादि तन्न। तस्य गोव्यक्त्य ४ न्तराभावसमानाधइकरणत्वादित्याशङ्क्य निराह-- न च गोव्यक्तेरिति।। कालिकीति।। यदा गोत्वं तदाश्वत्वमिति कालिकीत्यर्थः। तद्व्यनक्ति क्वचिदिति।।

-

१.न्धप्रागभावस्य -क.ट.ग.रा. २.स च -ट.ग. ३.ल इ-ठ.ड. ४.त्यन्ताभाव-ट.ठ.ड.

-

पक्त-वव्याप्ति-लभङ्गः) व्याप्तिवादः पु - २९.

-

क्वचिद्देशे सतोऽश्वत्वा १ भावस्यापि काले सत्वात्।।

किञ्च धूमोपि वह्निव्याप्यो न स्यात्। वह्नेः समवायवृत्याधूमसमानाधिकरणात्यन्ताभावप्रतियोगित्वात्।।

न च साध्यस्य व्याप्तिशरीरान्तर्गतया वृत्या साधनसमानाधिकरणात्यन्ताभावा २ प्रतियोगित्वं विवक्षितम्, धूमाग्न्योश्च संयोगवृत्यैव व्याप्तिरिति वाच्यम्। व्याप्तेरिदानीमेव निरुच्यमानत्वेनात्माश्रयात्।।

न च समवायवृत्या वह्न्यत्यन्ताभावस्य संयोगवृत्या वह्निसमानाधिकरणतया प्रतियोगिव्यधिकरणपदेनैव तन्निरास इति वाच्यम्। येन हि सम्बन्धेन यत्र हि ३ प्रतियोगिनो भावः तेनैव सम्बन्धेन तत्र प्रतियोगिनोऽवृत्तिरेव हि प्रतियोगिवैयधिकरण्यम्।

-

यत्तु तदाश्वत्थात्यन्ताभावस्य काले सत्वेपि तस्य प्रतियोगिसमानाधिकरणत्वात् प्रतियोगिव्यधिकरणपदेन तन्निरास इति तन्न। येन हि संबन्धेनेत्यादिवक्ष्यमाणदिशा तस्यापि प्रतियोगिव्यधिकरणत्वाद्व्य ४ क्त्यन्तराभावस्यापि व्यक्तिदशायां प्रतियोगिसमानाधिकरणत्वेनोक्तदोषापरिहाराच्च ।।

पक्षधाद्युक्तमाशङ्कते -- न च साध्यस्येति।। ननु -- मास्तु व्याप्तिशरीरेत्यादिविवक्षा । ५ अथापि समवायवतृत्या वह्न्यभावसमानाधिकरण्येन धूमस्याव्याप्यतापत्तिर्नेत्याशङ्क्य निराह -- न च समवायेति।।

-

१.त्वात्यन्ता-ट.ग.रा. २.वप्र-क.ट. ३. हि र्न -ग.रा.ट. ४.व्यक्त्यत्यन्ता-ट.ठ.ड. ५.अथापि इति नास्ति-ट.ठ.

-

पु - ३०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

सम्बन्धेन तत्र प्रतियोगिनोऽवृत्तिरेव हि प्रतियोगिवैयधिकरण्यम्। अन्यथा काले सर्वाभावानां प्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणा १ सिद्धेः।।

किं च प्रतयोगिव्यधिकरणपदेन यत्किंचित्प्रतियोगिव्यधिकरणत्वं विवक्षितम्

यावत्प्रतियोगिव्यधिकरणत्वम्। नाद्यः। अयं संयोगविशेषाभाववान् द्रव्यत्वादिति सदनुमानाव्याप्तेः। साध्याभावरूपस्य संयोगस्य स्वप्रतियोगिभूतसंयोगसामान्याभावव्यधिकरणत्वात्। नान्त्यः। अयं संयोगसामान्याभाववान् द्रव्यत्वादित्यसदनुमानेऽति व्याप्तेः। साध्याभावरूपस्य संयोगस्य संयोगविशेषाभावप्रतियोगिसामानाधिकरण्येन यावत्प्रतियोगिव्यधिकरणत्वाभावात्।।

२ यच्चोक्तमन्योन्याभावगर्भलक्षणेषु प्रतियोग्यसमानाधिकरणेति विशेषणत्यागाल्लाघवमिति। तन्न। संयोगात्यन्ताभावस्याव्याप्यवृत्तित्वे ३ न संयुक्तान्योन्याभावस्यापि तत्वावश्यं भावात्।

-

प्रतियोगिनोवृत्तिरित्यत्र प्रतियोगिनो अवृत्तिरितिपदविभागः। समवायसंबन्धेन च वह्नेरवर्तनात् प्रागुक्तदोषः सुस्थ एवेति भावः। एवमत्यन्ताभावगर्भलक्षणं निरस्यान्योन्याभावगर्भं च निराह--यच्चोक्तमिति।।

-

१.णाप्रसि-क.ग.ट. २.किंचेत्यादिकं नास्ति-ट.ग.रा. ३.त्वे सं- ग.ठ.रा.

-

पक्त-वव्याप्ति-लभङ्गः) व्याप्तिवादः पु - ३१.

-

मूले कपिसंयोगो नेतिवत् मूले वृक्षः कपिसंयुक्तो नेत्यबाधितप्रतीतेः। न चेयं धीः संयोगाभावविषया। घटः पटो नेतिवत्तादात्म्यनिषेधरूपत्वात्। अन्यथान्योन्याभावोच्छेदः स्यात्। विरोधस्य च संयोगतदत्यन्ताभावयोरिवावच्छेदकभेदेन परिहारात्।।

ननु -- यः संयोगाभाववान्वृक्षः स एव संयुक्त इति प्रत्यभिज्ञाविरोध इति चेन्न। प्रत्यभिज्ञा हि किमभेदं विधत्ते किं वा भेदं निषेधति। नाद्यः। एतद्वृक्षत्वेन तयोरभेदस्यापि सत्वात्। नान्त्यः। मूले संयुक्तो नेति भेदधीविरोधेन तन्निषेधायोगात्। १ मूले संयुक्तान्योन्याभावो ----

-

अत्यन्ताभाप्रतीतिं दृष्टान्तयति-- नेतिवदिति।। नास्तीतिवदित्यर्थः। अन्योन्याभावोच्छेद इति।। घटः पटो नेत्यादिषु सर्वत्र घटे पटत्वात्यन्ताभावविषयकत्वेनोपपत्तेः सुवचत्वादिति भावः। नन्वेकस्मिन्नेव वृक्षे संयुक्ताभेदः संयुक्तभेदश्च कथं विरोधादित्यत आह-- विरोधस्य चेति। यथाग्रावच्छेदेन वृक्षे कपिसंयोगो मूलावच्छेदेन तदत्यन्ताभावः एवमग्रावच्छेदेन संयुक्तवृक्षाभेदो मूलावच्छेदेन भेद इत्युपपत्तेरित्यर्थः।।

अन्योन्याभावस्याव्याप्यवृत्तित्वे बाधकशङ्कते-- नन्विति।। तयोरिति ।। संयोगाभाववतः संयुक्तस्य चेत्यर्थः।

अन्योन्याभावस्याप्यव्याप्यवृत्तित्वाभावे बाधकमाह-- किंच मूल इति।।

अनुमितिज्ञानपर्यालोचनयाप्यस्मदुक्तव्याप्तिज्ञानमेव कारणं न त्वदुक्तमतोपि न त्वदुक्तव्याप्तिलक्षणं युक्तमित्याह -- किंचानुमतीति।।

-

१.किं चेत्यधिकम्-क. ग. रा.

-

-

-- न चेन्मूले संयुक्तान्योन्याभावात्यन्ताभावरूपो यः १ संयोगस्तद्धीश्च स्यात्।

त्वन्मतेन्योन्याभावात्यन्ताभावस्यान्योन्याभावप्रतियोगितावच्छेदकधर्मरूपत्वात्। प्रकते च संयोगस्य तदवच्छेदकत्वात्।।

किं चानुमितिहेतुः किमत्यन्ताभावादिगर्भाणामुक्तसर्वव्याप्तीनां ज्ञानं किं वा लध्व्या अन्योन्याभावगर्भाया एव ज्ञानं यद्वा कदाचित्क २ स्यचिज्ज्ञानम्। नाद्यः। एकैकज्ञानेप्यनुमितिदर्शनात्। न द्वितीयः।

अत्यन्ताभावगर्भव्याप्तिज्ञानेप्यनुमितिदर्शनात्। अन्योन्याभावपक्षे लाघवस्य निरासाच्च। न तृतीयः अननुगमात्। अनुपपद्यमानज्ञानत्वेन क्रोडीकारे चावश्यकत्वाल्लाघवाच्चानुपपत्तिरेव व्याप्तिरस्त्विति दिक्।।

-

ननु -- अत्यन्ताभावगर्भव्याप्तिज्ञानेनानुमितिदृष्टावपि लाघवादन्योन्याभावगर्भव्याप्तिज्ञानमेव हेतुः। भूयोदर्शनवादे मणिकृता तथैवोक्तेरित्यत आह-- अन्योन्याभावेति।। अन्योन्याभावस्याव्याप्यवृत्तित्वत्वोक्त्या प्रतियोगिसमानाधिकरणेति तत्राप्यवश्यं वाच्यत्वादिति भावः।।

इति दिगिति।। अयं भावः।। अनौपाधिक ३ संबन्धत्वस्य द्वेधा विवरणं यत्कृतं तत्र साध्यव्यापकव्याप्यत्वपर्यवसितानौपाधिकरत्वज्ञानमनुमितिहेतुरुत

-

१.यः इति नास्ति-क.ट.रा. २.स्याश्चि-ग.क.ट.रा. ३.धिकत्वस्य द्वेधा-ड. कसंबन्धत्वस्य द्वे -ठ.

-

पक्त-वव्याप्ति-लभङ्गः) व्याप्तिवादः पु - ३३.

-

तस्मात्परोक्तव्याप्तिलक्षणानां
अधोदेशनदीपूरोर्ध्वदेशवृष्ट्यादिव्याप्तिष्वात्माश्रयादितर्काङ्गव्याप्तुषु
व्यतिरेकव्याप्तिषु चाव्याप्तिः --

-

-- साधनाव्यापकव्याप्यसाध्यकत्व १ पर्यवसितमनौपाधिकत्वज्ञानमथोभयं कदाचित् किंचिच्ज्ञानमिति वा। नाद्यत्रयं युक्तम्। यत्किञ्चिज्ज्ञानादप्यनुमितिदर्शनात्। न चतुर्थः। अननुगमात्। किंच सर्वत्रापि सामानाधिकरण्यंनाम समानेनाधिकरणेन संबन्धः। संबन्धत्वं च विशिष्टधीनियामकत्वम्। नियामकत्वं च विशिष्टधीजनक्वेसत्यविशिष्टज्ञानजनकत्वम्। जनकत्वं चानन्यथासिद्धनियतपूर्ववृत्तित्वमित्यात्माश्रयापत्तिः। नच नियामकत्वं संसर्गविधयैव संबन्धविशेष्यकं संबन्धविशेषणकं वा व्याप्तिज्ञानहेतुरिति वाच्यम्। अन्यथा सामानाधिकरण्यसंदेहप्रतिबन्धकत्वानुपपत्तेः। तथा च संबन्धत्वं प्रकार एवेत्यवश्यं वाच्यत्वेनात्माश्रयापरिहारात्। यत्तु विशिष्टधीनियामकत्वरूपसंबन्धत्वस्य प्रकारत्वेन भानावश्यंभावस्तदापि संयोगत्वादिना रूपेणैव भानमिति। तन्न तथात्वेऽननुगगमापत्तेः। समवायत्वेन भावस्थले समवायत्वस्यापि नित्यसंबन्धत्वरूपत्वेनात्माश्रयानिरासाश्च।
किंचावच्छेदकत्वमप्यवच्छिन्नप्रत्ययजनकत्वं चेदात्माश्रयाद्ययापत्तिः। अन्यीनानतिरिक्तवृत्तित्वं चेत् धूमस्यापि वह्निसामानाधिकरण्यन्यूनवृत्तित्वादन्त्यलक्षणमलक्षणं स्यात्। इत्यादिरूपेण तदभिमतलक्षणानि सर्वाण्यपि दूष्याणीति।।

तस्मादिति।। दोषाणां सम्यगुपपादितत्वादिति वा अपरिहार्यत्वादिति वार्थः। परोक्तवक्रव्याप्तिलक्षणानां चतुर्दशदोषा इत्यनेनान्वयः। उक्तान्दोषान् सङ्ग्रहेणानुवदति-- अधो देशेति।।

१.ध्यव्यापकत्वप-ड. साध्यपदं विहाय -'काव्यापकत्वपर्य' -ट.

-

पु - ३४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

पररीत्या नीलधूमस्य वह्निसामानाधिकरण्येतिव्याप्तिः, महानसीयवह्नेः पर्वतीयधूमव्याप्त्यादावभावेनासंभःष गौरवम्, अननुगमः, आत्माश्रयादिकम्, यदा आकाशः तदा दिगित्यादिव्याप्तावव्याप्तिः, विशेषणवैयर्थ्यम्, आत्माश्रयः, पृथिवीत्वस्य गन्धेन सह व्याप्तावव्याप्तिः, गोत्वस्य गोव्यक्त्या पृथिवीत्वस्य गन्धेन १ संबन्धेऽतिव्याप्तिः, आत्माश्रयः, अन्योन्याभावगर्भलक्षणे परोक्तलाघायोगः, अननुगमः; इति चतुर्दश दोषाः।।
इति परोक्तवक्रव्याप्तिलक्षणभङ्गः।। २।।

पररीत्येति।। सिद्धान्ते तत्रापि व्याप्यत्वाङ्गीकारादिति भावः। इत्येवास्तु लाघवादित्युक्तदोषं तात्पर्यतोऽनुवदति -- गौरवमिति।।
परोक्तवक्रव्याप्तिलक्षणभङ्गः।। २।।

-

खक्त-व्यानियानु-क्तिभङ्गः) व्याप्तिवादः पु - ३५.

अथ खण्डनोक्तव्याप्तिनिश्चयानुपपत्तिभङ्गः।। ३।।

व्याप्तिग्रहोपायस्तु पदशक्ति १ प्रस्तावे दर्शितः।
ननु तर्कं विना व्याप्त्यग्रहात्तर्कस्य च व्याप्तिधीसापेक्षत्वादनवस्थेति चेत्। अत्र केचित् -- यत्राप्तवाक्येन व्याप्तिर्न तत्र तर्कापेक्षा। न च तत्र व्याप्तिनिश्चयोऽनुमानादेवेति वाच्यम्। पित्रादौ स्वतः सिद्धश्रद्धयानाप्तत्वशङ्कानुदयात्। प्रात्यक्षिकी व्याप्तिधीपरंपराप्यनत्तोत्रैव विश्राम्यतीत्याहुः।।

-

अथ खण्डनोक्तव्याप्तिनिश्चयानुपपत्तिभङ्गः।।३।।

नन्वस्तु भवदुक्तैर्वानुपपत्तिरूपा व्याप्तिर्न तु परोक्ता। तद्ग्रहोपायस्तु न संभवति। अनुगतजातेर्निरासेन सामान्यप्रत्यासत्तेरभावादित्यत आह-- व्याप्तीति।। सादृश्यादिना तदग्रहस्योपपादितत्वादिति भावः। २ खण्डनोक्तां व्याप्तिग्रहनुपपत्तिं निरसितुमाशङ्कते -- नन्विति।। तर्कं विना व्याप्त्यग्रहादिति।। अनिष्टप्रसञ्जनरूपतर्काभावे व्यभिचारादिशङ्कया प्रतिबन्धेन व्याप्त्यनिश्चयादित्यर्थः। अत्रैव विश्राम्यतीति।। आप्तवाक्यजन्यव्याप्तिधियामेवेत्यर्थः। अत्रारुचिबीजं तु श्रद्धया सिद्धत्वेपि न्यायतोनुपपादितत्वे न्यायासाध्ये निःशङ्कप्रवृत्तेरयोगात् तदर्थं न्यायानुसंधाने स्यादेवानवस्थेत्येवं ज्ञेयम्।। अनादीति।।

-

१.क्तिग्रह-ट.रा. ग्रहण-ग. २.मण्ड-ठ.ड.

-

पु-३६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

अपिचानादिसिद्धकार्यकारण १ मूलाः केचन तर्काः। न चात्र देहात्मत्वादाविव बाधोस्तीति न तत्र तर्का २ पेक्षा। ३ यत्रापि

जन्मान्तरानुभूतव्याप्तिस्मृतिहेतुः न तत्र तर्कापेक्षा। इतरापि व्याप्तिधीरन्ततोत्रैव पर्यवस्यतीत्यस्तु। किंच या निर्दोषश्रुत्या नर्दोषज्ञानरूपसाक्षिणा वा सिद्धाव्याप्तिर्न तत्र तर्कापेक्षा।

-

अनादिसिद्धत्वेन ज्ञाता निःशङ्कमवगम्यमानाः ये कार्यकारणभावाः तन्मूलाः केचन तर्का बीजाभावे अङ्कुराभाव इत्यादयः इत्यर्थः। देहात्मत्वादाविति।। तत्र युक्त्यादिबाधो यथा न तथानादिसिद्धकार्यकारणभावमूलतर्केष्वस्तीति न तत्र तर्कापेक्षेत्यर्थः।।
नन्वयं पक्षः मणावेव कार्यकारणभावादेरनादिसिद्धत्वेपि तत्र प्रमाणानुसारणेऽनुमान एव पर्यवसानादनवस्थैवेति दूषित इत्यतः पक्षान्तरमाह-- किंचेति।। यस्तर्को व्याप्त्यनुभवमूलकस्तत्र तर्कान्तरापेक्षायामपि
व्याप्तिस्मृतिमूलतर्के न तर्कान्तरापेक्षेति नानवस्थेत्यर्थः। हेतुरिति।। तर्कस्येति योज्यम्। व्याप्त्यनुभवमूलतर्के का गतिरित्यत आह-- इतरापीति।। अनुभवरूपव्याप्तिधीरपीत्यर्थः। नन्वयमपि पक्षः स्तन्यपानादावनवस्थोद्धारोपि बह्वनिधूमयोर्व्याप्तौ गृह्यमाणायामनवस्थेति पक्षधरादौ दूषित इति चेन्न। अन्ततोप्यत्रैव सर्वापि व्याप्तिधीः
पर्यवस्यतीत्युक्तत्वेनादोषत्वात्।।
पक्षान्तरं चाह-- किंच येति।। श्रुत्येति ।। ब्राह्मणो न हन्तव्यः। गौः न पदा स्पृष्टव्येत्यादौ यो ब्राह्मणः स न हन्तव्य इत्यादिव्याप्तिः श्रुतिसिद्धा।

-

१.णाभावमू-- ट.ग.रा. २.र्कान्तरापे-उ.ट.रा. ३.किंचेत्यधिकम्-ट. क.ग.रा.

-

खक्त-व्यानियानु-त्तिभङ्गः) व्याप्तिवादः पु-३७.

-

अन्यापि व्याप्तिधीरत्रैव विश्राम्यतीति नानवस्था। उक्तं हि --
'न परीक्षानवस्थास्यात्साक्षिसिद्धे त्वसंशयादि'ति।।
अपिच न तर्कः साक्षाद्व्याप्तिग्राहकः। भूयोदर्शनव्यभिचारादर्शनसहकृतप्रत्यक्षेणैव तद्ग्रहात्। यातु व्याप्तिग्राहिणः प्रत्यक्षस्य भूयोदर्शनव्यभिचारादर्शनोपाधअयभावनिश्चयाः सहकारिण इति पद्धतौ उपाध्यभावनिश्चयस्य सहकारित्वोक्तिः सोपाधिशङ्कास्थलाभिप्राया न तु सार्वत्रिकाभिप्राया। अन्यथोपाध्यभावनिश्चयस्य व्याप्तिसापेक्षतर्काधीनत्वेनानवस्थापातात्। पद्धतावेव तर्कस्य क्वाचित्कत्वोक्तेश्च।

-

यज्जलपानं तत्सुखसाधनमित्यादिव्याप्तिः साक्षिसिद्धा । श्रुत्याद्यन्यस्थलीयव्याप्तिधीः कथमित्यत आह-- अन्यापीति।। उक्तंहीति।। ज्ञानपादीयानुव्याख्याने । परीक्षा नाम तर्क एव।।
सर्वव्याप्तिधियस्तत्रैव पर्यवसानं विवादिनं प्रति भूयोदर्शनवादे मणौ सिद्धान्तितं पक्षमुपेत्याह-- अपि चेति।। न साक्षाव्द्याप्तिग्राहक इत्यस्य किंत्वत्यनेनान्वयः। किं तर्हि साक्षाव्द्याप्तिग्राहकमित्यत आह-- भूयोदर्शनेति।। बहुषु स्थलेषु साध्यसाधनयोः सहचारदर्शन १ त्यर्थः। व्यभिचारेति।। हेतोः साध्याभावसंबन्धादर्शनेत्यर्थः।

-

१. नेने -ड.

-

पु- ३८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

पार्थिवत्वलोहलेख्यत्वयोस्तु वज्र एव व्यभिचारदर्शनात्तदग्रहः। उक्तं हि --
'अदृष्टे व्यभिचारे तु साधकं तदिति स्फुटम्।
ज्ञायते साक्षिणावाद्धा मानाबाधे न तद्भवेत्'।।

इति। किंतु व्यभिचारशङ्कानिवृत्तिद्वारा। शङ्का तु क्वचित्कैव। सा च क्विचित्केन १ तर्केण निरस्यत इति न २ तत्र तर्कापेक्षा । ननु तर्कानवतारे विशेषादर्शनस्य सर्वत्र सत्वात् --
'सर्वत्र शङ्कया भाव्यं नियामकमपश्यताम्' ।
-
प्रत्यक्षेण -- चक्षुरादिना। नन्वेवं यत्पार्थिवं तल्लोहलेख्यमिति बहुषु स्थलेषु सहचारदर्शनाव्यभिचारादर्शनाच्च व्याप्तिग्रहः स्यादित्यत आह -- पार्थिवत्वेति।। वज्रे-- वज्रमाणौ।। उक्तं हीति।। भक्तिपादीयानुव्याख्याने व्यभिचारादर्शनादिसहकृतं प्रत्यक्षं व्याप्तिनिश्चायकमित्येतदुक्तमित्यर्थः। तुरवधारणे।। तल्लिङ्गं धूमादिकं वह्न्यादिसाध्यव्यभिचारेद्धा सर्वथाप्यदृष्ट एव सति तस्य वह्नेः साधकं व्याप्यं न तु व्यभिचारदर्शने ३ प्रमाणबाधे तु साधकं न भवेदित्यर्थः। शङ्कानिवृत्तिद्वारेति।। तर्को व्याप्तिग्राहक इत्यनुकर्षः। विशेषादर्शनस्य व्यभिचारिव्यावृत्तविशेषादर्शनस्य ४ सर्वत्र सत्वादित्यत शङ्का सार्वत्रिकी स्यादित्यन्वयः। व्याघातावधिराशङ्केति वक्ष्यमाणोदयनवाक्यं वक्ष्यमाणाव्याघातावधित्वाच्छङ्काया इति भक्तिपादीयछललक्षणोक्तिप्रस्तावगतसुधावाक्यं हृदि कृत्वा व्याघातभिया एवं शङ्का एवं न कार्येति।। भावेन
व्याख्यातमाह-- एवं शङ्कायामिति।।
-
१.नैव त -ट.रा. २.न सर्वत्र त- ट.क.ग.रा. ३.न प्र-ड. ४.स्य तत्र सत्वादि-ड. स्य अत्र -ठ.
-
खक्त-व्यानियानु-क्तिभङ्गः)
व्याप्तिवादः पु- ३९.
-

इति न्यायेन शङ्का सार्वत्रिकी स्यादिति चेन्न। किमियं शङ्का स्वार्थानुमाने स्यात् परार्थानुमाने वा। आद्येपि स्वारसिकी वा आधेया वा। नाद्यः। एवं शङ्कायां चार्वाकस्य प्रत्यक्षेपि करचरणादिविशेषदर्शनेऽद्वैतिनोपि वेदनिर्दोषत्वज्ञाने उपक्रमादिलिङ्गनां तात्पर्याव्यभिचारज्ञाने च स्वार्थव्यभिचारशङ्कापातात्। शङ्काविषकज्ञानोपि स्वार्थस्य व्यभिचारशङ्क्या त्वदुक्त १ व्यभिचारशङ्काया एव सिद्ध्यापत्तेश्च। यदि च तत्र त्रिचतुर २ कक्ष्यानन्तरं कोटिस्मरणाद्यभावान्न शङ्का। तर्हीहापि न विशेषादर्शमात्रं संशयसामग्री। किंतु कोटिस्मरणादिसचहितम्। तथा च कतिपयकक्ष्यानन्तरं कुत्रचित्कोट्यस्मरणस्य कुत्रचिदुत्कटविषयान्तरसंचारस् कुत्रचिज्जिज्ञासाभावस्य कुत्रचित् -- '३ यत्वादौ श्रद्धया सिद्धं पुनर्न्यायेन साधितम्'। इति न्यायेन स्वारसिकविश्वासस्या ४ वश्यकत्वान्न सर्वत्र शङ्का।

-

एवं शङ्कायां। अनुमानाप्रामाण्यवादीचार्वाकएवेति चार्वाकस्येत्युक्तम्। सर्वखण्डनवादी मण्डनमिश्रोप्यद्वैतवादीत्यद्वैतिनोपीत्युक्तम्। अनेन स्वक्रियाविरोध उपपादितः।।

परमुखेन समाधिं वाचयित्वा समं प्रकृतेपीत्याह-- यदीति।।

-

१.व्यभिचारपदं न -क.ट.ग. त्वदक्तेति नास्ति-रा. २.रादिक-रा. ३.यत्रादौ -ट.ग.रा. ४.स्य चाव-ट.ग.रा.

-

-

न हि कश्चिदपि यावज्जीवं कोटिस्मरण १ धारायामेव व्याप्रियमाणोनुभूयते। न चाविरललग्राशङ्काधारानुभूयते। येन

फलबलात्कोचिस्मरणादिधाराया अविच्छेदः कल्प्येत। अन्यथा प्रत्यक्षेपि विशेषदर्शनधारायां वेदेप वेदनिर्दोषत्व २ ज्ञानधारायां च व्याप्रियेत। उक्तं हि --

यावच्छक्तिपरीक्षायामुपजीव्यस्य बाधने।
दोषो नाशोधिते दोष उपजीव्यत्वमस्त्वलम्।।

इति। द्वितीयेपि स्वार्थानुमाने शङ्काधायकं न तावत्प्रतिवादिवाक्यम्। अतिप्रसङ्गात्। तस्य तदानुपस्थितेश्च नाप्युपाधिशङ्का। तस्या अप्युक्तन्यायेन सर्वत्रासंभवात्।

-

फलबलादिति।। शङ्कारूपफलबलादित्यर्थः। अन्यथेति।। शङ्काभावेपि परंपराकल्पन इत्यर्थः। उक्तं हीति।। विश्वासादिना प्रमाणत्वेन सिद्धस्य शङ्कनास्पदत्वं ज्ञानपादीयानुव्याख्याने उक्तमित्यर्थः। परीक्षायां सत्यां प्रमाणत्वेन निश्चितस्येति शेषः। अशोधिते।। तर्कादिना अप्रमाणादविवक्ते। उपजीवकेन बाधेपि न दोषः। ननु उपजीव्यं कथं बाध्यमित्यत आह-- उपजीव्यत्वमस्त्वलमिति।। उपजीव्यत्वमात्रमप्रयोजकमिति भावः।। द्वितीयेपीति।। स्वार्थनुमाने आहितशङ्का भवतीति पक्षेपीत्यर्थः। अतिप्रसङ्गादिति।। प्रत्यक्षेपि करचरणादिविशेषदर्शन इत्युक्तस्थेष्वपि प्रतिवादिवाक्याच्छशङ्काप्रसङ्गादित्यर्थः। उपाधिशङ्केति।। शङ्काधायिकेत्यनुकर्षः।

-

१.णादि-ग.रा. २.ज्ञापकादि-ट.ग.रा. ज्ञापक-क.

-

खक्त-व्यानियानु-त्ति-भङ्गः) व्याप्तिवादः पु -४१.

-

क्वाचित्क्यास्तु क्वाचित्केनैव तर्केण निरासात्। निरासस्त्वेवम्--धूमस्याग्निना संबन्धे उपाधिरैन्द्रियकश्चेदुपलभ्येत। न चोपलभ्यते। अतीन्द्रियोपि प्रमाणान्तरवेद्यः स्यात्। न च तत्प्रमाणमुपलभ्यत इति। अत एव पद्धतौ 'सोयं कश्चित्प्रमाणान्तरानुग्राहको भवती'ति तर्कस्य क्वचित्कत्वमेवोक्तम्। प्रमाणेनानुपलभ्यमानोपि कश्चिदुपाधिर्भविष्यतीति नर्बीजाशङ्कापिशाची तु प्रामाणिकत्वेन त्वदभिमततेप्यद्वैतादौ बाधकसहस्रं अप्रामाणिकत्वेन त्वदभिमतेपि द्वैतादौ साधखसबस्रं निर्दोषत्वेन त्वदभिमते १ त्वद्वाक्ये दोषसहस्रं च भविष्यतीत्याद्यतिप्रसङ्गहेतुत्वात् सप्तमरसादिशङ्कसमाना न व्याप्तिनिश्चयोत्पत्तिप्रतिबन्धिका। नाप्युत्पन्नस्य व्याप्तिनिश्चयस्य कार्यप्रतिबन्धिका। उत्पन्नेन निश्चयेनैव शङ्कोत्पत्तिप्रतिबन्धात्। न हि ग्राह्यसंशयमात्रं तन्निश्चयप्रतिबन्धकम्। न चोत्पन्नस्य व्याप्तिनिश्चयस्य बलवद्बाधकमस्ति।

-

उक्तेति।। कोटिस्मरणाद्यभावादित्यादिनोक्तन्यायेनेत्यर्थः। अत एवेति। क्वाचित्कोपाधिस्थल एव तर्कानुसरणादित्यर्थः। त्वदभिमतेति।। खण्डनकारं प्रत्युच्यते। न व्याप्तिनिश्चयोत्पत्तिप्रतिबन्धिकेत्येतद्व्यनक्ति--न हीति।। तथात्वे संशयोत्तरप्रत्यक्षस्यानुमित्यादेश्चानुदयापातादिति भावः।।

-

१. तेपि त्व - ट.ग.रा.

-

-

येनौत्सर्गिकं प्रामाण्यमपोद्येति। उक्तं हि --
'उत्सर्गतोपि यत्प्राप्तमपवादविवर्जीतम्।

व्यभिचार्यपवादेन मानमेव भविष्यति' ।।
इति। उक्तं च खण्डनेपि --
'अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि।
अबाधात्तु प्रमामत्र स्वतःप्रामाण्यनिश्चलाम्' ।।
इति । कथं च प्रत्यक्षसिद्धे अन्नादौ निःशङ्कस्य प्रत्यक्षसिद्धायां व्याप्तौ शङ्का। उक्तं च -- व्याप्तिप्रत्यक्षस्यापि सहकारिसामर्थ्यात्प्रभिज्ञावदतीतादिविषयकत्वमिति।
-
उक्तं हीति।। बलवद्बाधकाभावे प्रमाणमेवेत्येतद्भक्तिपादीयानुव्याख्याने उक्तमित्यर्थः। अपवादेन व्यभिचार्यपि मानमेवेत्यर्थः। स्वतः प्रामाण्यनिश्चलां प्रमां शब्दः करोतीत्यन्वयः।।
ननु-- प्रत्यक्ष २ व्याप्तौ शङ्कानुदयेप्यन्वयव्याप्तौ सा भविष्यति। परिचितप्रत्यक्षस्थलेषु हेतोः साध्यव्यभिचारज्ञानप्यतीतादौ तच्छङ्कया २ सास्यादेवेत्यत आह-- उक्तं चेति।। यद्वा
सन्निकृष्टकतिपयधूमादिव्यक्तिव्याप्तिग्रहेप्यतीतदिव्यक्तिषु
तद्ग्रहोपायाभावात्कथं सर्वत्र व्याप्तिग्रह इत्यत आह-- उक्तं चेति।। शक्तिव्याप्त्यादिग्रहसमर्थनवादे. एवमियता ग्रन्थेन तर्कानवतारे विशेषादर्शनस्य सर्वत्र सत्वादित्या ३ दिना पूर्वपक्षिणोक्तं विशेषादर्शनमभ्युपेत्य स्वार्थानुमाने स्वारसिकाहितशङ्कयोः स्वव्याघातप्रसङ्गेनानुवाद उक्तः। अधुना नास्त्येव विशेषादर्शनमित्याह-- वाचयिष्यते चेति।। अत्रैव भङ्गे किञ्च व्यभिचारिव्यावृत्तिविशेषस्यादर्शन इत्यादिग्रन्थेनेति भावः।।
-
१. क्षे शङ्कानु-ट.ठ.ड. २.सा इतिनास्ति-ठ.ड. ३.दिना पू -ट.ड.
-

-

वाचयिष्यते च परमुखेनैव व्याप्तिधीकाले व्यभिचर १ व्यावृत्तविशेषदर्शनमप्यस्तीति।।

नाप्यनुमानप्रामाण्यवादिना तदप्रामाण्यवादिनं प्रतिप्रयुक्ते परार्थनुमाने शङ्का। तत्र प्रति वादिना मयेदं साध्यं व्यभिचारिष्यतीति सर्वत्र शङ्कोत्थापनादिति द्वितीयः। २ तथापि तृप्त्यर्थं भोजने परबोधनार्थं शब्दोच्चारणे एवं तत्तत्कार्योद्देशेन तत्तत्कारणे च प्रवृत्तिरूपस्वक्रियाव्याघातेन शङ्कानुदयात्। अत्र --

-

परार्थानुमाने वेति प्राग्विकल्पितं द्वितीपक्षं विवृण्वन्नेति निराह-- नापीति।। द्वितीय इत्यन्वयः। मया चार्वाकेण खण्डनकारेण वा स्वक्रियाव्याघातेन व्याघातो विरोधो हानिर्वा। यदि सर्वत्र शङ्का त्वयोत्थाप्यते तर्हि भोजनमपि ३ तृप्तिं व्यभिचरिष्यति शब्दोच्चारणमपि परबोधं व्यभिचरिष्यतीति भोजनादौ न प्रवृत्तिः स्यात्। अस्ति च सा। अतो न सर्वत्र शङ्का कार्येत्यर्थः। एवं व्याघातावधिराशङ्केत्येतद्वदि कृत्वा व्याघातदण्डभयेन सर्वत्र शङ्का नोत्पत्तुमर्हतीत्युक्तम्। तस्य खण्डनोक्तं रदोषमुद्धर्तुमाह-- अत्रेति।।

-

१.चारि-क.ग.रा. २.तत्रापि-क. तवापि-ग.रा. ३.प्रवृत्ति व्यभि-ठ.

-

-

‘शङ्का चेदनुमानस्त्येव न चेच्छङ्का ततस्तराम्।
व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः‘।।

इत्युदयनोक्तदूषणार्थं चार्वाक १ भूषणार्थं चोक्तं खण्डने --

‘व्याधातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम्।

व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतः‘ ।।
इति। अस्यार्थः। यदि व्याघातः तर्हि शङ्कास्त्येव। व्याघातो हि स्वक्रियायाः शङ्कया सह विरोधः।
-
-- व्याघातभयाच्छङ्का नोदेतमर्हतीत्युक्तप्रमेये खण्डने उक्तमित्यर्थः।। शङ्काचेदिति।। कालान्तरे देशान्तरे वा अयं हेतुः साध्यं व्यभिचारिष्यतीति शङ्का चेदुत्पन्ना तदानुमानं प्रमाणमस्त्येव। अनुमानं विना कालान्तरदेशान्तरयोरनुपस्थितेः। न चेदेवं शङ्का तदा सुतरां निःसन्देहमनुमानं प्रमाणमस्त्येव। नन्व ३ नुमानं प्रमाणं शङ्का तु कथं निवर्त्येति सुहृद्भावेन पृच्छन्तं प्रत्याह-- तर्कः शङ्कावधिर्मतः। यावच्छङ्कं तर्कप्रवृत्या तर्केण सा निवर्तनीयेति। ननु तर्केपि व्याप्तेरावश्यकत्वात्तत्रापि शङ्कायां तर्कान्तरान्वेषणेनवस्थेति चेत्तत्रोत्तरं -- व्याघातावधिराशङ्केति।। आशङ्का परम्पराजायमाना सती क्वचिद्विश्राम्यति। यत्र शङ्कायां क्रियणायां स्वक्रियाव्याघातादिर्भवति तत्र न शङ्कोत्पत्तुमर्हतीति तृतीयपरिच्छेदे कुसुमाढ्जल्युक्तश्लोकार्थः। ४ दुर्गमार्थत्वाद्दूषणसौकर्यार्थमाह-- अस्यार्थ इति।।
-
१.तोक्त भू-क. २.न्वयः-ठ. ३.न्वस्त्वनु-ठ. ४.दूषणसौकर्यायार्थमाह-- इत्यस्ति -ठ.ड.
-
खक्त-व्यानियानु-त्ति-भङ्गः) व्याप्तिवादः पु - ४५.
-
तथा च शङ्का प्रतियोगितया व्याघातनिरूपकत्वेन तन्निर्वाहिकेति कथं शङ्कां विना व्याघातः। नचेव्द्याघातस्तदा निवर्तकाभावात्सुतरां शङ्कास्त्येवेति। ब्रूमः।

किमनुमानप्रामाण्येपि व्याप्तिनिश्चयो न संभवतीत्युच्यते न संभवतीत्युच्यते किं वानुमानमात्रमप्रमाणमिति। नाद्यः।
'अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्'।
इति न्यायेन ममेष्टसिद्धेः। न ह्यहमुपेये अनुमानप्रामाण्ये सिद्धेप्युपायविशेषेऽभिनिविष्टोस्तमि। व्यभिचारिणापि साध्यसिद्धिप्रसङ्गाच्च। स्थापनायां विरक्तस्यापि तव दृष्टप्रकारत्यागेनादृष्टेन ---

-

तथा च शङ्केति।। तन्निर्वाहिकेत्यन्वयः। व्याघातनिर्वाहिकेत्यर्थः। कथं -- प्रतियोगितयेत्यादि। एवं च व्याघातावधिराशङ्केति तर्कः शङ्कावधिरिति च कुत इत्युत्तरार्धस्य स्वष्टत्वादर्थो नोक्तः। व्याप्तिनि १ श्चयो न संभवतीति तत्संभवस्य तर्काधीनत्वात्। तर्कस्य व्याप्तिसापेक्षत्वे नानवस्थापत्यानुत्थानादिति भावः। २ अर्के चेदिति।। 'इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेदि'ति वाक्यशेषः। अयं च श्लोकः शाबरभाष्यादावुक्तः। ननु तर्काधीनव्याप्तिनिश्च ३ हेतुकं प्रामाण्यं न प्राप्तमेवेत्यत आह-- न हीति।। अनुमानप्रामाण्यं स्वीकुर्वता व्याप्तिनिश्चय ४ संभवोवश्यं वाच्योन्यथातिप्रसङ्गादिति भावेनाह-- व्यभिचारिणामपीति।। अनुमानप्रामाण्यस्वीकारस्तवायुक्त इत्याह-- स्थापनायामिति।। कश्चिदपि मम स्थाप्यः पक्षो नेति वदतः खण्डनकारस्येत्यर्थः। अनुमानप्रामाण्यमुपेत्य व्याप्तिनिश्चयखण्डनं स्वव्याहतमित्याह-- व्याप्तिसापेक्षेणेति।।

-

१.र्न सम्भवतीति-ठ. २.तर्केचे -ड. ३.श्चायकं-ड. ४.योवश्यं-ट.ठ.

-

-

--प्रकान्तरेणानुमानप्रामाण्यसाधना १ पाताच्च। व्याप्तिसापेक्षेण तर्केणानवस्थापादनायोगाच्च। प्रमाणतर्काभ्यां व्यावर्तव्यमिति समयबन्धायोगाच्च। व्याप्तेरनिश्चये शब्दशक्तेरप्यनिश्चयेनाद्वैतश्रुतेरबोधकत्वापाताच्च। लक्षणाया अप्यभिधायमूलकत्वात्।।

नान्त्यः। परकीयशङ्कादेरप्यनुमेयतया तच्छङ्कानिवृत्यर्थं तव वाक्यप्रयोगात्।

-

अनुमानस्येव तर्कस्यापि व्याप्तिनिश्चयं विनैव साधखत्वसंभादिति भावः। यद्वा तत्प्रामाण्यनिर्वाहकोपायान्तराभावात् अस्मदुक्तनिर्वाहस्यैव त्वयापि वाच्यत्वात्तद्दूषणोक्तिरयुक्तेत्याह-- व्याप्तीति।। व्याप्तिसापेक्षत्वेन तर्कस्य खण्डनं व्याहतमित्याह-- प्रमाणेति।। परमार्थाद्वैतदृष्ट्या नास्ति समयबन्धादिव्यवहार इत्यत आह-- व्याप्तेरिति।। यद्वा व्याप्तिनिश्चयो न संभवतीत्येतत्स्व २ व्याहतमित्याह-- व्याप्तेरिति।। केवलव्यतिरेकणिणान्वयव्यतिरेकिणा वा प्रमाणलक्षणटीकाद्युक्तदिशा शक्तेर्ग्राह्यत्वादिति भावः। यद्वा वृद्धव्यवहारादावापोद्वापाभ्यां शक्तिग्रहाव्याप्तिनिश्चयोपेक्षित इति भावः। लक्षणयाद्वैतज्ञानमस्तु किं शक्तिग्रहणेनेत्यत आह-- लक्षणाया इति।। मुख्यार्थसंबन्धपूर्वकत्वाल्लक्षणाया इति भावः।।

नान्त्य इति।। अनुमानमात्रमप्रमाणिति पक्ष इत्यर्थः।

-

१.नायासापाताच्च-ट.ग.रा. २.त्यत आह-- ट. त्येतद्व्यारूपयातमित्याह-ठ.

-

खक्त-व्यानियानु-त्ति-भङ्गः) व्याप्तिवादः पु-४७.

-

अनुमानाप्रामाण्यस्यापि प्रत्यक्षाद्यसिद्धत्वेन तत्रानुमानस्यैव प्रमाणयितव्यत्वाच्च। अनुमानाप्रामाण्ये कालान्तरादेरप्यसिद्ध्या तत्र व्यभिचारशङ्कायोगाच्च।
प्रवर्तकनिवर्तकयोरिष्टानिष्टसाधनत्वयोरप्यनुमेयत्वेन तव

कुत्रापि प्रवृत्तिनिवृत्ययोगाच्च। अद्वैते षड्विधतात्पर्यलिङ्गानां प्रपञ्चमिथ्यात्वानुभूतस्वप्रकाशत्वादौ दृश्य १ मानत्वानुभूतित्वादिलिङ्गानां चोक्त्ययोगाच्च। संदिग्धानैकान्तिके व्यावहारिकप्रामाण्यस्या २ भावात्। विश्वमिथ्यात्वादेरव्यावहारिकत्वाच्च। प्रत्यक्षशब्दाभ्यामिव लिङ्गेनापि ज्ञानोत्पत्तेरुत्पन्नज्ञानस्य बाधाभावेन प्रामाण्यनिश्चयस्य तदधीननिष्कम्पप्रवृत्तेः प्रवृत्तिसामर्थ्यस्य चानुभवेनानुमाने विशेषापराधाभावाच्च।।
-
कालान्तरादेरसिद्ध्येति।। पररीत्या कालदेशयोरानुमानिकत्वमुपेत्य इदं दूषणं ध्येयम्। सिद्धान्ते साक्षिसिद्धत्वात्। व्यावहारिकप्रामाण्यमुपेत्य तदुक्तिरित्यत आह-- संदिग्धेति।। कालान्त ३ रादौ साध्यं व्यभिचरिष्यति किमिति शङ्कास्पद
इत्यर्थः। तात्विकप्रामाण्यमेव दृश्यत्वादि हेतूनां उपेयं तद्बोध्य ४ मिथ्यात्वादेस्तात्विकत्वात् । अन्यथा व्यावहारिकप्रमाणसिद्धप्रपञ्चवन्मिथ्यात्वमपि मिथ्यैव स्यादिति भावेनाह-- विश्यमिथ्यात्वादेरिति।। ज्ञानोत्पत्तेरित्यादिषष्ठ्यन्तचतुष्टयस्यापि अनुभवेनेत्यन्वयः।
-
१.श्यत्वानु-ट.क.ग.रा. २.स्याप्य-क.ग.रा. ३.रे सा-ठ. ४.विश्वयमिथ्यात्वांशतात्वि इत्यस्ति- ठ.
-

-

अन्यथानुमानमेव प्रमाणं न तु प्रत्यक्षादीति। प्रत्यक्षेपि नेत्रमेव प्रमाणं न तु श्रोत्रादि वेदेपि द्वैतवाक्यमेव प्रमाणं नत्वद्वैतवाक्यमिति च स्यात्।। एतेनानुमानात्संभावनामात्रेण प्रवृत्यादिकं संवादाच्च प्रामाण्याभिमान इति निरस्तम्। अनुमानाज्ज्ञानं जायते तच्च १ संवादीतित वदता त्वयैव तत्पामाण्ययोपगमात्। संभावनात्वे २ नापि कोट्यन्तरोल्लेखापाताच्च। निष्कम्पप्रवृत्यनुपपत्तेश्च। एवंविधस्य पारिभाषिकसंभावनात्वस्य मया ३ भ्युपगमाच्च। प्रत्यक्षादिनापि संभावनामात्रमित्यापाताच्च। औत्सर्गिकाऽबाधः क्वाचित्कबाधश्चोभयत्रापि समः।।

-

नेत्रमिति चक्षुरित्यर्थः। संभावनामात्रेणेति।। उत्कटकोटिकसंदेहमात्रेणेत्यर्थः। वह्न्याद्यनुमितिस्थ इति योज्यम्। संभावनमात्रेण प्रवृत्तौ सकम्पैव प्रवृत्तिः स्यात् न तु निष्कम्पेतयाह-- निष्कम्पेति।। ननु मयोपेता संभावना निष्कम्प ४ प्रवृत्तिजनिकैवेत्यत आह -- एवमिति।। परिभाषामात्रस्यानुमिति प्रामाण्यापरिपन्थित्वादिति भावः। ननु प्रत्यक्षशब्दयोरुत्सर्गतः सर्वत्राबाध एव। क्वचिदेव शुक्तिरूप्यादौ बाधः। अतो न तत्र संभावनामात्रोपगमेन प्रत्यक्षादेरप्रामाण्यापात इत्यत आह-- औत्सर्गिकेति।।

-

१.ज्ञानमित्यधिकम्-ट.क.ग.रा. २.त्वेह्यनुमितावितिका-ट. त्वे हीनत्वेनापि को- गा.रा. ३.याप्युपग-क.ग.रा. ४.निवृ-ट.ठ.

-

खक्त-व्यानियानु-त्तिभङ्गः) व्याप्तिवादः पु -४९

-

किंच व्यभिचारिव्यावृत्तविशेषस्यादर्शने संभावनैव कुतः। अन्यथा संदिग्धव्यभिचारिण्यपि सा स्यात्। दर्शने तु यद्दर्शने तव संभावना तद्दर्शनेनैव मम निश्चयोस्तु। स विशेषः क इति चेदात्मानमेव पृच्छ। यस्त्वं दर्शनेन संभावितवान् निष्कम्पं प्रवृत्तश्च।।
यदि तव समकोटि १ शङ्कासामग्रीविरहो संभावना हेतुः। तर्हि मम समकोटिविषमकोटिकोभयशङ्कासामग्रीविरहो निश्चयहेतुः।।
यदि च तवान्वेषणेपि व्यभिचारादर्शनसहकृतमुपाध्यदर्शनं वा उपाध्य २ दर्शनसंभावना वा यावच्छक्तिपरीक्षा
वा संभावनाहेतुः। तर्हि ममापि त एव व्याप्तिनिश्चयहेतवः।।
एवं च यदुक्तं व्याघातो यदीत्यादि तदपराद्धोषेर्धानुष्क्सयेव वल्गितमात्रम्।

-

उभयत्रेति।। प्रत्यक्षादावनुमाने चेत्यर्थः। निष्कम्पं प्रवृत्तश्चेति। यस्त्वमित्यनुकर्षः।।
परमुखेनैव विशेषस्वरूपं वाचयन् समं ममापीत्याह -- यदि तवेति।। अपराद्धेषोरिति।। अपराद्धः लक्ष्यादन्यत्र गतः इषुः शरो यस्य तस्येत्यर्थः।

-

१.टि कसं-ट. टिकशङ्कासा- ग.रा. २.ध्यसंभा -ट.ग. भवसं-रा.

-

पु-५०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

नहि मया १ निष्पन्न भोजन २ क्रिया वा क्रियायाः शङ्कायाः शङ्कया सह विरोधो वा तज्ज्ञानं वा शङ्कानिवर्तकमित्युच्यते। येन क्रियायां सत्यां शङ्कानिवृत्य तृप्तिकारणत्वनिर्णयः तस्मिंश्च सति क्रियेति त्वदुक्तोन्योन्याश्रयः त्वदुक्तविरोधि ३ प्रतियोगिशङ्कावश्यंभावश्च ४ स्यात्। किंतु त्वमपि ५ क्रियामूलभूतेन शङ्काविरुद्धकोट्यालम्बन ६

विशेषदर्शनेन निवृत्तशङ्कः सन् मनसा व्याप्तिं निश्चिनुषे। वाचा तु नेति ब्रूषे। तस्माद्वाङ्मनस ७ विसंवादं कुरुषे।
न हि ततर्थं तत्र निष्कम्पं प्रवर्तते तच्च तत्कारणं नेति शङ्कते चेति संभवति। तस्मात्वद्वचनं मूकोहमितिवत्स्वक्रिया विरुद्धमित्येवोच्यते।।
-
१.मायानि -ट.क. २.नादि क्रि-ट.क.ग.रा. ३.घप्र -ट.रा. स्यादर्श -ग.रा. ५.स्वक्रि-ट.ग.रा. ६.नेन वि-ट.ग.रा. ७.विवा-ट.ग. ८.ल्गिगितमे-ठ. ९.धु-ठ.ड.
-
स्वक्त-व्यानियानु-त्तिभङ्गः) व्याप्तिवादः पु - ५१.
-
किंच शङ्कानिवर्तकेन व्याघातेन १ निवर्त्यायाः शङ्कायाः स्वस्मात्पूर्वसत्वमेवापेक्ष्यते। तावतैव ध्वंसं प्रतीव प्रतियोगित्वोपपत्तेः। न तु यावत्स्वावस्थानं सहभावः। तथात्वे हि विरोध एव न स्यात्। नहि विशेषदर्शननिवर्त्या शङ्का बाध निवर्त्या भ्रान्तिः ब्रह्मज्ञाननिवर्त्याविद्या तेजोनिवर्त्यं तिमिरं च निवर्तकसमकालं दृष्टम्। भिन्नकालीना च शङ्का व्याघातेन निवर्तितत्वान्न व्याघातकालेस्ति। येन तर्कापेक्षा स्यात्। अन्यथा ब्रह्मज्ञानाद्यनन्तरमप्यविद्यादिकं स्यात्।।
एतेन -- 'व्याघातस्य स्वरूपसतः शङ्कानिवर्तकत्वे शङ्का नित्यनिवृत्ता स्यात्। व्याघातोद्भावनवैयर्थ्यं च स्यात्। ज्ञातस्य निवर्तकत्वे --
-
शङ्कायाः सत्वमुपेत्यापि न दोष इत्याह-- किं चेति।। विरोध एव न स्यादिति।। सहानवस्थानरूपत्वाद्विरोधस्येति भावः। नाजात एकोन्यं हन्ति नाप्यन्याधार इति न्यायेन वध्यघातकस्थले सहावस्थानमावश्यकमित्यतो देशतस्तथात्वेपि न कालतस्तथात्वं किंतु पौर्वापर्यमेवेति भावेनाह-- न हीति।। निवर्त्याविद्येत्यत्राविद्येति विभागः।।

ननु यदांकढाचिच्छङ्कायाः सत्वे स्यादेव तन्निवृत्यर्थं तर्कापेक्षेत्यनवस्थापत्तिरेवेत्यत आह-- भिन्नेति।। इष्टापत्तिरित्यत आह-- व्याघातेति।।

-

१.न स्वनि-ट.क.ग.रा.

-

पु-५२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

व्याघातरूपविरोधस्य तदभावव्याप्यत्वात्मकतया व्याप्तिगर्भितत्वेन तज्ज्ञानाय पुनस्तक्रापेक्षेति'खण्डनश्लोकस्य व्याख्यानान्तरमप्यपास्तम्। स्वक्रियामूलभूतविशेषदर्शनमेव शङ्कानिवर्तकमित्युक्तत्वात्। व्याघातावधित्वाच्छङ्काया इति सुधाया अप्ययमेवाभिप्रायः। केचित्तु-- व्यभिचारज्ञानाभावसमानकालीनमन्वयव्यतिरेकानुविधायित्वज्ञानं शङ्कानिवर्तकम् न तु तत्प्रयोज्या क्रिया न च क्रियाज्ञानं शङ्कानिवर्तकम् येनान्योन्याश्रयः स्यात् इत्याहुः।।
इति खण्डनोक्तव्याप्तिनिश्चयानुपपत्तिभङ्गः।। ३ ।।

-

तदभावेति।। शङ्काभावव्याप्येत्यर्थः। व्याख्यानान्तरेति।। व्याघातो यदि स्वरूपसन् शङ्कानिवर्तकस्तर्हि शङ्कानित्य १ निवृत्ता स्यात् इति शेषः। व्याघातस्य स्वरूपसतः सर्वदाभावात्। न चैत २ त्स्वरूपसन्निवर्तकोन चेत्तज्ज्ञानाय व्याप्तिज्ञानापेक्षायां व्यभिचारशङ्कास्त्येवेत्येवं व्याख्यानान्तरमित्यर्थः। स्वक्रियेति।। प्रवृत्यादिरूपस्वक्रियेत्यर्थः। उक्तत्वादिति।। न हि मयेत्यादिपूर्वग्रन्थेनोक्तत्वदित्यर्थः। सुधाया अपीति।। भक्तिपादीयाद्यनये -- 'जातिः स्वव्याहतिर्ज्ञेया छलमर्थान्तरोत्तर'

मित्येतव्द्याख्यानसुधाया अपि नहि मयेत्यादिनोक्त एवाभिप्राय इत्यर्थः। अन्वयेति।। भोजनादौ सति तृप्त्यादि तदभावे तदभाव इत्यन्वयव्यतिरेकानुविधायित्वज्ञानमित्यर्थः। अन्योन्येति।। प्रागुक्तान्योन्याश्रयः इत्यर्थः। अत्रारुचिबीजं तु यत्राप्तवाक्यादिजन्यविशेषदर्शनेन स्वक्रिया तत्रान्वयव्यतिरेकज्ञानाभावात्। अन्वयव्यतिरेकानुविधायित्वज्ञानस्यापि
विशेषदर्शनास्मदुक्तरीतेरेवानुसर्तव्यत्वात् किमनेनेति।।
इति खण्डनोक्तव्याप्तिनिश्चयानुपपत्तिभङ्गः।। ३।।

-

प्रत्वाभित्व-योव्याहे-खक्त-साप्र-ङ्गङ्गः) व्याप्तिवादः पु - ५३.

-

अथ प्रमेयत्वाभिधेयत्वयोर्व्याप्तिग्रहे खण्डनोक्त सार्वङ्यप्रसङ्गभङ्गः।।४।।
१ अत्रोक्तं खण्डने --
एवं चेत्प्रमेयत्वाभिधेयत्वयोर्व्याप्तिं गृह्णतः सार्वज्ञ्यं स्यात्। तथाच सर्वान्तर्गताशेषविशेषाणां ज्ञातत्वादयं घटो ने २ ति संशयादिकं न स्यात्।

-

अथ प्रमेयत्वाभिधेयत्वयोर्व्याप्तिग्रहे खण्डनोक्तसार्वज्ञ्यप्रसङ्गभङ्गः।।४।।
अत्रेति ।। व्याप्तिज्ञानविषये दूषणमुक्तमित्यर्थः। एवं चेदिति।। व्यभिचारा ३ भावसहचारज्ञानसहकृतप्रत्यक्षेण व्याप्तिग्रहश्चेदित्यर्थः। अस्त्वित्यत आह-- ४ तथाचेति।। संशयादिकं संशयविपर्ययज्ञानादिकं न स्यादित्यर्थः।

-

१.यच्चोक्तं-ट. २.न चेति-क. ३.नवेति-ग.ट.रा. ३.रज्ञानाभावसहकृतप्रत्यक्षेण व्याप्तिश्चेदित्यर्थः। इत्यस्तु-ठ. ४.ततश्चेति-ठ.

-

पु - ५४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

न च प्रमेयमिति ज्ञानं सर्वविषकमपि प्रमेयत्वप्रकारमेव न तु घटत्वादिप्रकारकं, समानप्रकारकमेव च ज्ञानं संशयादिविरिधीति वाच्यम्। तत्प्रकारकत्वं हि तद्वैशिष्ट्यविषयकत्वम्। प्रमेयमिति ज्ञानं १ च सर्वविषयकत्वाद्घटत्वादिवैशिष्ट्यविषयकमेवेति।।

अत्र २ केचिदाहुः -- यद्यपि प्रमेयमिति ज्ञानं १ घटत्वादिवैशिष्ट्यविषयकत्वम्। तथापि न घटत्वादिविशेषणज्ञानजन्यं प्रमेयमिति ज्ञानात्पूर्वं घटत्वादिज्ञाननियमे मानाभावात्। जन्यज्ञानस्य संशयादिविरोधित्वे च तद्विशेषणज्ञानजन्यत्वं तन्त्रमिति संशयादिकं युक्तमिति।।

यद्वा यथा ज्ञानस्य स्वाभावेन स्वविषयेण च सह संबन्धे ३ विशिष्टेप्यभावाद्व्यावृत्तो विषयेण सह संबन्धविशेषोऽन्त्य एव, यथा वा घटयमित्यत्र घटघटत्वयोर्विषयत्वेऽविशिष्टेपि घटत्वांशे विशेष्यव्यावृत्तः। सबन्धोऽन्य एव।

-

संशयाद्युपपत्तिमाशङ्क्य निराह-- न चेति।। समानेति।। अयं घटो न वेत्यादिसंदेहस्य घट एवायमिति घटत्वादिप्रकारकनिश्चयनिवर्त्यत्वादिति भावः। घटत्वादिप्रकारकमपि भवति प्रमेयत्वेन ज्ञानमित्याह-- तत्प्रकारकत्वं हीति।। घटत्वादिपरामर्शः। वैशिष्ट्येति। भासमानवैशिष्ट्यप्रतियोगित्वरूपत्वात्प्रकारत्वस्येति भावः। केचित्तु ४ तार्किकाः।।

विशेष ५ ज्ञानं कारणं नेति मतेनाह-- यद्वेति।। अन्य एवेति।।

-

१.नस्य सर्व -ग. २.तत्र के- ग.रा. ३.अवि- क.ग.ट. सवि-ग.रा. ४.त् तार्कि-ट.ठ.ड. ५.णज्ञा-ट.ठ.

-

प्रत्वाभित्वयोर्व्याहे-खक्त-साप्र-ङ्गःङ्गः) व्याप्तिवादः पु - ५५.

-

तथा घटोयं प्रमेयमिति ज्ञानद्वयेपि घटत्वस्य भासमानवैशिष्ट्यप्रतियोगित्वरूप १ प्रकारत्वेऽविशिष्टेपि घटोयमितिज्ञानस्य २ प्रमयेमिति ज्ञानाद्व्यावृत्तो घटत्ववैशिष्ट्यांशे संबन्धोऽन्य एव। तेन च स्वरूपसता संबन्धेन घटत्वविषयकत्वं संशयविरोधित्वेन तन्त्रम्। तच्चप्रमेयमिति ज्ञाने नास्तीति संशयादिकंयुक्तम्।।

एततेवाभिप्रेत्योक्तमाचार्यैः --

'सर्वं सामान्यतो यस्मात्सर्वै ३ रेवानुभूयते'।

इति। सामान्यतः स्वरूपसता सम्बन्धसामान्येन हेतुनेत्यर्थः।।

यद्वा ४ यथा श्वैत्यसाक्षात्कारानुमित्योर्विषयकृतविशेषाभावेपि --

-

प्रतियोग्यनुयोगिभावात्स्वाभावंसबन्धार्द्विषयविषयीभावरूपोऽन्य एवेत्यर्थः। घटत्वां ५

शे घटत्वेन ६ सह ज्ञानस्य विशेष्यव्यावृत्तोऽन्य एवेत्यर्थः। ततश्च किमित्यत आह-- तेन चेति।। उक्तमिति।। तैत्तिरीयभाष्ये । प्रकृतोपयोगितयार्थमाह-- सामान्यत इति।। संबन्धसामान्येति।। यादृशसंबन्धेन ज्ञानं संशयादिविरोधि तदन्येन सबन्धेनेत्यर्थः। तादृशसंबन्धे विवादिनं प्रत्याह-- यद्वेति।। शङ्खः श्वेत इति साक्षात्कारस्य शङ्खत्वादि ७ हेतुजन्यानुमितेश्चेत्यर्थः।।

-

१.पत्वेऽवि-ग. २.प्रमेयमतिज्ञानस्य इत्यधिकम्-क. ३.रप्य-ग.रा. ४.यथेति न -क.ट. ५.त्वादौ -ट. घटत्वाघ-ड. ६.घटत्वादिना-ट.ठ. ७.दितिहे-ड.

-

पु-५६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

-- करण १ वैजात्यप्रयुक्ताज्जातिभेदादेव पीतत्वभ्रमविरोधित्वाविरोधित्वे; यथा वा मण्डूकवसाज्जनाक्तनयनस्य
पुंसो वंशे चाक्षुषस्पार्शनयोः साक्षात्कारयोर्विषयकृतविशेषाभावेपि जातिभेदादेवोरगभ्रमनिवर्तकत्वानिवर्तकत्वे; तथा विषयकृतविशेषाभावेपि सामान्यप्रत्यासत्यजन्यं ज्ञानं संशयविरोधि। न तु तज्जन्यम्। कारणवैजात्यप्रयुक्ताद्वैधर्म्यात्।।
एतदप्युक्तम्-- सामान्यत इति। सामान्यप्रत्यासत्तिमपेक्ष्येत्यर्थः।।
अथवा संशयविरोधित्वे न २ घटत्वप्रकारकत्वमात्रं तन्त्रम्।

-

ननु -- शङ्घगतरेखोपरेखपरिमाणादिविषयकत्वं साक्षात्कारस्यास्ति नत्वनुमितेरतः कथं विषयकृतविशेषाभावः। मैवम्। यद्विषयकत्वेन भ्रमविरोधित्वं तदम्शे विशेष्यस्याभिप्रेयतत्वात्। न हि श्वैत्यांशे द्वयोः कश्चिदपि विशेषोस्तीति भावः। निवर्तकत्वानिवर्तकत्वे इति।। ३ यथायोगमन्वयो न तु यथाक्रमम्। चाक्षुषत्वजात्याक्रान्तस्यानिवर्तकत्वं प्रत्युतभ्रमजनकत्वमेव स्पार्शत्वजातियुक्तस्य न निवर्तकत्वमित्यर्थः।। न तु तज्जन्यमिति।। प्रमेयत्वज्ञानं च प्रमेयत्वरूपसामान्यप्रत्यासत्तिजन्यमिति वाक्यशेषः।। इत्यर्थ इति।।

-

१.कारणे वै- क कारणवै- ग.रा. २.त्वे घ-क.रा. ३.त्वं घ-ग. ३.यथाक्रममन्वयः चाक्षुषेति निर्दोषचाक्षुषेत्यर्थः न तु तज्जन्यमिति इत्यस्ति-ठ.

-

प्रत्वाभित्वयोर्व्याहे-खक्त-साप्र-ङ्गङ्गः) व्याप्तिवादः पु - ५७.

-

किंतु विरोधिकोट्यव्यावृत्तरूपानालिङ्गतघटत्वप्रकारकनिश्चयत्वम्। तच्च घटोयमिति निश्चयोस्ति। न तु प्रमेयमिति निश्चये। तत्र घटत्वस्य विरोध्यव्या १
वृत्तप्रमेयत्वालिङ्गितत्वेन प्रकारत्वात्।।
नन्वेवं चेत्-- प्रमेयत्वविशिष्टघटत्वानयं इति ज्ञानमपि संशयविरोधि न स्यात्। तत्र घटत्वस्य विरोधिसाधारणप्रमेयत्वालिङ्गितत्वेनैव प्रकारत्वा१ दिति चेन्न। उदाहृतज्ञाने घटत्ववत्वस्य प्रमेयत्वालिङ्गितत्वेनाप्रतीतेः। प्रमेयमितिज्ञाने तु स्वस्मिन्भासमानस्य सर्वस्यापि प्रमेयत्वालिङ्गितत्वेन प्रतीतेः।।

-

यद्यपि सिद्धान्ते सामान्यप्रत्यासत्तिर्नास्ति। अनुगतधर्मा २ पाकरणात् पूर्वपरिच्छेदे। तथापि परमतावष्टम्भेनेदं समाधानम्।।
यद्वा सामान्यं तु समानानां सदृशानां भावः सामान्यमिति सादृश्यमेवेत्यनुगतजातिभङ्गोक्तिदिशा प्रमेयत्वविशिष्टसादृस्यप्रत्यासत्तिं वा प्रमयेनिष्ठसादृश्यरूपप्रत्यासत्तिं वापेक्ष्येति स्वमतरीतिरेवेयमपीति ध्येयम्।।
संशयविरोधित्व इति विभागः। न तत्रमिति नञोन्वयः। विरुद्धेति ३। विरुद्धा या कोटिः तदव्यावृत्तं तस्यां विद्यमानं यद्रूपं यो धर्मः तदनालिङ्गितेत्यर्थः। उदाहृतज्ञान इति।। प्रमेयत्वविशिष्टघटत्ववानयं इत्युक्तज्ञानाकार इत्यर्थः।। घटत्ववत्वस्येति।।

-

१.व्यावर्तकप्र-ग.रा. २.र्मनिराकरणात्-ठ. ३.विरोधीति विरोधिनी या को-ठ.

-

पु-५८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-

एतदप्युक्तं सामान्यत इति। विरोधिकोट्यव्यावृत्तधर्मालिङ्गितत्वेनेत्यर्थः।। यद्वा सामान्यप्रत्यासत्तिसापेक्षं ज्ञानं, घटस्य प्रमेयत्वेनैव सह गुणप्रधानभावलक्षणसंबन्धं गृह्णाति न तु घटत्वादिना सह तदा तदग्रहेपि अन्यदा तद्ग्रहसंभवेन हान्यभावादिति न संशयविरोधि।।
एतदप्युक्तं सामान्यत इति। गुणप्रधानभावरूपसंबन्धं विनेत्यर्थः।।
यद्वा व्याप्तिज्ञानं विप्रकृष्टव्याप्यांशे न निश्चयरूपं किंतु संभावनारूपम् व्याप्त्यंशे तु निश्चयरूपमिति नरसिंहाकारमिति न कोपि दोषः। अत एव पद्धतौ 'यद्यन्यत्रापि धूमः स्यात्तर्हि तस्याप्येवमित्येवं व्याप्तिग्रहो भवतीत्यतः कात्रा १ नुपपत्तिरि'त्यनेनैतमेव पक्षमुक्त्वा 'एतेन प्रमेयत्वाभिधेयत्वयोर्व्याप्तिं गृङ्णतः
सार्वज्ञ्यप्रसङ्ग इत्यपि परास्तिमि'त्युक्तम्।

-

घटत्व २ स्यैव तदालिङ्गितत्वप्रतीतेरिति भावः। गुणप्रधानभावेति।। विशेषणविशेष्यभावेत्यर्थः। पद्धत्यनुरोधेन पक्षान्तरमाह-- यद्वा व्याप्तिज्ञानमिति।। न निश्चयरूपमिति विभागः। संभावनारूपं उत्कटकोटिक ३ संशयरूपम्।। न कोपीति।। सार्वज्ञ्यापत्तिदोषो वा संशयाद्यभावापत्तिदोषो वा नेत्यर्थः। एवंरूपं ज्ञानमदृष्टचरमित्यतोलौकिकवैदिकदृष्टान्तावाह-- दृष्यत इति।।

-

१.का वा नु-ग.रा. २.वत्व-ड. ३.टिसं-ट.ड.

-

प्रत्वाभित्वयोर्व्याहे-खक्त-साप्र-ङ्गङ्गः) व्याप्तिवादः पु - ५९.

-

दृश्यते हि यद्यतिथिरागच्छे १ त्तर्हि भोजयितव्यः यदि रथंरसामा सोमः स्यादैन्द्रवायवाग्रात् गृह्णीयादि २ति वाक्यजन्य ३ ज्ञानस्य निमित्तांशे संभावनात्वेपि तस्मिन्सति नैमित्तिकं कार्यमित्यंशे निश्चयत्वम्।।

एतदप्युक्तं सामान्यत इति। सांमुग्ध्येन निर्धारणौदासीन्येनेत्यर्थः। अन्यथा तवापि सर्वं खल्विदं ब्रह्मेत्यादिवाक्यार्थदीर्न स्यात्। सर्वशब्दप्रयोगाश्च न स्यात्। सार्वज्ञ्यापत्तिरित्यापादनं च न स्यादित्युक्तम्।।

इति प्रमेयत्वाभिधेयत्वयोर्व्याप्तिग्रहे खण्डनोक्तसार्वज्ञ्यप्रसङ्गभङ्गः।।४।।

-

यदि रथंतरेति।। सोमो ज्योतिष्टोमः। ज्योतिष्टोमे हि रथंतरं पृष्टं बृहत्पृष्टं भवतीति वैकल्पिके रथंतराख्यबृहदाख्यसामनी श्रुते तथाग्निदेवतेत्युपांशुमासादयति सोमो देवतेत्यन्तर्याम्यस्येत्यादिनोलूखलाकाराः ग्रहशब्दिताः पात्रविशेषाश्च श्रुताः। तत्र सोमो ज्योतिष्टोमो यदि रथन्तराख्यसोमयुक्तः स्यात् तदा ऐन्द्रवायव एवाग्रः प्राथमिको येषां तानैन्द्रवायवाग्रान्गृह्णीयादित्यर्थः। विचारितं चैतद्वाक्यं द्वितीयस्य तृतीयपादीयाद्यनये।। अन्यथेति।। पूर्वोक्तपक्षषट्केऽन्यतमस्याप्यनङ्गीकार इत्यर्थः।। तवापीति।। खण्डनकारस्यापीत्यर्थः।।

इति प्रमेयत्वाभिधेयत्वयोर्व्याप्तिग्रहे खण्डनोक्तसार्वज्ञ्यप्रसङ्गभङ्गः।।४।।

१.त्स भो-ट. २.त्यादि वा-ट.रा. ३.न्यस्य ज्ञा -ट.

-

अथ पक्षतावादः ।। २ ।। ११-६-२००१.
अथ परोक्तपक्षलक्षणभङ्गः ।। ५ ।।
अथ पक्षता निरूप्यते।
तत्र न तावत्सन्धिग्धसाध्यधर्मा धर्मी पक्षः।

अथ पक्षतावादः ।। २ ।।
अथ परोक्तपक्षलक्षणभङ्गः ।। ५ ।।
एवमनुमानवक्षणं तदङ्ग १ व्याप्तिस्वरूपं तन्निश्चयोपाय २ मुक्त्वा तत्र बाधकं च निरस्येदानीमनुमानसहकारिसंपत्तिरूपावसरप्राप्ता पक्षता निरूप्यत इत्याह-- अथेति।। यद्वाऽनुमानस्य द्वयं सामर्थ्यं व्याप्तिः समुचितदेशवृत्तित्वं च। तत्रान्त्यमपि द्वेधा। पक्षधर्मतारूपा तदन्यरूपा चेति। कयोश्चित्समानदेशकालयोः कयोश्चिद्भिन्नदेशकालयोरित्यादिपद्धत्युक्तेः। तथा च क्वाचित्कपक्षधर्मतासापेक्षत्वात्सा निरूप्यत इत्याह -- अथेति।। तत्र पक्षतानिरूपणे कार्ये सतीत्यर्थः। संदिग्धसाध्यधर्मेति।। साध्यधर्मेत्येवोक्तौ सपक्षस्यापि पक्षतापातात्संदिग्धेत्युक्तम्। धर्मिपदं स्पष्टार्थमित्येके। प्रामाणिकत्वकथनायेत्यन्ये। साधनेतिव्याप्तिवारणाय धर्मिपदम् १ धर्मित्वं च साध्यापेक्षया ध्येयमिति प्रेक्षावन्तः।।

१.भूतेत्यधिकम्-ठ. २.यं चोक्त्वा - ठ. ३.मितिप्रेक्षा-ठ.ड. म् देय- मिति प्रे-ठ.

पक्त-पलक्ष-भङ्गः) पक्षतावादः पु - ६१.

अनुमतिकाले संदेहस्यासत्वेन विशेषणत्वायोगात्। उपलक्षणत्वेऽतिप्रसङ्गात्। असंदेहेपि सामग्रीबलादनुमितिदर्शनाच्च।।
नापि साधकमानाभावो यत्र स पक्षः।

अत्र संदिग्धं च तत् साध्यं च संदिग्धसाध्यं संदिग्धसाध्यं धर्मो यस्येति बहुव्रीहौ सति 'धर्मादनिच्केवलादि'त्यनिच्प्रत्ययः। १ तत्र हि केवलादिति न धर्मविशेषणम्। किंतु बहुव्रीह्याक्षिप्तपूर्वपदस्य विशेषणम्। तेन पूर्वपदीभवतः केवलादन्यनिरपेक्षात्परो यो धर्मशब्दस्तदन्तादित्यर्थो भवति। तथा च संदिग्धसाध्यपदस्य बहुव्रीहौ पूर्वपदीभवतोऽन्यनिरपेक्षत्वाद्भवत्यनिजिति २ ध्येयम्। ३ एतच्च धातुवृत्तौ व्यक्तम्। उक्तविग्रहपक्षे कैवल्यस्य धर्मविशेषणत्वेप्यस्ति प्रत्ययप्राप्तिरित्यप्याहुः।।
असत्वेनेति।। परामर्शात्पूर्वं लिङ्गदर्शनव्याप्ति ४ स्मरणादिना तस्य नाशादिति भावः। अतिप्रसङ्गादिति।। सिद्धिदशायामपि पक्षतापत्तेरिति भावः। व्यतिरेकव्यभिचार चाह-- असंदेहेपीति।। घनघर्जितादिस्थल इति भावः। यत्रेति।। यन्निष्ठसाध्यविषये। यद्वा साध्यसाधकमानाभावो यत्र पर्वतादिप्रदेशे स इत्यर्थः। एवमग्रेपि। श्रोतव्यो गुरूपदेशेन ज्ञातव्यो मन्तव्यो युक्त्यनुसंधानरूपमननोत्पन्नानुमितिरूपज्ञानेन विषयीकर्तव्य इत्यर्थः।

१.यदातु धातु वृत्युक्तदिशा केवलादिति न धर्मविशेषणं किंतु इत्यस्तु -ठ. २.ध्येयमिति न -ट.ड. ३.यदा तु 'वृत्तौ पञ्चमान्त्यपादे केवलात्पूर्वपदात् न पदसमुदायात् इत्युक्तदिशाथः। तदा निजत्रचिन्त्यः। असत्वेनेति-ठ. ४.कोटीत्यधिकम्-ड.

श्रोतव्यो मन्तव्य इत्यादौ साधके सत्यपि पक्षत्वदर्शनात्। विपक्षस्यापि तत्प्रसङ्गाच्च।।
नापि बाधकमानाभावो यत्र स पक्षः। स पक्षस्यापि तत्प्रसङ्गात्।।
नाप्यभावद्वयं यत्र स पक्षः। मन्तव्य इत्यादौ तदभावेपि पक्षत्वात्।।
नापि साधअयवत्तया विषाधयिषाविषयो यः स पक्षः। अनिच्छा २ यामप्यनुमितिदर्शनात्।।
ननु -- सिषाधयिषाविरहसहकृतसाधकमानाभावो यत्र स पक्षः।

साधके सतीति।। श्रवणशब्दितं उपदेशजन्यं यज्ज्ञानं तस्मिन्सत्येव तत्समानविषयश्रवणानन्तरभाविमनन ३ रूपानुमानेन श्रवणविषयार्थानुमित्यनुदयेन मननवैयर्थ्यापत्तेरिति भावः।। विपक्षस्येति।। साध्याभाववतः। तत्र साध्याभावसाधकस्यैव सत्वेन साध्यसाधखस्याभावात्। अनेन सपक्षस्यापीत्येतदपि व्याख्यातप्रायम्। तदभावेपीति।। श्रवणादिरूपसाधकस्यैव तत्र सत्वेनाभावद्वयाभावेपि पक्षतासत्वादित्यर्थः। नापि साध्येति।। साध्यवत्वेन साधयितुमिच्छा साध्यवत्तया सिषाधयिषा तद्विषय इत्यर्थः। अनिष्टायाः अनिष्टविषयायाः। इच्छां प्रत्यविषयीभूतपदार्थविषयाया इत्यर्थः।।
मणिकृता सिद्धान्तितमिपि लक्षणमाशङ्कते-- नन्विति।।

१.यः स इति नास्ति-ट.रा. २.च्छयानुमितिद-क. ष्टाया-ग.ट.रा. ३.'श्रवणविषयार्थस्यानुमानेन तत्र पक्षताभावे अनुमित्यनुदयेन'इत्यस्ति-ट.ड. नेन श्र इत्यस्ति-ठ.

एवं च मन्तव्य इत्यतर् सिषाधयिषाविरहरूपविशेषणाभावात् घनगर्जितेन मधानुमाने साधकमानरूपविशेष्याभावात् सिषाधयिषोः पुंसो धूमानुमाने उभयाभावाद्वि १ शिष्टाभावाद्विशिष्टाभावोऽनुगत इति तत्रतत्र २ पक्षतायुक्ता। यत्र तु सिषाधयिषा ३ विरहयुते स्पष्टदृष्टे घटादौ विशेषणं विशेष्यं चास्ति न तत्र पक्षतेति चेन्न। असिषाधयिषोर्धूमानुमाने घनगर्जितेन मेघानुमाने चानुमितेः पूर्वं लिङ्गपरामर्शरूपसधखमानस्य सत्वेनापक्षत्वापातात्।।

मण्युक्तविवरणपूर्वकं प्रागुक्तदोषा नेत्याह-- एवं चेति।। एवं पक्षलक्षणे सतीत्यर्थः। सिषाधयिषोरित्येतत्सिषाधयिषाविरहरूपविशेष ४ णाभावोपपादनायोक्तम्। उभयेति।। साधकमानस्य सिषाधयिषाविरहस्य चाभावादित्यर्थः। एवमव्याप्तिं निरस्यातिव्याप्तिं च निराह-- यत्रत्विति।। विशेषणमिति।। सिषाधयिषाविरहः प्रत्यक्षरूपसाधकमानं चास्तीत्यर्थः। असिषाधयिषोरिति।। एतच्च सिषाधयिषाविरहरूपविशेषणसद्भावायोक्तम्। एवं च तत्र विशेषणविशेष्ययोर्द्वयोरपि सत्वेनान्यतराभावेन वोभयाभावेन वा न विशिष्टाभावस्तत्रास्तीत्यव्याप्तिरिति भावः।।

१.विशिष्टाभावादिति नास्ति-ट.क.ग.रा. २.पुनः तत्रेति नास्ति-क.ग.ट. प्रथमतोपि नास्ति-रा. ३.रहिते-क.ग.ट. ४.षोप-ट. षाभावो-ड.

अथ मतम्--

सिषाधयिषाविरहसहकृतसिद्ध्यभावो यत्र स पक्षः। अनुमितेः पूर्वं च साधकमानत्वेपि न साध्यस्य सिद्धिरस्तीति तत्र पक्षता युक्ता।।
ननु -- एवं सति संशयाननत्रप्रत्यक्षस्थले पक्षता स्यात्। तत्र पुरुषत्वसिद्धिरूपविशेष्याभावेन विशिष्टाभावसंभवात् । तस्मात्सिषाधयिषाविरहसहरकृतसिद्धितत्करणान्यान्तत्वा १ वच्छिन्नाभावो यत्र स २ एव च पक्षः।

पक्षधराद्युक्तविवक्षामाशङ्कते- अथ मतमित्यादिना -- मैवमित्यन्तेन।। संशयानन्तरेति।। स्थाणुर्वा पुरुषो वेति संशयानन्तरं पुरुषत्वव्याप्यकरादिरूपविशेषदर्शनानन्तरं पुरुष एवायमिति जायमानप्रत्यक्षस्थल इत्यर्थः। संशयानन्तरप्रत्यक्षस्थले दोषपरिहाराय यज्ञपितनोक्त समाधिं पक्षधराद्युक्तदोषेण पूर्वपक्षिमुखेनैव निरसितुमाह-- तस्मात्सिषाधयिषेति।। सिद्धितत्करणान्यतरत्वावच्छिन्नेत्यस्य निष्कर्षेणार्थो ३ न्यान्यत्वेति।। सिद्धितत्करणाभ्यां यदन्यत् जगत् तदन्यत् सिद्धिस्तत्करणं च तत्वेनेत्यर्थः। अनुगत्यर्थमान्यान्यत्वावच्छिन्नेत्युक्तम्। अन्यान्यत्वावच्छिन्नप्रतियोगिताकाभाव इत्यर्थः। प्रागुक्तदोषं निराह-- एवं चेति।। नन्वेवं ४ धूमादिस्थेप्युक्तदिशा लिङ्गपरामर्शसत्वात्पक्षता नस्यादित्यत आह-- धूमेति।।

१.त्वलिङ्गाभावो-क. २.सपक्षः-ग.ट.रा. ३.र्थोन्यान्यत्वे-ट.ठ.ड. ४.एवं च संशयोत्तरप्रत्यक्षस्थले इत्युक्तदिशा- ठ.

एवं च संशयानन्तरप्रत्यक्षस्थले च सिद्धेरभावेपि पुरुषत्वव्याप्यकर १ चरणादिरूपसिद्धिकरणस्य सत्वान्न पक्षता। धूमानुमाने तु पक्षता युक्ता।

क २ रणशब्देनानुमितिजनकपरामर्शेतर ३ तत्करणस्याभिप्रेतत्वादिति चेन्न। तत्र पक्षताया इष्टत्वात्।।
नचैवं तत्रानुमितिरेव स्यान्न तु पक्षत्यक्षम्। अनुमितिसामग्र्याः बलवत्वात्। अन्यथा धूमानुमानेपि लिङ्गपरामर्शानन्तरं तदनुव्यवसाय एव स्यन्न त्वनुमितिरिति वाच्यम्।

परामर्शेति।। एवं चेदपि संशयोत्तरप्रत्यक्षस्थले पुरुषत्वव्याप्यकरादिदर्शनरूपपरामर्शसत्वेपि
तदितरपत्यक्षरूपसिद्धिकरणस्यापि सत्वान् ४ तत्र पक्षतापत्तिरिति भावः।।
अतमतमिति शङ्किकतैव निराह-- तत्रेति।। संशयोत्तरप्रत्यक्षस्थले। तथा च तदर्थं सिद्धितत्करणान्यानयत्वेत्यादि न वक्तव्यमिति भावः। एतेन तत्र पक्षताविरहदर्शना ५ त्पक्षतासत्वस्य तत्र ६ केनाप्यकथनादिति मणिकण्ठोक्तं नादर्तव्यमित्युक्तं भवति। तदनुव्यवसाय इति।। परामर्शोत्पत्यनन्तरं परामर्शानुव्यवसायं प्रतिबध्यानुमितेरैवोत्पादोभ्युपगतोऽनुमितिसामग्र्या बलवत्वयुक्तिमाश्रित्य तन्न स्यात् इत्यर्थः। एतच्च ज्ञानस्य बुभुत्सितग्राह्यत्वमतमाश्रित्योक्तम्। अबुभुत्सितग्राह्यत्वे तु स्यादेवानुव्यवसाय इति ध्येयम्। परामर्शस्य चरमकारणत्वं च ७ स्वस्य ज्ञातैकसत्वेन स्वप्रत्यक्षाजनकत्वेनेति ध्येयम्।

१.रादि दर्शनरूप-- क.ग.ट.रा. २.अत्र सर्वत्र का इत्यस्ति-ट. ३.रकरण -क.ग.रा. ४.त्तत्र पक्षतानापत्तिः-ठ.ड. ५.तत्रेत्यधिकम्-ठ. ६.तत्रेति न -ठ. ७.व्यवसायत्वेन स्वप्र-ठ.

संशयानन्तरप्रत्यक्षस्थले विशकलितयोर्व्याप्तिपक्षधर्मता १ ज्ञानयोः सत्वेपि लिङ्गपरामर्शाभावात्। साक्षात्करोमीत्यनुव्यवसायेन समानविषये फलवबलेन प्रत्यक्षसामग्र्याः प्राबल्यकल्पनाच्च।।
ननु -- तथात्वे तत्रनुमितत्सायां सत्यामप्यनुमितर्न स्यात्। अनुमित्सयापि हि पक्षतैव संपाद्या।

न त्वनुमितिरिति।। अनुव्यवसायेन परामर्शनाशेनानुमितिकारणाभावादिति भावः। विशकलितयोरिति।। करादिः पुरुषत्वव्याप्यः। अयं च करादिमानित्येव तत्र धीर्नतु पुरुषत्वव्याप्यकरादिमानयमितित धीरित्यनुमितिसामग्र्यभावादेव नानुमितिर्न तु पक्षताविरहादिति भावः। तत्राप्यस्तु परामर्श इति वादिनं प्रत्याह-- साक्षादिति।। समाने विषय इति।। एवं च परामर्शे २ ऽनुव्यवसायजनयित्वानुमितिजनकत्वं युक्तम्। समाने विषये प्रत्यक्षसामग्र्या बलवत्त्वेपि भिन्ने विषयेऽनुमितिसामग्रीबलवत्वसंभवादिति भावः।। तथात्व इति।। संशयोत्तरप्रत्यक्षस्थे पक्षतासत्वेपि प्रत्यक्षसामग्रीप्राबल्येन प्रत्यक्षस्यैवोत्पादाङ्गीकारे सतीत्यर्थः। तत्र संशयोत्तरप्रत्यक्षस्थले । अनुमित्सा सिषाधयिषापदे नात्राभिमता। न तु सिद्धिसामान्येच्छा । श्रवणानन्तरभाविनो मननस्यानुदयापत्तेरिति भावेनानुमित्सापदप्रयोगः। अनुमित्सयापिहीति।।
सिषाधयिषाविरहरूपिवशेषणस्याभावप्रयुक्तविशिष्टाभावसंपादनद्वारा विशिष्टाभावरूपपक्षतैव संपाद्येत्यर्थः।।

१.तयोः -क. २.र्शानु- ठ.ड.

त्वयाच पक्षतायां सत्यामपि प्रत्यक्षसामग्रीबलवतीति १ कल्पनादिति चेन्न। उभयत्र पक्षतायां सत्यामपि फलबलेनानुमित्सा प्रबलप्रत्यक्षसामग्रीरूपप्रतिबन्धकविरोध्युत्तम्भिका। तथा २ चानुमित्सायाः पक्षतासंपादकत्वाभावेपि प्रतिबन्धकप्रत्यक्षसामग्र्यामुत्तेजकत्वात्। त्वयापि हि
सिद्धिरूपप्रतिबन्धकविरोध्युत्तम्भकत्वेनैव सिषाधयिषा पक्षतायां प्रवेशिता।।

त्वया चेति।। संशयोत्तरप्रत्यक्षस्थले पक्षतास्तीति वादिना चेत्यर्थः। उभयत्रेति।। ३ धूमानुमाने संशयोत्तरप्रत्यक्षस्थले चेत्यर्थः। फलेति।। अनुमिनोमीत्यनुभवसिद्धानुमितिरूपफलबलेनेत्यर्थः। अनुमित्सा विरोध्युत्तम्भिकेत्यन्वयः। अनुमितिप्रतिबन्धकस्य यद्विरोधि तदुत्तम्भिकेत्यर्थः। कल्पनादिति।। अनुमित्सादशायां अनुमितिर्न स्यादिति दोषो नेति येज्यम्। परस्यापि सम्मतमेतदित्याह-- त्वयापीति।। यज्ञपतिनापीत्यर्थः। सिषाधयिषाविरहसहकृतसिद्धीत्यादिवदता सिषाधयिषाविरहे सित सिद्धिः प्रतिबन्धिका तस्यां तु सत्यां नेति कृत्वा तादृशसिद्ध्याद्यभावः पक्षतेत्युक्तत्वादिति भावः।।
नन्वेवमनुमित्साविरहसहकृतप्रत्यक्षसामग्र्या बलवत्त्वेनानुमिति प्रतिबन्धकत्वे तादृशसामग्र्यभावः तादृशसिद्ध्यभावश्च द्वयमप्यनुमितौ कारणमिति विनिगमकाभावात्पक्षतात्वमुभयोरप्यस्त्विति चेन्न। द्वयोः कारणत्वाविशेषेपि लाघवात्सिद्ध्यभाव एव पक्षतारूपपक्षपदप्रवृत्तिनिमित्तम्।

१.त्युक्तमिति चेन्न -ग.ट.रा. २.तथाचानुमित्साविरह सहकृतप्रत्यक्षसामग्रीबलवतीति कल्पनात् -ग.ट.रा. ३.अनुमित्सावति तदभाववति चेत्यर्थः इत्यधिकम् -- ठ.

पु-६८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

तस्मात्सिषाधयिषाविरहसहकृतसिद्ध्यभावो यत्र स १ पक्ष इति चेत् - मैवम्।।
सत्यां सिद्धौ असत्यामपि सिषाधयिषायामनुमितिदर्शनात्। दृश्यते ह्यसंदिहानस्यापि आप्तवाक्याद्वह्निं
निश्चितवतोपि गिरिशिखरे अभ्रंलिहां धूमरेखां पश्यतो दैवाव्याप्तिस्मरणे सति अननुमित्सोरनुमितिः। न हि सामग्री प्रेक्षावती। येन मया कर्तव्यमन्येन कृतमिति पर्यालोच्योदासीत। अनुभवानुसारेण हि लक्षणं कल्प्यम्। न तु स्वकल्पितलक्षणरक्षणार्थमनुभवपीडा। अस्ति चात्र न केवलं वह्निः श्रुतः किं त्वनुमितोपीत्यनुभवः।

न त्वधिकम्। गौरवात्। किञ्चान्यान्यत्वावच्छिन्ना भावत्वेन न जनकत्वम्। मण्यादिस्थलेपि मन्त्रान्यान्याभावत्वेनापि हेतुतापत्या प्रतिबन्धकाभावकूटः कारणमिति सिद्धान्तभङ्गापत्तेः। तृणाद्यन्यान्यत्वेनापि हेतुतापत्या
कार्यवैजात्यासिद्धिप्रसङ्गादित्याद्यभिप्रायेण 'अत्र मतमि'त्यादिशङ्किता स्वमतमुपसंहरति-तस्मादिति।। इदमपि लक्षणमव्याप्तिरिति भावेन --
'असिद्धसाधने दोषः को व्याप्तिर्यदि विद्यते'।
इति भक्तिपादीयानुव्याख्यानसुधोक्तं हृदिकृत्वा निराह-- सत्यामित्यादिना ।। तत्र विशेषणविशेष्ययोर्द्वयोरपि सत्वेनान्यतराभावप्रयुक्तस्योभयाभावनिमित्तकस्य वा

विशिष्टाभावस्याभावाद्व्याप्तिरिति भावः। न च २. पक्षतैव नेति वाच्यम् अनुमितिरूपफलदर्शनेन तत्र पक्षताया आवश्यकत्वादित्याह-- दृश्यते हीति।। अनुभव एव नास्तीत्यत आह-- अस्ति चेति।।

१.एवेत्यधिकम्-ट.रा. २.तत्रेत्यधिकम्-ट.ड. तत् इत्यधिकम्-ठ.

अत्रानुमित्साकल्पने च घटनगर्जितेन मेधानुमानेपि सा कल्प्यताम्। योग्यानुपलब्धिबाध १ श्चोभयत्रापिसमः। न च छिन्ने छिदान्तरमिव परिच्छिने पिरच्छेदान्तरमशक्यम्। चैत्रेण ज्ञातेर्थे मैत्रस्य, चैत्रस्यैव कालान्तरे ज्ञानान्तरस्य, तदानीमपि प्रत्यक्षसिद्धे शाब्दज्ञानान्तरस्य, प्रत्यक्षधारावाहिज्ञानान्तरस्य, शब्दलिङ्गाभ्यां निश्चितेप्यर्थे सामग्रीवशाच्छाब्दलैङ्गिकज्ञानान्तरस्य, दर्शनात्।।

ननु तत्र फलबलेनानुमित्सैव कल्प्यतां एवं चानुमित्साविरहरूपविशेषणाभावप्रयुक्तविशिष्टाभावरूपपक्षतासत्वान्नदोष इत्यत आह-- अत्रेति।। घन २ गर्जितेनेति।। एवं च ३ तत्र विशेषणसत्वमुपेत्य साधकमानरूपविशेष्याभावप्रयुक्तविशिष्टाभावोक्त्या पक्षत्वोपपादनमसङ्गतं स्यादिति भावः। तत्रानुमित्सा योग्याननुभवबाधितेत्यत आह-- योग्वेति।। इच्छाया योग्यत्वात्तदनुपलब्धेर्योग्यानुपलब्धित्वाद्योग्यानुपलब्धीत्युक्तम्। किं परिच्छेदान्तरं कस्यापि नास्तीति अथ परिच्छेत्तुरेव नेति अस्मिन्पक्षेपि कालान्तरे ४ नास्त्युत तदा तदेत्यत्रापि प्रमाणान्तरेण नास्ति उत पूर्वपरिच्छेदजनकप्रमाणेन शब्दलिङ्गाभ्यां परिच्छिन्ने पुनस्ताभ्यामेव परिच्छेदान्तरे नेति कल्पान्क्रमेण निराह-- चैत्रेण ज्ञात इति।।

१.धस्तू भ-ट.ग. २.घटपदं न- ठ.ट. ३.एवं च इति न -ट. तत्रेत्यपि न - डः. ४.रोपि न -ड.

पु - ७०. न्यायदीपुयततर्कताण्डवम् (तृ.परिच्छेदः

किञ्च मणिमन्त्रादिवत्सिद्धेः प्रतिबन्धकत्वे सिद्धे विशिष्टाभावस्य कारणत्वं सिद्ध्येत्। न च तदस्ति।
सिद्धेर्बाधवत्साक्षाद्विरोधिविषयत्वाभावात्।
व्यभिचारज्ञानवद्धेतुविघटकत्वस्याप्यभावात्।
मण्यादिवदन्वयव्यतिरेकयोरप्यभावात्।।
अपि च यदि विरोध्यविषयिण्यपि सिद्धिः सिषाधयिषाविरहसहकारिसंपत्या समानविषया १ नुमितिप्रतिबन्धिका
तर्हि लिङ्गज्ञानमप्युपाधिज्ञानसहकृतं साक्षादेवं लिङ्गपरामर्शप्रतबन्धकं स्यात्। न तु व्यभिचारधीद्वारा।।
न च सिद्धेरविरोधित्वेऽनुमितिधारा न विच्छिद्येनेति वाच्यम्।

ननूक्तस्थले सर्वत्र फलबलात्प्रतिबन्धकीभूतसिद्धेरुत्तेजकं किंचित्परिकल्पनीयम्। अन्यथा प्रतिबन्धके सति कार्योदयस्य दुर्घटत्वादित्यत आह-- किं चेति।। प्रतिबन्धकत्वं सिद्धेः किं ग्राह्याभावावगाहित्वेनोत सिद्ध्यन्तर २ विघटकत्वेनान्वयव्यतिरेकाभ्यां वा न ३ त्रयमपीति क्रमेण निराह-- सिद्धेर्बाधवदित्यादिना।। सिद्धेः ४ प्रतिबन्धकत्वे साधकं नेत्युक्त्वा बाधकमप्याह-- अपि चेति।। लिङ्गज्ञानमिति।। महानसादौ गृहीतव्याप्तिकस्य पर्वते यल्लिङ्गदर्शनं तदित्यर्थः। सिद्धेरप्रतिबन्धकत्वेऽनुमित्यविच्छेदो वा सिद्धसाधनत्वस्यादोषत्वं वा स्यादित्यत आद्यं बाधकं तावदाशङ्क्य

निराह-- न चेति।। शाब्दबोधकस्थले सिद्धेरप्रतिबन्धकत्वेन तत्रापि शाब्दबोधपरंपरापत्तेः।

१.यकानु-क.ट. यत्वानु-ग.रा. २.कारणेत्यधिकम्-ठ. ३.न केनापीति-ठ. ४.र्बाधकत्वेसा -ठ.

लिङ्गपरामर्शस्य
शाब्दधीकारणीभूतज्ञानवद्विक्षणावस्थायित्वेनानुमितिधाराहेत्वभावात्।
लिङ्गोपहितलैङअगिकभानपक्षस्य निरासात्।।
न च लिङ्गपरामर्शस्य स्थितिक्षणे चैका तन्नासक्षणे चान्येत्यनुमितिद्वयं नियमेव स्यात् तद्धेतोः सत्वादिति वाच्यम्। क्वचिदुत्कटविषयान्तरजिज्ञासया प्रतिबन्धसंभवेन नियमचहेत्वभावात्। कदाचिदनुमितिद्वयापादने च हेतुसत्वेनेष्टापत्तेः। कथं हि विज्ञातं भवता कदाप्यनुमितिद्वयं नास्तीति। अनुमिनोमीत्यनुव्यवसायस्य द्वितीयाभावाविषयकत्वात्।

कारणीभूतस्य शाब्दगोचरज्ञानस्य विनाशेन कारणाभावान्न शाब्दबोधपरंपरेति चेत्समममिहापीत्याह-- लिङ्गपरामर्शस्येति।। ज्ञानवज्ज्ञानस्येव। आत्मलाभरूपजन्मक्षणमप्युपादाय वा विनाशक्षणमप्युपादाय वा द्विक्षणेत्युक्तम्।।
ननु धूमवत्पर्वतोऽग्निमानित्यनुमित्याकारोपगमेनानुमतितिरपि परामर्शरूपेत्यत आह-- लिङ्गेति।। १ स्वतस्त्वानुमानवादे निरासादित्यर्थः। अनुमिनोमीत्यनुव्यवसाय एवानुमितिद्वयाभावे मानमित्यत आह-- अनुमिनोमीति।। द्वितीयं बाधकं निराह-- सिद्धसाधनं त्विति।।

१.प्रामाण्यस्वतस्त्वे अनुमानोक्तिप्रस्तावे निरा- ठ.

पु-७२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

सिद्धसाधनं तु परार्थानुमान एव दोषो न स्वार्थानुमाने इति वक्ष्यते।।
१ तस्मात्प २ क्षता दुर्निरूपेति।।
इति परोक्तपक्षलक्षणभङ्गः ।। ५ ।।
वक्ष्यत इति।। स्वमतेऽनुमानदोषोक्तिवादे। एतेन सिद्ध्यभावस्य पक्षतात्वखण्डनेनैव सिषाधयिषाविरहसहकृतसाध्यनिश्चयाभावः पक्षतेति शिरोमणिपक्षोपि प्रत्युक्तो ध्येयः। पूर्वोक्तदोषाणामत्राप्यनुवृत्तेः उक्तदोषान्संक्षेपेणानुवदन्पूर्वपक्षमुपसंहरति-- तस्मादिति।।
इति मण्युक्तपक्षलक्षणभङ्गः ।। ५ ।।

अथ स्वमते पक्षलक्षणम्।। ६ ।।
उच्यते --
लिङ्गाभिमतस् यत्र यदा यं प्रति यद्विजननानुकूलसहकारिसंपत्तिस्तत्र तदा तं प्रति तत्साध्यम् --

अथ स्वमते पक्षलक्षणम् ।। ६ ।।
'साध्यधर्मविशिष्टः पक्ष'इति मिथ्यात्वानुमानखण्डने भगवत्पादोक्तं पक्षलणमिह विवक्षुः 'लिङ्गेन यत्प्रतीतिर्जनयितव्या स साध्यधर्म'इति टीकोक्तं परिष्कृर्वन्साध्यस्वरूपं तावदाह -- लिङ्काभिमतस्येति।।

१.'तस्मात्परोक्तवक्रपक्षलक्षणेषु सत्यां सिद्धौ असत्यामपि सिषाधयिषायां या अनुपपत्तिस्तत्राव्याप्तिः सिद्धेरनुमितिप्रतिबन्धकत्वे बीजाभावः

लिङ्गज्ञानस्यापि लिङ्गपरामर्शप्रतिबन्धकत्वापातः इति दोषत्रयम्। इत्यधिकम्-ग. ट.रा. २.त्परोक्त पक्षता -ट.

स्वते-पलणम्) पक्षतावादः पु - ७३.

-- तादृशसाध्यविशिष्टस्य तदा तं प्रति तस्यानुमितौ पक्षः।।
न च पक्षताया अप्यनुमितिहेतुत्वेन सहकारिरूपायाः कथं सहकारिसंपत्तिरूपतेति वाच्यम्।

पर्वतोग्निमान्प्र १ मेयत्वादिति व्यभिचारिप्रयोगादाव्याप्तिनिरासाय लिङ्गाभिमतेत्युक्तम्। व्याप्यत्वेनाभिमतस्येत्यर्थः।
समानाधिकरणव्यधिकरणसर्वसाध्यस्वरूपनिर्वचनार्थं यत्र यदेत्याद्युक्तम्। देशान्तरे कलान्तरे पुरुषान्तरं प्रति वस्त्वन्तरज्ञाने चानुकूलसहकारिसंपत्तिमादाय देशान्तरादौ साध्यतापत्तिदोषनिरासाय यत्तच्छब्दचतुष्टयम्। सहकारिसंपत्तिः सहकारिमेलनम्। लिङ्गजन्यानुमतिविषत्वयोग्यत्वं साध्यत्वमिति फलितार्थः।।
एतेन साध्यशब्देन किं संदिग्धो धर्मो विवक्षितः किं वा प्रज्ञापनीयः यद्वा प्रमित्सितः । नाद्यः सत्यां सिद्धावित्यादिपूर्वभङ्गोक्तग्रन्थे निश्चितस्यापि साध्यत्वोक्तिविरोधात्। प्रमाणसंप्लववादिनां निश्चितेप्यनुमानप्रवृत्तिरङ्गीकाराच्च। न द्वितीयः। स्वार्थानुमाने प्रयोज्यकर्तुरभावेन प्रज्ञापनाभावात्। न तृतीयः। अनिष्टानुमानाभआवप्रसङ्गादित्याद्युपप्लवोऽपोढः।
लिङ्गजन्यप्रतीतिविषधर्मस्य २ साध्यधर्मपदेन विवक्षितत्वात्। तस्य कालान्तरादिकमादायातिप्रसङ्गनिवृत्यर्थः यत्र यदेत्येवं निरुक्तत्वात्।।
एवं च पर्वतनिष्ठधूमेन पर्वतीयवह्न्यनुमित्युत्पादनदशायां वह्नेः साध्यत्वं नदीपूरेणोर्ध्वदेशवृष्ट्यनुमित्युत्पादवेलायां वृष्टेः साध्यत्वं कृत्तिकोदयेन

रोहिण्युदयासत्यनुमतिकाले रोहिण्युदयासत्तेः साध्यत्वमित्यादि ध्येयम्। अस्तु साध्यमेवं रूपं ततः किमित्यत आह-- तादृशेति।। उक्तरूपेत्यर्थः। तं प्रति पुरुषं प्रति।। तस्येति।। वह्न्यादिवस्तुनः।

१.न्मेय-ट.ठ. २. साध्यधर्मस्येत्यधिकम् -ठ.

पु-७४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

ममन्मते पक्षताया अनुमितिसहकारिसंपत्ति १ रूपत्वेना २ नुमित्यहेतुत्वात्। त्वन्मतेपि ३ हि पक्षता सिद्धिरूप्रतिबन्धकाभावतया हेतुः। ४ सिद्धेश्च न सिद्धिः प्रतिबन्धिका। किन्त्वनुकूलैवेत्युक्तम्।।
नन्वेवं सति लिङ्गपरामर्शदशायामेव पक्षता न तु ततः प्राक्। ततश्च लिङ्गपरामर्शः कथं पक्षधर्मताविषयकः
स्यादिति चेत्।

अत्रापि कालान्तरे पुरुषान्तरं प्रति वस्त्वन्तरानुमितौ वस्त्वन्तरविशिष्टस्य पक्षताव्युदासाय तदा तं प्रति तस्येत्युक्तिः।।
ननु साध्यधर्मलिषिशिष्टत्वं साध्यधर्मसंबन्धित्वम्। तच्च व्याप्यतया साधनस्याप्यस्तीति तत्रातिव्याप्तिरिति चेन्न। धर्मधर्मिभावेन वैशिष्ट्यस्य विवक्षितत्वात्। साध्यपदं सपक्षादावतिव्याप्तिनिरासाय। साध्यविशिष्टः पक्ष इत्येवोक्ते वस्तुतोग्निविशिष्टपर्वतस्यापि साध्यत्वात्तद्विशिष्टान्यस्य पक्षत्वं स्यात्। तदर्थं धर्मग्रहणम्। न च वह्निरेव साध्यो न पर्वत इति वाच्यम्। वह्निस्वरूपमात्रस्य प्रागेव सिद्धत्वात्। पर्वतसंबन्धित्वेनासिद्धत्वात्तद्रूपेण वह्निः साध्यते इति चेत्तर्हि यथा पर्वत संबन्धित्वेन वह्निः साध्यः तथा पर्वतोप्यग्निसंबन्धित्वेन साध्य एव स्वरूपमात्रसिद्धावपि विशिष्टसिद्धेरुभयत्र समानत्वात्।।

ननु न्यायमते सरकारिसंपत्तिरूपत्वं पक्षतालक्षणसंभवतीत्यत आह-त्वन्मत इति।। उक्तमिति। पूर्वभङ्गे। तथाच तव मतेपि पक्षताया न सहकारित्वमिति भावः। नन्वेवमिति।। अनुमितिसहकारिसंपत्तेः पक्षतात्वे सतीत्यर्थः।

१.रूपपदं न -ग.ट.रा. २.ना सहकारित्वात्-ग.ट.रा. ३.तेहि-ग.रा. ४.सिद्धिं प्रति प्रतिबन्धिका -क.ग.ट.रा.

स्वते-पलणम्) पक्षतावादः पु - ७५.

१ कात्र कथं ता। लिङ्गपरामर्शस्य पक्षधर्मताविषयकत्वं हि न स्वपूर्वकाले स्वकाले च विद्यमाना या पक्षता तदाश्रये व्याप्यवत्वविषयकत्वम्। किं तु स्वकाले वस्तुगत्या विद्यमाना या पक्षता तदश्रये व्याप्यवत्वविषयकत्वम्। लिङ्गपरामर्शकाले च पक्षतास्त्येव। पक्षताज्ञानं तु त्वन्मतेपि नानुमितिहेतुरिति कात्रानुपपत्तिः। सपक्षविपक्षावप्युक्तसहकारिसंपत्तिदशायां पक्षावेव। तदसंपत्तिदशायां पक्षोप्यपक्ष एव। न हि पक्षत्वं जातिः।।
एतदेवाभिप्रेत्य मिथ्यात्वानुमानखण्डनटीकायां 'साध्यधर्मविशिष्टः पक्ष' इति मूलव्याख्यावसरे 'यत्प्रतीतिर्लिङ्गेन जनयितव्या स साध्यधर्म' इत्युक्तम्।

कथं पक्षधर्मताविषयक इति। पक्षताधिकरणवृत्तिर्यो धर्मः त २ द्विषयकत्वस्य ३ पक्षधर्मताविषयकत्वेन पक्षतायाः परामर्शकालतावश्यं भावादिति भावः।।
नन्वेवं पक्षतायाः परामर्शकालीनत्वेन परामर्शस्य तदविषयकत्वात्तस्य चरमकालत्वेन तदनन्तरं पक्षताज्ञानस्याशक्यशङ्कत्वात्पक्षताज्ञानं न हेतुरिति स्यदित्यत आह-- पक्षताज्ञानं त्विति।। त्वन्मतेपीति।। न केवलं

मन्मत इत्यर्थः। प्रतिबन्धकाभावरूपत्वात्प्रतिबन्धकाभावस्य च स्वरूपसत एव हेतुत्वादिति भावः।।
नन्वेवं सपक्षादावपि कदाचिदुक्तसहकारिसंपत्तेः संभवात्पक्षेपि कदाचित्तदसंभवादतिव्याप्त्यव्याप्ती स्यातामित्यत आह-- सपक्षेति।।

१. त्। इत्थम्। लिङ्ग -ग.रा. २.तत्वचि-ट.ठ. ३.यद्धर्मताचि-ट.

पु- ७६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

सुधायामपि वस्तुतस्त्वनुमितिविषयः पक्ष इत्युक्तम्। तत्र हि तव्यप्रत्ययेन विषयशब्देन चोक्तसहकारिसंपत्तिरूपानुमितिविषयत्व १ योग्यतैवाभिप्रेता।।
यद्वा ग्रन्थद्वयोरपि व्यापकवत्त्वेनानुमितिविषयत्वं पक्षत्वमभिप्रेकतम्। व्यापकवत्त्वेन विशेषणे २ न तदनुमितिविषयोरपि ३ व्यापके व्यापकतावच्छेदकादौ च नातिव्याप्तिः। अस्मिंश्च पक्षे लिङ्गपरामर्शदशायामपि
न पक्षता। किं त्वनुमितिदशायामेव। त्वन्मतेप्यनुमितिदशायां सिद्धिविरहगर्भिता पक्षता नास्त्येव। अस्मिन्पक्षे लिङ्गपरामर्शस्य पक्षधर्मताविषयकत्वं तु स्वजन्यफलसमानकालीनपक्षताश्रये व्याप्यवत्त्वविषयकत्वम्।।

साध्यलक्षणे धीपदेन प्रमितेरविवक्षितत्वाद्विपक्षस्यापि ग्रहणं कृतम्। सुधायामपीति।। भक्तिपादे साध्यासिद्धेरदोषत्वोक्तिप्रस्तावे सुधायामित्यर्थः। स्वोक्तं मूलारूढतया दर्शयति-- तत्र हीति।। उदाहृतवाक्यद्वये हीत्यर्थः। संपत्तिरूपा योग्यतैवेत्यन्वयः। योग्यतापक्षमाश्रित्यैकं पक्षमुक्त्वा फलोपधानमाश्रित्य लक्षणान्तरमाह-- यद्वेति।।

ननूक्तपक्षद्वये कदाचिदेव पक्षता प्राप्ता न तु परामर्शात्पूर्वं पश्चाच्चेत्यतस्त्वन्मतेपि तथैव प्रत्युतावश्यकानुमितिवेलायामेव नास्तीत्याह-- त्वन्मतेपीति।। सर्वदा पक्षतासत्वप्रकारमाह-- केचित्विति।।

१.यकत्वे-ग.रा. २.णादनु-ग.रा. ३.येप्य-क. येव्या-ग.रा.

स्वते-पलक्षण्) पक्षतावादः पु - ७७.

केचित्तु -- ग्रन्थयेप्यनुमितिविषयत्वयोग्यतैव पक्षताभिप्रेता। योग्यता च समानाधिकरणाप्रमात्वेनाभिमता या साध्याभावविषया धीस्तदभावः। एवं च जगत्यक्षणिकत्ववा १ दिनि व्यधिकरणायां प्रमात्वेनाभिमतायां क्षिणिकत्व २ वादिनि च समानाधिकरणायां प्रमात्वेनानभिमतायां प्रत्यक्षायामक्षणिकत्वप्रमायां ३ च सत्यामपि क्षणिक ४ वादिनः क्षणिकत्वानुमाने जगतः पक्षता युक्ता।

समानाधिकरणेति।। यत्रानुमित्युत्पादरस्तदधिकरणवृत्तिरित्यर्थः। प्रमात्वेनाभिमतसमानाधिकरणसाध्याभावबुद्ध्यभाव इत्यर्थः। बुद्ध्यभाव इत्युक्तेऽसंभवः। अभावबुद्ध्यभाव इत्यक्तेपि स एव दोषः। ब सत्वात्। प्रमारूपेत्युक्तौ वादिप्रतिवादिनिष्ठपरस्परसाध्याभावबुद्धेः प्रमारूपत्वनियमाभावेन तादृशबुद्धौ सत्यामपि पक्षता स्यात्सा माभूदित्यभिमतेत्युक्तम्। प्रमात्वेनाभिमततादृशबुद्ध्यभाव इत्युक्तेपि व्यधिकरणपुरुषान्तरप्रतिवादिबुद्धिमादायासंभव एवेति समानाधिकरणेत्यादि सर्वमर्थवत्।।
परार्थानुमानस्थे पक्षतालक्षणं लक्ष्यनिष्ठतया दर्शयति। एवं चेति।। क्षणिकवादिनः यत्सत्तत्क्षणिकं यथा दीपादि सच्चेदं जगदित्येव

रूपक्षणिकत्वानुमाने जगतः पक्षतायुक्तेत्यन्वयः। प्रत्यभिज्ञारूपा जगत्यक्षणिकत्वधीस्तावत्क्षणिकवादिनोऽक्षणिकवादिनश्चास्ति। तत्र क्षणिकवादिनः प्रमात्वेनानभिमता।

१.क वा-रा. २.क वा- रा. ३.यां क्षणि-ग.रा. ४.कत्व वा-ग.

पु -७८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

धूमानुमाने महानसे सपक्ष १ व्यवहारस्तु निश्चितव्यापकवत्तया सपक्षत्वस्यापि सत्वात्। उक्तरूपायां पक्षतायां सत्यामपि पक्षत्वाव्यवहारोप्यनुमित्यविषयत्वात्। तत्र पक्षतायां सत्यामपि कदाचिदनुमित्यभावाश्च त्वन्मते २ संशयोत्तरप्रत्यक्षस्थल इव लिङ्गपरामर्शादितत्सामग्र्यभावादित्याहुः।।
इति स्वमते पक्षलक्षणम् ।। ६ ।।

अन्यस्य तु प्रमात्वेनाभिमता। साचानुमातरि क्षणिकवादिनि ३ सत्वात्समानाधिकरणा। अक्षणिकवादिनि सत्वाद्व्यधिकरणा च । तथाच तादृशसाध्याभावबुद्धौ सत्यामपि
समानाधिकरणप्रमात्वाभिमतबुद्ध्यभावात्पक्षतायुक्तेत्यर्थः।
अक्षणिकवादिनि क्षणिकवादिनि चेत्यनन्तरं विद्यमानत्वेनेति शेषः। प्रत्यक्षायां प्रत्यभिज्ञानादिसाक्षात्काररूपायामित्यर्थः। नन्वेवं महानसादावप्युक्तरूपानुमितिविषयत्वयोग्यत्वसत्वात्पक्षता स्यात्। तथाच तत्कार्याणां सपक्षत्वाव्यवहारपक्षत्वव्यवहारानुमितीनामापात इत्यत आह--धूमेति।। पक्षत्वाव्यवहारोपीत्यत्र हेतुरनुमित्यविषयत्वादिति।। लिङ्गपरामर्शादीति।। तत्र यथा विशकलितव्याप्तिस्मरणकरादिरूपलिङ्कदर्शनयोर्भावेपि

व्याप्तिविशिष्टलिङ्दर्शनरूपपरामर्शाभावाद्वा परामर्शसत्वेपि प्रत्यक्षसामग्रीबलवत्त्वेन वा यथा नानुमितिस्तथेत्यर्थः।।
अत्र गौरवमरुचिबीजमित्येके । दैवान्महानसादौ सत्यपि परामर्शे प्रत्यक्षसामग्र्यामसत्यां चानुमित्यापत्या पक्षत्वव्यवहाराद्यापात इत्यन्ये।।
इति स्वमते पक्षलक्षणम्।। ८ ।।

१.क्षत्वव्य -क.ग.रा. २.परमते सं-ग.रा. ३.नो द्विक्षणिकवादिनि सत्वा- ठ.

स्वातो-पाधि-सान्य-लणम्) उपाधिवादः पु - ७९.

अथोपाधिवादः ।। ३ ।।
अथ स्वाभिमतोपाधिसामान्यलक्षणम् ।। ७ ।।
अथोपाधिज्ञानस्य व्याप्तिज्ञानप्रतिबन्धकत्वादुपाधिर्निरूप्यते। साध्यव्यापकत्वे सति साधनाव्यापक १ उपाधिः।।

अथोपाधिवादः ।। ३ ।।
अथ स्वाभिमतोपाधिसामान्यलक्षणम्।। ७ ।।
उपाधिनिरूपणे का पूर्वसङ्गतिरित्याह-- अथोपाधीति।। एवमनुमानोपयुक्तव्याप्त्यादिनिरूपणानन्तरमवसप्राप्तं प्रतिबन्धकस्वरूपं निरूप्यत इत्यर्थः। एतेन यन्मणौ पक्षतोक्तेः प्रागेवोपाधइनिरूपणं तदनवसरदुस्थमित्युक्तं भवति। उपाधिज्ञानं हि द्वेधा व्याप्तिग्रहणकालीनं व्याप्तिग्रहणानन्तरमनुमानप्रयोगकालीनं चेति। तत्राद्याभिप्रायेणोक्तं-- व्याप्तिज्ञानप्रतिबन्धकत्वादिति।। द्वितीय २ स्य प्रतिपक्षतया दोषत्वेनानुमितिप्रतिबन्धकत्वात्। व्याप्तिज्ञानप्रतिबन्धकत्वप्रकारश्च

साध्यव्यापकं परित्यजतो हेतोः साध्यपरित्यागस्यावश्यकत्वादिनोपाधेर्दूषकताबीजोक्तिवादे व्यक्तः।।
'साध्यव्यापकवैलोभ्मव्याप्तिः साधनस्य तु' ।
इति युक्तिपादीयानुव्याख्यानसुधाद्युक्तिं हृदि कृत्वोपाधिसामान्यलक्षणमाह -- साध्येति।। अत्र साध्यपदेन पूर्वोक्तदिशा न लिङ्गजन्यधीविषयत्वं विवक्षितम्।

१. कत्वसु -ग.रा. २.यं प्रति सत्प्रति -ठ.

पु -८०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

ननु -- वायुः स्पार्शनः अनुद्भूतरूपानधिकरणत्वे सति प्रत्यक्षस्पर्शाश्रयत्वात् घटवदित्यादौ पक्षधर्मेण द्रव्यत्वेनावच्छिन्न १ साध्यव्यापके चाक्षुषत्वाद्युपादौ समवायः समवेतः संबन्धत्वात् संयोगवत् इत्यादौ साधनेन संबन्धत्वेनावच्छिन्न --

येन व्याप्तिग्रहदशायां महानसीयधूमादेस्तादृशत्वाभावेन तदुपाध्यार्द्रेन्धनादावव्याप्तिः स्यात्। किंतु व्यापकतावच्छेदकधर्मवत्वमात्रमित्यग्रे व्यक्तम्। धूमाद्यनुमाने २ व्यञ्जनवत्वादेरुपाधिताव्यावृत्यर्थं सत्यन्तम्। तत्रैव प्रमेयत्वादेरुपाधितानिरासाय साधनाव्यापक इत्युक्तिः। साधनेति साधनत्वाभिमतमुच्यते। एवं साध्यपदेनापि।। अत्राविनाभावस्यैव व्याप्तित्वोपगमेनानौपाधिकत्वरूपव्याप्तेरनादरान्नान्योन्याश्रयः।।
उक्तलक्षणस्याव्याप्तत्वशङ्कोत्तरे सुधोक्ते विवरितुमाक्षिपति-- नन्विति।। स्पार्शनं त्विगिन्द्रियवेद्यः। तप्तवारिस्थवह्नावव्यभिचाराय सत्यन्तम्। तन्मात्रस् गगनादावव्यभिचाराया विशेष्यम्।

चाक्षुषत्वाद्युपाधावव्याप्तिरित्यन्वयः। यत्र स्पार्शनत्वं तत्र चाक्षुषत्वमिति स्पर्शगुण एव व्यभिचारेण शुद्धसाध्यव्यापकत्वस्या ३ भावेपि द्रव्यत्वे सति स्पार्शनत्वं यत्र तत्र चाक्षुषत्वमिति घटादौ व्याप्तिदर्शनेन पक्षधर्मावच्छिन्नसाध्यव्यापकत्व ४ स्य सत्वात्तत्राव्याप्तिः।

१.न्नेसा -ग.रा. २.घटादेरुपाधिता -ठ. ३.त्वाभा- ट.ठ.ड. ४.त्वसत्वा- ठ.ट.

स्वातो-पाधि-सान्य-लणम्) उपाधिवादः पु - ८१.

-साध्यव्यापके कृतकत्वाद्युपाधौ चाव्याप्तिः। तत्र स्पार्शनत्वादेरेव साध्यत्वात्। साध्यपदेन --

तथा यत्र समवेतत्वं तत्र कृतकत्वमित्यस्य जात्यादौ व्यभिचारेण कृतकत्वस्य शुद्धसाध्याव्यापकत्वेपि संबन्धत्वे सति समवेतत्वं यत्र तत्र कृतकत्वमिति व्याप्तेः संयोगे दर्शनेन साधनावच्छिन्नसाध्यव्यापकोपाधौ चाव्याप्तिरित्यर्थः। अत्रावच्छिन्नत्वं समानाधिकरणत्वं ध्येयम्। अव्याप्तिं व्यनक्ति-- तत्रेति।। उक्तानुमानद्वये १ न त्ववच्छिन्नं स्पार्शनत्वादिकम्। येनोक्तलक्षणसत्वादव्याप्तिर्न स्यादितिभावः।।
नन्वेतावुपाधिचत्वेनासंग्राह्यौ। किं तु शुद्धसाध्यव्यापक एवेति चेन्न।।
'वक्तृश्रोतृप्रसक्तीनां यदाप्तिरनुकूलता'।
इत्यादा 'अथातो ब्रह्मजिज्ञासा'इत्यादि शास्त्रं प्रमाणमनुकूलवक्त्रादिमत्वादित्यतनुमाने
वाक्यत्वाद्यवच्छिन्नसाधअयव्यापकस्याप्तवाक्यत्वादेरुपाधित्वस्वीकाराद्वक्ष्य माणदूषकताबीजस्यावच्छिन्नसाध्यव्यापकोपाधिसाधारण्याच्चेति भावः।।

यद्यपि समवायस्याप्रामाणिकत्वेन तत्र साध्यहेत्वोर्बाधा १ दिनैव तदनुमानस्य दुष्टतया तत्रोपाधेरनङ्गीकारेपि न क्षतिः। तथापि नोदाहरणमादरणीयमिति न्यायेन ध्वंसो विनाशी जन्यत्वादित्यादौ साधनावच्छिन्नसाध्यव्यापकस्य कृतकत्वादे २ रुपाधित्वेनोदाहरणान्तरसंभवेन च साधनावच्छिन्नसाध्यव्यापकोपाधिप्रदर्शन एव तात्पर्यात्। परमते प्रसिद्धत्वात्सुधायामस्यैवानुवादात्समवायपक्षक एव प्रयोगो दर्शित इत्यदोषः।।

१.धेनैव-ट.ठ. २.अत्यन्ताभावोविनाशी जन्यत्वादित्यादौ साधनावच्छिन्नसाध्यव्यापकस्य भावत्वस्य इत्यधिकम्-ट. स्याभावस्य - ठ.ड.

पु-८२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

--पक्षधर्माद्यवच्छिन्नसाध्यविवक्षायां तु विमतो धूमवान् वह्निमत्वादित्यादौ शुद्धसाध्यव्यापके आर्द्रेन्धनाद्युपाधौ वैधी हिंसा अधर्मसाधनं हिंसात्वादित्यादौ निषिद्धत्वाद्युपाधौ चाव्याप्तिरिति चेन्न।।
साध्यपदेन हि व्यापकतावच्छेदकधर्माधिकरणत्वमात्रे विवक्षितम् न तु तदतिरिक्तधर्मा १ वच्छिन्नत्वमपि। एवं च यथा शुद्धसाध्यं २ धूमादिकं व्यापकतावच्छेदकधूमत्वादिधर्माधिकरणं तथा द्रव्यत्वसमानाधिकरणं ३ स्पार्शनत्वरूपमपि साध्यं व्यापकतावच्छेदकस्पार्शनत्वत्वाधिकरणमेवेति न कुत्राप्यव्याप्तिः। न हि ४
धवलत्वसमानाधिकरणं ५ गोत्वमगोत्वं भवति।।
एतदेवाभिप्रेत्योक्तं सुधायाम्-- साध्यपदेनासाध्यपदेनावच्छिन्ना ६ नवच्छिन्नसाध्याभिधानादिति।।

साध्येति।। सामान्यलक्षणगतसाध्यपदेनेत्यर्थः। पक्षधर्मेति।। पक्षधर्मावच्छिन्नेत्यर्थः। व्यावकतावच्छेदकेति।। यस्मिन्प्रयोगे यव्द्यापकतावच्छेदकम् तद्धर्मावच्छिन्नसाध्यव्यापक उपाधि ७ रित्यर्थः।। उक्तं सुधायामिति।। साध्यव्यापकवैलोम्यमित्येतव्द्याख्यानसुधायामित्यर्थः।

१.र्मानव-ट. नकारपूरणेन शोधितं-ठ. २.ध्यं धू-रा. ३.णस्पा-क.ग.रा. ४.गन्धवत्वस-रा. ५.तथा द्रव्यत्वसमानाधिकरणं इत्यधिकम्-ग.रा. ६.न्नाभिधा-ग. न्नसाध्याभा-ट. ७.जन्यत्वसावयवत्वान्यतरत्वेन पर्यवसानात्। कृतकत्वं सावयवत्वं मया उपाधिरुद्भावितः। प्रागभावो जन्यः विनाशित्वादित्यत्र साधनावच्छिन्नसाध्यव्यापकभावत्वमुपाधिरित्यर्थः। इत्यस्ति-ठ.

स्वातो-पाधि-सान्य-लणम्) उपाधिवादः पु- ८३.

यद्यप्यवच्छिन्नसाध्य १ व्यापकोऽवच्छिन्नसाध्य एवोपाधिः। तथापि स्वव्यावृत्यावच्छिन्न २ साध्यं व्यावर्तयन्नवच्छेदकव्यावृत्तेरसंभवादवच्छेद्यशुद्धसाध्यव्यावृत्तौ पर्यवस्यन्भिक्षुपादप्रसरणन्यायेन शुद्धसाध्यसाधकानुमानेपि दोषो भवति। यथा विशेषणासिद्धो विशिष्टहेत्वसिद्धौ पर्यवस्यन्हेतुदोषो भवति तथेति नार्थान्तरादिकं व्यञ्जनवत्वा ३ द्यपि महानस ४ त्वाद्यवच्छिन्नवह्निरूपसाध्यव्यापकत्वात्तत्रोपाधिरेव किंतु धूमानुमानस्यानुकूलतर्कसनाधत्वेनावच्छेद्यवह्निव्यावृत्तेरसंभवादवच्छेदकम हानसत्वव्यावृत्तेरेव च संभवाद्वह्निमात्रसाधकधूमानुमानदूषणे न शक्त इति न तत्र दोष इति भेदः।।

ननु शुद्धसाध्यप्रयोगेऽवच्छिन्नसाध्यव्यापकोपाध्युक्तौ प्रकृतनुपयुक्तान्वितोक्तिरूपार्थान्तरतादोषः स्यादित्याशङ्कामनूद्य शुद्धसाध्यप्रयोगदूषकत्वस्यापि सत्वान्नदोष इति भावेन परिहरति।। यद्यपीति।।

नन्वेवं पर्वतोग्निमान्धूमवत्वादित्यादिसदनुमानभङ्गप्रसङ्गः। तत्राप्युक्तदिशावच्छिन्नसाध्यव्यापकोपाधिसंभवादित्यत आह-- व्यञ्जनवत्वादिकमिति।। न शक्त इति विभागः। एवं यथाश्रुतं सुधोक्तं समर्थ्य--

१.को वह्निरसाध्य एवो इत्यस्ति-रा. २.न्नं सः -ट.रा. ३.दिरपि-क. ग.ट.रा. ४.साद्यव- रा.

पु- ८४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

अथवा यो यद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकः स तत्रोपाधिः। साध्यव्यापकत्वेसति साधनाव्यापक उपाधिरिति सुधायामपि साध्यव्यापकपदेनेदमेव विवक्षितम्। एवं चावच्छिन्नसाध्यसाध्यव्यापके नाव्याप्तिशङ्कापि १ । नापि शुद्धसाध्यव्यापके आर्द्रेन्धनादौ तस्यापि धूमत्वादिधर्मावच्छिन्नधूमरूपसाध्यव्यापकत्वात्। एवं च सर्वोप्युपाधिरवच्छिन्नसाध्यव्यापक एव। सुधायामनवच्छिन्नपदं तु व्यापकतावच्छेदकधर्मान्यधर्मेणानवच्छिन्नत्वाभिप्रायम्।।

यद्वा साध्य २ पदस्थाने यत्पदप्रक्षेपेण यो यव्द्यापकत्वे सति यदव्यापकः स स्वाव्याप्ये तस्मिन्हेतावुपाधिरित्यस्तु। एवं च द्रव्यत्वावच्छिन्नस्पार्शनत्वस्य दूष्यानुमानसाध्यत्वाभावेपि तत्र चाक्षुष ३ त्वोपाधितासिद्धिः। सुधायांसाध्यपदं तु प्रायिकाभिप्रायम्। अत एव सुधायां

वस्तुतस्तु यो धर्मो यव्द्यापकाव्या ४ पकस्तस्य तेनाव्याप्तिरिति साध्यपदस्थाने यत्पदमेव प्रयुक्तम्।।
अत्र द्वितीयतृतीयपक्षयोरप्य ५ वच्छिन्नसाध्यव्यापकेऽर्थान्तरनिरास आद्यपक्ष ६ वद्द्रष्टव्यः।।

प्रकान्तरेण पक्षद्वयमाह--अथवेति।। यद्वेति च ।। आद्यपक्षवदिति।।

१.अपिपदं न-क.ग.ट.रा. २.ध्यादिप-ग.ट.रा. ३.त्वस्यो-ग.ट.रा. ४.प्यः तस्य-क.ग.ट.रा. ५.अपिपदं न-ग.ट.रा. ६.क्ष एव द्र-ग.रा.

स्वातो-पाधि-सान्य-लणम्) उपाधिवादः पु - ८५.

अत्र चाद्ये पक्षे अवच्छिन्नसाध्यमपि साध्यमेव। द्वितीये शुद्धसाध्यमप्यवच्छिन्नसाध्यमेव। तृतीयेऽवच्छिन्नसाध्यस्यासाध्यत्वेपि चाक्षुषत्वस्य तत्रोपाधित्वमिति भेदो द्रष्टव्यः।।
केचित्तु स्पार्शनत्वादिरूपशुद्धसाध्य एव द्रव्यत्वादिविशि १ ष्टचाक्षुषत्वाभावस्याभाव उपाधिः। अयं च विशिष्टाभावरूप उपाधिः सध्यवति स्पर्शादौ द्रव्यत्वरूपविशेषणस्याभावेन घटादौ २
चाक्षुषत्वाभावरूपविशेष्यस्याभावेनानुगत इति शुद्धसाध्यव्यापकः। तदुक्तम्--
'य उपाधिर्लालगीति साध्ये वै यद्विशेषणे।

स्वव्यावृत्त्यावच्छिन्नं साध्यं व्यावर्तयन्नित्यादिनोक्तदिशेति भावः।।
पक्षाणां विवेक स्वयमेवाह -- अत्र चाद्य इति।। साध्यमेवेति।। व्यापकतावच्छेदकधर्माधिकरणमात्रस्य साध्यपदेन विवक्षितत्वादिति भावः। उदयनादिमतमाह-- केचित्विति।। साध्यव्यापकत्वं व्यनक्ति --

अयं चेति।। य इति।। य उपाधिश्चाक्षुषत्वाभावस्याभावरूप उपाधिः। साध्ये स्पार्शनत्वरूपसाध्ये द्रव्यत्वरूपयद्विषणयुक्तै ३ तस्य द्रव्यत्वविशिष्टचाक्षुषत्वाभावस्याभावः केवले साध्ये व्यापक एव स उपाधिर्भवतीत्यर्थः। एवं ४ तर्हि शास्त्रे शुद्ध साध्यव्यापकरूपैकरूपोपाधिमनुक्त्वावच्छिन्नसाध्यव्यापको ५ क्तिः किमर्थेत्यत आह-- शास्त्रे त्विति।। तदाक्षेपार्था तदुक्तिरिति वाक्यशेषः।।

१.ष्टस्य -क.ग.ट.रा. २.'तु' इत्यधिकम्-क.ग.ट. ३.दभावाभूः द्रव्यत्वविशेषणविशिष्ट इत्यस्ति-ठ. ४.एवं हि-ठ. ५.कोपाध्युक्तिः-ठ.

तद्विशेषणयुक्तैतदभावा १ भूस्तु केवल'।
इति। शास्त्रे तु व्यतिरेकव्याप्त्यादिनान्वयव्याप्त्यादि २ मिवावच्छिन्नसाध्यव्यापकोपाधिनोक्त ३ शुद्धसाध्यव्यापकोपाधिराक्षिप्यत इत्याहुः।।
अयं १ प्रकारो वायुः स्पार्शनः स्पर्शत्वादित्य ५ सिद्धिसंकीर्णे द्रव्यत्वावच्छिन्नसाध्यव्यापके चाक्षुषत्वोपाधौ न संभवतीत्यसार्वत्रिकः। तत्र द्रव्यत्वावच्छिन्नचाक्षुषत्वाभावा ६ भावरूपोपाधावुक्तरीत्या स्पार्शनत्वरूपसाध्यव्यापकत्वेपि ७
स्पर्शत्वरूपसाधनाव्यापकत्वस्याभावात्साधनवति स्पर्शे द्रव्यत्वाभावेन द्रव्यत्वविशिष्टस्य चाक्षुषत्वाभावस्याभावेनोपाधेः साधनव्यापकत्वात्।।
अत एव सुधायां 'क्विचित्साध्यावच्छेदकावच्छिन्नस्योपाध्यभावस्य हेतुत्वाद्यथा वायुः स्पार्शनो न द्रव्यत्वे सत्यचाक्षुषत्वा'दिति क्वचित्पदं प्रत्युक्तम्।।

१.वोभूत्सकेवले इत्यस्तु-ट.रा. २.दिकमि-क.ग.रा. ३.क्तः शु-ग.ट.रा. ४.तुप्र-क.ग.रा. ५.त्यादौह्यसं-ट.
६.वरूपो-ग.रा. ७.सत्वेति पूरितं-ट. ८.शेत्वरू -ठ.ड.

स्वातो-पाधि-सान्य-लणम्) उपाधिवादः पु - ८७.

यत्तु साधनव्यापकोपि क्वचिदुपाधिर्यत्र पक्षावृत्तिर्हेतुः यथा करका पृथिवी कठिनसंयोगव १ त्वादित्यादावनुष्णाशीतस्पर्शवत्वमिति। तन्न।

स्पर्श २ त्वरूपसाधनवतीत्यर्थः। अत एव असार्वत्रिकत्वादेव ३ सुधायां साध्यव्यापकवैलोम्यमित्यादेर्व्याख्यानसुधायामित्यर्थः। क्वचित्पदं प्रयुक्तमिति। द्रव्यत्वविशिष्टस्य चाक्षुषत्वस्याभाव उपाधिरिति हि प्रागक्तम्। एतदभावश्च प्रतिपक्षप्रयोगे हेतूकृत्य क्वचित्पदं प्रयुक्तं चेत्प्रागुक्तविशिष्टाभावरूपोपाधिप्रकारश्च क्वचिदेवेत्यक्तं भवतीति भावः। एतेन सुधावाक्यं केचित्वित्युपन्यस्तपक्षाभिप्रायेणेत्युक्तं भवति।।
क्वचित्साधनव्यापकोप्युपाधिर्यत्र पक्षावृत्तिर्हेतुरीत्यादिना मण्युक्तेः ४ साधनव्यापक्याप्युपाधित्वात्कथं 'साध्यव्यापकवैलोम्यं साधनस्ये 'त्यनुव्याख्यानादौ लक्षणोक्तिरित्यतस्तं पक्षमनूद्य निराह-- यत्वित्यादिना।। करकेति पक्षः पृथिवीति साध्यम्। कठिनसंयोगवत्वं पाषाणादेव न तु करककायां अल्पकाल एव द्रवीभावदर्शनात्। पक्षावृत्तिश्चायं हेतुः। हेतोः पक्षवृत्तित्वे तव्द्यापकस्योपाधेरपि पक्षवृत्तितया तव्द्यतिरेकस्य स्वरूपासिद्धत्वेन स्वव्यावृत्तिबलेन पक्षात्साध्यव्यावृत्तिसंपादनस्याशक्यतया दूषकत्वमुपाधेर्न स्यात् इति यत्र पक्षावृत्तिर्हेतुरित्युक्तम्। अनुष्णेति।। यत्र पृथिवीत्वं घटादौ तत्रानुष्णाशीतस्पर्शवत्वमिति साध्याव्यापकम्। यत्र कठिनसंयोगवत्वं घटादावेव तत्रानुष्णाशीतस्पर्शवत्वमिति साध्याव्यापकम्। यत्र

कठिनसंयोगवत्त्वं घटादावेव तत्रा ५ नुष्णाशीतस्पर्शवत्त्वमित्यपि नियमात्साधनव्यापकं च। पृथिवीवय्वोरनुष्णाशीतस्पर्शवत्त्वोपगमादिति भावः।।

१.गत्वा-क.ग. २.र्शवत्वरू-ठ.ड. ३.वसाध्य-ट.ठ.ड. ४.क्तसा-ट.ठ.ड. ५.त्र पृथिवीत्वमित्यपि -ट.ठ.ड.

पु -८८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

अस्योपाधित्वे घटः पृथिवी कठिनसंयोगवत्वादित्यत्राप्युपाधित्वापातात्। न हि स एव धर्मस्तस्मिन्नेव साध्ये पक्षभेदमात्रेणोपाधिरनुपाधिश्च भवति। अनुष्णाशीतस्पर्शाभावस्य साध्याभावसाधकत्वं तु नोपाध्यभावत्वात्। साधनव्यापकस्याप्युपाधित्वेऽतिप्रसङ्गात्। किंतु प्रतिपक्षान्तरवत्स्वत एव साध्याभावव्याप्तत्वात्। न हि सर्वोपि प्रतिपक्ष उपाध्यभावरूपः।।
इति १ स्वाभिमतोपाधिसामान्यलक्षणम्।। ७ ।।

नन्वेकत्रोपाधित्वेऽन्यत्रापि कुत इत्यत आह-- न हीति।। ननु भवत्यं २ पक्षवृत्तिहेतावप्युपाधिः अनुकूलतर्केण तन्निरासो भविष्यतीति चेत्तर्हि करका पृथिवीत्यादावपि तथास्तु। न च तत्रानुकूलतर्को नास्तीति वाच्यम्। तर्हि तत एव तस्य दुष्टत्वे किमनेनालौकिकेन सदनुमानदुष्टतापादकेन सादनव्यापकस्याप्युपाधित्वकल्पनेन । नन्वस्य ३ पक्षवृत्तिहेतावप्युपाधित्वे घटो न पृथिवी अनुष्णाशीतस्पर्शवत्वाभावाज्जलवदिति स्वाभावेन साध्याभावसाधनं न स्यादित्यत आह-- अनुष्णेति।। अतिप्रसङ्गादिति।। धूमाद्यनुमाने प्रमेयत्वादेरप्युपाधितापातादिति भावः।।
इति स्वाभिमतोपाधिसामान्यलक्षणम्।। ७ ।।

१.स्वमते -ठ.ट. २.तत्राप्यु-ठ.ड. ३.स्यानुपाधित्वे करका न पृथिवी अनुष्णाशी इत्यस्ति -ट.ठ.

उदना-द्युक्तोधि-लणङ्गः) उपाधिवादः पु - ८९.

अथोदयनाद्युक्तोपाधिलक्षणभङ्गः ।। ८ ।।
उदयनादयस्तु -- साध्यसमव्याप्तत्वे सति साधनाव्यापक उपाधिरित्याहुस्तन्न।

अथोदयनाद्युक्तोपाधिलक्षणभङ्गः ।। ८ ।।
अनुव्याख्याने साध्यव्यापकवैलोम्यं साधनस्येत्युपाधिलक्षणोक्तिः साध्यसमव्यापकत्व १ लक्षणनिरासायेत्युक्त्वा सुधायां २ दूषितम्। तद्वि ३ शदीकुर्वन्नाह -- उदयनादयस्त्विति।। यद्यप्येतन्मतं मणावेव पूर्वपक्षे निरस्तम्। तथाप्यधिकदोषविवक्षया सुधावाक्य ४ विवरणचिकीर्षया चात्र पुनिरुपन्यासः। समव्याप्तत्वं किं विषमव्याप्तस्योपाधित्वेन शास्त्रकारैरनुपादानादुपादीयते, उत दूषकताबीजस्य समव्याप्त एव संभवेन विषमव्याप्तोपाधेरभावात्। अथ --
स्वसंबन्धेन यः स्वीयं धर्ममन्यत्र दर्शयेत् ।
स उपाधिर्यथा लोके जपादिः स्फटिकादिषु।।
इहाप्यञ्याप्यहेत्वर्थव्याप्त ५ त्वभ्रमहेतुता।
उपाधेः स्यात् . . . . . ।।
इत्याद्युक्त्या यः समीपस्थिते हेतौ स्वधर्मं व्याप्यत्वमादधातीत्युपाधिपदस्यान्वर्थत्विद्ध्यर्थं, यद्वा पक्षेतरत्व ६ स्योपाधित्वनिवृत्यर्थमिति ७ । आद्यं निराह -- शास्त्र इति।।

१.त्वपक्षाणां-ठ. २.तद्दू-ट.ठ.ड. ३.द्विवृण्वन्नाह-ठ. ४.क्यं वि-वृण्वन्विकीर्णवाचात्र-ठ. ५.व्याप्यत्व-ट.ठ. ६.रस्यो-ट.ठ.ड. ७.विकल्प्येति पूरितम्-ठ.

पु- ९०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

शास्त्रे पार्थिवपरमाणुरूपादयो नित्याः परमाणुविशेषगुणत्वादाप्यपरमाणुरूपवदित्यादौ पृथिवीविशेषणगुणत्वाभावादेर्विषमव्याप्तस्याप्युपाधित्वस्वीकारात्। समव्याप्त्यभावेपि वक्ष्यमाणरीत्या साध्यव्यापकत्वादिमात्रेण प्रतिपक्षाद्युन्नायकत्वसंभवेन दूषकताबीजसाम्याच्च। साध्यव्याप्यत्वरूपस्वधर्मस्य साधने प्रतिबिम्बजनकत्वरूपावयवार्थाभावेपि लाभाद्युपाधिना कृतमित्यादाविव रूढ्योपाधिपदप्रयोगोपत्तेश्च।।
किंच न शास्त्रे लोकव्यावहारार्थमुपाधिव्युत्पादनम्। किंत्वनुमादूषणार्थमिति विषमव्याप्तिके उपाधिशब्दः पारिभाषिकोस्तु। निश्चितसाध्यकादौ सपक्षादिशब्दवत्समव्याप्तेऽवयवार्थस्य सत्वेनान्यत्र गौणो वास्तु।

विषमव्याप्तस्येति।। यत्र नित्यत्वं तत्र पार्थिवविशेषणगुणत्वाभावो जलपरमाण्वादावेति साध्यव्यापकत्वमिव यत्र पार्थिवविशेषणगुणत्वाभावस्तत्र नित्यत्वमिति नास्ति। घटादौ व्यभिचारादतो विषमव्याप्तस्येत्युक्तम्। द्वितीये निराह-- समेति।। वक्ष्यमाणेति।। दूषकताबीजोक्तिप्रस्ताव इति भावः। तृतीयं प्रत्याह-- साध्येति।।
ननु --
'भवेतां यदि वृक्षस्य वाजिकर्णौ कथंचन।

अदृष्टां समुदायस्य कः शक्तिं जातु कल्पयेत्' ।।
इति न्यायेनावयवार्थसंभवे रूढिकल्पना न युक्तेत्यतः मण्युक्तदोषान्तरं चाह-- किंचेति।। सुधोक्तमाह-- समव्याप्त इति।। चतुर्थं शङ्कते-- नन्विति।।

उदना-द्युक्तोधि-लणङ्गः) उपाधिवादः पु - ९१.

विषमव्याप्तिकस्य दूषणत्व एव हि १ ममाभिनिवेशः। न तु तत्रोपाधिशब्दस्य मुख्यत्वेपि।।
ननु विषमव्याप्त २ स्योपाधित्वे बाधानुन्नीतपक्षेतरोप्युपाधिः स्यादिति चेन्न। अनुमाने अनुकूलतर्कसत्वे इष्टापत्तेः। तत्सत्वे उपाधिः साध्याव्यापकत्वनिश्चयात्। अन्यथा तवापि शब्दोभिधेयः प्रमेयत्वादित्यादावशब्दत्वादेः समव्याप्त ३ पक्षेतरस्य निरासो न स्यात्। अत एवानुव्याख्याने साध्य ४ व्यापकत्वमेवोक्तम् न तु समव्याप्तिः।।
केचित्तु --व्यतिरेकिधर्मत्वमुपाधिसामान्यलक्षणम्। शुद्धसाध्यव्यापकत्वावच्छिन्नसाध्यव्यापकत्वादीनि तु विशेषलक्षणा ५ नीत्याहुः। तन्न। व्यतिरेकिधर्मत्वस्यात्रायमुपाधिरिति व्यवहाराहेतुत्वात्।

बाधस्थले सर्वं तेजोऽनुष्णं पदार्थत्वादित्यादौ अतेजस्त्वादिरूपस्य पक्षेतर ६
त्वस्योपाधित्वस्वीकाराद्बाधानुन्नीतेत्युक्तम्। अनुव्याख्यान इति।। साध्यव्यापकवैलोम्यमित्यनुव्याख्याने ।। व्यतिरेकिधर्मत्वमिति।। अभावप्रतियोगिधर्मत्वमित्यर्थः। धर्मत्वमात्रस्य प्रमेयत्वादावपि सत्वाद्व्यतिरेकीत्युक्तम्। ।। ७ शुद्धेति।। शुद्ध ८ व्यापकत्वव्यापकतावच्छेदकावच्छिन्नसाध्यव्यापकत्वसाधनावच्छिन्नसाध्यव्यापकत्वघटितानीत्यर्थः ९ ।

१.हिपदं न -ग.ट.रा. २.प्तकस्यो-क.ग.ट.रा. ३.प्तत्वे प-ग.रा. ४.ध्याव्या-रा. ५.णादीनि-ग.रा. ६.रस्यो-ट.ड. ७.शुद्धेति इति नास्ति-ट.ठ.ड. ८.साध्येत्यधिकम् -ट.ड. ९.घटितपदं न -ट.ठ.ड.

पु-९२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

अनुमितिप्रतिबन्धकज्ञानविषयतानवच्छेदकत्वाच्च।।
कश्चित्तु -- पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः। पर्यवसितत्वं च पक्षधर्मताबललभ्यत्वम्। एवं च शब्दः स्वस्वेतरावृत्तित्वरहितनित्यावृत्तिध्माधिकरणम् मेयत्वादित्यादौ पर्यवितेऽनित्यत्वे कृतकत्वमुपाधिः। तत्साधनेऽनित्यत्वमुपाधिरित्याह।

अनुमितिप्रतिबन्धकेति।। यदवच्छिन्नविषयकं ज्ञानं अनुमितिप्रतिबन्धकं तादृशं ह्युपाधिकत्वमनुमानदूषणार्थमिह निरूपणीयम्। तादृशं च साध्यव्यापकत्वादिकमेव न तूक्तरूपमिति भावः।।
रत्नकोशकारमतमाह-- कश्चिदिति।। पक्षधर्मताबललभ्यत्वमिति।। तथाच बाधानुन्नीतपक्षेतरेपि नातिव्याप्तिः। तस्य पक्षीयसाध्याव्यापकत्वादिति भावः। स्वेति।। स्वस्मिन्स्वेतरत्र चावृत्तित्वरहितस्तत्रोभयत्र विद्यमान इति यावत्। तादृशो नित्येऽ १ विद्यमानश्य यो धर्मः तदधिकरणित्यर्थः। नित्यावृत्तिधर्माधिकरणमित्येवोक्तौ शब्दत्वरूपधर्मवत्वेनार्थान्तरं स्यात्। अतो रहितेत्यन्तम्। प्रमेयत्वादिधर्मवत्वेनार्थान्तरनिरासाय नित्यावृत्तीत्युक्तम्। तत्साधन इति।। स्वस्वेतरावृत्तित्वरहिताकृतकावृत्तिधर्माधिकरणमित्येवंरूपेण

कृतकत्वसाधन इत्यर्थः। एवं च पक्षधर्मावच्छिन्नसाधनावच्छिन्नसाध्यव्यापकादिसर्वसंग्रहः। तादृशसाध्यस्य पर्यवसितत्वात्।।
'वाद्युक्तसाध्यनियमच्युतोपि कथकैरुपाधिरुद्भाव्यः।
पर्यवसितं नियमयन् दूषकताबीजसाम्राज्यात्' ।।

१.अपि पदं इत्यधिकम् -ग.

उदना-द्युक्तोधि-लणङ्गः) उपाधिवादः पु - ९३.

तन्न। तथात्वे हि द्व्यणुकस्य सावयवत्वे सिद्धे द्व्यणुकमनित्यद्रव्यासमवेतम् महत्वानधिकरणद्रव्यसमवेतत्वादित्यत्र पर्यवसिते नित्यद्रव्यसमवेतत्वे निःस्पर्शद्रव्यसमवेतत्वमुपाधिः स्यात्।।
किंच पक्षधर्मताबललभ्यसाध्यसिद्धौ निष्फल उपाधिः। तदसिद्धौ कस्य व्यापकः।।
इत्युदयनाद्युक्तोपाधिलक्षणभङ्गः।। ८ ।।

इति तद्वचनादिति भावः।। सिद्ध इति।। कार्यत्वादिहेतुनेति भावः। असमवेतत्वेन साध्यपर्यवसानवारणाय सावयवत्वे सिद्ध इत्युक्तम्। द्रव्यसमवेतत्वमात्रस्य त्र्यणुकादावव्यभिचाराय महत्वानधिकरणेति द्रव्यविशेषणम्। मणौजन्य २ त्वानधिकरणेत्याद्युक्तावपि जन्यविशेषणस्य व्यर्थत्वात्पत्तिरित्यागः। निःस्पर्शद्रव्येति।। अत्र द्रव्यपदं समव्याप्त्यभिप्रायेणेति ज्ञेयम्। नन्वत्र पक्ष एव साध्याव्यापकत्वात्पर्यवसितसाध्यव्यापकत्वं नास्त्येवेति नातिव्याप्तिरित्यरुचेराह -- किंचेति।। निष्फल इति। साध्यव्यावृत्त्यर्थत्वादुपाधेः सिद्धस्य च व्यावृत्तेरयोगादिति भावः।।

इत्युदयनोक्तोपाधिलक्षणभङ्गः ।। ८ ।।

१. महत्वेत्यधिकम् - ग.

पु - ९४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

अथ मण्युक्तोपाधिलक्षणभङ्गः ।। ९ ।।
मणौ तु -- पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः। यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तत्पर्यवसितं स च धर्मः क्वचित्साधनमेव क्वचिद्द्रव्यत्वादिः क्वचिन्महानसत्वादिः एवं च वह्निना धूंमे साध्ये वस्तुगत्या महानसत्वाद्यवच्छिन्नप्रसिद्धकस्य धूमस्य व्यापक आर्द्रेन्धनादिर्धूमरूपशुद्धसाध्य एवोपाधिरिति नाव्याप्तिरित्युक्तम्। तत्र १ धूमेन वह्निसाधनेपि महानसत्वाद्यवच्छिन्नप्रसिद्धवह्निव्यापकस्य व्चञ्जडन २ वत्वादेर्वह्निरूपशुद्धसाध्य एवोपाधित्वापातात्।

अथ मण्युक्तोपाधिलक्षणभङ्गः ।। ९ ।।
मणौत्विति।। इत्युक्तमित्यन्वयः । पक्षधर्मताबललभ्यत्वं चेत्पर्यवसितत्वं तदा प्रागुक्तो दोष इत्यत आह-- यद्धर्मेति।। एतच्च सर्वसंगाहकमित्याह-- स चेति।। साध्यप्रसिद्ध्यवच्छेदकीभूतो धर्म इत्यर्थः। ध्वंसो विनाशो जन्यत्वादित्यादौ भावत्वाद्युपाधिस्थले साधनमित्यर्थः। वायुर्बहिरिन्द्रियप्रत्यक्षः प्रमेयत्वादित्यादौ रूपवत्वाद्युपाधौ द्रव्यत्वादिः अयं धूमवान्वह्निःमत्वादित्यादौ व्यञ्जनवत्वाद्युपाधौ महानसत्वादित्यादिः। दूषणसौकर्यायोपाधावुक्तरूपमुपपादयति -- एवं चेति।। एवमेव साधनाद्यवच्छिन्नस्थलेति ध्येयमिति भावः। धूमेनेति।। पर्वतोग्निमान्धूमवत्वादिति सदनुमानेपीत्यर्थः।।

१.न्नधू -ग.घ.रा. २.नत्वा-ग.ट.

मण्युक्तोधि-लणङ्गः) उपाधिवादः पु - ९५.

यदि च वह्निप्रसिद्धिं प्रति महानसत्वं न्यूनवृत्तीति नवाच्छेदकम् तर्हि स्पार्शनत्वप्रसिद्धिं प्रत्यपि द्रव्यत्वं न्यूनवृत्तीति नावच्छेदकं स्यात्।।
अत्र केचिदाहुः -- यद्धर्मावच्छिन्नेत्यत्रावच्छेतको १ धर्मः साधनव्यापकीभूतो विवक्षितः महानसत्वं च साधनस्य
धूमस्य न व्यापकमिति न वह्नौ साध्ये
व्यञ्जनवत्वमुपाधिः। पक्षधर्मो द्रव्यत्वादिस्तु प्रत्यक्षस्पार्शाश्रयत्वादिसाधनव्यापक एव।

ननु -- साध्यप्रसिद्ध्यच्छेदकधर्मे यावत्वं विवक्षितं अतो व्यञ्जनवत्वादौ नातिव्याप्तिरिति चेन्न। वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्वस्यानुपाधितापत्तेः।
साध्यप्रसिद्ध्यवच्छेदकप्रमेयत्वाद्यनवच्छिन्नप्रत्यक्षत्वाव्यापकत्वात्। अतो यत्किंञ्चित्वमेव वाच्यम्। तथाचोक्तदोष एवेति भावः।। यदि चेति।।
यद्धर्मावच्छेदेनेत्यत्र
साध्यप्रसिद्ध्यन्यूनानधिकदेशवृत्तिधर्मस्यैवावच्छेकधर्मपदेन
विवक्षितत्वादिति भावः।। स्पार्शनत्वेति।। वायुः स्पार्शनः अनुद्भूतरूपानधिकरणत्वे सति प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र चाक्षुषत्वाद्युपाधावित्यर्थः।। न्यूनवृत्तीति।। स्पर्शगुणेपि स्पार्शनत्वसत्वेपि द्रव्यत्वाभावादिति भावः।।
केचिदिति।। यज्ञपत्यादय इत्यर्थः। ननु ध्वंसो विनाशी जन्यत्वादित्यादौ साधनावच्छिन्नसाध्यव्यापकं भावत्वमुपाधिर्न स्यात्।

१.कोभूतो - ग.ट.रा.

पु - ९६. न्यायदीपुयततर्कताण्डवम् (तृ.परिच्छेदः
अभेदेपि व्यापकत्व १ सत्वेन साधनमपि स्वव्यापकमेव। आर्द्रन्धनादे २ रपि साधनीभूतवह्निव्यापुकं यत्प्रमेयत्वादिकं तदवच्छिन्नधूमरूपशुद्ध ३ वस्तुगत्या ४ तदुक्तस्य प्रमेयत्वाद्यवच्छिन्नसाध्यव्यापकत्वस्य सत्वेपि धूमरूपशुद्धसाध्यव्यापकत्वज्ञानमात्रेणोपाधिव्यवहारादनुमितिप्रतिबन्धनाच्च ।।
किंचैव स श्यामो मित्रापृष्टत्वादित्यादौ मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकं शाकपाकजत्वमुपाधिर्न स्यात्। अवच्छेदकस्य मित्रातनयत्वस्य मित्रापृष्टकोकिलादावसत्वेन साधनाव्यापकत्वात्।।
एवं वायुः स्पार्शनः प्रमेयत्वादित्यादौ द्रव्यत्वावच्छिन्नसाध्यव्यापकं साधनस्य प्रमेयत्वस्य चाव्यापकं चाक्षुषत्वमुपाधिर्न स्यात्। तत्र द्रव्यत्वस्य प्रमेयत्वरूपसाधनव्यापकत्वाभावात्।।

साधनस्य साधनाव्यापकत्वादित्यत आह-- अभेदेपीति।। साधनवन्निष्ठा ५ त्यन्ताभावाप्रतियोगित्वरूपव्यापकत्वस्य साध्यादेरिव साधनस्यापि ६ साधनवति साधनात्यन्ताभावाभावादिति भावः।।
ननु शुद्धसाध्यव्यापकत्वज्ञानमात्रेणानुमितिप्रतिबन्धादौ सत्यप्युक्तलक्षणं संग्राहकमात्रमित्यतो न संग्राहकमप्येतदव्यापकत्वमित्याह -- किंचेति।।

१.त्वस्यस -क.ग.ट.रा. २.दिरपि -क.ट.रा. ३.शुद्धपदं न-क.ग.ट.रा. ४.त्वदुक्त-क.ग. ५.ष्ठान्योन्याभा -ड. ६.सत्वादित्यधिकम्-ट.ठ.ड.

मण्युक्तोधि-भङ्गः) उपाधिवादः पु- ९७.

न चात्रायमनुपाधिः, प्रमेयत्व १ रूपहेतोः स्पार्शनत्वरूपसाध्यविशेषणभूतद्रव्यत्वव्यभिचारित्वेन प्रमेयत्वं स्पार्शनत्वरूपविशेष्यव्यभिचारि विशेषणाव्यभिचारित्वे सति विशिष्टव्यापकभिचारित्वादिति व्यभिचारसाधकहेतुविशेषणस्य २ द्रव्यत्वविशेषणाव्यभिचारित्वस्यासिद्धेरिति वाच्यम्।
न ह्युपाध्याहितव्याभिचारे त्वदुक्तमेव लिङ्गम्। प्रमेयत्वं स्पार्शनत्वव्यभिचारि द्रव्ये स्पार्शनत्व ३ व्यापकोद्भूतरूपवत्वव्यभिचारित्वात् द्रव्यत्ववदित्यपि व्यभिचारानुमानसम्भवात्। अत्र च द्रव्यइति विशेषणं महत्वसमानाधिकरणोद्भूतस्पर्शनत्वे ४ व्यभिचारवारणार्थम्।

नचात्रायमनुपाधिरिति।। न चेत्यस्य वाच्यमित्यनेनान्वयः। कुतोयमनुमाधिरिति चेत् हेतोः साध्यव्यभिचारित्वोन्नायकत्वेनोपाधेर्दूष ५ कत्वमिति मते शुद्धसाध्यव्यभिचारानुमानासंभवादित्याह-- प्रमेयत्वेति।। विशेषणाव्यभिचारित्वे सतीति।। द्रव्यत्वरूपविशेषणेत्यर्थः। महत्वसमानाधिकरणोद्भूतस्पर्शत्वे व्यभिचारवारणाय सत्यन्तम्। विशेषणाव्यभिचारित्वे सतीत्यस्यार्थनिर्देशो द्रव्यत्वाव्यभिचारित्वे सतीति।। विशेषणमिति।।

१.रूपपदं न-ग.ट. २.'द्रव्यत्वरूपविशेषणस्य' इत्यधिकम्-क. ३.त्वप्रयोजकोद्भू -क-ग.ट.रा. ४.र्शवत्वे इति शोधितम्-ट. ५.दोंषत्वमिति मते-ट. दोंषित्वमते-ड.

त्वन्मतेपि १ द्रव्यत्वाव्यभिचारित्वे सतीति विशेषणमेतदर्थमेव। त्वन्मते च व्यभिचार २ उपाधिनियतः।।
किंच ३ व्यञ्जनवत्वादेरपि महानसत्वाद्यवच्छिन्नवह्निव्यापकत्वेन तत्रोपाधित्वेपि न दोष इत्युक्तत्वात्तव्द्यावृत्यर्थं साधनव्यापकत्वविशेषणं व्यर्थम्।।
अथ मतम् --
तद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति तद्धर्मावच्छिन्नसाधनाव्यापकत्वम् वा, यत्र साधनाव्यापकत्वं तद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वा, स्वानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वोपाधित्वम्।।

ननु मित्रा ४ पुत्रत्वप्रमेयत्वादिहेतावुपाधे ५ रेवमस्त्विवत्यत आह-- त्वन्मते चेति।। इत्युक्तत्वादिति।। स्वाभिमतोपाधिलक्षणोक्तिप्रस्तावे व्यञ्जनवत्वादिरपि
महानसत्वाद्यवच्छिन्नवह्निरूपसाध्यव्यापकत्वात्तत्रोपाधिरेवेत्यादिना ग्रन्थेनोक्तत्वादित्यर्थः।।
पूर्वोक्तदोषनिरासाय यज्ञपतिनैवोत्प्रेक्षितपक्षान्तराण्याशङ्कते -- अथ मतमिति।। यद्धर्मेति।। येन धर्मेण साध्यव्यापकत्वं तेनैव धर्मेण साधनाव्यापकत्वमाद्यलक्षणार्थः।

१.पिहिद्र--ग.ट.रा. २.रे उपाधिर्वि-ग.ट.रा. ३.किंचेति नास्ति-ग.ट.रा. ४.पृष्टत्व-ठ. त्रत्वेति शोधितम्-ड. ५.धिरेव मास्त्वि-ट.ठ. धेरेव मास्त्वि-ड.

मण्युक्तोधि-लणङ्गः) उपाधिवादः पु- ९९.

एवं च धूमानुमाने व्यञ्जनवत्वादिकं नोपाधिः। १ तस्य महानसत्वाद्यवच्छिन्नवह्निं प्रतीव तदवच्छिन्नधूमं प्रत्यपि व्यापकत्वेन तद्धर्मावच्छिन्नधूमं प्रत्यपि व्यापकत्वेन तद्धर्मावच्छिन्नसाधनाव्यापकत्वाभावात्। व्यञ्जनवत्वस्य यत्र पर्वते धूमरूपसाधनव्यापकत्वं तदवृत्तिमहानसत्वाद्यवच्छिन्नवह्निव्यापकत्वेपि तद्वृत्तिपर्वतत्वाद्यवच्छिन्नवह्निव्यापकत्वेपि तद्वृत्तिपर्वतत्वाद्यवच्छिन्नवह्न्यव्यापकत्वात्। व्यञ्जनवत्वानधिकरणीभूते धूमरूपसाधनाधिकरणे पर्वते वर्तमानो यः पर्वतत्वादिस्तदवच्छिन्नवह्न्यव्यापकत्वाच्च। तस्माद्व्यञ्जनवत्वादौ नातिव्याप्तिः।।

नाव्याप्तिः। उद्भूतरूपवत्वादेर्द्रव्यत्वाद्यवच्छिन्नस्पार्शनत्वरूपसाध्यं प्रति व्यापकत्वेप्यूष्मादौ व्यभिचारेण ----

स्वेति २ व्यञ्जनवत्वादिरूपाधिरुच्यते। स्वस्यानधिकरणभूतं यत्साधनाधिकरणं तद्वृत्तीत्यर्थः। स्वानधिकरणह्रदवृत्तिह्रदमहानसान्यतरत्वावच्छिन्नव्यापकमेव व्यञ्जनवत्वमिति तत्रातिव्याप्तिनिरासाय साधनाधिकरणेति। एतच्च लक्षणत्रयं धूमेन वह्निसाधनस्थले व्यञ्जनवत्वाद्युपाधौ नास्तीति नातिव्याप्तिरित तावत्क्रमेणओपपादयति एवं चेति।। एवं रूपेण विवक्षायां सत्यमित्यर्थः। नाव्याप्तिरिति।। वायुः स्पार्शनः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्यादौ द्रव्यत्वावच्छिन्नसाध्यव्यापकोद्भूतरूपवत्वाद्युपाधावव्याप्तिर्नास्तीत्यर्थः। क्रमेण तत्र लक्षणत्रयसत्वं व्यनक्ति-- उद्भूतेत्यादिना।। ३ उष्मादौ व्यभिचारेणेति।। ऊष्मतप्तवारिस्थवह्न्यादौ प्रत्यक्षस्पर्शाश्रयत्वे सत्यप्युद्भूतरूपवत्वाभावादिति भावः।।

१.इतः ' तस्माद्व्यञ्जनवत्वादौ' इति पर्यन्तस्य स्थाने --'तस्य महानसत्वाद्यवच्छिन्नसाध्यव्यापकत्वेपि
तद्वृत्तिपर्वतत्वावच्छिन्नवह्न्यव्यापकत्वात्' व्यञ्जनवत्वानधिकरणभूते धूमरूपसाधनाव्यापकत्वेपि
तदवृत्तिमहानसत्वाद्यवच्छिन्नवह्निव्यापकत्वाच्च इत्यस्ति -ट.
२.'व्यञ्जनवत्वादिः' इति नास्ति-ट.ठ.ड. ३.ऊष्मादौ इतिन-ठ.ट.

पु -- १००. न्यायदीपयुततर्कताण्डवम् (त.परिच्छेदः

द्रव्यत्वावच्छिन्नप्रत्यक्षस्पर्शाश्रयत्वरूपं साधनं प्रत्यव्यापकत्वात्। यत्रोष्मादौ साधनाव्यापकत्वं तद्वृत्तिद्रव्यत्वरूपधर्मावच्छिन्नसाध्यव्यापकत्वात्। उद्भूतरूपानधितकरणे प्रत्यक्षस्पर्शाश्रयत्वरूपसाधनाधिकरणे ऊष्मणि वर्तमानद्रव्यत्वावच्छिन्नसाध्यव्यापकत्वाच्चेति।।
उच्यते --
घटः पृथिवी द्रव्यत्वादित्यत्र घटान्यत्वावच्छिन्नपृथिवीत्वव्यापके पक्ष एव साधनाव्यापके घटावृत्तिगुणवत्वरूपोपाधावुक्तलक्षणान्यव्याप्तानि।

नन्वेवमपि गन्धप्रागभावावच्छिन्नो घटो गन्धवान्पृथिवीत्वादिति साध्य १ व्यभिचारिणि हेतौ गन्धप्रागभावकालीनत्वावच्छिन्नसाध्यव्यापके गन्धप्रागभावकालीनत्वावच्छिन्नपृथिवीत्ववति चेन्न। यद्ध्मवति २ साध्यव्यापकत्वं तद्धर्मवति साधनव्यापकत्वमित्यस्याभिमतत्वात्।।
उक्तोपाधिश्च न तथा। तद्धर्मवतिपक्षे सा २ धनाव्यापकत्वात्। न चैवं स श्यामो मित्रा ४ तनय(पृष्ट)त्वादित्यत्र नरत्वावच्छिन्नश्यामत्वव्यापकंपृष्टहंसादौ साधनाव्यापकं शाकपकजत्वमुपाधिर्न स्यात्, नरत्ववति साध्यव्यापकस्य तस्य तद्वति साधनाव्यापकत्वाभावात्, मित्रापृष्टस्य नरस्य सर्वस्यैव

शाकपाकजत्वादिति वाच्यम्। नरसंसान्यतरत्वादिकमादाय तत्राप्युक्तलक्षणसत्वादिति मन्यन्ते।

१.ध्याव्य-ड. २.पक्षध्मवति इत्यस्ति-ड. ३.ध्याव्या-ट.ड. ४.त्रापृत्र-ठ. पुत्रोतिशोधितम् -ड.

मण्युक्तोधि-लक्षणभङ्गः) उपाधिवादः पु- १०१.

घटावृत्तिगुणवत्वस्य घटान्यत्वावच्छिन्नपृथिवीत्वं प्रतीव तदवच्छिन्नद्रव्यत्वं प्रत्यपि व्यापकत्वात्। घ १ टात्मपक्षे साधनाव्यापकस्य तस्य घटवृत्तिना घटत्वेन वा द्रव्यत्वादिना वावच्छिन्नपृथिवीत्वव्यापकत्वाभावात्। स्वानधिकरणीभूते
द्रव्यत्वरूपसाधनाधिकरणे घटे
वर्तमानघटत्वादिधर्मावच्छिन्नसाध्यव्यापकत्वाभावाच्च।।

उक्तलक्षणान्यव्याप्तानीत्युक्तम्। तत्र लक्षणत्रयासत्वं क्रमेण व्यनक्ति--घटावृत्ति गुण २ वत्वस्येत्यादिना ।। घटान्यत्वेति।। घटान्यस्मिन्पृथिवीत्ववति द्रव्यत्ववति च घटावृत्तिगुणवत्वसत्वेन यद्धर्मेण साध्यव्यापकत्वं तद्धर्मेण साधनाव्यापकत्वाभावादाद्यमव्याप्तम्। घटवृत्तिनेत्येतद्द्रव्यत्वादिना वेत्यत्राप्यन्वेति।।
न चायमुपाधिरेव न भवति शुद्धसाध्यव्यभिचारानुन्नायकत्वात्। येनाव्याप्तिर्दोषायेति वाच्यम्। द्रव्यत्वं पृथिवीत्वव्यभिचारि द्रव्यत्वघटत्वप्रमेयत्वानीति प्रतीतिविशेष्यत्वे सति घटावृत्तिगुणवत्वव्यभिचारित्वात् प्रमेयत्वादिवदित्यादिक्रमेण तत्संभवात्। अत्र द्रव्यत्वेति स्वरूपासिद्धिवारणाय । न च व्यभिचार ३ वारकत्वेन वैयर्थ्यम्। त्रितयोगचरप्रतीति ४ विशेष्यत्वे व्यर्थत्वशङ्कानवकाशात्।

व्यर्थविशेष्यत्वशङ्कानिरासाय पटत्वेति। एवं च पटत्व एव व्यभिचारवारणाय विशेष्यमिति ज्ञेयम्।

१.ट रूपप-क.ग.ट.रा. २.णत्वस्य-ठ.ड. ३.रावा -ट.ठ.ड ४.विषयत्वे - ड.

पु -१०२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

किंचार्द्रेन्धनाद्युपाधौ धूमत्वावच्छिन्न १ साध्यव्यापकत्वे सति वह्नित्वावच्छिन्नसाधनाव्यापकत्वमात्रेणोपाधिव्यवहारादनुमितिप्रतिबन्धाच्च नेदमुपाधित्वम्। त्वयापि २ ह्यनेनैव हेतुद्वयेन व्यतिरेकिधर्मत्वादेरुपाधित्वं निरस्तम्।।
अपि च व्यञ्जनवत्वादेरपि महानसत्वाद्यवच्छिन्नवह्नि ३ व्यापकत्वेनोपाधित्वेपि न दोष इत्युक्तत्वात्तद्व्यावृत्तर्थ्यं त्रेधा विशेषणं व्यर्थमेव।।
अन्येतु पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक एवोपाधिः। यद्धर्मावच्छेदेन साध्य प्रसिद्धं तदेव पर्यवसितम्। नचैवं व्यञ्जनवत्वादिरपि वह्निरूपशुद्धसाध्य एवोपाधिः स्यादिति ४ वाच्यम्। साधनाव्यापकपदेन
सकलसाध्यस्य यद्व्यापकं तद्रहितेऽधिकरणे साधनपरित्यागस्य विवक्षितत्वात्। तस्य च तत्राभावात्।

व्याप्तिग्रहस्थानार्थं प्रमेयत्वेत्युक्तम्। घटत्वे व्यभिचारवारणाय सत्यन्तम्।।
अङ्गीकृत्याप्यनुपाधित्वं दोषान्तरमाह-- किंचेति।। त्वयापीति।। उक्तलक्षणत्रयवादिनापीत्यर्थः। इत्युक्तत्वादिति।।
स्वाभिमतोपाधिलक्षणप्रस्तावे ।। ५ त्रिधेति।। तद्धर्मेति, तद्वृत्तीति,

स्वानधिकरणीभूतेति, ६त्रिधेत्यर्थः। तत्राभावादित्युक्तं व्यनक्ति-- न हीति।। अतिव्याप्तिं निरस्याव्याप्तिं च निराह-- शुद्धेति।।

१.न्न साधनाव्या-ग.रा. २.हि पदं न-ग.ट. ३.ह्नावत्रोपा -ग.ट.रा. ४.शङ्क्यम् -क.ग.ट.रा. ५.त्रेधे -ट.ड. ६.त्रेधे -ट.ड.

मयुक्तोधि-लणङ्गः) उपाधिवादः पु - १०३.

न हि व्यञ्जनवत्वेन धूमः सकलवह्निव्यापकरहिते परित्यज्यते । धूमस्य सदनुमानत्वेन धूमवति यत्किंचिद्वह्निसत्वेन तत्र वह्निव्यापकस्यावश्यकत्वात्। शुद्धसाध्यव्यापकेऽवच्छिन्नसाध्यव्यापके चोपाधौ विवक्षितं साधनाव्यापकत्वमस्त्येव। आर्द्रेन्धनेन सकलधूमव्यापकरहिते तप्तायःपिण्डे वह्नेः परित्यक्तत्वात्। चाक्षुषत्वेन च सकलानि द्रव्यगुणादिगतानि यानि १ स्पार्शनत्वानि तव्द्यापकानि यान्युद्भूतरूपाधिकरणत्वोद्भूतरूप २ समानाधिकरणत्वादीति तद्रहिते वायौ प्रत्यक्षस्पर्शाश्रयत्वस्य त्यक्तत्वादित्याहुः।।
तदपि न। उक्तकृसृष्टियुक्तसाधनाव्यापकत्वाद्य ३ ज्ञानेपि निषिद्धत्वादावुपाधिपदप्रयोगादनुमितिबन्धनाच्च। ४ विशेषणवैयर्थ्यस्योक्तत्वाच्च। एवं कृसृष्ट्न्तराण्यपि दूष्याणि।।

एवं कृसृष्ट्यन्तराणीति।। तथाहि-- साध्यव्यापकत्वे सति साध्यसमानाधिकरणत्वे सति वा साध्यव्यभिचारिसाधनाव्यापकत्वमुपाधिलक्षणम्। अत्र निरधिकरणे साध्यविरुद्धे सर्वदोपाधिव्यवहारविधूरेऽतिव्याप्तिवारणाय सत्यन्तम्।

व्यञ्जनवत्वादेर्धूमादिहेतावुपाधित्वप्रसङ्गवारणाय साध्यव्यभिचारीति विशेषणमित्यादि। तदप्येतेनैव निरस्तम्। एतदज्ञानेप्युपाधिव्यवहारादनुमितिप्रतिबन्धाच्चेत्युक्तहेतुभ्यः।।

१.यानीति नास्ति-ग.रा. २.सामानाधिकरण्यादीनि-ग.ट.रा. ३.द्यभावेपि -- ग. 'द्य' 'नि' अनयोर्मध्ये लोपो दर्शितः-रा. ४.विवक्षाविशेषवैय-ग.ट.रा.

पु-१०४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

एतेन-- यव्द्यभिचारित्वेन साधनत्वस्य साध्यव्यभिचारित्वं स उपाधिः। एवंचावच्छिन्नसाध्यव्यापकः शुद्धसाध्यं प्रत्यव्यापकोपि तत्रोपाधिः। उपाधिव्यभिचारप्रयुक्तव्यभिचारस्य शुद्धसाध्येपि सत्वात्।

न चेदं संग्राहकमात्रमुक्तमिति वाच्यम्। अनुमानदूषणार्थं ह्युपाधिनिरूपणम्। अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमुपाधित्वमिह निरूप्यमिति मणावप्युक्तेः। अस्तादृशस्यैव सर्वसंग्राहकस्य ग्रन्थकृदुक्तरीत्या त्रेधा वक्तुं श्यक्यत्वेनान्यादृशस्याप्य १ नादरणीयत्वात्। एवं साध्यव्यापकतास्थलातिरिक्ते साधनसमानाधिकरणो यो धर्मस्तदवच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकमित्याद्यपि निरस्तमित्यर्थः।।
यथाश्रुतं मणिवाक्यमनुवदति-- यव्द्यभिचारित्वेनेति।। अनुमीयत इति शेषः। अव्याप्तिनिरासाय सर्वत्रैतदस्तीति पक्षधराद्युक्तदिशोपपादयति -- एवं चेति।। वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्वादिः ध्वंसो विनाशी जन्यत्वादित्यादौ भावत्वादिश्चावच्छिन्नसाध्यव्यापकः।। उपाधिव्यभिचारेति।। प्रत्यक्षस्पर्शाश्रयत्वं जन्यत्वं वा प्रत्यक्षत्वव्यभिचारि विनाशित्वव्यभिचारि वा द्रव्यत्वादिरूपविशेषणाव्यभिचारित्वे सति

तद्विशिष्टप्रत्यक्षत्वादिव्यापकोद्भूतरूपवत्वादिव्यभिचारित्वात् इत्येवंरूपेणोपाधिव्यभिचारप्रयुक्त्येत्यर्थः।

१.स्यानाद - ठ.ड.

मण्युक्तोधि-लणङ्गः) उपाधिवादः पु - १०५.

इयांस्तु भेदः। शुद्धसाध्यव्यापकः शुद्धसाध्य एवोपाधिः। अवच्छिन्नसाध्यव्यापकस्तु शुद्धेऽवच्छइन्ने चोपाधिः। १ तव्यभिचारप्रयोजकव्यभिचारनिरूपकत्वादिति मण्युक्तं लक्षणान्तरमपि निरस्तम्। साध्यव्यभिचारोन्नायकत्वस्योपाधिशरीरानुप्रवेशे उपाधिर्व्यभिचारोन्नायक इति सिद्धान्तविरोधात्।।
किंच यव्यभिचारत्वेनेत्यनेनोपाधिव्यभिचारस्य किं साध्यव्यभिचारानुमितिनकत्वमभिप्रेतं किं वा जनकत्वप्रयोजकरूपवत्वम्। नाद्यः। व्यभिचाराननुमितिदशायामनुमाधिता २ पातात्। पर्वत आकाशवान् धूमादित्यत्र घटस्योपाधितापाताच्च। शक्यते हि घटव्यभिचारेणाकाशव्यभिचारोऽनुमातुम्। त्वन्मते आकाशात्यन्ताभावस्य केवलान्वयित्वेन वृत्तिमतः सर्वस्याप्याकाशव्यभिचारित्वात्।।

शुद्धावच्छिन्नसाध्यव्यापके सर्वत्रैकरूप्यमेव किमित्यत आह-- इयांस्त्विति।। इति सिद्धान्तेति।। उपाधिरित्युक्ते साध्यव्यभिचारोन्नायक इति प्राप्तत्वेन व्यभिचारोन्नायकोव्यभिचारोन्नायक इत्यस्यासंभवेन मणिकृत्सिद्धान्तविरोधादित्यर्थः।।
फलोपधानं योग्यतावेति विकल्प्य निराह-- किंचेति।। अनुमितिदशायामिति।। तदानीमनुमितिरूपफलाभावादिति। तथाचोपाधेर्नित्यदोषत्वसिद्धान्तभङ्ग इति भावः।

१.उभयव्यभिचा - क.ट.रा. २.त्वापा- ग.रा.ट.

पु - १०६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

किंचानुमितिजनकत्वमित्यत्रानुमितिः किं भ्रमसाधारणी विवक्षिता प्रमारूपैव वा। आद्ये धूमेन वह्न्यनुमाने घट उपाधिः स्यात्। संभवति हि घटव्यभिचारित्वेन धूमस्य भ्रमरूपा वह्निव्यभिचारानुमितिः। द्वितीये वह्निना धूमानुमाने
हृदत्वमुपाधिः स्यात्। हृदत्वव्यभिचारित्वेन लिङ्गेनोत्पन्नाया अपि वह्नर्धूमव्यभिचारानुमितेर्विषसत्वेन प्रमात्वात्।।
अन्त्येप्युपाधिव्यभिचारस्य साध्यव्यभिचारं प्रति प्रयोजकत्वं किं स्वस्य साध्यव्यभिचारव्याप्यत्वं साधनस्य साध्यव्यापकव्यभिचारित्वमेव वा। नाद्यः। वायुः स्पार्शनः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्वोपाधिव्यभिचा १ रस्य शुद्धसाध्यव्यभिचारित्वव्याप्यत्वाभावेन लक्षणस्याव्याप्तेः। महत्समानाधिकरणोद्भूतस्पर्शत्वस्योद्भूतरूपवत्वव्यभिचारित्वेपि स्पार्शनत्वव्यभिचारित्वाभावात्।।

ननु साधनस्येत्यत्र साध्यसमानाधिकरणसाधनस्येत्युच्यते। तथाचाकाशासामानाधिकरण्यं धूमे नास्तीति न दोष इति वादिनं प्रत्याह -- किंचेति।। अन्त्येपीति।। प्रयोजकरूपवत्वमिति पक्षेपीत्यर्थः। स्वस्योपाधिव्यभिचारस्य। लक्षणस्येति।। साध्यव्यभिचारव्याप्यव्यभिचारनिरूपकत्वरूपलक्षणस्योद्भूतरूपवत्वोपाधावव्याप्तेरित्यर्थः। व्याप्यत्वाभावंव्यनक्ति-- महत्वेति।। परमाण्वादिस्पर्शस्याप्रत्यक्षत्वान्महत्वसमानाधिकरणेत्युक्तम्।

१.रित्वस्य -ग.ट.रा.

उधे-र्दूकता-बीजम्) उपाधिवादः पु- १०७.

द्वितीये त्वस्मदुक्तलक्षण एवान्तर्भावः स्यात्। अस्माभिरपि साध्यव्यापकत्वे सति साधनाव्यापक उपाधिरित्यनेन साध्यव्यापकाव्याप्यत्वमेव हेतोः सोपाधिकतत्वमित्यभिप्रेतत्वात्।।
उक्तंह्यनुव्याख्याने -- 'साध्यव्यापकवैलोम्यमव्याप्तिः साधनस्य चेति'। साधनस्य यत्साध्यव्यापकवैलोम्यं साध्यव्यापकाव्याप्यत्वं साऽव्याप्तिरित्यर्थः। तस्मात्परोक्त १ लक्षणान्ययुक्तानि।।

इति मण्युक्तोपाधिलक्षणभङ्गः ।। ९ ।।

दीपप्रभादिस्पर्शस्याप्रत्यक्षत्वादुद्भूतेत्युक्तम्। द्वितीय इति।।
साधनस्येत्याद्युक्तपक्ष इत्यर्थः। अव्याप्तिर्व्याप्त्यभाव इत्यर्थः।।
इति मण्युक्तोपाधिलक्षणभङ्गः।। ९ ।।

अथोपाधेर्दूषकताबीजम् ।। १० ।।
उपाधिश्चानुमानप्रवृत्तेः प्राग्व्याप्तिग्रहवेलायामव्याप्तेरेवोन्नायकः।

अथोपाधेर्दूषकताबीजम् ।। १० ।।
उपाधेः किंत्वेन दूषकत्वमित्यतः 'साध्यव्यापकवैलोम्य'मिति युक्तिपादीयानुव्याख्यानसुधोक्तिं विवृण्वान आह -- उपाधिश्चेति।।

१.क्तानिल -- ग.रा.

साध्यव्यापकं परित्यजतो हेतोः साध्यपरित्यागस्यावश्यकत्वात्। साध्यपरित्यागस्यैवाव्या १ प्तित्वात्। न तु तदा सत्प्रतिपक्षस्य। पक्षे साध्योपसंहारा २ त्पाक्प्रतिपक्षस्यान ३ वसरात्। तदुत्तरकालं ४ प्रतिस्थस्येवोन्नायकः।

प्रागित्यस्य विवरणं व्याप्तिग्रहेत्यादि। उपस्थित इति शेषः। अव्याप्तेर्व्याप्त्यभावस्य हेतुत्वेनाभिमतं, हिंसात्वं पापसाधनत्वाव्याप्यं तव्द्यापकनिषिद्धत्वाव्याप्यत्वादित्येवंरूपेणोन्नायक इत्यर्थः। तव्द्यापकाव्याप्तत्वे तदव्याप्यत्वं कुत इत्यतः। सुधोक्तमेवाह -- साध्येति।। साध्यपरित्यजतस्तव्द्यापकपरित्यागस्यायोगादिति भावः। तावता साध्यत्यागोन्नायकत्वमेव प्राप्तं न त्वव्याप्युन्नायकत्वमित्यत आह -- साध्यपिरत्यागस्यैवेति।।
एतेनानौपाधिकसंबन्धस्य व्याप्तित्वात्सोपाधिकत्वे लक्षणाभावादव्याप्तिरित्युपपादनं निरस्तम्। व्याप्तिज्ञानाधीनमुपाधिज्ञानं ५ तदधीनं च ६ निरुपाधिकत्वज्ञानं तदायत्तं च व्याप्तिज्ञानमिति चक्रकप्रसङ्गेन तस्य व्याप्तिलक्षणत्वायोगात्।।
एवकारव्यावर्त्यमाह -- न त्विति।। तदुत्तरेति।। अनुमानप्रवृत्युत्तरकालं त्वित्यर्तः। उपस्थितोपाधिश्चेत्यनुकर्षः। न तु व्याप्त्यभावादेरित्येवकारार्थः। प्रतिपक्षोन्नयनप्रकारश्च प्रतिपक्षप्रयोगोपीत्यादिनाग्रे व्यक्तः।।
ननु साध्यव्यापकं परित्यजतो हेतोः साध्यपरित्यागस्यावश्यकत्वे साध्यव्यभिचार एव प्राप्तः कथं प्रतिपक्षतेत्यतोऽन्यत्र साध्यपरित्यागे हि

तथा पक्ष एव साध्यपरित्यागे तु प्रतिपक्षतैवेतिभावेनान्यत्र परित्यागपक्षं दूषयन्नाह -- हेतोः साध्यपरित्यागो हीति।।

१.वचा-क.ग.रा. २.ग्रहा - ग.रा. ३.काशात्-ट.रा. ४.लन्तु -प्र-क-ट.रा. ५.उपाधिज्ञाधीनं -ठ. ६.च इति नास्ति--ट.ठ.

उधे-र्दूकता-बीजम्) उपाधिवादः पु- १०९.

हेतोः साध्यपरित्यागो हि पक्षादन्यत्र वा पक्ष एव वा नाद्यः। स्फुटे व्यभिचारे सति तदर्थमुपाध्यप्रतीक्षणात्। द्वितीये साध्यव्यापकव्यावृत्तिः पक्षे १ साधअयमपि व्यावर्तयतीति प्रतिपक्षोन्नायकतैव।।
ननु -- तदाप्यव्याप्त्युन्नायक एवास्तु। उपाधिव्यावृत्त्या साध्यरहिते पक्षे वर्तमानस्य हेतोर्व्यभिचारावश्यंभावादिति चेन्न। तथात्वे बाधप्रतिरोधयोरपि व्यभिचारोन्नायकत्वापातात्। तत्र ताभ्यामेवानुमाने दुष्टे किं तदुपजीविना व्यभिचारेणेति चेत्तर्ह्यत्रापि व्यापकव्यावृत्तिरूपप्रतिपक्षेणैवानुमाने दुष्ट किं तदुपजीविना व्यभिचारेण।।

उपाध्युपस्थितिल इति योज्यम्। व्याप्त्यभावोन्नायकत्वं कथमित्यत आह-- उपाधीरिति।। परमुखेनैव समाधिं वाचयित्वा सम इत्याह-- तत्र ताभ्यामिति।।
ननूपाध्यभावस्य प्रतिपक्षत्वेन दोषत्वे सत्युपादेरदोषत्वापत्तिः, प्रतिपक्षे उपाध्यनुद्भावनापत्तिः, बाधोन्नीतपक्षेतरस्योपाधित्वानापत्तिः
पक्षैऽकदेशवर्तिनोऽनुपाधितापत्तिः, पक्षेऽविद्यमानव्यतिरेकप्रतियोगिन उपाधितानापत्तिः, संदिग्धोपाधेरदोषत्वापत्तिः, प्रतिपक्षोद्भावनावसर, इति दोषसप्तकभावात्कथं प्रतिपक्षोन्नायकत्वमित्यत आद्यं निराह --न चोपाध्यभावस्येति।।

१.क्षात्साध्य - क.ग.ट.रा.

पु -११०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

न चोपाध्यभावस्य प्रतिपक्षत्वेन दोषत्वे उपाधेर्दोषत्वं न स्यात् न हि यत्र यदभावो दोषस्तत्र सोपि दोष इति वाच्यम्। उपाधेः स्वव्यावृत्तिमुखेनैव दोषतया स्वरूपेणादोषत्वात्। अन्यथा व्यभिचारोन्नयनपक्षेपि चोद्यं दुष्परिहरम्।।
न चैवं सत्प्रतिपक्षे उपाध्युद्भावनं न स्यात्। वैयर्थ्यादिति वाच्यम्। स्वपक्षसाधनार्थमेकं परपक्ष १ साधनप्रतिरोधार्थमपरमिति सार्थक्यात्। अन्याय्यो ह्येकेन बहूनां प्रतिरोधः।।
उक्तं च --
'द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः'।।
इति । सिद्धं चैतल्लोकशस्त्रयोः।

चोद्यं दुष्परिहारमिति।। उपाध्यभावस्य साध्यव्यभिचारोन्नायकत्वेन दूषकत्वे उपाधिर्दोषो न स्यादिति चोद्यस्य तत्रापि तुल्यत्वादिति भावः। द्वितीयमाशङ्क्य निराह -- न चैवमिति।। वैयर्थ्यादिति।। उपाधिः। प्रतिपक्षत्वेन दूषक इति वक्तव्यं २ वादिना प्रागुपन्यस्त हेतोरेव प्रतिक्षस्य सत्वेन पुनरुपाध्यभावरूपप्रतिपक्षस्य कृत्याभावादिति भावः। पूर्वं प्रयुक्तहेतोः पश्चादुक्तोपाध्यभावरूपहेतोश्च द्वयोरपि सार्थक्यमाह -- स्वपक्षेति। बहूनामिति।। अनेकस्येत्यर्थः ३ ।। उक्तं चेति।। विष्णुतत्वनिर्णयोदाहृतब्रह्मतर्कस्मृतावत्यर्थः। लोके प्रसिद्धमिति तदनुक्त्वा शास्त्रे दर्शयति-- उक्तं हीति।।

१.पक्षपदं न -क.ग.राय २.तच्च न संभतीत्यधिकम्-ठ। ३.'बहूनामिति' इत्यादिकं नास्ति-ट.ठ.ड.

उधे-र्दूकता -बीजम्) उपाधिवादः पु - १११.

उक्तं हि प्रमाणतोर्थप्रतिपत्ताविति न्यायभाष्यव्याख्या १ नावसरे न्यायवार्तिकेपि 'प्रमाणाभ्यां प्रमाणैरिति संप्लवो गम्यत'इति। न्यायदीकायां च 'दढ्यर्थकपरस्परसंवादरूपसंप्लवावसर'इति।।
एतेन २ शतमप्यन्धानां न पश्यतीति निरस्तम्।।
न च बाधोन्नीतपक्षेतर ३ त्वोपाधेर्दोषत्वं नस्यात् प्रतिपक्षेऽसाधारण्यादिति वाच्यम्।
तत्रोपाधिव्यतिरेकरूपहेतोरनुकूलतर्कसनाथत्वेनासाधारण्यस्यादोषत्वात्।।
न च क्षितिव्द्यणुकादिपक्षकेश्वरानुमाने पक्षैकदेशवर्तिनोऽनणुत्वस्योपाधित्वं न स्यात्। तव्द्यतिरेकस्य भागासिद्धेरिति वाच्यम्। तत्रोपाधइरहितपक्षैकदेशस्यैव पक्षीकरणात्। तावतापीश्वरानुमानोद्देशधीविरोधित्वेन प्रतिपक्षत्वोपत्तेः।

नन्वेनेकहेतोर्न दाढ्यचापादकत्वमित्येतन्निराह-- एतेनेति।। प्रमाणसंप्लव्याङ्गीकारादित्युक्तत्वेनेत्यर्थः। तृतीयं निराह-- न च बाधेति।। वह्निरनुष्णः पदार्थत्वादित्यादाववह्नित्वादेः। चतुर्थमाशङ्क्य निराह-- न च क्षितीति।। क्षितिव्द्यणुकादिकं सकर्तृकमित्यनुमान इत्यर्थः। पक्षैकदेशस्येति।। व्द्यणुकादिकं विकर्तृकं अणुत्वादित्येवं रूपेणेत्यर्थः। ईश्वरेति।। ईश्वरानुमाने उद्देश्या या धीः सर्वकर्तृविषयिणी तद्विरोधित्वेनेत्यर्थः।

१.ख्यावस-का.रा. २.सहस्रमप्य -क.ग.ट.रा. ३. रोपा -ग.ट.रा.

पु - ११२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः।

नचान्थकारोद्रव्यं स्वातन्त्र्येण प्रतीयमानत्वादित्यत्राश्रावणत्वस्य पर्वतो धूमवान्वह्निमत्वादित्यत्रार्द्रेन्धनादेश्चोपाधित्वं न स्यात्। तद्व्यतिरेकस्य पक्षैकदेशेष्यभावादिति वाच्यम्। व्यभिचारोन्नयनपक्षेपि शब्दे तप्तायःपिण्डे च व्यभिचारस्य स्फुटतयोपाध्यनपेक्षणात्। शब्दादेरपि पक्षत्वेन व्यभिचारस्य स्फुटत्वं १ चोपाधिव्यतिरेकेणापि तत्रैव साध्याभावः साध्यताम्।।
न च स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वादेः संदिग्धोपाधेर्दोषत्वं न स्यात् तद्व्यतिरेकस्य संदिग्धत्वेन प्रतिपक्षसंभवादिति वाच्यम्। पाक्षिकसिद्ध्यादिनापि सत्प्रतिपक्षफलस्य संदेहस्य सिद्धेः।

पञ्चमं पक्षमनूद्य निराह-- न चान्धकार इति।। मीमांसकानुमाने नैयाधिकोक्तश्रावणत्वादेरित्यर्थः। व्यभिचारोन्नयनपक्षेपीत्यपिपदेन न केवलमस्मत्पक्षे किं तु त्वत्पक्षेप्युपाधिर्नापेक्षितः अस्पष्टव्यभिचारस्थले एव व्यभिचारानुमानयोपाध्यपक्षेति भावः। तथा च तत्रोपाधेरेवाभावेन न तत्र प्रतिपक्षोद्भावनं येनासिद्धिदोषः स्यादिति भावः।। तत्रैवेति।। शब्द एव । तथाच तत्र व्यभिचारः सुज्ञान इति भावः।।
षष्ठमाशङ्क्य निराह-- न च सश्याम इति।। गर्भस्थ इत्यर्थः।। संन्दिग्धेति।। साधनाव्यापकत्वसंदेहेन संदिग्धेत्यर्थः। समबलत्वाभावे कथं प्रतिपक्षतेत्यत आह-- संशयेति।।

१.त्वेचो -ट. त्वेन चो-ग.रा.

उधेर्दूकताबीजम्) उपाधिवादः पु - ११३.

संशया १ ङ्त्वेमेव च समबलत्वम्।।
न च पक्षे साध्यसंदेहोऽनुमानाङ्गत्वादुपाधिं विनापि सिद्ध इति वाच्यम्। पक्षे व्यभिचारसंदेहस्यापि २ तं विना ३ सिद्धेः। उपाध्यायत्तो व्यभिचारसंदेहस्तं विना नेति चेत्तदायत्तः साध्यसंदेहोपि तं विना नेति समम्।।
किं च त्वयाप्यु ४ पाध्याभासो नाना ५ । असाधारणविपर्ययः, अप्रसिद्धसाध्यविपर्ययः बाधितसाध्यविपर्ययः, अप्रसिद्धसाध्यविपर्ययः बाधितसाध्यविपर्ययः इत्यादिरूपेणेतिवदतोपाधेः प्रतिपक्षोन्नायकत्वं स्वीकृतम्। असाधारणा ६ प्रसिद्धविशेषणत्वबाधादीनामनुमानदोषत्वात्।।

प्रतिबन्द्योत्तरमाह -- पक्षेव्यभिचारसंदेहस्येति।। तेनैवोत्तरं वाचयित्वा सममित्याह -- उपाधीति।। परसंमतं चैतदित्याह -- किंचत्वयैवेति।। मणिकृतैवेत्यर्थः। असाधारणेति।। असाधारणो विपर्ययोऽभावो यस्येति बहुव्रीहिः। एवमग्रेप्युपाधिरन्यपदार्थः। यथान्वयव्यतिरेकिणि साध्ये बाधोन्नीतान्यपक्षेतरः। अप्रसिद्धेति।। केवलान्वयिनि साध्ये पक्षेतरादिः।। बाधितेति।। वह्निरनुष्णस्तेजस्त्वादित्यत्राकृककत्वम्। पक्षाव्यावर्तकविपर्ययो यथा क्षित्यादिकं सकर्तृकं कार्यत्वादीत्यत्राणुव्यतिरिक्तत्वमित्यादिरूपेणेत्युपाधिवादान्ते वदतेत्यर्थः। स्वीकृतमित्यत्र हेतुः। असाधारण्येति।।

१.यानङ्गत्वमेवचासम् -ट.रा. २.अपिपदं न -क.ग.ठ.रा. ३.नापिसि- क.ग.ट.रा. ४.यैवो -ग.ट.रा. ५.नामासा- ग.रा. ६.ण्याप्र-क.ग.टरा.

किंच वह्निरूपो हेतुः धूमरूपसाध्यव्यभिचारी तव्यापकार्द्रेन्धनरूपोपाध्यभाववद्वृत्तित्वादिति त्वदीयं व्यभिचारानुमानमेव पक्षे साध्याभावसाधकत्वात्प्रतिपक्षः। न ह्यत्रानुमीयमानो व्यभिचारः पक्षादन्यत्र पर्यवसानयोग्यः। यत्र महानसादौ हेतुसाध्ययोः सत्वं तत्र व्यभिचारस्य बाधितत्वात्।

तद्ग्रन्थव्याख्यातृभिरपि सत्प्रतिपक्षो १ न्नायकतापक्षमवलम्ब्यैव तदाभासानाहेत्यवतारितत्वाच्चेत्यपि ध्येयम्।।
ननु -- प्राचां रीत्याऽभ्युपेत्य सत्प्रतिक्षोत्थापकत्वमुपाधेरेति आभासानिरूपिताः वस्तुतस्तु व्यभिचारोन्नायकत्वमेव मणिकृत्सिद्धान्त इत्यतो व्यभिचारानुमानमेव प्रतिपक्षरूपं पक्षादन्यत्र व्यभिचारानुमानासंभवेन पक्ष एव तदनुमानस्यावश्यकत्वादिति भावेनाह -- किं चेति।। पर्वतो धूमवान्वह्निमत्वादित्यत्र वह्निरूप २ हेतुरित्यर्थः।
धूमव्यभिचारी
धूमाभाववद्वृत्तिरित्यर्थः।
उपाधिव्यभिचारित्वादित्यस्यार्थोक्तिरूपाध्यभाववद्वृत्तित्वादिति।।
साध्याभावेति।। साध्यव्यभिचारीत्यस्य साध्याभाववद्वृत्ती ३ त्यर्थत्वादित्यर्थः। तत्र च वह्नेर्वृत्तिमत्वं सिद्धमिति हेतुमति पक्षे साध्याभावसाधन एव पर्यवसानादिति भावः।।
ननु व्यभिचारानुमाने भवेदेवं पक्षान्यत्र महानसादावयोगोलकादौ वा तदनुमाने तु न प्रतिपक्षत्वावकाशा ४ दित्यतो निराह -- न हीति।।

१.क्षोत्थापकता -ट.ठ.ड. २.रूपेहे -ठ.ड. ३.त्तित्वादि-ट.ड. त्तित्वरूपत्वादि-ठ. ४.श इत्येतन्नि -रा.ठ.

यत्र चायोगोलकादौ हेतुसाध्ययोः सत्वासत्वे तस्योपस्थितौ व्यभिचारस्य स्पष्टत्वेनोपाध्यनपेक्षणात्। अनुपस्थितौ च तत्रापर्यवसानात्।।
तस्मात्परिशेषान्निश्चितहेतुकत्वेन सन्दिग्धसाध्यकत्वेन चोपस्थिते पक्ष एव साध्याभावं ज्ञात्वा तत्र हेतोः सत्वं ज्ञेयमिति व्यभिचारानुमितिः पूर्वं पक्षे साध्याभावं स्पृशन्ती कथं न प्रतिपक्षः। नचैवमुपाध्यभावस्य हेतुताहतिः। १ । उपाध्यभाववद्वृत्तित्वादिति हेतुशरीरे उपाध्यभावप्रवेशात्।।
ननु -- दूष्यानुमानस्य तर्कानुग्रहे उपाधिर्न साध्यव्यापकः। उपाधेस्तदनुग्रहे त्वनुमानस्य बाधं एवेति कदा प्रतिपक्षावसर इति चेत्। यदैकतत्रा २ नुकूलतर्कानवतारस्तदेत्यवेहि। अन्यथा -- प्रतिपक्षमात्रोच्छेदः।

सत्वासत्वे इति।। यथाक्रममन्वयः। कथं न प्रतिपक्ष इति।। उपजीव्यत्वात्प्रतिपक्ष एव वाच्य इत्यर्थः। तथापीष्टसिद्धिर्नेत्याशङ्क्य निराह -- न चैवमिति।। सप्तमं पक्षमाशङ्कते -- नन्विति।।
'अनुकूलेन तर्केण सति साधने।
साध्यव्यापकताभङ्गात्पक्षे नोपाधिसम्भवः'।।
इत्युक्तेरिति भावः। तदनुग्रहे तु -- अनुकूलतर्कानुग्रहेत्वित्यर्थः। बाध एवेति।। उपाध्यभावरूपहेतोः प्रबलत्वादिति भावः। अवेहि।। जानीहीत्यर्थः।।

१.क्षतिः -ट.रा. २.त्राप्यनु -क.ट.रा.

पु -११६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

न हि प्रतिपक्षो यावज्जीवं प्रतिपक्षः। यस्य हि यदानुकूलतर्कावतारः स तदा बाधकोन्यस्तु बाध्य एव भवति।।

प्रतिपक्ष १ प्रयोगोपि -- शुद्धसाध्यव्यापके वैधीहिंसा नाधर्मसाधननिषिद्धत्वादिति, अवच्छिन्नसाध्यव्यापके तु
वायुः द्रव्यत्वे सति स्पार्शनत्वेन हीनोऽचाक्षुषत्वादाकाशवदिति,

अत्रोवेहीत्येकारपाठः साधुः। नत्वैकारपाठः। 'अव इहि'इतिस्थिते 'आद्गुण इति गुणेन भाव्यत्वात्। न च आ इहि एहि अव एहीति स्थिते 'वृद्धिरेचीति'वृद्धौ अवैहीति युक्तम्। आङ्पूर्वस्यागमनार्थत्वेन जानीहीत्येतदर्थकत्वायोगात्। तथापि 'वृद्धिरेची'त्येतद्बाधित्वा 'एङ्पररूप'मिति पररूपेण भाव्यत्वाच्च। न च एङिपररूपमित्येतद्बाधित्वा 'एत्येधत्यूठ्स्व'ति वृद्धिर्भवष्यतीति वाच्यम्। एतद्वृद्धिमपि बाधित्वा 'ओमाङोश्चेति'पररूपेणैव भाव्यत्वात्। 'पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरा'निति 'एत्येधत्यूठ्स्व'ति सूत्रवृत्तावेवोक्तत्वेन एत्ये २ धत्यूठ्स्त सूत्रस्यानन्तरं पठितं 'एङिपररूप'मित्येतद्विधिं प्रत्येव बाधकत्वेन तदनन्तरं पठितमोमाङोश्चेत्येतत्प्रत्यबाधकत्वात् ३ ।।
नचैवं नित्यदोषतानापत्तेरित्यतः इष्टापत्तिमुत्तरमाह -- नहि प्रतिपक्ष इति।। एवं प्रतिपक्षोन्नायकत्वं समर्थ्येदानीं तदुन्नयनप्रकारमाह -- प्रतिपक्षेति।। शुद्धसाध्यव्यापके इति कर्तव्यः अवच्छिन्नसाध्यव्यापके तु इति कर्तव्यः इत्येवकर्तव्य इति चान्वयः। द्रव्यत्वे सतीति।।

१.क्षप्रतियोगो -ग.रा. क्षयोगो-क. एतीतिस्-ठ.ड. ३.एङि पररूपमिति पररूपत्वान्न वृद्धिः इत्यधिकम् -ठ.

उधे-र्दूकता-बीजम्) उपाधिवादः पु - ११७.

समवायः संबन्धत्वे सति समवेतत्वेन हीनोकृतकत्वादाकाशवदिति, १ अवच्छिन्नसाध्यव्यापकोपि शुद्धसाध्य २ एवोपाधिरिति, चतुर्थपक्षे वायुः स्पार्शनो न द्रव्यत्वे सत्यचाक्षुषत्वादाकाशवदत्येव कर्तव्यः। न तु सर्वत्रापि विमतं व्यापार २ रहितं व्यापकरहितत्वादिति सामान्येन। व्यापकरहि ४ तत्वस्यानिर्धारितत्वेनासिद्धेः। वह्निमानं ५ तव्याप्यवत्वादिति सामान्येन प्रयोगप्रसङ्गाच्च। न च द्वितीयतृतीययोः साध्यविशेषणवैयर्थ्यम्।

द्रव्यत्वविशिष्टस्पार्शनत्वहीन इत्यर्थः। हेतोः पक्षधर्मबलाद्विशिष्ट ६ राहित्यं सिध्यत् विशेषणराहित्ये बाधाद्विशेष्यराहित्यमादाय पर्यवस्यति दृष्टान्तेप्येवमेवेति भावः। उत्तरप्रयोगेप्येवं -- ध्येयम्।।
एवं शुद्धसाध्यव्यापके पक्षधर्मावच्छिन्नसाध्यव्यापके साधनावच्छिन्नसाध्यव्यापके च प्रतिपक्षप्रकारं क्रमेण प्रदर्श्य केचित्वित्यादिनोक्तोपाधइलक्षणेपि तं प्रकारमाह -- अवच्छिन्नेति।। चतुर्थेति।। स्वाभिमतोपाधिलक्षणोक्तिप्रस्तावोक्तचतुर्थपक्ष इत्यर्थः। एवकारः सर्वत्रान्वेतव्य इति भावेन तव्यावर्त्यमाह -- न तु सर्वत्रापीति।। उक्तपक्षचतुष्टयेपीत्यर्थः।। व्याप्येति।। साध्यरूपव्याप्येत्यर्थः।। अनिर्धारितत्वेनेति।। अनुकूलतर्कादिना निर्धारितत्वे सत्युपाध्यभावस्य प्रबलतया बाधकत्वेन प्रतिपक्षत्वायोगात्। अनुकूलतर्कानवतारकाल एवोपाध्यभावस्य प्रतिपक्षतेत्युक्तत्वादिति भावः।।

१.दित्येव कर्तव्यः। न तु स इत्येवमस्ति-ग.रा. २.ध्यव्यापकोपाधि- ट. ३.प्यर -ट.रा. ४.कत्वस्यानि-ग.ट.रा. ५.अयमितिन -ग.ट.रा. ६.ष्टं - रा.ट.ड.

शब्दो न स्पर्शवद्विशेषगुणः अयावद्द्रव्यभावित्वादित्यादाविव व्यभिचारपरिहारार्थत्वात्।।
ननु -- विपक्षे बाध १ तर्कज्ञाने उपाधेरनवतारः २ तदज्ञाने तत एव व्याप्तिग्रहप्रतिबन्धात् किमुपाधिनेत्युपाधिचिन्ता वृथैवेति चेन्मैवम्। तर्काज्ञानदशायामुपाधि ३ प्रसङ्गात्। न हि विपक्षे बाधकतर्कज्ञानं व्याप्तिधीहेतुः। व्यभिचारशङ्काभावे तर्कानपेक्षणात्। येन तदज्ञानं व्याप्तिधी ४
प्रतिबन्धकम् स्यात्। किंतु विपक्षे बाधकतर्काभावज्ञानम्।

व्यभिचारेति।। अयावद्द्रव्यभावित्वस्यात्मविशेषगुणे ज्ञानादौ भावेन हेतोव्यभिचारनिरासाय स्पर्शवदिति साध्यविशेषणम्। तथा चाक्षुषत्वस्य प्रत्यक्षस्पर्शे सत्वेन हेतोर्व्यभिचारवारणायैव द्रव्यत्वे सतीति विशेषणम्। द्वितीयप्रयोगोपि अकृतकत्वस्य समवेते सत्वेन व्यभिचारवारणाय संबन्धत्वे सतीति विशेषणमित्यर्थः।।
ननु -- तर्काज्ञानमेव व्याप्ति ५ प्रतिबन्धकमस्तु किमुपाधिज्ञानेनेत्यत आह-- न हीति।। किंत्विति।। वाक्ये व्याप्तिधीप्रतिबन्धकमित्यनुकर्षः। ननु तर्काज्ञान एव तर्काभावज्ञानं भवतीति तर्काज्ञानमेव प्रतिबन्धकमित्यागतमित्युपाधिर्व्यर्थं एवेत्यत आह -- न चेति।।

१.धकत -ग.ट. २.रात्तद-ट.रा. ३.धेरभावात्-क. धेरवतारात्-ग.ट.रा. ४.धी हेतुः प्रति-ग.ट.रा. ५.प्तिधीप्र- ट.ड.

उधे-र्दूकता-बीजम्) उपाधिवादः पु - ११९.

नच तर्काज्ञानदशायां तर्काभावज्ञाननियमः। अनियतसामग्रीकत्वात्।।

तस्मादुपाधिर्विप्रतिपत्तितः प्रागव्याप्तेरुन्नायकः। अनन्तरं तु प्रतिपक्षस्य । एवं च अनुव्याख्याने --
'साध्यव्यापकवैलोम्यमव्याप्तिः साधनस्य चे'त्युपाधेरव्याप्त्यन्तर्भावस्योक्तत्वात्, प्रमाणलक्षणे तु १ स एवोपाधिदोषोपीति प्रतिरोधान्तर्भावस्योक्तत्वाद्विरोध इति निरस्तम्। दशाभेदेनोभयसंभवात्।।
अत एवसुधायामव्याप्तिः साधनस्य चेत्यनुव्याख्यानस्थ चशब्देन प्रतिरोधोपि संगृहीत इत्युक्तम्। एतदेवाभिप्रेत्य पद्धतौ उपाधिर्विप्रतिपत्तेः प्रागव्याप्त्युन्नायकः विप्रतिपत्युत्तरकालं २ प्रतिपक्षोन्नायको भवतीत्युक्तम्। यत्तु प्रमाणलक्षणटीकायां
स एवेति मूलस्थैवकारस्य व्यभिचार ३ वारकत्वेन व्याख्यानं तदपि --

स एवेति।। प्रतिपक्ष एवेत्यर्थः।। व्यभिचारवारकत्वेनेति।। व्यभिचारस्यैव ४ व्याप्तित्वेन प्रतिपक्ष एवोपाधिदोषो न त्वव्याप्तरिति प्राप्तत्वाद्विरोध इति शङ्काभिप्रायः।।

१.तुपदंन-ग.ट.रा. २.लंतुप्र-क.ग.ट.रा. ३.रव्यावच्छेदकत्वेन -ट. ४.वा व्याप्ति -ट.ड.

विप्रतिपत्यनन्तरं तव्द्यवच्छेदकत्वपरमिति न तद्विरोधोपीति १ ।।
इत्युपाधेर्दूषकताबीजम् ।। १०।।

विप्रतिपत्य २ नन्तरमिति।। अनुमानप्रवृत्त्युत्तरकालमव्याप्तिर्नेत्यभिप्राय इत्यर्थः।।

इत्युपाधेर्दूषकताबीजम् ।। १० ।।

अथ तार्किकोक्ततृतीयज्ञाननियमभङ्गः ।। ११ ।।
अथानुमितिकारणं ज्ञानमुच्यते।
अत्र केचित् -- धूमाग्न्योर्महानसादौ व्याप्तिं गृहीतवतः आदौ पक्षे धूमज्ञानम्। अथ व्याप्तिस्मरणम्। अनन्तरमयं धूमो वह्निव्याप्य इति --

'अनुमा युक्तिरेवोक्ता व्याप्तिरेव तु सास्मृता'
इति युक्तिपादीयानुव्याख्यानसुधोक्तिं ३ विवृण्वान आह -- अथेति।। व्याप्तिस्वरूपज्ञानोपायतत्प्रतिबन्धकोक्त्यनन्तरमवसरप्राप्तमित्यर्थः।
केचित् -- तार्किकाः। पक्षधर्मे व्याप्तिविशिष्टज्ञानं तदनन्तरं विशिष्टवैशिष्ट्यज्ञानं वेति परामर्शवादे ४ मण्युक्तेराह -- अं धूमोवह्निव्याप्य इति वेत्यादि ।।

१.इतिपदंन-ग.ट.रा. २,त्यन्तर-ट.ड. ३.क्तं वि-ट.ड. ४.दम-ट.ठ.ड.

ताक्त-तृज्ञा-निमङ्गः) परामर्शवादः पु - १२१.

वह्निव्याप्यधूमवानयमिति वा व्याप्तिपक्षधर्मताविशिष्टधूमविषयकं प्रतिसन्धानात्मकं लिङ्गपरामर्शसंज्ञकं तृतीयं ज्ञानं तदेवानुमितिजनकमित्याहुः। तन्न। यत्र हि लिङ्गदर्शनादेव व्याप्तिस्मृतिस्तत्रेयं १ प्रक्रिया। यत्र तु लिङ्गदर्शनं विनैवादृष्टादिहेत्वन्तरेणाप्तवचनेन वा व्याप्तिस्मृतिस्तत्र द्वितीयमेव लिङ्गदर्शनं व्याप्तिस्मृतिसहितात्सन्निकर्षादेवोक्तप्रतिसन्धानात्कमुदेष्यति। सोयमिति प्रत्यभिज्ञावदिति किं तृतीयज्ञानेन।।
तदुक्तं सुधायाम् -- नावश्यंभाविनीयं प्रक्रियेति।।

इति तार्किकोक्ततृतीयज्ञाननियमभङ्गः ।। ११ ।।

तृतीयज्ञानमिति।। व्याप्तिग्रहदशायां लिङ्गदर्शनं प्रथमं पश्चात्पर्वतादौ लिङ्गदर्शनं द्वितीयं व्याप्तिविशिष्टलिङ्गज्ञानं तृतीयमिति तृतीयज्ञानमित्युक्तम्।। सन्निकर्षादिति।। चक्षुर्धूमादिसंबन्धादित्यर्थः। तथा च कदाचिद्द्वितीयमपि परामर्शरूपं जातमिति किं तृतीयनियमेनेत्यर्थः।।
इति तार्किकोक्ततृतीयज्ञाननियमभङ्गः ।। ११ ।।

१. त्रैवेयं - ट.रा.

पु -१२२. न्यायदीपुयततर्कताण्डवम् (तृ.परिच्छेदः

अथ प्राभाकरोक्तज्ञानद्वयहेतुत्वभङ्गः ।। १२ ।।
प्राभाकरास्तु -- धूमो वह्निव्याप्य इति स्मृतिः पर्वतश्चधूमवा १ निति ज्ञानद्वयमेवानुमितिहेतुः। ज्ञानद्वयानुमित्योर्मध्ये विशिष्टज्ञाने मानाभावात्। ज्ञानद्वयस्य २ स्वरूपं पूर्वभावित्वं नियमश्च क्लृप्त एव। विशिष्टज्ञानवादिनापि तद्धेतुत्वेन ज्ञानद्वयस्वीकारात्। अन्यथा सिद्धिमात्रं कल्प्यम्। विशिष्टज्ञाने ३ चतुष्टयं कल्प्यमिति गौरवम्।

अथ प्राभाकरोक्तज्ञानद्वयहेतुत्वभङ्गः ।। १२ ।।
व्याप्तिरेव तु सा स्मृतेत्येतव्द्याख्यानसुधायां तदन्यो न मन्यत इत्यादिनोक्ते प्राभाकरमततद्दूषणे विवृण्वान आह -- प्राभाकरास्त्विति।। इत्याहुरित्यन्वयः। परामर्शवादपूर्वपक्षे मण्युक्तं निष्कृष्यानुवदति-- धूम इति।। ज्ञानद्वयमेव स्मृत्यनुभवरूपज्ञानद्वयमेवेत्यर्थः। ननु ज्ञानद्वयानन्तरभाविनोऽनुतिपूर्वभाविनो व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य कुतो न हेतुत्वमित्यतस्तत्स्वरूपमेव नभोनलिनायितमित्याह --

ज्ञानद्वयेति।। ज्ञानद्वयस्य कारणत्वे गौरवं विशिष्टज्ञानस्य हेतुत्वे लाघवमित्यतो विपरीतमेव लाघवमित्याह -- ज्ञानद्वयस्येति।। नियम इति।। अनुमित्यव्यभिचार इत्यर्थः। कथं त्रितयं क्लृप्तमित्यत आह -- विशिष्टेति।। अनन्यथेति।। विशिष्टज्ञानरूपपरामर्शानुपक्षीणतयाऽनुमित्येकोपक्षीणत्वमात्रं कल्प्यमित्यर्थः।

१.नित्यमनुभ इति-ग.ट.रा. २.स्यहिस्व-क.ग.ट.रा. ३.ने तु च -ग.रा.

प्राक्त-ज्ञाद्व-हेत्वङ्गः) परामर्शवादः पु - १२३.

एतेन ज्ञानद्वयादप्येकस्य विशिष्टज्ञानस्य कारणत्वं लघ्विति निरस्तम्। विशिष्टज्ञानस्यैवासिद्धेः। वस्तुद्वये युगपदुपस्थिते हि लाघवगौरवचिन्तेत्याहुः।।
तन्न। प्रत्यभिज्ञावदनुमित्यादिवच्चानुभवसिद्धस्य विशिष्टज्ञानस्य तद्धेतुभूतज्ञानद्वयेनापलापे
प्रत्यभिज्ञायास्तत्तास्मृतीदन्तानुभवरूपज्ञानद्वयेनानुमितेर्वह्निस्मृतिपर्वतानुभ०
ारूपज्ञानद्वयेन व्याप्तिज्ञानस्य तद्धेतुभूतसहचारादिज्ञानेन त्वदुक्तज्ञानद्वयस्य च तत्करणेनापलापप्रसङ्गात्। भवति हि त्वन्मते भमस्थले २ ऽसंसर्गाग्रहसहकृतेन ग्रहणस्मरणरूपज्ञानद्वयेने ३ दं रूप्यमिति विशिष्टव्यवहारवत्प्रत्यभिज्ञास्थलेऽनुमितिस्थले
चासंसर्गाग्रहसहकृतेनोक्तज्ञानद्वयेन सोयमिति व्यवहारः पर्वतो ४ ग्निमानित्यादिव्यावहाराश्च। अन्यथा भान्तिरपि स्वीकार्या।।

एकस्य कारणत्वकल्पनं लघ्वित्यत आह -- एतेनेति।। विशिष्टज्ञानमेव नेत्येतन्निराह-- प्रत्यभिज्ञावदित्यादिना।। प्रत्यभिज्ञाया इत्यादि

षष्ठ्यन्तानामपलापप्रसङ्गादित्यन्वयः। सहचारादीत्यादिपदेन व्यभिचाराभावज्ञानग्रहः। विशिष्टव्यावहारान्यथानुपपत्या प्रत्यभिज्ञादेरेकत्वं सिद्धमित्यत आह -- संभवति हीति।। अन्यथेति।। विशिष्टव्यावहारबलेन
विशेषणविशेष्यतत्सबन्धविषयकरूपविशिष्टज्ञानाङ्गीकारे
विशिष्टविषयकैकज्ञानरूपा भ्रान्तिः स्वीकार्येत्यर्थः।।

१.नाव्या -ग.रा. २.अगृहीतासंसर्गग्रहणस्म -ग.ट.रा. ३.'द्वयेन' इत्याधिकः 'सोयमितिव्यवहा' इति पर्यन्तो ग्रन्थः नास्ति- ग.रा. ४.तोवह्निमा -रा.

पु -१२४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

किञ्च व्याप्तिज्ञानं त्वन्मते सामान्यप्रत्यासत्तेरभावात्सन्निकृष्टधूमव्यक्तिमात्रविषय १ कम्। पक्षधर्मज्ञानं त्वगृहीतव्याप्तिकधूमविषय २ कम्। एवं च किञ्चित्प्रमेयं वह्निव्याप्यं पर्वतश्च प्रमेयवानिति ज्ञानद्वयमिव कश्चिद्धूमो व्याप्यः पर्वतश्च धूमवानिति विशिष्टकलितं परस्परवार्तानभिज्ञं ज्ञानद्वयमपि नानुमितिहेतुः।।
न च प्रमेयत्वं वह्निव्याप्यतावच्छेदकत्वेन न गृहीतं धूमत्वं तु तदवच्छेदकत्वेन गृहीतमिति वैषम्यमिति वाच्यम्। व्याप्यतावच्छेदकत्वं हि व्याप्यत्वेन सह व्याप्तिः। अन्यस्य प्रकृतानुपयोगात्।

ननु संवादबलात्प्रत्यभिज्ञादौ विशिष्टैकज्ञानत्वमुपेयम्। न तु भमस्थल इति वदन्तं प्रत्याह -- किञ्चेति।। यद्वा विशिष्टज्ञानास्तित्वं समर्थ्य पराभिप्रेत ३ ज्ञानद्वयहेतुत्वं निराह-- किञ्चेति।। अथवा पूर्वं पर्वतादिनिष्ठधूमव्यक्तिविशेषणत्वेन व्याप्तेरग्रहादन्यत्र

गृहीतव्याप्तिविशिष्टज्ञानमन्यत्र कथमुत्पत्तुमर्हमि ४ त्यतस्तर्हि ज्ञानद्वयस्यापि हेतुतानापत्तिरित्याहि -- किञ्चेति।।
सन्निकृष्टधूमेति।। महानसीयधूमव्यक्तिमात्रेत्यर्थः। अन्यस्येति।। अन्यूनानधिकदेशवृत्तित्वादेरित्यर्थः।

१.यत् -क.ग.रा. २.यम्-क.ग.ट.रा. ३.तं ज्ञा-ठ.भिमत ज्ञा-ड. ४.तीत्य-ठ.ड.

प्राक्त-ज्ञाद्व-हेत्वङ्गः) परामर्शवादः पु - १२५.

न च व्याप्तिग्रहणकाले धूमस्याग्निनेव धूमत्वस्य धूमनिष्ठया वह्निव्याप्त्या सह व्याप्तिर्गृहीता। एवं च पक्षधर्मे धूमे व्याप्तिग्रहप्रस्तावोक्तरीत्या व्याप्तिग्रहसामग्रीसत्वेपि व्याप्तिं न पश्यसि, पश्यसि तु व्याप्तिधूमत्वयोर्व्याप्तिग्रहसामग्रीविरहे १ व्याप्तिमिति नूनं ते २ तु चेरविलोचने।।
एतदेवाभिप्रेत्योक्तं सुधायाम्। न खलु विशकलिते व्याप्तिस्मृतिपक्षधर्मताज्ञाने भवयतोऽनुमितिरिति। विशकलिते भिन्नविषय इत्यर्थः।।

सर्वधूमव्यक्तिनिष्ठव्याप्तेरेकत्वे मानाभावेन नानात्वेऽवश्यंभाविनि धूमत्वस्य तदनधिकदेशवृत्तित्वाभावा ३ दवच्छित्तिप्रत्ययजनकत्वादेर्जनकत्वस्य
व्याप्तिगर्भतयाऽऽत्माश्रयापाताच्चेति भावः। यद्वावच्छेदकं ह्यनुमित्युपयोगितयाभ्युपेयम्। तच्च धूमत्वादेर्व्याप्तिव्याप्यत्वरूपत्वे धूमदर्शने सति व्याप्तिस्मृतिद्वाराऽनुमित्युपयोगि। न त्व ४ धिकदेशवृत्तीत्वादि ५। तज्ज्ञानेन व्यप्तिस्मृतौ बीजाभावादित्यर्थः।

उक्तरीत्या व्याप्तिग्रहसामग्रीति।। सादृश्यादिरूपसामग्रीसत्वेपीत्यर्थः। चतुरे कुशले इत्युपहासः। उक्तमिति।। व्याप्तिरेव तु सा स्मृतेत्येतद्व्याख्यावसरे युक्तिपादे ।।

१.हेपि- व्या- ट.रा. २. ते रुचिरे वि-क. ते चतुरे वि -ग.ट.रा. ३.वात्तद -ठ. ४.त्वनधिक -ड. ५.दीतरतज्ज्ञा -ठ.

पु - १२६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

किंच विशिष्टज्ञानाभावे व्याप्तिज्ञानस्य १ करणत्वं न स्यात्। निर्व्यापारत्वात्। न च तर्को व्यापारः। तस्यासार्वत्रिकत्वात्। नापि पक्षधर्मताज्ञानं व्यापारः। तस्य व्याप्तिज्ञाना २ जन्यत्वात्। विशिष्टज्ञानस्य तु तज्जन्यत्वात्।।
एतदप्युक्तं विशकलित इति। परस्परं जन्यजनकभावरहिते इत्यर्थः।।
अपि च संशयानन्तरभावविशेषदर्शनजन्यप्रत्यक्षस्थले करचरणादौ पुरुषत्वव्याप्तिस्मृतिः पक्षधर्मताज्ञानं
चास्तीति त्वन्मतेनुमितिः स्यात्। ३ अस्मन्मते तु विशिष्टज्ञानाभावादनुमितिर्युक्ता। एवं च त्वन्मते प्रत्यज्ञसामग्र्या अत्राक्लृप्त ४ सामग्रीतो बलवत्वं च न कल्प्यम्।।

त्वदङ्गीकृतव्याप्तिज्ञानकरणत्वबलादपि विशिष्टज्ञानं मध्ये कारणत्वेनोपेयमित्याह-- किंच विशिष्टज्ञानाभाव इति।। असार्वत्रिकत्वादिति।। संशस्थल एव तर्कावतारस्योक्तत्वादिति भावः। व्याप्तिज्ञानजन्यत्वादिति।। तज्जन्यजनकत्वे सति तज्जन्यस्यैवव्यापारत्वादिति भावः। अन्वयव्यभिचाराच्च न ज्ञानद्वयस्य हेतुत्वम्। विशिष्टज्ञानस्य हेतुत्वे तु न व्याभिचार इति भावेनाह -- अपि

चेति।। विशिष्टज्ञानहेतुत्वाङ्गीकारेऽन्वयदप्यनुकूलितमित्याह-- एवं चेति।।

१.कार-क.ट. २.न ज -ग.ट. ३. मन्म -क.ग.ट.रा. ४.प्तमनुमिति सा - क.ग. अन्यत्राक्लृप्तमनु-ट.रा.

प्राक्त-ज्ञाद्व-हेत्वङ्गः) परामर्शवादः पु - १२७.

एतदप्युक्तं -- विशकलित इति। इक्तस्थलेऽनुमितिं विनापि स्थिते इत्यर्थः। किं च त्वदुक्ते ज्ञानद्वये सत्यपि पक्षनिष्ठधूमो १ वह्निव्याप्तो नेति विपर्यये
संशये वा सत्यनुमित्यदर्शनात्तयोरनुमितिप्रतिबन्धतकता तावद्वक्तव्या। ज्ञानस्य च ज्ञानप्रतिबन्धकत्वं विरोधिविषयत्वेनैव। तच्च द्वेधा। साक्षादनुमितिविषयविरोधिविषत्वेन वा, तज्जनकज्ञानविषयविरोधिविषय २ त्वेन वा। तत्राद्यः प्रकृते न संभवति। व्याप्यभेदभ्रमस्य बाधवदनुमितिग्राह्यवह्न्यभावाविषय २ त्वात्। तथाच व्यभिचारज्ञानस्यानुमितिहेतुव्याप्ति ३ विघटनेनेव व्याप्यभेदभ्रमस्याप्यनुमितिहेतुव्याप्याभेदज्ञानविघटनेनैवानुमितिप्रतिबन्धकत्व ं वाच्यमिति सिद्धं व्याप्याभेदज्ञानस्यानुमितिहेतुत्वम्।।

स्थिते इत्यर्थ इति।। तथा च तादृशे व्याप्तिस्मृतिपक्षधर्मताज्ञाने भावयतो नानुमितिरिति समग्रवाक्यार्थ इति भावः।।
व्याप्यभेदविषयकविपर्ययादेः प्रतिबन्धकत्वान्यथानुपपत्यापि विशिष्टज्ञानहेतुत्वसिद्धिरि ४ त्याह-- किं च त्वदुक्ते इति।। ज्ञानस्य चेति।। व्याप्यभेदगोचरविपर्ययादिरूपज्ञानस्य चेत्यर्थः। व्याप्यभेदेति।। व्याप्ये धूमे व्याप्यो नेति व्याप्यो वा न वेतीति व्याप्यभेदभ्रमस्येत्यर्थः।

१.धर्मो विह्निव्याप्यो ने - ग.ट.रा. २.यकत्वा-ट.रा. ३.ज्ञानपदमधिकम् - ट.रा. ४.त्यत आ- ट.ठ.ड.

पु - १२८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

यदि च विरोध्यविषयकमपि ज्ञानं मण्यादिवद्विरोधि तर्ह्युपाधिना व्यभिचारो नोन्नीयते। किंतु मण्याद्यभावो दाह इव उपाधिज्ञानाभाव एवानुमितो हेतुः स्यात्।।
न चानुमितिसामग्र्या बलवत्वाज्ज्ञानद्वये सत्यनुमितिरेवोत्पद्य २ ते। न तु प्रत्यक्षो व्यप्यभेदभ्रम इति वाच्यम्। तस्या बलवत्वासंमतेः।।
किंच यत्र त्वदुक्तज्ञानद्वयानन्तरं भेदभ्रमस्तत्रैवमस्तु। यत्र ३ धूमो वह्निव्याप्यः पर्वतीयधूमश्च वह्न्यव्याप्य इति ४ पक्षधर्मताज्ञानमेव भेदविषयं त्वन्मते व्याप्त्यव्याप्त्योर्भिन्न ५ विषयत्वेनाविरोधात् तत्र भेदज्ञानात्पूर्वं
अनुमितिसामग्र्यभावेन तया

प्रका ६ रान्तरेम प्रतिबन्धकत्वचोद्यमनूद्य निराह-- यदि चेति।।
ननु -- व्याप्यभेदभ्रम एव नास्ति यस्य प्रतिबन्धकत्वबलेन विशिष्टज्ञानहेतुत्वसिद्धिरित्याशङ्कां निराह-- न चानुमितीति।।
अभ्युपेत्यापि बलवत्वमनुमितिसामग्र्यभावस्थले विपर्ययादिबलाद्विशिष्टज्ञानहेतुत्वसिद्धिरित्याह-- किंच यत्रेति।। एवमस्त्विति।। अनुमितिसमाग्रीबलवत्वेन व्याप्यभेदभ्रमानुत्पादोस्त्वित्यर्थः। धूम इति।। व्याप्तिग्रहणस्थलीय इत्यर्थः। विरोधात्कथमेवं भ्रम इत्यत आह-- त्वन्मत इति।।

सामान्यप्रत्यासत्तेरनङ्गीकारेण पर्वतनिष्ठधूमे व्याप्तेग्रहेण तत्र व्याप्ये ७ भेदभ्रमे बाधकाभावात्।।

१.तर्हे -ट.रा. २.द्येत -ग.रा. ३.त्रसु धू-रा.क. ४.ज्ञानपदमधिकम्- रा. ५.न्न निष्ठत्वेना -ट.रा. ६.प्रमाणान्त -ड. ७.प्यभे- ट.ड.

प्राक्त-ज्ञाद्व-हेत्वङ्गः) परामर्शवादः पु - १२९.

१ न प्रतिबन्धो युक्तः।।
न च धूमत्वज्ञानरूपस्य वा धूमो वह्निव्याप्य इति ज्ञानरूपस्य वा विशेषदर्शनस्य सत्वान्न व्याप्यभेदभ्रम इति वाच्यम्। स्वरूपेण धूमत्वज्ञानस्याविरोधित्वात्। व्याप्तिव्याप्यत्वेन ज्ञानस्य तु विरोधित्वे २ तस्यायं धूमवानिति पक्षधर्मताज्ञानेऽभावात्। धूमो वह्निव्याप्य इति ज्ञानस्य च त्वन्मते भिन्नविषयकत्वेनाप्रतिबन्धकत्वात्। न च भिन्नविषयकत्वेपि समानप्रकारकत्वमात्रेण प्रतिबन्धकत्वम्। प्रमेयं घटवदिति ज्ञानेन प्रमेये गृहे घटो नेति धीप्रतिबन्धापातात्।।
एतदप्युक्तं विशकित इति ३। व्याप्य ४ भ्रमेण प्रतिबद्धे इत्यर्थः।।

सामग्र्यभावेपि विशेषदर्शनमेव भ्रमप्रतिबन्धकमित्याशङ्क्य निराह-- न च धूमत्वेति।। ५ समानप्रकारकत्वेति।। धूमो वह्निव्याप्य इति ज्ञानस्य पर्वतीधूमश्य
व्याप्यो नेत्यस्य च धूमत्वप्रकारकत्वात्प्रतिबध्यप्रतिबन्धकभाव इत्यर्थः। मात्रपदेन च समानविशेष्यकत्वं व्यावर्त्यते। इत्यर्थ इति। समगवाक्यार्थः पूर्ववद्द्रष्टव्यः। क्वचिद्विशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वादन्यत्रापि तथेतिभावेन तस्य क्विचिद्धेतुत्वमाह-- अपि चेति।।

१. न पदं युक्तपदात्प्रागस्ति-क.ग.ट.रा. २.त्वेपित-ग.ट.रा. ३.ते इति - ग.ट.राय ४.भेदपदमधिकम्-क.ग.ट.रा. ५.धूमत्वज्ञानरूपस्येत्यर्थः इत्यधिकम्-ठ.

पु - १३०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

अपि च यत्र धूमदर्शनं विनापि शब्दादिना व्यप्तिस्मृतिमतः पुंसः स्मृतव्याप्तिसन्निकृष्टधूमत्व १ योर्वैशिष्ट्यं प्रत्यक्षज्ञानेन वह्निव्याप्यधूमवानयमिति शाब्दज्ञानेन च युगपदेव गृह्यते तत्राप्यनुमितिस्तावद्दृश्यते। तत्र च व्याप्यत्वप्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुता वाच्या। लाघवात्। व्याप्यतावच्छेदकत्वस्य व्याप्यतागर्भितत्वेन व्याप्यताया आवश्यकत्वाच्च। न तु व्याप्यतावच्छेदकप्रकारकपक्षध्मताज्ञानत्वेन । गौरवात्। अनावश्कत्वाच्च।।

ज्ञानद्वयरूपानुमितिसामग्री पराभिमता वक्तुं धूमदर्शनं विनापीत्युक्तम्।। स्मृतेति।। स्मृतव्याप्तिश्च सन्निकृष्टधूमश्च तयोरित्यर्थः।।
ननु तत्राप्यनुमितिधशायां तावता विशिष्टज्ञानत्वेन न हेतुता किंतु व्याप्यतावच्छेदकप्रकारकपक्षध्मताज्ञानत्वेनैव । तथाच ज्ञानद्वयस्थल इवास्मदभिमतकारणतावच्छेदकं तत्राप्यक्षतमेवेत्यत आह-- तत्र चेति।। भवत्पक्षेपि व्याप्यत्वज्ञानमावश्यकमित्याह-- व्याप्यतेति।। अवच्छेदकत्वं हि व्याप्यत्वेनेह व्याप्तिरन्यस्यानुपयोगादित्युक्तदिशा व्याप्यतागर्भितत्वनेत्यर्थः। एवकारव्यावर्त्यमाह-- नत्विति।। अनावश्यकत्वाच्चेति।। यथा २ व्याप्यतावच्छेदकत्वज्ञाने व्याप्यत्वज्ञानमावश्यकम् --

१.मयोर्वै-ग.ट.रा. २.यथा अवच्छे-ठ.ड.

प्राक्त-ज्ञाद्व-हेत्वङ्गः) परामर्शवादः पु - १३१.

ननु व्याप्तावपि व्याप्तिरहितावृत्तित्वरूपं व्याप्यतावच्छेदकत्मस्तीति व्याप्यतावच्छेदकं १ त्वप्रकारकत्वं सामान्यं व्याप्तयाप्रकारकत्वं तु विशेषः न च सामान्यस्य प्रयोजकत्वसम्भवे विशेषस्य तद्युक्तमिति चेन्न। व्याप्यौ तु २ त्वदुक्तस्य व्याप्यतावच्छेदकत्वस्य सत्वेपि व्याप्तित्वेन ३ ज्ञानमात्रेणानिमितिदर्शनेन व्याप्यतावच्छेदकत्वेन व्याप्तिज्ञानस्यानुमित्यहेतुत्वात्। त्वयौ १ पाधिकधर्म ५ रूपस्य व्यापारत्वस्य सामान्यत्वेपि तद्विहाय लाघवेन जातिरूपकृतित्वस्यैवाख्यातशक्यतावच्छेदकत्वस्वीकाराच्च।।
एतदप्युक्तं सुधायाम् -- यदा तु गृहीतव्याप्तेर्विनापि --

व्याप्यतावच्छेदकप्रकारकत्व ६ ज्ञानमावश्यकम्। धूमत्वेन धूमस्यरूपविशेष्यकव्याप्यत्वप्रकारकज्ञानविषये तदनुप्रवेशाभावादिति भावः। तदनुप्रवेशामाशङ्कते-- नन्विति ।। व्याप्तिरहिते पाषाणादाववृत्तित्वमित्यर्थः। सामान्यमिति।। व्याप्यत्वप्रकारकज्ञानविषये व्याप्तावपि सत्वादिति भावः।। विशेष इति।। अयं ७ धूमवानित्यादिव्याप्यतावच्छेदकधूमत्वप्रकारके ज्ञाने व्याप्यत्वप्रकारकत्वाभावादिति भावः। सामान्यविशेषाभावे सत्यपि लाघवाद्विशेषस्यैव प्रयोजकत्वं वाच्यमिति भावेनाह-- त्वयेति।। एतदप्युक्तमिति।। युक्तिपाद एवापिचेत्यादिनोक्तंप्रमेयमुक्तमित्यर्थः।।

१.कप्र- क.ट.रा. २.तु इतिन-ग.ट.रा. ३.प्यत्वेन-क. प्तत्वेन-रा. ४.यासौ -क.ग. ५.र्मस्य व्याप्यत्वस्य-ग.रा. ६.कज्ञानत्वमित्यस्ति-ठ. ज्ञानपदं -न.ट. ७.यंचधू -ड.

पु -१३२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

लिङ्गदर्शनाद्व १ ह्न्यादिनैव व्याप्तिस्मृतिरिति।।
नन यत्र लिङ्गपक्षादिकमसन्निकृष्टमतीन्द्रियं वा तत्र कथं परामर्शः, प्रत्यक्षस्यासम्भवात् आनुमानिकत्वे चानवस्थानादिति चेत्तवापि कथं तत्र पक्षताज्ञानम्। कथं च स पर्वतो वह्निव्याप्यधूमवान् परमाणुर्नित्यत्वव्याप्यनिरवयवद्रव्यत्ववानिति ज्ञानं तथा व्यवहारश्च।।
ननु तत्र कविकाव्या २ दिनिर्माणहेतुभूतज्ञानवन्मानसमेव पक्षधर्मताज्ञानम्।

विशिष्टज्ञानहेतुतावादे क्वचित्सामग्र्यभावेन तदुत्पत्तिबाधकमाशङ्क्य प्रतिबन्द्योत्तरयति -- नन्वित्यादिना ।। तवापीति।। ज्ञानद्वयहेतुतावादिनोपीत्यर्थः। न्यायमताशयेनाह-- कथंचेति।। यद्वा तन्मतेपि क्वचिद्विशिष्टज्ञानसत्वस्योक्तदिशाङ्गीकारात्तदाशयेनेयमुक्तिः। परमाणुरिति।। कथंचेत्यनुकर्षः। तथेति।। व्याप्यधूमवानित्यादिव्यवहारश्चेत्यर्थः। तादृशज्ञानसाध्यत्वाद्व्यवहारस्येति भावः। मण्युक्तदिशा परमुखेनोत्तरं वाचयित्वा सममित्याह-- नन्विति।। कवेः काव्यनिर्माणहेतुभूतज्ञानं यथा मानसं तथा मानान्तरोपनीते पर्वते मानान्तरोपनीतधूमसंसर्गरूपपक्षधर्मताज्ञानं मानसं व्याप्तिस्मरणधूमवत्वज्ञानाभ्यां सहकृतेन मनसा च

व्याप्यधूमवानितिज्ञानं नित्यत्वस्मृतिमतो निरवयवत्वोपनायकेन तदुपनये च परमाणूपनायकेन परमाणौ चोपनीते मनसा नित्यत्वव्याप्यनिरवयवत्ववानितिज्ञानमस्त्वित्यर्थः।।

१.द्वचनादिनै -- रा. २.आदिपदं न-ग.ट.रा.

प्राक्त-ज्ञात्व-हेत्वङ्गः) परामर्शवादः पु - १३३.

यद्वानुमानिकत्वेपि क्वचित् स्मृतौ क्वचिच्छब्दे क्वचित्प्रत्यक्षे पर्यवसानान्नानवस्थेति चेत्समं परामर्शोपि।
तस्माद्विशिष्टज्ञानमेवानुमितिहेतुः।।
इति प्राभाकरोक्तज्ञानद्वयहेतुत्वभङ्गः ।। १२ ।।

नन्वेवं मनसो बहिर्थप्रमाहेतुत्वे १ तदुपनायकज्ञानस्य प्रमाणान्तरत्वं स्यात्। यदसाधारणं कारणमासाद्य मनो बहिर्गोचरप्रमां जनयति तत्प्रमाणान्तरमिति नियमादिति चेन्न। इन्द्रियादेः सन्निकर्षादिवदुप २ नयस्य नियतव्यापाराभावेन प्रमायामकारणत्वादित्याहुः। अनुमानेन वास्तु पक्षधर्मताज्ञानादि । तावता
नानवस्था । तज्जनकानुमाने पक्षधर्मतादिज्ञानस्य स्मृतिरूपत्वेन ३ वाप्तवाक्यरूपशब्दजन्यत्वेन वा प्रत्यक्षजन्यत्वेन वोपपत्तेरित्याह-- आनुमानिकत्वेपीति।। पक्षधर्मतादिज्ञानस्येत्यनुकर्षः। अत एवपद्धतौ न च ४ तथाप्यनुमानस्य व्याप्त्यपेक्षयाऽनवस्था। अन्ततः प्रत्यक्षागममूलत्वादित्युक्तमिति भावः ।।
इति प्राभाकरोक्तज्ञानद्वयहेतुत्वभङ्गः ।। १२ ।।

१.तदिति नास्ति-ट.ठ.ड. २.नायकस्य- ड. ३.वा इति न -ड. ४.चैतस्याप्य -ठ. न च तस्याप्य -ट.ड.

अथ मण्युक्तपरामर्शप्रक्रियाभङ्गः ।। १३ ।।
मणौ त्वंयमालोको १ धूमो वा उभयथापि वह्निव्याप्य इति ज्ञानात्तावदनुमितिर्दृश्यते। तत्र २ व्याप्यतावच्छेदकप्रकारकं पक्षधर्मताज्ञानं न संभवति। अवच्छेदकयोर्धूमत्वालोकत्वयोरनिश्चयात्। निश्चितस्य ३ तदन्यान्यत्वस्य गौरवेण व्यभिचारावारकविशेषणत्वेन चानवच्छेदकत्वात्। इत्युक्तम्। तन्न। व्याप्यतावच्छेदकपदेन व्याप्तिनियतधर्मस्य विवक्षितत्वात्। अन्यतरत्वे च गौरवादौ सत्यपि व्याप्तिर्नैयत्यरूपस्य व्याप्त्यवच्छेदकत्वस्यानपायात्। न हि गुर्वित्येतावता नियतमप्यनियतं भवति।

अथ मण्युक्तपरामर्शप्रक्रियाभङ्गः।। १३ ।।
परामर्शवादसिद्धान्तोक्तप्राभाकरखण्डनप्रकारमनुवदति-- मणौत्विति।। इत्युक्तमित्यन्वयः। तदन्यान्यत्वस्येति।। धूमालोकाभ्यां यदन्यत् तदन्यत्वस्येत्यर्थः। व्यभिचारेति।। धूमालोकान्यान्यवत्वादित्यत्र धूमवत्वादालोकवत्वादित्येकैकहेतूक्तौ
व्यभिचाराभावाद्व्यभिचारवारकस्यैव सार्थक्यादिति भावः।

१.वा इत्यधिकम् -ग.ट.रा. २.त्रचव्या-क.ट.रा. ३.स्य चत-क.रा.

नीलधूमादौ धूमान्या १ न्यादौ च वैयर्थ्यमेव दोषः। प्रकृते तु संदिग्धासिद्धिवारकत्वान्न वैयर्थ्यमपि।।
किञ्चान्यतरत्वज्ञानस्य त्वयापि व्याप्तिग्राहकप्रत्यक्षसहकारित्वं स्वीकृतम्। सहकारित्वं च न भूयोदर्शनादिवत्स्वरूपेण । किं त्वन्यतरत्वस्य व्याप्तिव्याप्यतया तद्दर्शनत्वेनैवेति कथमन्यतरत्वस्य व्याप्तिव्याप्यत्वाग्रहः।।

गुरुधर्मतया व्याप्तिग्रहानुपयुक्तविशेषणत्वेन चेत्यर्थ इत्यप्याहुः। अन्यान्यत्व इत्यस्यार्थानुवादोऽन्यतरत्वे चेति।।
नन्वेवं पर्वतोग्निमान्नीलधूमवत्वाद्धूमान्यवत्वादित्यादिप्रयोगोपि साधुः स्यात्। नीलधूमत्वादेर्गुरुत्वेपि व्याप्तिनियतत्वेन व्याप्यतावच्छेदकत्वानपायादित्यत आह-- नीलेति।। संदिग्धेति।। धूमवत्वादिति वा आलोकवत्वादिति वोक्तावन्यतरसत्वस्यानिश्चयादिति भावः। त्वयापीति।। गुरोरप्यन्यान्यत्वज्ञानस्य विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वादन्यान्यत्वज्ञानं तत्र व्याप्यताज्ञानोपक्षीणमिति मणावुक्तेति भावः।।
अत एव मणावेतदरुच्यापिचेत्यादिना प्रागस्मदुक्तपक्ष एव किंच वह्निव्याप्यवानयमिति शाब्दज्ञान इत्यादिनोपन्यस्तइति ध्येयम्। यदपि संशयस्थलेऽन्यान्यत्वनिश्चयमुपेत्य व्याप्यत्वज्ञानोपक्षीणत्ववचनम्।

१.न्यत्वादौ - क.ग.ट.रा.

पु - १३६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

केचित्तु -- धूम १ त्वालोकत्वाभ्यां सन्धिग्धे वस्तुनि धूमालोकान्येभ्योन्यत्वमेव दुर्ग्रहम्। न हि साधनाश्रययोरन्यतरत्वमित्यादौ

साधनाश्रययोः साधनत्वाश्रयत्वा २ ज्ञाने तदन्येभ्योन्यत्वं गृह्यत इत्याहुः। ३ तस्मान्न मण्युक्तं युक्तम्।।
इति मण्युक्तपरामर्शप्रक्रियाभङ्गः।। १३ ।।

तदप्युक्तमित्याह -- केचित्विति।। प्रतियोगितावच्छेदकप्रकारेण प्रतियोगिनोनिश्चयते तदन्योन्याभावस्य दिर्ज्ञानत्वादिति भावः।।
इ ति मण्युक्तपरामर्शहेतुत्वप्रक्रियाभङ्गः।। १३ ।।

अथ व्यापकत्वपरामर्शस्यानुमितिहेतुत्वभङ्गः ।। १४ ।।
ननु -- हेतुसमानाधिकरणात्यन्ताभावा ४ प्रतियोगिसाध्यसामानाधिकरण्यं व्याप्यत्वम्। तच्च व्यापकत्वगर्भितमिति लाघवात्पर्वतवृत्तिधूमव्यापको वह्निरिति व्यापकत्वपरामर्श एवानुमितिहेतुः।

अथ व्यापकत्वपरामर्शस्यानुमितिहेतुत्वभङ्गः।। १४ ।।
मणौ परामर्शवादान्ते 'अन्ये त्वि'त्यादिनोपन्यस्तमेकदेशिमतमप्याशङ्क्य निराह -- नन्वित्यादिना ।। व्यापकत्वेति।।

१.मालो -रा. २.त्वानिश्चये-क. ३.तस्मादित्यादि नास्ति-ग.ट. ४.वप्र - ग.ट.रा.

लिपर्शस्य-कत्वम्) परामर्शवादः पु - १३७.

न तु वह्निव्याप्यधूमवानपर्वत इति व्याप्य १ त्व परामर्श इति चेन्न। मन्मते साध्यरहितावृत्तित्वरूपाया अन्यथानुपपत्तिरूपाया वा व्याप्तेर्व्यापकत्वागर्भितत्वेन गौरवाभावात्।।

यद्यपि साध्यरहितावृत्तित्वज्ञानं साध्यं विनानुपपत्तिज्ञानं २ वा साध्यत्वरूपव्यापकत्वेन ज्ञानं विनानुपपन्नम्।
तथापि धूमजातीयस्य वह्निजातीयरहितावृत्तित्वज्ञानं च ३ वह्निजातीयं विनानुपपत्तिज्ञानं च वह्नित्वेन वह्निज्ञानमेवापेक्षते। न तु व्यापकत्वेनेति न गौरवम्।।
इति व्यापकत्वपरामर्शस्यानुमितिहेतुत्वभङ्गः।। १४ अ ।।
उक्तरूपाभावाप्रतियोगित्वस्य व्यापकत्वात्तद्गर्भितमित्यर्थः।।
साध्यरहितेति।। साध्यरहितेऽवृत्तित्वमित्यर्थः।। अन्यथेति।। साध्येन विनासंभवरूपाया वेत्यर्थः।।
इति व्यापकत्वपरामर्शस्यानुमितिहेतुत्वभङ्गः ।। १४।।

अथ लिङ्गपरामर्शस्य करणत्वम् ।। १४ आ ।।
लिङ्गज्ञानमेव करणम्। न तु लिङ्गम्।

अथ लिङ्गपरामर्शस्य करणत्वम् ।। १५ ।।
यत्तु मणौ लिङ्गकरणतावादे लिङ्गपरामर्शः करणं न तु परामृश्यमानं लिङ्गमित्युक्तम्। तदस्माकमनुमतमेव । किं तु परामर्श इत्यत्र तृतीयज्ञानत्वमेव नाभिमतमिति भावेनाह -- लिङ्गज्ञानमेवेति ।। लिङ्गपदेन व्याप्यमुच्यते।

१.प्तत्व-ग.रा. २.नं च साध्यज्ञानं विनानुप-ग.ट.रा. ३.चपदं न-ट.रा.

पु - १३८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

स तदा वह्निमान् तदा धूमवत्वादित्यादौ धूमाभावेऽपि तज्ज्ञानेनैवानुमतिदर्शनात्। न च तत्र १ धूमध्वंसादिकं लिङ्गान्तरमस्तीति

वाच्यम्। तस्यापरामर्शात्। अपरामृश्यमानस्य हेतुत्वे च मानाभावात्। अत एवोक्तं सुधायाम्-- 'न च धूमादिकमेवानुमितिर्न किं नाम तज्ज्ञान'मिति।।
इति लिङ्गपरामर्शस्य करणत्वम्।। १४ आ ।।

प्रत्यक्षेणानुमानेन शब्देन वा जातं यल्लिङ्गज्ञानं तदित्यर्थः। व्यप्तिविशिष्टलिङ्गज्ञानमेवेत्यर्थः।। स इति।। पर्वतादिः। अत एवोक्तं सुधायामिति।। प्रत्यक्षवच्च प्रामाण्यमित्येतव्द्याख्यानसुधायामित्यर्थः।।
उपलक्षणमेतत्। अन्यथाख्यातिवादिसिद्धान्ते लिङ्गज्ञान्य करणतयाभ्युपगतत्वादिति २ सुधोक्तिरपि ग्राह्या। यत्तु पद्धतौ लिङ्गस्य सम्यग्ज्ञानं वा सम्यग्ज्ञानतं वा लिङ्गमित्युक्तम्। तत्वभ्युपगमवादेन वा लिङ्गसत्वस्थलाभिप्रायेण वा नेयम्। वस्तुतस्तु व्याप्तिप्रकारमनुसृत्यानुमितिं
जनयतीत्यत्रैव तात्पर्यादना ३ स्थयक्तावपि सुधानुरोधा ४ ल्लिङ्गज्ञान ५ एव तात्पर्यमिति भावः। अस्मिन्पक्षे क्रियायोगव्यवच्छिन्नत्वमेव करणत्वं न सव्यापारत्वमित्येके। लिङ्गज्ञानं करणं तज्जन्याव्याप्तिस्मृतिर्याव्यापारः। शाब्दज्ञाने शक्तिस्मृतिवदित्यन्ये। मन एव करणं व्याप्यज्ञानं व्यापारः; न चानुमितेर्मानसप्रत्यक्षत्वापत्तिः संस्कारव्यापारकत्व एव तथात्वात् व्यापारप्राधान्यविवक्षया लिङ्गज्ञानं करणमित्युक्तिरित्यपरे।।
इति लिङ्गपरामर्शस् करणत्वम् ।। १५ ।।

१.तथा धू-ग.ट.रा. २.ति युक्तिर-ड. ३.नवस्थयोभयोक्ता -ट. ४.धोलिं - ट. धेन लिं -ठ. ५.नं ए - ट.

अथ तर्कस्यानुमानान्तर्भावः ।। १५ ।।

अनुमानं द्विविधं साधनानुमानं दूषणानुमानं दूषणानुमानं चेति। तत्राद्यमद्रिरग्निमान् धूमवत्त्वादित्यादि। द्वितीयमपि द्वेधा १ दुष्टत्वप्रमितिसाधनम् तर्कश्चेति। तत्राद्यं नेदं स्वसाध्यसाधकम् असिद्धत्वादित्यादि। द्वितीयं
यदि निरग्निकः स्यात् तर्हि निर्धूमः स्यादितत्यादि। अस्य दूषणानुमानत्वं च परोक्तनिरग्निकत्वादिप्रतिक्षेपरूपत्वात्।।

अथ तर्कस्यानुमानान्तर्भावः। ।। १६ ।।
'तर्काप्रतिष्ठानादप्यन्यथानुमेयमि'ति ब्रह्मसूत्रे सूचितं तर्कस्यानुमाना २ न्तर्भावं वक्तुं पुनर्द्विविधं साधनानुमानं दूषणानुमानं चेत्यादिपद्धत्युक्तं विवृण्वान आह -- अनुमानमिति।। ननु परोक्तनिरासकस्यैव दूषणानुमानत्वेन तर्कस्य कथं तथात्वमित्यत आह-- अस्येति।। स्वमते तर्कस्वरूपमग्रे लिलक्षयिषुः परोक्ततर्कलक्षणान्यनूद्य निराह --

१.ष्टिप्र- क.ग.ट.रा. २.न प्रमाणान्त -ट.ठ.ड.

पु - १४०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

तत्र केचित् -- व्याप्यारोपेण व्यापकारोपः तर्कः। स च प्रमाणानुग्राहक एव। न तु प्रमाणमित्याहुः। तन्न। बाष्पे धूमभ्रमजन्यभ्रमरूपानुमितावतिव्याप्तेः।
नापि व्याप्यारोपे व्यापकप्रसञ्जनं तर्कः। प्रसञ्जनस्य तर्कत्वे आत्माश्रयात्। आरोपत्वे उक्तदोषात्।।
न च व्यापकाभाववत्तया ज्ञाते व्याप्यारो १ पाद्व्यापकारोपस्तर्कः। एवं २ चानुमित्याभासे ना ३ तिव्याप्तिः। व्यापकाभाववत्तया

ज्ञातेऽनुमित्यनुदयात्। तर्कस्य व्यापकीभूतनिर्धूमत्वाभाववत्तया ज्ञात एव भवतीति वाच्यम्।

४ अत्र केचिदित्यादिना।। तार्किकादय इत्यर्थः। व्याप्यारोप इति निमित्तसप्तमीयम्।।
तत्र ५ किं व्याप्य ६ भ्रमजन्य व्यापकभ्रम ७ स्तर्क इत्यभिमतं, तन्निमित्तक ८ व्यापकप्रसञ्जनं वा, व्यापकाभाववत्तया ज्ञाते व्याप्यारोपनिमित्तकव्यापकभ्रमो वा, व्यापकाभाववत्तयावधृते व्याप्यारोपनिमित्तकव्यापकारोपो वा, तादृशव्यापकाहार्यारोपो वा, अव्य ९ वस्थिताभ्युपगम्यमानको १० ठ्युपाधिकनिष्टत्वप्रतिसंधानं वेति १ षट्कल्पान् क्रमेण मणिकण्ठोक्तदिशा निराह -- बाष्प इत्यादिना । शङ्खत्वलिङ्गजन्यानुमितेर्व्याप्यज्ञानस्य चारोपत्वसिद्ध्यर्थमाह -- अशङ्खं शङ्खतयावगम्यते।।

१. पे व्याप- ग.ट.रा. २. च नानु -क.ग.ट.रा. ३.न इति न-क.ग.ट.रा. ४.तत्र -ठ. ५.नन्वत्र-ठ. ६.व्याप्तिभ्र- ट. ७.जन्यपदमधिक-ट. ८.त्तव्या -ट.ठ.ड. ९.वहिता-ठ. १० प्याप्तपुपाधि-ड. ११. षड्वि-ठ.

तस्या -नुना-न्तर्भावः) तर्कवादः पु - १४१.

यत्राशङ्खं शङ्खतयावगम्य पीतोयं शङ्खो न शुक्ल इति प्रत्यक्षभ्रमानन्तरं शङ्खत्वाच्छुक्ल इत्यनुमिनोति तस्यामनुमितावतिव्याप्तेः।।
अथ ज्ञात इत्यस्यावधृत इत्यर्थः। शक्लत्वानुमितौ तु न शुक्लत्वाभाव्यावधारणम्।

शुक्लत्वाभावग्राहकप्रत्यक्षस्यान्यथासिद्धमुपजीव्यैवानु १ मितिप्रवृत्तिरिति चेन्न। तर्केपि निर्धूमत्वरूपव्यापकाभावस्यावधृतत्वेन
निर्धूमत्वारोपस्यासंभवात्। आहार्योयमारोपः। स च बाधितेपि भवतीति चेन्न। पुरुषत्वाभावनिश्चयानन्तरं प्रत्यक्षादाहार्यव्याप्यकरचरणाद्यारोपाज्जन्ये प्रत्यक्षे आहार्यपुरुषारोपेतिव्याप्तेः।।
नापि वर्धमानोक्तरीत्या अव्यवस्थिताभ्युपगम्यमानकोट्युपाधिकानिष्टसत्वप्रतिसन्धानं तर्कः। निरग्निकत्वस्याव्यवस्थितत्वं हि संशयो विपर्ययो वा न द्वयमपि। यद्यर्थशिरस्कनिरग्निकत्वज्ञानं प्रमेति
वक्ष्यमाणत्वात्।

व्यापकाभाववत्तयावगत इत्यंशोपपादनाय पीतोयमित्यादि। अन्यथासिद्धिमौपाधिकभ्रमत्वम्। निर्धूमत्वेति।। निर्धूमत्वरूपं यद्वह्न्यभावव्यापकं तदभावस्य धूमसत्वस्यावधृतत्वेनेत्यर्थः। तथाचासंभवि लक्षणमिति भावः।

१. मान प्र - ट.रा.

पु - १४२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

एवं प्रतिसन्धानमपि संशयो विपर्ययो वा न द्वयमपि। तर्हि स्यादित्यर्थशिरस्कनिर्धूमत्वज्ञानं प्रमेति वक्ष्यमाणत्वात्।।
तस्मात्तर्कोऽनुमानविशेष एव। व्याप्तिबलेन गमकत्वात्। संशयोत्तरप्रत्यक्षं व्याप्तबलेन गमकमपि न व्याप्तिज्ञानकरणकम्।।

मन्मते त्वङ्गीकृतेन साध्याभावेन सहानङ्गीकृतस्य साधनाभावस्य व्यापकत्वप्रमा १ वा साध्याभावाङ्गीकारनिमित्तका साधनाभावस्याङ्गीकर्तव्यत्वप्रमा वा

आहार्यो बुद्धियूर्वकः। वक्ष्यमाणत्वादिति।। ननु तर्कस्येत्यादिना, कथं तस्य प्रामाण्यमित्यादिना वा, ग्रन्थेनेत्यर्थः। व्याप्तिबलेनेति।। आपाद्यापादकयर्व्याप्तिबलेन
साध्यसाधनयोरविनाभावगमकत्वादनुमानविशेष एवेत्यर्थः। विलक्षणप्रकारत्वाद्विशेषपदप्रयोगः।।
नन्वेवं यत्र स्थाणुर्वा पुरुषो वेति संशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति
विशेषदर्शने सति २ पुरुष एवेति प्रत्यक्षं तदप्यनुमानं प्रसज्यते इत्यत आह-- संशयेति।। अत्र प्रत्यक्षपदेन व्याप्यदर्शनं पुरुष एवेति फलूभूतं प्रत्यक्षं च ३ गृह्यते । तत्राद्यं यत्र करादि तत्र पुरुषत्वमिति व्याप्तिबलेन पुरुषत्वगमकमपि पुरुषत्वप्रत्यक्षं न व्याप्तिज्ञानकरणकं किं तु चक्षुरादिकरणकमेव अतो न तस्यानुमान ४ त्वमिति भावः। साध्याभावेन निरग्निकत्वादिरूपेण निर्धूमत्वादिरूपसाधनाभावस्य व्यापकत्वप्रमा तर्क इत्युच्यते।

१.इतः 'तर्क्यते' इति पर्यन्तं नास्ति- ग.ट.रा. २.यत् इत्याधिकम् -ठ. ३.ग्राह्यम्-ठ. ४. फलपदमधिकम् -ट.ठ.ड.

तस्या-नुना-न्तर्भावः) तर्कवादः पु - १४३.

तत्करणिका साधनस्य साध्येन सह व्याप्त्यनुमितिस्तु तर्कण २ मिति व्युत्पत्या तर्कः।।

एतदेवाभिप्रेत्य पद्धतौ कस्यचिदर्थस्याङ्गीकारेऽर्थान्तरापादनं तर्क इति प्रमाणलक्षणटीकायां च व्याप्याङ्गीकारेऽनिष्टव्यापकप्रसञ्जनं तर्क इत्युक्तम्। स्पष्टयिष्यते चैतदनुपदमेव।।

करणव्युत्पत्यैवेत्याह-- तर्क्यतेनेनेतीति।। आपादकस्यासिद्धिनिरासायोक्तम् अङ्गीकृतेनेति। इष्टापत्तिनिवृत्यर्थं अनङ्गीकृतस्येत्युक्तम्। यदि घट उपे ३ यते तर्हि पटोप्यङ्गीकार्य इत्यादावतिव्याप्तिवारणाय साध्याभावसाधनाभावपदोक्तिः। स किं प्रति करणमित्यत आह -- तत्करणिकेति।। तर्कणिति व्युत्पत्येति।। भावव्युत्पत्येत्यर्थः। एतदेवेति।। पद्धतावापादनमित्यस्य ४ लक्षणटीकायां प्रसञ्जनमित्यस्य च साधनाभावस्य व्यापकत्वप्रमै ५ वेत्यर्थः इति भावः। एतच्चोपलक्षणम्। व्याप्याङ्गीकारेऽनिष्ठव्यापकप्रसञ्जनमिति तत्वनिर्णये चेत्यपि ध्येयम्।। ६ कथं व्याप्त्यनुमितिजनकत्वमस्य तर्कस्येत्यतो वा कथं व्याप्याङ्गीकारेणानिष्टस्य व्यापकत्वप्रमा ७ प्रकार इत्यतो वाह-- स्पष्टयिष्यत इति।। कथं तस्य प्रामाण्यमित्यादिग्रन्थे ८ न कृतशङ्कानिवृत्यर्थमुपोद्घोतोक्त्यनन्तरमत्र च --

१.तित-ग.ट.रा. २.र्कयामी-ग.रा. ३.उपगम्यते-ठ.ड. ४.प्रमाणपदमधिकम्-ट.ड. ५.मेत्येतदिति भावः-ठ. मेत्यर्थः इति भा-ड. ६. 'एतदेवेति' इत्यादिकः, एतावान् ग्रन्थः, 'स्पष्टयिष्यत इति' इत्यतः - परमस्ति- ड. तत्राप्येवमेवार्थः इत्यधिकम् -ट.ठ. ७.माकार-ठ.ड. ८.नेत्यर्थः -ठ.

ननु तर्कस्यानुमानत्वे आपादकं निरग्निकत्वं लिङ्गम् आपाद्यं नर्धूमत्वं लिङ्गीति वाच्यम्। तथाच हेतोरसिदधिर्बाधोऽप्रसिद्धान्तश्च। सिद्धान्तिना १ पक्षे निरग्निकत्वनिर्धूमत्वयोरस्वीकारात्। धूमस्य प्रतीतत्वाच्चेति चेन्न।।

साधनरूपस्यैव लिङ्गस्य असिद्धिर्दोषो न त्वापादकरूपस्य। आपादकत्वव्याघातात्। यद्व्यापादकं तत्पराभ्युपगतमेव भवति।।

अत एव व्याप्यस्य पक्षनिष्ठत्वे परा २ नभ्युपगमनिमित्तकज्ञानविषयव्यतिरेकज्ञानभञ्जनीयत्वमापादकत्वम्।

कुलीरस्येवापादाकस्य स्वप्र ३ सूत-

निरग्निकत्वप्रमे ४ त्यादिग्रन्थेनेत्यर्थः।

'प्रसङ्गार्थतया प्रोक्ता न सिद्धान्तस्य दूषकाः'।

इत्यादिभक्तिपादीयानुव्याख्यानसुधयोरुक्तं विवृण्वान आक्षिपति-- नन्विति।। असिद्ध्यपसिद्धान्तौ व्यनक्ति-- सिद्धान्तिनेति।। अनुमानप्रयोक्त्रेत्यर्थः। बाधं व्यनक्ति -- धूमस्येति।। अत एवेति।। पराभ्युपगतस्यापादकत्वादेपेत्यर्थः। व्याप्यस्य निरग्निकत्वादिरूपव्याप्यस्य पर्वतादिनिष्ठत्वेन यः पराभ्युपगमः तन्निमित्तकं यज्ज्ञानं निर्धूमत्वज्ञानं तद्विषय ५ त्वस्य निर्धूमत्वादेर्यो व्यतिरेकः धूमवत्वं तज्ज्ञानेन भञ्जनीयत्वं यत्तदेवापादकत्वमित्यर्थः। कुत इत्यत आह-- कुलीरस्येवेति।। कुलीरस्य जलजन्तुविशेषस्य यथा स्वोत्पन्नापत्यहत्वं तथैवापादकस्यापि स्वोत्पन्ननिर्धूमत्वाभ्युपगमरूपयुक्तिप्रतिहतत्वादित्यर्थः।

१.सिद्धान्तिनेति नास्ति-ट. २.राभ्यु- ग.रा. ३. स्वसू-ग.रा. ४.प्रमापदं न-ट.ठ. ५. यस्य-ट.ठ.ड. ६.व्याप्यस्येत्यधिकम् -- ठ.

युक्त्या १ प्रतिहतत्वादित्याहुः। भज्यते हि निरग्निकत्वं स्वाभ्युपगमनिमित्तकज्ञानं प्रति विषयस्य निर्धूमत्वस्य व्यतिरेकरूपसधूमत्वस्य ज्ञानेन। कथमन्यथा न चायं निर्धूमः तस्मान्न निरग्निक इति विषय २ विपर्यवसानम्। तदभावे ३ तर्क एवाभासः स्यात्। न चात्र निरग्निकत्वं साधनत्वेनोपात्तम्। तथात्वे हि यदीति स्यादिति च न स्यात्। किं तु निरग्निकत्वादिति स्यात्।।
एवं साध्यरूपस्यैव लिङ्गिनो बाधो दोषः। नत्वापाद्यरूपस्यापाद्यत्वव्याघातात्। यद्व्यापाद्यं ४ तदभिष्टमेव। प्रमाणबाध एवा ५ निष्टत्वम्। अत एवापादकाभिमतभञ्जकज्ञानविषयव्यतिरेकप्रतियोगित्वमापाद्यत्वत्याहुः।

आहुस्तार्किका इत्यर्थः। उक्तज्ञानभञ्जनीयत्वं व्यनक्ति-- भज्यते हीति।। तदभावे विपर्यये पर्यवसानाभाव
इत्यर्थः।।
'व्याप्तिस्तर्काप्रतिहतिरवसानं विपर्यये।
अनिष्टाननुकूलत्वमिति तर्काङ्गकम्।।'
इत्युक्ताङ्गपञ्चकमध्ये एकाङ्गविकलत्वादाभासः स्यादित्यर्थः।
असिद्धिं निरस्य बाधं निराह-- एवमिति।। एत एवेति।। प्रमाणबाधितस्यैवापाद्यत्वादेवेत्यर्थः। आपादकाभिमतं यन्निरग्निकत्वं --

१.क्त्यपत्य-ग.रा. २.विपर्ययपर्यव-ग.ट.रा. ३.वे चेत -ग.ट.रा. ४.तत्प्रमाणबाधितमेव। अनिष्टं ह्यापाद्यम् प्रमाण-ग.ट.रा. ५.वचा -ग.रा.

न चात्र निर्धूमत्वं साध्यम्। तथात्वे हि तर्हीति स्यादिति च न स्यात्। किंतु १
निर्धूमोयमिति स्यात्। न च निर्धूमोयमिति ज्ञानस्य यावान्विषयस्तावानेव तर्हि निर्धूमः स्यादित्यस्यापि विषयः। अधिकस्य तर्हि स्यादिति शब्दयोरर्थस्याप्युल्लेखात्।।
अत एव नापसिद्धान्तोपि। स हि सिद्धान्त विरुद्धस्य साधने नत्वापादने। तस्मात्प्रसङ्गरूपानुमानेऽसिद्धिबाधापसिद्धान्ता भूषणान्येव। न तु दूषणानि।।
अत एवोक्तं साधनानुमानवैधर्म्यादेवास्य प्रसङ्गानुमानत्वम्। दृश्यते च साधनानुमानेष्वपि केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिषु अन्योन्यं वैधर्म्यम्।

तद्भञ्जक २ भूतं यज्ज्ञानं सधूमत्वज्ञानं तद्विषयो यो व्यतिरेकः सधूमत्वं तत्प्रतियोगित्वमित्यर्थः। यव्द्यतिरेकज्ञानेनापादकं भज्यते सत्वमापाद्यत्वम्। भज्यते हि निर्धूमत्वव्यतिरेकसधूमत्वज्ञानेन निरग्निकत्वम्। न चायं निर्धूमः तस्मान्न निरग्निक इति विपर्यये पर्यवसानात्। अन्यथा तर्कस्याभावसत्वापत्तेरिति भावः। ननु निर्धऊमत्वसाधने कथं न बाध इत्यत आह-- न चात्रेति।।
अपसिद्धान्तदोषं च प्रागुक्तं निराह-- अत एवेति।। निर्धूमोयमित्यसाधनादेवेत्यर्थः। ननु साधनानुमानवैलक्षण्यात्कथमस्यानुमानतेत्यत आह-- अत एवेति।। तस्य विपरणं उक्तात् यदि ३ तर्ह्यादिशरिस्कत्वादिरूपाद्वैधर्म्यादिति।

१.किंच -ग.रा. २.नी -ड. ३.की-ट.ठ. ४.यदीतिन-ठ.ड.

तस्या-नुना-न्तर्भावः) तर्कवादः पु - १४७.

तेष्ववान्तरवैधर्म्येपि व्याप्तिबलेन गमकत्वादनुमानत्वं चैतत्तर्कौपि समम् १।।
नन्वेवं २ बाधादेरदोषत्वं कथं तस्य प्रामाण्यमिति चेच्छृषु। सधूमोपि निरग्निकोस्त्विति शङ्गा हि द्वेधा सम्भवति। निरग्निकत्वं प्रति निर्धूमत्वे व्यापकत्वस्यैवाभावेन वा सत्यपि व्यापकत्वे पक्षे निर्धूमत्वस्यापि सत्वेन वा।।

वैधर्म्यमिति।। विपक्षशून्यत्वसपक्षशून्यत्वतदुभयवत्वादिरूपं वैधर्ममित्यर्थः।।
'सर्वेषु केषुचिद्वापि सपक्षेषु कृतान्वयि।
विपक्षशून्यं पक्षस्य व्यापकं केवलान्वयि' ।।
इत्यादेरिति भावः। एतेनापादकस्यासिद्धिरदूषणमित्यादि पद्धतिवाक्यम् विवृत्तं ध्येयम्।
अनुमासामान्यलक्षणोपेतत्वात्केवलान्वय्यादिकमनुमानमेवेत्याशङ्कामनूद्य साम्यमाह-- तेष्विति।। कथमिति।। निर्धूमत्वज्ञानरूपफलस्य बाधितविषकस्याप्रमात्वान्निरग्निकत्वज्ञानस्य च करणत्वादप्रमाजनकस्यासिद्धविषयस्य कथं भ्रमरूपस्य च प्रमाणकरणत्वरूपं प्रामाण्यं कथमित्यर्थः।।
नैवं फलकरणभावः। किं त्वन्यथैव।। तत्र च फलीभूतं करणभूतं द्वयमपि ज्ञानं प्रमारूपमेवेति लक्षणटीकापद्धतिसुधानुसारेण त्रेधा परिहारं अत्र च निरग्निकत्वमित्यादिना विवक्षुरुपोद्घातमाह-- श्रुण्वित्यादितना।। तर्कः शङ्कावधिरित्युक्तत्वेन तस्य शङ्कानिवर्तकत्वादिति शङ्का हीत्युक्तम्।

तत्राद्यो निर्धूमत्वस्य व्यापकत्वप्रदर्शकेन यदि निरग्निकस्तर्हि निर्धूम इत्यनेन निरस्यते। यदि गवयो गोसदृशस्तर्हि गौरपि गवयसदृशी यदि जीवन्गृहे नास्ति तर्हि बहिरस्ति, यदि धूमस्तर्हि वह्निरित्यादौ यदि तह्यौः स्वसमभिव्याहृतपदार्थेऽन्यथानुपपत्तिरूपव्याप्तिबोधकत्वस्य व्युत्पत्तिसिद्धत्वात्।।
अत एव सुधायां यदीदं तर्हीदमित्येव व्याप्तिग्रह उक्तः। यदियुक्तेन स्याच्छब्देन तु --

तर्कनिवर्त्यो शङ्केत्यर्थः। कथमित्यत आह-- यदीति।। गृह्यमाणगतसादृश्यज्ञानात्स्मर्यमाणगतसादृश्यज्ञानमुपमानमिति शाबरोपमानस्योदाहरणम्। यदि गवय इति ।। जीवित्वे सत्वे गृहेऽसत्वमनुपपद्यमानं बहिःसत्वं कल्पयतीत्यर्थापत्तिप्रमाणस्योदाहरणम्-- यदि जीवन्निति।। प्रसिद्धानुमानस्योदाहरण्-- यदि धूम इति।। आदिपदेन यदि चैत्रमैत्रयोरन्यतरत्वे सति यद्यं चैत्रस्तर्ह्यन्यो मैत्र इत्यादिग्रहः। अत एवेति।। यद्यादिशिरस्कस्थले व्याप्तिबोधकत्वस्य व्युत्पत्तिसिद्धत्वादेव।।
रोहिण्युदय आसन्नः कृत्तिकाभ्युदिता यतः।
इत्युक्ते साधनं १ नो किं न ह्याज्ञैवात्र साधिका।।
इति भक्तिपादीयानुव्याख्यानसुधायां यदीत्येव व्याप्तिग्रह उक्त इत्यर्थः। नन्वेवमापाद्यापादकस्थ २ ल स्याच्छब्दद्वयं व्यर्थम्। कृत्वाभावादित्यत आह-- यदि युक्तेनेति।। यदिशब्दयुक्तेनेत्यर्थः।

१.नेनो -ट. २.स्थस्या -ठ.ड.

स्वसमभिव्याहृत १ निरग्निकत्वस्य पक्षे पराभ्युपगममात्रं बोध्यते। तर्हियुक्तेनापि स्याच्छब्देन निर्धूमत्वस्य पक्षेऽनिष्टत्वं बोध्यते। विपर्यये पर्यवसानपर्यन्ते तर्के तथैव व्युत्पत्तेः।।
तेनैव स्याच्छब्देन द्वितीयोऽपि निरस्तः। यद्यतिथिरागच्छेत्तर्हि भोजयितव्य इति तु विपर्यय २ पर्यवसानाभावात्संभावनामात्रं न तु तर्क इति तवापि संमतम्। अत्र च निरग्निकत्वं प्रति निर्धूमत्वस्य ३ व्यापकत्वं लिङ्गम्। तज्ज्ञानं करणम्। निरग्निकत्वाभावं प्रति निर्धूमत्वाभावस्य व्याप्यत्वं लिङ्गं तज्ज्ञानं फलम्। द्वयमपि ४ प्रमारूपमेव।

तेनैवेति।। तर्हीतिशब्दयुक्तेन स्याच्छब्देन निर्धूमत्वस्य पक्षे सत्वमिति पक्षोऽपि निरस्त इत्यर्थः।।
नन्वेवं तर्हि भोजयितव्य इत्यादावप्यनिष्ट ५ बोधः स्यात्। स्या ६ त्पर्यायस्य तव्यप्रत्ययस्य सत्वादित्यत आह-- यद्यतिथिरिति।। संभावनामात्रमिति।। योग्यतामात्रमित्यर्थः। तवापीति।। तथैव मणिकण्ठोक्तेरिति भावः। अस्त्वेवं तावता कथं प्रामाण्यमित्यत आह-- अत्र चेति।। लिङ्गीति।। अनुमेयं वस्त्वित्यर्थः। द्वयमपीति।।
लिङ्गज्ञानं लिङ्गज्ञानं चेतिद्वयोमित्यर्थः।।

१.तस्य नि-ग.ट.रा. २. ये प -ग.ट.रा. ३.च इत्यधिकम्-क.ग.ट.रा. ४.पि च प्र-ग.ट.रा. ५.ष्टत्व- बो-ट.ठ. ६.एकमेव स्यात्पदम् -ट.ठ.

कारणाभावे कार्याभावनियमात्। व्यापकाभावस्य व्याप्याभावं प्रति व्याप्यत्वाच्च।।

अत एव प्रसङ्गाशेनैव निर्धूमत्वाभावस्य निरग्निकत्वाभावेन व्याप्तेः सिद्धत्वादेव विपर्यये पर्यवसानेन १ चायं निर्धूम इत्यनेन तस्य पक्षधर्मतामात्रं प्रदर्श्य तस्मान्न निरग्निक इत्यनेन साध्यमुक्तम्। न तु त्वयाशङ्कितं पक्षे निरग्निकत्वज्ञानम् करणम्। नापि पक्षे निर्धूमत्वज्ञानं फलम्। येन द्वयोरप्यप्रमात्वं स्यात्।।
असिद्ध्याद्युक्तिस्तु निरग्निकत्वं प्रति

ननु कथं लिङ्गज्ञानस्य प्रमात्वं तस्यासिद्धत्वात्। न च यदि निरग्निकस्तर्हि निर्धूम इत्यनेनाव्यापगकत्वशङ्का निरस्यत इति २ वाच्यम्। हेत्वभावादित्यत आह-- करणेति।। अग्निरूपकरणाभावे ३ कार्याभावनियमात्। यदिनिरग्निक इत्यादिना सा शङ्का निरस्यत इति निर्धूमत्वस्य व्यापकत्वरूपं लिङ्गं नासिद्धमिति भावः। ननु तावता व्याप्यत्व रूपलिङ्गिनो ज्ञानं प्रमेति कुतो व्याप्यत्वस्यासिद्धेरित्यत आह -- व्यापकाभावस्येति।। निर्धूमत्वाभावस्य निरग्निकत्वरूपव्याप्यस्याभावं प्रतीत्यर्थः। तत्र ज्ञापकमाह -- अत एवेति।।
ननु यद्येवमसिद्धिबाधआदिकमाशङ्क्य तर्के न दोष इत्युक्तं तत्कथमुक्तरीत्याऽसिद्ध्यादेरभावादित्यत आह-- असिद्ध्याद्युक्तिस्त्विति।।

१.ने नायं -ग.ट.रा. २.इति तन्नहे -ट. ३.इति वाच्यम् तत्र ह- ठ. ३.धूमरूप्येत्यधिकम् -ठ.ड.ट.

तस्या-नुना-न्तर्भावः) तर्कवादः पु - १५१.

निर्धूमत्वस्य च १ व्यापकत्वप्रदर्शनार्थं तर्कवाक्येनोपत्ते ये २ निरग्निकत्वनिर्धूमत्वरूपे व्याप्यव्यापके तदभप्राया।।
तस्माद्यद्याद्यर्थालिङ्गितस्यार्थस्याबाधान्न तर्कस्याप्रामाण्यम्।।

एतदेवाभिप्रेत्य सुधायां -- यद्यलङ्कृतस् निरग्निकत्वादेरसिद्धत्वं नास्तीति तथासति यदीति ३ स्यादिति च न स्यादिति चोक्तम्। अयं ४ पक्षः, प्रसङ्गरूपानुमाने च न साध्यवदापाद्यस्य प्रमाणविरोधादि दूषणमिति प्रमाणलक्षणटीकायां प्रसङ्गरूपानुमाने बाधापसिद्धान्तयोरदूषणत्वादिति सुधायां चोक्तः।।
एतदेवाभिप्रेत्योक्तमनुव्याख्याने --
प्रसङ्गार्थतया प्रोक्ता न सिद्धान्तस्य न दूषकः।।
इति। प्रशङ्गः अनुग्राह्यानुमानाङ्गभूतान्वयव्याप्तिलिङ्गभूतायाः परानिष्ठायाः व्यतिरेकव्याप्तेः प्रदर्शनम्। तदर्थतया तत्प्रयोजकतया हृदादिनिष्ठा --

सुधायामिति।। भक्तिपादीयसुधायामित्यर्थः। उक्तमिति।। भक्तिपादीयानुव्याख्याने । स्वोक्तपक्षानुगणतयार्थमाह-- प्रसङ्ग इत्यादिना ।।

१. च इति न-ग.ट.रा. २.येन -ग.ट.रा. ३.यदीति इति न - स्यादितिचोक्तम्. इत्येवास्ति-ग.ट.रा. ४.च
पदमधिकम् -ग.ट. तु-रा.

पु - १५२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

निरग्निकत्वनिर्धूमत्वादयः प्रोक्ताः न तु पक्षनिष्ठतया प्रोक्ताः। तस्मान्न सिद्धान्तस्य दुषका इत्यर्थः।।
यत्तु सुधायां प्रसङ्गः अङ्गीकार्तव्यतया ज्ञापनमिति व्याख्यानम्। तद्वक्ष्यमाणतृतीयपक्षस्थत्वात्तदभिप्रायम्। यद्वापादगकरूपलिङ्गस् निरग्निकत्वस्य पक्षे पराभ्युपगतत्वमेव पक्षसंबन्ध इति नासिद्धिः।।

युक्तं चैतत्। यक्षानुरूपबलिन्यायेन विङ्गिनो निर्धूमत्वस्यापि पक्षेऽभ्युपगमनीयत्वस्यैव पक्षसंबन्धत्वात्। धूमरसादेः पक्षे संयुक्तसमवेतत्वादिना ज्ञातस्यैवाग्निरूपादिसाधकतया तत्र संयोगसमवायादेरिव निरग्निकत्वस्यापि पक्षे पराभ्युपगतत्वेन ज्ञातस्यैवापादकतयाभ्युपगमस्यैव संबन्धताया उचितत्वात्।।

वक्ष्यमाणेति।। अथवेत्यादिना वक्ष्यमाणेत्यर्थः। बाधासिद्धी प्रकारान्तरेण निराकुर्वन् परोक्तरीत्या निरग्निकत्वनिर्धूमत्वज्ञानयोः करणत्वफलत्वेऽभ्युपेत्य
तर्कस्य प्रामाण्यमाह -- यद्वेति।। यक्षनुरूपेति।। यक्षस्योग्रत्वे तदनुरोध १ बलिः अत्युग्रत्वे अतिबलिः मृदुत्वे अल्पबलिरिति न्यायेनेत्यर्थः। धूमेति।। धूमश्च रसश्च तदादेरित्यर्थः। एवमग्निश्चरूपं च तदादेः अग्निरूपादेः साधकतयेत्यर्थः। यथाक्रममन्वयः।।

१. धेन व - ठ.

तस्या-नुना-न्तर्भावः) तर्कवादः पु - १५३.

दृश्यते च कृत्तिकोदयाधोदेशनदीपूरादिरूपसाधनानुमानस्यापि रोहिण्युदयोर्ध्वदेशादिरूपपक्षेऽभावेपि
पक्षनिष्ठसाध्यसमानकालीनत्वपक्षनिरूप्याधोदेशस्थत्वादिः त्वन्मते ज्ञानत्वादिरूपप्रमेयत्वादेरपि पक्षभूतशब्देन स्वरूपप्रत्यासन्नज्ञानसमवेतत्वादिश्च परंपरासंबन्धः।।
अस्मिन्पक्षे तर्कस्य प्रामाण्यं निरग्निकत्वनिर्धूमत्वयोः पक्षेऽभ्युपगतत्वाभ्युपगमनीयत्वरूरूपेण --

ननु -- संयोगसमवायाभ्यामन्यस्य कथं पक्षधर्म १ ताघटकसंबन्धत्वं क्वाप्यदर्शनादित्यत आह -- दृश्यते चेति।। कृत्तिकोदयश्चाधोदेशनदीपूरश्च तदादिरूप २ स्येत्यर्थः। रोहिण्युदय आसन्नः कृत्तिकाया उदितत्वात्, ऊर्ध्वदेशो वृष्टिमान् अधोदेशे नदीपूर ३ वत्वात् इत्यादिरूपानुमानस्येत्यर्थः। पक्षेति।। रोहिण्युदयरूपपक्षनिष्ठासन्नत्वरूपसाध्यसमानकालीनत्वरूपः पक्षसंबन्ध कृत्तिकोदयरूपलिङ्गस्य दृश्यते। ऊर्ध्वदेशरूपपक्षनिरूप्यो यो अधोदेशः तत्स्थत्वरूपपक्षसंबन्धो नदीपूरस्य दृश्यते। अन्यथा न्यायमते तयोरपक्षध्मताकत्वेन ताभ्यां रोहिण्युदयासत्याद्यनुमित्यनुदयापातः। न चेष्टापत्तिः। अनुभवविरोधादिति भावः। त्वन्मत इति।। न्यायमते शब्दोऽभिधेयो ज्ञेयत्वादित्यत्र ज्ञेयत्वं नाम शब्दस्य परंपरासंबन्धेन ज्ञानत्वमेव। प्रमेयत्वं च प्रमात्वमेव ४ । न ततोऽन्यत्। तथा च तस्य पक्षधर्मताघटकः ज्ञानस्यार्थस्य च ५ स्वरूपसंबन्धः ज्ञानादिना च ज्ञानत्वादेः समवाय इति परंपरासम्बन्धो दृश्यत
इत्यनुकर्षः। प्रामाण्यमिति।। युक्तिमित्यन्वयः। प्रसङ्गार्थतयोत्यत्र सुधोक्तिमनुरुध्याह -- अथवेति।।

१.तादि घ-ट. २. पेत्य-ट.ड. ३.रत्वा-ट. रादित्य-ठ. ४.प्रमेयत्वं चेत्यादिकं नास्ति -ठ. ५.च इति न -ट.ठ.

सत्वात्तेन च रूपेण तद्विषययोर्निरग्निकत्वनिर्धूमत्वज्ञानरूपयोः करणफलयोः प्रमात्वाद्युक्तम्।।
अयं च पक्षः पराभ्युपगममात्रस्य तत्र सिद्धिपदार्थत्वादिति पद्धत्युक्तः। अथवा यदिनिरग्निकः स्यादित्यस्य यदिनिरग्निकत्वाङ्गीकार इत्यर्थः।

तथाङ्गीकारश्च सिद्ध एव। अन्यथा तर्कस्याप्यनुत्थानात्। एवं तर्हि निर्धूमः स्यादित्यस्य निर्धूमत्वेनाङ्गीकर्तव्य इत्यर्थः। आपादनं हि अङ्गीकर्तव्यतया ज्ञापनम्। न पुनः सद्भावप्रतिपादनम्। यदि विषं भक्ष १ यिष्यसि तर्हि मरिष्यसीत्यादिवत्। नचानङ्गीकारे स्वक्रियाविरोधा २ दिरूपाङ्गीकारयोग्यता बाधिता।।

नन्वङ्गीकर्तव्यताज्ञापनेपि कथं बाधितत्वनिरास इत्यत आह-- न चेति।। निर्धूमत्वस्याङ्गीकर्तव्यता ह्यङ्गीकारयोग्यता ३ स्वक्रियाविरोधरूपा ४ धूमरूपकार्यमङ्गीकृत्याग्निरूपकारणाभावाङ्गीकारे कार्योद्देशेनकारणे ५ प्रवृत्तिरूपस्वक्रियाविरोधे इत्येतन्निर्धूमत्वमङ्गीकार्यमिति भङ्ग्यन्तरेणो ६ च्यते। तथा च सा न प्रमाणबाधितेत्यर्थः। यद्वाङ्गीकर्तव्यताज्ञानं कथमनिष्टम्। अनिष्टस्यैवापाद्यत्वादित्य आह -- न चेति।। पूर्वं धूमोस्त्वित्युक्तत्वेन निर्धूमत्वाङ्गीकारे स्वक्रियाविरोधरूपाङ्गीकारायोग्यता न च बाधिता। येनानिष्टापादनं न स्यादित्यर्थः।।

१.क्षयसि-ग.ट.रा. २.आदिपदं न -ग.ट.रा. ३.सा इत्यधिकम्-ठ. ४.स्वक्रिया विरोधजिज्ञासा इत्यधिकम्-ठ. ५.ण प्र-ठ. ६.णोद्भाव्यते -ठ.

तस्या-नुना-न्तर्भावः) तर्कवादः पु- १५५.

एवं च पर्वतो निर्धूमत्वेनाङ्गीकर्तव्यः निरग्निकत्वेनाङ्गीकृतत्वात् ह्रदवत् इत्यनुमानमेव तर्क इति साधनानुमान इव तर्केप्यसिद्ध्यादिकं दोष एवेति न तर्कस्य साधनानुमानाद्वैषम्यमिपि।।

अत्र च द्वितीये पक्षे निरग्निकत्वमेव लिङ्गम्। अभ्युपगमस्तु तस्य पक्षेण संबन्धः। तृतीये त्वभ्युपगम एव लिङ्गमिति भेदः।।
अयमपि पक्ष 'आपादनं नामाङ्गीकर्तव्यतया ज्ञापनम्। न १ तत्प्रमाणविरुद्ध'मित्यादिसुधायामेवोक्तः।।
या तु --
स्वान्यायैः साधनं परन्यायैश्च २ दूषणम्। इत्यनुव्याख्याने, स्वसिद्धैः साधनं परसिद्धैर्दूषणमतो न दूषणेऽपसिद्धान्तादीते प्रमाणलक्षणे च,

अस्मिन्पक्षे प्रामाण्यमुपपादयितुं तत्स्वरूपमवधारयति-- एवंचेति।। अङ्गीकारार्थत्वे सतीत्यर्थः। असिद्ध्यादिकं दोष एवेति।। यत्र व्यापकाभावस्य परेण ३ नङ्गीकारेप्यङ्गीकृतत्वादिदमङ्गीकर्तव्यमित्युच्यते तादृशस्थल एव। तादृशस्य तु प्रामाण्यमस्माभिर्नोपेयत एव। यत्र पुनरङ्गीकारो व्यापकाभावस्य सिद्धस्तादृशस्यैवासिद्ध्यादिशून्यस्य प्रामाण्यमुपेयत इति भावः।।
ननु यद्वेत्युक्तद्वितीयपक्षेपि पराभ्युपगमेनैवासिद्ध्यादिपरिहारात्तृतीयस्य ततः को भेद इत्यत आह-- अत्र चेति।। अयमपि तृतीयोपि।। सुधायां भक्तिपादीयसुधायाम्। ननु तर्केप्यसिद्ध्यादेर्दोषत्वे तददोषत्वोक्तिर्विरुद्धेत्यत आह -- या त्विति।। इत्यनुव्याख्यान इति।।

१.न च त-ग.ट.रा. २.स्तु -रा. ३.णाङ्गी -ट.ठ.

साधनदूषणानुमानयोर्व्यवस्थोक्तिः सा न तृतीयपक्षे। तत्र प्रसङ्गानुमानस्य साधनानुमानादवैषम्यस्योक्तत्वात्। किंत्वितरपक्षयोः। आद्योक्ताया १

असिद्ध्याद्यदोषताया, द्वितीयोक्ताया अभ्युपगमस्यैव सिद्धितायाश्च साधनानुमाने क्वाप्यदर्शनात्।।
यद्वा तृतीयोक्ताया अभ्युपगमायोग्याभ्युपगमस्य लिङ्गताया अपि साधनानुमाने क्वाप्यदर्शनात् व्यवस्थोक्तिः पक्षत्रयसाधारणीति ज्ञेयम्।।
एतेन विपर्यय २ पर्यवसानरूपानुमननिरपेक्षस्य तर्कस्य न प्रामाण्यमिति निबन्धादावुदयनाद्युक्तं निरस्तम्। तन्निरपेक्षस्यैव प्रसङ्गस्य प्रामाण्योपपादनात्।।
यातु अनिष्टापादनं विपर्यये पर्यवसानं चोभयं मिलितेमेवानुमितिसाधनं भवतीति तर्कस्य प्रामाण्यमिति पद्धतिः,

भक्तिपादीये। अत इत्यादि ग्रन्थकारवाक्यम् स्वसिद्धे ३ रित्यादि वाक्यद्वया ४ भिप्राय विवरणम्।। व्यवस्थेति।। स्वसिद्धत्वपरसिद्धत्वरूपव्यवस्थेत्यर्थः। इतरयोः पक्षयोरेव वय्वस्थेत्युक्तं व्यनक्ति-- आद्येति।। अभ्युपगमायोग्येति।। निरग्निकत्वस्याभ्युपगमायोग्यस्य योभ्युपगमस्तस्य लिङ्गताया इत्यर्थः।। एतेनेति।। एवं त्रेधा प्रामाण्योपपादनेनेत्यर्थः। तदेव व्यनक्ति -- तन्निरपेक्षस्यैवेति।। एवं हि पद्धतिविरोध इत्यतो द्वेधा समाधिमाह-- यात्विति।। ५ सेत्यन्वयः।।

१.व्याप्या -- ग.ट.रा. २.येप- रा. ३.द्धिरि-ट. ४.यमभि-ट. सेत्यर्थः -ट.

तस्या-नुना-न्तर्भावः) तर्कवादः पु - १५७.

सा निर्धूमतयाङ्गीकर्तव्यतासाधनस्य सिद्धसाधनताशङ्गानिरासार्थं, स्यादित्यनेन बोधितप्रमाणविरोधोपपादनार्थं च तर्क १ स्याङ्गभूतविपर्यय २ पर्यवसानसापेक्षत्वमात्रेण वा धूमस्य वह्निव्याप्तिप्रमायां

अङ्गीकर्तव्यताप्रमायां च ३ निरपेक्षत्वेपि तदुद्देश्यायां न निरग्निक इति प्रमायां पर्यवसानसापेक्षत्वेन वेति ज्ञेयम्।।
किंच तर्करूपं हि ज्ञानं न तावत्संशयः। एककोचिकत्वात्। नापि विपर्ययः। निरस्तत्वात्। तस्मात्प्रमाणमेव।।
किंच तर्कज्ञानस्याप्रमाणत्वेन ४ तर्कवाक्यसमदुत्तरं स्यात्। यदि विषं भक्षयसि
५ तर्हि मरिष्यसीत्याद्याप्तवाक्यं,

आद्यपक्षद्वयानुरोधेनाह-- धूमस्य वह्निव्याप्तिप्रमायां ६ वेति।। अथवेत्युक्तान्त्यपक्षानुरोधेनाह-- अङ्गीकर्तव्यताप्रमायां वेति।। तदुद्देश्यायामिति।। व्याप्तिप्रमाङ्गीकर्तव्यताप्रमाभ्यामुद्देश्यायां तयोः फलभूतायामित्यर्थः।।
तर्कः प्रमाणं न चेदप्रमाणं स्यात्। उभयबहिर्भावायोगात्। अप्रामाण्यं च संशयत्वेन विपर्ययत्वेन। न द्वयमप्यतोऽप्रामाण्यायोगात्प्रामाण्यमेव युक्तमिति परिशेषेणापि प्रामाण्यमाह-- किं चेति।। विपक्षबाधकेनापि तर्कस्य प्रामाण्यमाह -- किं च तर्कज्ञानस्येति।।

१.तर्काङ्ग-क.ग.ट.रा. २.र्यये प-ग.रा. ३. वा -ग.रा. ४.त्वेत-ट.रा. ५.यिष्यसि -क.ग. ६.चेति-ठ.

यदि हरिश्चन्द्रोनृतं ब्रूयात्तर्ह्यग्निरपि शीतः स्यादित्यादिस्मृतिश्चाप्रमाणं स्यात्। अनुभवविरोधश्च स्यात्।
यद्याद्यर्थशिरस्कस्य १ तर्कस्य बाधाननुभवात्।.

किंच २ प्रमात्वेनानाशङ्कितेधूमरूपविशेष्यस्य ३ साक्षात्कारे सति कथं निर्धूमत्वस्यारोपः।।
न च तर्कस्य प्रतिमायां नारायणबुद्धिवदाहार्यारोपरूपत्वाद्विशेषदर्शनं न विरोधीति वाच्यम्। तस्य फलानुसन्धानसापेक्षत्वाव्याप्तिज्ञाननिरपेक्षत्वाच्च। तर्कस्य फलानुसन्धाननिरपेक्षत्वात्। व्याप्तिज्ञानसापेक्षत्वाच्च। प्रतिमायां नारायण ४ ध्यानस्येव पर्वते निर्धूमत्वध्यानस्याननुभवाच्च।।
एतेन -- तर्कः संशयात्प्रच्युतो निर्णयं चाप्राप्त इत्युदयनोक्तमव्यवस्थितनिरग्निकत्वाभ्युपगमोपाधिकानिष्टप्रतिसन्धानरूपत्व ाात्तर्कज्ञानस्याप्रामाण्यमिति वर्धमानाद्युक्तं;

न केवलमतिप्रसङ्गभयात्तर्कस्याभ्रमत्वमुपेयं किं तु विशेषदर्शनरूपविरोधिसत्वेप्यु ५ पपन्नत्वान्न भ्रमत्वं तस्योपेतुं शक्यमित्याह --
किंचाप्रमात्वेनेति।। अप्रमात्वकोटिकशङ्काशून्ये व्यप्यदर्शने सतीत्यर्थः। कथं निर्धूमत्वारोप इति।। किंत्वस्मदुक्तदिशा प्रमारूप एव वाच्य इति भावः। आहार्यत्वात्संभवतीत्याशङ्क्य निराह-- न चेति।। फलेति।। अदृष्टफलेत्यर्थः। प्रतिमायां नारायणरूप ६ बुद्धिर्ध्यानरूपा। न ह्येवं प्रकृत इत्याह -- प्रतिमायामिति।। उदयनोक्तं वर्धमानाद्युक्तमित्यनयोरपि निरस्तमित्यनेनान्वयः।। अव्यवस्थितेति।। अप्रमीयमाणेत्यर्थः।

१.स्या बाधानुभवात्-क.ग.ट.रा. २.चाप्र-ट.रा. ३.शेषस्य-ट.रा. ४.णत्वध्या-ग. ट.रा. ५.प्युत्पन्न-ठ.ड. ६. रूपपदं न -ठ.ड.

तर्कः संदेहविपर्ययप्रमाविजातीयं ज्ञानान्तरं साच जातिः तर्कयामि न तु निश्चिनोमि इत्यनुव्यवसायसाक्षिकेति मणिकण्ठोक्तं च निरस्तम्। यद्यर्थशिरस्के प्रमाणत्वस्योक्तत्वात्।।
किंच तर्कत्वस्य जातित्वे तर्कस्य त्वदङ्गीकृतं संशयनिवर्तकत्वं न स्यात्। ज्ञानस्य विरोधिविषत्वेनैव १ निवर्तकत्वात्।।
किञ्च जात्यैव निवर्तकत्वेऽ २ नुमानानुग्राहकस्तर्को निरग्निकत्वानुमानस्य ३ च प्रतिबन्धिकामपि शङ्कां निवर्तयेत्। जातेः साधारण्यात्। न हि गौः किंचित्प्रत्यगौर्भवति। न च मण्यादि ४ वत्प्रतिनियतप्रतिबन्धकत्वम्।

संदेहेति।। संशयविपर्ययप्रमाभ्यः विजातीयमित्यर्थः। उक्तत्वादिति।। श्रुण्वित्यादिना ग्रन्थेनेति भावः। मणिकण्ठपक्षे दोषान्तरमाह-- किंच त ५ र्कत्वस्येति।। संशयेति।। व्यभिचारसंशयेत्यर्थः।।
ननु तर्करूपज्ञानस्य जात्यैव संशयनिवर्तकत्वमस्त्विति वक्तारं प्रत्याह-- किंचेति।। ननु -- जात्यैव निवर्तकत्वेपि मण्यादिकं जात्या प्रतिबन्धकमपि यथा दाहस्यैव न त्वन्यस्य एवं तत्तदीयतर्कस्तत्तदीय शङ्कानिवर्तको न सर्वसाधारण इत्याशङ्क्य निराह-- न च मण्यादीति।।

१.तन्नि-क.ग.ट.रा. २.त्वेग्न्यनु- क.ट.रा. ३.शब्दानित्यत्वानुमानस्य इत्यधिकम्- क.ग.ट.रा. ४.वज्जात्यैव प्र-ग.ट.रा. ५.र्कस्ये -ट.ड.

तत्रोद्देश १ दाहत्वस्येवात्र शङ्कात्वस्यैव प्रतिबध्यतावच्छेदकत्वं २ चेदुक्ताति प्रसङ्गात्। तर्कविष ३

विरोधिविषयशङ्कात्वस्य ४ तथात्वे तर्कस्यापि क्लृप्तेन शङ्काविषयविरोधिविषयत्वेनैव प्रतिबन्धकताया न्याय्यत्वात्। अन्यथा ५ घटज्ञानत्वादिकमपि जातिः स्यात्।।
तस्मात्तर्कः ६ प्रमाणमेव। तत्रापि व्याप्तिसापेक्षत्वेन शाब्दत्वप्रत्यक्षत्वयोरसंभवेन परिशेषादनुमानमेव। परार्थे तर्के वादिवाक्यापेक्षा तु परार्थानुमान इव व्याप्त्यादिस्मारकत्वेन । न त्वागमत्वेनेति।।
इति तर्कस्यानुमानान्तर्भावः ।। १६ ।।

तर्कविषयविरोधीति।। शङ्का व्यभिचारविषिणी तर्कस्त्वव्यभिचारविषय इति विरोधिविषयशङ्कात्वस्येत्युक्तम्।। व्याघातत्वेति।। स्वक्रियाविरोधत्वादिकिमित्यर्थः। तर्को ह्यनुमानवत्स्वार्थपरार्थभेदेन द्विविधः। स्वस्योत्पन्नशङ्कानिवर्तकः स्यार्थः। परस्य शङ्कानिवृत्तये प्रयुक्तः परार्थः। तत्र तर्कप्रयोक्तृवाक्यसापेक्षत्वात्तर्करूपज्ञानस्य शाब्दत्वे कुतो नेत्यत आह -- परार्थ इति ।।
इति तर्कस्यानुमानान्तर्भावः।। १६ ।।

१.श्य- क.ग.रा. २.त्वे उक्ता -ग.ट.रा. ३.यक -ग.रा. पुनर्विषयेत्यधिकम् -क. ४. स्य च -ग.ट.रा. ५. व्याघातत्वादि- ग.ट.रा. ६.र्कज्ञानं प्र- ग.ट.रा.

स्वते-तस्यो-पयोगः) तर्कवादः पु - १६१.

अथ स्वमते तर्कस्योपयोगः ।। १७ ।।
तर्कस्योपयोगस्त्वित्थम्--

तर्कनिवर्त्याप्रयोजकत्वशङ्का हि द्वेधा। पक्षतदितरसाधारण्येन सधूमोपि कश्चिन्निरग्निकोस्त्विति वा, पक्षादन्यत्र नियमेपि पक्षे समबलस्य प्रबलस्य वा साध्याभावप्रमाणस्याभिमानेन पक्ष एव सधूमो निरग्निकोस्त्विति वा। तत्राद्या व्यभिचारशङ्कारूपा लिङ्गपरामर्शात्प्राचीना द्वितीया तु प्रतिप्रमाणशङ्कारूपा तस्मादर्वाचीना।।
यद्यपि द्वितीयापि फलतो व्यभिचारशङ्कैव। तथाप्याद्या, पार्थिवत्वलोहलेख्यत्वादौ भूयोदर्शनादिके सत्यपि व्यभिचारदर्शनात्तन्निमित्तका स्वारसिकी १ । पक्षतदितरसाधारणी च । द्वितीया तु प्रतिप्रमाणशङ्कानिमित्तकाधेया पक्षासाधारणी चेति भेदः।।

अथ स्वमते तर्कस्योपयोगः ।। १७ ।।
पद्धत्युक्तमुपयोगं विवृण्वान आह-- तर्कस्येति।। तस्मादर्वाचीनेति।। परामर्शा २ दनन्तरभाविनीत्यर्थः। उक्तयोः पक्षयो ३ रभेदमाशङ्क्य स्वारसिकत्वाधेयत्वाभ्यां भेदं साधयति-- यद्यपीत्यादिना।। फलत इति।। हेतुमति साध्याभावशङ्कायां साध्याभाववति हेतुसत्वरूपव्यभिचारस्य फलितत्वादित्यर्थः ४ ।। तन्निमित्तकेति।। बहुशः सहचरितयोरपि यत्किञ्चिव्व्यभिचारदर्शनं तेन निमित्तेनात्रापि धूमादौ तथेति ज्ञायमानेत्यर्थः।

१. कपक्ष -ग.रा. २.र्शानं-ट.ठ. ३.योः भेदमाक्षिप्य -ट.ठ. भेदमाशङ्क्य -ड. ४. दिति भावः -ठ.ड.

पु - १६२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

द्विविधापि १ तदाशङ्का तर्केण निरस्यते। अन्यथोपपत्तिविषयया शङ्कया प्रतिप्रमाणेन च २ साक्षादनुपपत्तिप्रमापकस्य तर्कस्य

विषयकृतविरोधस्य सत्वात्। तर्कस्य व्याघातपर्यन्ततया दृढमूलत्वेन शङ्काप्रतिप्रमाणाभासाभ्यां प्राबल्याच्च।।

आधेया बलादुत्पाद्या। स्वरसवाहिन्न्याः परामर्शरूपविशेषदर्शननिरस्तत्वादिति भावः।। द्विविधापि शङ्का ३ तर्केण निरस्यत इति।। केवलान्वयिसाध्यके
साध्याभावाप्रसिद्धेरेवं शङ्कायाः एवानुदयात्तत्र तर्कस्योपयोगासंभवो न शङ्क्यः। सर्वस्य व्यतिरेकिधर्मत्वेन सिद्धान्ते केवलान्वयिनोऽभावादिति भावः।।
निरासे को हेतुरित्यतो न मणिकण्ठोक्तदिशा जात्या, किंतु विरोधिविषय ४ त्वेनेति भावेनाह -- अन्यथोपपत्तीति।। साध्येन विना या उपपत्तिः संभवः तद्विषयेत्यर्थः। पक्षतदितरसाधारण्येन वा पक्ष एव वेति भावः।। विषयकृतेति।। अन्यथोपपत्यन्यथानुपपत्तिरूपविषयकृतेत्यर्थः। विरोधिविषयकत्वमात्रेण कथं निवर्तकतेत्यत आह-- तर्कस्येति।। तर्कस्य शङ्कापर्यन्तत्वाच्छङ्काया व्याघातपर्यन्तत्वाव्द्याघातपर्यन्तयेत्युक्तम्।

१.पिशङ्का- ग.ट.रा. २.सहान्यथानुपपत्ति -ग.ट.रा. ३.शङ्कापदं न - ट.ठ. ४.यकत्वे-ट.ड.

स्वते-तस्यो-पयोगः) तर्कवादः पु- १६३.

निवर्त्यभेदान्निवर्तकस्तर्कोपि द्वेधा। तत्राद्योऽनुमितिकरणनिष्पादको द्वितीयस्तु निष्पन्नेन करणेन प्रतिप्रमाणशङ्कानिरासार्थमपेक्षितत्वेन फलोपकारकत्वादनुमानानुग्राहकः।।

एतदेवाभिप्रेत्योक्तं पद्धतौ - 'सोयं क्वचिद्विपरीतशङ्कानिरासनद्वारेण ११ करणस्यानुग्राहकोपि भवतीति। २ क्वचिद्दशाविशेषे करणनिष्पत्तेरर्वाक् प्रतिप्रमाणशङ्कानिरसनद्वारेण करणश ३ रीरनिष्पादकश्च भवतीत्यर्थः।।

शङ्का च प्रतिप्रमाणाभावसश्च ताभ्यामित्यर्थः। अनुमितिकरणेति।। व्याप्तिविशिष्टलिङ्गज्ञानरूपकरणेत्यर्थः। व्यभिचारशङ्कानिवृत्तौ व्याप्तिनिश्चयसंभवादिति भावः। फलेति।। अनुमितिरूपफलोपकारकत्वात्। उपकारकत्वं प्रतिबन्धकनिवर्तकत्वम्। एतदेवेति।। उक्तपक्षद्वयमेव।। प्रमाणान्तरेति।। ४ लिङ्गपरामर्शरूपप्रमाणान्तरेत्यर्थः।।
नन्वत्र वाक्ये द्वितीयपक्षे ५ द्वितीयपक्ष एव प्रतिभाति न त्वाद्य इत्यत आह -- अपीति।। प्रमाणान्तरेत्यस्य प्रत्यक्षादि ६ कमर्थमुपेत्याह -- यद्वेति।।

१.प्रमाणान्तरानु -क.ग.ट.रा. २.'अपिशब्दात् क्वचित्' इति, ततः 'करणशरीर' इत्यादिकंचास्त -क.ट.रा. ३.णस्यानुग्राहको भवति-- अपिशब्दात्ततःप्राक् व्यभिचार शङ्कानिरसनद्वारेण शरीरनिष्पदकश्च(न) भवतीत्यर्थ)-क. ४.ङ्गदर्शनरूपप्रमा -ड. ५.विपर्ययपक्ष इति नास्ति-ट.ठ.ड. ६.क्षशब्दरूप -प्रमाणद्वयमर्थमुपे - ट. क्षमर्थमु- ठ.

यद्वा क्वचित्प्रत्यक्षादावनुग्राहको भवति। तत्र करण १ निष्पादकत्वासंभवात्। अपि शब्दानुमान उक्तरीत्योभयात्मकश्च भवतीत्यर्थः।।

यद्वा क्वचिव्यभिचारस्य प्रतिप्रमाणस्य वा शङ्कायामनुग्राहकः करणनिष्पादनेन वा २ निष्पन्नस्य ३ करणस्य सरकारितया वोपकारको भवति। अपिशब्दाच्छङ्काया अभावेन ४ तन्निवर्तकस्य तर्कस्यानपेक्षितत्वादनुग्राहकश्च भवतीत्यर्थः।।
यद्वा क्वचिदद्रिरग्निमान्धूमवत्वादितिप्रयोग उक्तरीत्यानुग्राहको भवति। अपिशब्दात्क्वचित्स्वतन्त्रोपि भवति।

क्वचिदित्यनुवादः। प्रत्यक्षदाविति व्याख्या। अनुग्राहकपदमस्मिन्पक्षे युक्तमित्याह -- तत्रेति।। प्रत्यक्षशब्दयोरित्यर्थः। प्रमाणान्तरपदस्या ५ नुमानस्येत्यर्थमुपेत्य प्रकारान्तरेण पद्धत्यर्थमाह-- यद्वा
क्वचिव्यभिचारस्येति।। क्वचिदित्यस्य शङ्कायामित्यन्वयः । सधूमो निरग्निकोस्त्विति व्यभिचारशङ्कायामित्यर्थः। द्वितीयपक्षानुरोधेनाह-- प्रतिप्रमाणस्य वेति ६ ।। क्वचिदित्यस्यार्थमुक्त्वानुग्राहक इतग्यस्यार्थमाह-- करणेति।। परामर्शकरणेत्यर्थः। सहकारितया प्रतिबन्धकनिवर्तकतयेत्यर्थः। उक्तरीत्येति।। करणनिष्पादनेन वेत्यादिनोक्तरीत्येत्यर्थः।

१.णानि-क. णशरीरनि-ग.ट.रा. २.वानिष्पादनेन वा निष्प-क. ३.न्नक -ग.ट.रा. ४.वेत-ग.ट.रा. ५.पक्षस्यानुवादस्यानुमानस्येवार्थमुपे -ट. ६.स्यैवे-ट.ठ.

स्वते-तस्यो-पयोगः) तर्कवादः पु - १६५.

अद्रिरग्निमान्न वेति विप्रतिपत्तौ साधनानुमानं विनैव यदि निरग्निकः स्यात्तर्हि निर्धूमः स्यान् चायं निर्धूम इति तर्करूपानुमानेनैवाग्निसिद्धेः। न हि विधिमुखेन साधयित्वैव निषेधमुखेन साधनीयमिति कुलधर्म इत्यर्थः।

उक्तं च टीकाकारैर्दूषणानुमानविभागप्रस्तावे। नायं निरग्निकोऽनिर्धूमत्वादिति। यद्वा क्वचिदुद्देश्यायां तस्मान्न निरग्निक इति प्रमायां साध्यायामनुग्राहको भवति। अपिशब्दान्निर्धूमत्वेनाङ्गीकर्तव्य इति प्रमायां वा १ व्याप्तिप्रमायां वा साध्यायां स्वतन्त्रश्च भवतीत्यर्थः।

स्वातन्त्र्यं व्यनक्ति-- अद्रिरिति।। साधनेति।। अद्रिरग्निमान्धूमवत्वादित्यादिप्रकारं विनैवेत्यर्थः।।
नन्वग्निमान्धूमवत्वादिति विधिमुखेनासाधयित्वा कतं निषेधमुखेनैव साधनमित्यत आह-- न हीति।। इत्यर्थ इति।। अपिशब्दात्पद्धतिवाक्य २ स्येत्यादिवाक्यव्याख्यावसर इति भावः। उक्तं चेति।। प्रमाणलक्षणटीकाया ३ मात्माश्रये ४ योज्यम्। अनुग्राहको भवतीति।। शङ्कानिवृत्तिद्वारेति भावः। प्रागुक्ताद्यान्त्यपक्षद्वयाभिप्रायेण क्रमेणाह -- व्याप्तिप्रमायामिति ५ ।। इति प्रमायां वेति।।

१.आदौ 'व्याप्तिप्रमायां वा' इत्यस्ति-क.ग.ट.रा. २.क्यस्येतियोज्यम् उक्तं चे -ट.ठ. स्येति भावः -ड. ३.'यां' इति, ततः अनुग्राहक इत्यादिकमेवास्ति -ठ. ४.येत्यादिवाक्यव्याख्यावसरे -ट. श्रय इत्यादिवा- ड. ५.'अङ्गीकर्तव्य इति' इत्यस्ति -ठ.

पु - १६६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

तस्माद्यथाप्रमाणसंप्लवे द्वितीयं प्रमाणभूतमेव प्रथमप्रमाणदार्ढ्यहेतुत्वेन प्रथमानुग्राहकम्। तथा तर्कोपि स्वयं प्रमाणमेव प्रमाणस्यानुग्राहकः। साधकं बाधकं वा प्रमाणमेव हि शङ्कानिवर्तकम्। न त्वप्रमाणम्। तर्कज्ञानस्य भ्रमत्वे

हि व्याप्तियोग्यतादिभ्रमजन्यानुमितिशाब्दज्ञानदिरिव धारावाहिकभ्रमे द्वितीयानुगृहीतस्य प्रथमस्येव वा १ प्रमाणतर्कानुगृहीतानुमितेरेवाप्रमात्वं स्यात्। अप्रमाणतर्कबाधितस्य प्रत्यनुमास्यैव च प्रामाण्यं स्यात्।।
इति स्वमते तर्कस्योपयोगः ।। १६ ।।

ननु धूमवत्वादिसाधनाफलभूताग्निमत्वादिप्रमामेव पर्यवसानमुखेन जनयस्तर्कस्य कथं प्रामाण्यमित्याशङ्कां सदृष्टान्तं परिहरन्नुपसंहरति -- तस्मादिति।।
यद्वोक्तदिशा प्रमाणानुग्राहकस्य कथं प्रामाण्यम्। तथात्वेऽनुग्राहकत्वमेव न स्यादित्याशङ्कां सदृष्टान्तं २ निरस्यन्नुपसंहरति -- तस्मादिति।। उक्तरीत्या प्रमाजनकत्वादित्यर्थः। शङ्कानिवर्तकत्वान्यथानुपपत्या च तर्कस्य प्रामाण्यमित्याह -- साधकं हीति।। अप्रामाण्ये ३ बाधकं चाह -- तर्कज्ञानस्येति।।
इति स्वमते तर्कस्योपयोगः।। १७ ।।

१. व चाप्र -क.ट.रा. २.परिहरन्नुप -ड. ३.ण्यबाध -ट.ठ.

पते-तर्कोगासंभवः) तर्कवादः पु - १६७.

अथ परमते तर्कोपयोगासंभवः।। १८।।
किञ्च परमते तर्कस्य किं विषय १ विशोधन उपयोगः किं वा व्याप्तिग्रहे, आद्येपि किमुदयनरीत्या अनिष्टप्रसञ्जनत्वमात्रेणोपयोगः, किं वा वर्धमानरीत्या साध्याभावसंदेहनिवर्तनेन यद्वा तज्जन्यसाध्याभावजिज्ञासानिवर्तनेन, अथवा तज्जन्यसाध्यजिज्ञासोज्जीवनेन। नाद्यः। अनिष्टप्रसञ्जनत्वमात्रेण तर्कोपयोगे शङ्गाभावेपि तर्कापेक्षाप्रसङ्गात्। न द्वितीयः। सन्देहस्य

तज्जन्यजिज्ञासयैव निवृत्तेः। निर्धूमत्वज्ञानस्य निरग्निकत्वसन्देहेन सह विषयकृतविरोधाभावेन तदनिवर्तकत्वाच्च। प्रत्युत निर्धूमत्वस्य साग्निकत्वनिरग्निकत्वरूपकोटिद्वयसाधारण्येन तज्ज्ञानं सन्देहोपोद्बलकमेव। मन्मते तु विषयकृतविरोधः प्रागेवोक्तः।।

अथ परमते तर्कोपयोगासंभवः ।। १८ ।।
नन्वस्तु भवदुक्तरीत्या तर्कस्योपयोगे सति प्रमाणत्वम्। न त्वेवम्। किं त्वन्यथैवोपयोगः। तत्र च तर्कस्याप्रामाण्येपि न दोष इत्यतस्तदुक्तोपयोगं खण्डयितुमाह -- किंञ्चेति।। व्याप्तिग्राहकस्य विषयपरिशोधकस्य वेति परामर्शवादान्ते मण्युक्तेराह -- किं विषयेति।। तज्जन्येति।। साध्याभावसन्देहजन्येत्यर्थः। तज्जन्य जिज्ञासैवेति।।

१.यपरिशोधने उ - क.ग.रा.

पु - १६८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

किंच वह्निव्यप्ते १ धूमे दृष्टे कथं वह्न्यावसंदेहः। न च विशेषदर्शने सति स्वारसिकस्य वह्न्यभावसंदेहस्यासंभवेपि प्रतिप्रमाणाहिता तच्छङ्का यक्तेति वाच्यम्। प्रतिप्रमाणेऽनन्यथासिद्धे जाग्रति तर्कसहस्रेणापि तदाहितशङ्कानुवृत्त्ययोगात्। न च तर्कादेव प्रतिप्रमाणस्यान्यथासिद्धिः। त्वन्मते विषकृतविरोधाभावादित्युक्तत्वात्।।

उत्तरात्मविशेषणगुणानां पूर्वगुणनिवर्तकत्वादिति भावः : कोटिद्वयसाधारण्येनेति।। निर्धूमत्वस्यायोगोलकादाविव साग्निकत्वेपि हृदादाविव निरग्निकत्वेपि सम्भवात् साधारण्येनेत्युक्तम्। भवन्मतेपि तर्हि निर्धूमत्वज्ञानाच्छङ्कानिवृत्तिर्न स्यादित्यत आह-- मन्मतेत्विति।।

अन्यथोपपत्यान्यथानुपपत्तिरूपविषकृतविरोधस्य संदेहतर्कयोः पूर्ववादे प्रतिपादितत्वादित्यर्थः। नन्वन्यथोपपन्नत्वशङ्काया धूमादिविषयायास्तर्केण निर्धूमत्वापादानरूपेण निरासेपि भिन्नविषयकसाध्यसन्देहस्य कथं निवृत्तिरित्यतो हेतोरन्यथोपपत्तिशङ्कानिवृत्यैव तदाहितः साध्यसंदेरो निवर्तत एव। प्रत्युत त्वन्मत एव तन्निवृत्तिरयुक्तेति भावेनाह-- किञ्चेति।।
यद्वा तर्कजन्यनिर्धूमत्वज्ञानं किं स्वारसिकसाध्यसंदेहनिवर्तनेनोपयुज्यते अथाहितसंदेहनिवर्तनेन नाद्यः। तस्यैवानुदयात्। नान्त्यः।
विरोधिविषयत्वाभावात्। इत्याह-- किंचेति।। उक्तत्वादिति।। प्रत्युतेत्यादिग्रन्थेनोक्तत्वादित्यर्थः।

१.प्यधू -ट. रा.

पते-तर्कोगा-संवः) तर्कवादः पु - १६९.

न तृतीयः। ज्ञानस्य हीच्छानिवर्तकत्वमनिष्टतावच्छेदकध्मप्रकारकत्वेनैव। अन्यथा प्रमेयत्वादिप्रकारकमपि विषा १ दिज्ञानं तन्निवर्तकं स्यात्। न च निर्धूमत्वज्ञानं त्वन्मते निर्धूमतां तदापादकत्वेनानिष्टं निरग्नितां वाऽनिष्ट २ प्रामाण्यापातात्। किं तु पक्षनिष्ठतयैवेति कथं तर्केण निरग्निकत्वजिज्ञानसानिवृत्तिः।।

प्रतिप्रमाणं-- साध्याभावविषयं तर्कज्ञानं तु निर्धूमत्वविषयमिति विरोधिविषयकत्वं नेति भावः। साध्याभावजिज्ञासानिवर्तनेनेति पक्षं निराह-- न तृतीय इति।। जिज्ञासा हि ज्ञानेच्छा। निर्धूमत्वज्ञानेन जिज्ञासानिवृत्तौ निवृत्तिप्रयोजकधर्माभावान्न सामर्थ्यमिति सामान्यन्यायोक्तिपूर्वमाह-- ज्ञानस्य हीति।। अनिष्टतायां यदवच्छेदकं

अहित्वविषत्वकण्टकत्वादिकं तत्प्रकारकत्वे ३ नैवेत्यर्थः। अस्त्वेतदपि ज्ञानं तथेत्यत आह-- न चेति।। निर्धूमतामित्यत्राप्यनिष्टामित्यन्वेति।। नचोल्लिखतीति।। प्रमाणविरुद्धत्वा ४ देरनिष्टतावच्छेदक ५ स्फुरणस्याननुभादिति भावः। विपक्षे बाधकतं चाह -- तथात्व इति।। अनिष्टमनिष्टता ६ वच्छेदकेनोल्लेखे सति वह्नित्वादिना वह्न्याद्युल्लेखिज्ञानस्येव प्रामाण्यं स्यादित्यर्थः।।
ननु धूमं पश्यतः कथं निर्धूमत्वादिज्ञाने प्रमाणविरुद्धत्वादिकं न भायात्। न चैवं प्रामाण्यापातः अविद्यमानपक्षनिष्ठत्वभानादप्रामाण्यमस्त्विति --

१.षयादिज्ञा- ग.ट.रा. २.त्वावच्छेदक धर्मवत्तया -ग.रा. ३.नेत्य -ट.ड. ४.द्यनिष्ट-ठ. ५.कत्वस्फु -ठ. ६.त्वाव- ट.ठ.ड.

पु - १७०. न्यायदीपुयततर्कताण्डवम् (तृ.परिच्छेदः

किंच प्रमाणविरुद्धनिर्धूमत्वापादकतया निरग्निकत्वमेवानिष्टं न तु तज्ज्ञानम्। तस्यारोपरूपत्वेन तदनापादकत्वात्। तथा च निरग्निकत्वविषयेच्छाया एव निवृत्तिः स्यात्। न तु तज्ज्ञानविषेच्छारूपजिज्ञानसायाः।।
किंचेच्छाविच्छेदकमनिष्टत्वं दुःखतत्साधनान्यतरत्वरूपं नत्वप्रामाणिकतदापकानयतरत्वरूपम्। आप्तवाक्यादिना स्वस्य दारिद्र्यं निश्चितवतोपि धेन औत्कण्ठ्यदर्शनात्। तथाचाप्रामाणिकनिर्धूमत्वापादके --

चेदेवमपि निर्धूमनत्वज्ञानेन निरग्निकत्वेच्छैव निवर्त्या नतु तज्ज्ञानेच्छारूपा जिज्ञासेत्याह-- किंचेति।। अनिष्टतावच्छेदकप्रकारकं ज्ञानमनिष्टविषयेच्छां निवर्तयति। सा च निरग्निकत्वेच्छैव। तस्या

अनिष्टत्वात्। न तु तज्ज्ञानेच्छारूपा। जिज्ञास्यज्ञानस्यानिष्टत्वाभावादित्यर्थः।।
नन्वनिष्टविषयकत्वान्निरग्निकत्वज्ञानमप्यनिष्टमेवेत्यतो विषयस्याप्यनिष्टत्वमभ्युपेत्योक्तम्। वस्तुतस्तदपि नेत्याह-- किंचेच्छेति।। न चा १ प्रामाणिकेति।। अप्रामाणिकत्वं वा, तदापादकत्वं वा, येन निर्धूमत्वमप्रामाणिकमिति निरग्निकत्वं च तदापादकमित्युभयमनिष्टं स्यादित्यर्थः। धन इति।। तस्य स्वस्मिन्नप्रामाणिकत्वनिश्चयेप्यनिष्टत्वाभावात्प्रत्युतौत्कण्ठ्यरूपेच्छाविषयेन्ोष्टत्वस्यैव दर्शनादित्यर्थः।

१. न त्वप्रा -ठ.ड.

पते-तर्कोगा-संवः) तर्कवादः पु - १७१.

निरग्निकत्वे कथं शब्दसाम्यमात्रेणेच्छाविच्छेदं ब्रूषे।।
किंच साध्याभावजिज्ञासा न साध्यानुमितिप्रतिबन्धिका। येन तन्निवृत्तये तर्कोऽपेक्ष्यत। सा हि साध्याभावविषयकज्ञानविषयिणी । न च साध्याभावविषयविषयकमपि साध्यज्ञानविरोधि। तथात्वे हि पक्षे साध्याभाव १
ज्ञानमिति ज्ञानेनाप्यनुमितिः प्रतिबध्येत।।

शब्दसाम्यमात्रेणेति।। दुःखं तत्साधनं वा यथानिष्टमुच्यते तथा २ प्रामाणिके तदापदके वाङ्गीकारानर्हत्वमात्रेणानिष्टपदमस्तीति शब्दसाम्यमात्रेणेत्यर्थः। निर्धूमत्वादिज्ञानेन ह्यनुमितिप्रतिबन्धकं निरस्यम्। साध्याभावजिज्ञासा तु न प्रतिबन्धकेति तन्निरासायासो व्यर्थ एवेत्याह--

किंचेति।। इति ज्ञानेनापीति।। साध्याभावज्ञानविषयकज्ञानस्यापि स्वविषयज्ञानद्वारा साध्याभावविषयकत्वादिति भावः।।
३ मणिकण्ठे तु -- साध्याभावमात्रविषयकजिज्ञासा ह्यनुमितिप्रतिबन्धिका। न तु साध्यतदभावोभयविषया। संशयेन चोभयकोटिकैव जिज्ञासा जन्यते। न तु साध्याभावमात्रकोटिका जिज्ञासा। तस्मिन्काले साध्याभावमात्रजिज्ञासोत्पत्तौ कारणाभावात्किं तन्निवर्तकतर्केणेत्युक्तम्। तत्र साध्याभावमात्रजिज्ञासाया अप्युक्तदिशा प्रतिबन्धकत्वाभावो ध्येयः।।

१. व विषयज्ञानेनापि -- ट. बे ज्ञानमिति ज्ञानेना-रा. २.था अ -ड. ३.अत एवेत्यधिकम् -ठ.

पु - १७२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

नापि चतुर्थः। निर्धूमत्वविषयस्य तर्कस्य भिन्नविषयत्वेनाग्निविषयकजिज्ञासोज्जीवकत्वायोगात्। एतेन व्याप्तिग्रहे उपयोग इति द्वितीयोपि निरस्तः। निर्धूमत्वज्ञानस्य विषयकृतविरोधाभावादारोप १ त्वेन ज्ञातत्वाच्च निरग्निकोस्त्विति शङ्कां प्रत्यविरोधित्वादिति दिक्।।
एतदेवाभिप्रेत्योक्तं पद्धतौ विपरीतशङ्कानिरसनद्वारेणेति। न तूदयनादिरीत्यानिष्टप्रसञ्जकत्वादिनेत्यर्थः।

साध्याभावसंशयजन्यसाध्यजिज्ञासोज्जीवकत्वेन तर्कस्योपयोग इति पक्षं निराह-- नापि चतुर्थ इति।। द्वितीयोप २ निरस्त इति।। धूमत्वज्ञानं हि धूमस्य
निरग्निकत्वरूपसाध्याभावसामानाधिकरण्यरूपव्यभिचारज्ञाननिवृत्तिद्वाराऽव्यभिचा

रितसामानाधिकरण्यरूपव्याप्तिग्रहोपयोगीति वाच्यमअ। ज्ञानस्य व्यभिचारज्ञाननिवर्तकत्वं तद्विरोधिविषयकत्वेनैव । न च निर्धूमत्वज्ञानं साध्याभावसामानाधिकरण्यविरोधिविषयकं येन व्याप्तिग्रहोपयोगि स्यादिति भावेनाह -- निर्धूमत्वज्ञानस्येति।।
किंच त्वन्मते केवलान्वयिसाध्यकहेतुप्रयोगस्थले साध्याभावाप्रसिद्ध्या मास्तु प्रमेयत्वमित्यादिशङ्कानुदयेन तत्र तन्निवर्तनासंभवात्कथं तत्र तर्कस्योपयोगः। अपि च तर्कस्यापि व्याप्तिसापेक्षत्वेन तर्काङ्गव्याप्तिज्ञानेपि तर्कापेक्षायामनवस्थापातेन न व्याप्तिग्रहोपयोगित्वं तर्कस्य स्यात्। यदि क्वचित्तर्केण विनापि व्याप्तिग्रहस्तर्हि व्यभिचारात्कथं तर्कस्य तदुपयोगित्वम्। सिद्धान्ते तु स्वतन्त्रप्रमाणत्वान्न व्याप्तिग्रह एवोपयोगः। उपयोगोपि बहुप्रकारेण प्रागेवोपपादित इत्याद्यनुसन्धायाह -- दिगिति।।

१.पितत्वेन -ग.ट.रा.

पक्त-केलायि-लणङ्गः) विभागवादः पु - १७३.

अत्र विपरीतशब्देन परमते स्वमत इव निवर्त्यायाः शङ्काया निवर्तकेन तर्केण सह विषयकृतो विरोधो नेति दर्शितम्।।
इति परमते तर्कोपयोगासंभवः ।। १७ ।।

स्वमत इवेति।। अन्यथोपपत्यन्यथानुपपत्तिरूपविरुद्धविषयकत्वं यथा स्वमते तथा न परमत इत्यर्थः।।
इति परमते तर्कोपयोगासंभवः ।। १८ ।।

अथ परोक्तकेवलान्वयित्वलक्षणभङ्गः ।। १९ ।।

यच्च मणौ व्याप्तिर्द्वे १ धा अन्वयव्यतिरेकभेदात्। ततश्चानुमानमपि केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्त्रिविधम्। तत्र वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम्। गगनात्यन्ताभावस्य केवलान्वयित्वार्थं वृत्तिमत्पदमिति तन्न ।

यत्तु पद्धतौ केवलान्वयिकेवलव्यतिरेकीत्यादिना परोक्तानुमानत्रैविध्यमनूद्य निरस्तं तद्विवरितुकामः तच्चानुमानं त्रिविधमित्यादिनामण्युक्तं निरसितुमाह --यच्चेति।। वृत्तिमदिति।। वृत्तिमान्यो २ यमत्यन्ताभावस्तदप्रतियोगित्वमित्यर्थः। अत्र वृत्तिमानित्यनेन स्वमानाधिकरणाविरोधिनीं या वृत्तिस्तद्वान्विवक्षितः।

१.र्द्विविधा -ग.ट.रा. २.न्योत्यन्ता -ट.ठ.

गगनस्य केवलान्वय्यत्यन्ताभावप्रतियोगित्वे तुच्छत्वापातात्। न हि शशश्रुङ्गादेरपीतोन्यदसत्वमस्ति १ । विस्तृतं चैतन्न्यायामृते।।
इति परोक्तकेवलान्वयित्व २ लक्षणभङ्गः ।। १८ ।।

तेन संयोगात्यन्ताभावे नाव्याप्तिः। संयोगवृत्तेस्तदत्यन्ताभावसामानाधिकरण्याविरोधित्वादित्याहुः। एतच्च प्रमेयत्वाभिधेयत्वादावस्ति। तदत्यन्ताभावस्य ३ व्याघातभयेन क्वाप्यङ्गीकर्तुमशक्यत्वात्।
सर्वस्याप्यन्योन्याभावप्रतियोगित्वादसंभववारणायात्यन्तपदम्। तर्हि तावदेवास्त्वित्यतो दूषणसौकर्याय विशेषणकृत्यमाह-- गगनेति।। भावाभावयोरन्योन्यविरहरूपतया गगनात्यन्ताभावोपि

गगनरूपात्यन्ताभावप्रतियोगीति तत्राव्याप्तं लक्षणं स्यादतो वृत्तिमदिति। गगनं चावृत्तिपदार्थस्तन्मत इति वृत्तिमदत्यन्ताभावो न गगनरूपः। किं तु घटात्यन्ताभाव एव। तथा च तदप्रतियोगित्वं गगनात्यन्ताभावेऽस्तीति नाव्याप्तिरिति। तस्यापि केवलान्वयित्वसिद्ध्यर्थं वृत्तिमत्पदमित्यर्थः।। न्यायामृत इति।। मिथ्यात्वनिरुक्तिभङ्गे प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वखण्डनप्रस्तावे तथा --
त्रिकालसर्वदेशीयनिषेधाप्रतियोगिता।
सत्तोच्यतेऽध्यस्ततुच्छे तं प्रतियोगिनी।।
इति सत्वनिरुक्तिप्रस्तावे, असतोऽत्यन्ताभावप्रतियोगित्वसमर्थनप्रस्तावे चेति भावः।।
इति परोक्तकेवलान्वयि ४ लक्षणभङ्गः ।। १९ ।।

१.मपि -ग.रा. २.यिल-ट.रा. ३.वव्या-ट.ड. ४.यित्वल-ट.ठ.

केल-व्यतिः-भङ्गः) विभागवादः पु - १७५.

अथ केवलव्यतिरेकिभङ्गः ।। २० ।।
केवलव्यतिरेक्यनुमानं च न युक्तम्। त्वन्मते व्याप्तिग्रहार्थं प्रतिज्ञावाक्यस्याबोधकत्वपरिहारार्थं च १ विशिष्टज्ञानं विशेषणज्ञानपूर्वकमिति नियमार्थं २ साध्यप्रसिद्धेरावश्यकत्वात्। केवलव्यतिरेकिणि च तस्या अभावात्।।

अथ केवलव्यतिरेकिभङ्गः।। २० ।।
केवलान्वयिधर्मलक्षणखण्डनेनैव केवलान्वयिसाध्यकमनुमानं निरस्तं मत्वाह -- केवलव्यतिरेकीति ३ ।। यस्य धर्मस्य केवलं व्यतिरेको अभाव एव प्रसिद्धः न तु भावः स धर्मः केवलव्यतिरेकीति

तादृशधर्मसाध्यकमनुमानमपि केवलव्यतिरेक्यनुमानमित्यर्थः। व्याप्तीति।। साध्याप्रसिद्धौ तन्निरूपितत्सामानाधिकरण्या ४ दिरूपव्याप्तिग्रहासम्भवादिति भावः।। अबोधकत्वेति।। साध्यधर्मस्याप्रसिद्धौ तत्र शब्दस्य शक्तिग्रहायोगेनाव्युत्पन्नसाध्यपदघटितप्रतिज्ञावाक्यस्य बोधकत्वायोगादिति भावः।। विशिष्टेति।। व्यतिरेकिहेतुनोत्पन्नसाध्यविशेषण ५ कपक्षविशेष्यकविशिष्टज्ञानमनुमितेः पूर्वं साध्याप्रसिद्धौ विशेषणज्ञानपूर्वकं न स्यात्। तथा च तत्पूर्वकत्वनियमश्च निर्विकल्पकज्ञानवादिना त्वयाङ्गीकृत इति तद्रक्षार्थं साध्यप्रसिद्धिरावश्यकीत्यर्थः।।

१. च इति नास्ति- ट.रा. २.च इत्यधिकम्-ट.रा. ३.क्यपीति-ट. क्यनुमानमपीति -ठ. ४.ण्यरू -ड. ५. णप - ट.ड.

पु - १७६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

तत्र साध्याप्रसिद्धि १ र्नतावत्पक्षे केवलव्यतिरेकिवैयर्थ्यात्। नाप्यन्यत्र। तत्र हेतोर्वृत्तावन्वयित्वस्यावृत्ता २ वसाधारण्यस्य ३ चापातात्।।
नापि पक्षैकदेशे तेन नासाधारण्यम् पक्षादन्यत्र तदप्रसिद्धेः, नापि केवलव्यतिरेकवैयर्थ्यम् तस्य कृत्स्ने पक्षे साध्यप्रतीत्यर्थत्वादिति वाच्यम्। पृथिवीतरभिन्ने ४ त्यादौ पक्षस्यैकदेशसत्वेपि गगनमितर ५ भिन्नमित्यादौ तदभावात्। अंशे सिद्धसाधनाच्च। अभेदानुमान इव पक्षैकदेशस्य ६ निश्चितसाध्यकतयाऽन्वयदृष्टान्तत्वसम्भवेन
केवलव्यतिरेकित्वभङ्गाच्च। पक्षभिन्नत्वेन विशेषणं च गौरवम्।।

कथमभाव इत्यतो भक्तिपादे साध्याप्रसिद्धझेरदोषत्वोक्तिप्रस्तावे सुधोक्तरीत्याह-- तत्रेति।। केवलव्यतिरेकिणीत्यर्थः। व्यतिरेकवादे मणौ

सिद्धान्ते कथितं निराह-- नापीति।। इतरेति।। जलादी ७ न्यष्टद्रव्याणि गुणकर्मसामान्यविशेषसमवायाः पञ्चेतित्रयोदशापदार्था इतरपदार्थाः। तदभावादिति।। तस्याखण्डत्वोपगमात्तार्किकैरिति भावः। अभेदेति।। अयमत ८ द्भिन्न एतद्वृक्षत्वादेतद्वृक्षवदित्यनुमान इवेत्यर्थः।।
ननु पक्षादन्यत्र निश्चितसाध्यकत्वमेव दृष्टान्तत्वे प्रयोजकमित्यत आह -- पक्षेति।। नन्वस्तूक्तदिशा व्यतिरेकिणोन्वयित्वं तथापि न केवलव्यतिरेकित्वभङ्ग इत्याशङ्क्य प्रत्याहहह -- न चान्वयेति।।

१.द्धिर्हिनता -ग.ट.रा. २. त्तौ चासा-ग.ग. ३.स्यपा -ट.ग. ४.न्नेत्यत्र प -ग.ट.रा. ५.रेभ्योभि -क. ६.स्यैव-क.ग.ट.रा. ७.दयोष्ट -ट.द्यष्ट -ठ. ८.तदभि -ठ.ड.

केल-व्यति-भङ्गः) विभागवादः पु - १७७.

न चान्वयाप्रतिसन्धानदशायां केवलव्यतिरेकित्वमिति वाच्यम्। तथात्वेऽन्वव्यतिरेकि १ ण्यपि तत्प्रसङ्गात्। अन्वयप्रतिसन्धाने स्वनिरूपितव्याप्तिज्ञानाभावेनानुमितिरेव नास्तीति वक्ष्यमाणत्वाच्च।।
नच यत्रानित्ये वाङ्मनसे इत्यादौ पक्षतावच्छेदकनानात्वं तत्रैवांशे सिद्धसाधनम्। इह तु तदनच्छेदकं पृथिवीत्वमेकमेवेति वाच्यम्। उद्देश्यप्रतीतिसिद्ध्यसिद्ध्योरेव सिद्धसाधनतदभावौ प्रति तन्त्रतयास्य परिभाषामात्रत्वात्।।
न च तर्ह्युद्देश्यायाः पृथिवीत्वावच्छेदेनेतरभेदबुद्धेरंशेष्यभावान्नांशे सिद्धसाधनमिति वाच्यम्।

इष्टापत्तिं मन्वानं प्रत्याह-- अन्वयेति।। स्वेति।। साध्यनिरूपितेत्यर्थः। वक्ष्यमाणत्वादित।। अत्रैवोत्तरत्र किंचाभावगतया व्यतिरेकव्याप्त्या कथं

भावस्य गमकत्वमित्यादिनेति भावः। मण्याद्युक्तमेवांशतः सिद्धसाधनतादोषोद्धारमाशङ्क्य निराह-- न च यत्रेति।। तत्रैवेति।। पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिर्ह्यनुमानफलम्। नानात्वस्थले चैकावच्छेदेन साध्यसिद्धावप्यनुमानफलस्य जातत्वात्पुनरन्यावच्छेदेनाप्यनुमित्युत्पादनार्तमनुमानाप्रवृत्तेरिति भावः।। एकमिति।। तथाच घटाद्यंशे घटत्वाद्यवच्छेदेन साध्यसिद्धावपि पृथिवीत्वरूपपक्षतावच्छेदकसामानाधिकरण्येनेतरभेदरूपसाध्यासिद्ध्या तत्रानुमित्युदयार्थमनुमानप्रवृत्तिसम्भवान्न तत्र दोष इति भावः।

१. किणोपि - ट. रा.

पु - १७८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः
निश्चितसाध्यकत्वेन संदेहसिषाधयिषयोरभावेनैकदेशस्य त्वन्मते पक्षत्वायोगात्।।
न च घटस्य घटत्वेनेतरभेदनिश्चयेपि पृथिवीत्वेन तत्संदेहादिकमिति १ वाच्यम्। विशेषाकारेणेतरभेदनिश्चये सति सामान्याकारेण तत्संदेहस्य तद्विशेषेतरविशेषविषयत्वनियमात्। अन्यथैतत्पर्वतत्वेन वह्निमत्तया निश्चये २ पि पर्वते पर्वतत्वेन तत्संदेहापत्या तत्र वह्न्यर्थिनो निष्कम्पप्रवृत्तिर्न स्यात्।।
नापि पक्ष एव संदेहरूपा साध्याप्रसिद्धिः

पक्षत्वायोगादिति।। तथाच केवलव्यतिरेकिणोऽन्वयित्वमेव प्राप्तमिति भावः। संदेहसिषाधयिषयोरभावेनेत्ययुक्तमित्याशङ्क्य निराह -- न चेति।। यज्ञपत्युक्तमेव दोषमाह-- विशेषेति।। तद्विशेषेतरेति।। घटादिरूप ३ विशेषेतरपृथिवीविषयकत्वनियमादित्यर्थः। ज्ञानयोः

समानप्रकारकत्वेनैव निवर्त्यनिवर्तकभाव इति न्यायस्य सामान्यविशेषप्रकारान्यपरत्वमिति भावः।।
एवं मणिकृदभिमतं पक्षैकदेशसाध्यप्रसिद्धिपक्षं निरस्योदयनाद्यभिमतं मणावनूद्य निरस्तमपि मण्युक्तदोषे तव्याख्यातृणां विवादभावात्स्वयं दृढदोषविवक्षया संशयरूपसाध्यप्रसिद्धिपक्षमाशङ्क्य निराह-- नापीति।। जलादित्रयोदशपदार्थान्योन्याभावानामेकत्रप्रसिद्ध्या

१.कमस्तीति -क.ग.ट.रा. २.श्चितोपि -ट.रा. ३.'पृथिवी' इत्यधिकम् - ग.

केल-व्यति-भङ्गः) विभागवादः पु - १७९.

एवं च नान्वयित्वादिकम् पक्षैकदेशेपि साध्यानिश्चयात् नाप्यसाधारण्यम् सपक्षाभावात् नापि व्यतिरेकिवैयर्थ्यम् तस्य निश्चयार्थत्वादिति वाच्यम्। साध्यकोटेरप्रसिद्ध्या संदेहस्यैवायोगात्।।
न च तेजोभिन्ना पृथिवी जलादिद्वादशभिन्ना न वेति तेजोभिन्नधर्मिकजलादिद्वादशभिन्नत्वकोटिकसंशयेनार्थास्त्रयोदशाभिन्नत्वरूप साध्यप्रसिद्धिर्युक्तेति वाच्यम्। संशयस्यासार्वत्रिकत्वात्। संशयरूपसाध्यप्रसिद्धेर्मयापि स्वीताकाराच्च १ । शशीयकर्णादौ शशीयमिदं श्रृङ्गं न वेति संदेहेन शशश्रङ्गस्यापि प्रसिद्धिप्रसङ्गाच्च।

संदेरायोगोपि तेष्वभावेष्वेकस्तेजोन्योन्याभावो जले प्रसिद्धः, पृथिवी तेजोभिन्ना न वेति संशयेन पृथिव्यामेव वा प्रसिद्धः। जलादितेजोन्यद्वादशपदार्थान्योन्याभावास्तेजसि प्रसिद्धाः। एवं च तत्रैकं पक्षभूतधर्मिविशेषणं कृत्वान्यकोटिकसंशयोत्पादि किमपि न

बाधकमित्याशङ्क्य निराह -- न च तेजोभिन्नेति।। असार्वत्रिकत्वादिति।। तथा च यत्र न संदेहस्तत्राप्रसिद्धिर्दुर्वारोति भावः।। ननु संदिग्धे न्यायप्रवृत्तेः संशयः सार्वत्रिक इति चेत्। सिद्धेपि सिषाधयिषयानुमानप्रवृत्तेः। एवमपि २ त्वदुक्तरीत्या संशयस्य सात्मकत्वाद्यखण्डनसाध्ये ३ योगाच्च। घनघर्जितादिस्थले ४ संदेहाभावेप्यनुमितिदर्शनाच्चेति भावः।। मयापीति।। व्यतिरेकी नेति वदतापीत्यर्थः। यद्वा व्यतिरेकिणि साध्यप्रसिद्धिवादिनापीत्यर्थः। तथा च तादृशं प्रति निश्चयरूपसाध्यप्रसिद्धिरेव वाच्येति भावः।

१.कृतत्वाच्च -क.ट.रा. २.वंचत्व-ट. ३.वंत्व -ठ. ४.ध्येतदयो -ठ. ४.ले असंदेहे -ठ.

पु - १८०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

विशेषणनिश्चयजन्यविशिष्टनिश्चयरूपानुमित्यङ्गभूतायाः साध्यतावच्छेदकत्रयोदशाभिन्नत्वप्रकारिकाया निश्चयरूपप्रसिद्धेरभावाच्च।। न च तर्हि पक्षादन्यत्रैव त्रयोदशसु त्रयोदषभेदानां विशकलितानां निश्चयरूपा प्रसिद्धिरस्तीति नाप्रसद्धविशेषणत्वादीति वाच्यम्। जीवच्छरीरजातं सात्मकमित्यादावखण्डसाध्यक उक्तप्रकारासंभवात् १ । त्रयोधशसु साध्यप्रसिद्धौ तत्र साध्याभावस्यासत्वेन व्यतिरेकव्याप्तिग्रहासंभवाच्च।।

शशश्रङ्गस्यापीति।। भूतलं शशश्रङ्गवदित्यप्यनुमानं स्यादिति भावः।। साध्यतेति २ ।। साध्यतावच्छेदकं यस्त्रयोदशाभिन्नत्वं तत्प्रकारिकाया इत्यर्थः। अथवेत्यादिना मण्युक्तं पक्षान्तरमाशङ्क्य निराह -- न चतर्हीति।। त्रयोदशसु जलादिसमवायान्तेषु त्रयोदशस्वित्यर्थः।

विशकलितानामिति।। जले तेजःप्रभृतिद्वादेशान्योन्याभावाः प्रसिद्धाः। जलान्योन्याभावश्च तेजःप्रभृतिषु। तथा जलादिद्वादशान्योन्याभावस्तेजजसि। तेजोन्योन्याभावोन्यत्रेत्येवंरूपेणेत्यर्थः। यद्वा त्रयोदसपदार्थानामन्योन्याभावानां जलभेदस्तेजसि तेजोभेदो जले इत्येवंरूपेण प्रसिद्धिरित्यर्थः। आदिपदेन व्याप्य्यग्रहादिग्रहः।। तत्र साध्याभावस्यासत्वेनेति।।

१.'शशश्रङ्गोल्लिखितावपीत्यादावपि विशकलितानां शशादीनां प्रसिद्धत्वाच्च' -
इत्यधिकम्-ग. 'शशशृङ्गोल्लिखिता भूरित्यादावपि विशकलितानां प्रसिद्धेः सुवचत्वात्' इत्यस्ति -ट. २. साध्यतेति इति न -ट.ठ.

केल-व्यति-भङ्गः) विभागवादः पु - १८१.

किंचैकेनैव लिङ्गेनैकदा साध्यमाना अपि १ त्रयोदशभेदाः प्रत्येकनिरूपितत्रयोगशव्याप्तिभिरेव साधनीयाः। न तु मिलितनिरूपितैकव्याप्त्या। मिलिताप्रसिद्धौ तदज्ञानम्।

यत्र त्रयोदशानामन्योन्याभावनामभावस्तत्र पृथिवीत्वाभाव इति हि व्यतिरेकव्याप्तिर्जलादौ प्रदर्शनीया। तत्र जले जलान्योन्याभावाभावस्य सत्वेति तेजःपृभृतिप्रतियोगिकानां द्वादशभेदानामभावस्यासत्वेन साध्याभावस्याभावात्। एवं तेजःप्रभृथिष्वपीति कतं व्यतिरेकव्याप्तिग्रह इत्यर्थः।।
नन्वेकसत्वेपि द्वयमिह नास्तीति प्रतीत्या द्वित्वावच्छिन्नप्रतियोगिताकाभाववस्त्रयोदशत्वावच्छिन्नजलद्यन्योन्याभावनिष ठप्रतियोगिताकाभावो जलादौ भविष्यतीति नानुपपत्तिरित चेन्न।

व्यासज्यधर्मावच्छिन्नप्रतियोगिताकाभावस्य व्याप्तिवादे मणिकृता निरासेन मणिकृन्मते तदभावात्। प्रतीतेरन्यतराभावविषयत्वेनोपपत्तावतिरिक्ताभावकल्पनायोगाच्च।।
ननु -- यन्मते तादृशाभावस्वीकारस्तन्मतरीत्यायं पक्षे मणवुक्त इति चेन्न। तन्मतस्यैव गौरवेण दूष्यत्वादिति भावः। अभ्युपेत्यापि -- दोषमाह -- किंचेति।। प्रत्येकप्रतियोगिकाभावनिरूपितेत्यर्थः। व्यतिरेकिण्यन्वयव्याप्तेरभावात् मिलितनिरूपितेति। यत्र त्रयोदशान्योन्याभावानामभावस्तत्र पृथिवीत्वाभाव इत्येवं रूपेण मिलितप्रतियोगिकाभावनिरूपितैकव्याप्त्येत्यर्थः।। तदज्ञानादिति।। मिलिताप्रसिद्धौ मिलितप्रतियोगिकाभावव्याप्त्यज्ञानादित्यर्थः।

१. पिहित्र - त.ट.रा.

पु - १८२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

तथा च प्रत्येकमेव साध्यता विश्रान्तेत्येकैकभेदरूपसाध्यवतो जलादेरेव सपक्षत्वेन ततो व्यावृत्तत्वेन १ हेतोरसाधारण्यतादवस्थ्यम्।।
ननु -- प्रत्येकव्याप्य्या प्रत्येकभेदसाधनेपि नासाधारण्यम्। अनुमितिविषयसाध्यवव्द्यावृत्या हि तद्भवति। अन्यथा दूष्यानुमित्यविरोधित्वेनासाधारण्यस्य प्रतिपक्षोन्नायकत्वं न स्यात्। न च प्रकृतेऽनुमितिविषय २ मिलितभेदरूपसाध्यवानन्योस्ति। येन तव्द्यावृत्याऽसाधारण्यं स्यादिति चेन्न। ३ प्रत्येकभेदवव्द्यावृत्तेरप स्वसाधितप्रत्येकभेदाभावद्वारेण भेदमेलनविघटकतया दूष्यानुमितिविरुद्धत्वात्।।

यद्वा व्यतिरेकव्याप्तिरेतादृशस्थले न वाच्या। किं त्वन्वयव्याप्तिरेव। न च मिलितसाध्याप्रसिद्ध्या तन्निरूपितैकव्याप्त्यज्ञानमिति वाच्यम्। प्रत्येकाभावानां प्रत्येकनिरूपितान्वयव्याप्तिभिरेव तावतां भेदानां साध्यत्वादिति भावेनायं ग्रन्थः पृत्त इति यथान्यास एव ग्रन्थः साधुरिति ४ ज्ञेयम्।।
पक्षधरमतमाशङ्कते -- नन्विति।। अन्यथेति।। अनुमितिविषयैकदेशवव्द्यावृत्तिमात्रेण ५
साधारण्येऽनुमितिविषयाभावविषयकत्वात्सत्प्रतिपक्षतया दोषत्वं न स्यादित्यर्थः। अनुमितिविषयवतो व्यावृत्तत्वमेव पृथिवीत्वहेतोरस्त्वित्यत आह-- न च प्रकृत इति।।
नरहर्याद्युक्तदोषेण निराह -- प्रत्येकेति।। साध्यतावच्छेदकं व्यासज्यवृत्तिधर्ममादायासाधारण्याभावमाशङ्क्याप्रसिद्धविशेषणत्वेन निराह -- अथेत्यादिना ।।

१.त्तस्य हे - ग.ट.रा. २.यभे -ग.ट. ३.'प्रत्यक्षभेदवचनप्रवृत्तेरपि स्वसा' इत्यस्ति -ग.रा. ४.ध्येयम् -ड. ५.णासा -ठ.ड.

कल-व्यति-भङ्गः) विभागवादः पु - १८३.

किंचास्मिन्पक्षे भेदमेलनं पक्षधर्मताबललभ्यमम्। न च तद्बललभ्यसाध्यवव्द्यावृत्याऽसाधारण्यं युक्तम्। तथात्वेऽनुमानफलस्य निष्पन्नतया १
साधारण्यस्याकिंचित्करत्वापातात्।।
अथ -- साध्यतावच्छेदकावच्छिन्नसाध्यवद्व्यावृत्यैवासाधारण्यम्। प्रकृते च साध्यतावच्छेदकं भदगतं व्यासज्यवृत्तित्रयोदशत्वम्। तच्च न प्रत्येक २ परिसमाप्तम्। ततः प्रत्येकभेदवद्व्यावृत्तावपि सानाधारण्यमिति चेन्न।

एवमसाधारण्यपरिहारेपि
त्रयोदशत्वपर्याप्त्यधिकरणत्वरूपसाध्यतावच्छेदकावच्छिन्नसाध्याप्रसिद्धेरप्रसिद्धविशेषणत्वतादवस्थ्यात्। जलादौ स्वस्माद्भेदाभावेपि तेज आदिद्वादशभेदानां सत्वेन त्रयोदशभेदाभावरूपसाध्यव्यतिरेकगाभावेन व्यतिरेकव्याप्तिग्रहानुपपत्तेश्च।।
ननु घटस्य सत्वेपिपटाभावेन घटपटौ न स्त इतिवज्जले द्वादशभेदेषु सत्स्वपि जलाद्भेदाभावेन व्यासज्यवृत्तिप्रतियोगिताकत्रयोदशभेदाभावोस्तीति चेन्न।

व्यासज्यवृत्तिप्रतियोगिकाभावोन्यो नेत्युपेत्य व्याप्त्यभावदोषं चाह -- जलादाविति।।
व्यासज्यवृत्तिधर्मावच्छिन्नप्रतोयोगिताकाभावोऽन्योस्तीतिवादी शङ्कते -- नन्विति।। व्यासज्येति।।

१.तया अ- ट. २. पर्याप्तमिति शोधितमस्ति -ट.

पु - १८४. न्यायदीपयुततर्कताण्डवम् (तृ.परिचछेदः

पृथिव्या जलात्मकत्वे सत्यपि तेज आद्यनात्मकत्वमात्रेण त्रयोदशान्योन्याभावोपपत्त्यार्थान्तरात्। लघवेन प्रतियोगिसत्वमात्रमभावविरोधी १ ति वदता त्वयैव व्यासज्यवृत्ति २ प्रतियोगिकाभावानङ्गीकाराच्च। घटे सत्यपि घटपटौ नस्त इति धीस्तु घटे पटसाहित्याभावविषयेति त्वयेवैक्तम्।।
तस्मादप्रसद्धविशेषणत्वांशे ३ सिद्धसाधनत्वा ४ न्वयित्वासाधारण्यानामन्यतरद्दुर्वारम्।।

व्यासज्यवृत्तिः अनुगतवृत्तिमान्यः तादृशधर्मावच्छिन्ना प्रतियोगिता यस्य तादृशो यस्त्रयोदशभेदानामभाव इत्यर्थः।। जलात्मकत्वे सत्यपीति।। पृथिव्यां जलादित्रोयदशपदार्थतादात्म्याभावरूपास्त्रयोदशाभेदाः साध्यन्ते तत्सिद्धिर्न स्यात्। जलतादात्म्ये सत्यपि तेजः प्रभृतिद्वादशपदार्थतादात्म्यानामभावमात्रेण त्रयोदशत्वरूपव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्रयोदशतादात्यम्यानाम भावसिद्ध्यापि साध्यपर्यवसानसंभवेन जलभेदासिद्ध्याऽर्थान्तरदोषः स्यात्। अतो न तादृशोऽभावोऽङ्गीकर्तुं शक्य इति प्रागुक्तव्याप्तिग्रहानुपपत्तिः सुस्थेति भावः। किंच प्रतयोगिसत्वस्थले तादृशाभावो विरोधान्नाङ्गीकार्यः। न च यावत्प्रतियोगिसत्वमभावविरोधि, नत्वेकप्रतियोगिसत्वं, व्यासज्यवृत्तिस्थले चैकप्रतियोगिसत्वमेवेति वाच्यम्। तस्य गुरुत्वादिति भावेनाह -- लाघवेनेति।। इति वदतेति।। व्याप्तिवादे । त्वया मणिकृता।। अन्यतरदिति।।

१.घटे सत्यपि घटपटौ नस्त इति धीस्तु घटपटसाहित्यभाव विषयेति वदतात्वयैव व्यासज्यप्रतियोगिताकाभावानङ्गीकाराच्च तस्मादप्र इत्यस्तु -ग.रा.क. २.धर्मेत्यधिकम्- क. ३.शसि -ग.रा. ४.अन्वयित्वेति नास्ति -ग.ट.रा.

केल-व्यति-भङ्गः) विभागवादः पु - १८५.

न चासाधारण्यस्य सत्प्रतिपक्षवद्विपक्षे बाधकाभावदशायामेव दोषत्वात्प्रकृते च विपक्षे बाधकस्य सत्वा १ त्तस्यादोषत्वमिति वाच्यम्। तथापि सपक्ष २ सत्वेनाविद्यमानसपक्षत्वरूपकेवलव्यतिरेकित्वभङ्गात्।। एतेन जलत्वादित्रयोदशध्मसंसर्गात्यन्ताभावाः साध्याः। ते च पक्षैकदेशे घटादौ मिलिता वा पक्षादन्यत्र

विशकलिता वा घटादौ जलत्वं ३ नेत्यादिप्रत्यक्षेण सिद्धा इति निस्तम्। उक्तरीत्यान्वयित्वासाधारण्यान्यतरापत्तेर्दुर्वारत्वात्।।

यद्यप्यन्यतममित वक्तव्यम्। द्वयोरेवं डतरयो विधानात्। अन्यतरान्यतमशब्दयोखण्डत्वेपि द्विबहुविषयत्वेन व्यवस्थितत्वस्य पस्पशाह्निके
कैय्यटेऽभिधानात्। तथापि त्रयाणां मध्ये द्वयमे ४ कीकृत्य द्वित्वसंपादनेनान्यतरदिति साध्विति ध्येयम्।।
असाधारण्यदोषोद्धारमाशङ्क्य दोषान्तरमाह-- न चेति।। प्रकृते चेति ५ ।। इतरभेदसाध्यकपृथिवीत्वहेतौ हेतूच्छित्यादिविपक्षबाधकस्येत्यर्थः।। सपक्षस्येति।। प्रत्येकं त्रयोदशाभावानां साध्यत्वेनाभिमतानां जलादित्रयोदशसु प्रसिद्धत्वेन तेषामेव सपक्षत्वादिति भावः। योपि मणावन्योत्वित्यादिना तत्तदसाधारणधर्मात्यन्ताभावाः साध्या इत्यन्ताभावसाध्यकपक्ष उक्तः तमपि निराह -- एतेनेति। सिद्धा इति।। अतोनाप्रसिद्धविशेषणत्वमिति भावः।। उक्तरीत्येति।।

१.त्वान्न तस्य दोषत्वभि-क.ग.ट.रा. २.क्षस्य स -ट.रा. ३.त्वादि-ट. ४.मेकराशी -ठ.ड. ५.प्रकृते चेति इति न -ठ.

पु - १८६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

ननु तर्हि जलं १ तेजःप्रभृतिद्वादशभिन्ननिष्ठभेदप्रतयोगि द्रव्यत्वात्तेजोवदित्यनुमानेन वा व्याघातदण्डभयेन वा सामान्यतः २ प्रसिद्धं त्रयोदशभिन्नत्वं पृथिव्यां साध्यते। ततो नान्वयित्वसाधारण्यं वा।

'पक्षैकदेशस्य
घटातेर्निश्चितसाध्यकतयाऽन्वलयदृष्टान्तत्वसंभवेने'त्यादिनोक्तरीत्यान्वयित्वस्य, तथा 'किंचैकेनैव लिङ्गेने'त्यादिनोक्तरीत्यासाधारण्यस्य ३ चेत्यर्थः। प्रत्येकमेवात्यन्ताभावानां साध्यत्वात्तेषां च प्रत्येकं जलादावेव प्रसिद्धेस्तत्र च हेतोरवृत्तेः। अनुमितिविषयसाध्यवद्व्यावृत्त्याह्यसाधारण्यमिति जयदेवपक्षस्य च निरासादिति भावः। यदपि मणौ 'यद्वा जलं तेजः प्रभृतिद्वादशभिन्नप्रतियोगिकान्योन्याभाववदित्या'दिना सामान्यतः ४ प्रसद्धिसंपादकमनुमुक्तम् तदप्याशङ्क्य निराह -- ननु तर्हीत्यादिना।।
यद्यपि मणावन्यथैव साध्यनिर्देषः कृतः तथापि तत्र यथाश्रुते तेजःप्रभृतिद्वादशनिरूपितभेदाधिकरणे जलभेदासिद्ध्या सिषाधयिषितत्रयोदशपदार्थनिरूपितभेदानामेकत्राप्रसिद्धे(द्धि)रेव।
अतस्तद्व्याख्यातृभिर्व्यत्यासेन योजितस्य साध्यनिर्देशस्यायमनुवाद इत्यदोषः। तेजःप्रभृतयो ये द्वादशपदार्थास्तद्विभिन्नं यद्वस्तु तन्निष्ठो यो भेदस्तत्प्रतियोगीति साध्यार्थः। तथा च जलभेदस्तेजःप्रभृतिद्वादशपदार्थभेदाश्चैकत्रैव सामान्यतः सिद्धा इति अनुमानेन वा सिद्धं त्रयोदशभिन्नत्वमित्यन्वयः। प्रामाण्यवादे प्रामाण्यानुमितिसिद्ध्यर्थं प्रामाण्यप्रसिद्धिसंपादकतया मण्याद्युक्तं तुल्यन्यायत्वादिहाप्याशङ्कते -- व्याघातेति।। साध्याप्रसिद्धौ त्रयोदशान्योन्याभावरूपसाध्यं न प्रसिद्धमितिनिषेधायोगेन निषेधता पुरुषेण साध्यं सामान्यतोऽवगतमेवेति न प्रसिद्धमित्युक्ताविदं नाभिधेयमित्युक्तिवद्व्याघातरूपदण्डभयेनेत्यर्थः।

१. लेते -ट.रा. २.तः सि-ग.ट.रा. ३.स्येत्यर्थः-ठ. ४.न्य प्र -ट.ड.

सांमुग्ध्येन साध्यप्रसिद्धावपि पक्षो वा पक्षादन्यो वायं साध्यवानिति व्यक्तिविशेष १ निश्चयाभावादिति चेन्न।
व्यक्तिविशेषानिश्चयेपि व्यतिरेकिप्रवृत्तेः प्रा २ क्कश्चित्साध्यवानिति निश्चये तस्यैव सपक्षत्वेन व्यतिरेकित्वभङ्गात्। अन्यथोपाधि ३ ना क्वचिद्व्याप्तिभङ्ग इति निश्चयेपि अत्रेति व्याप्तिभङ्गस्थलविशेषस्यानिश्चयात् सोपाधिकोपि सद्धेतुः स्यात्।।
अथ -- यदनङ्गीकारेऽनिष्टप्रसक्तिः तत्प्रामाणिकमिति नियमात् प्रकृतसाध्यानङ्गीकारे चानिष्टप्रसक्तेः सत्वात् साध्यस्य सामान्येन प्रामाणिकत्वे सिद्दे प्रमाणविशेषजिज्ञासायां व्यतिरेक्युपन्यास इति नकोपि दोष इति चेन्न।

कथं नान्वयित्वादिकमित्यतो मण्युक्तरीत्यैव व्यनक्ति-- सांमुग्धेनेति।। अयं पृथिव्यादिरित्यर्थः। अन्वयित्वासाधारण्ययोरभावेपि यदसपक्षत्वं व्यतिरेक्यनुमानस्य लक्षणमुक्तं तद्भग्नमित्याह -- व्यक्तिविशेषेति।। अनिष्टप्रसक्तेरिति।। जलादिवैधर्म्यगन्धाद्युपलम्भहानिरूपानिष्टप्रसक्तेरिति, पृथिवीरूपवस्तुहानिरूपानिष्टप्रसक्तेरिति वार्थः।।
एवं मण्याद्युक्तसाध्यप्रसिद्धिप्रकारं अनृसृत्य व्यतिरेक्यनुमानं निरस्येदानीं व्यतिरेकव्याप्तेः प्रकृतसाध्यसिद्धौ अनुपयोगा 'न्न हि भावेन भावसाधने अभावेनाभावस्य व्याप्तिरूपयुज्यते' इत्यादि पद्धत्या--

१.षानिश्चयादि-ग.ट.रा. २.क्वचि-ट.रा. ३.धेर्न -ट.

प्रामाणिकत्वेनैवार्थे १ निश्चिते प्रमाणविशेषजिज्ञासायाः विशेषगतविशेषजिज्ञासाया इव वैयर्थ्यात्। प्रमाणसामान्येन साधअयवत्तया निश्चितस्यापि सपक्षत्वेन केवलव्यतिरेकित्वभङ्गाच्च।।
तस्मान्न व्यतिरेक्यनुमानं युक्तमअ। किंचाभावगतया व्यतिरेकव्याप्त्या कथं भावस्य गमकत्वमअ।।
ननु गमकत्वेऽन्वयव्यतिरेकव्याप्त्यनुगतं व्याप्तित्वमेव तन्त्रम्। नत्वन्वयव्याप्तित्वम्। गौरवात् इति चेन्न। तथात्वे धूमगतया वह्निव्याप्त्या कृतकत्वस्यानित्यत्वगमकत्वापत्या स्वनिष्ठव्याप्तित्वं तन्त्रमिति वक्तव्यत्वेनाभावनिष्ठव्याप्त्या भावस्य गमकत्वायोगात्।।
नन्वन्विनि स्वनिष्ठा व्याप्तिस्तन्त्रम्। व्यतिरेकिणि त्वभावगता। न चातिप्रसङ्गः। प्रतियोग्यनुयोगिभावस्य नियामकत्वादिति चेन्न। व्याप्यं लिङ्गमिति लिङ्गलक्षणस्य व्यतिरेकिण्य २ व्याप्त्यापातात्।।

-द्यु २ क्तं हृदिकृत्वा प्रकान्तरेण व्यतिरेकिणं निराह -- किं चाभावगतयेति।। न चातिप्रसङ्ग इति।। धूमनिष्ठया व्याप्त्या कृतकत्वस्यानित्यत्वगमकत्वप्रसङ्ग इत्यर्थः।। प्रतियोगीति।। व्याप्यव्यापकभावापन्नाभावयोर्हेतुसाध्ययोश्च
प्रतियोग्यनुयोगिभावस्येत्यर्थः।। व्यतिरेकिणीति।।

१.निश्चिते इति नास्ति -ग.ट.रा. २.ण्यप्यव्या -ग. ३. द्युक्तिं -ठ.ड.

केल-व्यति-भङ्गः) विभागवादः पु - १८९.

१ न च स्वनिरूपितव्याभिचारविरोधित्वरूपं वा स्वनिरूपितव्यभिचारधीप्रतिबन्धकधीविषयत्वरूपं वा व्याप्तिमत्वमुभयानुगतमिति वाच्यमअ। स्वनिरूपितव्याप्त्यपेक्षयाऽस्य

गुरुत्वात्। २ एतदज्ञानेप्यनुमित्युत्पत्तेरनुभवा ३ च्च। साध्यसाधनसामानाधिकरण्यगर्भितत्वेन त्वन्मतेऽस्य व्याप्तित्वायोगाच्च।। किंच व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपलिङ्गपरामर्शोऽनुमितिमात्रे हेतुः। व्यतिरेकिणि ४ च स न युक्तः। व्याप्तिपक्षधर्मतयोर्वैयधिकरण्यात्।।

कैवलव्यतिरेकि ५ साध्यपृथिवीत्वादिहेतावित्यर्थः। ६ साध्याभावस्यैपवव्याप्यत्वाद्धेतुत्वेनाभिमतपृथिवीत्वादेरव्याप्यत्वादिति भावः। व्याप्तिद्वयस्याप्यनुगमकमाशङ्क्य निराह -- न च स्वेति।। व्यतिरेकोन्वयश्य स्वशब्दार्थः। व्यतिरेकनिरूपितो व्यभिचारो हेत्वभाववति साध्यासत्वं तद्विरोधित्व व्यतिरेकव्याप्तेरस्तीति स्वनिरूपितव्यभिचारविरोधित्वमुभयव्याप्तेरस्तिः। एवं धीपक्षेपीत्यनुगतव्याप्तिज्ञानरूपं करणमुभयत्रास्तीति तद्विशिष्टपरामर्शो व्यतिरेकिण्यपि युक्त इति भावः। त्वन्मत इति। सामानाधिकरण्यगर्भितव्याप्तिवादिनो मत इत्यर्थः।

१.'किं च व्याप्तित्वविशिष्टपक्षधर्मताज्ञानरूपलिङ्गपरामर्शो अनुमितिमात्रहेतुः। व्यतिरेकिणि च सन युक्तः। व्याप्तिपक्षधर्मतयोर्वैयधिकरण्यात्। इत्यधिकम् - ग.ट.रा. २.स्वनिरूपितेत्यादि नास्ति- ग.ट.रा. ३.च इति नास्ति -ग.ट.रा. ४. णि साध्याभावव्याप्तिपक्षधर्मतयो -क. ५.किणीतरचेदसा -ठ. ६. तत्रेत्यधिकम् -ठ.ड.

१ न चान्वयिनि लिङ्गपरामर्शो व्यतिरेकिणि साध्याभावव्यापकाभावप्रतियोगित्वज्ञानं अनुमितिमात्रे तु पक्षधर्मताधी २ र्हेतुरिति वाच्यम्। ३ तृणारणिमणिजन्यवह्निष्विव लिङ्गपरामर्शादिरूपोक्तकारणद्वयजन्यानुमितिष्ववान्तरविशेषस्याननुभवात्। तत्कल्पनस्य ४ चान्योन्याश्रयेण योग्यानुपलब्धि ५ चायुक्तत्वात्।।

अवान्तरवैजात्यस्येति।। तदवश्यङ्गीकर्तव्यम्। अन्यथा सामग्रीद्वयस्य परस्परव्यतिरेकव्यभिचारेणानमितिं प्रति हेतुत्वासिद्ध्यापातात्तृणारणिमणिजन्यवह्निष्वपि वह्नित्वव्याप्यतत्तज्जन्य ६ तावच्छेदकावान्तरजातिर्नोपेया स्यात्। नचासौ जातिरनुभूयते। अतो नैवं कल्पना युक्तेति भावः। तृणारणिमणिजन्यवह्निष्ववेति पररीत्या व्यतिरेकदृष्टान्तः। तत्राप्यवान्तरजातेर्द्वितीयपरिच्छेदे निरासात्। स्वमतेनान्वयदृष्टान्त एवायमित्यन्ये। अननुभूयमानापि सामग्रीवैजात्यात्कल्पनं सामग्रीद्वयसिद्धौ वैजात्यकल्पनमित्यन्योन्याश्रयेणेत्यर्थः। व्यतिरेकिणि त्वदुक्तगमकत्वस्याद्याप्यसिद्धेरिति भावः।।
ननु व्यतिरेकिणोपि शास्त्रे तत्रतत्र संव्यवहारात्तदन्यथानुपपत्या व्यतिरेकव्यप्तेरप्यनुमितिसामग्रीत्वं क्लृप्तमिति चेन्न। परंपरयैवानुमित्युपयोगाभिप्रायेण ७ तत्संव्यवहार इति भावेन साक्षादुपयोगं निराह -- किंचेति।।

१.किंचेत्यादिग्रन्थो नास्ति- ग.ट.रा. २.धी पदं न -ग.रा. ३.तरणिमणि इत्यस्ति -ग. ४.च इति न -ग.ट.रा. ५.मात्रेणेत्यधिकम् -ट. ६.न्यव्यप्यता -ड. ७.णेति भावेन सा -ठ.

किंच व्यतिरेकव्याप्तेः साक्षाद्गमकत्वे व्यर्थविशेषणत्वस्य त्वदभिमतं व्याप्तिज्ञज्ञानप्रतिबन्धद्वाराऽनुमितिप्रतिबन्धकत्वं न स्यात्। वैयर्थ्येनान्वयव्याप्तिविघटनेपि व्यतिरेकस्याखण्डाभावतया वैयर्थ्याभावेन व्यतिरेकव्याप्त्यविघटनात्।।
अपि चैवं विरुद्धस्य साध्यव्यापकाभावप्रतियोगित्वं दूषकताबीजमिति त्वदभिमतं न सिध्येत्। तथाहि -- उक्तप्रतियोगित्वस्य ज्ञानं किमव्यभिचारज्ञानप्रतिबन्धद्वाराऽनुमितिप्रतिबन्धकम्। किं वा सहचारज्ञानप्रतिबन्धद्वारा। नाद्यः। विरुद्धस्य साधारणान्तर्भावापातात्।

गगमकत्वेऽनुमितिजनकत्व इत्यर्थः।। व्यर्थविशेषणत्वस्येति।। पर्वतोग्निमान्नीलधूमवत्वादित्यादौ व्यर्थविशेषणत्वस्य वह्निनिरूपितधूमनिष्ठव्याप्तिज्ञानप्रतिबन्धद्वाराऽनुमितिप्रतिबन्धेनानुमितिः स्यादेव। नीलधूमरूपविशिष्टाभावस्य व्यापकत्वे व्यर्थविशेषणत्वाभावात्। अभावस्याखण्डत्वादित्यर्थः।।
ननु १ व्यतिरेकव्याप्तिः केवलव्यतिरेकिण्येव साक्षाद्गमिका। अन्यत्र तु व्यभिचारज्ञाननिवृत्तिद्वारोपयुज्यते न साक्षादिति वदन्तं प्रत्याह-- अपि चेति।। एवमिति।। व्यतिरेकव्याप्तेः साक्षाद्गमकत्व इत्यर्थः।। त्वदभिमतमिति।। हेत्वाभावसग्रन्थे तथैवोक्तेरिति भावः। किमव्यभिचारेति।। बाधप्रतिपक्षौ हि ग्राह्याभावावगाहितया साक्षादनुमतिप्रतिबन्धकौ।
विरुद्धसिद्धव्यभिचारस्त्रयोऽनुमितिकरणपरामर्शविघटकत्वेनानुमितिप्रतिबन्धकाः।

१. नु केवल - ड.

न द्वितीयः। सकलसाध्यवति हेत्वभावज्ञानस्यान्वयसहचारज्ञानविघटकत्वेपिव्यतिरेकसहचारज्ञानविघटकस्य सकलसाध्याभाववति साधनमितिज्ञानस्याभावेन तदविघटनात्।।
तस्मान्न व्यतिरेक्यनुमानं युक्तम्।।
परीक्षकाणां व्यतिरेकव्याप्त्युपन्यासस्तु - यथोपाधिसिद्धिसाध्यसाधनवैकल्यादेरनुमानदूषकव्यभिचारादिसाधन १ तयोपन्यासो न तु साक्षद्दूषकतया।

परामर्शविघटकत्वं २ च तद्विषयाभाववविषयकत्वेन। तद्विषयश्च व्याप्तिः पक्षधर्मता चेति द्वयम्। तत्रासिद्धिः पक्षधर्मताविरोधित्वेन। अन्यद्द्वयं व्याप्तिविरोधित्वेन।
व्याप्तिश्चाव्यभिचारः सहचारश्चेति दलद्वयम्। तत्र विरुद्धस्थले साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानं
किमव्यभिचारज्ञानप्रतिबन्धद्वाराथसहचारज्ञानप्रतिबन्धद्वारेत्यर्थः।।
साधारणेति।। साधारणानेकान्तिकेत्यर्थः। विरुद्धत्वज्ञानस्येत्यस्य विवरणेन निर्देषः -- सकलसाध्यवति हेत्वभावज्ञानस्येति।। अन्वयसहचारेति।। हेतौ साध्यसामानाधिकरण्यरूपसहचारेत्यर्थः। तदविघटनादिति।। तथाच तत्र व्यतिरेकसहचारप्रतिबन्धेनाव्यभिचारज्ञानसंभवेनानुमितिः स्यादेवेति भावः। कथं तर्हि शास्त्रे तदुपन्यासस्ततत्र क्रियत इत्यत आह -- परीक्षकाणामिति।। ३ उपाधिश्च सिद्धसाधनं च साध्यवैकल्य च तदादेरित्यर्थः।

१.कतया-क.ग.ट.रा. २.कंच -ट.ठ. ३.व्याप्तीति व्यतिरेक्याप्तीत्यर्थः। इत्यधिकम् -ट.ठ.

केल-व्यति-भङ्गः) विभागवादः पु - १९३.

यथा वा दृष्टान्तस्यानुमानाङ्गव्याप्तिप्रदर्शकतयोपन्यासः न तु साक्षादङ्गतया। तथानुमानाङ्गान्वयव्याप्तिसाधकतया न तु साक्षादङ्गतयेति द्रष्टव्यम्।।
यद्यप्यन्वयव्यतिरेकिणि व्यतिरेकव्याप्तिर्नान्वयव्याप्तिसाधिका। तत्रान्वयव्याप्तेरन्यत एव सिद्धेः। तथापि स्पष्टव्यभिचारेप्यनुमाने उपाधिवन्मूकीभूता वा अन्वयव्याप्तेरेव व्यभिचारशङ्कां निराकुर्वन्ती वावतिष्ठते१।।
यत्तु सुधायां व्यतिरेकिनानुमानं पञ्चरूपतावैधुर्यादित्येतत्परिशेषादिरूपानुमानेष्वनैकान्तिकमिति व्यतिरेकिणस्तटस्थाशङ्कितानुमानत्वनिराकरणं तदप्रसिद्धविशेषणत्वस्य दोषत्वे व्यतिरेकिप्रमाणं न स्यादिति परंप्रत्यापादनस्य तत्र प्रस्तु-

व्यभिचारादीत्यदिपदेन सिद्धसाधनमाश्रयासिद्धेसाधकतया साध्यवैकल्यं व्याप्यत्वासिद्धिसाधकतयेत्येवं ग्राह्यम्। एवं हि धूमादावन्वयव्यतिरेकिणि व्यतिरेकोपन्यासो व्यर्थ इति शङ्कामनूद्यान्वयव्यतिरेकिणि तु व्यतिरेकव्याप्तिरनुपयुक्तैवेत्यादिपद्धतिवाक्यं हृदि कृत्वा परिहारमाह -- यद्यपीति।। भक्तिपादीयसुधाविरोधमाशङ्क्य २ त्रिधा तात्पर्योक्त्या निराह -- यात्विति ३ ।।
इति केवलव्यतिरेकिभङ्गः।। २० ।।

१.तिष्ठति -ग.ट.रा. २.त्रेधा -ट.ठ.ड. ३.यत्विति इतिस्यात्.

पु - १९४. न्यायदीपयुतर्कताण्डवम् (तृ.परिच्छेदः

-तत्वात्पररीतिमाश्रित्य वा १ व्यतिरेकिव्याप्तिसाधकतयोपयुज्यत इत्यभिप्रेत्य वा, पञ्चरूपतावैधुर्यादननुमानत्वं न किं तु व्याप्तिपक्षधर्मतयोवैयधिकरण्यादेवेत्यभिप्रेत्य वेति द्रष्टव्यम्।।
अन्यथा व्यतिरेकव्याप्तिरनुमानाङ्गत्वादित्यादितद्वाक्यविरोधात्। तस्माद्व्याप्तेर्द्वैविध्यमनुमानस्य त्रैविध्यं चायुक्त २ मिति।।
इ ति केवलव्यतिरेकिभङ्गः ।। १९ ।।

१.अन्वय इति शोधितमस्ति -ट. २.इति इति नास्ति -ग.रा.

२३-६-२००१.
पु - १९४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

अथ पञ्चावयवादिनियमभङ्गः ।। २० ।।
पुनरप्यनुमानं द्विविधम्। सार्थं परार्थं च १ । तत्र परोपदेशानपक्षं स्वार्थम्। तत्सापेक्षं परार्थम्।

अथ पञ्चावयवादिनियमभङ्गः ।। २१ ।।
पुनरनुमानं द्विविधम् सार्थं परार्थं चेत्यादिना पद्धत्युक्तं विवृण्वान आह -- पुनरिति।। प्रागुक्तविभागापेक्षया पुनःशब्दः। व्याप्तिविशिष्टलिङ्गज्ञानरूपमनुमानमित्यर्थः। तत्र तयोर्मध्ये। परोपदेशं वह्निव्याप्यधूमवानयमित्यादिरूपपरकृतोपदेशं नापेक्षत इति परोपदेशानपेक्षम्। व्याप्तिविशिष्टलिङ्गज्ञानमिति विशेष्यं अत्रोत्तरत्र च योज्यम्।

१. चेति -ट.रा.

पञ्चा-ववनि-भङ्गः) विभागवादः पु - १९५.

ससामर्थ्यलिङ्गपतिपादकवाक्यात्मकः परोपदेशोपि परार्थानुमानमित्युपचर्यत इतिस्थिते तस्य परोपदेशस्य जिज्ञासासंशयशक्य १ प्राप्तिप्रयोजनसंशयनिरासप्रतिज्ञाहोतूदाहरणोपनयता २ नीति दशावयवा इति जरन्नैयायिकाः। प्रतिज्ञादयो ४ दाहरणादयो वा त्रय ५ इति मीमांसकाः। उदाहरणोपनयौ द्वावेवेति ६ सौगताः।।

परोपदेशस्वरूपस्य पद्धतावनुक्तेः 'अनुमा युक्तिरेवोक्तेति' युक्तिपादीयानुव्याख्यानसुधोक्तमाह -- ससामर्थ्येति।। व्याप्तिसमुचितदेशवृत्तित्वरूपसामर्थ्यसहितम्। यद्वा व्याप्तिरेव सामर्थ्यम्। तत्सहितं यल्लिङ्कं धूमादि तत्प्रतिपत्तिजनकं वाक्यं परोपदेश इत्यर्थः। स च वह्निव्याप्यधूमवनायमित्यादिरूपः। वाक्यमात्रस्य परोपदेशतानिवृत्तये प्रतिपादकेत्यन्तोक्तिः।
ससामर्थ्यलिङ्गप्रतिपत्तिसामान्यकारणाद्दृष्टमनःसंयोगादिष्वतिव्याप्तिवारणाय वाक्यात्मक इत्युक्तिः। धूमोस्तीति वाक्येऽतिव्याप्तिनिरासाय ७ सामर्थ्येति। पद्धतौ 'तज्जनकत्वात्परोपदेशोपि परार्थानुमानमिति क्वचिदुपचर्यते' इत्युक्तेराह -- परार्थेति।. इत्युपचर्यत इत्यर्थः।।
यत्तु -- ससामर्थ्यलिङ्गप्रतिपादकवाक्यं न परोपदेशः तस्मिन्नेव वाक्येऽतिव्याप्तेरिति तन्न। ससामर्थ्यलिङ्गप्रतिपादकं वाक्यमिति -

१.शक्त्य - रा. २.य निगमनानीति- क.ग.ट.रा. ३.का आहुः - क.ग.ट.रा. ४. वा -क.टरा. ५. य एवेति -ट. ६.द्वाविति -ग.ट.रा. ७.ससा -ट.ड.

पु - १९६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

तन्न। आद्यपञ्चकस्याशब्दात्मकतया वाक्यावयवत्वस्यैवाभावात् उक्तनियमेषु हेत्वभावाच्च।।
ननु --
यावता व्याप्तिपक्षधर्मतादिविशिष्टलिङ्गधीस्तावदाकाङ्क्षाक्रमेणाभिधेयं अन्यथा न्यूनत्वापत्तेः। तत्र साध्यानुपस्थितौ हेत्वाकाङ्क्षैव नोदेतीति तदुपस्थित्यर्थं प्रतिज्ञा ।

-वाक्यस्य तादृशवर्णमालारूपवाक्यप्रतिपादकत्वेन तादृशलिङ्गाप्रतिपादकत्वात्। अन्यथा घटाभावज्ञानमपि
घटज्ञानं १ घटाभावव्यवहारोपि घटव्यवहारा इत्यापातात्। अन्यानवच्छेदेन घटावगाहि घटज्ञानमिति चेत् अन्यानवच्छेदेन तादृशलिङ्गप्रतिपादकं परोपदेशः। न चैवमितिप्रसङ्गोस्ति। अन्यथा छलोत्तरर्तवं स्यादिति भावः। आद्येति।। जिज्ञासा ज्ञातुमिच्छा वह्निमान्न वेत्यादिसंशयः प्राप्तुं योग्यता शक्यप्राप्तिः प्रयोजनं प्रसिद्धं वह्निमान्न वेत्यादिसंदहनिरास इत्येवंरूपाद्यपञ्चकस्येत्यर्थः।।
तत्र प्रतिज्ञादिस्वरूपं पक्षवचनं प्रतिज्ञा लिङ्गं हेतुरित्यादिना मिथ्यात्वानुमानखण्डनतट्टीकातद्भावप्रकाशिकासु प्रमाणपद्धत्यादौ च व्यक्तत्वात्तस्वरूपमनुक्त्वा पञ्चैवायवयवाः क्रमेणैव प्रयोज्याः न न्यूनाः, त्रय एव

प्रयोज्याः न न्यूनाः नाधिकाः, द्वावेव प्रयोज्यौ नत्वधिक इति वादिनां यो नियमपक्षस्तन्निरासे युक्तिपादीयानुव्याख्यानसुधाद्युक्तिं हृदि कृत्वा हेतुमाह -- उक्तनियमेष्विति।। आकाङ्क्षैव हेतुरिति भावेन सुधाशङ्किकतरीत्या मण्याद्युक्तरीत्या च शङ्कते -- नन्विति।।

१. स्यात् इत्यधिकम् - ठ.

पञ्चा-ववनि-भङ्गः) विभागवादः पु - १९७.

ततः कस्मात्प्रमाणादिदं ज्ञेयं इत्याकाङ्क्षायां १ पराङ्तापन्नलिङ्गस्वरूपमात्रप्रतिपादकं धूमादिति हेतुवचनम्। ततोस्य सामर्थ्यजिज्ञासायां प्रथमं व्याप्तिप्रदर्शनार्थ २ मुदाहरणम्। पश्चात्पक्षध्मताप्र ३ तिपादनार्थमुपनयः। ततः सर्वस्यैकबुद्ध्यारोहायैकवाक्यतामापादयितुं ४ निगमनम्।।
यद्वा ५ पक्षे प्रतिज्ञया प्रमेये उपस्थापिते ६ हेतुना च तदवधारणार्थं लिङ्गरूपे प्रमाण उक्ते तस्य निरस्तसमस्तदोष ७ शङ्कस्यैव प्रमेयावधारकत्वाच्छङ्कानिरासार्थं ८ उदाहरणादयोऽपेक्षिताः। तत्र व्याप्तिदर्शकेनोदाहरणेन विरुद्धानैकान्तिकानव ९ ध्यसितानां निरासः। उपनयेनासिद्धेः। निगमने १० नापि सिद्धे सत्यारम्भस्य नियमार्थत्वात् तस्मादेव नान्यस्मादिति हेत्वनुवादेन सिद्धसाधनतया --

पर आहेत्यादिना सुधोक्तं पक्षान्तरमनुवदति -- यद्वेति।। अनध्यवसितपदेनासाधारणानैकान्तिकग्रहः। सुधोक्तरीत्या निराह -- आद्य इत्यादिना ।।

१.प्रमाङ्गता -ग. प्रमाणता -ट.रा. २.र्थं यो यो धूमवानसावग्निमानित्युदाहरणम्।
पक्षादिक्षितस्थलधर्मताप्रतिपादनार्थमग्निव्याप्तधूमवांश्चायमित्युपनयः 'इति हंसवादेन पूरितमस्ति-ट. ३.प्रदर्शनार्थमग्निव्याप्तधूमवांश्चायमित्युपनयः ग.रा.
४.तस्मादग्निमानेवेति नि-ट. ५.पक्षे इति नास्ति -ट.रा. ६.तेपि -ग.रा. ७.षाशं -क.ट.रा. ८. र्थं व्याप्तिप्रदर्शकेनो -इत्याद्यस्ति -क.ग.ट.रा. ९.नध्यवसि -क.ग.ट.रा. १०. नेपि -क.ग.रा.

पु - १९८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

- अग्निमानेव न त्वनग्निक इति साध्यानुवादेन बाधसत्प्रतिपक्षयोर्निरास इति कथं पञ्चावयवनियमे हेत्वभाव इति।।
उच्यते --
आद्यः पक्षस्तावन्न युक्तः। न हि वादिवाक्यमाप्तवाक्यतया व्याप्त्यादिविशिष्टलिङ्गप्रमापकम्। येनाकाङ्क्षाक्रमेणावयवनियमः स्यात्। वादिनोः परस्परमनाश्वासात्। अन्यथा प्रतिज्ञयैवालम्। किं तु गृहीतव्याप्त्यादिकं पुरुषं प्रति तत्साधकत्वेनागृहीतव्याप्त्यादिकं प्रति तु तज्जिज्ञासाजनकत्वेनोपयुज्यते।।
तथा च व्याप्तिपक्षधर्मताभ्यां वा व्याप्तिसमुचितदेशसिद्धिभ्यां वा विशिष्टलिङ्गस्मृतिर्यावता भवति तावदेव वक्तव्यम्। अन्यथाधिक्यापातात्।।
सा च पर्वतोग्निमान्धूमवत्वान्महानसवदिति प्रतिज्ञाहेतूदाहरणैकदेशदृष्टान्तवचनमात्रेण वा,

पररीत्या -- व्याप्तिपक्षधर्मताभ्यामिति।। स्वमतेनाह -- व्याप्तिसमुचितदेशसिद्धिभ्यामिति।।
ननूक्तरूपिलङ्गस्मृतिः कियता भवतीत्यतः पद्धत्याद्युक्तसप्तप्रकारैर्भवतीत्याह -- सा चेति १ ।। जायमानेत्यन्वयः २ । व्याप्त्यभिधानपूर्वं दृष्टान्तवचनं ह्युदाहरणम्।

१.उदाहरणस्यैकदेशो यो दृष्टान्तस्तद्वचनमात्रेणेत्यर्थः। उदाहरणेनेति। इत्यधिकम् -ट. २.उदाहरणेतिइत्यधिकम् -ठ.

पञ्चा-ववनि-भङ्गः) विभागवादः पु - १९९.

अग्निव्याप्तधूमवत्पर्वतोऽग्निमानिति हेतुगर्भप्रतिज्ञामात्रेण वा, विवादेनैव प्रतिज्ञासिद्धौ कुतः पर्वतोऽग्निमानिति प्रश्नेऽग्निव्याप्तधूमवत्वादिति हेतुमात्रेण वा पर्वतस्याग्निमत्वे किं प्रमाणमिति प्रश्नेऽग्निव्याप्तधूमवत्वमिति लिङ्गोक्तिमात्रेण वा, धूमवन्महानसवत्पर्वतोग्निमानिति सप्रतिज्ञेन हेतुगर्भेण दृष्टान्तवचनमात्रेण वा, अग्निना व्याप्तो धूमः पर्वतेस्तीत्युपनयमात्रेण वा, व्याप्ति १ मद्दूम २ वत्वात्पर्वतोऽग्निमानिति निगमनमात्रेण वा, जायमानानुभूयत इति किं पञ्चावयवादिनियमेन।।
आद्ये ह्यनुमानमुद्राभिज्ञस्य व्याप्तिग्रहणस्थले उक्ते व्याप्तिस्मृतिर्भ वत्येवेति न न्यूनता। व्याप्तिवाचकशब्दस्तु यो यो धूमवानसावग्निमानित्युदाहरणभागान्तरेपि नास्ति।।

तत्र यो यो धूमवानसावग्निमानिति व्याप्त्युक्त्यंशत्यागेन महानसवदिति दृष्टान्तवचनमात्रेणेत्यर्थः। उक्तसर्वपक्षेषु व्याप्तिस्मृत्युत्पादप्रकारमुपपादयन्न्यूनतादिदोषं निराह-- आद्ये हीत्यादिना।।

ननु व्याप्तिबोधकशब्दाभावे कथं व्याप्तिस्मृतिरित्यत आह-- व्याप्तिवाचकेति।। यो य इति साध्ये सकलसाधनाधिकरणसत्वबोधकगस्यैव सत्वाव्द्याप्तीति पदाभावादिति भावः। नन्वेवमाद्यपक्षे --

१.व्याप्त्यादि म -क.ट. २.मत्वात् प -ग. मवत्पर्व -ठ.

द्वितीयेपि लोके शास्त्रे च हेतुगर्भविशेषण १ प्रयोगान्दृष्टवतो व्युत्पन्नस्य धूमवत्वं हेतुरिति धूर्भवत्येवेति न न्यूनता।।
तृतीयेपि धूमवत्वादित्यस्य प्रश्नस्थेनाग्नमानित्यनेनान्वयान्नापार्थकता। नापि प्रतिज्ञाभावेन २ साध्यानुपस्थितेर्न्यूनता। विवादेनैव तदुपस्थितेः। न च समयबन्धादिना विप्रतिपत्तिर्व्यवहितेति वाच्यम्। समयबन्धानन्तरभाविना कुतोऽग्निमानिति प्रश्नेन पुनरपि साध्योपस्थितेः। आद्यपक्षस्तु स्वपक्षं साधयेत्याद्यनुयोग एव प्रवृत्त इति स्वपक्षभूतसाध्योपस्थित्यर्थं तत्र प्रतिज्ञापेक्षितैव।।
ननु -- तथापि हेतुमात्राकाङ्क्षाशामकेन हेतुवचनेन धूमादित्येवंरूपेणैव भाव्यम्। न तु धूमवत्वादित्येवंरूपेण। तथा च पक्षधर्मताया अलाभात् ३ पुनरपि तृतीये न्यूनतैव। मन्मते तूपनयेनतल्लाभ इति चेन्न। पक्षस्य साध्यवत्वे को हेतुरित्याकाङ्क्षाशामकेन हेतुवचनेन हेतौ पक्षसंबन्धस्यापि बोधनीयत्वात्। अत एवोपनयोऽधिकः।।

१.विशेषणपदं न -ग.ट.रा. २.वे च सा -रा. ३.अभावात् पु -रा.

पञ्चमेपि महानसवदित्यनेन व्याप्तेर्धूमवदिति दृष्टान्तविशेषणेन पक्षधर्मतायाश्चोपस्थितिरिति न न्यूनता।।
न चैवं वादिवाक्यस्याप्तवाक्यवदनुसरणीयत्वे निग्रहोद्भावनं न स्यादिति वाच्यम्। प्रमापकत्वांशत्यागेन ज्ञापकत्वांशे लोकशास्त्रप्रहतरीत्यनुसारिणो वादिवाक्यस्याप्यनुसारिणीयत्वात्। अन्यथाग्निमानित्युक्तेऽग्निशब्दस्य चित्रमूलार्थत्वमादायार्थान्तराद्युद्भावनं स्यात्।।
किं च त्वत्पक्ष एव न्यूनादिनिग्रहोद्भावनं न स्यात्। न्यूनादिकं प्रति लोकसिद्धमर्यादाया एवावधित्वात्। मत्पक्षे निग्रहोद्भावनं तु लोकसिद्धरीत्यतिक्रमे सावकाशम्।।

व्यर्थ इति यावत्। प्रमापकत्वांशेति।। आप्तवाक्य इव वादिवाक्ये प्रमापकत्वाभावेपि ज्ञापकत्वमात्रस्य सत्वाद्बाधितार्थकवाक्यस्यापि बोधकताया योग्यतावादे साधनादिति भावः।।
चित्रमूलादीति।। ननु तथोक्तौ छलेन निगृह्येतेति चेत् तदेव कुतः। प्रकरणाद्यनुसंधानादिति चेत् समं प्रकृतेपीति भावः।। लोकसिद्धेति।। अस्मदुक्तप्रकारा एव लोकसद्धमर्यादानुसारिण इति भावः। ननु युक्तिपादीयसुधायं व्याप्तिपक्षधर्मत्वयोगरन्यतरदेवाभिधेयम्। व्याप्त्यभिधानं नावश्यकमिति १ प्रतीतेः
प्रागुक्तपक्षेषु च द्वयोरप्यभिधानप्रतीतेर्विरोध इत्यतः सुधोक्तमनूद्य चतुर्धाभिप्रायोक्त्या विरोध निराह -- यातुसुधायमामित्यादिना।।

१. सुधावाक्यात्प्रतीतेः- ट.ठ

१ यातु सुधायां संस्कारोद्बोधोपयुक्तं सादृश्यसंबन्धादिकं किमप्येदृष्टव्यमित्यादिना व्याप्तिपक्षधर्मतयोरन्यतरस्मिन्नुक्तेऽन्यस्य स्मृतिर्भविष्यतीत्युक्तिः सा दृश्यते खलु लोके पदैकदेशेन २ पदार्थ ३ स्मृतिरित्युक्तिवत्कथा ४ बाह्यप्रयोगाभिप्राया वा, वादकथाभिप्राया वा, एकोक्तिमात्रेण ५ द्व्यंशस्मृतिमत्पुरुषविशेषाभिप्राया वा, कैमुत्याभिप्राया वा, न तु द्वयोरन्यतरदेवाभिधेयमित्यभिप्राया।।
अत एव विष्णुतत्वनिर्णयटीकायां -- स्मरणं तु पदैकदेशादिनापि दृष्टं किमुत प्रतिज्ञादिभिरित्युक्तम्। अत एव च ब्रह्मतर्के --

स ६ इत्यस्यार्धवाक्यप्रयोगाभिप्राया वेत्यादिनान्वयः। वादेति।। तत्र निर्णीताप्तभावत्वेन निग्रहस्तानाभावेन चैकदेशकीर्तनेप्युभयस्मृतिसंभवादिति भावः।। कैमुत्येति।। एवमेकदेशकीर्तनेनापि ससामर्थ्यलिङ्गस्मृतिर्भवति किमु प्रागुक्तसप्तप्रकारैः तत्रापेक्षितशब्दानां सत्वादिति कैमुत्याभिप्राया वेत्यर्थः। अत एव चेति।। व्याप्त्याद्यभिधानस्यावश्यकत्वादेवेत्यर्थः। सूचितमित्यन्वयः। ब्रह्मतर्क इति।। तत्वनिर्णयोदाहृते। युक्तिर्व्याप्त्यादिमल्लिङ्गम्। प्रतिज्ञारूपं निरूपकं स्मृत्यादिजननी यस्याः सा तथोक्ता। एवं हेतुरूपिकादृष्टान्तरूपिकेत्याद्यपि व्याख्येयम् ।।

१.यत्तु - ग.रा. २.शादितोपि-इति शोधितम्-ट. ३.स्मरणादिकमि - इति शोधितम् -ट. ४. दर्थ वाक्यप्रयो -ग.ट.रा. ५.णान्यस्मृ -ग.ट.रा. ६.सत्यस्य वाक्यार्थ -ठ. सा इत्यस्यार्धवाक्य -ड.

पञ्चा-ववनि-भङ्गः) विभागवादः पु - २०३.

युक्तिः प्रतिज्ञारूपा च हेतुदृष्टान्तरूपिका।

तथोपनयरूपा च परा निगमनात्मिका ।।
इत्यवयवपञ्चकस्य प्रत्येकं परार्थानुमानत्वं प्रतिज्ञायन्ते व्याप्तिमाश्रित्य केवलमित्युक्त्या सर्वत्रापि व्याप्त्यभिधानं सूचितम्।।
विष्णुतत्वनिर्णयटीकायामपि 'व्याप्तिमाश्रित्येत्यपि १
पक्षान्तरदर्शनमित्युक्त्या प्रतिज्ञादावपि व्याप्त्यभिधानं सूचितम्।।
२ प्रमाणपद्धतावपि उपनयेग्निमा व्याप्तो धूमः पर्वतेऽस्तीति, निगमनेपि व्याप्त्यादिमद्धूमवत्वादिति व्याप्तिरूक्ता।

दृष्टान्तशब्देन तद्वचनमुपलक्ष्यते। उदाहरणैकदेशग्रहणार्थं दृष्टान्तेत्युक्तम्। युक्तिर्निगमनजन्यस्मृतिमतीत्यर्थे निगमनात्मिकेत्यौपचारिकप्रयोगः। युक्तेरेकत्वेपि तत्स्मृतिजनकभेदाभिप्रायेणोपचारेत्युक्तम्। अत्र सर्वत्र हेतुगर्भप्रतिज्ञारूपेति सप्रतिज्ञहेतुरूपिकेति हेतुगर्भसप्रतिज्ञदृष्टान्तरूपिकेति सप्रतिज्ञोपनयरूपेत्ये ३ वं पूरणीयम्। प्रतिज्ञाहेतु ४ रूपैवेत्यादिवाक्यशेषात्।। विष्णुतत्वेति।। अतएवेत्यनुषङ्गः। अत्र सप्रतिज्ञोपनयरूपेतिप्रागुक्तपक्षापेक्षया
सव्याप्तिकोपनयरूपेत्येतदर्थपरत्वप्रतीतावपि
तुल्यन्यायत्वात्प्रतिज्ञादावपीत्युक्तम्। प्राक् स्वोक्तरीत्येति भावः।

१.'त्यत्र'इति स्थितं 'त्येत्येतत्'इति शोधितमस्ति-ट. २.प्रमाणपदं न - ग.ट.रा. ३.ति सप्रतिज्ञानिगमनरूपेत्ये -ठ. ४.तु गर्भेत्यादि वा-ट.ठ.ड.

प्रमाणलक्षणेऽपि 'हेतुगर्भा प्रतिज्ञा केवलाऽपि, सिद्धौ प्रतिज्ञायां हेतुमात्रं च, दृष्टान्तः सप्रतिज्ञो हेतुगर्भ इति व्याप्यरूपलिङ्गवचनार्थकेन

हेतुशब्देन सर्वत्रापि व्याप्त्यभिधानं सूचितम्। सुधायामपि ससामर्थ्यलिङ्गप्रतीतिजनकं वाक्यमुपदेश इत्युक्तम्।।
यद्वा धूमवत्वादित्येव हेतुः। न तु व्याप्तधूमवत्वादिति। एवमवयवान्तरेऽपि द्रष्टव्यम्। तथापि न न्यूनता। प्रतिवादिन आकाङ्क्षाक्रमेण व्याप्त्यादे १ स्तृतीयादिकक्ष्यासूक्तिसंभवात्। स्वीकृता च त्वयाप्याकाङ्क्षाक्रमेणोक्तिः।

सुधायामिति।। '
व्याप्तिरेव तु सा स्मृते'ति युक्तिपादीयानुव्याख्यानव्याख्यावसरे सुधायामित्यर्थः। एवमवयवान्तरेपीति।। प्रतिज्ञादयः पञ्चाप्यवयवाः हेत्वादिकिंचित्सहिताः सन्तः प्रत्येकं परोपदेश इत्युक्तम्। तत्र प्रागुक्तसप्तसु परोपदेशप्रकारवाक्येष्ववयवभूतो यो हेत्वंशः स व्याप्त्यभिधानशून्यः। केवल एवाभिधेय इत्यर्थः।। तृतीयादीति।।
धूमवत्वादीति वादिनः प्रथमकक्षा २ व्याप्तिर्नास्त्योपलभ्यते कथं व्याप्तिरित ३ वादिनो द्वितीया कक्ष्या, यो यो धूमवानिति ४ व्याप्त्यभिधानवादिनः तृतीया कक्षा, कथं व्याप्तस्य पक्षनिष्ठता समुचितदेशवृत्तिर्वेति प्रतिवादिनश्चतुर्थी कक्षा, वह्निव्याप्तो धूमः पुर्वतेऽस्तीत्युपनयवादिनो वादिनः पञ्चमी कक्षेत्येवंरूपेण कथाप्रवृत्तेस्तृतीया-

१.देर्द्वितीयादिकक्ष्यासू इति शोधितम् -ट. २.क्ष्या -ठ.ड. ३.ति प्रति वा- ट.ठ.ड. ४.त्यादि -ट.ठ.ड.

पञ्चा-ववनि-भङ्गः) विभागवादः पु - २०५.

किं तुप तवमते प्रतिवादिना द्वितीयादिकक्ष्यास्वाकाङ्क्षिष्यमाणमपि व्याप्त्यादिकं वादिना पञ्चावयवेन महावाक्येनाद्यकक्ष्यायामेव वक्तव्यमिति नियमः। मम तु न। उत्तरत्राकाङ्क्षिष्यमाणस्याप्यादावेवोक्तावाकथापरिसमाप्ति यावद्वक्तव्यं तावत आदावेवोक्तिप्रसङ्गात्।।
किंच युगपदुक्तिनियमेऽपि तदभिमतस्योपनयस्य निगमनस्य च प्रत्येकं व्याप्त्याद्युक्तौ शक्तत्वात्किमवयवान्तरेण । तस्मादाद्यः पक्षो न युक्तः।।
नापि सकलशङ्कानिरासार्थं पञ्चावयवनियम इति द्वितीयः। आदावेव सकलशङ्कानिरासकस्यैव --

-दिकक्ष्या १ स्वित्युक्तम्। मम तु नेत्ययुक्तम्। आकाङ्क्षिष्यमाणस्याप्यादावेव वक्तव्यत्वादित्यत आह-- उत्तरत्रेति।। पररीत्याप्युपनयनिगमनान्यतराभ्यामेवालमन्यव्द्यर्थमित्याह-- किञ्चेति।।
न पञ्चावयवोक्तौ तु विवादावसितिर्भवेत्।
दृष्टान्तादिषु चैवं स्यात्।।
इत्यनुव्याख्यानसुधोक्तदिशा निराह -- आदावेवेत्यादिना।। ननु हेत्वाभासादिदोषदुष्टतारूपावान्तरशङ्गापञ्चावयवप्रयोगमात्रेण निरस्यत इति तावदेवैकं महावाक्यमित्युच्यत इति चेत्तर्हि पर्वतो वह्निमान्न वेति शङ्कानिवर्तकत्वं पर्वतोऽग्निमाऽनिति प्रतिज्ञायाः कुतोग्निमत्वमिति सङ्कानिरासकत्वं धूमव २ त्वादितिहेतुवचनस्य, कथमस्य व्याप्त्यादी-

१.अत्र सर्वत्र क्ष्या इत्येवास्ति- ट.ठ. २. मत्वा-ठ.ड.

परार्थानुमाने पञ्चावयवप्रयोगेणैव तन्निवृत्तौ तावतैव कथामुद्रणापातेन तन्निवर्तिकाया कृत्स्नकथाया एव परार्थानुमानत्वप्रसङ्गात्। अवान्तरशङ्कानिवर्तकत्वं तु प्रत्येकं प्रतिज्ञादेरप्यस्ति।।
किंचोक्तरीत्यैकैकावयवेनापि
व्याप्तिपक्षधर्मतयोरभिधानात्सकलशङ्कानिवर्तकत्वं तस्याप्यस्ति। अपि चास्मिन् पक्षे कण्टकोद्धारोऽपि पृथङ्न कर्तव्यः स्यात्। तस्मात्पक्षद्वयमप्ययुक्तम्।।
अपि च पञ्चावयवादिनियमोपि विप्रतिपन्नं प्रत्यनुमानेनैव साध्यः। तस्य प्रत्यक्षाद्यविषयत्वात्। पञ्चावयवप्रयोगेणैव १ तत्साधने मीमांसकादि प्रत्याधिक्य प्रसङ्गात्। तत्परिहारार्थं पञ्चावयवनियमस्य तात्विकत्वसाधनेचानवस्थानात्।
तद्रीत्या त्र्यवयवादिप्रयोगे च तवन्यूनत्वापातात्।।

२ ति शङ्कानिषेधकत्वमुदाहरणस्य, इत्येवं रूपेणावान्तरशङ्का एकैकावयवोक्तावपि निवर्त्यत इति प्रतिज्ञादिकमपि प्रत्येकं परोपदेशरूपमहावाक्यं स्यादित्यर्थः। पूर्वपक्ष इवास्मिन् पक्षोपि परीत्या सर्वाभासनिरासस्य प्रत्येकं संभादवयवान्तरं व्यर्थमेवेत्यत आह -- किंचोक्तरीत्येति।। सा च पर्वतोग्निमान् धूमवत्वादित्यादिनोक्तरीत्येत्यर्थः। तस्यापीति।। प्रतिज्ञाहेतुदृष्टान्तरूपाद्यैकैकावयव ३ स्यापीत्यर्थः।।
त्रिपञ्चावयवामेवप युग्मावयवविनामपि।
नियमाद्योनुमां ब्रूयात्तं ब्रूया ४ द्यदिता दृशीम्।।
इत्यनुव्याख्यानसुधोक्तयुक्त्या च नियमपक्षं निराह-- अपि च पञ्चावयवेति।। प्रत्यक्षाद्यविषयत्वादिति।। आगमस्य चाभावादित्यपि ध्येयम्।

१. ण च -ग.रा. २.दिकममि-ठ. दिरि-ड. ३.वोक्ता व -ट.ड. ४.तादृशीयदि -ट.ड.

पञ्चा-ववनि-भङ्गः) विभागवादः पु - २०७.

तत्तन्मतरीत्या प्रयोक्तव्यमिति वा, यावतो व्याप्त्यादिविशिष्टलिङ्गधीस्तावत्प्रयोक्तव्यमिति वा, समयबन्धेन च मीमांसकादिना स्वाभिमतावयवनियमसिद्ध्यर्थं कृतेन व्यवयवादिप्रयोगे १ न तव व्याप्तिस्मृत्यादिरावश्यक इति स्वीकृतत्वेन त्वयैव पञ्चावयवनियमस्त्यक्तव्यः। एवं मीमांसकादिभिरपि स्वाभिमतो नियमस्त्यक्तव्य इति कथं तन्नियमः।।

अवनवस्थानादिति।। पञ्चावयवनियमस्य पञ्चावयववयुक्तानुमानेन मीमांसकमवयवत्रयनियमवादिनं प्रति साधने त्वया कृते मीमांसकेनाधिकं २ निग्रहस्थानमित्युक्ते पुनस्त्वयाऽऽधिक्यदोषनिरासार्थं पञ्चावयवनियम एव परमार्थत्वमिति पञ्चावयववयुक्तेनानुमानेनैव स्याध्यम्। तत्रापि तेन पूर्वोक्तदोषे ाभिहिते पुनरनुमानान्तरेण त्वया तथैव साध्यमित्यनवस्थानादित्यर्थः। तद्रीत्या मीमांसकरीत्या।।
एवं मीमांसकादिभिरिति।। अवयवत्रययुक्तानुमाने मीमांसकेनोक्ते न्यूनतयानैयायिकेन प्रत्युक्तेऽवयत्रयनियमस्य तात्विकतासाधनमपि तादृशप्रयोगेणैवप कार्यमित्यनवस्थानात्। न्यायमतरीत्या मीमांसकेनोक्ते स्वमतेनाधिक्यं तत्तन्मतरीत्या प्रयोक्तव्यमित्याद्युक्तौ च न्यायमतरीत्या नैयायिकेन
पञ्चावयवप्रयोगे कृते तेन तव व्याप्तिस्मृत्यादि --

१.गेण त -क.ट.रा. २. नामेत्यधिकम् -ड.

किंच नेदं स्वसाध्यसाधकं, असिद्धत्वादित्याद्य १ साधकानुमानेषु नायमसिद्धः तल्लक्षणरहितत्वात् इत्यादिकण्टकोद्धारानुमानेषु प्रथमप्रयुक्तहेतोर्व्याप्तिपक्षधर्मतादौ विप्रतिपत्तौ तत्साधकेषु द्वितीयादिकक्ष्यानिपातिषु शाखानुमानेषु वादिभ्यां कथामध्ये स्वाभिमततत्तत्प्रमेयसिद्ध्यर्थं पञ्चावयवतां विनाप्युच्यमानेषु परिशेषार्थापत्यादिरूपेषूपशाखानुमानेषु च त्वयैव नियमस्त्यक्त इति कथमन्यत्र तन्नियमः।।
नन्वसिद्धत्वा २ देरसाधकत्वादिना व्याप्त्यस्वीकारे

भवतीत्युपेयमित्यवयवत्रयनियमस्त्यक्त ३ एव। एवं बौद्धेनापि स्वाभिमतो नियमस्त्यक्तव्य एवे ४ त्यर्थः।।
क्वचित्क्लृप्तत्वात्प्राथमिकस्थापनानुमानेपि न पञ्चावयवादिनियमो ग्राह्य इति प्रतिबन्दीमुखेनापि नियमभङ्गं साधयति-- किंच नेदमिति।। तथैव हेत्वाभासान्ते मणौ व्यक्तत्वादिति भावः। शाखानुमानेष्विति।। प्रथमं प्रधानप्रमेयसाधनार्थं प्रयुक्तमनुमानं प्रधानं महावृक्षस्थानीयं तदुपयुक्ततया तद्दूषकतया वा प्रयुक्तानि शाखानुमानानि मध्येमध्येऽवान्तरप्रमेयोपयुक्ता ५ न्यनुमानान्युपशाखानुमानानीति शाखानुमानेषूपशाखानुमानेष्विति चोक्तम्।। परमुखेनोत्तरं वाचयित्वा सममित्याह-- नन्विति।। अविवादे तु नावयवान्तरप्रयोग इत्यत्र दोषान्तरमाह -- किंच केवलान्वयिनीति।।

१.द्यसाधकतासाधनानुमा --ग.रा. २.दे रसाधकत्वादिना व्याप्त्या - क.ग.रा. ३.क्तव्य ए-ट.ठ. ४.एवेति नास्ति-ट.ठ। ५.अनुमानानीति नास्ति-ट.ठ.

पञ्चा-ववनि-भङ्गः) विभागवादः पु - २०९.

कथानधिकारेण तत्र व्याप्तेरुभयसंमतत्वात्पक्षधर्मतामात्रं प्रदर्शनीयमिति चेत् तर्हि कृतकत्वानित्यत्वयोरपि व्याप्तेर्मीमांसकसम्मतत्वात्तत्र केवलान्वयिसाध्यके हेतौ च व्यभिचारशङ्कानुदयात्तत्रापि पक्षधर्मतामात्रं प्रदर्शनीयं स्यात्।।
किंच केवलान्वयिहेतौ पक्षधर्मतायाः सर्वसंतत्वात्तत्र व्याप्तिमात्रं प्रदर्शनीयं स्यात्।।
यदि च व्याप्त्यादौ प्रतिवादिनः संम १ तेपि वादिना स्ववर्वकर्तव्यं २ तर्ह्यसिद्धत्वासाधकत्वयोर्व्याप्तिप्रदर्शनमपि कर्तव्यमेव।
किंचैवमसिद्धस्यापि साधकत्वस्वीकारे कथानधिकार इत्यपि सुवचत्वेनासाधकतानुमानं विफलम्।।
यदि च तत्स्वीकारिणोऽपि कथमानधिकारे विप्रतिपन्नं प्रति असाधकतानुमानं सफलम्। तर्ह्यसिद्धत्वासाधकत्वयोर्व्याप्तौ विप्रतिपन्नं प्रति ३ तत्प्रदर्शनमपि सफलमेव।।
किञ्चैवं शाखोपशाखा ४ नुमानेषु का गतिः तत्र व्याप्तेरुभयसम्मत्यभावात् मदुक्तरीतिरेव वक्तव्येति मूलानुमानेषु ५ तथैऽवास्तु।।

मदुक्तरीतिरिति।। यावता तद्बोधः तावन्मात्रमित्यादिना प्रागुक्तसप्तप्रकारान्यतममेवानुसर्तव्यमित्यर्थः। सजातोयन्वयदर्शनरूपं वा -

१.मतावपि -क.ग.रा. २.कर्तव्यमित्यधिकम्-क.ग.रा. ३.व्याप्ति प्र- क.ग.रा. ४.खाद्यनुमा -क.ग.ट.रा. ५.नेत -ग. नेपित -ट.रा.

अपि चाग्निना व्याप्तो धूमः पर्वतेस्तीति वाक्यं आप्तोक्तं व्याप्त्यादिविशिष्टलिङ्गप्रमापकं दृष्टमिति तदेव वाद्युक्तं कथं तज्ज्ञापकं न स्यात्। किंच त्वयाऽपि त्वत्कल्पितपञ्चावयवनियमविस्मृतिदशायामवयवानियमोऽयुक्तः
अतिप्रसङ्का १ दित्येतावतैवा २ वयवानियमायुक्तत्वस्य साध्यमानत्वात्स्वक्रियाविरोधः।।
नन्वेवमनियमवादिमते कथगं न्यूनाद्युद्भावनमिति चेन्न। उदाहरणान्तमुदाहरणादि वावयवत्रयमेवेति पर ३ मते कथमप्राप्तकालाद्युद्भावनम्।

अन्वयितावच्छेद ४ कवत्वंरूपं वा योग्यतावत्वं हेत्ववयवेप्यस्तीति तदेवानुमितिहेतुलिङ्गज्ञानजनकमित्यवयवान्तरं व्यर्थमेव। तावतैव सर्वदोषशङ्कानिवृत्तिसंभवाच्चेति भावेनाह -- ५ अपि च अग्निनेति।। व्याघाताच्च नियमपक्षस्त्याज्य इत्याह-- किञ्च त्वयापीति।। इत्येतावतैव साध्यमानत्वादित्यन्वयः। इत्येतावतैव -- प्रतिज्ञाहेतुरूपावयवद्वयेनैवेत्यर्थः। तत्र ह्तुस्त्वत्कल्पितेत्यादि।। अनियमेति।। पञ्चावयनियमपक्षस्य यदयुक्तत्वं तस्येत्यर्थः। प्रतिबन्द्योत्तरमाह-- उदाहरणान्तमिति।। मन्मत इव तन्मतेप्यनियमस्य तुल्यत्वादिति भावः।। अप्राप्तेति।। क्रमविपर्यासोप्राप्तकालमित्यप्राप्तकालाख्यनिग्रहस्थानाद्युद्भावनमित्यर्थः। कथंचेत्यस्य न्यूनाद्युद्भावनमित्यन्वयः।
१.ङ्गत्वादि-ग.ट.रा. २.वानियमा-ग.रा. 'वानिमा'इति स्थितं वनियमा इति शोधितम्-ट. ३.भट्ट -ग.ट.रा. ४.कत्व-ठ.ड. ५.अपि चेति। आग्निनेति। व्या - इत्याद्यस्ति -ड.

पञ्चा-ववनि-भङ्गः) विभागवादः पु - २११.

कथं चोदाहरणे दृष्टान्तोक्तिः यच्छब्दतच्छब्दयोर्वीप्सा विशिष्य कण्टकोद्धारः असाधकतऽनुमानं उपाधेः स्वशब्दो १ ऽद्भावनं चानियतमिति नैयायिकमते न्यूनाद्युद्भावनम्।।
समयबन्धानुसारेणेति चेत्। समं प्रकृतेऽपि। उक्तपक्षेष्वेतं पक्षमाश्रित्य वक्तव्यमिति वा लोकशास्त्र २ सर्वावगतमार्गेण व्याप्तिपक्षधर्मताविशिष्टलिङ्गोपस्थितिर्यवता तावद्वक्तव्यमिति वा समयस्य बन्धनीयत्वात्। अत एव ब्रह्मतर्के।।
'पृथक्पृथक्प्रमाणत्वं याति युक्तितयैव तु'।
इत्यत्र परार्थानुमानत्वे युक्तिशब्दवाच्यव्याप्तिपक्षधर्मताविशिष्टलिङ्गोपस्थापकत्वमेव तन्त्रमित्युक्तमअ। यच्चोक्तं साध्योपस्थापकत्वात्प्रतिज्ञैव प्रथमेति। तन्न। क्वचिद्विधितोप्यर्थवादस्य प्राधम्यवत्, भट्टादिमते उदाहरणस्य प्राधम्यवत्,

अनियतपदं प्रत्येकमन्वेति। तेनैवोत्तरं वाचयति- समयेति।। त्वयोदाहरणान्तमेव वाच्यमिति समयबन्धे सति तदतिक्रमेणोदाहरणादिप्रयोगे कथिते निग्रहस्थानोद्भावनमिति चेदित्यर्थः। अनियमपक्षे समयबन्ध इत्यत आह-- उक्तपक्षेष्विति।। सा चेत्यादिना प्रागुक्तसप्तपक्षेषु।।
ननु यावतेत्यादिना ग्रन्थेन प्रतिज्ञाद्यवयवानां यः पौर्वापर्यरूपक्रमः शङ्कितः तमपि प्रत्याचष्टे -यच्चेति।। विधितोप्यर्थवादस्येति।।

१.ब्देनो -ग.ट.रा. २.स्त्रप्रहतमा-क.ग.ट.रा.

‘आम्नायस्य क्रियार्थत्वादानार्थक्यमतदर्थानां तस्मादनित्यमुच्यते
‘‘अत एव प्राणः‘‘प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणं‘इत्यादौ निगमने च हेतोः प्राथम्यवच्च लोक १ शास्त्रव्यवहृतेनोपाद्यतन्यायेन २ हेतोरपि प्राथम्य ३ सम्भवात्। विवादेनैव साध्योपस्थितेरुक्तत्वाच्च।

‘प्रजापतिर्वा इदमेक आसीत्, सोकामयत प्रजाः पशून् सृजेयेति स चात्मनो वपामुदखितत्तामग्नौ प्रागृह्णात्ततोजस्तूपरः समभवत् तं स्वायै देवताय आलभत्त ४ तो वै स प्रजाः पशूनसृजत यः प्रजाकामः पशुकामस्स्यात्स एतं प्राजापत्यमजं तूपरमालभेते‘त्यादावर्थवादस्य प्राथम्यं यथेत्यर्थः।।
भट्टादीत्यादिपदेन बौद्धग्रहः। हेतोः प्राथम्येऽर्थवादाधिकरणगतजैमिनिसूत्रमुदाहरति -- आम्नायस्येति।। वेदस्य धर्माधर्मरूपकर्मलक्षणक्रियाबोधकत्वात्। अतदर्थानामक्रियार्थकानां अर्थवादानामानर्थक्यं
तस्मादर्थहीनत्वादनित्यमिवानित्यमप्रमाणमुच्यतेऽर्थवादजातमिति पूर्वपक्षासूत्रार्थः। तत्रैव व्याससूत्रमुदाहरति -- अत एवेति।। निरवकाशलिङ्गादेव प्राणशब्दार्थो ब्रह्मेति सूत्रार्थः। तत्रैव गौतमसूत्रमुदाहरति -- प्रवृत्तीति।। सफप्रवृत्तिजनकत्वादर्थावगाहिप्रमाणमित्यर्थः।। निगमनेति।। तस्मात्पर्वतो वह्निमानिति निगमनाख्यावयवे ५ त्यर्थः। अत्रापि कथकानुमानप्रयोगस्थलेपीत्यर्थः। प्रतिज्ञाया एवा ६ नैयत्यं कुतस्तत्प्राथम्यनैयत्यमित्याह -- विवादेति।।

१. के शास्त्रे च प्रहतेनो -क.ग.ट.रा. २.नात्रापि हे-क.ग.ट.रा. ३.ततः 'नियमविस्मृतिदशायां । इत्याद्येवास्ति-ग.रा. ४.अलभद ततः -ठ.ड. ५.व इ-ठ. ६.वयै -ठ.ड.

पञ्चा-ववनि-भङ्गः) विभागवादः पु - २१३.

पर्वतस्याग्निमत्वं कुत इति प्रश्ने प्रतिज्ञाया अनन्वयाच्च। त्वयाऽपि त्वत्कल्पितप्रतिज्ञाप्राथम्यनियमविस्मृतिदशायां कदाचिद्धेतोरपि पूर्वमुक्त्या स्वक्रियाविरोधाच्च।।
अत एव हेतुवचनस्य द्वितीयत्वनियमोऽपि निरस्तः। उपनयस्य सार्थक्यार्थं १ हेतुवचनस्य मतुबादिराहित्यं तु प्रागेव निरस्तम्। पृथिवीत्वादि २ संबन्धात्पृथिवीत्यादिस्वभाष्यविरुद्धं च ।।
यच्चोक्तं प्रतिज्ञायामग्निशब्दे ३ हेतौ धूमशब्दे ४ च तज्ज्ञाने ५ लक्षणा। अन्यथा धूमस्याग्निं प्रत्यकारणत्वेन पञ्चम्या अयोगादिति।

ननु गिरिरग्निमान् गिरिरनग्निक इति विवाद एव स्वपरपक्ष प्रतिज्ञारूप इति वदन्तं प्रति प्रकारान्तरेण तदनैयत्यमाह -- पर्वतस्येति।। अत एवेति।। हेतुवचनप्राथम्यस्य प्रदर्शितत्वादेवेत्यर्थः। यत्तु मण्यादौ कथायां धूमादित्येव प्रयोक्तव्यं न तु धूमवत्वादिति। मतुबो व्यर्थत्वात्। पक्षधर्मता तूपनयभ्येत्युक्तं तन्निराह --उपयनस्येति।। मतुबादीत्यादिपेदन उदाहरणसार्थक्यार्थं यद्य्याप्तिराहित्यमुक्तं तद्ग्रहः। वह्निव्याप्यधूमवत्वादिति प्रयोगस्य
दर्शितत्वादितिभावः।। प्रागेवेति।। ननु तथापि हेतुमात्राकाङ्क्षाशामकेत्यादिग्रन्थेनेति ६ भावः।। इति स्वभाष्येति।। गोतमसूत्रभाष्ये। हेतुवचन एव मतुबर्थस्य पक्षसंबन्धस्योपादानेन हेतुवचने मतुबो राहित्यकथनं तद्विरुद्धमित्यर्थः। मण्याद्युक्तमन्यदपि निराह --

यच्चेति।। अग्निमानित्यस्याग्निज्ञानमित्यर्थः। धूमादित्यस्य च धूमज्ञानादित्यर्थः।

१.परोक्तमित्यधिकम् -क.ग.रा. परोक्त हे-ट. २.त्वाभि सं -ग.रा. ३.ब्दस्य इति शोधितम्-ट. ४.ब्दस्य इति शोधितम्-ट. ५.नल -रा. ६.त्यर्थः -ठ.

पु - २१४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

तन्न। धूमे वह्निज्ञानजनकज्ञानविषयत्वरूपज्ञापकहेतुत्वस्य सत्वात्।।
ननु तद्विषयकज्ञानजनकत्वमेव ज्ञापकहेतुत्वं तच्च धूमज्ञानस्यैव न तु धूमस्येति चेन्न। धूमज्ञानगतं हि ज्ञापकत्वं न तावद्वह्निं प्रति। धूमज्ञानाद्वह्निरित कदाऽप्यप्रयोगात्। नापि वह्निज्ञानं प्रति। १ तत्र कारकहेतुत्वस्यैव संभवात्। व्यावृत्तिधीहेतुधीविषये दण्डादौ व्यावर्तकशब्दस्येव वह्निधीहेतुधीविषये धूम एव वह्निज्ञापक शब्दस्य प्रयोगाच्च।।
ज्ञापकहेतौ चानुपपत्तिप्रति २ सन्धाननिरपेक्षप्रचुरप्रयोगादिना पञ्चमी मुख्यैव। अन्यथा साकारकहेतावेवामुख्या स्यात्।

धूमादिप्रातिपदिकेन ज्ञानलक्षणायां हेतुत्वार्थकपञ्चमी मुख्यैव संपद्यत इत्यर्थः। यज्ञपत्याद्युक्तदिशा निराह-- धूम इति।। व्यावृत्तीति।। दण्डविशिष्टे अदण्डितो व्यावृत्तीत्यर्थः।।
ननु धूमे वह्निज्ञापकशब्दप्रयोगो लक्षणयास्त्विवत्यत आह-- ज्ञापकहेतौ चेति।। मुख्यार्थानुपपत्तीत्यर्थः। एव प्रयोगेऽपि लक्षणेत्युक्तौ ३ बाधकमाह -- अन्यथेति।। यद्वा नन्वन्यायश्चानेकार्थत्वमितिन्यायेनैकत्रैव मुख्यत्व ४ मन्यत्रामुख्यत्व ५ मुपेयमित्यत आह -- अन्यथेति।।

१.तत्प्र -ग.ट. २.त्यनुसं -क.ग.ट.रा. ३.साधक -ट. ४.ख्यार्थ-ट. ५.ख्यार्थ-ट.

पञ्चा-ववनि-भङ्गः) विभागवादः पु - २१५.

कारकहेतावेव मुख्यत्वेपि पञ्चम्यामेव लक्षणाऽस्तु। न तु प्रधाने धूमप्रातिपादिके। न च सुब्विभक्तौ न लक्षणेति कुलधर्मः। वेदे 'प्रयाजशेषेण हर्वीष्यभिधारयति'इत्यादौ, त्वन्मते चतुर्विंशतिगुणाः, एकः समवाय इत्यादौ च तद्दर्शनात्। न हि गुणा इत्यादिविभक्त्युक्ता १ बहुत्वादिसंख्या त्वन्मते गुणादावस्ति।

अस्तु वा त्वद्रीत्या कारहेतावेव पञ्चमी मुख्या। तथाप्यन्यत्र ज्ञापक २ हेतौ लाक्षणिकीति स्यादित्याह -- कारकहेतावेवेति।।
ननु सुब्विभक्तौ लक्षणा न युक्तेत्यत आह-- न चेति।। क्वाप्यनुपलम्भान्न सुब्विभक्तौ लक्षणेत्यत आह-- वेद इति।। प्रयाजशेषेणेति।। वाजपेयगते प्रयाजशेषेणेति वाक्ये द्वितीयातृतीयाभ्यां शेषस्य हविस्संस्कारार्थत्वप्रतीत्या प्रयाजनामकयागसाधनाज्यद्रव्यशेषेण हविस्संस्कुर्यादित्यर्थ इति प्राप्ते शेषस्य प्रतिपत्तिमात्रापेक्ष ३ त्वात्तत्प्रतिपदिकस्वारस्यानुरोधेन प्रयाजनामकयागसाधनाज्यशेषं हविष्षु स्थापयेदित्यर्थस्य चतुर्थस्याद्यपादे 'अभिधारणे विप्रकर्षादनुयाजनवत्पात्रभेदः स्या'दिति त्रयोदशेऽधिकरणे व्यवस्थितत्वेन तृतीयाद्वितीययोः कर्मत्वाधिकरार्थत्वस्वीकारदर्शनादित्यर्थः। ४ बहुवचनैकवचनयोरविवक्षितार्थत्वभ्रान्तिनिरासाय ५ चतुर्विंशतीति एक इति च विशेषणोपादानम्। तद्दर्शनादिति।। गुण्यादिस्थसंख्यालक्षणया दर्शनादित्यर्थः।।

१.क्त व-ग.ट.रा. २.के हे -ठ. ३.क्षित -ट.ठ.ड. ४.द्वितीययोरित्यारभ्य नास्ति -ड. तद्दर्शनादिति इति पर्यन्तं नास्ति -ठ. ५.तद्दर्शनादिति इति पर्यन्तं नास्ति-ट.

पु - २१६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

प्रत्युत हेतुवचने ज्ञानलक्षणायामुदाहरणे उपनये च ज्ञानस्य गमकत्वार्थं तस्यैव
व्याप्त्यादिविषयकत्वं वक्तव्यम्। न तु लिङ्गस्य व्याप्त्यादिमत्वम्।।
किंचावयवेनानुमित्यङ्गमेव ज्ञानमुत्पादयितव्यम्। लिङ्गज्ञानमेव च तदङ्गम्। न तु लिङ्गज्ञानज्ञानम्। १ नापि वह्निशब्दे २ लक्षणा। पञ्चम्युक्तज्ञापकत्वान्तर्गतज्ञानं प्रति विषयतया वा ज्ञापकत्वं प्रत्येव ज्ञाप्यतया वाऽन्वयेनैव ३ वह्नेर्ज्ञाप्यत्वसिद्धेः। दृश्यते च चैत्रमातेत्यादौ स्त्रीत्वविशिष्टजनकत्वरूपमातृत्वान्तर्गतजनकत्वेन सह चैत्रस्य जन्यतयाऽन्वयः। उदाहरणेपि योयो धूमवानसाव ४ ग्निमानित पूर्वभागेनैव वा,

लिङ्गज्ञानमेव चेति।। न तु लिङ्गज्ञानम्। ज्ञानलक्षणापक्षे च लिङ्गज्ञानज्ञानमेवोत्पाद्यम्। गङ्गापदेन तीरज्ञानमिव। तच्च नानुमित्यङ्गमिति भावः। हेतौ ज्ञानलक्षणां निरस्य साध्येपि तां निराह-- नत्विति।। वह्निज्ञानजनकज्ञानविषयत्वरूपज्ञापकत्वान्तर्गतवह्निज्ञानं प्रतीत्यर्थः। ज्ञाप्यतयेति।। ज्ञानजनकत्वरूपज्ञापकत्वं प्रत्येव तज्जन्यज्ञानविषयत्वरूपज्ञाप्यतयेत्यर्थः।।
नन्वाद्यपक्षे पदार्थैकदेशेन कथमन्वय इत्यत आह-- दृश्यतेचेति।। उदाहरणरूपावयवमपि पराभिप्रेतं निराह-- उदाहरणेपीति।।

१.न तु इत्यादि नास्ति-ट.रा. २.ब्देनल-क.ग.रा. ३.ह्निज्ञाप्यत् -ग.ठ.रा. ४.सावसाय -क.रा.

पञ्चा-ववनि-भङ्गः) विभागवादः पु - २१७.

यथा महानस इत्युत्तरभागेनैव वा व्याप्त्युपस्थितेरन्यतरव्द्यर्थम्।।
अत एव दृष्टान्ताभिधान सामियकमिति चेन्न। अनुपयुक्तमप्यभिधेयमितिसमयबन्धस्यैवायोगात्। यस्य पुंसः
पूर्वभागेन न व्याप्तिस्मृति १ स्तं प्रति दृष्टान्तस्याप्युक्तिरिति चेन्न। तथात्वेऽवयवानियमसिद्धेः।।
यच्च सकलस्यापि साधनवतः साध्यवत्वरूपव्याप्त्यन्तर्गतसाकल्यार्थं यच्छब्दे २ वीप्सेत्युक्तमअ। तन्न। 'गौर्न पदा स्पष्टव्या''यस्योभयं हविरार्तिमा ३ र्छेत्'
यो ब्राह्मणायावगुरेत्तं शतेन यातया'दित्यादाविव वीप्सां विनाऽपि यो धूमवानिति सामान्यतोक्त्यैव तत्सिद्धेः।

शङ्कते -- अत एवेति।। पूर्वभागमात्रेण व्याप्त्युपस्थितेर्जातत्वादेव। सामयिकं समयबन्धकृतमित्यर्थः।। अवयवेति।। अवयवानियमस्यास्मत्पक्षस्य सिद्धेरित्यर्थः।।
गौरिति।। या गौः सा पदा न स्पष्टव्येत्यभिप्रायण 'गौर्न पदा स्पष्टव्ये'त्युच्यते वेदे, तथा 'यस्योभयं सायङ्कालीनं प्रातःकालीनं च हविः क्रिमिकीटादिवशेनार्तिं नाशमाप्नुयात् ऐन्द्रं पञ्चशरावमोदनं निर्वपे'दित्यत्र यस्य यस्य पुंस इति वक्तव्ये यस्येति सकृदेवोक्तिर्यथा, अत यो ब्राह्मणायावगुरेत् वधोद्योगं कुर्यात् तं शतयातनाख्यनरकिणं विद्यादित्यादौ योय इति वीप्सां विना यथोक्तिरित्यर्थः।।

१.धीस्तं -ग.रा. २.ब्दादौ -ग.रा. ३. र्छति अथ यो-ट.रा.

पु - २१८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

इदमेतदभिन्नम्, एतदसाधारणधर्माधिकरणत्वात् एतद्वदित्यभेदानुमाने सपक्षव्यक्तिभेदाभावेन वीप्सार्थाभावाच्च। क्वचिद्वीप्सा तु स्पष्टतार्था। अत एव विमतो भिन्नो मुक्तत्वाद्यदित्थं तत्तथेत्यादावाचार्यो १ क्तौ न वीप्सा।।
उपनयोपि हेतुवचनेन गतार्थः। अग्निव्याप्तधूमवांश्चायमिति त्वदभिमते उपनये उदाहरणसिद्धव्याप्त्यनुवादांशवैयर्थ्यं च। निगमनमपि प्रतिज्ञया गतार्थम्। न चोपसंहारार्थं तत्। विजातीयबहुप्रमेयाव्यवधानेन तदनपेक्षणात्। अन्यथा प्रत्येकं कण्टकोद्धारा २ नन्तरं तस्मात्सर्व-

ननु कथं तर्हि 'यद्यत्पापं प्रति जहि जगन्नाथ ३ तन्मे''यां यां प्रियः प्रैक्षते'त्यादौ वीप्सोक्तिरित्यत आह-- क्वचिदिति।। आचार्योक्ताविति।। तत्वोद्योते। उपनयाख्यावयवत्वं च निराह -- उपनयोपीति।। पञ्चमावयवं च निराह -- निगमनमपीति।। उपसंहारार्थमिति।।
पृथक्पृथग्वाक्योक्तानामेकबुद्ध्यारोहार्थमित्यर्थः। प्रत्येकं कण्टकेति।। नायमसिद्धः तल्लक्षणहीनत्वादित्युक्त्वा तस्मादसिद्धराहित्यादिदं साधकम्, नायं विरुद्धः तल्लक्षणराहित्यादित्युक्त्वा विरुद्धराहित्यादिदं साधकमिति प्रत्येकं ४ निगमनं स्यात्, तथा नायमाभासः तल्लक्षणैर्हीनत्वादित्यनन्तरं तस्मात्सर्वदोषराहित्यादिदं साधकमिति,

१.क्तिः -ट. २.रायानं-क. ३.नम्रस्य- इति पूरितम्-ड. ४.साधकं इत्यस्ति-ड.

स्वाता-नुन-दोषाः) अनुमादोषवादः पु - २१९.

दोषराहित्यादिदं साधकमित्याद्यपि निगमनं नियतं स्यात्। १ न च बाधादिशङ्कानिरासार्थं तत्। उदाहरणोपनयोक्तव्याप्तिपक्षधर्मताभ्यामेव स्वविरोधिसर्वदोषप्रतिक्षेपात्।।
तस्मात्पञ्चावयवादिनियमो न युक्त इति।।
पञ्चावयवादिनियमभङ्गः ।। २० ।।

तथा इदमसाधकं असिद्धत्वादिति दूषकतानुमानेपि तस्मादसिद्धत्वादिदमसाधकं तस्मादाभासकत्वादिदमसाधकमित्युपसंहारः स्यात्। ननु कदाचित्तत्रापीष्यत एवेत्यत आह -- नियतमिति।।
तदिति।। निगमनमित्यर्थः। पूर्वोक्तदिशेति भावः।।
पञ्चावयवादिनियमभङ्गः ।। २१ ।।

अथ स्वाभिमतानुमानदोषः ।। २१ ।।
अथानुमानदोष उच्यते ।।

अथ स्वाभिमतानुमानदोषः ।। २२ ।।
निर्दोषोपपत्तिरनुमेत्युक्तम्। तत्र दोषज्ञाने सत्येव तद्विविक्ततयोपपत्तिः सुज्ञानेत्यतः 'अथ निर्दोषोपपत्तिरनुमानमित्युक्तम् २ के तत्रोपपत्तिदोषा'इत्यादिना पद्धत्याद्युक्तेष्वनुमानदोषान्निष्कृष्य विवृण्वान आह -- अथेति।।
एवमनुमानो ३ पयुक्ताशेषोक्त्यनन्तरमित्यवसरसङ्गतिमथपदेन सूचयति।

१.नापि-ट. २.क्ते के-ठ. ३.नोक्तदौ -ट. एव मन्योपयुक्ता दोषोक्त्यनंतरं इत्वसरसंगतिरथपदेनेति सूचयति-ठ. नोपयुक्तदौषोक्त्यनन्तरं इत्यव -ड.

यत्सद्भावे लिङ्गाभिमतं प्रमां न जनयति सोनुमानदोषः। प्रमाजनकत्वाभावश्च संशयविपर्ययजनके १ ज्ञानाजनाके चानुगतः ।।
स च त्रिविधः। प्रतिज्ञाहेतुदृष्टान्तभेदेन।

अनुमानपदेनात्र लिङ्गत्वेनाभिमतमुच्यते। तथाचार्यदोषोक्तेरेवेयं प्रतिज्ञा न तु वचनदोषस्यापि। तस्यापि परम्परयाऽर्थदोषत्वेऽपि साक्षादर्थदोष एवात्रोच्यत इत्यर्थः। उपलक्षणमेतत्। प्रतिज्ञादृष्टान्तदोषश्चोच्यत इत्यपि ध्येयम्।।
यद्वाऽनुमानदोष एतावानिति निष्कृष्योच्यत इत्यर्थः। प्रतिज्ञादृष्टान्तदोषोक्तिरग्रेतनी अनुमानदोषविवेकार्था। अथावा अनुमानपदेनात्र प्रतिज्ञादृष्टान्तरूपपरिकरसहितं लिङ्गमुच्यते। तस्य दोष इत्यर्थः। अत एवाग्रे प्रतिज्ञादित्रितयदोषसाधारणं सामान्यलक्षणमुच्यते।।
यत्सद्भाव इति।। व्याप्त्यादिमल्लिङ्गस्य प्रमितिजनकत्वनियमादसंभवनिरासाय लिङ्गमित्यनुक्त्वा लिङ्गाभिमतमित्युक्तम्। स्वज्ञानद्वारेति योज्यम्। लिङ्गाभिमतस्य प्रमित्यजनकतापादकत्वं दोषत्वमित्यर्थः। २ एतस्य ज्ञानमात्रजनके ३ संशयविपर्ययजनके च भावाद ४ व्याप्तिरित्याह-- प्रमाजनकत्वाभावश्चेति।। च शब्देन ज्ञानाजनक ५ ग्रहः। पद्धत्यादौ 'यत्सद्भावे ६ लिङ्गाभिमतं ज्ञानं न जनयति, संशयविपर्ययौ वा करोती'त्युक्तिस्तु विस्पष्टार्थेति भावः। परोक्तहेत्वाभासानां सर्वेषां न हेतुदोषत्वं किं तु केषां चिदेवेति वक्तुं विभागमाह-- स चेति।। प्रतिज्ञेति।। प्रतिज्ञाहेतुपदाभ्यां तदर्थग्रहणम्। यद्वाऽर्थदोष एव तद्बोधकवचनस्यापीति प्रतिज्ञाहेत्वित्येवोक्तम्।

१. कंचानु ग - ग.रा. २.नन्वस्य-ट. ३.सत्वेपि संशयजनके च अभा इत्यस्ति -ट. ४.वान्नाव्या -ट.ठ.ड. ५.परिग्र- ठ. संग्र-ट. ६.वाल्लिङ्गानुमतं-ड.

स्वाता-नुन-दोषाः) अनुमानदोषवादः पु - २२१.

तत्र प्रतिज्ञातार्थस्य प्रमाणविरोधः प्रतिज्ञादोषः। स द्विविधः। १ बलवत् प्रमाणविरोधः। समबलप्रमाणविरोधश्चेति। हीनबलस्याकिंचित्करत्वात्। समबलत्वं चाभिमानिकम्।।
द्वयमपि पुनस्त्रिविधम्। प्रत्यक्षानुमानागमविरोधभेदात्। अनुमानविरोधोपि द्विविधः। तेनैव हेतुना हेत्वन्तरेण २ चेति। तत्राद्यः परैः प्रकरणसम इत्युच्यते। द्वितीयस्तु सत्प्रतिपक्ष इति।

'त्रिवधो विरोधः प्रतिज्ञाहेतुदृष्टान्तभेदेने'त्यादिप्रमाणलक्षणानुरोधेनायं निर्देषोऽग्रे लक्षणोक्तिरपीति ज्ञेयम्। साध्यधर्मविशिष्टो धर्मी प्रतिज्ञार्थः तस्येत्यर्थः। हीनबलप्रमाणविरोधस्यापि सत्वास्त्रिविध इति वाच्यमिति आह-- हीनबलस्येति।। वस्तुनो द्वैरूप्यापातेन समबलत्वमसंभावितमित्यत आह-- समेति।। पुनस्त्रिविधमिति।। समबलप्रत्यक्षविरोधः, प्रबलप्रत्यक्षविरोधः, समबलानुमानविरोधः, प्रबलानुमानविरोधः, समबलागमविरोधः, प्रबलागमविरोध इति त्रिविध इत्यर्थः। त्रिविधमध्ये द्वितीयमपि विभज्याह -- अनुमानेति।।
ननु पक्षद्वयेपि त्रिरूपो हेतुः प्रकरणसम इति समबलो भवति। स च न युक्तः। शब्दोऽनित्यः गुणत्वात्, शब्दो नित्यः गुणत्वादित्यत्रानित्यत्ववादिनो हि घटरूपादिः सपक्षः, नित्यत्ववादिनः स एव विपक्षः। तथा च सपक्षे सत्वं ततो व्यावृत्तत्वं च द्वयमेकस्य न

युक्तम्। अत उभयनिरूपितव्याप्त्योरेकत्रा ३ युक्तत्वात्तेनैव हेतुना विरोधोऽसम्भवतीत्याशङ्क्य निराह -- न चाद्य इति।।

१.प्रबल प्र-ग.ट.रा. २.इति इति नास्ति-ग.ट.रा. ३.रेकत्वायुक्त-ड.

पु - २२२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

न चाद्योसम्भवी। एकस्मिन् पक्षे साध्यतदभावव्याप्ययोरिवैकस्मिन् हेतौ साध्यतदभावव्याप्त्योरप्यभिमानतः सम्भवात्।।
हेतोः साध्यप्रमाजननसामर्थ्याभावो हेतुदोषः। स द्विविधः असिद्धिरव्याप्ति १ श्चेति। समुचितदेशे हेतोरभावोसिद्धिः। व्याप्तिविरहोऽव्याप्तिः। सा च त्रेधा संभवति। साधनस्य साध्याभावेनेव साध्येनाप्यसम्बन्धेन सत्यपि साध्यसम्बन्धे तदभावेनापि सम्बन्धेन साध्याभावेनैव सम्भन्धेन चेति।।

व्याप्ययोरिवेति।। सत्प्रतिपक्षहेत्वोरिवेत्यर्थः। एकस्यैव हेतोः वादिनः साध्यव्याप्यत्वाभिमानः। प्रतिवादिनस्तदभावव्याप्यत्वाभिमान इति सपक्षसत्वादिकमप्यभिमान एवेति ध्येयम्। एवं प्रतिज्ञादोषं निरूप्य हेतुदोषमाह-- हेतोरिति।। लिङ्गस्येत्यर्थः। सामर्थ्येति।। व्याप्तिसमुचितदेशवृत्तित्वरूपसामर्थ्याभाव इत्यर्थः। अनुगतसामान्याभावे विभागायोगात्पद्धत्याद्यनुक्तमपि स्वयमाह-- व्याप्तीति।। अन्यथानुपपत्तिरूपव्याप्तिविरह इत्यर्थः। साधनस्य साध्याभावेनेवेत्यादित्रयमपि परैः क्रमादसाधारणानैकान्तिकसाधारणानैकान्तिकविरुद्धशब्दैर्गीयते।।

१. प्तिरिति - ग. रा.

व्याप्तिग्रहणानानुकूल्यं दृष्टान्तदोषः। स द्विविधः। साध्यवैकल्यं साधनवैकल्यं चेति। तत्र प्रमाणविरोधाख्य आद्यो दोषः प्रत्यक्षागमसाधारणः। इतरौ त्वनुमानासाधारणौ।।
उक्तं हि प्रमाणलक्षणटीकायाम्। अत्र प्रतिज्ञाविरोधः साधारणः। इतरौ त्वसाधारणाविति। न च हेतुदोषविभागस्य न्यूनता। पराभिमताः सव्यभिचारविरुद्धव्याप्यत्वासिद्ध्यो अव्याप्तावन्तर्भूता इति बाधप्रतिरोधौ तु
हेतुदोषावेव नेति आश्रयासिद्धिव्यधिकरणासिद्धी तु सत्यां व्याप्तौ न दोषाविति वक्ष्यमाणत्वात्। सिद्धसाधनस्य तु मन्मते स्वार्थानुमानेऽदोषत्वात्। परार्थानुमाने चासङ्गतावन्तर्भावात्। अनुकूलतर्काभावस्य प्रतिकूलतर्कस्य
चाव्याप्तावन्तर्भावात्। उपाधेरपि --

प्रतिज्ञाहेतुदोषौ निरूप्य दृष्टान्तदोषमाह-- व्याप्तीति।। ग्रहणपदेन प्रमाग्रहः। यस्मिन् सति व्याप्तिर्न प्रमातुं शक्यते स दृष्टान्तदोषः। एवं विरोधत्रयं निरूप्य तद्विवेकमाह-- तत्रेति।। प्रतिज्ञाहेतुदृष्टान्तविरोधमध्ये। इतरौ त्विति।। हेतुदृष्टान्तदोषौ। निरूपितविभागस्य फलं वक्तुमाह-- न चेति।। परोक्तानां सव्यभिचार विरुद्धसत्प्रतिपक्षबाधितानां मण्याद्युक्तानां तदवान्तरभेदानां च बहूनां सत्वात्। तेषां चेहापरिगणनादिति भावः। कुतो न न्यूनतेत्यत आह-- पराभिमता इति।। इति शब्दद्वयस्याप्यग्रेतनेतिशभ्दस्येव वक्ष्यमाणत्वादित्यनेनान्वयः। असभङ्गताविति।। विरोधोसङ्गतिश्चेति द्वावर्थदोषौ। तत्र विरोधस्यैवात्र प्रपञ्चनं कृतम्। न त्वसङ्गतेः।

सत्प्रतिपक्षेऽव्याप्तौ चान्तर्भावस्योक्तत्वात्। व्यर्थविशेषणा १
देश्चाधिक्येन्तर्भावात्।।
तस्मादसिद्धिरव्याप्तिश्चेति द्वावेव हेतुदोषौ ।।
स्वाभिमतानुमानदोषः २ ।। २१ ।।

सा त्वाकाङ्क्षाविरहोऽसङ्गतिरित्यादिना पद्धत्यादौ प्रपञ्चितेतीह त्यक्ता। इष्टापत्तिः सिद्धसाधनत्वादसङ्गतमेवेति प्रमाणलक्षणाद्युक्तेरिति भावः। उक्तत्वादिति।। उपाधेर्दूषकताबीजौक्तिप्रस्तावे उक्तत्वादित्यर्थः।।
व्यर्थेति।। यद्यपि, 'विशेषणे, वैयर्थ्यमेकासिद्धौ च विशिष्टासिद्धिरेव हि'इति भक्तिपादीयानुव्याख्यानसुधायां विशेषणवैयर्थ्ये तु विशिष्टस्य व्याप्यत्वाभावाद्दोषत्वमित्युक्तम्। तथाऽपि यद्बाधिक्यान्तर्भूतमेवैतदित्यप्युक्तत्वादेवमुक्तमित्यदोषः ।।
स्वाभिमतानुमानदोषाः ।। २२ ।।

अथ स्वमते बाधादेर्व्यभिचाराद्यसङ्करः ।। २२ ।।
ननु पक्षे साध्याभावप्रमितिदशायां ३ हेतुरप्रमितः प्रमितो वा।

अथ स्वमते बाधादेर्व्याभिचारासङ्करः ।। २३ ।।
प्रतिज्ञादोषस्य हेतुदोषात्पार्थक्यं यदुक्तं तदयुक्तम्। हेतुदोषाभ्यां असिद्ध्यव्याप्तिभ्यामेव सङ्ग्रहसंभवादिति भावेन --
'स्ववाक्येन विरोधेऽपि नैव साधकतां व्रजेत्'।
इति युक्तिपदीयानुव्याख्यानसुधोक्तं विवृण्वान आक्षिपति -- नन्विति।। प्रबलप्रमाणविरोधापेक्षयोक्तं साध्याभावप्रमितीति। प्रतिरोधापेक्षया तु साध्याभावज्ञानदशायामिति ध्येयम्।

१.णत्वादे-ट.रा. २.षाः -ट.रा. ३.तत्रेत्यधिकम् -ट.रा.

स्वते-बादे-र्व्यचा-द्यङ्गरः) अनुमादोषवादः पु - २२५.

आद्ये प्रमित्यसिद्धिः। द्वितीये पक्ष एव व्यभिचारो ज्ञात इति क्लृप्तेन व्यभिचारादिनैव
दुष्टत्वेनासङ्कीर्णोदाहरणाभावात्किं बाधप्रतिरोधयोर्दोषत्वकल्पनयेति चेत् न। पक्षद्वयेऽपि दोषाभावात्।।
तथा हि -- आद्यस्तावदस्तु। प्रमित्यसिद्धिर्हि करणसामर्थ्यविघटनद्वाराऽनुमितिप्रतिबन्धिका। हेतुवचनाधीनोपस्थितिका च। बाधादिस्तु साक्षा १ त्पतिबन्धकः। प्रतिज्ञाधीनोपस्थितिकश्च। न चान्तरङ्गे पूर्वोपस्थिते प्रत्यक्षा २ दौ क्लृप्ते च -

व्यभिचारो ज्ञात इति।। प्रबलप्रमाणविरोधे व्यभिचारज्ञानं निश्चयरूपं, समबलविरोधपक्षे तु संशयरूपं ध्येयम्। अत एव ज्ञात इति सामान्योक्तिः। न च पक्षीयव्यभिचारसन्देहोनुकूल एव नानुमानप्रतिकूलः तथात्वेऽनुमानमात्रोच्छेदापात्तेरिति चेन्न। स्वारसिकव्यभिचारसन्देहस्यानुकूलत्वेऽपि प्रमाणविरोधा ३ द्याहितसन्देहस्य प्रतिकूलत्वात्। अन्यथा सन्दिग्धोपाध्योदरदोषत्वापातादिति भावः। पक्षद्वयेपीति।। अप्रमितत्वप्रमितित्वरूपपक्षद्वय इत्यर्थः।। सामर्थ्येति।।
समुचितदेशस्थत्वरूपसामर्थविघटनद्वारेत्यर्थः।
अनुमितिविषयाभावानवगाहिनस्तथैव प्रतिबन्धकत्वादिति भावः।। हेतुवचनेति।। प्रतिज्ञामात्रेण तदनुपस्थितेरितिभावः।। प्रतिज्ञाधीनेति।। 'प्रतिज्ञामात्रेणास्यस्फुरणा'दिति प्रमाणलक्षणटीकोक्तेरिति भावः।

१.त्तत्प्रति -रा. २. दिक्षु क्लृ -ट.रा. ३. धाद्ध्या -ट. धादाहि -ठ.

पु - २२६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

बाधादौ १ लब्धे तद्विपरीतस्यासिद्धत्वस्य प्रतीक्षा युक्ता। अन्यथोच्यमानग्राह्ये निग्रहे लब्धेपि उक्तग्रह्यः प्रतीक्षेत।।
द्वितीयो वाऽस्तु। हेतुर्हि साध्याभाववार्तानभिज्ञेन ज्ञानान्तरेण पक्षे प्रमितः साध्याभावस्तु हेतुवार्तानभिज्ञेन बाधेन। हेतोः साध्याभावसामानाधिकरण्यरूपव्यभिचारस्तु न केनापि। तद्विषयकस्य साध्याभाववति हेतुरिति ज्ञानस्याभावात्। तथा च बाधाद्युपस्थितिदशायां सन्नपि व्यभिचारो न धीस्थ इति द्राग्धीस्थत्वाद्विषयापहारित्वेनोत्कटत्वाच्च बाधादिरेव दोषः। यथा मूको वक्तेत्यादौ प्रमाणविरोधे सत्यपि द्राग्धीस्थः प्रतिज्ञापदविरोध एव दोषः। यथा च माता वन्ध्या प्रमेयत्वादित्यत्र व्यभचारे सत्यप्युत्कटः प्रतिज्ञाविरोध एव दोषः। अस्तु वा साध्याभाववति पक्षे हेतुरिति विशिष्टज्ञानम्। तथापि पक्षे साध्यं नेति ज्ञानांशः पक्षे हेतुरिति ज्ञानांशनिरपेक्ष एव दोषः।

त्रेणास्यस्फुरणा'दिति प्रमाणलक्षणटीकोक्तेरिति भावः।। उच्यमानेति।। मूकोहमित्यादौ स्वक्रियाविरोध उच्यमानग्राह्य प्रमाणविरोध उक्त्यनन्तरग्राह्यत्वादुक्तग्रह्यः। पूर्वं हेतोः साध्याभावसामानाधिकरण्यरूपव्यभिचारो नोपस्थित इत्युपेत्य पृथग्दोषत्वं बाधादेरुक्तम्। इदानीं व्यभिचारोपस्थितिमभ्युपेत्यापि पृथग्दोषत्वं बाधादेराह -- अस्तु वेति।।

१.दौ सिद्धे त -ट.रा.

विषयापहारित्वात्। पक्षे हेतुरिति ज्ञानांशस्तु पक्षे साध्यं नेति ज्ञानांशसापेक्ष एव दोषः। तन्निरपेक्षस्य तस्य गुणत्वात्। तथा च यथा साधारण्ये सपक्षवृत्तित्वे सत्यपि विपक्षवृत्तित्वमेव दोषः तथा पक्षे हेतुज्ञाने सत्यपि प्राप्ताप्राप्तविवेकेन पक्षे साध्याभावप्रमारूपबाधाद्यंश एव दोषः।।
स्वमते बाधादर्व्यभिचाराद्य १ सङ्करः ।। २२ ।।

साधारण इति।। पक्षसपक्षविपक्षवृत्तिरूपसाधारणानैकान्तिक इत्यर्थः। विपक्षवृत्तित्वमेवेति।। पक्षसपक्षवृत्तित्वस्यानुमित्यनुकूलत्वेन विपक्षवृत्तित्वमात्रस्यैव प्रतिकूलकत्वेन तस्यैव दोषताया हेत्वाभासग्रन्थे मण्यादावुक्तेरिति भावः।। प्राप्ताप्राप्तेति।। दोषत्वेन प्राप्त साध्याभावप्रमांशः दोषत्वेनाप्राप्तः हेतुसत्वप्रमांशः इति प्राप्ताप्राप्तविवेकेनेत्यर्थः।।
स्वमते बाधादेर्वभिचारा २ सङ्करः ।। २३ ।।

अथ बाधप्रतिरोधयोः प्रतिज्ञादोषत्वसमर्थनम्।।
केचित्तु बाधप्रतिरोधौ हेतुदोषावित्याहुः ।

अथ बाधप्रतिरोधयोः प्रतिज्ञादोषत्वसमर्थनम् ।। २४ ।।
नन्वथापि बाधप्रतिरोधयोरसिद्ध्यव्याप्तिरूपहेतुदोषत्वाभावेपि बाधितविषयत्वादिरूपं पृथगेव हेतुदोषत्वमस्तु तथैव मण्याद्युक्तेः प्रतिज्ञादोषत्वं कथमित्यतस्तत्समर्थयितुमाह -- केचित्विति।। तार्किकादयः।।

१.रासं -ट.रा. २.रस - ठ.ड.

पु - २२८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

कुठारे कुण्ठत्वादिदोषाभावेप्याकाशस्य छेदनायोग्यत्वेनैव १ छेदानुत्पत्तिवत्,
चक्षुरादौ
काचादिदोषाभावेप्यतिदूरत्वातिसामीप्यसमानाभिहारसादृश्याद्यर्थदोषेणैव प्रत्यक्षप्रमानुत्पत्तिवत्, अग्निना सिञ्च २ तीत्यादिशब्दे निरभिधेयत्वन्यूनत्वादिशब्ददोषाभावेप्ययोग्यत्वरूपार्थदोषादेव शाब्दप्रमानुत्पत्तिवदनित्यो घटः प्रमेयत्वादित्यादौ प्रमेयदोषाभावेपि हेतुदोषेणैव दुष्टत्ववच्च, सर्वं तेजोऽनुष्णं प्रमेयत्वादित्याद्यनुमाने हेतुदोषाभावेपि प्रतिज्ञाता ३ र्थस्य प्रमाणान्तरविरुद्धत्वेन साधनानर्हत्वरूपप्रमेयदोषेणैवानुमानिकप्रमानुत्पत्तेर्वक्तव्यत्वात्।।

'विरोधोपि त्रिधैवस्यात्प्रतिज्ञार्थविरुद्धता।
लिङ्गराहित्यमव्याप्ति'
रित्यादियुक्तिपादीयानुव्याख्यानसुधोक्तं हृदि कृत्वा करणस्यादुष्टत्वेप्यर्थदोषनिबन्धनकार्यानुत्पत्तिस्थले ४ दोषस्यैव वाच्यत्वादिति सदृष्टान्तमाह-- कुठारे ५ ति।। समानेति।। क्षीरनीरादौ माषराशिमष्यादौ सादृश्यसूक्ष्मत्वरूपार्थदोषेणेत्यर्थः। विजातीयकरणं सजातीयप्रत्यक्षशब्दरूपकरणं च दृष्टान्तीकृत्यान्तरङ्गानुमानरूपकरणं च दृष्टान्तयति -- अनित्य इति।। प्रमेयेति।। साध्यदोषाभावेपीत्यर्थः। हेतुदोषाभावेपीति।। सर्वतेजसः पक्षतया तदन्यस्य व्यभिचारस्थलस्याभावेन व्यभिचारदोषाभावात् असिद्ध्यादेरनाशङ्क्यत्वादिति भावः।।

१.छिदा- ट.रा. २.ञ्चोदित्या-ट.रा. ३.ज्ञार्थं -ट.रा. ४.लेर्थ -ठ. ५.र इ-ट.ड.

वाप्र-रोयोः-प्रज्ञा-दोत्व-सनम्) अनुमादोषवादः पु - २२९.

किंच बाधप्रतिरोधयोरनुमितिग्राह्यविरुद्धविषयत्वेन परमुखनिरीक्षणनिरपेक्षतया प्रत्यक्षादाविवानुमानेपि साक्षादेवानुमितिरूपफलप्रतिबन्धकत्वे संभवति बकबन्धन्यायेन करणवैकल्यसंपादनद्वारा
फलप्रतिबन्धककल्पनमयुक्तम्। अन्यथा सादृश्याद्यर्थदोषेणैव दूषिते प्रत्यक्षे काचादिकरणदोषः कल्प्येत।।

ननु बाधस्य पक्षनिष्ठत्वेन प्रमिताभावप्रतियोगिसाधकत्वे न रूपेण हेतुदोषत्वोक्तावप्या १ नुमानिकप्रमानुत्पत्तिर्युक्तेति वादिनं प्रति लक्षणटीकोक्तरीत्या दोषान्तरं चाह -- किंचेति।। प्रत्यक्षादाविति।। पीतः शङ्ख इत्यादिप्रत्यक्षे श्वेतः शङ्ख इति प्रत्यक्षस्य यथा साक्षाद्ग्राह्यविरुद्धविषयकत्वेन पीतत्वप्रत्यक्षप्रतिबन्धकत्वं, घटोस्ति, घटो नास्तीत्यनयोः शब्दज्ञानयोर्यथा विरुद्धविषयकत्वेन प्रतिबध्यप्रतिबन्धकभावस्तथेत्यर्थः।।
बकबन्धेति।। केन चित्कंचित्प्रतिबन्धोपायं ब्रूहीति पृष्टे वदति। बकस्य शिरसि नवनीते निहिते सत्यातपेन नवनीते द्रवीभूते चक्षुषोर्मध्ये पतिते सति चक्षुषोर्निमीलनं यदा बकस्य भवति तदा तद्बन्धनं कार्यमिति। तत्र नवनीतनिधानदशायामेव बन्धसंभवे पश्चाद्बन्धनोपायो यथा वक्रस्तथा व्याप्तिरूपकरणवैकल्यसंपानद्वारा हेतुदोषत्वकल्पनमपि

वक्रत्वादयुक्तमित्यर्थः। यद्वा परामर्शरूपकरणे व्याप्तिविषयकत्ववैकल्यसंपादनद्वारेत्यर्थः।।

१. प्यनुमानत्वात्तिर्यु - ट.

पु - २३०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

अपि च यो हि यन्निष्ठतया ज्ञातः सन्ननुमितिप्रतिबन्धकः स तस्य दोषः। अन्यथा प्रतिज्ञाहान्यादिकमपि हेतुहान्यादिकं स्यात्। नित्यः शब्दः अनित्य इति प्रतिज्ञाश्रिताः स्ववचनविरोधादयः अनित्यो वर्ण इति मामांसकप्रयुक्त प्रतिज्ञाश्रितापसिद्धान्तादयश्य हेतुदोषाः स्युः। न च बाधादिर्हेतुनिष्ठतया ज्ञातस्तत्प्रतिबन्धकः। प्रतिज्ञानन्तरं हेतूपस्थितेः प्रागेव प्रतीतेन तेनानुमितिप्रतिबन्धात्।।
यदि च पक्षनिष्ठत्वेन प्रमिताभावप्रतियोगिसाधकत्वं बाध इति बाधस्य हेतुनिष्ठत्वेन ज्ञानं कल्प्यते।

गुरुत्वान्न हेतुदोषत्वकल्पनं युक्तमित्युक्तम्। कल्पकाभावाच्च न हेतुदोषत्वं युक्तमिति सामान्यन्यायं विपक्षबाधपूर्वमाह-- अपि चेति।। प्रतिज्ञेति।। येन यद्यथा प्रतिज्ञातं तेन तस्य तथा परित्यागः प्रतिज्ञाहानिः, आदिपदेन प्रतिज्ञान्तरप्रतिज्ञाविरोधप्रतिज्ञासन्न्यासादिग्रहः। पूर्वं शब्द इत्यविशिष्टतयोक्ते साध्यभागे वर्णात्मको नित्य इति विशेषणप्रक्षेपः प्रतिज्ञन्तरम्। मिथो व्याघातः प्रतिज्ञाविरोधः। स्वोक्तापलापः प्रतिज्ञासन्न्यासः। प्रतिज्ञाहान्यादिनिग्रहस्थानमपि त्यक्तप्रतिज्ञकत्वादिरूपेण हेतुहान्यादिकं स्यादित्यर्थः। हेतुदोषाः स्युरिति।। विरुद्धप्रतिज्ञकत्वादिरूपेण हेतुनिष्ठतयेति भावः। व्याप्तिं समर्थ्य पक्षे नास्तीत्याह -- न चेति।।

बाधकभावाच्च न हेतुदोषत्वकल्पनं युक्तमित्याह -- यदि चेति।। यद्वा बाधादिरपि हेतुनिष्ठत्वेनैव ज्ञातो दोषो नान्यथेति वादिनं प्रतिबाधकमाह -- यदि चेति।।

वाप्र-रोयोः-प्रज्ञा-दोत्व-सनम्) अनुमादोषवादः पु - २३१.

तर्हि पक्षनिष्ठत्वेन प्रमिताभावप्रतियोगिसाध १ कत्वमसिद्धिः व्याप्तिराहितसाधक २ त्वमव्याप्तिरित्यसिद्ध्यव्याप्त्येरपि साध्यनिष्ठत्वेन ज्ञानं कल्प्यताम्।।
अपि च बाधादिः प्रत्यक्षादिसाधारणः। हेत्वाभासत्वे तु हेत्वसाधारणदोषत्वं तन्त्रम्। अन्यथा मनोनवधानादिरपि हेत्वाभासः स्यात्।।
ननु साधारण्येऽपि ज्ञायमानत्वेनानुमितिप्रतिबन्धकतया मनोऽनवधानादिविलक्षणत्वाद्बाधादेर्हेत्वाभासत्वमिति चेन्न। त्वन्मतेऽनुमितिप्रतिबन्धकसाध्यसिद्धिं प्रति विषयस्य साध्यस्यापि हेत्वाभासत्वात्।।

प्रतिज्ञाविरोधः साधारणः इतरौ त्वसाधारणाविति लक्षणटीकासूचितयुक्त्या च हेतुदोषत्वं निराह-- अपि च बाधादिरिति।। प्रतिरोध आदिपदार्थः। तावता कुतो न हेतुदोषतेत्यत आह -- हेत्विति।। अन्यथेति।। प्रत्यक्षादिसाधारणदोषस्यापि हेत्वाभासत्व इत्यर्थः वैषम्यमाशङ्क्य निराह-- नन्वित्यादिना ।। साधअयस्यापीति।। साध्यसिद्धेः प्रतिबन्धकत्वे साध्यस्यापि ज्ञायमानतया प्रतिबन्धकत्वादिति भावः।।
बाधादेः प्रत्यक्षादिसाधारण्यमेवासिद्धं येन हेतुदोषत्वं न स्यादिति शङ्कते --नन्विति।।

१. धनक- रा. २.धनक -रा.

पु - २३२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

ननु प्रत्यक्षादावुत्पन्नस्य ज्ञानस्य बाधेनाप्रमाणत्वमेव बोध्यते दिङ्मोहादौ दर्शनात् १ अनुमितौ तूत्पत्तिरेव प्रतिबध्यते इत्यसाधारण्यमिति चेन्न। २ तथापि ३ शब्दस्यात्यन्तासत्यपि धीहेतुत्वेन ४ लिङ्गाभासस्यापि तद्धेतुत्वावश्यंभावात् ५ मत्साधारण्यपरिहारात्। विषयबाधेऽविशिष्टे ६ शब्दाभास एवासदर्थबोधको न तु लिङ्गाभास इत्यस्य च परिभाषामात्रत्वात्। दृश्यते च बाधावतारानन्तरमपि त्वदनुमितमसदित्यनु ७ वादः।।
किं च यः करणसामर्थ्यरूपव्याप्तिपक्षधर्मतान्यतरविघटनरूपः स एव हेत्वाभासः। बाधादिस्तु न तथा। करणासंस्पर्शित्वात्।।

बाधेन विपरीतज्ञानेनेत्यर्थः।। उत्पत्तिरेवेति।। अनुमित्युत्पत्तिरेव बाधेन प्रतिबध्यत इत्यर्थः। उत्पत्तिप्रतिबन्ध एवासिद्धः येनासाधारण्यं स्यादित्याह -- शब्दाभासस्येति।। शशविषाणमस्तीत्यादिवाक्याद्गोविषाणमस्तीति वाक्यादिव बुद्ध्युत्पत्तेर्वादिवाक्यादसदर्थकात्प्रतिवादिनो बोधोत्पादनस्य योग्यतावादे व्युत्पादितत्वादिति भावः।।
ननु तत्र बाधावतारानन्तरं शब्दादवगतमस ८ देवेत्यनुभवादस्तु शब्दाभासस्याबोधकत्वं न तु लिङ्गाभासस्य। तथाननुभवादित्यत आह -- दृश्यते चेति।। करणसंस्पर्शितत्वादिति।।

१.परोक्षायां इत्यधिकम् -ग.ट.रा. २.तथापि इति न -ग.ट.रा. ३.ब्दाभासस्या-ग.ट.रा. ४.त्वदर्शनेन-ग.ट.रा. ५.मत्साधारण्यापरिहारात् इति न -ग.रा. ६.ष्टेपि -ग.ट.रा. ७.नुभवः-ग.ट.रा. ८.दित्यनु-ट.

वाप्र-रोयोः-प्रज्ञा-दोत्व-सनम्) अनुमादोषवादः पु - २३३.

तस्माद्बाधप्रतिरोधौ साधनाहेत्वरूपप्रेमेयदोषत्वात्, साक्षादेवानुमितिप्रतिबन्धकत्वात्, प्रतिज्ञानन्तरं हेतूपस्थिततः प्रागेव प्रतिभासात्, प्रत्यक्षशब्दसाधारण्यात्, करणसामर्थ्याविघट १ नत्वाच्च न हेतुदोषौ। किं तु प्रतिज्ञादोषाविति।।
या तु टीकाकारीत्या --
'अदृष्टे व्यभिचारेतु साधकं तदितिस्फुटम्।
ज्ञायते साक्षिणैवाद्वा मानबाधे न तद्भवेत्।।
इत्यनुव्याख्यानस् प्रत्यक्षबाधेनानुमानस्य व्यभिचारो भवतीति व्याख्या सा व्याप्तिग्रहणदशाभिप्राया। तदा प्रतिज्ञादिविभागाभावात्। अनुमितिदशायां तु बाधो विषयापहारेण प्रतिज्ञा दोष एव। अन्यथा प्रमाणविरुद्धार्थप्रतिज्ञा प्रतिज्ञाविरोध इति प्रमाणलक्षणविरोधात्।।
याऽपि अनुव्याख्याने --

साध्याभावप्रमायां २ करणाप्रतीतेरिति भावः। तस्मादित्येतत्प्रागुक्तरीत्या पञ्चधा व्याचष्टे -- साधनानर्हत्वेत्यादिना।। भक्तिपादीयसुधाविरोध ३ माशङ्क्य तदभिप्रायोक्त्या निराह-- यात्विति।। सेत्यन्वयः। व्याप्तिग्रहणेति।। व्याप्तिग्रहणसमयेऽव्याप्तेरुत्थापको बाध इति पक्षस्त्विष्यत एव 'मानबाधे न तद्भवेदिति वक्ष्यमाणत्वा'दिति युक्तिपादीयसुधोक्तेरिति भावः। युक्तिपादीयानुव्याख्यानोक्तिविरोधंच निराह -- याऽपीति।। तत्र प्रतिज्ञार्थविरोध इत्येवोक्तावपि सुधायां वक्ष्यमाण--

१.टकत्वा-ग.ट.रा. २.याः -क.ठ. ३.रोधायाश --ड.ठ.

पु - २३४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

'विरोधोपि त्रिधैव स्यात्प्रतिज्ञार्थविरुद्धता।
लिङ्गराहित्यमव्याप्तिः'
इति बाधप्रतिरोधयोरसिद्ध्यादिना सह हेतुदोषत्वोक्तिः साऽपि बाधादिनैव दूषिते विषये प्रवर्तमानस्य हेतोरप्यविषयवृत्तित्वं नाम दोषोस्तीत्यभिप्रेत्यैव । न तु
बाधादिन् विषयदोष इति।।
बाधप्रतिरोधयोः प्रतिज्ञादोषत्वसमर्थनम्।। २३ ।।

विभागानुरोधेन बाधप्रतिरोधयोरित्यनुवादः। इत्यभिप्रत्येति।। तथैऽवसुधायां प्रतीतेरिति भावः।।
बाधप्रतिरोधयोः प्रतिज्ञादोषत्वसमर्थनम्।। २४ ।।

अथ साध्यसाधनवैकल्ययोर्दृष्टान्तदोषत्वसमर्थनम् ।। २४ ।।
ननु साध्यविकलो दृष्टान्तो विपक्ष एवेति तत्र वर्तमानो हेतुः सपक्षान्तरवृत्तौ सत्यां पक्षत्रयवृत्तित्वात्साधारणः।

अथ साध्यसाधनवैकल्ययोर्दृष्टान्तदोषत्वसमर्थनम् ।। २५ ।।
साध्यवैकल्यादेर्हेतुदोषत्वेन १ पार्थक्यं प्रागुक्तमयुक्तमित्याशङ्क्य निराह -- नन्वित्यादिना ।।

१.संग्रहसंभवाद्दृष्टान्तदोषत्वेन इत्यधिकम् -ठ.ड.

सामान-वैल्ययो-दृन्तदोत्व-सनम्) अनुमादोषवादः पु - २३५.

असत्यां तु सपक्षवृत्तौ पक्षविपक्षयोरेव वर्तमानत्वाद्विरुद्धः। साध्यधर्मवति दृष्टान्ते साधनविकले हेतुर्व्याप्यत्वासिद्ध इति दृष्टान्ताभासो हेत्वाभासान्तर्गत एवेति चेन्न। बाधादेः पक्षाश्रिततयेवाव्याप्त्यादेर्हेत्वाश्रिततयेव च साध्यवैकल्यादेर्दृष्टान्ताश्रिततयैव प्रतिभासात्। प्रतिभासानुसारेण चोद्भाव्यात्वात्। उद्भाव्यस्य चैव व्युत्पाद्यत्वात्।।
किंचोपजीव्यत्वेनानुमानाङ्गदृष्टान्तदोषेणैवानुमाने दुष्टे कथं पिष्टपेषकहेत्वाभासप्रतीक्षा। अन्यथा बाधे पक्षस्यैव विपक्षत्वात् बाधो व्यभिचारेऽ १ न्तर्भूतः स्यात्। सव्य २ भिचारविरुद्धौ ३ च व्याप्तिहीनत्वाव्याप्यत्वासिद्धेऽन्तर्भूतौ स्याताम्। असाधारणे च सपक्षस्य सपक्षस्य साधनवैकल्यावश्यंभावात्सोपि साधनवैकल्येन्तर्भूतः स्यात्।

'साध्यसाधनवैकल्यं दृष्टान्तस्य विशेषणे'।
४ इति भक्तिपादीयानुव्याख्यानसुधोक्तरीत्या दृष्टान्तदोषत्वमुपपादयति -- बाधादेरिति।। ननु साध्यवैकल्यादिस्थले व्यभिचारादेरपि सामग्रीबलेन स्पुरसणसंभवात् व्यभिचारादिरप्युद्भाव्य इति हेत्वाभासत्वेन व्युत्पादनं युक्तमिति चेत्तदाऽप्युपजीव्यत्वाद्दृष्टान्तदोष एवेत्याह-- किंचिति।। विपक्षेऽनेकबाधकसत्वा ५ च्च दृष्टान्तदोषत्वमेव युक्तमित्याह -- अन्यथेति।।

१.रान्त -ग.ट.रा. २.व्यभिचा - ग.रा. ३.विरुद्धौचाव्याप्त्यधीनत्वात् व्याप्यत्वासिद्धौ अन्तर्भू -ट. विरुद्धौ च व्या-रा. ४.इत्यादि
भ -ठ. ५.सद्भावाच्च -ठ.

अनुपसंहारिणि च दृष्टान्ताभाव आवश्यक इति सोपि दृष्टान्ताभासेन्तर्भूतः स्यात्।।
किंच जीवच्छरीरजातं सात्मकं प्राणादिमत्वात् घटवदित्यत्र शब्दोऽभिधेयः प्रमेयत्वाव्यतिरेकेण घटवदित्यत्र च क्रमेण व्यतिरेकव्याप्तेरन्वयव्याप्तेश्च सत्वेन हेतुदोषाभावेपि धूमानुमानेपि ह्रदे दृष्टान्तिते हेतुदोषाभावेपि दृष्टान्तो दुष्ट इति तद्दोषः पृथगेव। तत्राप्यनुपदर्शितव्याप्तिकत्वाव्याप्यत्वासिद्धिरेवेति चेन्न। तथाप्यथदोषाभावात्। तत्रैव माहनसे दृष्टान्तिते व्याप्यत्वासिद्धिर्नेति तस्यानित्यदोषत्वापाताच्च । ह्रदे दृष्टान्तितेपि यत्र धूमस्तत्राग्निरिति पूर्वभागेन व्याप्तेरुपदर्शितत्वाच्च।।

हेतुदोषसाङ्कर्यमात्रेण हेतुदोषत्व इत्यर्थः। अनुपसंहारिणिचेति।। सव्यभिचाभेदभिन्ने सर्वमनित्यं कार्यत्वादित्यादावित्यर्थः। हेतुदोषासंङ्कीर्णत्वाच्च दृष्टान्तदोषः पृथगित्याह-- किंच जीवच्छरीरेति।। सपक्षान्तरए वर्तमानस्य साधनस्य दृष्टान्तीकृते 'सपक्षे वृत्तौ हेत्वाभावसत्वानुपपत्तेश्चे'ति पद्धत्युक्तमाह -- धूमेति।। हेतुदोषसाङ्कर्यमाशङ्कते -- तत्रापीति।। तत्रैवेति।। धूमानुमान एवेत्यर्थः। तस्याः व्याप्यत्वासिद्धेः। उपदर्शितव्याप्तिकत्वदशायां व्याप्यत्वासिद्धिशङ्कापि नेत्याह-- ह्रद इति।।
नन्वस्त्वेवं साध्यवैकल्यादेर्दृष्टान्तदोषत्वं तथाऽपि दृष्टान्तदोषो द्विविध इत्ययुक्तं तस्यानेकविधत्वादित्यत आह-- उभयेति।। सुधोक्तमेवाह-- एकवैकल्येनैवेति।।

१.रिचेत्युक्तसव्यभिचा -ठ.

सासान-वैल्ययो-हन्तदोत्व-सनम्) अनुमादोषवादः पु - २३७.

उभयवैकल्यं तु न पृथग्दोषः। एकवैकल्येनैव दुष्टत्वसिद्धे १ रितरवैकल्यस्य वैयर्थ्यात्। संभवमात्रेण पृथग्वचने अनैकान्तिककालातीतत्वं असिद्धकालातीतत्वमित्याद्यपि हेत्वाभासान्तरं स्यात्। आश्रयहीनत्वाव्याप्त्यभिधानाद्युदाहरणाभासस्यान्तर्भावः पद्धत्यादौ दृष्टव्यः।।
या तु 'साध्यस्य साधनस्य वाऽननुगमो दृष्टान्तविरोध'इति प्रमाणलक्षणव्याख्यावसरे टीकाकारीया 'उभयोर्वेति ग्राह्य'मित्युक्तिः सा यथा मनोऽनित्यं मूर्तत्वात्परमाणुवत् कर्मवत् इत्यत्र क्रमेण साध्यवैकल्यं साधनवैकल्यं च दोषः तथा गगनवदित्यादौ उभयवैकल्याख्यौ दोषौ स्त इत्यभिप्रेत्यैव। न तूभवैकल्य २ दूषणस्य पृथग्दोषत्वमित्यभिप्रेत्य। अन्यथैकेकवैकल्येन दृष्टान्तस्य दुष्टत्वे समुदितकल्पनावैयर्थ्यादित्यादि--

नन्वथापि दृष्टान्तरूपाश्रयासिद्धिव्याप्त्यनभिधनविपरीतव्याप्त्यभिधानादीनां दृष्टान्तदोषाणां कां गतिरित्यत आह-- आश्रयहीनत्वेति।। आदिपदेन प्रमाणलक्षणटीका ग्राह्या। उभयवैकल्यस्यापि दोषत्वेन लक्षणटीकायामुक्तत्वप्रतीतेः तद्विरोधमाशङ्क्यनिराह-- ३ यात्विति।।

१.द्धो इत- ग.ट.रा. २.ल्यरूपेणैकदोषत्वमि-ग.रा. ३.ङ्क्या -ड.

पु - २३८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

सुध १ योभयवैकल्यं न पृथग्गणनीयमति २ प्रमाणपद्धत्या च विरोधात्।। साध्यसाधनवैकल्ययोर्दृष्टान्तदोषत्वसमर्थनम्।। २४ ।।

सुधयेति ।। भक्तिपादीय सुधयेत्यर्थः ।।

साध्यसाधनवैकल्ययोर्दृष्टान्तदोषत्वसमर्थनम् ।। २५ ।।

अथाश्रयासिद्धेर्दोषत्वभङ्गः ।। २५ ।।
आश्रयासिद्धिस्तु न दोषः। तथा हि --
न तावदाश्रयासिद्धत्वं अनित्यो घटः कार्यत्वात् --

अथाश्रयासिद्धेर्दोषत्वभङ्गः ।। २६ ।।
ननु यदुक्तमसिद्धिरव्याप्तिरिति द्वावेव हेतुदोषाविति तदयुक्तम्। आश्रयासिद्धत्वात्प्रसिद्धसाध्यकत्वव्यधिकरणासिद्धत्वरूपहेतुदोषाणां भावादित्यतः 'आश्रयसाध्यव्यधिकरणासिद्धयो न दूषणम्' इत्यादिप्रमाणलक्षणतट्टीकाद्युक्तरीत्याश्रयासिद्धत्वादेरदोषत्वं व्युत्पादयितुकाम आश्रयासिद्धत्वांशे तावदुक्तमाह -- आश्रयासिद्धिस्त्विति।। तत्किमाश्रयासिद्धत्वं सिद्धसाधकत्वं वा पक्षीकृताकारेणासत्वं वा अभावाश्रयत्वं वा ३ असदाश्रयत्वं वा असदाश्रयकत्वं वा आद्यत्रयं तावन्नयुक्तमिति निराकरोति-- न तावदिति, नापि स्वर्णमय इति, नाप्यत्यन्ताभावेति च ग्रन्थेन।।

१.धायां -ग.ट.रा. २.प्रमाणपदं न -ग.ट.रा. ३.असदाश्रयत्वं वा इति नास्ति -ठ. असदाश्रयकत्वं वा इति न -ड.

आयाद्धेःदोत्वभङ्गः) अनुमादोषवादः पु - २३९.

घटवदित्यादाविव सिद्धसाधकत्वं तत्र सन्देहगर्भितपक्षत्वाभावेन पक्षरूपाश्रयाभावादिति युक्तम्। सन्देहाभावेपि १ पक्षताया उक्तत्वात्। तस्य मन्मतेप्यसङ्ग २ तत्वान्तर्भावेण दोषत्वात्।।

नापि स्वर्णमयोद्रिरग्निमानित्यादाविव पक्षविशेषणाभावेन पक्षीकृताकारेणासत्वं तस्य मन्मतेऽपि बाधान्तर्भावेण ३ दोषत्वात्।। नाप्यत्यन्ताभावश्रय ४ कत्वम् अभावस्य तुच्छत्वेन प्रतिबन्धकाभावे ५ कारणत्वस्येवाभावे आश्रयत्वस्याप्यभावात् अत्यन्ताभावस्याप्रामाणिकप्रतियोगिकत्वेनाप्रामाणिकत्वाच्चेति युक्तम्। अत्यन्ताभावप्रतियोगिन एव तुच्छत्वेनाभावस्यातुच्छत्वात्।

न तावदित्यस्य युक्तमित्यन्वयः। सिद्धसाधकस्य कथमाश्रयासिद्धत्वमित्यतो दूषणसौकर्यायाह -- तत्रेति।। उक्तत्वादिति।। पक्षलक्षणोक्तिप्रस्तावे साध्य ६ धर्मविशिष्टः पक्ष इत्युक्तत्वादित्यर्थः। दोषत्वादिति।। परार्थानुमानेऽसङ्गतिरूपनिग्रहस्थानान्तर्भूतत्वेन दोषत्वस्य स्वाभिमतानुमानदोषोक्तिप्रस्तावे कथितत्वादिति
भावः।। पक्षविशेषणाभावेनेति।। आश्रयविशेषणासिद्ध्या चाश्रयासिद्धिरसंकीर्णेति मण्युक्तेरिति भावः।। बाधान्तर्भावेनेति।। पक्षतद्विशेषणसाध्यतद्विशेषणादिबाधभेदेन
बाधस्योनकविधत्वात्पक्षविशेषणबाधे ७ न्तर्भाव इति भावः।। नापीति।। युक्तमित्यन्वयः।।
अभावपक्षकत्वे आश्रयासिद्धत्वं हेतोः कुत इत्यत आह -- अभावस्येति।। अप्रामाणिकत्वाच्चेति।। तथा च तस्य कतं पक्षत्वेनानुमानप्रमाणविषयतेत्यर्थः।

१.अपिपदं न -ग.ट.रा. २.ङ्गत्यन्त- क.ग.ट.रा. ३.वेन दो -क.ग.ट.रा. ४.यकत्वं -क.ग.रा. ५.कारणत्वाश्रयत्वाभावे -क. वे आश्रय -ठ. ६.धर्मपदं न -ठ.ड. ७. न्तर्भवतीति -ठ.

प्रतिबन्धकाभावस्या १ प्यन्यथासिद्ध्यैवाकारणत्वात्। अप्रामाणिकत्वस्य प्रामाणिकात्यन्ताभावप्रतियोगित्वरूपत्वेन हेतोर्विरुद्धत्वाच्च। तस्याप्यभावत्वाप्रामाणिक २ प्रतियोगिकत्वादिधर्माश्रयत्वाच्च। तदुक्तम्। 'न चात्यन्ताभावोऽपि सर्वधर्मरहित'इति।।
किंतु वन्ध्यासुतो न वक्ता अचेतनत्वादित्यादाविवासदाश्रयत्वात्। तस्य तु दोषत्वं किमसतो निर्धर्मकत्वेन,

कथं तर्हि प्रतिबन्धकाभावस्य कारणत्वं नेत्युक्तं द्वितीयपरिच्छेदे इत्यतस्तस्यासत्वादकारणत्वं न भवतीत्याह -- प्रतिबन्धकेति।। द्वितीयो हेतुरयुक्त इत्याह -- अप्रामाणिकत्वस्येति।। अत्यन्ताभावोप्रामाणिकः अप्रामाणिकप्रतियोगिकत्वादित्युक्तिरयुक्ता ३ अप्रामाणिकप्रतियोगिकत्वादित्यस्यतु ४ प्रामाणिकात्यन्ताभावप्रतियोगी यः तत्प्रतियोगिकत्वादित्यर्थः। तथा चात्यन्ताभावोपामाणिक इति यत्साध्यं तदभावेन प्रामाणिकत्वेनाप्रामाणिकप्रतियोगिकत्वादितिहेतुर्व्याप्त इति कथं न विरुद्धहेत्वाभास इत्यर्थः। तस्यापीति।। तथाचाश्रयत्वस्यैवाभावादिति व्याहतमिति भावः।। तदुक्तमिति।। प्रमाणलक्षणे।।
एवं पक्षत्रये निरस्ते पश्नपूर्वं चतुर्थमवशेषयति -- किंत्विति।।

१.अपिपदं न -ग.ट. २.कत्वप्र -ग.रा. ३.अप्रामाणिक इत्यस्य प्रामाणिकात्यन्ताभावप्रतियोगीत्यर्थः - ट. ४.स्य प्रा - ड.

साध्यधर्मानाश्रयत्वेन बाधात् साधनाभावेनासिद्धेर्वा प्रतीत्यविषयत्वेन विधिनिषेधरूपसकलव्यवहाराभाजनत्वाद्वा १ अप्रामाणिकत्वेन

प्रमाणानङ्गत्वाद्वा तस्यादोषत्वेऽतिप्रसङ्गादा निरधिकरणयोर्धर्मयोर्नियतसामानाधिकरण्यरूपव्याप्त्यभावाद्वा।।
नाद्यौ। असति त्वदुक्तयोः साध्यसाधनधर्मानाश्रयत्वरूपयोः साध्ययोर्निर्धमकत्वरूपस्य साधनस्य चासंभवेन तवापि बाधादिप्रसङ्गात्। त्वदुक्तधर्माणामभावरूपत्वात्तत्र संभे २ च तत एव मदुक्तावक्तृत्वाचेतनत्वादेरपि संभवात्। भावरूपाणां तु मयाप्यनङ्गीकारात्।।
यदि च साध्यधर्मा ३ द्यभावाद्याश्रयत्वाभावेऽपि --

'दोषो व्याहतिरेवास्ति नृश्रृङ्गास्तित्वसाधन'
इत्यादिभक्तिपादीयानुव्याख्यानावतरणप्रस्तावे सुधायां विकल्पिरीत्या षोढा विकल्पयति -- किमित्यादिना।। बाधादित्यादिपञ्चम्यन्तानां दोषत्वमित्यनेनान्वयः।। धर्मयोरिति।। साध्यसाधनरूपधर्मयोरित्यर्थः। नाद्याविति।।
साध्यं नास्ति साधनं नास्तीति कल्पावित्यर्थः। बाधादीत्यादिपदेनासिद्धिग्रहः।। त्वदुक्तधर्माणामिति।। साध्यधर्मानाश्रयत्वसाधनधर्मानाश्रयत्वनिर्धर्मकत्वरूपधर्माणामित्यर्थः। तत्रेति।। वन्ध्यासुतादावसतीत्यर्थः। एतेनेत्युक्तं व्यनक्ति --

१.अप्रमाणत्वेनानाङ्गत्वाद्वा -ट. २.अप्रामाणिकत्वाद्वा -रा. २.वेन तत -क.ग. ३.आदिपदं न -क.ग.ट.रा.

साध्यधर्माद्यनाश्रयत्वस्य सत्वात्तव न बाधादिः १ तर्हि वक्तृत्वाभावा २ श्रयत्वाभावेऽपि वक्तृत्वा ३ नाश्रयत्वस्य सत्वान्ममापि न बाधादि।।

एतेनासत्वादेव वक्तृत्वादिवदवक्तृत्वादिकमपि नेति बाधादीति निरस्तम्। वन्ध्यासुतविशिष्टस्य वक्तृत्वस्याभावं प्रति वन्ध्यासुतासत्वस्य साधकत्वेनाबाधकत्वात्। विशेषणविशेष्ययोरभावे विशिष्टाभावदाढ्र्यात्। तत एव प्रामाणिकत्व ४ वदप्रामाणिकत्वस्याप्यभावापाताच्च।।
नन्वप्रामाणिकत्वादिकमसत्वानुगुणं तदभावे प्रामाणिकत्वेन ५ सत्वापातादिति चेत्। समं प्रकृतेऽपि अवक्तृत्वाभावे वक्तृत्वेन सत्वापातात्।।
किंच वक्तृत्ववदकृत्वस्याभावे बाधवदबाधोपि स्यात्।

वन्ध्येति।। कथं साधकत्वमित्यत आह-- विशेषणेति।। वन्ध्यासुत ३ रूपविशेषणस्य वक्तृत्वरूविशेषस् चाभाव इत्यर्थः। तत एवेति।। असत्वादेवेत्यर्थः। सममित्युक्तं व्यनक्ति -- अवक्तृत्वेति।। अवक्ततृत्ववदिति।। अवक्तृत्वस्येवेत्यर्थः। वन्ध्यासुतो न वक्ताऽचेतनत्वादित्यत्रावक्तृत्वरूपसाध्यधर्माभावाद्बाध इत्युक्तं त्वया, मया अवक्तृत्वाभावे वक्तृत्वं स्यादित्युक्तमअ। वक्तृत्वमपि न चेत्तर्हि अवक्तृत्वं नेति कृत्वा बाध इति त्वयोच्यते तता तदभावरूपवक्तृत्वमपि नेत्यबाधोपि स्यादित्यर्थः।

१.दि -ग.रा. 'दि'इति शोधितम्-ट. २.वाद्याश्र -ग.रा. ३.त्वाद्यना -ग.ट.रा. ४.वदप्रामाणिकतेति नास्ति-क.ग.ट.रा. ५.नासत्वाभावापा -रा. ६.तत्वरू -ठ. ७.अपिपदं अधिकं -ग.ट.रा.

आयाद्धेः-दोत्व-भङ्गः) अनुमादोषवादः पु - २४३.

अपि च त्वदुक्तवक्तृत्वावक्तृत्वोभयाभावरूपं साध्यमसत्वरूपं साधनं च न स्यादिति तवापि बाधादि स्यात्। नन्वप्रामाणिकत्वादिकं प्रत्यसतो

नाश्रयत्वेऽपि अप्रामाणिकत्वादिके तदाश्रितत्वं वा असत्येव तज्ज्ञानहेतुभूतज्ञानविषयत्वविशेषरूपं निरूपकत्वं वा युक्तम् आतीतादौ विषयत्व १ रूपधर्माभावेपि तज्ज्ञाने त २ द्विषयकत्वदर्शनात्। शुक्तिरूप्यतादात्म्यादौ प्रतीतमात्रेण निरूपकत्वदर्शनाच्चेति चेत्। समं प्रकृतेपि।।

असदाश्रयस्थले बाधासिद्ध्योरुद्भावनं स्वव्याहतं चेत्याह-- अपि च त्वदुक्तमिति। वन्ध्यासुते वक्तृत्ववदवक्तृत्वमपि नास्ति असत्वादेवेति त्वदुक्तमित्यर्थः। न स्यादिति।। असत्वादिति त्वदुक्तहेतोरेवेति भावः।। बाधादीति।। बाधासिद्धी स्यातामित्यर्थः ३ ।।
परमुखेन समाधिं वाचयित्वा साम्येनोत्तरमाह -- नन्वित्यादिना।। एतज्ज्ञानेति।। अप्रामाणिकत्वादिकं प्रति असत् आश्रय इति निरूपक्तवमस्ति। निरूपकत्वं च निरूप्यज्ञानहेतुभूतज्ञानविषयत्वमित्यर्थः। घटादिव्यवहारं प्रति निरूपकघटादिनिष्ठनिरूपकत्वव्यावृत्यर्थं विशेषरूपमित्युक्तम्। केषांचिदाश्रयाभावे असत्वमेव दृष्टमिति कथमाश्रयाभावे धर्माणां सत्वमित्यतः स्वभाव एवाय धर्माणामिति भावेन सुधोक्तमेवाह-- विचित्रा हीत्यादिना।।

१.त्वप्रतियोगित्वरू -ग.ठ.रा. २.दभावे च विषयित्वस्य तत्प्रतियोगिकत्वस्य चद -ग.ट.रा. ३.घटादिव्यवहारं प्रति निरूपकघटादिनिष्ठनिरूपकत्वव्यावृत्त्यर्थं
विशेषरूपमित्यपि इत्यधिकम् -ठ.

विचित्रा हि धर्माः। केचिदाश्रिताः। यथा रूपादयः। केचिन्याश्रिता अन्योनपरञ्जकाः। यथा ज्ञानादयो घटादीनाम्। केचिदनाश्रिताः। यथाऽसत्वादयः शशश्रङ्गमसदित्यबाधितप्रतीतेः। अन्यथा तस्यासत्वासिद्धेः।।
किं च त्वन्मते भूतलघटाभावयोरपि संबन्धो न संयोगादिः नाप्यूर्ध्वाधरीभावादिः। किंतु निरूप्यस्याभावस्य स्वरूपमेव। न तु निरूपकस्याधिकरणस्योभयोर्वा स्वरूपम्। १ घटतज्ज्ञानयोः सम्बन्धस्य निरूप्यज्ञानमात्रस्वरूपत्वदर्शनात्।

ननु वन्ध्यासतु वक्तृत्वाभावरूपसाध्यासंबन्धो न वन्ध्यासुतसत्वं विनोपपद्यत इति कथं तत्राचेतनत्वहेतुना साध्यसम्बन्धः सिध्येदित्यतोऽभावस्वरूपमेव तत्र संम्बन्ध इति दृष्टान्तपूर्वमाह -- किंच त्वन्मत इति।। संयोगादिः समवाय आदिपदार्थः। द्रव्यत्वादिरूपत्वाभावादिति भावः। नापीति।। घटादि २ मूर्तत्वाभावादिति भावः। नतु निरूपकस्येति।। तथात्वे भूतलोल्लेख्यपि ज्ञानमभावोल्लेखि स्यादिति भावः।। उभयोर्वेति।। अनेकत्वापत्तेः भूतलधियोभावानुल्लेखित्वाच्चेति भावः। अभावस्य स्वरूपमेवेत्यत्र हेतुमाह-- घटस्येति।। यद्वा अभावस्वरूपमेवेत्यत्र नत्वित्यादिनोक्तसाध्यद्वये च हेतुमाह -- घटस्येति।। नायमिति।। वक्तृत्वाभावसम्बन्ध इत्यर्थः।।

१.घटस्य स्वज्ञानस्वाभावाभ्यां संबन्धस्य निरूप्यज्ञानाभावस्वरूपमात्रत्वदर्शनात् - ग.ट.रा. २. दिवन्मूर्त -ठ.ड.

आयाद्वेः-दोत्व-भङ्गः) अनुमादोषवादः पु - २४५.

एवं वन्ध्यासुतवक्तृत्वाभावयोरप्यभावस्वरूपमेव संबन्ध इति नायमधिकरणसत्वापेक्षः।।
मन्मतेऽपि भूतलघटाभावयोरिव वन्ध्यासुतवक्तृत्वाभावयोरपि संयोगाद्यन्योऽभावमात्राश्रितः संबन्धो नाधिकरणसत्वापेक्षः। अतीततज्ज्ञानयो १ रसत्तज्ज्ञानयोः २ शुक्तिरूप्यतादात्म्यतदभावयोरतीते ३ वर्तमानं ४ नास्तीत्यबाधित ५ प्रतीत्या अतीतवर्तमानाभावयोः शशश्रङ्गमस ६ दित्यबाधितप्रतीत्या शशश्रङ्गसत्वाभावयोः सम्बन्धे निरूप्यज्ञानाभावादिस्वरूपमात्राश्रितत्वदर्शनात्। तद्वदचेतनत्वा-

नन्वेवमपि भवन्मते सत्वापेक्षः स्यादित्यत आह-- मन्मतेपीति।। अभावमात्राश्रित इत्यत्र हेतुमाह-- अतीतेति।। षष्ठीद्विवचनान्तानां षण्णां सम्बन्ध इत्यनेनान्वयः। एवं वन्ध्यासुतो न वक्ता अचेतनत्वादित्यत्र बाधदोषं निरस्यासिद्ध्यादि निराह-- तद्वदिति।। अप्रामाणिकत्वादेरिव। तस्या यथा असदाश्रितत्वादिकमुच्यते तथेत्यर्थः।

१.रतीतर्ध्वंसयोरस - ग.ट.रा. २.शशश्रङ्गमसदित्यबाधितप्रतीतेः शशश्रङ्गसत्वाभावयोः अतीत - ट. ३.तेव -क.ग.ट.रा. ४.नत्वं ना- ट.रा. ५.तप्रतीतेरतीतवर्तमानत्वाभावयोः शुक्तिरूप्यतादात्म्याभावयोरभावमात्राश्रित-ट. ६.त्वद्यभा - ग.

देरसत्वादेरसदाश्रितत्वस्य वा तन्निरूप्यस्वभावत्वरूपस्वरूपसम्बन्धस्य वा अभावमात्राश्रितस्य सम्बन्धान्तरस्य वाऽसिद्ध्यादिशब्दार्थत्वान्नासिद्ध्यादि।।

न तृतीयः। प्रतीत्यविषय इति प्रतीतिविषयत्ववम् सकलव्यवहाराभाजनमिति व्यवहारविषयत्ववच्च न वक्तेत्यादिप्रतीतिविषयत्वव्यवहारभाजनत्वयोरपि संभवात्। विस्तृतं चैतन्न्यायामृते।।
किंच सकलव्यवहाराभाजनत्वे तव मौनं स्यात्। न चाप्रामाणिकेर्थे वावदूकत्वादपि मूकत्वमेव वरमिति वाच्यम्। वन्ध्यासुतस्याप्राणिकत्वेपि तदप्रामाणिकत्वस्येव तदवक्तृत्वस्यापिप्रामाणिकत्वात्।

अभावमात्रेति।। चेतनत्वाभावमात्रेत्यर्थः। सिद्ध्यादिपदार्थत्वादितिपदच्छेदः। आदिपदेन १ बाधग्रहः। प्रतीत्यविषयत्वेन विधिनिषेधरूपसकलव्यवहाराभाजनत्वाद्वेति पक्षं निराह- - न तृतीय इति।। न्यायामृत इति।। असतोपि साध्यसाधनधर्माश्रयत्वादिकमस्तीत्येतत् मिथ्यात्वनिरुक्तिभङ्गे असतः प्रतियोगित्वसमर्थनवादे चेति भावः। तवमौनमिति।। वन्ध्यासुतो न वक्ता अचेतनत्वादित्यादावस्माभिरुक्ते सति तत्र प्रत्युत्तरं न २ शक्यं स्यादितिभावः।।
सत्यमेवमवक्तृत्वस्याप्रामाणिकत्वे मूकत्वमेव वरमिति भाषणं न चैतदप्रामाणिमित्याह -- वन्ध्यासुतस्येति।। अप्रामाणिकसंबन्धिनः कथं प्रामाणिकक्तमित्यतो दृष्टान्तोक्तिः।

१.न पक्षधर्मतादिग्रहनि - ट. २.वाच्यम् स्या - ड.

आयाद्वे-दोत्व-भङ्गः) अनुमादोषवादः पु - २४७.

अप्रामाणितकेर्थे इत्युक्त्वा पुनर्मूकत्वोक्तौ, मूकत्वविधौच व्याघाताच्च। अप्रामाणिकमसदाश्रयकत्वं निषेद्धुं १ प्रकम्य व्याघातोद्भावनेऽप्रतिभया

मध्ये मूकीभावादपि आदावेव मूकूभावस्य वरत्वेन मदुक्तासदाश्रयत्वनिरासासिद्धेश्च।।
न चतुर्थः। असन्न प्रमाणाङ्गं अप्रामाणिकत्वादिति प्रमाणा २ ङ्गत्वात् न वक्ता अचेतनत्वादिति प्रमाणाङ्गत्वस्यापि सम्भवात्।।

स्वक्रियाविरोधं चाह -- अप्रामाणिकेर्थे इति।। पुनर्मूकत्वोक्तौ व्याघातादित्यन्वयः। प्रकारान्तेरेणापि व्याहतिमाह -- विधिनिषेधेति।। असदाश्रयत्वमिति।। असतः साधनाश्रयत्वमिति वा साध्यसाधनयोरसदाश्रयत्वं वा अप्रामाणिकमिति निषेद्धुमुपक्रम्य वर्तमानस्य तव प्रतीत्यविषशय इति प्रतीतिविषयत्ववदित्यादिनाऽस्माभिर्व्याघातोद्भावने कृते सति प्रत्युत्तरापरिस्फूर्तिरूपाप्रतिभया कथामध्ये मूकीभावादपि कथोपक्रम एव मूकीभावस्य वरत्वेनेत्यर्थः।।
असतोप्रामाणिकत्वेन प्रमाणानङ्गत्वाद्वाऽसदाश्रयत्वं दोष इति पक्षं निराह--
न चतुर्थ इति।। असदाश्रत्वस्यादोषत्वेऽतिप्रसङ्गादिति पक्षं निराह -- न पञ्चम इति ।।

१.द्धुमुपक -क.ग.ट. २.णानङ्ग-ग.ट.रा.

पु - २४८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

न पञ्चमः। बाधादिहीनस्य वन्ध्यासुतो न वक्तेत्यादेः सद्धेतुत्वेन शशश्रङ्गमस्ति श्रृङ्गत्वात् वन्ध्यासुतो वक्ता
सतत्वादित्यादेरसद्धेतोश्च बाधासिद्ध्यादिनैव दुष्टत्वेन चातिप्रसङ्गभावात्। सुतत्वाभावेपि वन्ध्यासुतो न वक्तेत्यादौ पक्षीकरणं

च वन्ध्यासुतशब्देन तथा प्रतीतिमात्रेण युक्तम्। नहि वन्ध्यासुतोसन्निति निषेधप्रयोजनक प्रसक्त्यर्थं वन्ध्यासुत इत्युक्तिमात्रेण १ सुतत्वस्य सत्वं सिध्यति। अतिप्रसङ्गात्।।
न षष्ठः। सदाश्रयत्वेपि प्रमेयत्वानित्यत्वादौ -

अतिप्रसङ्गो हि नृश्रृङ्गास्तित्वादिरपि सिध्येदिति वक्तव्यः। स तु न युक्तः। दोषान्तरेणैव तत्सिद्धिप्रतिबन्धादिति भावेन --
'दोषो व्याहतिरेवास्ति नृश्रृङ्गास्तित्व साधने'
इत्याद्यनुव्याख्यानसुधोक्तमाह -- बाधादीति।। ननु सुतत्वाभावाद्वन्ध्यासुत इति पक्षीकरणायोगात्सोप्यसद्धेतुरेवेत्यत आह -- सुतत्वाभावेपीति।। अतिप्रसङ्गादिति। शुक्तिरूप्यतादात्म्यं नास्ति, इह घटो नास्ति, शशे विषाणं नास्तीत्यादावपि निषेध्यस्य तत्र सत्वापातादिति भावः। सामानाधिकरण्यरूपव्याप्त्यभावादसदाश्रयत्वं दोष इति पक्षं प्रत्याह -- न षष्ठ इति।। साध्यसाधनयोर्व्याप्त्यभावे आश्रयस्यासत्वं न प्रयोजकं व्यतिरेकतोन्वयतश्च व्यभिचारात्।

१.सुतशब्देन -- इत्यादिरेतावान्प्रन्थः नास्ति -ग.रा.

आयद्धेः-दोत्व-भङ्गः) अनुमादोषवादः पु - २४९.

व्याप्त्यदृष्ट्या असदाश्रयत्वेप्यप्रामाणिकत्वासत्वयोर्व्याप्तिदृष्ट्या चावक्तृत्वाचेतनत्वयोरपि व्यभिचारादर्शनेनाविनाभावरूपव्याप्तेः संभवात्। तयोर्घटादौ सामानाधिकरण्यदर्शनाच्च।।
किंच असदाश्रयस्य साधकत्वं नेत्यपि केनचिल्लिङ्गेन साधनीयम्। तत्र चासन्नाश्रयः एवं वत्वादित्यसन्वा पक्षीकर्तव्यः, असदाश्रयो हेतुर्न

साध्यसाधकं एवं १ त्वादित्यसदाश्रयो हेतुर्वा उभयथाऽपि सहेतुरसदाश्रय एव। असति सद्धर्मानङ्गीकारात्।

किंतु व्यभाचारदर्शनादिकमेव। तदभावेऽसदाश्रययोरपि व्याप्तिरवधारयितुं शक्यत एवेतिति व्याप्त्यभावोसिद्ध इत्याह-- असदाश्रयत्वेपीत्यादिना।।
ननु कथमसदाश्रयत्वे सामानाधिकरण्यघटितव्याप्तिरित्यत उक्तं अविनाभावेति।। तादृशव्याप्तेः प्रागेव निरासादिति भावः। तादृशव्याप्तिमङ्गीकृत्याप्याह-- तयोरिति।। अवक्तृत्वाचेतनत्वयोरित्यर्थः।
यत्तु सुधायामत्रोक्तरीत्याऽसदाश्रयत्वस्य दोषत्वं षोढा विकल्प्यातिप्रसङ्गकल्पकमेकं निरस्यन्ते 'एतेन कल्पिताः पक्षाः समस्ता अपि निरस्ता'इति भक्तिपादीयसुधावाक्यमत्र प्रतिपक्षदूषणाभिधानेन विवृतं ध्येयम्। असदाश्रयस्य साधकत्वे नेत्यपि व्याप्तिं विना कथं निवार्यत'इति प्रमाणलक्षणतट्टीकयोरुक्तं विवृण्वानः असदाश्रयसाध्यसाधनयोर्व्याप्त्यभावे बाधकं चाह - किञ्चेति।।
ननु हेतुपक्षकप्रयोगे प्रागुक्तहेतोः कथमसदाश्रयत्वं येनोभयथापि हेतुरसदाश्रय एवेति स्यादित्यत आह-- असतीति।।

१. पूर्वत्रात्र च वंरूपत्वात् इत्यस्ति -ट.

पु - २५०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

तच्च लिङ्गं व्याप्त्यभावेऽसाधकत्वसाधकं न स्यादिति कथमसदाश्रयधर्मयोर्व्याप्त्यभावः।।
तदुक्तं भगवत्पादैः। 'असदाश्रयस्य साधकत्वे नेत्यपि व्याप्तिं विना कथं निवार्यते'इति।।

तस्माद्दोषान्तरासङ्कीर्णोदाहरणाभावा १ न्निषेधं प्रति पक्षत्वस्य च प्रतीतिमात्रेणोपपत्तेः नाश्रयासिद्धिर्दोष इति।।
तदुक्तं भगवत्पादैः। 'असत्यापि व्याप्तिरस्त्येवे'ति। पक्षे असत्यापि अविनाभावरूपा व्याप्तिरस्त्येवेत्यर्थः।।
आश्रयासिद्धिर्दोषत्व भङ्गः ।। २५ ।।

तथा चासन्निष्ठत्वेन प्रयुक्ताचेतनत्वादि २ रूपधर्मोप्यसति नास्त्येवेति तत्पक्षकोप्यसदाश्रय एवेति भावः।। धर्मयोरिति।। साध्यसाधनरूपयोरित्यर्थः। तदुक्तमिति।। प्रमाणलक्षणे। तस्मादित्युक्तहेतुं द्वेधा व्यनक्ति-- दोषान्तरेति।। निषेधं प्रत्यवक्तृत्वादिरूपवक्तृत्वादिनिषेधं प्रतीत्यर्थः। अविनाभावरूपव्याप्तेः संभवादित्युक्तेर्थे प्रमाणलक्षणवाक्यं संवादयति -- तदुक्तमिति।।
आश्रयासिद्धेर्दोषत्वभङ्गः ।। २६ ।।

१.वादसत्वप्रतिकूलधर्मं प्रतिपक्षत्वासंभवेप्यप्रामाणिकत्वादिकं प्रतीव असत्तानुकूलान्नि -क.ग.ट. २. दिहतुरू -ट.ठ.ढ.

अप्रद्ध-विशेषस्य-दोत्वङ्गः) अनुमादोषवादः पु - २५१.

अथाप्रसिद्धविशेषणत्वस्य दोषत्वभङ्गः ।। २६ ।।
एवं साध्याप्रसिद्धिरपि न दोषः तथा हि -- तस्या दोषत्वं किमतिप्रसङ्गात्, साध्यकोतेरप्रसिद्ध्या सन्देहाभावेन तद्घटितपक्षधर्मताविघटनाद्वा १ व्याप्तिविघटनाद्वा प्रतिज्ञावाक्यस्याविदित-

अथाप्रसिद्धविशेषणत्वस्य दोषत्वभङ्गः ।। २७ ।।
अन्यत्सदसतोर्विश्वमिति च व्याहतेरमा।

असिद्धसाधने दोषः को व्याप्तिर्यदि विद्यते।।
इति भक्तिपादीयानुव्याख्यानसुथोक्तदिशा विकल्पयति -- किमतिप्रसङ्गादिति।। विमतं सदसद्विलक्षणं बाध्यत्वात्, भूः शशश्रृङ्गवती भूत्वादित्यादेरपि
प्रमाणत्वापत्तिरूपातिप्रसङ्गादित्यर्थः।। तद्घटितेति।। सन्दिग्धसाध्यधर्मकधर्मीरूपपक्षनिष्ठत्वरूपत्वात् पक्षध्मता इति भावः। व्याप्तीति।। साध्याप्रसिद्धौ तन्निरूपितव्याप्तिग्रहासंभवेन व्याप्तिविघटनादित्यर्थः। अविदितेति।। भूः शशविषाणोल्लिखितेति प्रतिज्ञावाक्ये शशविषाणपदार्थो न ज्ञातः अप्रसिद्धत्वात्। तथा च तस्य तत्र शक्तिग्रहासंभवेन २ तत्पदार्थस्मृतेरयोगात् प्रतिज्ञावाक्यस्य तदन्वयाबोधकत्वप्रसङ्गादित्यर्थः। सुधानुक्तं कोठ्यन्तरं तार्किकरीतिमनुसृत्य तार्किकरीतिमनुसृत्य स्वयं पक्षान्तरं विकल्पयति -- कारणस्येति।

१.व्याप्तिविघटनाद्वा इति नास्ति - ट.रा. २.तदानीम् इत्यधिकम्-ट.ठ.ड.

पदार्थकत्वेनाबोधकत्वप्रसङ्गाद्वा, कारणस्य विशेषणज्ञानस्याभावे कार्यस्य विशिष्टज्ञानस्यायोगात्।।
नाद्यः। असाधुत्वेन संमतस्य विमतं सदसद्विलक्षणं बाध्यत्वादित्यादेः क्लृप्तेन व्याघातादिना दोषान्तरेणैव इयं भूः शशश्रृङ्गवती एतद्भूत्वादित्यादेर्योग्यशृङ्गसाधकत्वे योग्यानुपलब्धिबाधादिना
दोषान्तरेणैवायोग्यसाधकत्वेऽतीन्द्रिये १ श्वरादिभिः -

विशिष्टज्ञानस्येति।। अनुमितिरूपस्येत्यर्थः। सुधोक्तदिशा निराह-- असाधुत्वेनेत्यादिना।। व्याघातादिनेति। सन्नेत्युक्ते असत्वमुक्तं स्यात्। सत्वप्रतिक्षेपरूपत्वादसत्वस्य पुनरसन्नेत्युक्ते स्ववचन्याघातः। एवमसन्नेत्युक्त्या 'द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत इति सत्वं लब्धम्। पुनः सन्नेत्युक्ते स्ववचनव्याघात एव। आदिपदेन प्रमाणबाधव्याप्त्यभावादिग्रहः।।
ननु व्याघातादेरेव दोषत्वमुपेत्य तत्र साध्याप्रसिद्धिर्दोष इत्येवोपेयतामित्यत उक्तम् -- क्लृप्तेनेति।। माता वन्ध्येत्यादौ दोषत्वेन क्लृप्तेनेत्यर्थः। श्रृङ्गवतीत्यत्र श्रृङ्गशब्देन महत्वसमानाधिकरणोद्भूतरूपवान् शिरस्संयुक्तोऽवयवविशेषोभिप्रे २ यतोऽथ कश्चिदतीन्द्रियः। आद्य आह --
योग्येति।। व्याप्त्यभावादिरादिपदार्थः। द्वितीय आह-- अयोग्येति।। श्रृङ्गेति नाममात्रम्। न ह्यतीन्द्रियं नाम श्रृङ्गमस्ति। अत एवादिपदप्रयोगः। --
अप्रसिद्धस्य साध्यस्य साधकत्वं यदेष्यते।

१.यैः श्रृङ्गादिभिः सि- ग.ट.रा. २.प्रेतः अथ -ठ.

अप्रद्ध-विशेस्य-दोत्वङ्गः) अनुमादोषवादः पु -२५३.

सिद्धसाधनादिना च दोषान्तरेणैव दुष्टत्वात् दोषान्तररहितत्वेन संमतस्य तु जीवच्छरीरजातं सात्मकं प्राणादिमत्वादित्यादेः साधुत्वातदिप्रसङ्गाभावात्।।
प्रत्युत अप्रसिद्धस्या १ सिद्धावेवातिप्रसङ्गः। पर्वताग्निसंबन्धस्य कार्यत्वाद्यनुमाने ईश्वरसार्वज्ञ्यादेश्चाप्रसिद्धस्यैव सिद्धेः। वह्नेरपि

महानसाद्यसम्बद्धस्य वस्तुगत्या अपूर्वस्यैव वह्नित्वेन २ भौमवह्नित्वेन च प्रकारेण सिद्धेश्च।।
ननु -- पक्षधर्मताबललभ्यादन्यस्याप्रसिद्धस्य सिद्धिर्न साध्यस्य पक्षसंबन्धादिकं तु पक्षधर्मताबललभ्यम् सार्वज्ञ्यमपि तथा। द्व्यणुकादिभूगोलकपर्यन्तस्यानाद्यनन्तकालीनस्य कार्यस्य पक्षत्वादिति चेन्न। कार्यत्वानुमेषु तदलभ्यस्यापि कर्त्रैकत्वादेः सिद्धेः।।

इत्यनुव्याख्यानसुधोक्तं हृदि कृत्वाऽऽह -- प्रत्युतेति।। अतिप्रसङ्ग इति।। पर्वताग्निसंबन्धस्येश्वरसार्वज्ञ्यादेश्चासिद्ध्यापातादित्यर्थः। इष्टापत्तिरित्यत आह-- पर्वतेति।। सम्बन्धस्याप्रसिद्धस्य सिद्धावपि न वह्नेः साध्यभूतस्याप्रसिद्ध्सय सिद्धिरिति वदन्तं प्रत्याह-- वह्नेरपीति।। अप्रसिद्धसाध्यकत्वमात्रं न दोषो येनोक्तातिप्रसङ्गः स्यादिति शङ्कते -- नन्विति।। क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्र सार्वज्ञ्यं कथं पक्षधर्मताबललभ्यमित्यतो व्यनक्ति -- व्द्यणुकादीति।। तादृशपक्षधर्मत्वं कार्यहेतोः कर्तुः सार्वज्ञ्यं विना न युक्तमितीति भावः। तदलभ्यस्य पक्षधर्मताबललललभ्यस्येत्यर्थः।

१.प्यसिद्धावति -ग.ट.रा. द्धत्वा -देवा-ग.रा. २.नाकारेण सिद्धेश्च -ग.ट. न प्रकारेण -रा.

अथ व्याप्तिबललभ्यस्य साध्यतावच्छेदकावच्छिन्नस्याप्रसिद्धस्या १ सिद्धिर्न कर्त्रैक्यं तु न व्याप्तिबललभ्यं लाघतर्कानुग्रहललभ्यत्वादिति चेन्न। अत्रापि प्राणादिमत्वस्य सात्मकत्वप्रयोज्यतया

व्याघाततर्कानुग्रहादेवाप्रसिद्धस्य सिद्ध्युपपत्तेः। त्वयाप्ययं वह्नित्वेनानुभवः। वह्नित्वाभाववति वह्नित्वप्रकारको नेत्याद्यभावसाध्यके केवलव्यतिरेकिणि साध्यतावच्छेदकावच्छिन्नसाध्यस्याप्रसिद्धस्य सिद्धिस्वीकाराच्च। न च तत्राभावरूपं -

आदिपदेन ज्ञाननित्यत्वादिग्रहः। एकत्वादावतिप्रसङ्गाभावमाशङ्क्य निराह-- अथेति।। लाघवेति।। अनेककर्तृकल्पनापेक्षयैककर्तृकल्पनमात्रेण कार्यत्वहेतोरुपपत्तिरूपलाघवतर्केत्यर्थः। व्याघातेति।। प्राणादिमत्वमुपेत्य सात्मकत्वानङ्गीकारे प्रयोजन्योपगमेन प्रयोजकानङ्गीकारात्कार्यार्द्देशेन कारणे प्रवृत्तिरूपस्वक्रियाविरोधरूपव्याघाततर्केत्यर्थः। तथाच तस्य दोषत्वमुपेत्य सामान्यप्रसिद्ध्यर्थं नक्लेशोऽनुभोक्तव्य इत्यर्थः। अथेत्यादिना वदतः शङ्कास्य व्याहतेत्याह -- त्वयापीति।। इत्याद्यभावसाध्यक इति। अप्रामाण्याभावादिसाध्यकेत्यर्थः। वेषम्यमाशङ्क्य प्रतिबन्द्योत्तरमाह -- न च तत्रेत्यादिना ।।

१. स्य सिद्धि -ट.रा.

अप्रद्ध-विशेस्य-दोत्वङ्गः) अनुमादोषवादः पु - २५५.

यत्साध्यं तदभावरूपस्य भावस्यैव १ व्याप्तिग्रहः तत्र चाभावरूपसाध्यात्मकप्रतियोगिज्ञानं नापेक्षितमिति व्याप्तिग्रहसंभवात् साध्याप्रसिद्धिरदोष इति वाच्यम्। भूः शशश्रृङ्गतवतीत्यादावपि शशश्रृङ्गराहित्याभावः साध्यः। सात्मकमित्यत्रापि निरात्मकत्वाभाव एव साध्य इति सुवचत्वाच्च।।

२ किंच तत्तन्मतप्राप्तकोटिप्रसिद्धिमूलायां जगत्परमाणूपादानकं वा, प्रधानोपादनकं वेति विप्रतिपत्तौ सत्यां तदनुसारेण विमतं परमाणूपादानकं तदन्योपादानकत्वे बाधकोपपन्नत्वे सति सोपादानकत्वादिति सामान्यव्याप्तिमाश्रित्य तार्किकप्रयुक्तेऽनुमाने कथं साध्यप्रसिद्धिः। नचात्रापि विप्रतिपत्त्यननुसारिणी अर्थान्तराप्रप्तकाल-

३ 'साधनं परमाण्वादेर्यदसिद्धस्य चेष्यते'।
इत्यनुव्याख्यानसुधोक्तिं हृदि कृत्वाऽह -- किंचेति।। ननु तत्र परेण साध्याप्रसिद्धावुद्भावितायां नैयायिकेन व्द्यणुकस्याप्रत्यक्षत्वेऽपि त्र्यणुकं सोपादानकं कार्यद्रव्यत्वादिति व्द्यणुकं प्रसाध्य व्द्यणुकं सोपादानकं भावकार्यत्वाद्घट ४ वदित्यनुमानेन परमाणुप्रसिद्धिं संपाद्य साध्याप्रसिद्धिः परिहारणीयेत्यत आह -- न चात्रापीति।। केवलं कार्यातवादिप्रयोगे -

१.व्यतिरेकग्रहः-क. २.त्वयाप्ययं इत्यादिरेतावान्ग्रन्थः नास्ति- ग.ट.रा. ३.अथेत्यादिन वदतः शङ्कास्य -इत्यारभ्य एतावान्ग्रन्थः नास्ति-ट.ठ.ड. ४.ठाविव -ड.

पु - २५६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

-त्वान्यतरापादिका त्र्यणुकोपादानत्वेन व्द्यणुकं प्रसाध्य तदुपादनत्वेन परमाणुः साध्यत इति क्लिष्टकल्पनैवाश्रयणीयेत्यत्र हेतुरस्ति।।
किंच भाट्टैर्यत्र गुणगुण्यादौ समानाधिकृतत्वान्यायानुपपत्तिरूपार्थापत्या भेदाभेदौ साध्येते तत्रार्थापत्तेरनुमानत्वादिना तार्किकतेणानुमानेनैव तद्धीर्वाच्येति कथमनुमानेनाप्रसिद्धस्यासिद्धिः।।

प्रयोगोत्तरकालं साधने प्रकृतानुपयुक्तान्वितोक्तिरूपार्थान्तरापादिका प्रयोगात्पूर्वं
विप्रतिपत्यनन्तरमेव साधने क्रमविपर्यासरूपाप्राप्तकालत्वापादिका इति कल्पनेत्यन्वयः। उभयत्र हेतुर्विप्रतिपत्यननुसारिणीति। परमाणूपादानकं प्रधानोपादानकं वेति विप्रतिपत्तौ परमाणूपादानकत्वरूपेण साध्यप्रसिद्धिसंपादनस्यैवानुगुणत्वादिति भावः --
क्लिष्टकल्पनयैवात्र साध्यमित्यतिदुर्वचः।
इत्यनुव्याख्यानोक्तेरिति भावः।।
परिशेषो मिथः सिद्धिश्चक्रकः स्वाश्रयादयः।
असिद्धसाधकत्वेन पञ्चावयतां विना।।
अङ्गीकार्या'
इत्यनुव्याख्यानसुधोक्तं हृदि कृत्वा परिशेष इत्युपलक्षणं मत्वाह-- किंचेति।। समानाधिकरण्यप्रयोगोऽस्ति, अत्यन्ताभिन्ने च घटः करीर इति प्रयोगोस्ति,

१.त्वेति - ट. ठ. ड.

अप्रद्ध-विशेषस्य-दोत्वङ्गः) अनुमादोषवादः पु - २५७.

अपि च यथात्माश्रयान्योन्याश्रयचक्रकानवस्थाव्याघाताद्यापादकेषु तर्केष्वप्रसिद्धस्यैवात्माश्रयादेरापादनं तथापसिद्धस्य साधनमपि किं न स्यात्। न ह्यात्माश्रयादिकं क्वचित्प्रमितम्। न चाप्रसिद्धमापाद्यं न तु साध्यमित्यत्र हेतुरस्ति।।
किंच मन्मते तर्कोप्यनुमानं त्वन्मतेत्वननुमानरूपोपि तर्को व्याप्तिसापेक्ष इति कथमनुमानं प्रसिद्धिसापेक्षं तर्कस्तु तन्निरपेक्ष इति व्यवस्था।।

अपि चाप्रसिद्धस्या १ पि सिद्धौ शशश्रृङ्गादिकमपि सिध्येदिति त्वायाऽऽपाद्यमानास्याप्यतिप्रसङ्गस्याप्रसिद्धत्वात्कथमापादानमिति दिक्।।

गुणगुण्यादौ तु नीलो घटः शुक्लः पट इत्यस्ति सामानाधिकरण्यप्रयोगः, स च तयोर्भेदाभेदौ विना नोपपद्यत इति तदन्यथानुपपत्तिरूपार्थापत्येत्यर्थः। तद्धीः भेदाभदधीरित्यर्थः। अर्थापत्यैव तद्धीजन्माङ्गीकारेऽर्थापत्तेः भाट्टानां भेदाभेदधीरनुमितिरूपैव। अथाप्यत्रार्थापत्तिफलत्वाभिमानमात्रमिति नैयायिकेन वाच्यमित्यर्थः। कथमापादनमिति दिगिति।।

नन्वप्रसिद्धमप्यापादयितुं शक्यते न तु साधयितुमिति चेन्न। हेत्वाभावेन निराकृतत्वात्। व्याप्तिसापेक्षत्वस्यापादाने साधने चोभयत्र तुल्यत्वात्। ननु शब्दाभासादिना शशश्रृङ्गादिज्ञाने सति -

१.स्यसि - ग.ट.रा.

नापि पक्षधर्मताविघटनादिति द्वितीयः। पक्षधर्मतासंदेहानपेक्षेत्युक्तत्वात्।। न तृतीयः। उक्तेषु परमाणूपादनकत्वादिसाधकेष्वनुमानेष्वर्थापत्तिस्थले आत्माश्रयाद्यापादतर्करूपानुमानेषु च साध्याप्रसिद्धावपि व्याप्तेः सत्वात्। केवलव्यतिरेकिमात्रे साध्याप्रसिद्धावपि -

शशश्रृङ्गादिसिद्धिरापादयितुं शक्यते एव। यदपि विमतं परमाणूपादानकमित्यादौ साध्याप्रसिद्धिः कथमिति।।

तन्न। कारणादादिवादिवाक्येन परस्य तज्ज्ञानसंभवात्। तावन्मात्रेण तत्प्रसिद्ध्या १ पत्तौ प्रमाणेनैव प्रसिद्ध्या भाव्यमिति निर्बन्धा २ पातात्। नैयायिकस्यापि कारणादाद्युपदेशेन वा स्वार्थानुमानेन वा परमाण्वाद्यवगतिसंभवेन साध्यप्रसिद्धेरिति चेत्तर्हि सात्मकत्वादिस्थलेऽप्येवं वक्तुं शक्यत्वादप्रसिद्धत्वं न दोषायेत्येवमुपेयमित्याद्यूह्यमिति भावः। उक्तत्वादिति।। पक्षलक्षणोक्तिप्रस्ताव इत्यर्थः। व्याप्तिविघटनाद्वादोषत्वमिति पक्षं निराह-- न तृतीय इति।। किं व्याप्तिस्वरूपविघटकत्वमभिप्रेतं उत तद्ग्रहविघटकत्वम्। आद्ये --
'व्याप्तिश्च व्यतिरेकेण तत्रतैश्चावगम्यते'।
इत्यनुव्याख्यानसुधोक्तं हृदि निधायाह-- उक्तेष्वित्यादि।। तर्कस्यानुमानतायाः साधितत्वात्तर्करूपानुमानेष्वत्युक्तम्। व्यतिरेकमात्र इति।। मात्रशब्दः कार्स्न्यपरः। सर्वकेवलव्यतिरेकिषु भूरितरेभ्यो भिद्यते भूतत्वात्, जीवच्छरीरं सात्मकमित्येवमादिष्वित्यर्थः।।

१.द्धद्युपपत्तौ -ट.ठ.ड. २.न्थोस्ति- -ट. न्थाभावात् -ठ.ड.

अप्रद्ध-विशेषस्य-दोत्वङ्गः) अनुमानदोषवादः पु - २५९.

ममान्वयव्याप्तेस्तव व्यतिरेकव्याप्तेः सत्वाच्च। शिष्टं व्यतिरेकिभङ्गे उक्तम्।।
ननु व्यतिरेकिण्यप्रसिद्धेन साध्येन साधनस्य कथमन्वयव्याप्तिरिति चे १ न्न। व्यतिरेकव्याप्तिरपि कथम्। प्रतियोग्यज्ञाने व्यतिरेकानिरूपणात्। किंच मन्मते साध्यं विना साधनस्यानुपपत्तिरेव व्याप्तिः। तत्र च विनाशब्दोक्तसाध्याभावज्ञानाय प्रतियोगिभूतसाध्यधीरेवापेक्षिता। न तु पूर्वं तत्प्रमितिः।

ननु भूरितरभिन्नेत्यादौ त्रयोदशान्योन्याभावानां विशकलिततया प्रसिद्धत्वेनैकबुद्ध्युपारूढानां तेषां व्यतिरेकव्याप्तिनिरूपणं सुशकम्। घटादावेव वा साध्यप्रसिद्धिः। न च तथात्वेन्वयित्वं. तस्य पक्षैकदेशत्वात्। न चैवमनुमानं व्यर्थम्। उद्देश्यसिद्ध्यर्थत्वादिति चेत्तर्हि तत्र हेतुसत्वासत्वाभ्यामन्वयित्वासाधारण्योरापात्त इत्याद्यभिप्रायेणाह-- शिष्टमिति।। ननु ममान्वयव्याप्तेरित्ययुक्तम्। साध्याप्रसिद्धौ तत्सामानाधिकरण्यस्य हेतौ क्वाप्यग्रहेण सामानाधिकरण्यघटितान्वयव्याप्तेरसम्भवादिति शङ्कते -- नन्विति।। प्रतिबन्दीमाह -- व्यतिरेकेति।। ननु परपक्षेऽनुपपत्युक्तिमात्रेण कथं स्वपक्षेऽनुपपत्तिपरिहारः। न हि पराङ्गं दग्धमिति स्वाङ्गदाहः शाम्यदीत्यतः न केवलं प्रतिबन्दी उपपत्तिश्चास्मत्पक्षेऽस्तीत्याह -- किंचिति।।

१.सत्तुभ्यां -ट.ठ.

पु - २६०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

अस्तु वा सामानाधिकरण्यनियमो व्याप्तिः। तथापि न तावदप्रसिद्धेन साध्येन साधनस्यानन्वय एवेति युक्तम्। व्यतिरेकिणो विरुद्धहेत्वाभासत्वापातात्। साध्यप्रसिद्धेर्व्याप्तिहेतुत्वेन व्याप्तिं प्रत्यहेतुत्वाच्च। नापि सत्या १ मन्वयव्याप्तौ
तद्ग्रहो २ न शक्य इति वाच्यम्। पक्षादिप्रविभागात्प्राक् स्वशीररादावेव प्रत्यक्षेणोपदेशादिना ३ वाऽवगतसात्मकत्वस्य पुंसो भूयोदर्शनादिना धूमाग्न्योरिव प्राणादिमत्वसात्मकत्वयोरप्यन्वयव्याप्तिग्रहस्यस्वार्थानुमितौ ४ सम्भवात्। न च जीवच्छरीरमात्रस्य पक्षीकरणादन्वयदृष्टान्ताभावः।

अभेदसाधकानुमान इवानुमित्यादिना पक्षस्यापि स्वशरीरस्य निश्चितसाध्यकतया दृष्टान्तत्वस्यापि सम्भवात्।।

नन्वथापि न्यायमतसिद्धसामानाधिकरण्यनियमरूपव्याप्तिरशक्यैवेत्यतः तत्राप्युपपत्तिमाह -- अस्तु वेति।। अनन्वय एवेति।। असामानाधिकरण्यमेवेत्यर्थः। तथात्वे नित्यः शब्दः कृतकत्वादितिवत् विरुद्धहेत्वाभासः स्यादित्यर्थः। नन्वस्तु सामानाधिकरण्यं तन्नियमरूपव्याप्तिस्तु साध्याप्रसिद्धिस्थले कथमित्यत आह -- साध्येति।। तथा च साध्याप्रसिद्धिस्थले तन्निरूपितव्याप्तिज्ञप्तेरभावेपऽपि नियतसामानाधिकरण्यरूपव्याप्तेरप्रतिबन्धाव्व्याप्तिविघटनात्साध्याप्रसिद्धिर्दोष इति न युक्तमिति भावः। द्वितीयं निराह-- नापीति।। सुधोक्तमाह-- पक्षादीति।। व्यितरेकवादे मण्युक्तं सर्वमत्राह-- अभेदेति।।

१.मप्य -ग.ट.रा. २.होश -ग.ट. ३.नाचाव -ग.ट. ४.तेश्च -ट.रा.

अप्रद्धःविशेस्य-दोत्वङ्गः) अनुमादोषवादः पु - २६१.

------ ----------

नापि सिद्धसाधनम्। स्वार्थानुमाने तस्यादोषत्वात्। उद्देश्यायाः शरीरत्वावच्छेदेन साध्यप्रतीतेः प्रागसिद्धेश्च। न च १ पक्षस्य पक्षैकदेशस्य वा दृष्टान्तत्वे सपक्षत्वेन २ व्यतिरेकित्वभङ्गप्रसङ्गो व्यतिरेकवादिनस्तवेव तदभाववादिनो ममाप्यनिष्टः।।
ननु स्वेन गृहीताऽपि व्याप्तिः शरीरमात्रे विप्रतिपन्नं प्रति कथं दर्शनीयेति चेन्न। तं प्रति ३ व्याप्तिग्रहणस्थलस्याविप्रतिपत्या प्रतिरुद्धत्वेन प्रदर्शयितुमशक्यत्वेऽपि जीवच्छरीरजातं सात्मकं प्राणादिमत्वात्

यत्कार्यवत्तत्कारणवत् यथाङ्कुरवती भूमिर्बीजगर्भेति सामान्यव्याप्तिप्रदर्शनस्य वा
प्राणादिमत्वं सात्मकत्वेन व्याप्तं तदभावव्यापकाभावप्रतियोगि तत्तेन व्याप्तं यथा धूमो वह्निनेति व्यतिरेकव्याप्त्या ४ विशेष्यान्वयव्याप्तिसाधनस्य वा, अनुपपत्तिरूपान्वयव्याप्तेर्विशिष्यप्रदर्शनस्य वा संभवात्।

ननु प्राग्व्यतिरेकिभङ्गे पक्षैकदेशस्य दृष्टान्तत्वे व्यतिरेकित्वभङ्गो भवद्भिरेवापादितः स दोषस्तर्हि स्यादित्याशङ्क्या निराह-- न चेति।। स्वार्थानुमादोषत्वा ५ सम्भवेपि परार्थप्रयोगे दोष इति शङ्कते -- नन्विति।। सुधोक्तदिशा समाधिमाह-- तं प्रतीत्यादिना।। अनुपपत्तिरूपेति।।

१.पक्षस्येति न -ग.ट.रा. २.सपक्षत्वेनेति नास्ति-ग.रा. ३.विशिष्टस्येत्यधिकम्-ग.ट.रा. ४.विशिष्टान्वव्यतिरेकव्याप्तिप्रसेसा -ट. तिव्यातिरेकव्याप्त्यान्वयव्याप्तिप्र -रा. ५.मानासंभ - ट.ठ.

पु - २६२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

यथा च व्यभिचारस्थलानुक्तावप्युपाधिना व्यभइचारः, यथा वा दृष्टान्तानुक्तावपि धूमो वह्निव्याप्य इति आप्तवाक्येन व्याप्तिः, तथाऽन्वयदृष्टान्तानुक्तावप्यनेनानुमानेनान्वयव्याप्तिः सिदध्यत्येव।।
एतेन साध्यरूप्रतियोग्यज्ञानात्तदभाव १ रूपज्ञानं न युक्तमिति साध्याभावस्य साधनाभावेन व्याप्तिज्ञानं न संभवतीति निरस्तम्। उक्तरीत्या प्रत्यक्षेणोपदेशादिना वा साध्यसाधनरूपासाधारणधर्मावेकत्रोपलब्धवतः ततोऽन्यत्र सर्वत्रापि

तदभावं च पश्यतो वादिनः प्रतिवादिनोपि वादिवाक्यावगतप्रतियोगिनस्तदभावग्रहसंभवेन व्यतिरेकव्याप्ति २ ग्रहस्य सुलभत्वात्। न च प्रमाणेनैव प्रतियोगी ज्ञातव्य इति नयमोस्ति। शशश्रङ्गाद्यभावासिद्ध्या शशश्रङ्गादेरसत्वासिद्धिप्रसङ्गात्। न ह्यसतो निषेधः स्वविरिद्धसत्वापेक्षः।।

प्रणादिमत्वस्य सात्मकत्वप्रयोज्यतया प्राणादिमत्वं सात्मकत्वेन विनाऽनुपपन्नमित्येवंरूपेणानुपपत्तिरूपान्वयव्याप्तेर्विशिष्य
प्रदर्शनसंभवादित्यर्थः।
ननु प्रमाणेन प्रतियोगिनोऽनवगतौ क्वचित्सत्वाभावात्कथं तन्निषेध इत्यत आह-- न ह्यसत इति। सत्वे सति
निषेधस्यैवायोगादिति भावः।

१.रूपपदं न -ग.क.ट.रा. २.ज्ञानस्य -क.ग.रा.

अप्रद्ध-विशेस्य-दोत्वङ्गः) अनुमादोषवादः पु - १६३.

किं चैवं सति तत्तद्वादिनां पराभिमतसप्तम १ पदार्थप्रधानपरमाण्वादिनिषेधो न स्यात्। न च तत्रापि प्रधानादिकं नेति न निषेधः। किं तु जगदुपादानं परमाण्वा २ दिकं नेत्येवं ३ तथाच खण्डशः प्रमितरस्तीति वाच्यम्। पररीत्याप्रसक्तस्य स्वरूपेणैव निषेधसंभवे स्वाभिमतस्य निषेधप्रतियोगिप्रमाणिकत्वस्य निर्वाहायानानुभाविकक्लृष्टकल्पनेऽन्योन्याश्रयात्।।

सप्तमेति।। द्रव्यगुणकर्मसामान्यविशेषसमवायाः षडेव भावपदार्थाः। न सप्तमोस्तीति सप्तमपदार्थस्य साङ्क्याभिमतप्रधानस्य च निषेधो

नैयायिकस्य न स्यात्। तथा साङ्ख्यादेः परमाण्वादिनिषेधो न स्यादित्यर्थः। खण्डश इति।। जगति परमाण्व ६ तिरिक्तपदार्थस्य च प्रमितिरस्तीत्यर्थः। परीत्याप्रसक्तस्येति।। तदीयवाक्याभासप्रसक्तस्येत्यर्थः। अन्योन्याश्रयादिति।। त्वदुक्तरीत्यैव निषेधे सिद्धे निषेध्यस्य प्रामाणिकत्वसिद्धिः। सिद्धे च तस्मिन्नुक्तरीत्या निषेधसिद्धिरित्यन्योन्याश्रयादित्यर्थः।।
त्वदुक्तरीत्या ७ निषेधो न युक्त एव। जगदुपादानमिति परमाणुत्वेनोपादान ८ मभिप्रतेमुत सांख्याभिमतप्रधानत्वेनाथोभयानुगतोपादानत्वरूपसामान्यधर्मेणोपादनमात्रम्ि ाति विकल्पान् क्रमेण निराह--

१.प्तपदा- क.ट. २.ण्वतिरिक्तं -क.ग.ट.रा. ३.ततश्च-क.ग.ट. ४.त्पदार्थस्य उपा -ट.ठ. उपादानभूत -ठ. ५.स्य च -ट. ६.णुपदार्थ - स्यातिरिक्तपदार्थस्य च -ट. ७.त्यापि -ड. ८.न त्वम -ठ.

किंच जगदुपादनशब्देन परमाणोरवोक्तौ सिद्धसाधनम्। प्रधानोक्तावाश्रयासिद्धिः। प्रमाणिकाप्रमाणिकानुगतं सामान्यं तु नास्त्येवः।।
एतेन सात्मकत्वरूपसाध्यघटितान्वयव्याप्तिरूपसाध्याप्रमिता १ न्वयव्याप्त्या सह व्यतिरेकव्याप्तेरन्वयव्याप्त्यग्रहात्कथं व्यतिरेकव्याप्त्याऽन्वयव्याप्त्यनुमितिः।

किंचेत्यादिना। प्रमाणिकेति।। परमाणुर्हि त्वन्मते प्रामाणिकः प्रधानमप्रमाणिकं न हि शशविशषाणयोर्विषाणत्वसामान्यमिव

प्रामाणिकाप्रामाणिकपरमाणुप्रधानरूपोभयगतमुपादानत्व २ सामान्यमस्ति। आश्रयाभावे धर्मायोगात्। न हि प्रतियोगित्वासत्वादिवदुपादानत्वं धर्मिसत्तानिरपेक्षम्। येन प्रतियोगित्वादिप्रतिबन्दी स्यादिति भावः।।
ननु व्यतिरेकव्याप्त्यान्वयव्याप्त्यनुमानं प्रागुक्तमयुक्तम्। साध्यस्याप्रसिद्धौ तन्निरूपितान्वव्यप्तेरप्यप्रसिद्ध्या तया सह लिङ्गभूतव्यतिरेकव्याप्तेर्व्याप्तिग्रहासंभवादित्याशङ्कामनूद्य निराह -- एतेनेति।। ननु व्यतिरेकव्याप्तिरूपलिङ्गेनान्वयव्याप्तिरूपसाध्यस्यानुमानस्थलेऽपि लिङ्गलिङ्गिभूतयोर्व्यतिरेकव्याप्त्यन्वयव्याप्त्योरन्वयव्याप्तिस्तयोर्व्यतिरेक व्याप्त्यानुमिता सती सात्मकत्वप्राणादिमत्वनिष्ठान्वयव्याप्त्यनुमित्यनुकूलास्त्विवत्यत आह-- तत्रापीति।।

१.तावन्व -क.ट.रा. २.रूपपदमधिकम्- ट.ड.

अप्रद्ध-विशेस्य-दोत्वङ्गः) अनुमादोषवादः पु - २६५.

तत्रापि व्यतिरेकव्याप्त्याश्रयणे चानवस्थेति निरस्तम्। यद्यदभावव्यापकाभावप्रतियोगि तत्तेन व्याप्तं यथा धूमोग्निनेति सामान्यव्याप्तेः। अनुपपत्तिरूपाया विशिष्यान्वयव्याप्तेश्च दर्शितत्वात्। एवं शब्दः अष्टद्रव्यातिरिक्तद्रव्याश्रितः, अष्टद्रव्याश्रितत्वे बाधकोपपन्नत्वे सति गुणत्वात्। गगनमितरेभ्यो भिद्यते शब्दा १ श्रयत्वादित्यादिकेवलव्यतिरेकिष्वपि योयदा २
श्रयत्वे बाधकोपपन्नत्वे सति गुणः स तदन्याश्रितः, यद्य ३ दसाधारणधर्मवत् तत्तो भिद्यत इति सामान्यव्याप्तिर्वा। कणादोपदेशादिना शब्दे गगने च साध्यसाधने उपलब्दवतः 'तदन्यत्र सर्वत्र तदभावं च

पश्यत' इत्यादि पूर्वोक्तरीत्या व्यतिरेकव्याप्त्या ४ विशिष्याऽन्वयव्याप्तिर्वा अनुपपत्तिरूपा विशिष्टान्वयव्यप्तिर्वा उपपाद्या ।।

व्यतिरेक्यन्तरेष्वपि सुधोक्तं हृदि कृत्वा प्रागुक्तरीत्यान्वयव्याप्तिं त्रेधोपपादयति -- एवमित्यादिना।।
यत्तु मण्यादितार्किकग्रन्थे व्यतिरेक्यनुग्रहार्थं सामान्यप्रसिद्धिसंपादकं सामान्यतोदृष्टानुमानं नियमिति तत्कथनं तदाशङ्क्य निराह--

१.श्रयत्वादित्यादि व्यतिरे -क.ट.रा. २.दाश्रितत्वे -ग.ट. ३.दवृत्तिधर्मा - क.ट.रा. ४. प्त्यनुमितेति शोधितम् -ट.

पु - २६६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

नचा १ त्रापि शब्दः क्वचिदाश्रितो गुणत्वादित्यनुमानेन साध्यं सामान्यतः प्रसिद्धमिति वाच्यम्। उक्तरीत्या साध्याप्रमितावपि त्रेधा व्याप्तिग्रहसंभवेन सामान्यतोदृष्टानपेक्षणात्।।
किंच सामान्यतोदृष्टस्यावश्यकत्वे तदेव तर्कं विनाकृतमनिर्धारिताश्रयविशेषमाश्रितत्व २ सामान्यं गृङ्णदपि इतरबाधकतर्कानुगृहीतं पुनरनुसन्धीयमानमष्टातिरिक्ताश्रितत्वरूपविशेषमेव ग्रहीष्यति। एकस्यैव सहकारिवैचित्र्येण विचित्रकार्यजनकत्वदर्शनात्। सामान्यस्यैकविशेषबाधे विशेषान्तरे पर्यवसाननियमाच्चेति किं व्यतिरेकिणा। न चादृष्टद्रव्यातिरिक्तद्रव्याश्रितत्वप्रकारिका प्रतीतिर्व्यतिरेकिसाध्या सा च न सामान्यतो दृष्टेन ३ सिध्यति ततः प्राग ४ नुपस्थितेरिति शङ्क्यम्। ईश्वरानुमाने -

न च तत्रापीति।। तदपेक्षायां बाधकं चाह-- किंचेति।। इतरेति।। इतराश्रितत्वे
यद्बाधकं तादृशतर्कानुगृहीतमित्यर्थः। एकस्यैवेति।। कार्यत्वाद्यनुमानं लाघवतर्कानुगृहीतं सत् कर्त्रैक्यमपि गृह्णाति न चेत्कर्तृमात्रं गृह्णाति। संस्कारादिसहकृतं चक्षुरादि तत्तामपि गृह्णाति न चेदिदंतामेवेत्येवं दर्शनादित्यर्थः। व्याप्तिबलाच्च सामान्यस्यैव विशेषे पर्यवसानं न्याय्यमित्याह-- सामान्यस्येति।। उद्देश्यसिद्ध्यर्थत्वेन व्यतिरेकिसार्थक्यमाशङ्क्य निराह -- न चेदित्यादिना ।।

१. च तत्रापि क. ट.रा. २.ज्ञानेत्यधिकम् ग.रा. ३.ननसि- ग.ट.रा. ४.गुक्तरूपस्य प्रकारस्या, ५.अनुव्यवसाये इत्यादि नास्ति- ग.रा.

अप्रद्ध-विशेस्य-दोत्वङ्गः) अनुमादोषवादः पु - २६७.

कर्त्रैकत्ववदनुव्यवसाये रजतत्वप्रकारकत्व ५
वदभावज्ञानेऽनुयोगित्वप्रतियोगित्वादिवच्च प्रागनुपस्थितस्यापि
प्रकारत्वोपपत्तेः।।
ननु तथापि कथंचित्साध्यप्रसिद्धिरावश्यकीति त्वयापि स्वीकृतत्वत्कथं तदावश्यकत्वनिरास इति चेन्न। मम हि पराभिप्रेतायाः पक्षादन्यत्र साध्यतावच्छेदकावच्छिन्नत्वेन प्रकारेण प्रतिवादिनं प्रति साध्यप्रसिद्धेरावश्यकतैव निरस्या। न तु प्रतीतिमात्रस्य । उक्तं हि टीकायाम्। प्रत्यक्षेणोपदेशादिना वाऽसाधारणधर्मावेकत्रोपलब्धवत इत्यादि। टीकाकारीया परेण व्यतिरेकिणि सामान्येनान्वयव्याप्त्यादिके शङ्किते तं प्रति क्लिष्टकल्पनत्वोक्तिस्तु व्यतिरेकवादिनस्तवान्वयव्याप्त्युक्तिः -

कथं चिदिति।। प्रमाप्रसाधारण्येनेत्यर्थः। स्वीकृतत्वादिति।। प्रतिवादिनोपि वादिवाक्यावगतेत्यादिपूर्वग्रन्थेन तथा प्रतीतेरपि भावः। उक्तं हीति।। भक्तिपादे -- 'यथानुभवमेवैतन्नाङ्गीकार्यं कुतस्तदा' इत्येतद्व्याख्यावसरे सुधायामित्यर्थः। पूर्वयत्रेधा व्याप्त्युपपादनं व्यतिरेकिणि कृतं तत्र भक्तिपादीयसुधावाक्यविरोधमाशङ्क्य तदभिप्रायोक्त्या निराह -- टीकाकारीयेत्यादिना।।

१. एवेति नास्ति -ग.ट.रा.

व्यतिरेकित्वहान्यापादकत्वात्क्लिष्टेत्यभिप्रायेणैव। न तु स्वमतेपि क्लिष्टेत्यभिप्रायेण। सिद्धान्तेऽपि सामान्यव्याप्त्यादेः सत्वादेव १ । तस्मात्साध्याप्रसिद्धिर्व्याप्तिविघटिकेति तृतीयो न युक्तः।।
तदुक्तं भगवत्पादैः -- असत्यपि व्याप्तिरस्त्येवेति।। साध्यस्य प्रसिद्धत्वेऽसत्यपि साध्यं विनाऽनुपपत्तिरूपा वा, नियतसामानाधिकरण्यं व्याप्तिरिति पक्षेऽपि सामान्यतोऽन्वयव्याप्तिर्वा व्यतिरेकव्याप्त्यनुमिता विशिष्टान्वयव्याप्तिर्वा उक्तरीत्याऽस्त्येवेत्यर्थः।।
नापि चतुर्थः। उक्तरीत्या स्वेन ज्ञातस्य सात्मकमित्यादिशब्दार्थस्य वादिनापि प्रतिवादिनं प्रति समवायान्त्यविशेषादिशब्दार्थस्येव व्युत्पादनेऽविदितपदार्थकत्वाभावात्। तदर्थज्ञाने तत्र विवादायोगाच्चऽ

तदुक्तमिति।। साध्याप्रसिद्धावपि व्याप्तिरस्तीत्येतत्प्रमाणलक्षणे उक्तमित्यर्थः। प्रागार्थान्तरस्योक्तत्वात्प्रकृतोपयोगितयाऽत्रार्थमाह-- साध्यस्येति।।
प्रतिज्ञावाक्यस्याविदितपदार्थत्वेनाबोधकत्वप्रसङ्गात्साध्यासिद्धेर्दोषत्वमिति

पक्षं निराह -- नापि चतुर्थ इति।। उक्तरीत्येति।। स्वशरीरादौ पत्यक्षेणोपदेशादिना वावगतसात्मकत्वस्य पुंस इत्यादिनोक्तरीत्येत्यर्थः। अस्ति नास्तीति विवादरूपकार्येणैव तज्ज्ञानं वादिप्रतिवादिनोः सिद्धमिति कथमविदिपदार्थकत्वं प्रतिज्ञावाक्यस्येति भावेनाह -- तदर्थाज्ञान इति।। कारणस्य विशेषणज्ञानस्याभावे कार्यस्य विशिष्टज्ञानस्यायोगाद्वा साध्यासिद्धेर्दोषत्वमिति पक्षं निराह -- न पञ्चम इति।।

व्यकणाद्धेः- दोत्वङ्गः) अनुमादोषवादः पु २६९.

न पञ्चमः। विशेषणज्ञानं विशिष्टज्ञानहेतुर्नेति निर्विकल्पकभङ्गे उक्तत्वात्। हेतुत्वेप्यप्रामाण्याभावसाध्यकानुमान इवादौ सा ध्यविशेष्यकैव धीः
पश्चात्साध्यविशेषणिकेति सुवचत्वाच्च।।
तस्मात्साध्याप्रसिद्धिर्न दोष इति।।
अप्रसिद्धविशेषणत्वस्य दोषत्वभङ्गः ।। २६ ।।

अप्रमाण्येत्यादि।। व्यक्तमेतत्प्रामाण्यवादे परमते प्रामाण्यानुमित्यसंभवोक्तिप्रस्तावे।।
नन्वेवम 'निर्वचनीयासिद्धेरप्रसिद्धविशेषणः पक्षः'इति प्रकरणादौ तत्रतत्राप्रसिद्धविशेषणत्वस्य दोषत्वेनोद्भावनं विरुध्यत इति चेन्न। तस्य परमतानुसारित्वस्य तत्र टीकायामेव व्यक्तत्वादिति भावः।।
अप्रसिद्धविशेषणत्वस्य दोषत्वभङ्गः ।। २७ ।।

२७-६-२००१.
व्यकणाद्धेः-दोत्वङ्गः) अनुमादोषवादः पु - २६९.

अथ व्यधिकरणासिद्धेर्दोषत्वभङ्गः ।। २७ ।।
एवं व्यधिकरणासिद्धिरपि न दोषः। तथा हि --

अथ व्यधिकरणासिद्धेर्दोषत्वभङ्गः ।। २८ ।।
'व्याप्तत्वे व्याश्रयत्वं तु कथमेवहि दूषणम्।
रोहिण्युदय आसन्नः कृत्तिकाभ्युदिता यतः।
इत्युक्ते साधनं नो किं न ह्याज्ञैवात्र साधिका'।

पु - २७०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

तस्या दोषत्वं १ किमितिसङ्गात्, पक्षधर्मताविघटनाव्याप्तिविघटनाद्वा २ ।।
नाद्यः। नित्य आत्मा काकस्य काष्ण्यर्यादित्यादेर्व्याप्त्यभावेनैव दुष्चत्वात्। शब्दो नित्यः घटस्य कृतकत्वादित्यत्र तु शब्दस्य कृतकत्वं स्वीकृतं चेद्घटस्येत्यस्य वैयर्थ्यात्। अस्वीकृत्य घटगतेनैव कृकत्वेन शब्दानित्यत्वसाधने तु यत्र कृतकत्वं तत्रानित्यत्वमिति व्याप्तेस्तत्र सामानाधिकरण्यगर्भितत्वेनान्यगतस्य तस्यान्यगतेनानित्यत्वेन व्याप्तेरेवाभावात्।।

इति भक्तिपादीयानुव्याख्यानसुधोक्तरीत्या विकल्पान् दोषांश्च व्यनक्ति--किमित्यादिना।। अतिप्रसङ्गादिति ३ ।। काकस्य काष्ण्यर्यादित्यादेरपि सद्धेतुत्वापत्तिरूपातिप्रसङ्गादित्यर्थः। इत्यत्रत्विति।। यत्र कृतकत्वं तत्रानित्यत्वमिति व्याप्तिसत्वेन व्याप्त्यभावेन तत्र दुष्टताया वक्तुमशक्यत्वेऽपि प्रकारान्तरेण दुष्टत्वं तत्रेति विशेष ४ द्योतकस्तु शब्दः। वैयर्थ्यादिति।। व्यर्थविशेषणत्वेनैव दुष्टत्वमिति भावः।।

ननु
प्रतियोग्यसामानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिरिति मण्युक्तसामान्यलक्षणपक्षे महानसीयधूमस्य पर्वतादिनिष्ठवह्निनेव व्यधिकरणयोरपि व्याप्तिरस्तीति पक्षे
दोषान्तरमाह -- किंचेति।।

१.किमदोषत्वेति -ग.रा. २.नाच्च व्या-क. ३.'अतिप्रसङ्गादिति' इति नास्ति -ट.ठ. ४.ष्यद्यो -ट.ठ.

व्यकरणाद्धेः-दोत्वङ्गः) अनुमादोषवादः पु - २७१.

किंच सत्यां व्यप्तौ १ व्यधिकरणत्वस्य दोषत्व एवातिप्रसङ्गः। दृश्यते हि व्यधिकरणेनापि पद्मविकासेन सूर्योदयस्य, समुद्रवृत्या चन्द्रोदयस्य, छायया मेघसय्, भूमिष्ठेनालोकेन उपरिसवितुः, चक्रभ्रमेण कुलालासत्तेः, कृत्तिकोदयेन रोहिण्युपयासत्तेः, अधोदेशे २ नदीपूरेण ऊर्ध्वदेशवृष्टेः, ऊर्ध्वभागस्थधूमेन अधोभागस्थवह्नेश्चानुमितिः।।
नन्वत्राप्ययं कालः सूर्योदयवान् पद्मविकासवत्कालत्वात्सम्मतवत् अयं प्रदेशः कुलालासत्तिमान् भ्रमच्चक्रादिकरणत्वात् सम्मतवत् इयं नदीवृष्टिमदूर्ध्वदेशे अयं धूमो मूले ४ ग्निमान् धूम ५ वत्वात् सम्मतवदिति कालं देशादिकं वा पक्षीकृत्य सामानाधिकरण्यं संपाद्यमिति चेत्।।

अतिप्रसङ्ग इति ।। सद्धेतूनामसद्धेतुत्वापत्तिरूपातिप्रसङ्ग इत्यर्थः। तत्कथमित्यत आह -- दृश्यते हीति।।

अनुमितिरित्यन्वयः। अनुव्याख्यानोक्तोदाहरणमुपलक्षणं मत्वाऽऽह -- पद्मेत्यादि।। कालं देशं वाऽऽदाय सर्वत्र सामानाधिकरण्यमाशङ्कते -- नन्विति। देशादिकं वेत्यादितपदेन नदीमिति गृह्यते।

१.प्तौ वैयधिकरण्यस्य -क.ग.रा. २.शनदी -ग.रा. ३.शसं -क.ग.ट.रा. ४.लेव - ग.ट.रा. ५.मत्वा -ट.

पु - २७२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

१ किमियं लौकिकप्रतीतिः उत त्वदभिमतसामानाधिकरण्यनियमनिर्वाहायैवं
प्रयोगविपरिणामः कल्प्यते।।
नाद्यः। त्वदुक्तकुसृष्टिमजानतामपि लौकिकानां पद्मादौ विकासादिदर्शनेनैव सूर्योदयादौ स्वार्थानुमितेः तदनुसारिपरार्थानुमितेश्च दर्शनात्। परीक्षकैश्च लोकसिद्धरीत्यनुसारिण्येव प्रक्रिया कल्प्या। न तु स्वकल्पितप्रक्रिया सा बाध्या। अतिप्रसङ्गात्। उक्तं च न्यायटीकायाम् --
सिद्धानुगममात्रं तु कर्तुं युक्तं परीक्षकैः।
न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम्।।
दृश्यते ह्यद्तनस्य सूर्योदयस्य श्वस्तनेन सूर्योदयेन गम्यगमकभाव इति।।

लोकरीत्येरेवंरूपत्वेषऽपि भवद्भिरिव मयाऽपि लोकरीत्यनुरोधेनैव परिभाषा कार्येति कुत इत्यत आह-- परीक्षकैश्चेति।। अतिप्रसङ्गादिति।। धूमादिना वह्न्याद्यनुमित्युत्पादनादिकमपि न स्यात्। ज्ञानस्यापीच्छाद्वारा प्रवृत्तिहेतुत्वकल्पनं दण्डादेर्घटहेतुताव्युत्पादनादिकमपि

न स्यादित्येवमाद्यतिप्रसङ्गादित्यर्थः। यद्वा समानाधिकरणानामपि गम्यगमकभावो नेत्यपि व्युत्पादनप्रसङ्गादित्यर्थः।।

१.किमेवं लैकिकी -ग.ट.रा.

व्यक-णाद्धेः-दोत्वङ्गः) अनुमादोषवादः पु - २७३.

न द्वितीयः अन्योन्याश्रयत्वा १ त्। अन्यथा मदभिमतवैयधिकरण्यादिनिर्वाहाय पर्वताधोदेशोऽग्निमान् २ ऊर्ध्वदेशस्य धूमवत्वात् विमतः कालो देशो वा अग्निमत्पर्वतसंबद्धः धूमवत्पर्वतसंबद्धत्वात् संमतवदित्यादिरपि विपरिणामः स्यात्।।
किं चैवं सामानाधिकरण्यस्य सर्वत्र सुसंपादत्वेन व्यधिकरणासिद्धिर्निरवकाशा स्यात्। तदसंपादने सा सावकाशेति चेत्तर्ह्यसिद्धिरुक्तिदोषः स्यात्।

त्वदभिमतसामानाधिकरण्यनियम ३ निर्वाहायेत्युक्तकल्पं निराह -- न द्वितीय
इति।। अन्योन्येति।। सामानाधिकरण्यनियमे सिद्धे सति तन्निर्वाहाय प्रयोगविपरिणामकल्पना सिद्धे चोक्तदिशा प्रयोगविपरिणामे सामानाधिकरण्यनियमसिद्धिरित्यन्योन्याश्रयादित्यर्थः।। ४ निरवकाशेति।। अयं काल आत्मनित्यत्ववान् काककाष्ण्यवत्वादित्यादिरूपेण त्वदभिमतव्यधिकरणासिद्धहेत्वाभासस्थलेपि सामानाधिकरण्यस्य सुवचत्वेन व्यधिकरणासिद्धेरुदाहरणं न किमपि लभ्येतेति। दोषत्वेन तस्य परिगणनमयुक्तमापाद्येतेति भावः। तदसंपादने देशकालादिना सामानाधिकरण्यासंपादने इत्यर्थः।

१.यात् -ट.रा. २.न्तदू -ट.रा. ३.मे सिद्धेसति तन्निर्वा -ड. ४.मदभिमतेति मदभिमतं यद्वैयधिकरण्यं तदादिनिर्वाहायेत्यर्थः। आदिपदेन सर्वत्रप्रयोगेषु देशकालयोरन्यतरस्यैव पक्षीकरणनिर्वाहायेति गृह्यते' --
इत्यधिकम् -ठ.

पु - २७४. न्यायदीपुयुततर्कताण्डवम् (तृ.परिच्छेदः

नार्थदोषः। किंच नोक्तिदोषत्वमपि। रोहिण्युदय आसन्नः कृत्तिकाय उदितत्वात् इत्युक्तावपि श्रोतृणामनुमित्युत्पत्तेः।।
न द्वितीयः। व्यधिकरणेष्व १ प्यन्यथानुपपन्नेषु समानाधिकरणेष्वप्यन्यथोपपन्नेष्वलिङ्गत्वस्य च दर्शनेन पक्षध्मताया अनावश्यकत्वात्। २ इहेदानीं सता कार्येणान्यत्रान्यदासतस्तदुचितकारणस्यानुमानाच्च।।

नार्थदोष इति।। तथा च पुरुषस्य पयोक्तृः पराभवेपि तत्र जामानानुमितिः प्रमारूपैव स्यादिति भावः। ननूक्तिदोषस्थले वचनद्वाराऽर्थस्यापि दुष्टत्वमेव तादृशस्थलेऽनुमिते ३ श्चानुदयादित्यत आह -- किंचेति।।
पक्षधर्मताविघटनाद्वेति पक्षं निराह-- न द्वितीय इति।। अन्यथानुपपन्नेष्विति।। अविनाभावरूपव्याप्तिमस्त्वित्यर्थः। प्रागुक्तपद्मविकासादिष्विति भआवः। ४ अन्यथोपपन्नेष्विति।। पर्वतो वह्निमान् पाषाणवत्वत्प्रमेयत्वादित्यादिष्वित्यर्थः। अलिङ्गत्वस्य प्रमित्यजनकत्वस्येत्यर्थः। व्यधिकरणेष्वन्यथानुपपन्नेषु लिङ्गत्वस्य दर्शनादित्युक्तं तत्कार्यकारणभावापन्नेषु दर्शयति -- इहेति।। सत इति पदविभागः। इदानींतनाङ्कुरादिदर्शनेन तत्पूर्वकाले बीजस्य पद्मस्थविकासरूपकार्येणोदयाचलोदितसूर्यस्यानुमानदर्शनादित्यर्थः। अत

एवासमानाधिकरणयोरसमानकालीनयोरपि
कार्यकारणयोर्लिङ्गिभावसत्वादेवेत्यर्थः।

१.ष्वन्यथा -क.ग.ट.रा. २.इदा -क.ट. ३.तेरेवानु -ट.ठ.ड. ४.न्यथाप्युप-ट.ठ.

व्यक-णाद्धेः-दोत्वङ्गः) अनुमादोषवादः पु - २७५.

अत एव वैशेषिकैरपि अस्येदं कार्यं कारणं संबन्ध्येकार्थसमवायि विरोधि चेति लैङ्गिकमित्येकार्थसमवायिनः विरोधि चेति लैङ्गिकमित्येकार्थसमवायिनः कार्यकारणरूपलिङ्गे पृथगुक्ते त्वन्मते पतत्पतितयोरवयवापचयादिना भेदेऽपि पतन्निष्ठ १ पतनेन पतिते गुरुत्वानुमानाच्च। त्वयापि पाको मत्कृतिं विनाऽसत्वे सति

अस्येति।। अस्येदं कार्यमिति, अस्येदं कारणमिति, अस्येदं संबन्धीति अस्येदमेकार्थसमवायेति, अस्येदं विरोधीति पञ्चधा लैङ्गिकं व्यापकमित्यर्थः। विशिष्टमेधोन्नत्यादेर्वृष्ट्याद्याद्यं धूमादेर्वह्न्यादि द्वितीयं संयोगाद्दृष्टव्यं तृतीयं सरसादेरूपादि चतुर्थं ध्वंसादेः प्रतियोग्यादि पञ्चममिति ध्येयम्।।
परसंम्मत्याऽपि व्यधिकरणयोर्लिङ्गिभावं दर्शयति-- त्वन्मत इति।। पतदिति।। पततः पतितस्य चेत्यर्थः। वर्तमानपतनक्रियावतोऽतीतपतनक्रियावतश्येति यावत्। पतनदशायामवयवापचयाभावेऽपि पतिते सत्यभिघातशेनावयवापचयावश्यं भावात्। अवयवापचयस्थले च पीलुपाकप्रक्रिया आपरमाणु नाशेन पुनर्द्रव्योत्पत्तेरङ्गीकारात्पततः फलस्येव पतितत्वदशायामन्यत्वात्तत्र च पतितं २ फलमिदं गुरुत्व ३ वत्

पतनक्रियावत्वात्सम्मतवदित्यनुमानदर्शनात् पतनगुरुत्वयोश्च लिङ्गलिङ्गिभावापन्नयोर्देशतः कालतश्च व्यधिकरणत्वात्कथं

१.ष्ठेनप - क.ग.रा. २.तमिदं फलं -ट.ठ.ड. ३.त्ववत्वात् -ठ.

पु - २७६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

मदिष्टसाधनत्वात् मद्भोजनवत् इत्यत्र सिद्धपाकनिष्ठतया ज्ञातेन हेतुनाऽसिद्धपाकरूपपक्षनिष्ठतया साध्यप्रमितेरुक्तवाच्च।।
किंच त्वन्मते प्रमात्वमेव १ वा निष्कर्षज्ञानत्वमेव वा २ प्रमेयत्वं एवं कृतित्वेच्छात्वद्वेषत्वादिकमेव कार्यत्वेष्टत्वद्विष्टत्वादिकं तथा च शब्दोभिधेयः प्रमेयत्वादित्यादौ कथं पक्षधर्मता। प्रमात्वस्य शब्देन परम्परासंबन्धोऽस्तीति चेन्न।

व्यधिकरणासिद्धेर्दोषत्वमित्यर्थः।। सिद्धपाकेति।। असिद्धपाके हेतोरभावेन तन्निष्टत्वेन तवाज्ञानादिति भावः।। उक्तत्वाच्चेति।। विधिवादे। अतो न पक्षधर्मताविघटकत्वेन दोषत्वं व्यधिकरणासिद्धेरिति भावः। स्थलान्तरेपि व्यधिकरणस्य गमकत्वं परमते दर्शयति-- किं च त्वन्मत इति।। प्रमात्वस्याप्यर्थसत्वौपाधिकत्वेनाजातिरूपत्वात्तद्वति
तत्प्रकारकज्ञानत्वरूपप्रमात्वे ज्ञानत्वस्य प्रवेशमाह-- अनिष्कर्ष इति।। प्रमात्वशरीरघटकोपाधिविवेकेनाखण्डजातिविमर्शे सतीत्यर्थः। अस्तु किं तत इत्यत आह - तथआ चेति।। इत्यादाविति।। इदं सरकर्तृकं कार्यत्वात्, इदं सङ्ग्राह्यमिष्टत्वात, इदं हेयं द्विष्टत्वादित्यादिरादिपदार्थः। कथमिति।। प्रमात्वादेः प्रमादिनिष्ठत्वेन शब्दाद्यनिष्ठत्वादिति भावः। परम्परेति।। शब्दस्य प्रमायाः स्वरूपसंबन्धः प्रमया प्रमात्वस्य समवाय इति परम्परेत्यर्थः। प्रतीतिबलाद्धि येनकेनचित्संबन्धेन 'कृष्णं वस्त्रं

लोहितःस्फटिक'इत्यादाविव परम्परासंबन्धेनापि तद्धर्मत्वं कल्प्यं न हि तथा धीरित्याह -- शब्द इति।। प्रमास्वरूपत्वादिति।।

१.वातिनिष्कर्षे ज्ञा -क.ग. २.वातिनिष्कर्षज्ञा -ट. ३.प्रमेव वा इत्यधिकम्- क.

व्याक-णाद्धेः-दोत्वङ्गः) अनुमादोषवादः पु - २७७.

शब्दे प्रमात्वमिति कदाप्यप्रतीतेः। प्रत्युत प्रमात्वं नेत्येव प्रतीतेः। तस्य तद्धर्मत्वायोगात्। न च प्रमाजातीयविषयत्वं वा ईश्वरप्रमाविषयत्वं वा प्रमेयत्वं तच्च शब्देऽस्तीति वाच्यम्।। विषयत्वरूपसंबन्धस्यापि त्वन्मते प्रमास्वरूपत्वात्। प्रमायाश्य शब्दानिष्ठत्वात्।।
किंच व्यतिरकेव्याप्तिः साक्षादङ्गमिति त्वन्मते व्याप्तिपक्षधर्मतयोर्वैयधिकरण्येपि गमत्ववत् साध्यसाधनयोरपि वयैधिकरण्येऽपि गम्यगमकतास्तु। तत्र प्रतियोग्यनुयोगिभावो नियामकश्येदत्रापि वृष्टपूराश्रयोर्दशयोर्ध्वाधरीभावो नियामकोस्तु।।
अपि च धूमजातीयस्य वह्निजातीयं प्रतिव्याप्यत्वात्पर्वतीयो धूमो महानसीवयववह्निं प्रत्यपि व्याप्य इतित्वन्मते कथं व्याप्यव्यापकयोः सामानाधिकरण्यम्।।

अन्यथाऽतीतादौ प्रमेयत्वाभावापातादिति भावः। प्रतिबन्द्याऽपि वैयधिकरण्यं न दोषायेत्या १ ह-- किंच व्यतिरेकेति।। मण्युक्तव्याप्तिसामानाधिकरणपक्षे व्यधिकरणयोरपि व्याप्तिस्वीकारात्तदनुसृत्याऽऽह -- अपि चेति।।

१.त्यत आ -ट.ड.

ऐतेन
सामानाधिकरण्यव्यतिरेकनिश्चयादिनाऽनुमितिप्रतिबन्धात्तनिश्रयोऽनुमितिहे
तुरिति निरस्तम्। वृष्टिपूरयोः
सामानाधिकरण्यव्यतिरेकनिश्चयेप्यनुमितिदर्शनात्।।
न तृतीयः। वैयधिकरण्येपि व्याप्तेरूपपादितत्वात्।।
व्यधिकरणासिद्धेर्दोषत्वभङ्गः ।। २७ ।।

व्याप्तिविघटनाद्वा दोषत्वमिति पक्षं निराह -- न तृतीय इति।।
व्यधिकरणासिद्धेर्दोषत्वभङ्गः ।। २८ ।।

बाधप्रतिरोधयोः प्रतिज्ञार्थप्रमाणविरोधत्वेनैक्यम्।। २८ ।।
केचित्तु --
सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्चहेत्वाभासाः।

बाधप्रतिरोधयोः प्रतिज्ञार्थप्रमाणविरोधत्वेनैक्यम्।। २९ ।।
नन्वेवमाश्रयासिद्धसाध्यासिद्धिव्यधिकरणासिद्धीनामदोषत्वेऽपि
व्यभिचारादीनां हेतुदोषाणां भावादसिद्धिरव्याप्तिरिति द्वावेव
हेतुदोषावित्ययुक्तमित्याक्षिपति -- केचित्वित्यादिना द्वावेव
हेतुदोषावित्ययुक्तमित्याहुरित्यन्तेन ।। केचित् तार्किकाः।
प्रमाणलक्षणटीकादावसिद्धविरुद्धनैकान्तिकानध्यवसितकालात्यपदिष्टप्रकर
णसमसत्प्रतिक्षभेदेन प्राचां रीत्या सप्तविधानुवादेऽपि
अनध्यवसितत्वस्यानैकान्तिकेऽन्तर्भावं प्रकरणस्यासंभवनया

परिगणनायोग्यत्वमुपेत्य मण्याद्युक्तदिशा पाञ्चविध्यमनुवदति -- सव्यभिचारेति।।
अत एव नैयायिका इत्यनुक्त्वा केचिदित्युक्तिः।

बाप्रयो-प्रर्थप्रण-विनैक्यम्) अनुमादोषवादः पु - २७९.

तदुक्तं गौतमेव -- 'सव्यभिचारवुरुद्धप्रकरणसमसाध्यसमातीतकालाः हेत्वाभासाः'इति। तत्र साध्यतदभावकोटिद्वयोपस्थापकरूप-

एवं निर्देशो पञ्चत्वपरिगणने च मूलमाह-- तदुक्तमिति।। १ मणेरपीदमेव मूलमित्यपि सूचितम्। प्रकरणसमशब्देन सत्प्रतिपक्ष उच्यते। साध्यसमपदेन चासिद्धिः अती कालपदेन बाध इत्युक्तार्थसंवादित्वं ध्येयम्। मण्याद्युक्तदिशा तेषां लक्षणान्यनुवदति-- तत्र तेषुमध्य इत्यादिना।। उपस्थापकेति।। तदुभयोपस्थितिजनकं यद्रूपं साधारणे सपक्षविपक्षवृत्तित्वेन साध्यतदभावसाहचर्यं असाधारणे तदुभयव्यावृत्तत्वं, अनुपसंहारिणि च तदुभयशून्यत्वेन पक्ष एव साध्यतदभावसाहचर्यमित्यग्रे व्यक्तम्। तादृशधर्मत्वं साधारणादित्रितगसाधारणं लक्षणम्।।
यद्यपि मणावुभयकोटीत्याद्येवोक्तम्। तथापि तेनासाधारणस्य साध्यतदभावोपस्थापकतया दूषत्वपक्षे
नाव्याप्तिरित्युत्तरग्रन्थपर्यालोचनयोभयकोचिपदस्य एवमेवार्थोभिमत इतीत्थमनुवादः कृतः।।
यत्तु पक्षधरावुभयकोट्युपस्थितिपदेन व्याप्तिनिश्चयविरोधिसंदेहजनककोट्युपस्थितिर्विवक्षिता अन्यथा सर्वसमभिधेयं वस्तुत्वादित्यादौ केवलान्वयिसाध्यकानुपसंहारिणि साध्याभावकोटेरप्रसिद्धेर २ व्याप्तिः स्यात्। उक्तविवक्षायां तु नाव्याप्तिः। केवलान्वयिसाध्यके इदमभिधेयं न वेत्येवं सन्देहा ३ योगेऽपि अभिधेयत्वं

पक्षवृत्तिन वेत्येवं संशयसंभवात्। व्याप्तिनिश्चयविरोधिसंशयश्च साध्यतदभावसंशयः साध्ये पक्षवृत्तित्वसंशयश्च भवतीति कथनं तत्तु मणिवाक्यविरुद्धम्।

१.तयोरपीदमेव -ठ. २.द्धत्वेनाव्या- ठ. ३.हाभावेपि -- ठ.

पु - २८०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

वत्वं सव्यभिचारत्वं विप्रतिपत्तिवाक्ये सत्प्रतिपक्षे च द्वयोः कोटिद्वयोपस्थापऽकत्वेपि

न चैवं केवलान्वयिसाध्यकानुपसंहारिण्य १ व्याप्तिः। २ तस्यात्रासंग्राह्यत्वादित्याहुः।।
नन्वथाऽनित्यः शब्दः शब्दत्वादित्यत्राप्तवाक्यादिना व्याप्तिग्रहदशायां सद्धेतुत्वात्। तत्र सर्वसपक्षविपक्षव्यावृत्तत्वस्योभयकोट्युपस्थापकरूपस्य सत्वादतिव्याप्तिरिति वाच्यम्। तत्र व्याप्तिसपक्षव्यावृत्तत्वांशस्य तत्राभावात्। अत्र लिङ्गनिष्ठतया यज्ज्ञानमुभयकोट्युपस्थापकं प्रामाण्याप्रामाण्योभयकोट्युपस्थापकरूपज्ञानत्ववति सद्धेतौ नातिव्याप्तिः। ज्ञानत्वस्य प्रामाण्यसंशयविषयानुमितिवृत्तितया ज्ञानत्वेनैवोभयकोट्युपस्थापकत्वादिति।।
नन्वेवमपि पर्वतोऽग्निमान् पर्वतोऽग्निमान्न भवतीति विरुद्धार्थप्रतिपादकवाक्यद्वये शब्दोऽनित्यः कृतकत्वात् नित्यः शब्दः श्रावणत्वादिति सत्प्रतिपक्षे चातिव्याप्तिरेवेत्यत आह -- विप्रतिपत्तीति।।
विप्रतिपत्तिस्तु प्रत्येकं न तथेति पूर्वपक्ष ३ मण्युक्तेः। तथाऽसाधारणग्रन्थे सत्प्रतिक्षेद्धौ अत्र त्वेक एवेति चोक्तेरिति भावः। यद्यपि विमतं मिथ्या दृश्यत्वात् शुक्तिरजतवत् विमतं सत्यं

दृश्यत्वाद्ब्रह्मवदित्यादिप्रकरणसमेप्येकस्यैवोभयोपस्थापकत्वमस्ति, तथाऽपि तस्यैतन्मतेऽसंभावितत्वेनास ४ ङ्ग्रहान्नातिव्याप्तिशङ्कावकाशः। तस्यापि सव्यभिचारत्वेन सङ्ग्र ५ ह्यत्वाददोष इति केचित्।।

१.ण्यतिव्या -ट. २.स्यसंग्राह्य -ठ. ३.ण्याद्युक्ते -ट. ४. णावु - ठ.ड. ४.संग्राह्यत्वा -ड. ५.ङ्ग्रहा - ठ.

वाप्रयो-प्रर्थप्रण- विनैक्यम्) अनुमादोषवादः पु - २८१.

सव्यभिचारवदेकस्य तदुपस्थापकत्वाभावान्न स व्यभिचारलक्षणस्यातिव्याप्तिः। विपक्षमात्रवृत्तित्वं विरुद्धत्वम्। समबलप्रमाण १ प्रतिरुद्धत्वं सत्प्रति -

प्रमाणलक्षणटीकाद्युक्तदिशा २ ऽऽह - विपक्षमात्रेति।। मात्रपदेन सपक्षवृत्तित्वं व्यावर्त्येते न तु पक्षवृत्तित्वमपि। तथात्वेऽसिद्धिसाङ्कर्यापत्तेः। पक्षविपक्षयोरेव वर्तमानो हेतुर्विरुद्ध इति लक्षणटीकाविरोधाच्च। वृक्षः संयोगवान् द्रव्यत्वादित्यत्र द्रव्यत्वहेतोः साध्याभाववद्वृत्तित्वेऽपि निश्चितसंयोगरूपसाध्यवलत्यपि वृत्तेर्न तत्रातिव्याप्तिः। प्रतियोग्यसमानाधिकरणसाध्याभावन्मात्रवृत्तित्वं तदर्थ इत्येके।।
यत्तु मणौ साध्यव्यापकाभावप्रतियोगित्वं वा वृत्तिमतः साध्यवदवृत्तित्वं वा विरुद्धत्वमित्यादि। तन्न। हेत्वभावस्य साध्यव्यापकत्वज्ञानस्य ग्राह्याभावसंस्पर्शितया ग्राह्यभूतव्याप्तिज्ञानाप्रतिबन्धकत्वात्। निश्चितसाध्यवदवृत्तित्वे सति तदभाववद्वृत्तित्वस्य चाव्यभिचरितसहचाररूपव्याप्त्यभावरूपतया तज्ज्ञानस्

व्याप्तिज्ञानप्रतिबन्धद्वाराऽनुमितिप्रतिबन्ध्य सम्भवादिति भावः। पक्षत्रयवृत्तिसाधारणेऽतिव्यापतिवारणाय मात्रपदम्।। समबलेति। समबलत्वं चाभिमानिकं ध्येयम्। अन्यथा वस्तुनो द्विरूपताऽऽपत्तेः। 'समबलतयाऽभिमतप्रमाणविरुद्धः सत्प्रतिपक्षः'इति लक्षणटीकोक्तेश्च। विरुद्धत्वं प्रतिरुद्धकार्यकत्वमअ। बोधेति व्याप्तिनिरासाय समेत्युक्तिः। साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वं सत्प्रतिपक्षत्वमिति मण्युक्तिः। व्याप्तस्य -

१.णविरु --ग.रा. २.शानिराह-- ठ.

पु - २८२. न्यायदीपुयततर्कताण्डवम् (तृ.परिच्छेदः

पक्षत्वम्। परामर्शविषयाभाववत्वं असिद्धत्वम्। प्रबलप्रमाणविरुद्धत्वं बाधः।।
तत्र सव्यभिचारः त्रिविधः। साधारणासाधारणानुपसंहारिभेदात्। तत्र पक्षवृत्तित्वं साधारणत्वम्। सर्वसपक्षविपक्षव्यावृत्तत्वमसाधारणत्वम्।

पक्षधर्मताप्रमितिः सिद्धिः तद्रहितोसिद्ध इति प्राचां रीतिमाश्रित्य लक्षणटीकोक्तं निष्कृष्याह -- परामर्शेति।। परामर्शविषयो व्याप्तिः पक्षधर्मता च तदुभयराहित्यमित्यर्थः।।
यत्तु मणौ परामर्शविषयाभावो नासिद्धः व्यर्थविशषणत्वात् किं तु आश्रयासिद्धिः स्वरूपासिद्धिः व्याप्यत्वासिद्धिरिति प्रत्येकमेव दोष इत्युक्तम्। तत्वितरव्यभिचारादित्वदुक्तलक्षणेपि तुल्यमित्यग्रे व्यक्तम्। सङ्ग्राहकमात्रत्वेस्यापि तथात्वादिति भावः। 'प्रमाणबाधितविषयः कालात्ययापदिष्ट'इति लक्षणटीकाद्युक्तेराह -- प्रबलेति ।। प्राबल्यमत्र वास्तवं वाऽभिमानिकं वा ध्येयम्। सत्प्रतिपक्षेऽतिव्याप्तिनिरासाय

प्रबलेति। प्रबलप्रमाणनिर्धारिताभावप्रतियोगिसाध्यकत्वं बाध इत्यर्थः। वक्ष्यमाणान्तर्भावसुबोधाय मण्याद्युक्तदिशाऽवान्तरविभागमाह -- तत्र।। तेषु मध्ये इति।। पक्षत्रयेति।। पक्षसपक्षविपक्षवृत्तित्वमित्यर्तः। १ यथा शब्दोनित्यः प्रमेयत्वादिति।। सर्वेति।। यथा भूर्नित्या गन्धवत्वादिति।। 'केवलान्वयिधर्मावच्छिन्नपक्षको वे'ति मण्युक्तरीत्याऽऽह -- केवलान्वयीति।।

१.प्रमेयत्वादिति लक्षणं तु सर्वसपक्षव्यावृत्तत्वमिति मण्युक्तेराह -- सर्वेति.ड.

बाप्रयो-पर्थप्रण-विनैक्यम्) अनुमादोषवादः पु - २८३.

केवलान्वयिधर्मावच्छिन्नपक्षताकत्वमनुसंहारित्वम्। असिद्धिरपि आश्रयपक्षधर्मत्वव्याप्यत्वासिद्धिभेदेन त्रिविधा। तत्प्रमित्यसिध्या सह चतुर्विधा वा। एं विरुद्धादेरपि भेदो द्रष्टव्यः।।
१ तन्न शब्दो नित्यो मेयत्वादिति साधारणस्य सर्वमनित्यं प्रमेयत्वादित्यनुपसंहारिणश्च साध्यतदभावसाहचर्यं कोटिद्वयोपस्थापकं रूपम्। इयांस्तु भेदः साधारणस्य पक्षादन्यत्र तत्साहचर्यं अनुपसंहारिणस्तु पक्ष एवेति। अनित्यः शब्दः शब्दत्वादित्य २ साधारणस्य तु साध्यवतः तदभाववतश्च व्यावृत्तत्वं तदुपस्थापकमिति सव्यभिचारलक्षणस्य ३ नातिव्याप्तिः। आश्रयहेतुव्याप्तीनां लिङ्गपरामर्शविषयत्वात्तदभाव ४ वत्वरूपमाश्रयासिद्ध्याद्यसिद्धित्रयाऽनुगतम्।।

केवलान्वयीति।। यथा सर्वमनित्यं मेयत्वादित्यादिप्राचीनमतावष्टम्भेन पद्धत्याद्युक्तदिशाऽऽह -- भेदो द्रष्टव्य इति।। स च पद्धतिलक्षणटीकयोर्व्यक्तः। ग्रन्थगौरवभयात् प्रकृते

वक्ष्यमाणान्तर्भावानुप्रयोगाच्च नास्माभिरपि लिख्यते सव्यभिचारादिलक्षणं साधारणादित्रयेऽसिद्धित्रये च व्यनक्ति - तत्र शब्द इत्यादिना।।

१.अत्र -क.ट. २.त्वद्यसा - क.ट.रा. ३. स्याव्या -क.ग.रा. ४.वरूपत्- क.ग.ट.रा.

पु - २८४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

अत्रासाधारणानुपसंहारिसत्पतिपक्षा अनित्यदोषाः। अनुकूलतर्कावतारशायामनुमित्यप्रतिबन्धकत्वात्। इतरे तु नित्यदोषाः। तत्रापि बाधप्रतिरोधौ साक्षादनुमितिप्रतिबन्धकौ। नतु करणिघटनद्वारा । १ तत्रापि बाधो अनुमितिग्राह्याभावविषय २ धीत्वेन।
प्रतिरोधस्त्वनुमितिग्राह्याभावविषयधीसामग्रीत्वेन। इतरे त्रयः करणविघटनेन। असिद्धिः परामर्श ३
षिवयविघटनेन। तत्राप्याश्रयासिद्धिस्वरूपासिद्धीपक्षधर्मताविघटनेन। व्याप्यत्वासिद्धिस्तु व्याप्तिविघटनेन। तत्माद्वावेव हेतुदोषावित्ययुक्तमित्याहुः।।

अनित्यदोषत्वं व्यनक्ति-- अनुकूलेति।। न तु करणेति।। परामर्शरूपकरणेत्यर्थः। अनुमितीति।। पूर्वप्रयुक्तहेतुजन्यानुमितिग्राह्यस्याभावविषयकधीत्यर्थः। इतर इति।। सव्यभिचारविरुद्धासिद्धास्त्रय इत्यर्थः। द्वारेत्यनन्तरं अनुमितिप्रतिबन्धकता इत्यनुकर्षः। त्वदुक्तरीत्या पाञ्चविध्यसम्भवेपि तेन रूपेण ज्ञातानां तेषामनुमित्यप्रतिबन्धकतया तथानुद्भाव्यत्वेनैवं व्युत्पादनमयुक्ततमपित्वस्मदुक्तरीत्यैव तेन रूपेण ज्ञातानामनुमितिप्रतिबन्धकत्वादुद्भावनीयत्वाच्चेति भावेनोक्तरीत्या

ज्ञातानां प्रतिबन्धकत्वमित्येतदसाधकतालिङ्गत्वं चेत्यादिना वक्तुं सामान्यन्यायमाह -- यद्रूपेणेति।। यद्धर्मप्रकारेणेत्यर्थः।

१.रा कथमपि बोधोनुमिति -क. रातत्राप्यनु - ट. २.यप्रमात्वेन -ग.ट.रा. ३. विषयेति नास्ति -क.ट.

ब्रप्रयो-प्रर्थप्रण-विनैक्यम्) अनुमादोषवादः पु - २८५.

तदसत् यद्रूपेण हि ज्ञानमनुमितिप्रतिबन्धकं तद्रूपेणैव दोषः परं प्रत्युद्भावनीयः। यद्रूपेण चोद्भावनं तद्रूपेणैवासाधकता साधनीया। यद्रूपेण च तत्साधनं तद्रूपेणैव हेत्वाभासादिदोषो विभजनीयः। अन्यथान्यः शस्त्री, अन्यो यद्धा, अन्यो जयी अन्यस्तु श्लाघ्य इतिद्वैरूप्यापातात्। असाधकतासाधकस्य हेत्वाभावसस्याप्रयोजकत्वापाताच्च। संभवतोप्यसाधकतासाधनादिव्यवहारानुपयोगिनो निष्प्रयोजनस्य विभागस्यापि प्रसङ्गित्वाच्च।।
सम्भवन्ति हि हेत्वाभासेनन्ताः प्रकाराः। उक्तं हि न्यायसारे १ । 'यद्यपि चैषां सूक्ष्मो भदोनन्तत्वाद्वक्तुं न शक्यते'इति।।

असाधकतेति।। इदमसाधकं एवंत्वादिति।। कुत एवमित्यत आह-- अन्यथेति।। वैरूप्येति।। अन्यज्ञानं प्रतिबन्धकमन्यदुद्भाव्यं ततोन्यदसाधकतासाधाकं तदन्यस्य विभाग इति वैरूप्यापातादित्यर्थः। अप्रयोजकत्वेति।। अन्यथेत्यत्रानुषङ्गः। तद्रूपेण ज्ञानस्यानुमित्यप्रतिबन्धकत्व इत्यर्थः। नन्वसाधकतायामनुपयोगिनोपि सम्भवमात्रेण विभगस्योक्तौ को दोष इत्यत आह -- संभवतोपीति।। अतिप्रसङ्गित्वाच्चेत्युक्तं व्यनक्ति -- सम्भवन्ति हीति।। तथा च तेषामपि परिगणनापातेन पञ्चैवेत्युक्तिरयुक्तेति भावः।

१.रेपि - ग.ट.रा.

पु - २८६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

असाधकतालिङ्गत्वं च बाधप्रतिरोधयोरुभयानुगतेन प्रतिज्ञा १ र्थप्रमाणविरोधित्वेनैव। न तु बाधत्वादिना बाधितत्वात्प्रति २ रुद्धत्वादित्यस्य हि प्रबलसमबलप्रमाणविरुद्धत्वादित्यर्थः।

ते च प्रकाराः प्रमाणलक्षणटीकायां व्यक्ताः। अस्त्वेवं येन रूपेण ज्ञानमित्यादिनोक्तं प्रकृते कियित्यतः
विरोधोपि त्रिविधैव स्यात्प्रतिज्ञार्थविरुद्धता।
लिङ्गराहित्यमव्याप्तिः'
इति युक्तिपादीयानुव्याख्यानव्याख्यावसरे सुधोक्तरीतिमनुसृत्याऽऽह -- असाधकतालिङ्गत्वं चेति।। कुत इत्यतः ३ वह्निरनुष्णः पदार्थत्वादित्यादौ वादिनोक्ते प्रतिवादिना पदार्थत्वादिति हेतुः असाधकः बाधितत्वात्सत्प्रतिपक्षत्वादित्युच्यते सति वादिना व्यर्थविशेषणत्वदूषणं वक्तुमापाद्यत इत्याह -- बाधितत्वा ४ प्रतिरुद्धत्वादित्यस्य हीति।।
ननु विरुद्धत्वादिज्ञानादेव स्वार्थानुमितेरिव परार्थानुमितेरपिप्रतिबन्धकात्किमसाधकतानुमानेन यद्वाक्ये प्रतिवाद्युक्तदूषणावगतिः स निगृहीत इति समयबन्धेन कथाप्रवृत्तौ दूषणमात्रमुद्भाव्यम् अन्यथार्थान्तरत्वम्। एवं चासाधकतानुमानस्यैवानावश्यकत्वाद्व्यर्थविशेषणत्वानवकाश इति चेन्न। द्वयं ह्युद्देश्यम्। तत्राद्यं दूषणमात्रज्ञानादेव द्द्वीतीयं तु --

१.तार्थप्र-ट.रा. २. तिपक्षत्वादि-ग.रा. ३.त आह -बाधितत्वादिति - इत्यधिकम्-ट. ४.त्वादित्यस्यहीति इत्येवास्ति - ट.ठ.ड.

बाप्रयो-प्रर्थप्रण-विनैक्यम्) अनुमादोषवादः पु - २८७.

तत्र चेदमसाधकं प्रमाणविरुद्धत्वादित्येवास्तु। अन्यद्व्यर्थम्। दुर्बलस्य प्रमाणपदेनैव व्यावर्तितत्वात्। प्रमाणतदाभासाविवेक एव हि प्रमाणपदप्रयोगः। न त्वप्रामाण्यनिश्चये। अहीनबलवत्त्वेन वा वि १ शिष्यताम्। तदवान्तरभेदोपादानं व्यर्थमेव।
न च बाधप्रतिरोधयोरन्यमसङ्करार्थं तदुपादानम् दूषकताबीजैक्येन सङ्करस्यैवोचितत्वात् -

तस्य दूषणस्य लिङ्गत्वज्ञानम् प्रतिबन्धकत्ववदनेनापि त्वसम्भव इत्यभिप्रायेण वाऽसाधकतासाधनमिति मणावेवोक्तत्वादिति भावः।।
दुर्बलप्रमाणविरोधस्य अकिंचित्करत्वेनासाधकत्वासाधकतया तद्व्यावृत्तये प्रबलेत्याद्यर्थवदित्यत आह -- दूर्बलस्येति।। दुर्बलं हि हीनबलत्वादेवाप्रमाणत्वेन निर्णीतमिति प्रमाणपदप्रयोग एव तत्र न युक्त इति तेन तद्व्यावृत्तिरित्यर्थः। ननु कथं तर्हि सत्प्रतिपक्षस्थले वस्तुतो हीनबले समबलतयाऽभिमन्याने प्रमाणपदप्रयोग इत्यत आह-- प्रमाणेति।। न त्विति।। हीनबले तु तन्निश्चय एवास्तीति भावः। उभयानुगतं हीनबलव्यावर्तकं धर्मान्तरमाह -- अहीनेति।। तदवान्तरेति।। प्रबलसमबलेत्यवान्तरभेदेत्यर्थः। तथा चैकमेवेदं दूषणं स्यादिति पञ्चेति विभागभङ्ग इति भावः।। तदिति।। प्रबलसमबलेति विशेषणोपादानं बाधप्रतिरोधयोरित्यर्थः। दूषकताबीजस्येति।। प्रमाणविरोधरूपत्वस्य वा अहीनबलप्रमाणविरोधत्वरूपस्य वा एकत्वेनेत्यर्थः।।

१.शेष्य - ट.रा.

पु - २८८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

व्यावर्त्याभावेऽपि विद्यमानत्वमात्रेणोपादाने प्रबलचाक्षुषप्रत्यक्षविरुद्धत्वादित्याद्यापि प्रयुज्येत। न च परस्यात्यशक्तिज्ञापनार्थत्वान्न वैयर्थ्यमिति वाच्यम्। अशक्तिज्ञापनस्यैवोद्देश्यत्वाद्बाधाज्ञा १ न मुलाशक्तौ प्रतिरोधाज्ञानमूलाशक्तितोऽतिशयाभावाच्च।।
किंच बाधितेनापि त्वामहं जेतुं शक्त इति

ननु सम्भवमात्रेण तथा प्रयोगे को दोष इत्यत आह-- व्यावर्त्येति।। बाधो हि प्रबलप्रत्यविरोधप्रबलानुमानविरोधप्रबलागमविरोधादिभेदेनानेकविधो लक्षणटीकायां व्यक्तः। तथा च प्रबलप्रमाणविरुद्धत्वादिवत्प्रत्यक्षविरोधेप्यवान्तरभेदोपपादनेन प्रबलचाक्षुषप्रबलस्पार्शनविरोधादिभेदेनाप्युद्भाव्येत। न चैवमङ्गीकृतम्। तथात्वे पञ्चत्वविभागभङ्गप्रसङ्गादिति भावः। अत्यशक्तीति।। प्रबलविरोधमपि त्वं न
ज्ञातवान् किमु प्रमाणविरोधमात्रमित्यशक्तिज्ञापनार्थत्वादित्यर्थः।। अशक्तिज्ञापकस्यैवेति।। अशक्तिज्ञापनमात्रेण परापजयस्य स्वजयस्य च संभवेन तन्मात्रस्यैवोद्देश्येनातिशयि २ ताशक्तिज्ञापनस्यानुद्देश्यतया तादर्थ्येन सार्थक्योक्तिरयुक्ता। तन्मात्रं चावान्तरभेदानुपादानेनाप्युक्तदिशा सिध्यत्येवेति भावः। अतिशयेनाशक्तिज्ञापनस्य लाभे कुतः परित्याज्य इत्यत आह-- बाधाज्ञानेति।।
ननु प्रबलमपि न जानामि किमु समबलमित्यस्तु कश्चिततिशय इति मन्वानं प्रत्याह -- किं चेति।। सुवचत्वाद्वादिनेति योज्यम्।

१.धाज्ञा -रा.

बाप्रये-प्रर्थप्रण-विनैक्य) अनुमादोषवादः पु - २८९.

भावेनेदं प्रयुक्तमित्यपि सुवचत्वात्परस्य शक्त्यतिशय एव किं न सिध्येत्। किं चैवमपि प्रतिरोधे समबलपदवैयर्थ्यं तदवस्थमेव।।
किंच बाधेपि प्रमाणपदेनैव प्रबल १ त्वेपि लब्धे प्रबलपदं २ व्यर्थम्। प्रत्युत समबलव्यावर्तकतयाहानिकृतेवेति विपरीतफलम्।।
यद्यपि प्रतिरोधस्य परपक्षप्रतिबन्धमात्रं फलम्। बाधस्य तु स्वपक्षसिद्धिरपि। तथाऽपि स्वपक्षस्थापनायाः पृथक्कर्तव्यत्वात्। बाधस्य परपक्षप्रति-

परस्येति।। बाधितानुमानप्रयोक्तृर्वादिन इत्यर्थः। एवमपीति।। बेधे प्रबलेति प्रमाणविषेषस्यात्यशक्तिज्ञापनार्थतया सार्थक्येपीत्यर्थ। तदवस्थमेवेति।। संभावितत ३ त्कृत्यस्य सर्वस्य प्राङ्गनिरासादिति भावः। प्रबलपदं व्यर्थमित्येव न किंतु विरुद्धार्थकत्वाच्च नोपदेयमसाधकत्वानुमान ४ मित्याह -- किंच बाधेपीति।। इदमसाधकं प्रमाणविरुद्धत्वादित्युक्ते प्रबलप्रमाणविरुद्धत्वस्य स्वाभिमतस्य लाभद्दोषत्वेन समबलप्रमाणविरोधसाधारण्ये संभवति तव्द्यावर्तकत्वाद्धनिकृदेवेत्यर्थः।।
ननु समबलव्यावृत्यर्थकस्य न हानिकरत्वेन विपरीतफलत्वं बाधस्य स्वपक्षस्थापनापरपक्षप्रतिक्षेपलक्षणाद्विरुद्धिरूपत्वात् समबले च तदभावादनुकूलफलमेव प्रबलपतम्। अत एव नानर्थकमपीति चोद्यमनूद्यावद्यति -- यद्यपीत्यादिना।। अत्यशक्तिज्ञापनार्थतया सार्थक्येऽतिप्रसङ्गं चाह -- किंचैव परस्येति।।

१.लेतिलब्धप्रबल - ग.ट.रा. २.व्यर्थपदं न -क.ग.रा. ३.ततत्तत्पक्ष -ठ. तकृत्यस्य - ड. ४.ने इ -ट.ठ.ड.

पु - २९०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

बन्धएवोद्देश्य इति यावताप्रतिबन्धसिद्धिस्तावदेव वक्तव्यम्। न त्वन्यत्।।
किंचैवं परस्यातितरामशक्तिज्ञापनाय बहुत्वोपजीव्यत्वनिरवकाशत्वैः प्रबलप्रमाणविरुद्धत्वादिति बाधितत्वे सति सव्यभिचारित्वादित्याद्यपि प्रयुज्येत। एवं स्वस्यातिशक्तिज्ञापनायानेकहेतूक्तिरपि स्यादित्यधिकनिग्रहोच्छेदः स्यात्।
वादे वादप्रक्रियया प्रवृत्ते शास्त्रे चातिहेयत्वव्युत्पादनाय बहुदोषोक्तिर्युक्ता । न तु जल्पादौ समयबन्धं विना।।
ननु -- प्रमितसाध्याभाववत्पक्षकत्वं बाधः। अत्र च न विशेषणवैयर्थ्यमिति चेन्न।

ननु कथं तर्हि वादकथायां शास्त्रे चानेकदोषः परोक्तानुमानेषु प्रदर्श्यते तत्राप्याधिक्यनिग्रहस्थानापत्तिरित्यत आह
-- वाद इति।। न तु जल्पादौ । जल्पविदण्डाकथनोर्नानेकोक्तेत्युक्तम्। यावत्स्फुरति द्वयं त्रयं ततोऽधिकं वा तावत्सर्वं वाच्यमिति समयबन्धे सति तदनुक्तौ दोषाभावादित्यतआह -- समयबन्धं विनेति।। मणिकृन्मतमाशंक्य निराह -- नन्विति।। अवधृतप्रामाण्यकनिश्चयविषयसाध्याभाववत्पक्षकत्वमित्यर्थः।
साध्याभावज्ञानत्व प्रमात्वनिश्चये बाध इत्यभ्युपगमाद्विरोधिज्ञानद्वयेत्याद्यग्रेतनग्रन्थाच्च। यद्वा साध्याभावप्रमा बाध इति मतेनेदम्। साध्याभावज्ञानस्य प्रमात्वनिश्चयो बाध इति मतेऽवधृतप्रामाण्यक-

त्वयाऽपि साध्याभावप्रमाबाधफलमित्युक्तत्वेन तस्याः १ बाधकत्वायोगात्। बाधस्य ज्ञानोपाधिकत्वे साध्याभावाज्ञानदशायां बाधाभावेन तस्यानित्यदोषत्वापाताच्च। विरोधिज्ञानद्वयसन्निपाते एकत्र प्रमात्वनिश्चयस्य करणप्राबल्यनिश्चयं विनाऽप्युपपत्याऽऽवश्यकस्य प्रबलप्रमाणविरोधस्यैव दोषत्वौचित्याच्च।।
किंच प्रतिरोधे क्लृप्तत्वेन बाधोपि करणविरोधस्यैव दोषत्वं युक्तम्। किं च प्रतिरोध इव बाधेऽपि आवश्यकेनाहीनबलत्वेनैव प्रतिबन्धसंभवे किं प्रमात्वविशेषणेन।

निश्चयविषयसाध्याभाववत्पक्षकत्वमर्थमुपेत्य दोषान्तरकथनं विरोधिज्ञानद्वयेत्यादीति ध्येयम्। इत्युक्तत्वेति।। तथा च प्रबलप्रमाणविरोध एव बाधो वाच्यः। तदैव साध्याभावप्रमायाः फलत्वसिद्धधिरित्यस्त्येव विशेषणवैयर्थ्यमिति भावः।। विरोधिज्ञानद्वयेति।। साध्यतदभावगोचरविरोधिज्ञानद्वयेत्यर्थः। करणेति।। तज्ज्ञानकरणेत्यर्थः। प्रतिरोधे सत्प्रतिपक्षे एवमपि २ वैयर्थ्यमेवास्मिन् पक्षे प्रभवत्येवेत्याह -- किंच प्रतिरोध
इवेति।। प्रतिरोधेपि समबलेत्य य व्यर्थत्वादिना ३ बलत्वेन विशेषण विशेषणत्य प्रागुपपादानात् प्रतिरोध इवेत्युक्तम्। प्रमात्वेति।। साध्याभावज्ञाने प्रमात्वविशेषणेनेत्यर्थः। अहीनबलप्रमाणविरोधत्वेन वा अहीनबलसाधकविरोधत्वेन वा अहीनबलावगतसाध्याभाववत्पक्षकत्वेन वा प्रतिबन्धसंभव इत्यर्थः।

१. स्य न बाधकत्वयो -क. २.पि व्यर्थमे- ट.ड. ३.नाहीन - ट.ठ.

किंचैवं वह्निः शीतः कृतकत्वादित्यत्र वह्निरुष्ण इति प्रमाबाधो न स्यात्। उष्णस्पर्शस्य शीतस्पर्शाभावनात्मकत्वात्। अभावपदेन विरोधिमात्रविवक्षायां सिद्धं मदभिप्रेतं सत्प्रतिपक्षसाङ्कर्यम्। दूषकानुमानीयहेतुप्रमायाः दूष्यानुमानीयसाध्यविरोधिविषयत्वात्।।
किंचैव प्रहतमार्गत्यागेन कुसृष्ट्याश्रयणे प्रमितसाध्याभाववत्पक्षकत्वं बाध इतिवत्प्रमितसाध्य १ संबन्धाभाववत्पक्षकत्वं वा प्रमितसाध्यवत्प्रतियोगिकान्योन्याभाववत्पक्षकत्वं वा बाध इत्यपि निर्वक्तुं शक्यत्वाद्बाधो नाना स्यात्। अत्र चैकमेवासाधकतालिङ्गं सर्वं वा।

प्रमितसाध्याभाववत्पक्षकत्वं बाध इति लक्षणेऽव्याप्तिं चाह-- किंचैवमति।। अव्याप्त्युद्धारमाशङ्कयते -- अभावेति।। प्रमितसाध्यविरोधिमत्पक्षकत्वमित्यर्थोभिमत इति भावः। सिद्धमिति।। मदभिप्रेतं सत्प्रतिपक्षसाङ्कर्यं सिद्धमित्यर्थः। तत्कथमित्यतो व्यनक्ति - दूषकेति।। वाद्युक्तस्थापनानुमानप्रतिभटतया प्रतिवाद्युक्तेत्यर्थः। तथा च प्रतिपक्षोप्येवमेवेति बाधप्रतिपक्षयोरेकदूषणत्वमेव प्रप्तमिति पञ्चेति विभागभङ्ग इति भावः। प्रहतेति।। सर्वावगतप्रमाणवलिरोधरूपमार्गत्यागेनेत्यर्थः। अस्तु २ नाम को दोष इत्यत आह-- अत्र चेति।।

१.ध्याभाववत्व -ट. ध्यवत्प्रतियो - ग.रा. २.नाना क -ट.ड.

बाप्रयो-प्रर्थप्रण-विनैक्यम्) अनुमादोषवादः पु - २९३.

आद्येऽन्यज्ञाने नानुमितिप्रतिबन्धो न स्यात्। अन्यानुमितेनैकेनैवानुमितिप्रतिबन्ध इति तु नानुभवानुसारि। द्वितीयं

मिलितं लिङ्गं प्रत्येकं वा। आद्ये एकेनैवपूर्णत्वाच्छेपवैयर्थ्यम्। अन्त्ये हेत्वाभासाधिक्यम्।
प्रतिज्ञार्थप्रमाणविरोधव्याप्यत्वेनैकीकरणेवाचवश्यकत्वाल्लाघवाच्च प्रमाणविरोध एव दोषोस्तु।।
एतेन साध्यविरोध्युपस्थापनसमर्थया समानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वं वा, समबलसामग्रीप्रतिबन्धेन निर्णयाजनकत्वं वा सत्प्रतिपक्षत्वमिति निरस्तम्। समबलपदवैयर्थ्यात्। तत्यागे च बाधसाङ्कर्यात्।।
एतेनैव परामर्शविषयीभूतप्रतिसाधनत्वं सत्प्रतिपक्षत्वमिति च निरस्तम्। प्रत्यक्षस्य समबलाभ्यां -

ननूक्तरूपाणां त्रयाणां मध्ये द्वयं लिङ्गरूपम् एकं तु लिङ्गिभूतम्। तत्र ताभ्यां लिङ्गाभ्यामनुमितिमेकं बाधत्वेन दूषणमस्त्विति चेत् किं लिङ्गं किं लिङ्गीति निर्धारकप्रमाणाभावात्। अनुभवविरुद्धं चैतदियत्याह - अन्येति।। द्वितीय इति ।। सर्वं वेति पक्षे हेत्वभासाधिक्यमिति पञ्चम्योधिकहेत्वाभासगणनापात इत्यर्थः। मण्याद्युक्तलक्षणानि निराह-- एतेनेति।। वैयर्थ्यादिति।। तथोपपादितत्वादिति भावः। केनचिदुक्तं लक्षणान्तरं चाव्याप्त्या निराह -- एतेनैवेति।। अनुव्याख्याने चेति।। युक्तिपादे न विलक्षणत्वाधिकरणानुव्यख्यान इत्यर्थः।

पु - २९४. न्यायदीपुयततर्कताण्डवम् (तृ.परिच्छेदः

प्रत्यक्षशब्दाभ्यां शब्दस्य च समबलाभ्यां शब्दप्रत्यक्षाभ्यां प्रतिरोधेऽव्याप्तेः।
परामर्शविषयीभूतप्रबलानुमानरूप्रतिसाधनात्मकबाधसाङ्कर्याच्च।

तस्माद्बाधप्रतिरोधयोः प्रतिज्ञार्थप्रमाणविरोधत्वेनैव दोषत्वं न तु प्रबलप्रमाणविरोधत्वादिना।।
अत एव भगवत्पादैः प्रमाणलक्षणे प्रमाणविरुद्धार्थप्रतिज्ञा प्रतिज्ञाविरोध इति
अनुव्याख्याने च 'प्रतिज्ञार्थविरुद्धते'ति तयोरुभयानुगतेन प्रमाणविरोधत्वरूपेणैव दोषत्वमुक्त्वा असिद्धिरव्याप्तिरिति हेतुविरोधः साध्यस्य साधनस्य वाऽननुगमो दृष्टान्तविरोध इत्यसिद्ध्यादीनां चतुर्णामसिद्धित्वादिरूपेणैव दोषत्वमुक्तम्।।
या तु पद्धतौ प्रमाणविरधोपि द्वेधा प्रबलप्रमाणविरोधः, समबलप्रमाणविरोधश्चेति टीकाकारीया --

तयोरिति।। बाधप्रतिपक्षयोरित्यर्थः। प्रमाणलक्षणवाक्ये आह -- असिद्धिरित्यादि।। असिद्धत्वादिरूपेणेति।। असिद्धित्वाव्याप्तित्वसाध्यविकल्पत्वसाधनविकलत्वरूपेणेत्यर्थः।
उक्तमिति।। प्रमाणलक्षण इत्यनुकर्षः। प्रमाणवि १ रुद्ध्तवेनैकीकरणे ३ प्रमाणपद्धतिविरोधमाशङ्क्य तदभिप्रायोक्त्या निराह-- या त्विति।।

१.रोधत्वे - ड.ट. ३. प्रमाणपदं न -ट.ठ.

बाप्रयो-प्रर्थप्रण-विनैक्यम्) अनुमादोषवादः पु - २९५.

द्वैविध्योक्तिः सा प्रत्यक्षादिविरोधभेदेन द्वावपि प्रत्येकं त्रिविधाविति त्रैविध्योक्तिः शिछष्यमतिवैशद्याय वस्तुस्थितिप्रदर्शनार्थं वा, प्रतिवादिनो विशेषजिज्ञासायां सोपि वक्तव्य इति शिक्षार्थं परोक्तयोः कालात्ययापदिष्टसत्प्रतिपक्षयोर्विभज्यान्तर्भावोक्त्यर्थं वा।।

अत एव प्रमाणलक्षणे 'प्रतिज्ञायाः समबलविरोध एव सप्रतिसाधन' इत्युक्तम्। न तु बाधत्वादिनाऽसाधकता साध्येत्येतदर्थमिति ज्ञेयम्। अन्यथा शिष्यमतिवैशद्या १ र्थं व्युत्पादन २ मनुमतमेवेति न स्वीयव्यवहारविरोध इति सुधया, न चात्र प्रबलत्वादिविशेषणस्य प्रयोजनमस्तीत्यादिसुधया च विरोधात्।।
केचित्तु प्रमाणलक्षणादिकमसाधकतामात्रसाधने प्राबल्यमनुपयुक्तमित्यभिप्रेत्य प्रवृत्तम्। पद्धतिस्तु
अत्यन्तासाधकत्वसाधने प्राबल्यमुपयुक्तमित्यभिप्रेत्य। अत एव मिथ्यात्वानुमानखण्डने बाधप्रतिरोधौ पृथगुक्ताविति्याहुः।।

विभज्येति।। समबलप्रमाणविरोधे सत्प्रतिपक्षस्यान्तर्भावः बाधस्य प्रबलप्रमाणविरोध इति विभज्यान्तर्भावोक्त्यर्थं चेत्यर्थः। सुधयेति।। प्रागुक्तानुव्याख्यानव्याख्यानरूपया युक्तिपादीयसुधयेत्यर्थः। समाध्यन्तरमप्यन्यापदेशेनाह -- केचित्विति।।

१.द्याय व्यु-ग.रा. २.नंत्वनु- क.ग.रा.

तस्माद्बाधप्रतिरोधौ प्रमाणविरोधत्वेनैव दोषौ। न तु प्रबलप्रमाणविरोधत्वादिनेति।।
बाधप्रतिरोधयोः प्रतिज्ञार्थप्रमाणविरोधत्वेनैक्यम्।। २८ ।।

अत्रारुचिबीजं त असाधकत्वज्ञापनमात्रेण परस्य पराजये किमत्यन्ताभावसाधकत्वज्ञापनेन। ग्रन्थान्तरे पृथगुक्तिस्तु पररीत्याऽपि संभवति। अत एव साध्याप्रसिद्धेरदोषत्वेऽपि

'अनर्वचनीयासिद्धेरप्रसिद्धविशेषणः पक्ष'इति पररीत्या तत्र तत्रव्यवहार इति।।
बाधप्रतिरोधयोः प्रतिज्ञार्थप्रमाणविरोधत्वेनैक्यम् ।। २९ ।।

गौतमोक्तहेत्वाभासपञ्चत्वभङ्गः ।। २९ ।।
एवं हेतूदोषेप्यसाधकतालिङ्गत्वं १ व्यभिचारविरुद्धव्यापत्यत्वासिद्धानुगतेनाव्याप्तित्वेनैव। न तु गौतमोक्तेन सव्यभिचारत्वादिना।।
मणावेव कोटिद्वयोपस्थापकरूप २ वत्वं नानुमिति-

गोतमोक्तहेत्वाभासपञ्चत्वभङ्गः ।।
एवं परिगणितहेत्वाभासपञ्चके बाधप्रतिरोधयोः प्रतिज्ञाविरोधेऽन्तर्भावमुक्त्वाऽन्येषां त्रयाणां प्रागुक्तहेतुदोषयोरन्तर्भावं 'लिङ्गराहित्यमव्याप्ति ३ रिति प्रागुक्तानुव्याख्यानव्याख्यानसुधोक्तरीत्या व्यनक्ति -- एवमित्यादिना।। मणावेवेति।।
उभयकोट्युपस्थापकतावच्छेदकरूपवत्वं
सव्यभिचारत्वमित्युक्त्वा तच्च साधारणत्वादि,

१.सव्यभि -ट.रा. २.पत्वेन ना -ग.ट.प. वत्वेन ना -रा. ३.प्तमिति - ट.ठ.ड.

गौक्त-हेपत्व-भङ्गः) अनुमादोषवादः पु - २९७.

प्रतिबन्धक १ म्। साधारणत्वादिरूपेणैव २ ज्ञातस्य प्रतिबन्धकत्वात् लक्षणानुरोधेन प्रत्येकमेव हेत्वाभासत्वमित्युक्तत्वेन, एवमाश्रयासिद्धिर्व्याप्यत्वासिद्धिः पक्षधर्मतासिद्धिश्च प्रत्येकमेव दोषः

प्रत्येकस्य ज्ञानादुद्भावा ३ च्चानुमितिप्रतिबन्धादिति चोक्तत्वेन प्रथमविभाग एव साधारणासाधारणानुपसंहारिविरुद्धसत्प्रतिपक्षाश्रयासिद्धव्याप्यत्वासिद्धपक्षधर्मत्वासिद्धबाधिता इत्यादेर्वक्तव्यत्वेन ४ गौतमोक्तपञ्चत्वायोगात्।।
ननु महर्षिणा स्वरूपसता कोटिद्वयोपस्थापकत्वेनानैकान्तिकत्रयं परामर्शविषयाभावत्वेन चासिद्धत्रयमेकीकृत्य
विभागः कृत इति न पञ्चत्व-

तेनैव रूपेण ज्ञातस्य प्रतिबन्धकत्वादित्युक्तत्वेन लक्षणानुरोधेन प्रत्येकमेव हेत्वाभासत्वमिति चोक्तत्वेन साधारणत्वासाधारणत्वानुपसंहारित्वानां पृथग्दोषत्वोक्तेः। तथाऽसिद्ध्युक्तिप्रस्तावे ५ आश्रयासिद्धिः स्वरूपणासिद्धिः व्याप्यत्वासिद्धिः प्रत्येकमेव दोषः। प्रत्येकज्ञानादुद्भावनाच्चानुमितिप्रतनबन्धादिति चोक्तत्वेनाश्रयासिद्ध्यादेः पृथग्दोषत्वेन चेत्यर्थः। प्रथमेति।।
हेत्वाभाससामान्यलक्षणानन्तरप्राप्तविभाग एवेत्यर्थः।।
नन्वेतदेवाशङ्क्य मणौ स्वरूपसतानुगतरूपेण त्रयमेकीकृत्य महर्षिणा विभगकरणादित्युक्तमित्यतस्ततदाशङ्क्याह -- नन्विति।।

१.कत्वम् -ट. धनं-ट.रा. २. ज्ञानस्य -ट.रा. ३.वनाच्च -क. व्यत्वाच्च -ग.रा. व्याच्च -ट. ४.प्रथमविभाग एवेत्यारभ्य एतावान् ग्रन्थः नास्ति -ग.रा. ५.के चा-ठ.

हानिरिति चेन्न। तथात्वे साक्षात्प्रतिबन्धकत्वेन बाधप्रतिरोधयोर्व्याप्तिरहितलिङ्गत्वेन सव्यभिचार १ विरुद्धयोरप्येकीकरणं स्यादित्याद्यतिप्रसङ्गः स्यात्।।
स्वतन्त्रपुरुषेच्छआ नियन्तुमशक्येति चेन्न। असाधकतासाधकनादिव्यवहारानुपयोगित्वेन निष्फले विभागे निर्मर्यादं प्रवृत्तस्य प्रमाणपरतन्त्रत्वेन नियन्तुं शक्यत्वादिति।।
गौतमोक्तहेत्वाभासपञ्चत्वभङ्गः ।। २९ ।।

इत्याद्यतिप्रसङ्गादिति।। आदिपदेनासिद्धेनाव्याप्तित्वेत्यादिग्रहः। ननु मणावेवमेवाशङ्क्य स्वतन्त्रेच्छाया नियोगपर्यनुयोगाविषयत्वादिति समाहितमिति भावेन तदाशङ्क्य निराह -- स्वन्त्रेति।।
गौतमोक्तहेत्वाभासपञ्चत्वभङ्गः ।। ३० ।।

साधारणस्याव्याप्तावन्तर्भावः ।। ३० ।।
नापि मण्युक्तप्रकारेण २ साधारणत्वादिनाऽसाधकतालिङ्गत्वम्।

साधारणस्याव्याप्तावन्तर्भावः ।। ३१ ।।
उभयकोट्युपस्थापकतावच्छेदकरूपवत्वं च साधारणत्वादि तेन रूपेण ज्ञातस्य प्रतिबन्धकत्वादि ३ त्यादिमण्याद्युक्तेराह -- साधारणेत्यादिनेति।। असाधारणत्वानुपसंहारित्वयोरादिपदेन ग्रहः।

१.रेप्यकीकार -ग.रा. २.ण असा -ग.ट. ३.ति समाहितमिति भावेन तदित्या-ट.

साधास्या-व्यावन्तवः) अनुमादोषवादः पु - २९९.

तथाहि -- साधारणत्वं पक्षत्रयवृत्तित्वं चेद्विपक्षवृत्तित्वेन १ शेपवैयर्थ्यम् स्यात् २। प्रत्युत पक्षसपक्षवृत्तित्वं गुणः। न तु दोषः। विरुद्धव्यावृत्त्यर्थत्वान्न वैयर्थ्यमिति
चेन्न। दूषकताबीजैक्ये संग्राह्यत्वेनाव्यावर्तनीयत्वात्। विपक्षवृत्तित्वं साध्याभावसम्बन्धरूपत्वात्। तस्यैव चाव्याप्तित्वात्।।
एतेनाव्याप्तिं प्रत्युपजीव्यत्वाव्यभिचार एव दोष इति अव्याप्त्यज्ञानदशायां व्यभिचारज्ञानेनाप्यनुमितिप्रतिबन्धदर्शनाव्यभिचारोपि दोष इति ३ च निरस्तम्। तयोरभेदात्।।
एतेनैव विरुद्धस्यापि तत्वा १ ज्ञाने विपक्षवृत्तित्वज्ञानदशायां साधारणत्वं उपधेयसङ्करेऽप्युपाधेरसङ्कर इति च निरस्तम्। विरुद्धापि विपक्ष-

सुधोक्तं हृदि कृत्वाऽऽह -- साधारणत्वमित्यादिना । दूषताबीजेति।। विपक्षवृत्तित्वरूपदूषकताबीजस्य साधारणविरुद्धयोरेकत्व इत्यर्थः।।
ननु मणौ विपक्षवृत्तित्वेनैव दूषकताबीजमुक्तमित्यस्तदनूद्य निराह -- विपक्षवृत्तित्वं चेदिति।। व्यभिचारोपि दोष इति।। पृथग्दोष इत्यर्थः। तयोरभेदादिति।। विपक्षवृत्तित्वमात्रस्यैव साधारणत्वे तस्यैवा ५ व्याप्तित्वादिति भावः। उपधेयेति।। परस्पर-

१.नैव शे -ग.रा. २.स्यादिति न -ग.ट.रा. ३.च इति नास्ति -क.ट. ४.तत्र -रा. ५.वव्या -ट.

वृत्तित्वमेवोपाधिरितति वक्ष्यमाणत्वेनोपाध्यसङ्करस्याप्यभावात्।।
किंचाव्याप्तावान्तर्भावाच्छादनाय विपक्षवृत्तित्वं साधारणत्वमित्युक्तौ विपक्षत्वं साध्यात्यन्ताभाववत्वं साध्यसंबन्धात्यन्ताभाववत्वं

साध्यवद्भिन्नत्वमित्यादिरूपेण नानेति तद्वृत्तित्वमपि नानास्यात्। तथा च बाधप्रस्तावोक्तन्यायेन सर्वेषां प्रत्येकं हेत्वाभासत्वस्य वक्तव्यतया हेत्वाभासाधिक्यं स्यात्।।
या तु व्याप्तिज्ञानहेतुभूतसहचारज्ञानस्य सहकारि योऽभावः तत्प्रतियोगिभूतं यज्ज्ञानं तद्विषयत्वेनैकीकरणान्नाधिक्यमिति कश्चिदाह तन्न। त्वदुक्तातिवक्त्रविषत्वस्याज्ञानेपि व्याप्त्यभावज्ञानेनैवानुमितिप्रतिबन्धात्।

व्यावर्तकतत्क्रोडीकारकोपाधिमतो विशेष्यस्य साङ्कर्येपि विपक्षवृत्तित्वं साधारणत्वं विपक्षमात्रवृत्तित्वं विरुद्धत्वमित्युपाध्योरसङ्कर इति च निरस्तमित्यर्थः। वक्ष्यमाणत्वेति।। विरुद्धत्वस्याव्याप्त्नतर्भावोक्तिप्रस्ताव इत्यर्थः। इत्यादिरूपोणेति।। आदिपदेन साध्यतत्प्रतियोगिकान्योन्याभा १ ववत्वसाध्याधिकरणनिष्ठान्योन्याभावप्रतियोगित्वादिग्रहः। सहकारी योऽभाव इति।। प्रागुक्तत्रिविधविपक्षवृत्तित्वानां ज्ञानस्याभावः तत्प्रतियोगिभूतं ज्ञानं प्रागुक्तानामेव ज्ञानं तद्विषयत्वेनेत्यर्थः। उक्तरूपविपक्षवृत्तित्वज्ञानानां व्यभिचारज्ञानत्वेन तदभावसहकृतसहचारज्ञानस्यैव व्याप्तिग्रहहेतुत्वादिति भावः। एतत्सङ्ग्रहकमात्रमुक्तम्।

१.ववत्व सा -ट.

साधास्या-व्यावन्तवः) अनुमादोषवादः पु - ३०१.

स्वरूपसतैवोक्तविषयत्वेनैकीकरणे तु न तद्धेत्वाभासविभागे तन्त्रमित्युक्तत्वेन हेत्वाभावसाधिक्यतादवस्थ्यम्।।

किंच व्याप्तिज्ञानहेतुभूतसहचारज्ञानस्य १ व्यभिचारज्ञानाभाव इव सहचाराभावज्ञानाभावो व्याप्त्यभावज्ञानाभावश्च सहकारीति तत्प्रतियोगिभूतज्ञानविषयत्वं विरुद्धोपाधेरसहचारस्य व्याप्यत्वासिद्ध्युपाधेरव्याप्तेश्चास्तीति तयोरपि साधारणोपाधित्वं स्यात्।।
न च सहकार्यभावशब्देन व्यभिचारज्ञानाभावरूप एव सहचारिभूताभावो विवक्षित इति नोपा-

न तु प्रतिबन्धकज्ञानविषयत्वेनेत्येतदनूद्यनिराह -- स्वरूपसतेति।। उक्तत्वेनेति।। 'यद्रूपेण हि ज्ञानमनुमितिप्रतिबन्धकमि'त्यादिना ग्रन्थेन व्यवहितभङ्गे उक्तत्वेनेत्यर्थः। आधिक्येति २ ।। विपक्षवृत्तित्वानां प्रागुक्तदिशा नानात्वेन पञ्चापेक्षयाऽधिक्यमित्यपरिहार्यमित्यर्थः।।
यदपि नानाभूतविपक्षवृत्तित्वानां व्याप्तिज्ञानहेतुसहचारज्ञानसहकारीभूताभावप्रतयोगिज्ञानविषयत्वेनैकीकरणं तदतिव्याप्तं चेत्याह -- किंच व्याप्तिज्ञानेति।। सहचारज्ञानसहकारीभूताऽ ३ भावे सङ्कोचविवक्षयाऽतिव्याप्त्यभावशङ्कां निराह -- न च सहकारीति।।

१.स्यव्य- क.ग. २. क्यमिति -ट. ३.ते अ- ट.ठ.

पु - ३०२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

धिसाङ्कर्यमिति वाच्यम्। आत्माश्रयादननुगमाच्च।।
किंच समवायवृत्या यत्र वह्न्यभावः तद्वृत्तित्वं धूमेप्यस्तीति व्याप्तिग्रहानुप्रविष्टसंबन्धेन यत्र साध्यं नास्ति स विपक्ष इति वक्तव्यतयाऽवश्यकत्वेनाव्याप्तिरेव दोषः।।
साधारणस्याव्याप्तावन्तर्भावः।। ३० ।।

आत्माश्रयादिति।। साधारणव्यभिचार १ त्वं नानेत्युक्ते साधारणव्यभिचार २ त्वं नाम व्याप्तिग्रहहेतुसहचारज्ञानसहकारीभूतो यो व्यभिचारज्ञानाभावः तत्प्रतियोगिज्ञानविषयत्वं व्यभिचारत्वं सर्वेष्वनुगकमेकमित्युक्ते व्यभिचारनिरुक्तेर्व्यभिचारघटितत्वादात्माश्रय इत्यर्थः। अननुगमाच्चेति।। व्यभिचारनिरुक्तिशरीरप्रविष्टव्यभिचराणा विपक्षत्वं साध्यात्यन्भाववत्वमित्यादिना प्रागुक्तदिशा नानात्वादिति भावः। उपजीव्यत्वादव्याप्तित्वेनैव दोषोस्त्वित्याह -- किंचिति ।। आवश्यकत्वादिति।। व्याप्तिशरीरप्रविष्टसम्बन्धाभावस्याज्ञाने विपक्षत्वादेरज्ञानेन तज्ज्ञानेऽवश्यंभाविनि तदभावरूपाव्याप्तिरेव दोषोस्तु किं तादृशसम्बन्धेन साध्याभाववद्वृत्तिनेत्यर्थः।।
साधारणस्याव्याप्तावन्तर्भावः।। ३१ ।।

१.रित्वं -ठ. २.रित्वं -ठ. रित्वमिति स्थितं रत्वमिति शोधितम् -ड.

असास्या-व्यावन्तवः) अनुमादोषवादः पु - ३०३.

अथासाधरणस्याव्याप्तावन्तर्भावः ।। ३१ ।।
असाधारणत्वमपि सर्वसपक्षविपक्षव्यावृत्तत्वं चेत् विशेष्यवैयर्थ्यम्। प्रत्युत सर्वविपक्षव्यावृत्तत्वं गुण एव। न तु दोषः। न च विरुद्धव्यावृत्त्यर्थं तत्। दूषकताबीजैक्येन तस्यापि सङ्ग्राह्यत्वात्।।
यच्चोक्तमसाधारणे -- उभयव्यावृत्तत्वमेव दूषकताबीजं तच्च विरुद्धे १ नास्तीति न दूषकताबीजैक्यम्। असाधारणस्य लक्षणं तु सर्वसपक्षव्यावृत्तत्वं तदेवोद्भाव्यमसाधकतासाधकं च। दूष्यानुमानसाध्याभावोपपादकत्वात्। न तु विपक्षव्यावृत्तत्वमपीति। तन्न। अदूषकताबीजेनासाधक-

अथासाधारणस्याव्याप्तावान्तर्भावः ।। ३२ ।।
साध्यवतस्तदभाववतश्चेत्यादिमण्युक्तं निष्कृष्यानुवदति -- यच्चेति।। २ सपक्षविपक्ष्वयावृत्तत्वमित्यर्थः। ३ सपक्षव्यावृत्तत्वस्य दूषकत्वे नित्यः शब्दः कृतकत्वात् इत्यादिविरुद्धस्यापि तथात्वाद्विपक्षव्यावृत्तत्वमुक्तम्। विरुद्धस्य विपक्षवृत्तित्वात्। विरुद्ध इत्युपलक्षम्। सद्धेतौ च नास्तीत्यपि ध्येयम्। अदूषकताबीजेनेति।।
दूषकताबीजनादन्यत्वेनेत्यर्थः। सर्वसपक्ष ४ व्यावृत्तत्वमस्तु मास्त्वसाधकत्वमित्युक्ते बाधकाभावादिति --

१.द्धत्वना -क.रा. २. उभयव्य वृत्तत्वमिति । सपक्षविपक्षव्यावृत्तत्वस्य दूषकत्व इत्यादिरीत्यास्ति- ठ. ३.सपक्षेत्यादि नास्ति -ट. ४.क्षाद्वया - ठ.

पु - ३०४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

तासाधने अप्रयोजकत्वापातात्। न ह्यन्यस् भुक्त्याऽन्यस्य तृप्तिः।।
तर्हि सर्वसपक्षव्यावृत्तत्वमेव दूषकताबीजम्। लक्षणं उद्भाव्यमसाधकतासाधकं च। विरुद्धोपि विरुद्धत्वाज्ञाने सर्वसपक्षव्यावृत्तत्वज्ञानदशायामसाधारण एव । न चास्याव्याप्तावान्तर्भावः। पक्षादन्यत्रसाध्याभावस्य सत्वेपि तत्र हेतोरभावात्। पक्षे हेतुसत्वेऽपि साध्याभावानिश्चयादिति चेन्न। तथाऽप्यसाधारण्यानुकूलतर्कानवतरारदशायां तर्काभावादेव सन्दिग्धव्याप्तिकत्वेनाव्याप्तावन्तर्भावात्। तर्कावतारदशायां तु असाधारण्यादुत्तीर्णत्वेन हेत्वाभासत्व्यैवाभावात्। असाधारणो ह्यनित्यदोषः इदमेवह्यभिप्रेत्य सुधायामसाधारणस्य दूषणत्वासम्मतेरित्युक्तम्।।

अन्यस्य दूषकताबीजत्वे तदन्यस्य नासाधकतासाधकत्वमित्येतदर्थान्तरन्यासेन व्यनक्ति -- न हीति।। सर्वसपक्षव्यावृत्तत्वमात्रमुद्भाव्यमित्यादिमण्युक्तानुरोधेनाह-- तर्हीत्यादि।। इदमेवेति।। तर्कावतारकालीनादोषत्वमेवेत्यर्थः। 'साध्यव्यापकवैकोम्यम्याप्ति'रित्येतद्व्याख्यानावसरे उक्तमित्यर्थः।।
'सत्यपि सपक्षे तत्रावर्तमानस्य किं व्याप्तिरेव नस्त्युत केवलव्यतिरेकिवदस्तीति सन्देहावस्कन्दना'दिति पद्धत्युक्तं १ हृदि कृत्वाऽऽह -- यद्वाऽसाधारण इति।।

१.क्तिं -ट.ड.

असास्या-व्यावन्तव्यः) अनुमादोषवादः पु - ३०५.

यद्वाऽसाधारणः सर्वसाध्यवद्व्यावृत्या साध्याभावव्याप्तो वा सर्वसाध्याभाववद्व्यावृत्या साध्यव्याप्तोवेति सन्देहेनाव्याप्तावन्त १ र्भावः।।
अथ वाऽसाधारणस्य पक्षमात्रवृत्तित्वेन नान्वयव्याप्तिधीः। नापि व्यतिरेकव्याप्तिधीः। यत्र २ नित्यत्वाभावः तत्र शब्दत्वाभाव इति व्यतिरेकव्याप्तेर्यत्रानित्यत्वाभावः तत्र शब्दत्वाभाव इति प्रतिकूलया व्यतिरेकव्याप्त्या प्रतिरुद्धत्वात्। तस्यात् व्याप्तिप्रमित्यसिद्धा ३ वव्याप्तावन्तर्भावः। अत एव प्रमाणलक्षणटीकायां पक्ष एव वर्तमानत्वेन व्याप्तेरग्रहणादित्युक्तम्।।
यद्वाऽसाधारणः पक्षे साध्यसन्देहात्सन्दिग्धा-

व्यतिरेकव्याप्तिसंभवोऽयं न हेत्वाभास इति पद्धत्युक्तं कस्य चिन्मतमपाकुर्वाणः लक्षणटीकारीत्याऽन्तर्भावमाह -- अथवेति।।

ननु न व्यतिरेकव्याप्तिधीरित्ययुक्तम्। व्याप्तिसम्भवेन तद्धीसंभवादित्यतो व्याप्तेः सम्भवेऽपि प्रतिरोधान्न तद्धीरित्याह -- यत्रेति।। व्याप्तेरग्रहणादित्यस्य
पक्ष एव व्याप्तेरनिश्चयात् किं तु सन्देहादित्यप्यर्थमुपेत्याह -- यद्वेति।। निश्चितसाध्याभाववति हेतुसन्देह इव -

१.भूतः -क.ग.रा. २.त्रानि -ग.ट.रा. ३.अव्याप्तिपदं न-ग.ट.रा.

पु - ३०६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

व्याप्तः। दृष्टं च पक्ष एव व्यभिचारसन्देहस्य दोषत्वम् स श्यामो मित्रातनयत्वादित्यादौ। तनयान्तरे श्यमत्वानिश्चयात्।।
ननु तत्र संशयः उपाध्याहितः। स एव च संशयोनुमितिप्रतिबन्धकः। फलबलेनैव तथा कल्पनात्। न त्वन्यः। तस्यानुमानाङ्गत्वात्। सदनुमाने तु संशयो नोपाध्याहित इति १ । अन्यथानुमानमात्रोच्छेदा २ दिति चेत्। इहापि संशयः सर्वसपक्षविपक्षव्यावृत्त्याहितः। स एव च संशयः प्रतिबन्धकः। फलबलात्। सदनुमाने तु संशयो न तदाहित इति नातिप्रसङ्गः।।

सन्दिह्यसाध्या ३ भाववति हेतुनिश्चयेऽपि व्यभिचारसन्देहेन सन्दिग्धव्याप्त्यभावरूपत्वात्सन्दिग्धाव्याप्त इत्यर्थः। 'सन्दिग्धे न्यायः प्रवर्तते'इत्यनुमानमात्रे साध्यसन्देहस्यावर्जनीयत ४ या पक्षीयव्यभिचरसन्देहस्य ५ दोषत्वे ६ नुमानमात्रोच्छेदात्कथं सन्दिग्धाव्याप्तत्वमित्यतः स्वानसिकस्यादोषत्वोप्याहितस्य दोषत्वमेव प्रकृते चाहित ७ सन्देह इति भावेनाह -- दृष्टं हीति।। उपाधीति।।

शाकपाकजत्वोपाधीत्यर्थः। पक्षीयसन्दिग्धव्यभिचारस्य ८ साधारणे दोषत्वेऽपि न सद्धेतुमात्रोच्छेदः वैषम्यादिति भावेनाह -- किंचिति।।

१.ति नानुमान - क.ग.रा. २.च्छेद इति चे- ट.रा. ३.ध्यवति-ठ. ४.यत्वात् -ठ. ५.हस्या -ठ. ६.त्वेनानु -ठ.ड. ७.एवेत्यधिकम् -ट.ठ.ड. ८.स्यासाधारणदो -ट.ठ.ड.

असास्या-व्यावन्तवः) अनुमादोषवादः पु - ३०७.

किंचेह साध्याभावसंशयो हेत्वधिकरणत्वेन ज्ञायमाने सर्वस्मिन्नप्यस्ति। अत्र हेतोः सर्वसपक्षव्यावृत्ततया सन्दिग्धसाध्यवन्मात्रवृत्तित्वात्। स एव संशयः प्रतिबन्धकः। फलबलात्। सदनुमाने तु हेतुः सन्दिग्धसाध्यवत्पक्षवृत्तिरपि सन्दिग्धसाध्यवन्मात्रवृत्तिर्न । निश्चितसाध्ये सपक्षेपि वृत्तेः।।
ननु सन्दिग्धसाध्यवन्मात्रवृत्तित्वं सदनुमाने केवलव्यतिरेकिण्यप्यस्तीति तस्याप्यव्याप्त्यन्तर्भावः स्यादिति चेन्न। अनुकूलतर्कानवतारदशायामिष्टत्वात्।
मदभिप्रेतस्यान्वयव्याप्त्यभावान्तर्भावस्याहानेश्च। असाधारणे व्यतिरेकव्याप्तिस्तु प्रतिकूलव्यतिरेकव्याप्त्या प्रतिरुद्धेत्युक्तम्।।
एतेन सर्वसपक्ष्वयावृत्तत्वरूपमसाधारणत्वं विपक्षवृत्तित्वरूपाव्याप्तेरुपजीव्यमित्यसाधारणत्व-

इह असाधारणे। अस्मिन् पक्षे बाधकमाशङ्क्य निराह -- ननु सन्दिग्धेति।।
नन्वेवं व्यतिरेकिवदेवान्वयव्याप्त्यभावेऽप्यसाधारणो हेतुः १ सद्धेतुः स्यात्। व्यतिरेक्यनुमान इव व्यतिरेकव्याप्तिसंभवादित्यतस्तद्वैषम्यमाह --

असाधारण इति।। प्रकारद्वयेन पृथग्दोषत्वमनूद्य निराह -- एतेनेति।। सर्वसपक्षव्यावृत्तत्वमव्याप्तेरुपजीव्यमित्यप्ययुक्त-

१.सद्धेतुपदं न - ट.ठ.

पु - ३०८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

मेव दोष इत्यव्याप्त्यज्ञानदशायामसाधारणत्वमपि दोष इति च निरस्तम्। उपजीव्यत्वेऽपि व्याप्त्याद्यभावरूपत्वाभावेन स्वतो दूषकताभावात्। व्याप्त्यभावव्याप्यतया दूषकत्वे चाव्याप्त्युन्नायकत्वे
नोपाधिवत्स्वतो हेत्वाभासत्वायोगात्। अनुकूलतर्केऽवतीर्णे उत्तीर्णासाधारणत्वे हेतावव्याप्त्यज्ञानदशायां सर्वसपक्षव्यावृत्तत्वज्ञानेऽप्यनुमित्यप्रतिबन्धाच्च।
तस्मादसाधारणोऽव्याप्तावन्तर्भूत एव। एतदेवाभिप्रेत्य पद्धतौ असाधारणप्रस्तावे 'सर्वथाऽव्याप्तावन्तर्भूत' इत्युक्तम्।।
केचित्तु असाधारणः सर्वसपक्षव्यावृत्तत्वात्साध्याभावस्य, सर्वविपक्षव्यावृत्तत्वात्साध्यस्य च साधक इति सत्प्रतिपक्षाऽन्तर्भूतः। न हि विरोधे स्वभिन्नत्वं तन्त्रम्। गौरवादित्याहुः।।
असाधारणस्याव्याप्तान्तर्भावः।। ३१ ।।

मित्याह --अनुकूलतर्क इति।। अव्याप्त्यज्ञानदशायामिति।। तथा चान्वयव्यतिरेकाभ्यामव्याप्तिरेव दोष इति भावः। केचिदिति।। तार्किकैकदेशिन इत्यर्थः। तदा तु प्रतिज्ञाविरोधेन्तर्भाव स्पष्ट इति भावः।।
असाधारणस्याप्तावन्तर्भावः ।। ३२ ।।

अपसंणो-अव्यान्तर्वः) अनुमादोषवादः पु - ३०९.

अनुपसंहारिणोऽव्याप्तावन्तर्भावः ।। ३२ ।।
अनुपसंहारित्वमपि न तावद्व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावः। व्याप्त्यभाव १ वत्वादित्येतावतै २ व पूर्णत्वेन शेषवैयर्थ्यात्। साधारणादिव्यावृत्त्यर्थमिति तु निरस्तम्।।

अनुपसंहारिणोऽव्याप्तावन्तर्भावः ।। ३३ ।।
मणौ हि व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावः यत्र स हेत्वभिमतो ३ ऽनुपसंहारी, केवलान्वयिधर्मावच्छिन्नपक्षको वेति लक्षणद्वयमुक्तम्। तत्राद्यं तावदपाकरोति -- न तावदिति।। व्याप्तिग्रहस्यानुकूलो य एकस्मिन् धर्मिण्युपसंहारः सहचारग्रहः तदभाव इत्यर्थः। पक्षे सन्देहरूपसहचारग्रहसत्वेन तदभावोसंभवतीत्यतो व्याप्तिग्रहानुकूलेत्युक्तम्। तादृशस्तु सहचारनिश्चय इति भावः। ४ व्याप्त्यभावादिति।। व्याप्त्यभावो यत्र सोनुपसंहारीत्येतावता पूर्णत्वे व्याप्तिग्रहानुकूलैकधर्मिसहचारग्रहाभाव इत्येतावन्न वाच्यमित्यर्थः। साधारणासाधारणविरुद्धबाधादावपि व्याप्त्यभावोस्तीत्यतिव्याप्तिनिरासायैवं विन्यास इत्यत आह -- साधारणेति।। दूषकताबीजैक्ये ५ तव्द्यावृत्तेरेवायोगादित्युक्तत्वान्निरस्तमित्यर्थः।।

१.भावादित्येता - क. भाव इत्ये -ग.ट,रा. २. ता पूर्णत्वे शेष - ग.ट. रा. ३.तानुप-ठ. ४.इदं प्रतीकग्रहणं नास्ति -ठ. ५.क्येति व्यावृ -ठ.

पु - ३०१. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

किञ्चोपसंहारशब्देन सहचारज्ञानविवक्षायां सहचारज्ञानस्य स्वरूपसत एवनुमितिप्रतिबन्धकतया त्वन्मते हेत्वाभावसत्वमेव न । मन्मते तु व्याप्तिप्रमित्यसिद्धावन्तर्भावः।।
उक्तं हि सुधायाम्। असिद्धिश्च द्विविधा। स्वरूपसतोऽज्ञानतश्चेति। सहचारविवक्षायां तु विरुद्धोपाधिसाङ्कर्यम्। त्वन्मते विरुद्धेऽप्यसहचारस्यैवोपाधित्वात्।।

ननु व्याप्त्यभावस्य दूषकताबीजत्वे स्यादेवं न चैवं किंतूक्तरूपोपाधिरेवेत्यतः एवमपि विरुद्धसाङ्कर्यमेवेति वक्तुमाह -- किञ्चेति।। उपसंहारशब्देन सहचारज्ञानग्रहे तदभावस्य सहचारज्ञानाभावरूपत्वात् सहाचारज्ञानस्येत्युक्तम्। पक्षधराद्युक्तमेवाह-- हेत्वाभासत्वमेव नेति।।
अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वं वा ज्ञायमानं सत् यदनुमितिप्रतिबन्धकं तत्वं वा हेत्वाभासत्वमित्युक्तेरिति भावः। विरुद्धेति।। यत्वज्ञायमानदशायां सद्धेतावतिव्याप्तिनिरासाय साध्यसहचारनिश्चयविरोधिहेत्वाभासतोपाधित्वं विवक्षितं चेदपि विरुद्धेतिव्याप्तमित्यतः
स्वसाध्यसिद्ध्यनुकूलव्याप्तिग्रहानुकूलसहचारत्वावच्छिन्निनिश्चयविरोधिहेत्वाभासतोपाधित्वस्य विवक्षितत्वात्। विरुद्धस्य व्यतिरेकसहचारनिश्चयाविरोधित्वान्न तत्रातिव्याप्तिरिति तन्न। एतदज्ञानेऽपि व्याप्त्यभावज्ञानमात्रेणानुमितिप्रतिबन्धात्। दूषकताबीजैक्ये विरुद्धव्यावृत्तेरेवायोगादिति।।

अपसंणो-अव्यान्तर्वः) अनुमादोषवादः पु - ३११.

किं च यो निश्चितः यत्र साध्यं तत्र हेतुरिति सहाचारस्याभावः स तु न

साक्षाद्दोषः। यत्र हेतुस्तत्र साध्यमिति व्याप्त्यभावरूपत्वाभावात्। व्याप्त्यभावव्याप्यतया दोषत्वे चोपाधिवदव्याप्त्युन्नायक एव स्यादित्युक्तम्। यश्च दोषः यत्र हेतुस्तत्र साध्यमिति सहचारस्याभावः स तु हेतुमति साध्याभावात्मकत्वादव्याप्तिरेव। नहि साध्या-

यद्वा अस्त्वेवं क्लेशेन तथाऽपि न पृथग्दोषत्वमित्याह -- किंचिति। व्याप्तिग्रहानुकूलसहचाराभावोऽनुपसंहारित्वमित्यत्र यत्र साध्यं तत्र हेतुरित्येवंरूपसहचारस्याभावो अभिमतः उत यत्र हेतुस्तत्र साध्यमित्येवंरूपसहचारस्याभावः। आद्य आह -- य इति।। यो निश्चितोभाव इत्यन्वयः। कस्येत्यतो यत्रेत्यादि। यद्यपि व्याप्तिग्रहानुकूलेत्युक्तत्वादस्य चातादृशत्वान्नास्य कल्पस्यावतारः। तथापि संभवमात्रेण वा कृतकत्वानित्यत्वयोरेवमपि सहचारो व्याप्तिग्रहानुकूल एवेति वदन्तं प्रति वाऽस्यावतार इत्यदोषः। इति १ व्याप्त्यभावरूपत्वाभावादिति।। तथा च परामर्शविषयाभावत्वाभावाद्दोषत्वमेव न स्यादिति भावः। उक्तमिति।। पूर्वभङ्गान्त इत्यर्थः। यश्च दोष इति अभाव इत्यस्य विशेषणम्। अव्याप्तिरेवेति।। अविनाभावो हि व्याप्तिः। साध्येन विनैव सत्वे कथं नाव्याप्तिः। भवत्येवाव्याप्तिरित्यर्थः। ननु साध्याभावसामानाधिकरण्यस्य व्यभिचारतया सैवाव्याप्तिः साध्याभावस्य हेतुसामानाधिकरण्यस्य कथं व्यभिचारता। येनाव्याप्तिः स्यादित्यत आह -- न हीति।।

१.इत्यव्याप्तिरू - ठ.

भाववति हेतुसत्वमेव व्यभिचारः। न तु हेतुमति साध्याभाव इति युक्तम्। द्वयोरपि हेतुसाध्याभावसामानाधिकरण्यरूपव्यभिचारात्मकत्वाविशेषात्।। नापि केवलान्वयिधर्मावच्छिन्नपक्षताकत्वमनुसंहारित्वम् अनित्यो घटः घटाकाशोभयवृत्तित्वाश्रयत्वादित्यादि तु विरुद्धमेवेति वाच्यम्। उत्तीर्णानुपसंहारित्वास्थे सर्वमभिधेयं प्रमेयत्वादिति सदनुमाने १ तत्प्रतिसन्धानेप्यनुमित्यप्रतिबन्धात्। द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः अनित्याः वस्तुत्वादित्याद्यसदनुमाने तदप्रतिसन्धानेप्यनुमितिप्रतिबन्धाच्च।।

मण्युक्तं द्वितीयलक्षणमपि निराह -- नापीति।। अनुपसंहारविशेषे लक्षणमिदमव्याप्तमित्यतो मण्युक्तदिशा लक्ष्यबहिर्भावेन निराह -- अनित्यो घट इति।। अन्वयव्यतिरेकव्यभिचारेणैतज्ज्ञानस्यानुमित्यप्रतिबन्धकतया ज्ञायमाने सत्यनुमितिप्रतिबन्धकत्व २ रूपोक्तहेत्वाभासतोपाधित्वाभावाद्धेत्वाभावसत्वमेव नेति भावेन व्यभिचारा ३ वाह -- उत्तीर्णेति।। बहुव्रीहिः। विपक्षव्याघातादितर्कबलेनेति भावः। तदप्रतिबन्धानेऽपीति।। अत्र पक्षतावच्छेदकस्याकेवलान्वयित्वेन केवलान्वयिधर्मावच्छिन्नपक्षताकत्वप्रतिसन्धानस्यात्रानुदयादिति भावः। यथाश्रुतमूलस्य तव्याख्यातृविवक्षितं लक्षणमुक्तदोषपरिहाराय शङ्कते -- नन्विति।।

१.नेसत्प्र -रा. २.त्वादुक्तहे - ट.ड. ३.त्वद्युक्तहे -ठ. ३.रं चा -ठ.

ननु सन्दिग्धसाध्यवन्मात्रवृत्तित्वं अनुपसंहारित्वम्। अस्यां दशायामसाधारणोप्यनुपसंहारि चेत्। तथाऽप्यसाधारणप्रस्तावोक्तरीत्या तर्कानवतारदशायां तर्काभावादेव सन्दिग्धाव्याप्तेः। तदवतारदशायां तु न दोषः।।

उत्तीर्णवस्थेऽनुमाने सन्देहाभावेन सन्दिग्धासाध्यवृत्तित्वं नास्तीति तत्र तदनुसन्धानस्यैवायोगेन नान्वयव्यभिचारः। द्रव्यगुणेत्यादौ च सन्दिग्धसाध्यवन्मात्रे पक्षे हेतो १ र्वृत्तिमत्वेन तत्र तदनुसन्धानसम्भवेन तेनैवानुमितिप्रतिबन्धान्न व्यतिरेकव्यभिचारोऽपीति भावः। नन्वेवमपि सर्वमभिधेयं मेयत्वादित्यादावनुत्तीर्णानुपसंहारित्वदशायामव्याप्तिः। तत्र साध्याभावाप्रसिद्ध्या साध्यसन्देहाभावादिति चेन्न। इदमभिधेयं न वेत्येवं सन्देहाभावेप्यनभिधेयत्वमत्रास्ति न वेत्येवं सन्देहस्य तत्रापि संभवादिति भावः।
नन्विदं पक्षमात्रवृत्य २ साधारणेऽतिव्याप्तमित्यत आह-- अस्यामिति।। सन्दिग्धसाध्यवन्मात्रवृत्तित्वमनुपसंहारित्वमिति दशायां सन्दिग्धसाध्यवन्मात्रवृत्तित्वानुसन्धानदशायां वेत्यर्थः। न दोष इति।। हेत्वाभासत्वमेव नेत्यर्थः। रुचिदत्तादौ तु ३ सन्दिग्धसाध्यवन्मात्रवृत्तित्वज्ञाने सत्यपि शब्दाव्याप्तिग्रहसंभवे तस्य न व्याप्तिधीप्रतिबन्धद्वाराऽनुमितिप्रतिबन्धकत्वम्। साध्यसामानाधिकरण्य ४ सन्देहस्य योग्यतासंशयपर्यवसन्नतया तत्राप्रतिबन्धकत्वेन तत्सामग्र्याः सुतरामप्रतिबन्धकत्वादिति दूषणमुक्तम्। पूर्वं सन्दिग्धाव्या

१.तुमत्वेन -न तत्र -ट.ड. २.त्तिसाधारणे -ट.ड. ३.तु इति न -ट.ठ. ४.संशयज्ञानस्य -ठ. सन्देहयोग्यता -ड.

यद्वाऽनुपसंहारिणि सर्वस्यापि पक्षत्वेनान्वयव्याप्तेर्व्यतिरेकव्याप्तेर्वा ग्रहणासंभवाद्व्याप्तिप्रमित्यसिद्धावन्तर्भावः। यद्वाऽसाधारणे उक्तरीत्या मित्रातनयत्वादिरिव पक्ष एव साध्यसन्देहात्सन्दिग्धाव्याप्तः।।
एतदेवाभिप्रेत्योक्तं पद्धतौ। सर्वं क्षणिकं सत्वादित्ययमप्युभयसंबन्धाभावादव्याप्तावन्तर्भूत इति।।
केचित्तु सर्वं क्षणिकं सत्वादित्यत्र पक्ष एव साध्याभावेनैव संबन्धावगमात्। सर्वमनित्यं सत्वादित्यादौ तु पक्ष एव साध्याभावेनापि -

प्तित्वमुक्तं इदानीं व्याप्तिप्रमित्यसिद्धावन्तर्भावमाह -- यद्वेति।। पूर्वं तर्कानवतारे १
हेतोरप्रयोजकत्वाहितसाध्यसामानाधिकरण्यमादायाव्याप्तावन्तर्भाव उक्तः अधुनाऽन्यत्र साध्येन तदभावेन वा सहाचारदर्शनाहितसाध्यसामानाधिकरण्यसंशयमादाय सन्दिग्धाव्याप्तत्वमाह -- यद्वाऽसाधारण इति अनुमानमात्रोच्छेदप्रसङ्गनिरासायो २ क्तरीत्येति मित्रातनयत्वदेरिवेति चोक्तम्।
शाकपाकजत्वादिरूपोपाधिसन्देहाहितसाध्यसन्देहवद्वृत्तित्वेन
मित्रातनयत्वादेर्यथा
सन्दिग्धा ३ व्याप्तत्वं तथा साध्यतदभावाभ्यां सहचारदर्शनाहितसाध्यसन्देहप्रयुक्तसन्दिग्धाव्याप्तत्वमित्यर्थः।
प्रकारान्तरेणाव्याप्त्यन्तर्भावं परमुखेनाह-- केचिदिति।। पक्ष एवेति।। प्रत्यभिज्ञया घटादेः सर्वस्य स्थायित्वनिश्चयादिति भावः। साध्याभावेनापीति।। क्वचिन्नित्यत्वस्यापि निश्चयादिति भावः।
अत्रारिचिबीजं -

१.रहेतो-ट. २.प्रसङ्गनिरासायाह उक्त -ठ. ३.दिग्धव्या -क.ग.रा.

संबन्धावगमादव्याप्तः। सर्वमभिधेयं प्रमेयत्वादिति तु सदनुमानमेवेत्याहुः।।
एतेनाव्याप्तिं प्रत्युपजीव्यत्वादनुमपसंहारित्वमेव दोष इत्यव्याप्त्यज्ञानदशायामनुपसंहारित्वमपि दोष इति च निरस्तम्। त्वदुक्तलक्षणत्रये आद्यस्य निष्कर्षे स्वयमेवाव्याप्तिरूपत्वात्। द्वितीयस्य स्वतो दोषत्वाभावात्। तृतीयस्य च स्वयमेव सन्दिग्धाव्याप्यत्वात्।।
अनुपसंहारिणोऽव्याप्तावन्तर्भावः।। ३२ ।।

तु साध्यसन्देहवान्पक्ष इति मते सर्वस्य साध्यसन्देहवत्वेन तदभावानिश्चयात्साध्याभावेनैवेति पक्षस्य साध्याभावेनापीति पक्षस्य १ चोयागात् पक्षे सन्दिग्धसाध्याभावसंबन्धेन चाव्याप्तत्वेऽपि प्रसङ्गादस्मदुक्तदिशा सन्दिग्धाव्याप्तत्वस्यैवापन्नत्वाच्चेति। मण्युक्तमेव पृथग्दोषत्वप्रकारमनूद्य निराह -- एतेनेति।। सर्वसपक्षव्यावृत्तत्वाद्यज्ञाने व्यप्तेरज्ञानात्तत्प्रतिसन्धान एव ज्ञायमानत्वात्तस्योपजीव्यत्वमिति भावः। तत्र हेतुमाह -- त्वदुक्तेति।। आद्यस्येति।। व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभाव इत्यस्य। अव्याप्तिरूपत्वादिति।। किंचेत्यादिना प्रागुपपादनात् तथा चाभेदे कथमुपजीव्योपजीवकभावः । द्वितीये केवलान्वयीत्यादिनोक्तलक्षणेऽन्वयभिचारेकाभ्यां तज्ज्ञानस्यानुमितिप्रतिबन्धकत्वव्यभिचारस्योक्तत्वात्तथा च स्वस्यैवादोषत्वे कथं दोषान्तरं प्रति स्वयमुपजीव्यं स्यादिति भावः।। तृतीयस्येति।। सन्दिग्धसाध्यवन्मात्रवृत्तित्वलक्षणस्य। तथा चाभेदान्नोपजीव्योपजीवकभाव इति भावः।।
अनुपसंहारिणोऽव्याप्तावन्तर्भावः ।। ३३ ।।

१. स्यायो - ट.ठ.

पु - ३१६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

अथ विरुद्धस्याप्यव्याप्तावन्तर्भावः ।। ३३ ।।
विरुद्धत्वमपि विपक्षमात्रवृत्तित्वं चेत्, मात्रपदवैयर्थ्यम्। तत्त्यागे च साधारणसाङ्कर्येणाव्याप्तावन्तर्भावः। साधारणव्यावृत्त्यर्थं मात्रपदमिति तु निरस्तम्। साध्याभावव्याप्तत्वं चेत् साध्याभावसंबन्धेनैवालम्। किं व्याप्तिशरीरान्तर्गतेन नियमेन। नियमांशत्यागे च साधारण्यसाङ्कर्यम्।।

अथ विरुद्धस्याप्यव्याप्तावन्तर्भावः ।। ३४ ।।
विरुद्धहेत्वाभासत्वरूपदोषस्याप्यव्याप्तावन्तर्भावं सुधाद्युक्तदिशा विवरितुकामः किं विपक्षमात्रवृत्तित्वं विरुद्धत्वं विपक्षवृत्तित्वमेव वा साध्याभावव्याप्तत्वं वा साध्याभावसंबन्धत्वमात्रं वा मण्युक्तरीत्या साध्यव्यापकाभावप्रतियोगित्वं वेति विकल्पान् हृदि कृत्वाऽऽद्यं निराह -- विरुद्धत्वमपीति।। मात्रपदेति।। विपक्षवृत्तित्वमात्रस्यैव साधारण इव दूषकत्वसंभवे सपक्षावृत्तित्वे सतीत्यर्थकमात्रपदस्य व्यर्थत्वादित्यर्थः । द्वितीये दोषमाह -- तत्त्यागे चेति।। साधारणस्याव्याप्यन्तर्भावोक्तेः साधारणसाङ्कर्येण हेतुनाऽव्याप्तावन्तर्भाव
इत्युक्तम्। निरस्तमिति।। दूषकताबीजसाम्ये तद्व्यावृत्तेरेवायोगादित्युक्तत्वादिति भावः। तृतीयमनूद्य निराह -- साध्येति।। चतुर्थं निराह-- नियमांशेति।।

विरुस्याप्यव्यान्तर्वः) अनुमादोषवादः पु - ३१७.

ननु -- साध्यव्यापकाभावप्रतियोगित्वं विरुद्धत्वम्। एवं च न विशेषणवैयर्थ्यम्। नापि साधारणसाङ्कर्यमितिचेन्न। अस्य हि यत्र साध्यं तत्र साधनाभाव इति व्याप्तिर्विरुद्धत्वमित्यर्थः।।

पञ्चममाशङ्कते -- नन्विति।। साध्यव्यापकीभूतो योऽभवः तत्प्रतियोगित्वमित्यर्थः। नित्यः शब्दः कृतकत्वादित्यत्र हेत्वभावः साध्यव्यापको भवति यत्र नित्यत्वं गगनादौ तत्र कृतकत्वाभाव इति व्याप्तेः। न विशेषणवैयर्थ्यमिति।। यद्यप्यत्रापि नियमांशोऽधिकोऽनुप्रविष्टः। तथाऽपि साध्यसमानाधिकरणाभावप्रतियोगित्वस्य विषमव्याप्तिके सद्धेतौ धूमादावप्यस्तीति सद्धेतुव्यावर्तकत्वान्नियमांशः सफल इति भावः। नापीति।। साधारणस्य सपक्षवृत्तितया साध्येनापि सम्बन्धेन साध्य १ व्यापकाभाव २ प्रतियोगित्वादिति भावः।।
अस्मिन् लक्षणेऽपि विरुद्धस्याव्याप्ताव २ न्तर्भावं वक्तुं तस्यार्थनिष्कर्षं तावत्करोति -- अस्य हीति।। अस्तु किं तत इत्यत एतज्ज्ञानं च न साक्षादनुमितिप्रतिबन्धकम् अनुमितिविषयाभावानवगाहित्वात् बाधप्रतिपक्षयोरेव तथात्वात् किंतु तत्कारणविघटकत्वेन। तच्च परामर्शविषयाभावावगाहित्वेनैव परामर्शरूपकारणविघटनद्वारा तज्जन्यानुमितिप्रतिबन्धकत्वमिति वाच्यम्। परामर्शविषयश्च पक्षधर्मता व्याप्तिश्चेति द्वयम्। तत्रं किं पक्षधर्मताज्ञानविघटनद्वारा व्याप्तिज्ञानप्रतिबन्धनद्वारा वानुमितिप्रति-

१.साध्याव्या - ड. २.वाप्रति-ड. ३.व्याप्त्यन्त-ड.

उक्तव्याप्तिज्ञानं च न तावद्दूष्यानुमानीयपक्षधर्मताज्ञानविघटकम्। विरुद्धेऽपि तज्ज्ञानस्य सत्वात्। किं तु यत्र साधनं तत्र साध्यमित्युदाहरणदर्शिता या दूष्यानुमानीया व्याप्तिः तज्ज्ञानप्रतिबन्धकमित्येव १ वाच्यम्। तत्प्रतिबन्धकत्वं च किं तद्ग्राह्या या दूष्यानुमानीया व्याप्तिः तदभावविषयत्वेन किं वा तद्ग्राह्य्ा या व्याप्तिस्तदभावव्याप्यविषयत्वेन वा। नाद्यः। दूषिकायाः यत्र साध्यं तत्र साधनाभाव इति व्याप्तेः यत्र साधनं तत्र साध्यमिति दूष्यमानीय्यप्त्यभावरूपत्वाभावात्। भावे वा मदभिप्रेतस्याव्याप्त्यन्तर्भावस्य सिद्धेः। अन्त्येऽपि किं दूषिकाया व्याप्तेः स्वरूपेण ज्ञानं दूष्यानुमानीयव्याप्तिज्ञानप्रतिबन्धकम् किं वा २ दूष्यानु-

बन्धकत्वम्। आद्यं निराह -- न तावदिति।। द्वितीयमेव प्रश्नपूर्वं ३ विशेषयति --किंत्वित्यादिना। उदाहरणप्रदर्शितेति विभागः। तत्रापि विकल्पयति -- तत्प्रतिबन्धकत्वं चेति ।। तद्ग्राह्येति पदच्छेदः। प्रतिबध्यत्वेनाभिमतज्ञानग्राह्येत्यर्थः। दूषिकाया इति।। स्वज्ञानद्वारा प्रतिबन्धकीभूताया इत्यर्थः। व्याप्तभावरूपत्वाभावादिति।। हेत्वभावस्य साध्यव्यापकत्वं साध्यवन्निष्ठात्यन्ताभावप्रतियोगित्वम्। अत्र च साध्यसामानाधिकरण्यांशस्य साध्याभावसंबन्धरूपव्यभिचारांशस्य वा प्रवेशाभावादित्यर्थः। अभ्युपेत्यापि दोषमाह-- भावेवेति।।

१.वं वा -ग.रा. २.'यत्र साध्यं तत्र साधनं' इत्यनन्तरं दूष्यानुमानीयेत्यरभ्येतावान्ग्रन्थः लुप्तः-क.ग.रा.
३.पिरशेषयति - ड.

मानीयव्याप्त्यभावव्याप्यत्वेन ज्ञानम्। नाद्यः। अतिप्रसङ्गात्। नान्त्यः। व्याप्त्यभावज्ञाने तद्व्याप्यत्वज्ञानसंभवेनावश्यकस्य व्याप्त्यभावस्यैव दोषत्वसिद्धेः।।
किं च विरुद्धस्योपाधितवद्व्याप्त्यभावव्याप्यतया दोषत्वे स्वतो हेत्वाभासत्वं न स्यात्।।
किंचान्तरङ्गं लघुतरं क्लृप्तमानुभाविकं च साध्याभावसंबन्धज्ञानं त्यक्त्वा स्वकल्पितप्रक्रिया-

अतिप्रसङ्गादिति।। तन्निर्विकल्पकेन वा प्रमेयत्वादिप्रकारकतज्ज्ञानेनापि वा प्रतिबन्धापातादित्यर्थः। अस्मिन्पक्षे विरुद्धस्य हेत्वाभावसत्वमेव दुर्घटमिति कथं पञ्चेति विभाग इति भावेनाह -- किं चेति।। उपाधिवत् उपाधेरिव। उपाधेर्यथा
१ व्यभिचारोन्नायकत्वेन स्वतो दोषत्वाभावान्न हेत्वाभासत्वं तथेत्यर्थः।।
ननूपाधेर्व्यभिचारव्याप्यत्वेन तदनुमितिद्वारा व्यप्त्यभावगमकत्वं न साक्षात्। न हि व्यभिचार एव व्याप्त्यभावः। अव्यभिचरितसहचाररूपत्वाद्व्याप्तेः साध्यहेत्वभावयोर्व्याप्तेः साध्यहेतुव्याप्तिव्याप्यत्वं तु साक्षादेव व्याप्त्यभावावगम इति नोपाधिसाम्यमिति वदन्तं प्रत्याह -- किं चान्तरङ्गमिति।।साध्यहेत्वभावव्याप्तेः साध्यहेतुव्याप्त्यभावं प्रति व्याप्यत्वविषयकत्वापेक्षया
साध्याभावसम्बन्धज्ञानस्याल्पविषयकत्वादन्तरङ्गत्वं लघुतरत्वं च व्यक्तमेव। क्लृप्तमिति।। साधारणे प्रतिबन्धकत्वस्य निर्णीतत्वादिति भावः। साध्याभावव्याप्तो विरुद्ध इति प्रसिद्धलक्षणानुरोधेनोक्तं साध्याभावसंबन्धज्ञानं त्यक्त्वेति।। प्रक्रियेति।। सव्यभिचारादिभेदेन पञ्चैव हेत्वाभासा इति प्रक्रियानिर्वाहयेत्यर्थः।।

१.चारित्वेन -ट.ड.

पु - ३२०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

निर्वाहाय बहिरङ्गस्य गुरुतरस्याक्लृप्तस्यानानुभाविकस्य च साध्यहेत्वभावव्याप्तेर्हेतुसाध्यव्याप्त्यभावेन सह व्याप्तिज्ञानस्य प्रतिबन्धकत्वकल्पनमत्यन्तायुक्तम्। न ह्यत्र हिंसात्वमित्रातनयत्वादाविव साध्याभावसम्बन्धोन स्फुटः। येन तत्रोपाधिनेवात्र त्वदुक्तेन विरुद्धत्वेन स उन्नीय १ ते।।
कि चेदं ज्ञानं किं प्रत्यक्षस् दूष्यानुमानीयव्याप्तिज्ञानस्य विरोधि। किं वानुमानिकस्या। नाद्यः। शङ्खे पीतत्वाभावव्याप्यशङ्खत्वग्रहेऽपि पीतत्वसाक्षात्कारदर्शनात्। अन्त्ये दूष्यानुमानीयव्याप्ति-

नन्वेवं स श्यामो मित्रातनयत्वादित्यादावपि साध्याभासंबन्धत्वमेव दोषः। तज्ज्ञानमेव च प्रतिबन्धकं, तदेव चोद्भाव्यं स्यात् न तु शाकपाकजत्वोपाधिरित्यत आह -- न हीति।। यद्वा मित्रातनयत्वादौ साध्याभावसम्बन्धद्योतनायोपाध्युक्तिवदिहापि
तदुक्त्यर्थमेवोक्तरूपविरुद्धत्वमस्त्वित्यत आह -- न हीति।।
ननु साध्याभावसंबन्धाज्ञानेऽपि कदाचित्सामग्रीवशेनाप्तवाक्येन चोक्तरूपज्ञाने सति व्याप्तिज्ञानप्रतिबन्धदर्शनादयमपि पृथग्दोषो वाच्य इति वादिनं प्रत्याह -- किं चेदं ज्ञानमिति।। साध्यहेत्वभावव्याप्तेर्हेतुसाध्यव्याप्ति २ भावेन सह व्याप्तिज्ञानमित्यर्थः। अन्त्य इति।।

१.येत -रा. २.प्त्यभावे - ठ.

विरुस्याव्यान्तर्वः) अनुमादोषवादः पु - ३२१.

ज्ञानस्यानुमानिकत्वे दूष्यानुमानीयहेतौ व्याप्तिव्याप्यस्य त्वदुक्तरीत्या व्याप्त्यभावव्याप्यस्य च ज्ञातत्वेन सत्प्रतिपक्षान्तर्भावः स्यात्। न हि सत्प्रतिपक्ष एवोदाहरणभेदमात्रेण विरुद्धो भवति।। किंचाव्यप्त्यन्तर्भावाच्छादनाय साध्यव्यापकाभावप्रतियोगित्वं विरुद्धत्वमित्युक्तौ वृत्तिमतः साध्यवदवृत्तित्वं वा साध्यासामानाधिकरणधर्मत्वं -

नित्यः शब्दः कृतकत्वादित्यादिविरुद्धहेतौ साध्यनिरूपितव्याप्तिज्ञानस्यानुमानिकस्यैवोक्तरूपव्याप्यत्वज्ञानं प्रतिबन्धकमिति पक्ष इत्यर्थः। अस्मिन् पक्षे विरुद्धहेतौ साध्येन सह व्याप्तिज्ञानमानुमानिकमित्येव वाच्यमन्यथा तस्य प्रतिबन्धायोगादिति भावेनोक्तं दूष्येत्यादि। अनुमानं च विरुद्धहेतौ कृतकत्वादौ नित्यत्वादिरूपसाध्यनिरूपितव्याप्तिं प्रति व्याप्यस्य कस्य चिज्ज्ञानमेवेति वाच्यमिति भावेनोक्तं -- दूष्यानुमानीय हेतौ व्याप्तिव्याप्यस्येति।। त्वदुक्तरीत्येति, ।। साध्यहेत्वभावयोर्व्याप्तिरूपस्य हेतुसाध्यव्याप्त्यभावं प्रति व्याप्यस्य चेत्यर्थः।।
नन्वनित्यः शब्दः कृतकत्वात्, नित्यः शब्दः श्रावणत्वादित्यादिरेव सत्प्रतिपक्षोदाहरणं नैतादृशमित्यत आह -- न हीति।। अनित्यत्वसाध १ ककृतकत्वहेतुः साध्यव्याप्तः पक्षे साध्यसमानाधिकरणत्वात् कृतकत्वहेतुः न प्रकृतसाध्यव्याप्तः साध्यव्यापकाभावप्रतियोगित्वादित्युदाहरणभेदमात्रेणेत्यर्थः।
व्याप्तितदभावानुमित्यन्यस्थल एव प्रतिपक्षतेति मन्वानं प्रत्याह -- किंचेति।।

इत्युक्तावित्यस्य विरुद्धत्वं नानास्यादित्यन्वयः। कथमित्यतो मण्युक्तान्येवाह -- वृत्तिमत इति।।

१.ध्यकृ - ट.ड.

पु - ३२२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

वा साध्यवद्वृत्तिभिन्नधर्मत्वं वा विरुद्धत्वमित्यपि १ सुवचत्वाद्विरुद्धत्वं नाना स्यात्। तत्र च बाधप्रस्तावोक्तरीत्या सर्वेषां प्रत्येकं हेत्वाभासत्वस्य वक्तव्यत्वेन हेत्वाभासाधिक्यं स्यात्।।
यत्तु
व्याप्तिज्ञानकारणीभूतसहचारज्ञानविरोधिज्ञानविषयत्वेनैकीकरणान्नाधिक्यमिति कश्चिताह ।। तन्न। २ त्वदुक्तविषयत्वाज्ञानेऽपि साध्याभावसम्बन्धज्ञानेनैवानुमितिप्रतिबन्धात्।।
किञ्च व्याप्तिज्ञानकरणीभूतं यत्र हेतस्तत्र -

पर्वतोऽग्निमान् गगनवत्वादित्यादावतिव्याप्तिनिरासाय वृत्तिमत इत्युक्तिः। न च तल्लक्ष्यकोटिप्रविष्टमेवेति वाच्यम्। साध्यवदवृत्तित्वरूपविरुद्धत्वस्य तत्र ज्ञानेऽपि व्यतिरेकव्याप्तिग्रहाप्रतिबन्धेन तेन तत्रानुमित्युदयाक्षतेरिति भावः। अस्तु को दोष इत्यत आह -- तत्र चेति।। बाधेति।। बाधप्रतिरोधयोः प्रतिज्ञार्थप्रमाणविरोधत्वेनैक्योक्तिप्रस्तावे एकमेव ३ साधकतालिङ्गं सर्वं वा। आद्ये अन्यज्ञानेनानुमितिप्रतिब्धो न स्यात्। अन्यानुमितिनैकेनामितिप्रतिबन्ध इति तु नानुभवानुसारी। द्वितीये मिलितं लिङ्गं प्रत्येकं वा। आद्ये एकनैव पूर्णत्वाच्छेषवैयर्थ्यम्। अन्त्ये हेत्वाभासाधिक्यमित्युक्तरीत्येत्यर्थः। यज्ज्ञानेनानुमितिप्रतिबन्धो भवति तद्धि

संग्राहकतया निर्वक्तव्यम्। न हीदं तथा। तथा च पञ्चभ्योऽधिकमवर्जनीयमिति भावेनाह -- त्वदुक्तेति।। ४ त्वदुक्तविवक्षैकीकरणपक्षेऽपि हेतोः साध्याभावसम्बन्धज्ञानमावश्यकम्। एवं च तेनैवालं किमनेनेति भावेनाह -- किञ्च व्याप्तिज्ञानेति।।

१.मित सु -क.ट. २.त्वदुक्तविषय इत्यधिकम्-ग.रा. ३.वासाध -ड. ४.इतः नन्वित्यविधिको ग्रन्थः नास्ति -ट.ठ.ड.

विरुस्य-व्यावन्तर्वः) अनुमादोषवादः पु - ३२३.

साध्यमित सहचारज्ञानं प्रति यत्र साध्यं तत्र हेत्वभाव इत्येवंरूपस्य साध्यव्यापकाभावप्रतियोगित्वरूप १ विरुद्धोपाधिज्ञानस्य साक्षादविरोधित्वेन विरोधार्थं यावद्धेत्वधिकरण २ वृत्तिसाध्याभावकल्पं विरुद्धत्वमिति निर्वक्तव्यत्वेन साध्याभावव्याप्य ३ त्वस्यैव विरुद्धत्वसिद्धिः। तत्र च नियमांशो व्यर्थ इत्युक्तम्।।
किंच सहचारशब्देन व्याप्तिशरीरानुप्रविष्टस्य सहचारस्यैव ४ विवक्षणीयत्वेन लाघवाद्व्याप्तिज्ञानविरोधिज्ञानविषय ५ भूतायां अव्याप्तावेवान्तर्भावसिद्धेः।।
एतेन विरोधस्य व्याप्त्यभावं प्रत्युपजीव्यत्वाद्विरोध एव दोष इति, अव्याप्त्यज्ञानदशायां विरो-

ननु कदाचित्साध्याभावसम्बन्धाज्ञानेप्युक्तरूपविषयत्वज्ञानेऽप्यनुमिति प्रतिबन्धोऽस्तीति वादिनं प्रत्याह -- किंचेति।। व्याप्तिशरीरेति।। अन्यादृशस्य प्रकृतव्याप्तिधीकारणत्वाभावात्समवायवृत्या सहचारज्ञानविरोधज्ञानविषयत्वस्य धूमवह्निसामानाधिकरण्येऽपि सत्वेनातिप्रसङ्गाच्चैवं विवक्षाया आवश्यकत्वादिति भावः। मण्युक्तदिशा

प्रकारान्तरेण विरुद्धस्य पृथग्दोषत्वमनूद्य निराह -- एतेनेति।। प्रहतं प्रसिद्धम्। साध्याभावव्याप्तो विरुद्ध इति सर्वैरुपगमादिति भावः। उपजीव्यत्वं -

१.पस्यवि-ग.रा. २.णत्वेन सा -ग.रा. ३.व्यत्वेनैव -ग.ट.रा. ४.रस्य वि -ग.रा. ५.यतया -ग.रा. ६.प्ययुक्त-ट.ड.

पु - ३२४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

धोऽपि दोष इति निरस्तम्। व्याप्त्यभावस्यैव प्रहतं साध्याभावव्याप्यत्वादिरूपं
विरुद्धत्वं प्रत्युपजीव्यत्वात्। न हि हेतोः साध्याभावेन संबन्धं १ ज्ञात्वा तेन व्याप्यता ज्ञातुं शक्या। त्वत्कल्पितं साध्यव्यापकाभावप्रतियोगित्वादिरूपं विरुद्धत्वं साध्यव्यापकाभावप्रतियोगित्वादिरूपं विरुद्धत्वं प्रत्यपि व्याप्त्यभाव एवोजीव्यः। तथाह --त्वत्कल्पितस्य विरुद्धत्वस्य स्वरूपेण ज्ञानं यद्यपि न व्याप्त्यभआवज्ञानाधीनम् । तथाऽपि तन्नानुमितिप्रतिबन्धकम्। यत्तु प्रतिबन्धकं व्याप्त्यभावव्याप्यतया ज्ञानं २ तद्व्याप्त्यभावज्ञानाधीनमेवेति कथं व्याप्त्यभावो नोपजीव्यः।।
एतेनैवोपधेयसङ्करेऽप्युपाधेरसङ्कर इति च निरस्तम्। विरुद्धेऽपि साधारणवद्विपक्षवृत्तित्वस्यैवोपाधित्वोक्तेः।।
तस्मात्साधारणसाङ्कर्यपरिहाराय त्वत्कल्पितं -

व्यनक्ति -- न हीति।। ननु मण्युक्तविरुद्धत्वलक्षणे व्याप्त्यभावस्योपजीव्यत्वं नास्तीत्यत आह - त्वदिति।। मणिकृत्कल्पितेत्यर्थः। आदिपदेन वृत्तिमतः साध्यवदवृत्तित्वादेर्ग्रहः।

व्याप्त्यभावज्ञानाधीनमिति।। तज्ज्ञाने तन्निरूपितव्याप्यत्वस्य दुर्ज्ञानत्वादिति भावः। मण्युक्तं प्रकारान्तरेण विरुद्धस्य पृथक्त्वं निराह --- एतेनेति।। उक्तेरिति।। अस्माभिः प्रतिपादितत्वादित्यर्थः ३ । त्वत्कल्पितमिति।।

१.न्धमज्ञा -ग.ट.रा. २.द्व्यापकाभाव -ग.रा. ३.दिति भावः- ट.ड.

विरुस्याव्यावन्तर्वः) अनुमादोषवादः पु - ३२५.

यद्विरुद्धत्वं
तद्व्याप्त्याद्यभावानात्मकत्वादुपाधिप्रतिकूलतर्कादिवदव्याप्त्युन्नायकमेव। न तु स्वयं हेत्वाभासः। यत्तु प्रहतं विपक्षमात्रवृत्तित्वं १ रूपं विरुद्धत्वं तत्साधारणोपाधिसङ्कीर्णत्वेनाव्याप्त्यन्तर्भूतमेव।।
२
एतेनाव्यभिचारितसामानाधिकरण्यरूपव्याप्तिशीरप्रविष्टस्याव्यभिचाररूपविशेषणांशस्य विरहः साधारणः, तत्प्रतिविष्टस्य सामानाधिकरण्यरूपविशेष्यांशस्य विरहो
विरुद्धः, विशिष्टो ३ विरहो व्याप्यत्वासि ४ द्धः इति भेद इति निरस्तम्। हेत्वाभासविशेषभूता या असिद्धिः तद्विशेषभूता या व्याप्यत्वासिद्धिः तदवान्तरभेदमादाय हेत्वाभाससामान्यविभागे हेत्वाभासविशेषभूता या असिद्धिः

मण्युक्तं साध्याव्यापकाभावप्रतियोगित्वरूपमित्यर्थः। उपाधिरिति।। उपाधिश्च प्रतिकूलतर्कश्चादिपदोक्तानुकूलतर्काभावश्च तद्वदित्यर्थः। प्रहतं प्रसिद्धं सर्वैरुच्मानमित्यर्थः। प्रकारान्तरेण साधारणादित्रयस्य भेदमनूद्य

निराह - एतेनेति। हेत्वाभासविशे ५ षणेति।। ज्ञायमानत्वे ६ सत्यनुमितिप्रतिबन्धका ७ दिरूपं हेत्वाभावसत्वं हि सामान्यम्। तद्विशेषाः

१.त्वादिरू - ग.ट.रा. २.'विरुद्धस्य व्याप्तावन्तर्भावः' इति प्रकरण विभागोऽस्ति -क. ३.ष्टविर -ग.ट.रा. ४.द्धिरिति -ट.रा. ५.षभूतेति- ट.ठ. ६.त्वेस्या -ट.ड. ७.कत्वादि -ट.ठ.

पु - ३२६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

तद्विशेषभूतायाः स्वरूपासिद्धेः शब्दोऽनित्यः चाक्षुषत्वे सति द्रव्यत्वादित्यादौ विशेषणविशेष्यविशिष्टाभावमादाय हेत्वाभाससामान्यविभागापत्तेः। हेत्वाभासविशेषस्य बाधस्य हृदो धूमवत्वे सत्यग्निमानित्यादौ विशिष्टसाध्याभावान्तर्गतविशेषणाभावादिभेदमादाय हेत्वाभाससामान्यविभागप्रसङ्गाच्च।।
तत्र क्लृप्तत्वादनुगतत्वाच्च विशि १ ष्टाभावरूपहेत्वाभास -

सव्यभिचारादयः इत्यसिद्धिरपि हेत्वाभासविशेषः। तद्विशेषा व्याप्यत्वासिद्ध्याश्रयस्वरूपासिद्ध्य २ इत्यादिभेदेनासिद्धेस्त्रिविधत्वस्य प्रागुक्तेः। व्याप्यत्वासिद्ध्यनवान्तरभेदो हि व्याप्तिविशेषणासिद्धिव्याप्तिविशेष्यासिद्धी। तथा च तादृशावान्तरभेदमादाय हेत्वाभाससामान्यस्य सव्यभिचारविरुद्धादिरूपेण पञ्चेतिविभागकरणे स ३ त्यसिद्धिविशेषभूतस्वरूपासिद्धेरवान्तरभेदाः हेतुविशेषणासिद्धिहेतुविशेष्यासिद्धिविशिष्टहेत्वसिद्धी ४ रप्यादायापि हेत्वाभासविभागप्रसङ्गः स्यात्। तथा च पञ्चेति विभागभङ्गः स्यादित्यर्थः।।

अतिप्रसङ्गान्तरं चाह -- हेत्वाभासविशेषस्येति।। परमुखेन समाधिं वाचयित्वा सममित्याह -- तत्रेति।। स्वरूपासिद्धिबाधस्थल इत्यर्थः। ननु विशेषणाद्यभावस्थलेऽप्यनुमितिप्रतिबन्ध्यो दृश्यत इत्यत --

१.शिष्टाभाव एव दो-क.ट.रा. २.द्धिभेदे -ठ. द्व्यादिभेदे -ट.ड. ३.तिये असिद्ध्यादि सिद्धिविशेष -ठ. ४.द्धीरादायापि -ठ.

एव दोषो विशेषणाद्यभावोऽपि विशिष्टाभावोन्नयनद्वारैव दोष इति चेत् १ समं प्रकृतेऽपि २ ।।
किंच व्यधिकरणासिद्धेरदोषत्वप्रस्तावोक्तरीत्याऽन्यथानुपपत्तिरूपाव्यभिचार एव व्याप्तिः। न तु
तद्विशिष्टसामानाधिकरण्यमिति क्वांशभेदोऽपि।।
तस्मात्साधारणासाधारणानुपसंहारिविरुद्धानां साध्याभावसंबन्धरूपायां, अन्यथोपपत्तिरूपायां वा, अव्याप्तावेवान्तर्भावः। तत्रापि साधारणविरुद्धयोर्व्याप्त्यभावो निश्चितः असाधारणानुपसंहारिणोस्तु सन्दिग्ध इति ज्ञेयम् ।।

आह -- विशेषणादीति।। विशेष्याभाव आदिपादर्थः। प्रकृतेपीति।। विरुद्धहेतावपीत्यर्थः। तथा चाव्याप्तिरिवेति भावः।।
ननु -- व्यभिचाराज्ञानेऽपि सहचारविरहज्ञानेनाप्यनुमितिप्रतिबन्धोऽस्तीति वदन्तं प्रत्यव्यभिचारसामानाधिकरण्यं व्याप्तिरित्यङ्गीकृत्योक्तम्। वस्तुतस्तु तदेव नास्ति। येन सामानाधिकरण्यविरहस्य ३ ज्ञानं प्रतिबन्धकमिति सोऽपि पृथग्दोषः स्यादिति भावेनाह -- किंचेति।। तद्विशिष्टं अव्यभिचारविशिष्टम्। पद्धतिविरोधमाशङ्क्य -

१.समं इति न-ट.रा. २.क्लृप्तत्वादनुगतत्वस्य विशेषणांशविरहरूपव्यभिचार एव दोषोऽस्तु न तु स्वतन्त्र सामानाधिकरण्यविरहः केवलव्यतिरेकिण्य सत्वात् -
ट. ण्यपि स -ग.रा. इत्यधिकम्. हस्य प्रकृतेपि भावेनाह किंचेति इत्यस्ति -ट.ड.

पु - ३२८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

यत्तु पद्धतौ विरुद्धः साध्यसंबद्धाभावे सति तदभावसंबन्धित्वादव्याप्तः। साधारणोऽपि साध्यतदभावसंबन्धित्वादव्याप्तः। अनध्यवसितभेदावसाधारणानुपसंहारिणावुभयसंबन्धाभावादव्याप्ता १ वन्तर्भवत इत्युक्तम्। तत्र स्वमते त्रिप्रकारा व्याप्तिः प्रत्येकं हेत्वाभास इति नाभिप्रायः। किं तु वस्तुगत्या विद्यमानायां परैः प्रत्येकं हेत्वाभासत्वेन स्वीकृतायां त्रिप्रकारायामव्याप्तावनुगता, स्वाभिमता, साध्याभावसंबन्धादिरूपा, अव्याप्तिरेकैव हेत्वाभासः विशेषणवैयर्थ्यादिदोषाभावादि २ त्येवाभिप्रायः। पद्धतावपि साध्यसंबन्धाभावे सति तदभावसंबन्धित्वादे-

तदभिप्रायोक्त्या निराह -- यत्विति।। तत्र हि पूर्वं स्वाभिमतदोषोक्तिप्रस्तावे हेतुविरोधो द्विविधः असिद्धिरव्याप्तिश्चेति, अव्याप्तिरपि त्रिविधा, लिङ्गस्य साध्येन तदभावेन च संबन्धः, साध्यसंबन्धाभावे सति तदभावेनैव सम्बन्धः, उभसम्बन्धाभावश्चेत्युक्त्वा परोक्तदोषप्रपञ्चनेनान्तर्भावोक्तिप्रस्तावे द्वितीयपरिच्छेदान्ते उक्तमित्यर्थः। तथाच तत्र साध्यतदभावसंबन्धवत्वादिरूपेण प्रत्येकहेत्वाभासत्वप्रतीतेस्तद्विरोध इति भावः। कुत एषोभिप्राय इत्यतो

ज्ञापकं विपक्षे बाधकं चाह -- पद्धतावपीति।। तथा चाव्याप्तिरेकैव दोष इति भावः।

१.प्तेन्त-रा. २.त्यव्यभिचाराय -ग.रा.

विरुस्याव्यावन्तर्वः) अनुमादोषवादः पु - ३२९.

रव्याप्तिं प्रति हेतुत्वस्यैवोक्तेः। अन्यथा हि भङ्ग्यन्तरेण परोक्तप्रक्रियैव स्वीकृता स्यात्।।
सुधायामनैकान्तिकत्वादित्यस्य हि सपक्षवृत्तित्वे सति
विपक्षवृत्तित्वादित्यर्थः। एवं विरुद्धत्वादित्यस्य सपक्षवृत्तित्वादित्यर्थः। न चात्र १ विशेषणव्यवच्छेद्यमस्तीत्युक्तत्वेन तद्विरोधश्च स्यात्। त्रिप्रकारायाम-

अन्यथेति।। पृथग्दोषत्वाभिप्राय इत्यर्थः। साध्याभावसंबन्धत्वेनैवानैकान्तिकत्वादेरेकदोषत्वमेव न पृथग्दोषत्वम्। अन्यथा परोक्तप्रक्रियाङ्गीकारापत्तिरित्ये २ कं बाधकमुक्त्वा बाधकान्तरं चाह -- सुधायामिति।। न चात्र विशेषणव्यवच्छेद्यमस्तीत्युक्त ३ भेदेन तद्विरोधश्च स्यादित्यन्वयः। अत्रेत्यनेन परामृश्यमानं दर्शयितुमुक्तं अनैकान्तिकत्वाद्विरुद्धत्वादिति। तयोर्यदि विपक्षवृत्तित्वमेवार्थस्तदा नचात्रेत्युत्तरवाक्यासाङ्गत्यमाशङ्क्य तयोरर्थोक्तिरित्यस्येत्यर्थ इति। युक्तिपादीयमसुधायां हि
अव्याप्तिरूपहेतुदोषोनैकान्तिकत्वदेरन्तर्भावतयाऽव्याप्तित्वेनैव दोषत्वं वक्तुपुपक्रम्य पृथग्दोषत्वं दूषणमुच्यते इदमसाधकं अनैकान्तिकत्वाद्विरुद्धत्वादिति त्वया वाच्यम्। न चात्र

विशेषणव्यवच्छेद्यमस्तीत्युच्यते पृथग्दोषत्वे तदुक्तिविरोधः। अन्योन्यस्य व्यवच्छेद्यत्वसम्भवादिति भावः।।
नन्वव्याप्तेरुक्तत्रिप्रकारानुगतमव्याप्तित्वरूपसामान्यं कुत उपेयम्। त्रिरूपैवास्त्वव्याप्तिरित्यत आह-- त्रिप्रकारेति।। साध्यतदभावसम्बन्धि-

१.त्रापि -ग.रा. २.त्यत्रैकं -ड. ३.क्तत्वेन त -ट.ड.

पु - ३३०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

व्याप्तावनुगतैकरूप्या १ भावे हेत्वाभासाधिक्यं च स्यात्। सत्वे चानुगतेन लघुना साक्षाद्व्याप्तिधी २ विरोधिधीविषयेण च तेनैवासाधकता साध्यताम्। किं वस्तुतः सताप्यनुगत्यादिरहितेनेतरेणांशेन।।
२ विरुद्धस्याव्याप्तावन्तर्भावः ।। ३३ ।।

त्वादित्रिप्रकारेत्यर्थः। अनुगतैकरूपस्येति।। साध्याभावसम्बन्धित्वरूपस्य वान्यथोपपत्तिरूपस्य वा प्रागुक्तस्येत्यर्थः। अत एव पूर्वं स्वाभिमतदोषोक्तिप्रस्तावे
व्याप्तिविरहोऽव्याप्तिरिति व्याप्तिविरहत्वमनुगतैकरूपमुक्तम्। आधिक्यमिति।। हेतुविरोधो द्विविधः असिद्धिरव्याप्तिरिति प्रमाणलक्षणादौ यद्वैविध्यं हेतुदोषस्योक्तम्। तन्न स्यात्। किंतु चातुर्विध्यरूपाधिक्यं च स्यादित्यर्थः। सत्वे ४ चेति।। अनुगतैकरूपस्येत्यनुकर्षः। प्रागुक्तसाध्याभावसम्बन्धवत्वादिरूपस्येति भावः। इतरेण साध्यसम्बन्धाभावादिनेत्यर्थः।। ३४ ।।
विरुद्धस्याऽव्याप्तावान्तर्भावः ।। ३४ ।।

१.स्यासत्वे -क.ट.रा. २.विरोधपदं न -क.रा. ३.मण्युक्तहेत्वाभाससङ्करभङ्गः इत्यस्तु -क.

१-७-२००१.
पते-वास्य-व्यचार-संरः) अनुमादोषवादः पु - ३३१.

अथ परमते बाधस्य व्यभिचारसङ्करः ।। ३४ ।।
यच्चोक्तं मणौ -- बाधस्यादोषत्वे वस्तुतो माहानसीयः प्रसिद्धौ वह्निः पर्वते वह्नित्वेन सिध्येत्। पर्वते वह्निजातीयस्य सत्वेन व्यभिचाराभावात्। पर्वते महानसीयो वह्निर्नास्तीति प्रत्यक्षबाधात्तु न सिध्यतीति बाधस्य व्यभिचारासङ्कर इति। तन्न। वर्वते महानसीयो वह्निर्ना-

अथ परमते बाधस्य व्यभिचारसङ्करः ।। ३५ ।।
स्वमते बाधस्य व्यभिचारासाङ्कर्यं १ तद्रीत्यनुसरणे तत्साङ्कर्यमेव प्राप्नोति। तथा च बाधस्य पृथग्दोषत्वहानेः २ पञ्चेति हेत्वाभासविभागभङ्ग इति भावेनाह -- यच्चेति।।
ननु पर्वतीयधूमस्य महानसीयवह्न्यभावसामानाधिकरण्येन व्यभाचिरान्न तेन महानसीयवह्निः सिध्यतीत्यत आह -- पर्वत इति।।
व्यापकतावच्छेदकतावच्छिन्नव्यापकाभावसामानाधिकरण्यस्यैव
व्यभिचारत्वाद्वह्नित्वस्य व्यापकतावच्छेदकत्वेन तदवच्छेदेन ३ अत्र तस्य सत्वादित्यर्थः। तर्हि कुतो न सिध्यतीत्यत आह -- पर्वत इति।।
त्वदुक्तप्रत्यक्षस्य पर्वतीयवह्न्यनुमितिं प्रति ४ बाधकत्वमेव नास्ति। कथं तस्य बाधत्वेन पार्थक्यमिति भावेन निराह -- तन्नेत्यादिना।।

१. त्यननु -ट.ठ. २.नेन प-ट.ड. ३.तत्रेति न -ठ.ड. ४.प्रति प्रतिबन्धकत्व -ठ.ड.

पु - ३३२. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

स्तीति प्रत्यक्षस्य पर्वते वह्निरस्तीति प्रत्यक्षशाब्दबोधौ प्रतीव पर्वते वह्निरित्यनुमितिं प्रत्यपि भिन्नविषयकत्वेनाबाधकत्वात् । यथा हीन्द्रियं स्वसन्निकृष्टविषयकज्ञानजननस्वभावम्। तथा लिङ्गमपि स्वसमानाधिकरण १ लिङ्गिविषयकज्ञानजननस्वभावम्। समानाधिकरणयोर्लिङ्गलिङ्गिनो २ र्हि
व्याप्तिः।।

एवं तर्हि महानसीयवह्निविषयानुमितिः कुतो न जायते पर्वतीयवह्निविषयैव कुतो जायत इत्यतो न त्वदुक्तबाधदोषबलात् किं तु लिङ्गस्य व्याप्तिप्रकारमपेक्ष्य लिङ्गिज्ञानजनकत्वं स्वभाव इति स्वभावबलादेवेति भावेन दृष्टान्तपूर्वमाह -- यथा हीति।।
यद्वा भिन्नविषय ३ कत्वेनेत्युक्तम् । तदसिद्धम्। बाधस्यादोषत्वे समानविषययत्वस्यैव प्रत्यक्षानुमित्योर्बाधकबाध्यत्वाभिमतयोः स्यादित्यतः स्वभावकृतमेव भिन्नविषयत्वमित्याह -- यथा हीति।। तथा च सामग्र्यभावादेव महानसीयवह्न्यसिद्ध्युपपत्तौ किं बाधवशेन तदसिद्धिकल्पनया। अत एव पद्धतौ 'पर्वते धूमं दृष्टान्तोऽपि कथमन्यत्रा ४ नुमित्यनुद्भवः। व्याप्तिप्रकारमपेक्ष्य लिङ्गस्य लिङ्गिज्ञानजनकत्वनियमात्। तथा हि-- कयोश्चित्समानदेशत्वेऽपि भिन्नकालीनयोः व्याप्तिः। यथा धूमस्याग्निने'त्याद्युक्तम्। ५ तत्रान्यत्रानुद्भव इत्युपलक्षणम्। कथमन्यदीयाग्निप्रमानुद्भव इत्यपि ध्येयमिति भावः।।

१.रणजननस्वभा-ग.रा. २.नोर्व्या-क.ग.ट. ३.यत्वेन-ट.ड. ४.त्रानुद्भव-ट.ड. त्राग्निप्रमानुद्भ-ठ. ५.पद्धतौ कथमन्यत्राग्निप्रमानुद्भवः -ठ. पद्धतौ तत्रान्यत्राग्निमा -ड.

पते-बास्य-व्यचार-संरः) अनुमादोषवादः पु - ३३३.

अस्तु वा प्रत्यक्षानुमित्योः समानविषयकत्वं तथाऽपि न तन्मात्रं बाधत्वे तन्त्रम्। किंतु समानप्रकारकत्वमपि । घटवत्येव गेहे घटो नास्तीति भ्राम्यतोऽपि गेहे प्रमेयमस्तीति प्रमया तत्र सतो घटस्यापि प्रमेयत्वेन ग्रहणदर्शनात्। पर्वतेतरवृत्तिर्वह्निः पर्वते नास्तीति प्रमावतोऽपि पर्वतो वह्निमानिति भ्रान्तिरूपानुमितिदर्शनाच्च।

ननु
प्रतियोग्यसमानाधिकरणयत्समानाधिकरणेत्यादिमण्युक्तसामान्यव्याप्तिलक्षणापक्षे
व्यधिकरणधूमवह्न्योरपि व्याप्ति १ रस्त्येवेति पर्वतीयधूमो महानसीयवह्निज्ञानजननस्वभाव एवेति भिन्नविषयत्वस्वभावो नेति चेन्न। तस्य लक्षणस्य निरस्तत्वात्। अत एव समानाधिकरणलिङ्गेत्युक्तम्। तुष्यतु दुर्जन इत्यभ्युपेत्यापि बाध्यबाधकभावो न युक्त इत्याह -- अस्तु वेति।। महानसीयवह्निः पर्वते नास्तीति प्रत्यक्षस्य पर्वतो वह्निमानित्यनुमिते २ रित्यर्थः। कुत इत्यर्थः समानविषयत्वं ज्ञानस्य भ्रमरूपज्ञानस्य वा प्रमारूपज्ञानस्य वा ज्ञानान्तरबाधकत्वे तन्त्रम्। आद्ये दोषमाह-- घटवतीति।। अन्त्य आह -- पर्वतेति।। यद्वा समानविषयकत्वं ज्ञानस्य किं तादृशप्रमाबाधने तन्त्रम्। उत भ्रान्तिबाधने। आद्य आह -- घटवतीति।। अन्त्य आह -- पर्वतेति।। अत्यन्तासदेव

भ्रान्तासदेव भ्रान्तावरोप्यत इति सिद्धान्ते समानविषयक ३ त्याभावेऽपि मणिकृन्मते तदस्तीत्याह --

१.रस्तीति -ड. २.श्चेत्यर्थः- ट.ठ.ड. ३.यत्वा -ठ.ड.

पु - ३३४. न्यायदीपयुततर्कताण्डम् (तृ.परिच्छेदः

देशान्तरे सन्नेव भ्रान्तिविषय इति त्वन्मते पर्वतेतरवृत्तिवह्नेरेव भ्रान्तिरूपानुमितौ पर्वतवृत्तिवह्नित्वेन भानात्।।
किं १ चास्ति बाधोऽत्र २ चेद्व्यभिचारोऽप्यस्त्येव। बाधितसाध्यके हेतुवृत्तेरेव व्यभिचारत्वात्।।
अपिच ३ यदि बाधादेव महानसीयवह्नेरसिद्धिः। तर्हि बाधानवतारदशायां स सिध्येत्।।

देशान्तरे इति।। समानप्रकारकत्वाभावान्न त्वदुक्तप्रत्यक्षस्य बाधकतेत्युक्तम्। क्लृप्तव्यभिचाररूपदोषादेव महानसीयवह्न्यसिद्ध्युपपत्तौ न तदर्थं बाधस्य दोषतेत्याह -- किञ्चेति।।
यद्यन्यनिष्ठलिङ्गस्य स्वसमानाधिकरणसाध्यविषयानुमितिजनने इवान्यनिष्ठसाध्यगोचरानुमितिजननेऽपि शक्तिमुपेत्य बाधरूपदोषादेव तदभावं मन्यसे तदा दोषान्तरं चाह -- अपि चेति।। स इति।। महानसीयवह्निः।

सामग्री ४ सद्भावात्प्रतिबन्धाभावात्। अन्यथा पर्वतीयचवह्निसिद्धिरपि न स्यात्। सामग्र्याः प्रतिबन्धाभावस्य चोभयत्र तुल्यत्वात्। तस्मात्तदंशे व्यधिकरणधूमादेः शक्तिरेव नेति भिन्नविषयत्वेन प्रागुक्तप्रत्यक्षानुमित्योः न

बाध्यबाधकाभाव इत्येव युक्तः पन्था इति भावः। पराभिमतं बाधस्यासङ्कीर्णमुदाहरणान्तरमप्यनूद्य निराह--

१.चात्र -क.ग.ट.रा. २.धोऽस्ति-क.ग.ट.रा. ३.यत् इत्यधिकम्-क.ग.ट.रा. ४. ग्रीप्रतिबन्धाभा -ट.ठ.ड.

पते-बास्य-व्यचार-संरः) अनुमादोषवादः पु - ३३५.

एतेनेति ।। निरस्तमित्यन्वयः। गन्धः सिध्येदिति।। लिङ्गमपि ३ स्वसमानाधिकरणलिङ्गविषयकज्ञानजननस्वभावमित्यादिप्रागुक्तसाग्र्याः सत्वादिति भावः।।
ननु सामग्रीसत्वेऽपि व्यभिचाररूपक्लृप्तदोषादेव तत्र गन्धासिद्धिरित्यत आह -- गन्धेति।। साध्यप्रागभाववद्गामित्वं न व्यभिचारः। किं तूक्तरूप एव। स च तत्र नास्ति। प्रागभावेन विरोधात्। अग्रे गन्धानुदयापाताच्चेति भावः। कथं तर्हि तत्र बाध इत्यत आह -- प्रागभावेति।। साध्यसंसर्गाभावप्रमाया एव
बाधशब्दार्थत्वादिति भावः। अस्तीतीति।। इति ४ इति च दोषद्वयस्येत्यन्वयः। बाधितसाध्यके हेतुवृत्तेरेव व्यभिचारात्वात्। तथा समानाधिकरणसाध्यगोचरप्रमाजननस्वभावत्वाच्च। बाधस्य चानवतारादिति भावः। कथं तर्हि तत्र गन्धसिद्ध्यभावः। बाधस्य च त्वया तत्र दोषत्वानङ्गीकारादिति चेत् गन्धप्रागभाववति गन्धापादकसामग्र्या अभावा-

१.अपि पदं न-क.ग.ट.रा. २.अपिपदं न -क.ग.ट.रा. ३.पि समा -ठ.ड. ४.एकं इति पदं न -ट.ठ.

किं च प्रागभाववति काले गन्धापादनं न ताव १ त्सिषाधयिषामात्रेण। शब्दस्य तात्पर्यारतन्त्र्यवदनुमानस्य सिषाधयिषापारतन्त्र्याभावात्।।
नापि गन्धप्रागभावावच्छिन्नत्वस्य पक्षतावच्छेदकत्वमात्रेण तदापादानम्। पक्षतावच्छेदकस्य हि यत्र पृथिवीत्वं तत्र गन्ध इति दैशिकव्याप्तिबलेन साध्यस्य समानदेशत्वाक्षेप एव सामर्थ्यम्। न तु स्वसमानकालीनत्वापेक्षेऽपि।।
नापि यदा पृथिवीत्वं तदा गन्ध इति व्याप्तिबलात्तत्तापादनम्। गन्धप्रागभावध्वंसदशायां पृथिवीत्वस्य सत्वेऽपि गन्धाभावात्।।
ननु -- तथापि हेतुः स्वावच्छिन्नदेशकालीनसाध्यतावच्छेदस्वभावः। न हि धूमेन वह्निः सिध्यन्नर्वाग्भागे काले २ च सिध्यति।

देवेति भावेन का तत्र तव सामग्री अभिमता। गन्धप्रागभावकालेऽपि गन्धसाधनेच्छामात्रं वा गन्धप्रागभावस्य पक्षतावच्छेदकमात्रं वा यदा पृथिवीत्वं तदा गन्ध इति व्याप्तिर्वा स्वावच्छिन्नदेशकालीनसाध्यबोधकस्वभावो वा यदा पृथिवीत्वं तदा गन्धप्रागभावकालीनगन्धवानिति व्याप्तिर्वा। आद्यं तावन्निराह -- न तावदित्यादिना।। व्याप्तिपक्षधर्मतामात्रपारतन्त्र्यादिति भावः। द्वितीयं निराह -- नापीति।। स्वसमानदेशत्वाक्षेप एवेति।। स तु प्रकृते न बाधित इति भावः। तृतीयं निराह -- ३ नापि यदेति।। चतुर्थमाशङ्कते -- नन्विति।।

१.तथेत्यधिकम् -क.ग.ट.रा. २.कालान्तरे च -क.ग.ट.रा. ३.नापीति नास्ति -ट.ठ.ड.

पते-वास्य-व्यचार,सङ्करः) अनुमादोषवादः पु - ३३७.

तथा च पृथिवीत्वमपि स्वावच्छिन्ने गन्धप्रागभावकाले गन्धं बोधयेदेव। बाधात्तु न बोधयतीति चेन्न। यत्र यदा यदवच्छेदेन धूमस्तत्र तदा तदवच्छेदेन वह्निरिति व्याप्तिरेव हि तत्रास्ति। प्रकृते तु १ यत्र यदा यदवच्छेदेन पृथिवीत्वं तत्र २ तदा तदवच्छेदेन गन्ध इति व्याप्तिर्नास्तीत्युक्तम्।।
अथ ३ प्रागभावावच्छिन्नत्वं न पक्षविशेषणम्। किं तु घटः गन्धप्रगभावकालीनगन्धवानिति साध्यविशेषणमिति चेन्न। यदा पृथिवीत्वं तदा
गन्धप्रागभावसमानकालीनगन्ध इति व्याप्तेरभावात्।।
एतेन धूमानुमाने दैवानुपनीतकाञ्चनपयत्वस्य वह्निविशेषणत्वेन भानेऽनुमितेरप्रमात्वा ४ दप्रमात्वस्य च दोषाधीनत्वादन्यस्य च दोषस्याभावाद्बाध एव -

उक्तमिति।। गन्धप्रागभावध्वंसदशायामिति पूर्वग्रन्थेनेति भावः। पञ्चममपि निरसितुमशङ्कते -- अथेति।। व्याप्तेरभावादिति।। यदा पृथिवीत्वं तदा घटीयगन्धप्रागभावसमानकालीनो गन्धः घटीय इति व्याप्तेः सत्वेऽपि समानाधिकरणतादृशगन्धेन व्याप्तेरभिमतत्वात्। तस्याश्चाभावात्। अन्यथा छलवादापातादिति भावः। अन्यदपि
पराभिमतसङ्कीर्णोदाहरणमनूद्य निराह -- एतेनेति।। दोषाधीनत्वादिति।।

१.यत्र इति न- क.ग.ट.रा. २.तत्र इति न- क.ग.ट.रा. ३.गन्ध इत्यधिकम् -ट. ४.त्वात्तदप्र - रा.

पु - ३३८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

दोषो वक्तव्य इति निरस्तम्। बोधोऽस्ति चेद्व्यभिचारोऽप्यस्तीत्यादिना दोषद्वयस्योक्तत्वात्।।

किं च व्याप्तिपक्षधर्मताज्ञानाविषयस्याप्युपनीतस्यानुमितौ भाने यथार्थानुमितिः, जयपराजयादिव्यवस्था, अनुमितौ व्याप्तिज्ञानापेक्षा चोच्छिद्येत। न च वह्न्युपनयार्थमेव व्याप्तिज्ञानापेक्षा। १ प्रायिकसहचारदर्शनमात्रेणाप्युपनयसिद्धेः।।

नन्वथापि लिङ्गपरामर्शनिष्पत्त्यनन्तरं प्रत्यक्षादिबाधेनानुमितेरप्रमात्वं दृश्यते। तत्र च दोषान्तराभावाद्बाध एव दोष इति चेन्न।

अप्रामाण्यस्य परतस्त्वादिति भावः। अन्यस्य वाभावादित्यसिद्धमिति भावेनाह -- बाधोऽस्ति चेदिति।। बाधितसाध्यके हेतुरित्येव व्यभिचारत्वादित्यादिनोक्तत्वादित्यर्थः।।

ननु सत्यपि तत्र व्यभिचारे तदप्रतिसन्धानदशायां काञ्चनमयो न भवति वह्निरिति बाधप्रतिसन्धानेऽपि तादृशानुमितेरप्रमात्वावगमात्सोऽपि पृथग्दोष एवेति चेद्भासकसामग्र्यभावेन तथाऽनुमितिरेतवायुक्तेत्येतद्विपक्षे बाधमुखेनाह -- किंचेति।। ज्ञानविषयस्यापि तादृशज्ञानबलालभ्यस्यापीत्यर्थः। यथार्थेति।। सर्वत्राप्यनुमितौ यत्किंचिदविद्यमानस्य साध्यविशेषणस्य भानसंभवादिति भावः। जयेति।। सर्वत्रानुमितावयाथार्थप्राप्तावयमनुमानप्रयोक्ता सदनुमानवादीति जयी, अयं चासदनुमानप्रयोक्तृत्वादपजयीति न स्यादित्यर्थः। अनन्यगत्या बाधस्य दोषत्वं वाच्यमिति शङ्कते -- नन्विति।।

१. प्रापक - ग.ट.

निष्पन्नेप्यर्थनिश्चये तदप्रामाण्यनिश्चयेन पुनरप्यर्थनिश्चयविघटनवन्निष्पन्नेऽपि परामर्शे बाधेन पुनरपि परामर्शविघटनस्यावश्यकत्वेनासिद्धि व्यभिचारयोनन्यतरस्य सत्वात्।। ननु तथाऽपि व्यभिचारशरीरप्रविष्टसाध्याभावनिश्चयः स्वप्रमात्वनिश्चयाधीन इत्युपजीव्यः। प्रमात्वनिश्चरूपो बाधः पृथगीति चेन्न। साध्याभावरूपार्थसत्वघटितप्रामाण्यनिश्चयस्य अर्थसत्व १ नि-

दोषान्तरासत्वोपपादनायोक्तं परामर्शनिष्पत्त्यनन्तरमिति। तदनिष्पत्तावसिद्ध्यादिरेव दोषस्तत्र भविष्यतीति भावः। दोषान्तरसत्वान्न बाधस्य त्तर दोषत्वं कल्प्यमिति १ परिहरति-- निष्पन्नेऽपीति।। बाधेन साध्याभावप्रमारूपबाधेनेत्यर्थः। परामर्शेति।। साध्यव्याप्यहेतुमानयमिति परामर्शेत्यर्थः। असिद्धिव्यभिचारयोरिति २ ।। व्याप्तस्य पक्षधर्मताप्रतीतिः सिद्धिः। तदभावोऽसिद्धिरित्युक्तेः। बाधितसाध्यके त्ववृत्तिरूपत्वाव्यभिचारस्येति भावः। पराभिमतं प्रकारान्तरेण बाधस्य दोषत्वमाशङ्कते -- नन्विति।। तथापीति।। दोषान्तरसाङ्कर्येपीत्यर्थः। प्रमात्वेति।। साध्याभावज्ञानस्य प्रमात्वनिश्चयरूप इत्यर्थः। साध्याभावरूपार्थनिश्चयं प्रति तत्प्रमात्वनिश्चस्य नोपजीव्यता। येन साध्याभावनिश्चयद्वारा निश्चितसाध्याभाववद्वृत्तित्वरूपव्यभिचारेप्युपजीव्यता स्यात्। किं तु अर्थनिश्चय्यैव स्वप्रमात्वनिश्चये उपजीव्यतेति वैपरीत्यमेवेति निराह -- साध्याभावेति।। अर्थनिश्चकत्वस्य प्रमात्वनिश्च-

१.भावेनेत्यधिकम् -ट.ठ.ड. २.इदंप्रतीकग्रहणं नास्ति -ट.ठ.ड.

श्चयाधीनत्वेनार्थनिश्चयस्यैवोपजीव्यत्वात्।
त्वन्मतेऽप्रामाण्यशङ्कारहितज्ञानस्यैवार्थनिश्चयकत्वेनापसिद्धान्ताच्च।
परतः पक्षे अनवस्थानाच्चः।।
तस्मात्परमते बाधस्य व्यभिचारासङ्करे न युक्तः। अस्मन्मते तु बाधस्य प्रतिज्ञादोषत्वेन व्यभिचार १ शङ्कैव नास्तीति प्रागेवोक्तम्। व्याप्यत्वासिद्धेर्व्यभिचारासङ्कीर्णमुदाहरणं
नीलधूमादित्यादिकमितित्वीश्वरवादे निरस्तम्। आश्रयासिद्धेः स्वर्णमयोद्रिरग्निमानित्यादिकमुदाहरण २ मप्याश्रयासिद्धेरदोषत्वप्रस्तावे निरस्तम्।।
परमते बाधस्य व्यभिचारसङ्करः ।। ३४ ।।

यायत्तत्वे दोषान्तरमाह -- त्वन्मत इति।। अर्थनिश्चयस्य प्रामाण्यनिश्चयायत्तत्व इत्यत्र दोषान्तरमाह -- परत इति।। साध्याभावरूपार्थनिश्चयस्तत्प्रामाण्यनिश्चयाधीनः प्रामाण्यनिश्चयस्य प्रामाण्यग्राहकस्य प्रामाण्यनिश्चयाधीन इत्येवं रूपेणानवस्थेति भावः।।
परमते बाधस्य व्यभिचारसङ्करः ।। ३५ ।।

१. सङ्करेत्यधिकम् -क.ग.रा. २.णमित्यस्य-ग.रा.

उनोक्त-हेसासं-रङ्गः) अनुमादोषवादः पु - ३४१.

उदयनोक्तहेत्वाभासासङ्करभङ्गः।। ३५ ।।
उदयनेन तु निबन्धे सव्यभिचारस्य कोटिद्वयोपस्थापकतया साध्यतदभावसंशयः फलम्, विरुद्धे साध्याभावासिद्धिः, बाधे तु पक्षधर्महेतौ व्याप्तिबाधः, सत्प्रतिपक्षत्वे किमत्र तत्वमिति जिज्ञासा,

असिद्धे तच्चतुष्टयान्याल्लिङ्गत्वज्ञानमिति फलमुख १ लक्षणमुक्तम्। तदपिन । इदं हि लक्षणं किं स्वरूपसिदत्येतावन्मात्रेणोच्यते असाधकतालिङ्गत्वेन वा । नाद्यः। तस्य हेत्वाभासविभागो २ पाधित्वं -

उदयनोक्तहेत्वाभासासङ्करभङ्गः ।। ३६ ।।

मण्याद्युक्तरीत्या पञ्चानां हेत्वाभासानामसाङ्कर्यं नेत्युपपाद्योदयनमतेऽप्यापाततोसाङ्कर्यप्रतीतावपि तदयुक्तमिति भावेन तदुक्तमनूद्य निराह -- उदयनेन त्विति।। विबन्धे निबन्धाख्यग्रन्थे ।। कोटिद्वयेति।। साधारणानैकान्तिकस्य साध्यतदभावाभ्यां सहचारे असाधारणानुपसंहारिणोरुभाभ्यां सहचाराभावेनेति ध्येयम्। प्राचां मतेऽसाधारणानुपसंहारिणोरनध्यवसितप्रभेदत्वेन पृथगुक्तेः साधारणानैकान्तिक एव सव्यभिचारशब्देन ग्राह्यः। किमत्रेति।। ३ द्वयमध्ये किं तत्वं निर्दोषत्वमित्यर्थः। तच्चतुष्टयेति।। सव्यभिचारादिचतुष्टयान्यत्वे सत्य-

१.खंल-क.रा. २.सोपा -ट. ३.यदद्वय-ट.ठ.ड.

नास्तीत्युक्तत्वात्। द्वितीये हि १ सव्यभिचारे इदमसाधकं संशयजनक्तवादिति, विरुद्धे साध्याभाव २ साधकत्वादिति, बाधे तु बाधितव्याप्तिकत्वादिति, सत्प्रतिपक्षे ३ तु जिज्ञासाजनकत्वादिति, असिद्धे चतुष्टयान्यालिङ्गत्वज्ञानजनकत्वादिति, प्रयोक्तव्यमअ। तत्र च संशयजनकत्ं साध्याभावबुद्धिजनकत्वं च किं फलोपाधानं विवक्षितं योग्यता वा। नाद्यः। ४ असाधारणत्वादिग्रहकाले कुतोऽपि

निमित्तात्संशयसाध्याभावबुद्ध्योरनुत्पत्तौ उत्पत्तदव्यप्रमितौ चासाधकताहेतोरसिद्धिः ५। बाधप्रतिरोधयोस्तु
प्रत्यक्षादाविवानुमितावपि साक्षाद्विषयापहारिणोः पुनः परावृत्या ६ द्रविडमण्डकन्याये
करणसामर्थ्यविघटकहेत्वाभासान्तरसंपादनेनाव्याप्तिजिज्ञासाजननाभ्यामसाधकतानुमापकत्वकल्पनमत्यन्तायुक्तम्।।

लिङ्गत्वज्ञानमित्यर्थः। उक्तत्वादिति।। यद्रूपेण हि ज्ञानमनुमितिप्रतिब्धकमित्यादिना पञ्चहेत्वाभास ७ तेत्येत्खण्डनप्रस्तावे उक्तत्वादित्यर्थः। असिद्धेरिति।। आद्ये लिङ्गस्वरूपस्यैवाभावात्। द्वितीये लिङ्गसत्वेऽपि तत्प्रमित्यभावेन ८ प्रमित्यसिद्धेरत्यर्थः। द्रविडमण्डकेति।। विवृत ९ स्त्वयं न्या उदयनोक्तवक्त्रभिप्रायविध्यर्थभङ्गे। अत्यन्तायुक्तमिति।।

१.येस -क.ग.रा. २.वबोध-का.ग.ट.रा. ३.तु इति न-क.ग.रा. ४.साधार -क.ग.रा. ५.द्धेः -क.ग.रा. ६.त्यद्र-ट.रा. ७.सा इ-ठ.ड. ८.तत्प्रमि-ट.ठ.ड. ९.तश्चायं -ट.ड.

उनोक्त-हेसासं-रङ्गः) अनुमादोषवादः पु - ३४३.

किंच सत्पतिपक्षे जिज्ञासाजनकस्येष्टसाधनत्वज्ञानस्याभावेन वा, अत्यन्ताभीष्टविषयकप्रबलजिज्ञासान्तरप्रतिबन्धेन वा, किं तत्वमिति जिज्ञसाया अनुत्पत्तौ असाधकत्वहेतोरसिद्धिः स्यात्। असिद्धेप्येतच्चतुष्टयान्यालिङ्गत्वं नसाधकतासाधकम्। तदज्ञानेऽपि स्वरूपासिद्ध्या १ दावेकैकज्ञानेनासाधकताऽनुमितिदर्शनात्। नान्त्यः। योग्यताया विपक्षवृत्तित्साध्याभावव्याप्यत्वादिरूपत्वात्। तस्य

चाव्याप्तावान्तर्भावस्योक्तत्वात्। बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वस्यैव निरासाच्च।।
उदयनोक्तहेत्वाभासासङ्करभङ्गः ।। ३५ ।।

हेतुदोष २ त्वमेवायुक्तं एवंरूपेण कल्पनं त्वत्यन्तायुक्तमित्यर्थः। तथा च द्वयोः प्रतिज्ञार्थप्रमाणविरुद्धत्वेनैकस् रूपेण प्रागुक्तदिशा प्रतिज्ञादोषत्वमेवेति भावः। अस्मिन् पक्षेऽसाधकताऽनुमानानुत्थानं प्रतिपक्षे स्यादिति दोषान्तरं चाह -- किं
चेति।। इष्टेति।। जिज्ञासा हि ज्ञानेच्छा फलादन्यत्रेच्छा चेष्टसाधनत्वज्ञाने सति भवति। किमनयोस्तत्वमिति ज्ञानस्येष्टसाधनत्वज्ञानं तज्जनकमिति जिज्ञासाजनकस्येष्टसाधकत्वज्ञानस्येत्युक्तम्। असिद्धिः स्यादिति।। जिज्ञासाजनन ३ रूपफलस्य तदानीमभावेन किं तत्वमिति जिज्ञासाजनकत्वादिति हेतोरभावादिति भावः। योग्यता वेति पक्षं निराह -- नान्त्य इति।। हेत्वाभास-

१.द्ध्यैकैक -क.ग.ट. २.षमेवा-ट.ठ.ड. ३.जननस्वरूपयोग्यत्वहेतुरभिमत इति युक्तम्. तस्योत्तीर्णतादशायामपि भावादिति भावः इत्यस्ति - ठ.ड.

पु - ३४४. न्यायदीपयुततर्कताण्जवम् (तृ.परिच्चेदः

मणिकण्ठोक्तहेत्वाभासासङ्करभङ्गः ।। ३६ ।।
एतेन यदुक्तं मणिकण्ठे-- सूत्रोक्तरीत्या हेत्वाभासाः पञ्चैव। अनुपसंहारी तु व्याप्यत्वासिद्धावन्तर्भूतः । तत्र यद्यपि विरुद्ध १ द्वये च व्याप्तिप्रमाव्यतिरेकोऽस्ति। तथाप्यनैकान्तिकयोः
संशयकारणसाधारणासाधारणधर्मज्ञाननिबन्धनः प्रमाव्यतिरेकः। विरुद्धे तु साध्यासमानाधिकरणधर्मग्रहनिबन्धनः।

त्वस्येति।। हेतुदोषत्वस्येत्यर्थः। कुतोन्तर्भावबहिर्भावचिन्तत्येवाकारार्थः २ ।।
उदयनोक्तहेत्वाभासासङ्कर ३ भङ्गः ।। ३६ ।।

मणिकण्ठोक्तहेत्वाभासासङ्करभङ्ग।। ३७ ।।
हेत्वाभासपञ्चकस्यान्योन्यासाङ्कर्यं मणि ४ कण्ठोक्तमनूद्य निराह -- एतेनेति।। सूत्रेति।। सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासा इति गोतमसूत्रोक्तेरित्यर्थः। पञ्चत्वाक्षेपसमाधी मणिकण्ठोक्तावेवानुवदति -- तत्र यद्यपीति।। पञ्चसु मध्य इत्यर्थः। अनैकान्तिकद्वये चेति।। साधारणरूपे इत्यर्थः। साधारणासाधारणेति।। साधारणधर्मासाधारणधर्मविप्रतिपत्तिभेदेन त्रीणि संशयकारणानि। तत्र साधारणानैकान्तिकेसाधारणधर्मज्ञाननिमित्तको व्यतिरेकः,

१.द्धे अनैकान्तिकद्वये -क.ग.ट. २.रः -ट.ठ.ड. ३.सासाङ्कर्य-ट.ठ.ड. ४.कर्णोक्त -ट.

मकक्त-हेभासासं-ङ्गः) अनुमादोषवादः पु - ३४५.

तत्रोपजीव्यत्वात्तेषामेवोद्भावनम्। न तु प्रमाव्यतिरेकस्यासिद्धस्येति तदपि निरस्तम्। साधारणादेर्धर्मस्य हि साधारणत्वादिज्ञानं संशयहेतुः। साधारणत्वं च सपक्षविपक्षवृत्तित्वम्। तत्र च विपक्षवृत्तित्वमेवाव्याप्तिरिति सैवोद्भाव्या। न तु १ सपक्षवृत्तित्वमपि। वैयर्थ्यादित्युक्तं साधारणप्रस्तावे।।

एवमसाधारणत्वमपि सपक्षविपक्षव्यावृत्तत्वम्। तत्र च वृत्तिमतः सपक्षव्यावृत्तव्वं सन्दिग्धाव्याप्तिरिति सैवोद्भाव्या। न तु विपक्षव्यावृत्तत्वमपि। वैयर्थ्यादित्युक्तमसाधारण २ प्रस्तावे।।
एवं साध्यासामानाधिकरण्यमपि यत्र हेतुस्तत्र साध्यमिति सामानाधिकरण्याभावः। स च हेतुमति साध्याभावात्मकत्वादव्याप्तिरेवेत्युक्तमनुपसंहारिप्रस्तावे।।

असाधारणधर्मज्ञाननिबन्धनोऽसाधारणानैकान्तिके व्याप्तिप्रमाव्यतिरेक इति तयोर्भेदः। तेषामेवेति।। साधारणा ३ साधारणधर्मसाध्यसमानाधिकरणधर्माणामेवेत्यर्थः।।
साधारणत्वादिज्ञानमिति।। अन्यथा पर्वतोऽग्निमान् ४ पक्षत्वादित्यादौ प्रमेयत्वेनेव वृक्षत्वरूपेण वा जातेऽपि ज्ञाने साध्यसंशयापत्तेरिति भावः। साधारणेति।। साधारणस्याव्याप्त्यन्तर्भाप्रस्ताव इत्यर्थः।।

१.तुप -क. २.सपक्षविपक्षेत्यारभ्य एतावान् ग्रन्थः नास्ति-ग.रा. ३.णधर्मसा -ट.ठ. ४.वृक्षवत्वादि -ट.ड.

किं चैवं सति व्याप्तस्य पक्षधर्मत्वाप्रमितिरूपासिद्धिरप्याश्रयहेतुस्वरूपतद्विशेषणासत्वज्ञाननिबन्धनेत्याश्रयासत्वादीनामपि हेत्वाभासान्तरत्वं स्यात्।।
ननुचाभावज्ञानाद्भाप्रमाव्यतिरेकः सर्वत्रनैतावतासाधारण १ त्वं सिध्यति २ यच्चेह निरूप्यत इति चेन्न। व्यभिचारस्यापि व्याप्त्यभावरूपत्वेनाभावज्ञानाद्भावरूपव्याप्तिप्रमाविरह इति साम्यात्।।

एवमग्रेऽपि। उपजीव्यत्वात्तेषामेवोद्भावनमित्यत्रातिप्रसङ्गान्तरं चाह -- किं चेति।। विरुद्धेऽनैकान्तिकद्वये च
प्रमाव्यतिरेकाविशेष्यवान्तरभेदाद्भोक्तौ योऽतिप्रसङ्ग उक्तः तदुद्धारमाशङ्क्य साम्येन निराह -- नन्वित्यादिना।। सर्वत्रेति।। आश्रयासत्वेस्वरूपासत्वहेतुविशेषणासत्वादिज्ञाननिबन्धनासिद्धिषु
सर्वास्वप्याश्रयाद्यभावज्ञानाव्याप्तिपक्षधर्मतारूपभाप्रमाविरह इत्यर्थः।। एतावतेति।। भावप्रमाव्यतिरेकनिमित्तत्वमात्रे ३ च भावि ४ प्रमाव्यतिरेकं प्रत्यसाधारणकारणत्वमाश्रयाभावज्ञानानामस्तीत्यर्थः। तावता हेत्वाभासाधिक्यं कुतो नेत्यत आह -- तच्चेति।। भावप्रमाव्यतिरेकं प्रति यदसाधारणं कारणं तदेवेह हेत्वाभासप्रकरणे विभज्यमानत्वेन निरूप्यत इत्यर्थः। इति साम्यादिति।। तथा च
साध्याभावव्याप्तरूपविरुद्धस्यानैकान्तिकद्वयस्य
चाव्याप्तित्वेनैकदूषणत्वमेव न तु त्वदुक्तप्रकारेणानेकहेत्वाभासत्वमिति भावः।।

१.णत्वं -ग. २.तच्चेह -क.ग.रा. ३.त्रेण-ट.ठ.ड. ४.भावप्र-ट.ठ.ड.

किं च प्रतिरोधस्यापि सर्वकार्यसाधारणदोषत्वाद्धेत्वाभासत्वं न स्यात्।।
यदि च सत्प्रतिक्षस्य द्वेधा १ प्रतिबन्धकतासाधारण्यसाधारणी च तत्रासाधारणमनुमितिप्रतिबन्धकत्वमादाय हेत्वाभासत्वं तर्ह्यभावज्ञानस्यापि भावप्रमाप्रतिबन्धकत्वं द्वेधेति समम्।।
मणिकण्ठोक्तहेत्वाभासासङ्करभङ्गः।। ३६ ।।

नन्वभावज्ञानस्य भावप्रमाव्यतिरेकहेतुत्वे हेत्वाभासत्वरूपासाधारणदोषत्वं व्याप्त्यभावज्ञानस्य न स्यादित्यतः प्रतिबन्दीमुखेन समाधातुमाह-- किं चेति।। सर्वकार्येति।। अनुमितितदितरर्वकार्येत्यर्थः। हेत्वाभासत्वं हेत्वसाधारणदोषत्वमित्यर्थः। परमुखेनोत्तरं वाचयित्वा सममित्याह -- यदि चेति।। सममिति।। तथाचासाधारणमनुमितिप्रतिबन्धकत्वमादाय हेत्वाभासत्वं भविष्यतीति भावः।।
मणिकण्ठो २ क्तहेत्वाभासासाङ्कर्यभङ्गः।। ३७ ।।

लीलावत्युक्तहेत्वाभासचातुर्विध्यभङ्गः ।। ३७ ।।
लीलावत्यां तु --
असिद्धविरुद्धसव्यभिचारानध्यवसिताश्चत्वारो हेत्वाभासाः। बाधप्रतिरोधौ तु पूर्वोक्तरीत्या

लीलावत्युक्तहेत्वाभासचातुर्विध्यभङ्गः ।। ३८ ।।
लीलावत्यां त्विति।। इत्युक्तमित्यन्वयः। पूर्वोक्तरीत्येति।।

१.द्वयीप्र-क.ग.रा. २.र्णोक्त-ट.

पु - ३४८. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

व्याप्तिपक्षधर्मताप १ हारेणैव दोषौ। न स्वातन्त्रेण। तत्र व्याप्तिपक्षधर्मतावत्वेनानिश्चितो हेतुरसिद्धः। तेनासिद्धित्रयस्य संग्रहः। पक्षैकवृत्तिरनध्यवसितः।।
यद्यपि सव्यभिचारविरुद्धानध्यवसितेषु व्याप्त्यप्रमितिरूपा व्याप्यत्वासिद्धिरस्ति। तथाऽपि व्यभिचारिणि परार्थानुमाने सर्वोपसंहारप्रवृत्तोदाहरणवाक्यादुपाध्यस्फुरणदशायां व्याप्तिग्रहण २

सम्भवाद्व्याप्त्यग्रहो नोद्भावयितुं शक्य इति व्यभिचार एवोद्भाव्यः। विरुद्धे ३ तु विपरीतप्रतिबन्धे वाक्यस्थेऽन्तरङ्गे स्फुरति सति बहिरङ्गव्याप्त्यज्ञानादिकं नोद्भाव्यम्।

बाधितस्थले हेतोः साध्याभाववद्वृत्तित्वेन व्याप्तेरपहारेण सन्दिग्धसाध्यवद्वृत्तित्वाभावेन पक्षधर्मताप ४ हारेणेत्यर्थः। दूषणसौकर्यायासिद्ध्यादेः लक्षणमाह -- तत्रेति।। असिद्धत्रयस्येति।। आश्रयासिद्धस्वरूपासिद्धव्याप्यत्वासिद्धरूपसिद्धत्रयस्येत्यर्थः।
साध्याभावव्यप्तो विरुद्धः। पक्षत्रयवृत्तिः सव्यभिचार इति व्यक्तत्वात्तयोर्लक्षणानुक्तिः। साङ्कर्यशङ्कामनूद्य निराह-- यद्यपीत्यादिना।। व्यभिचारिणीति।। अनित्यः शब्दः ५ प्रमेयत्वात् यत्र ६ प्रमेयत्वं तत्रानित्यत्वं घटादाविति व्यभिचारिणीत्यर्थः। विपरीतप्रतिबन्ध इति।। प्रतिबन्धो व्यप्तिः साध्याभावेन सह होतोर्व्याप्तिरूपविपरीतव्याप्तौ स्फुरन्त्यां नित्यः -

१.परिहा -ट. २.हरं-क.ग.रा. ३.द्धेवि-क.ग.रा. ४.ताकारेण-ट. तापरिहारेणे-ठ. ५.ब्दः मे-ट.ठ.ड. ६.त्रमेय -ट.ठ.ड.

लीलात्युक्त-हेसचाध्यङ्गः) अनुमादोषवादः पु - ३४९.

अनध्यवसिते तु विपक्षव्यावृत्तिमुखेन व्यतिरेकणव्याप्तेर्दर्शितत्वान्न व्याप्त्यसिद्धिरुद्भावयितुं शक्या। न चानध्यवसिते सन्दिग्धसाध्यवत्पक्षमात्रवृत्तित्वेन साध्याभावसम्बन्धाद्व्यभिचार एवास्त्विति वाच्यम्। सपक्षविपक्षयोर्लिङ्गज्ञानस्यैवानध्यवसाय १ रूपज्ञानहेतुत्वेन सरलदूषणतयोद्भावत्वात्। तत्फलतो व्यभिचारस्तु विलम्बितप्रतीतिक इत्युक्तमअ।।

तन्न। व्यभिचारिणि त्वया समर्थितेन व्यभिचारस्योद्भाव्यत्वेनैव मदुक्ताव्याप्तेरेवोद्भाव्यत्वसिद्धेः। उक्तं हि -- साध्याभावसम्बन्धरूपो -

शब्दः कृतकत्वादिति वाक्यादवगम्यमानायामित्यर्तः। अनध्यवसितेत्विति।। भूर्नित्या गन्धवत्वात् यत्र नित्यत्वाभावः तत्र गन्धवत्वाभावो २ जलादाविति साध्याभावहेत्वभावयोर्विपक्षवृत्तित्मुखेन व्यतिरेकव्याप्तेरनध्यवसित ३ प्रयोक्त्रा दर्शितत्वादित्यर्थः।। व्यभिचार एवेति।। सन्धिग्धव्यभिचार एवास्त्विवत्यर्थः।।
सरलेति। अक्लेशदूषणतयेत्यर्थः। तत्फलभूतोऽनध्यवसायज्ञानभफलभूतः। कथं सिद्धिरित्यत आह -- उक्तं हीति।। साधारणस्याव्याप्तावन्तर्भावप्रस्तावे प्रागुक्तमित्यर्थः।।

१.यरूपत्वेन -इति यज्ञानरूपत्वेन, इति चद्वेधा शोधितमस्ति - ट. २.यथेत्यधइकम्-ट. ३.हेतुपदमधिकमस्ति -ट.ड.

पु - ३५०. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

व्यभिचार एवाव्याप्तिरिति। न चानित्यत्वसाधकस्य मेयत्वादेर्गगनादौ व्याप्तिभङ्गे स्वेन प्रमितेऽप्यनाप्तवादि १ वाक्यादुदाहरणादेव व्याप्तिसिद्धिः।
शब्दोऽनित्यश्चाक्षुषत्वादित्यादावसिद्धेरप्यनुद्भाव्यतापातात्। तत्रापि वादिवाक्येनेवोपनयेनैव पक्षधर्मताया ज्ञातत्वात्।।
किंच यदि व्यभिचारिणि शक्योद्भावनत्वाद्व्यभिचारमादाय व्यप्त्यप्रमितेस्त्यागस्तर्हि तत एवासिद्धेरपि पक्षे हेत्व २ सत्वमादाय पक्षे हेतुसत्वाप्रमितिरूपासिद्धिरपि त्यागः स्यात्। ततश्च पक्षे हेतुसत्वं हेत्वाभासान्तरं स्यात्।

ननूक्तम ३ त्रोदाहरणवाक्याद्व्याप्तिग्रहसंभवादव्याप्त्युद्भावनमशक्यमिति चेत्, सत्यमुक्तम्। दुरुक्तं तदित्याह -- न चेति।। व्याप्तिसिद्धिरित्यनेनान्वयः। प्रमित इति।। अनाप्तेति च।। हेतुगर्भ ४ विपरीतप्रमासद्भावेऽप्यनाप्तवाक्याद्भावनमप्यशक्यं स्यात्। स्वस्य हेतु ५ त्वाभावनिश्चये सत्यपि वादिवाक्याद्धेतुसत्वनिश्चयस्य संभवादिति भावेनाह -- शब्द इति।। प्रतिबन्दीरूपेणातिप्रसङ्गं चाह -- किंच यदिति।। त्याग इति।। अनुद्भावनं तत एव शक्योद्भावनत्वादेवास्तु को दोष इत्यत आह -- ततश्चेति।। हेत्वाभासान्तरमिति।। त्वया व्याप्तिपक्षधर्मतावत्वेनानिश्चितो हेतुरसिद्ध इति त्वयोक्तत्वेन तदपेक्षया हेत्वसत्वमात्रं हेत्वाभासान्तरं स्यात्। तथा च त्वदुक्तचतुष्ट्वभङ्ग इति भावः। परमुखेनैवोत्तरं वाचयित्वा सममित्याह -- तत्र पक्ष इति।।

१.वादिपदं न-क.रा. २.त्वसिद्धत्व-ग.रा. ३.मातो-ट.ड. ४.र्भम्। विप - क.ग. ५.तुत्वाभाव -ट.ड.

लीलात्युक्त-हेसचाध्यङ्गः) अनुमादोषवादः पु - ३५१.

हेत्वसत्वं हेतुसत्वानुपलम्भनिर्वाह्यं चेत् व्याप्त्यभावरूपो व्यभिचारोऽपि व्याप्त्यनुपलम्भनिर्वाह्य इति समम्। विरुद्धेऽपि नियतसाध्याभावसंबन्धरूपायां विपरीतव्याप्तौ मदुक्ता व्याप्तिरन्तर्गतैव। न तु बहिरङ्गा। अनध्यवसितेपि सपक्षविपक्षयोर्यलिङ्गा १ ज्ञानमसाधारणप्रस्तावोक्तरीत्या न स्वतोऽनुमितिप्रतिबन्धकम्। किं तूपाध्यादिवदव्याप्त्युन्नायकमेव। अन्यथोपाधिः सिद्धसाधनं च सरलतया हेत्वाभासान्तरं स्यात्।।

अपि च दूषणत्वादुद्भावनम्। न तूद्भावनाद्दूषणत्वम्। क्लृप्तं चाव्याप्तेर्दोषत्वम्। न तु सपक्षविपक्षयो २ र्लिङ्गज्ञानस्य।।

तथा चानुपलम्भ एव दोषो ३ तु हेत्वसत्वमित्यर्थः। अस्मिन्नपि मते विरुद्धोप्यव्याप्त्यन्तर्भूत इत्याह -- विरुद्धेऽपीति।। साध्याभावव्याप्तरूपे विरुद्धेपीत्यर्थः। मदुक्तेति।। साध्याभावसंबन्धरूपा। न तु बहिरङ्गेति।। साध्याभावव्याप्तरित्यर्थघः। दूषणमिति योज्यमअ। पराभिमतानध्यवसितपक्षे हेत्वाभावसत्वमेव दुर्घचं कुतोन्तर्भावचिन्तेति भावेनाह -- अनध्यवसितेपीति।। असाधारणेति।। असाधारणस्याव्याप्त्यन्तर्भावोक्तिप्रस्तावे व्याप्त्यभावव्याप्यतया दूषकस्य इत्यादिग्रन्थेनोक्तरीत्येर्थः।। यदप्यनध्यवसिते विपक्षव्यावृत्तिमुखेन व्यतिरेकव्याप्तेर्दर्शितत्वान्न व्याप्त्यसिद्धिरुद्भावयितुं शक्येति तत्राह -- अपि चेति।। ततश्चाव्याप्तिरेव दोषत्वेन क्लृप्तत्वादुद्भाव्येति भावेनाह -- क्लृप्तं चेति।।

१.ङ्गज्ञा-क.ग. २.ङ्गज्ञा-ग.रा. ३.तु इतिन -ट.ठ.ड.

किं चानध्यवसिते हेतोः पक्षवृत्तित्वाज्ञानेऽसिद्धिप्रसङ्गेन पक्षवृत्तित्वज्ञानस्यावश्यकत्वादति सरलतयाऽसाधारणन्यायेन सन्दिग्धसाध्यवन्मात्रवृत्तित्वरूपाऽव्याप्तिरेव दोषोस्त्विति दिक्।।
लीलावत्युक्तहेत्वाभासचातुर्विध्यभङ्गः।। ३७ ।।

अतिसरलयेति।। १ अतिव्याप्तिरेव दोष इत्यन्वयः।।

नन्वेवं चेत्केवलव्यतिरेकिविषयापत्तिरित्यत उक्तं -- असाधारणन्यायेनेति।। तत्रैच्चोद्यसमाधानादिति भावः।।
ननूक्तरूपानध्यवसितस्याव्याप्तिज्ञानं प्रत्युपजीव्यत्वादयमेव तत्र दोष इति चेन्न। उपजीव्यत्वेऽपि व्याप्त्याद्यभावरूपत्वाभावेन स्वतो २ दूषणत्वाभावात्। अन्यथोपाध्यादिरपि दोषः स्यादित्युक्तत्वात्। किं च सपक्षविपक्षयोर्लिङ्गज्ञानस्य स्वयमज्ञायमानत्वेन ज्ञायमानतया प्रतिबन्धकीभूताव्याप्तेरेव हेत्वाभासत्वेन
वक्तव्यत्वात्। अपि चानुकूलतर्कावतारदशायामपि सपक्षविपक्षयोर्लिङ्ग ३ ज्ञानस्य सत्वेन तदाप्यनुमितिप्रतिबन्धकतया दोषत्वापातादित्यभिप्रेत्याह -- इति दिगिति।।
लीलावत्युक्त ४ हेत्वाभासचातुर्विध्यभङ्गः।। ३८ ।।

१.अव्याप्तिरेव -ट.ठ.ड. २.षकत्वा-ट.ठ.ड. ३.ङ्गाज्ञान-ड. ४.त्याद्युक्त-ड.

भाज्ञोक्त-हससाध्यङ्गः) अनुमादोषवादः पु - ३५३.

भासर्वज्ञोक्तहित्वाभाससाप्तविध्यभङ्गः ।। ३७ ।।
एतेन यदुक्तं - भासर्वज्ञेन -- असिद्धविरुद्धानैकान्तिकानध्यवसितकालात्ययापदिष्टसत्प्रतिपक्षप्रकरणसम ा इति १ हेत्वाभासाः। तत्रा २ सिद्धविरुद्धौ असिद्धप्रभेदश्च पूर्वोक्तरीत्यैव। पक्षत्रयवृत्तिनैकान्तिकः। साध्यासाधकः पक्ष एव वर्तमानोऽनध्यवसितः। असाधारणानुपसंहारिणावनध्यवसतितान्तर्भूतौ। एकत्र तुल्यबलहेतुद्वयोपनिपातः सप्रतिपक्षः। स एव विरुद्धव्यभिचारीत्युच्यते। स्वपरपक्षसिद्धावपि त्रिरूपो हेतुः
प्रकरणसम -

भासर्वज्ञोक्तहेत्वाभाससाप्तविध्यभङ्गः।। ३९ ।।
पूर्वोक्तरीत्यैवेति।।
आश्रयासिद्धस्वरूपासिद्धव्याप्यत्वासिद्धव्यधिकरणासिद्धादिरूपेण प्रभेद इत्यर्थः। पक्षत्रयेति।। पक्षसपक्षविपक्षवृत्तिरित्यर्थः। व्यतिरेकिणि सद्धेतावतिव्याप्तिनिरासाय साध्यासाधक इत्युक्तिः। एकत्रेति।। पक्ष इत्यर्थः। ननु विरुद्ध ३ व्यभिचारीत्यपि कश्चि ४ द्धेत्वाभास इत्याह -- स एवेति।। त्रिरूप इति।। पक्षवृत्तित्वं सपक्षे सत्वं विपक्षाद्व्यावृत्तत्वमित्येवं रूपेण त्रिरूप इत्यर्थः। यथा विमतं मिथ्या दृश्यत्वात् शक्तिरूप्यवत्- विमतं -

१.नियमेन व्याप्तेः इत्यधिकम्-रा. २.सिद्धप्रभेद -क.ग.ट.रा. ३.द्भाव्य - ट.ठ.ड. ४.दस्ति हेत्वाभा- ठ.ड.

पु - ३५४. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

इति । तदपि निरस्तम्। असिद्धभेदस्य व्याप्यत्वासिद्धे, १ विरुद्धादि त्रितयस्य चाव्याप्तौ, कालातीतादित्रितयस्य च प्रतिज्ञाविरोधेन्तर्भावस्यो २ क्तत्वात्। व्यधिकरणासिद्ध्यादेरदोषत्व ३ स्ययोक्तत्वात्।।
भासर्व ४ ज्ञोक्तहेत्वाभासमाप्तविध्यभङ्गः।। ३८ ।।

सत्य दृश्यत्वात् ब्रह्मवदिति।। पक्षद्वये त्रिरूपत्वं च प्रतिपक्षे ५ तुल्यत्वमिवाभिमानिकम्। अतो नासंभव इत्युक्तं प्राक्।।
भासर्वज्ञोक्तत्वाभाससाप्तविध्यभङ्गः ।। ३९ ।।

सामान्येन परोक्तहेत्वाभासनियमभङ्गः ।। ३९ ।।

अयमत्र निष्कृष्टोऽर्थः। मदुक्तासिद्ध्व्याप्तिव्यतिरिक्ता हेत्वाभासाः बहुभिर्बहुसङ्ख्याकाः कल्प्यन्ताम्। बहुधा च निरुच्यान्ताम्। तथाऽपि ते सर्वे न तावत्पक्षधर्मताविघटनरूपाः। असिद्ध्यन्तर्भावापत्तेः।
सामान्येन परोक्तहेत्वाभासनियमभङ्गः।। ४० ।।
श्रोत्रृबुद्धिसौकर्यायोक्तस्य सर्वस्य निष्कृष्टमर्थमाह -- अयमत्रेति।।
चतुर्विधा हि वादिभिरुच्यमानाः सम्भवन्ति
हेत्वाभासाः। पक्षधर्मताविरहरूपा वा, तद्वि ६ रुद्धहेतुभूता वा, व्याप्तिविरहरूपा वा, व्याप्तिविरहहेतुभूता वेति हृदि निधाय क्रमेणाह -- न तावदित्यादिना।।

१.द्धर्वि-रा. २.उक्तत्वादिति न -क.ग.ट.रा. ३.स्योक्तत्वा-क.ग.रा. ४.सर्वोक्त -ट.रा. ५.ल्यबलत्व-ट.ठ.ड. ६.द्विरहरूपा वा-ट. ७.द्विरहहेतुभूत वा-ठ.ड.

सान्येन-पक्तहेस-निमङ्गः) अनुमादोषवादः पु - ३५५.

नापि १ तद्विघटकाः। त्वत्पक्षे सिद्धसाधनवदसिद्ध्युन्नायकत्वेन स्वतो दोषत्वायोगात्। नापि व्याप्तिविघटनरूपाः। अव्याप्त्यन्तर्भावापत्तेः। नापि व्याप्त्यभावव्याप्तत्वेन व्यप्तिविघटकाः।
उपाधिप्रतिकूलतर्कानुकूलतर्काभाववदव्याप्त्युन्नायकत्वेन स्वतो दोषत्वाभावात्। न च हेत्वाभासत्वे पञ्चमप्रकारोऽस्ति। व्याप्तिपक्षधर्मतायुक्तहेतोराभासत्वायोगात्।।
किं च सव्यभिचारविरुद्धानध्यवसितेषु न तावदव्याप्तिर्नास्तीति युक्तम्। तेषु पक्षधर्मतायाः सत्वेन हेतोराभासत्वायोगात्। नाप्यव्याप्तेः सत्वेऽपि तदज्ञा २ नेऽपि अन्यज्ञानादेवानुमानं दुष्टमिति वाच्यम्। अन्यस्यानुमानाविरोधित्वे दोषत्वायागात्। विरोधित्वमपि न

तावत्साक्षात्फलविघट ३ नेन। बाधप्रतिरोधान्तर्भावापत्तेः। नापि करणविघट ४ नेन। तथात्वे व्याप्तिपक्षधर्मतान्यतर-

नन्वस्त्वितोऽन्य ५ त्रैव कश्चन प्रकार इत्यत आह -- न च हेत्वाभास ६ त्व इति।। व्याप्तिपक्षधर्मतातद्विघटनकरूपप्रकारचतुष्टयान्यः पञ्चमः प्रकार इत्यर्थः। व्याप्तिपक्षधर्मतायुक्तत्वमेव प्रकार इत्यत आह -- व्याप्तीति।। प्रकारान्तरेण सव्यभिचारादिहेत्वाभासनियमं पराभिमतं निराह -- किंचेति।। फलेति।। अनुमितिरूपफलेत्यर्थः।। बाधेति।।

१.पक्षधर्मत्वाभावव्याप्यतया - इति पूरितमस्ति-ट. २.नकाले भिन्नज्ञा-ग.ट.रा. ३.टकत्वेन -ग.ट.रा. ४.टकत्वेन -ग.ट.रा. ५.न्य एवक-ट.ठ.ड. ६.स इति-ड.

पु - ३५६. न्यायदीपयुततर्कताण्डवम् (तृ.परिच्छेदः

विघटनस्यावश्यकत्वेनाव्याप्त्यसिद्ध्यन्यतरान्तर्भावस्य दुर्वारत्वात्।।
एतदेवाभिप्रेत्योक्तं प्रमाणलक्षणे -- असिद्धिरव्याप्ति १ श्च हेतुविरोध इति।।
समान्येन परोक्तहेत्वाभासनियमभङ्गः।। ३९ ।।
ॐ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्ब्रह्मण्यतीर्तथपूज्यपादानां शिष्येण श्रीमव्द्यासयतिना विरचिते श्रीमत्तर्कताण्डवे अनुमानप्रपञ्चनं समाप्तम्।।
अनुमानपरिच्छेदः
श्रीकृष्णार्पणस्तु.

तयोर्ग्राह्याभावावगाहित्वेन साक्षादेवानुमितिप्रतिबन्धकत्वादिति भावः।
एतदेवेति।। उक्तनिष्कृष्टं प्रमेयमेवाभिप्रेत्येत्यर्थः।।
सामान्येन परोक्तहेत्वाभासनियमभङ्गः ।। ४० ।।
यत्प्रसादादिमां व्याख्यामकार्षं नौमि तं हरिम्।
अनसूयागर्भरत्नमान्वीक्षिक्याः प्रकाशकम्।।
निर्दोषगुणपूर्णेन श्रीप्राणपतिनेरितः।
यदवोचमहं तेन प्रीणातु पुरुषोत्तमः।।
प्रायेणालसबुद्धित्वाल्लोकानां तज्ज्घृक्षया।
वादा २ र्थमात्रमब्रूम नोद्ग्रन्थं क्षम्यतां बुधैः ।।
इति श्रीमत्परमहंसपरिव्राजकाचार्यसुधीन्द्रतीर्थगुरुपादशिष्यराघवेन्द्रयतिकृते
तर्कताण्डवविवृत्तौ न्यायदीपे तृतीयः परिच्छेदः
संव्याख्यं तर्कताण्डवं समाप्तम्
श्रीकृष्णार्पणमस्तु.
१.प्तिरित हे-ग.ट.रा २.क्यार्थमा-ट.ठ.ड. ३-७-२००१.